REPRODUCTION OF EARLIE EDITION OF THE
SABDARTHACINTAMANIH

शब्दार्थचिन्तामणिः

ŚABDĀRTHACINTĀMAṆIH

प्रथम खण्ड

भाग - अ

ब्राह्मावधूत श्रीसुखानन्दनाथः

प्रिन्टवैल

जयपुर- 302 004

Published bv
PRINTWELL
S-12 Shopping Complex
Tilak Nagar Jaipur 302 004

Distributed by
RUPA BOOKS PVT LTD
H O S-12 Shopping Complex Tilak Nagar Jaipur 302 004
B O 295-B Bharti Nagar, P N Pudur Coimbatore 641 041

ISBN 81 7044-369 5 (Set)

SABADARTH CHINTAMANI
First Published 1860
Reprint - 1992

Printed at
Efficient Offset Printers
215 Shahzada Bagh Indl Complex
Phase-II Phone 533736 533762
Delhi 110035

तत् सत्

शब्दार्थचिन्तामणि:

अर्थात्

गीर्वाणभाषासाशेषशास्त्रानेककोशादिभ्य सङ्गृहीताना मकाराद्यर्ण
क्रमेण विन्यस्तानां शब्दानां तत्तल्लिङ्गनानार्थैकार्थपर्यायप्रयोगोल्लेखेन
पाणिन्युक्तनिरुक्तिरूपै स्तत्तदर्थस्फुटीकरणेन तत्तच्छब्दप्रस्तावागतवे-
दाङ्गस्मृतिपुराणागमेतिहासादिप्रयोगै रूदशिल्पसङ्गीतादिशास्त्रीय
विषयाणां वर्णने. शस्त्रास्त्रधातुरत्नादिपरीक्षाभि र्ग्राम्यारण्यपशुप
क्ष्यादिलक्षणै र्दगार्गलेन सजलनिर्जलभूमिपरिज्ञानेनोद्यानवृक्षा
युर्वेदेन द्रव्यगुणरोगनिदानादिभि रलङ्कारच्छन्द'प्रभृतिनाम
लक्षणोदाहरणैश्च संयुक्तोखिलशास्त्रमताभिद्योतक
सहृदयहृदयाह्लादको ग्रन्थ ॥

तस्यायम वर्गकवर्गात्मक:
प्रथमोभाग:

ब्राह्मावधूतश्रीसुखानन्दनाथेन विनिर्मित'

एकविंशत्यधिकोनविंशतितमे १९२१ वैक्रमेऽब्दे आगरेति साधारणत
याविख्याते अग्रपुरे आदिगौडश्रीघासीरामकन्हियालालयोः स्वीये
नवयोजिते संस्कृतयन्त्रालये श्रीरामप्रसादद्वारा मुद्राक्षिप्या
ऽभिव्यक्त'

तत् सत्

शब्दार्थचिन्तामणेर्मुखबन्धः तत्राह

श्रीजगदानन्दनाथः

नमो गुरवे ॥ श्रीमद्गौडकुले नितान्तविपुले ऽडीचप्रयोत्येऽतुले जातः पुष्करराज इत्यभिधया ख्यातो धरामण्डले । यत् सौजन्यसुधासरित्पतितरङ्गान्दोलनानन्दिता विद्यौदार्य्यदयादिशेवधिपराःसर्वे बभूवुर्ज्जनाः ॥ १ ॥ श्रीनन्दलालः सुकृते विशाल स्तुलादिरामसुमनोऽभिरामः । तदात्मजा वप्रतिमप्रभावौ श्रीरामरामानुजनैजभावौ ॥ २ ॥ श्रीनन्दलालपत्नी सुषुवे सुनुत्रयं सुता मेकाम् । प्रथमस्तु शम्भुनाथोऽन्तरजो रामप्रसादाख्यः ॥ ३ ॥ मोतीरामोऽवरजः सर्वे सकलार्थतत्त्वज्ञाः । देवी सुलक्षणासीद् याद्धि सती शीलसम्पन्ना ॥ ४ ॥ विद्वत्तुलारामसुतो भवानीशङ्करोऽभवत् । ज्येष्ठःश्रेष्ठमति नीतिससारासक्तमानसः ॥ ५ ॥ द्वितीयः सम्भूतो धनपतिपुरो राज इति यं कुलीना नामै न जगति कृतवन्तो मुमुदिरे । प्रकृत्या ऽऽजन्माऽसौ विरलतरकर्म्मातिरसिको ह्यगाद्प्रत्यक्च निजजनत एकः शिवपुरीम् ॥ ६ ॥ त्रिचन्द्राब्दायुष्मान् परमपरतत्त्व विविदिषुः पठित्वा शास्त्राणि प्रतिहरिहरानन्दपदलः ॥ प्रतीतं नाथाख्यं निखिलनिगमार्थैकसुधियंगतोऽयं योगीन्द्रं कुशलमवधूतं कृपालुम् ॥ ७ ॥ प्रीत्या नमस्या सन्तुष्टः सद्गुरुः करुणानिधिः । त्व सुखानन्दनायोसौ ख्यापष्ट इति यथोचितम् ॥ ८ ॥ आत्मावधूतपदवीं प्राप्य देशाननेकशः ॥ गाहं गाहं बहुविधान् दर्शं दर्शं जनव्रजान् ॥ ९ ॥ ज्वालामुखीं महादेवीं जालन्धरनिवासिनीम् ॥ अग्निवान् सुषमं पश्यं स्तत्र स्थितिमुपाश्रयत् ॥ १० ॥ यात्राप्रसक्तोऽस्मिन् भज्जीदेशाधिप स्तदा गतवान् ॥ रामादिरुद्रपालोऽमृतपालसुतो महोदारः ॥ ११ ॥ पर्वतराज श्चतुर श्चतुर्षु यत्नेषु दीक्षितो विद्वान् ॥ श्रीरुद्रमणेः शिष्योऽमुं विचरन्त यदाद्राक्षीत् ॥ १२ ॥ आहूय श्रुतवाणीजनितश्रद्धो निनीषुरनुकूलः ॥ शुश्रूषया स्वदेशं तं प्रार्थ्यानी

नयद् यथायोग्यम् ॥ १३ ॥ सो ऽयं प्रसन्नहृदयो महाशयाहैतुकीभक्त्या ॥ अर्पितरत्नभद्राख्यं तत्पुत्रं पाठयन् न्यवसत् ॥ १४ ॥ निश्चिन्तो विरले समन्तत उपेतेऽष्टार्थसिद्धि स्ततश्चिन्तां तत्र समासदद् द्विजकुले दृष्ट्वा कले रापदा ॥ मैत्र्य तस्य तुशान्तये निखिलशास्त्रार्थौज्जिहीर्षुर्मुदा व्यास्यत् कोशकलाधरं कविवरं शब्दार्थचिन्तामणिम् ॥ १५ ॥ गङ्गातीरे रुद्रपाले शिवेन शिवतां गते ॥ मात्वा नैमित्तिकाभावं निमित्ताभावसङ्गतौ ॥ १६ ॥ इन्द्रप्रस्थं पुनःप्रत्यागत्य मनसि चिन्तयन् ॥ कथमेतस्य कोशस्य स्यात् प्रवृत्ति र्निरन्तरा ॥ १७ ॥ प्रस्तुतश्रीनन्दलालदौहित्रौ श्रेयआश्रयौ ॥ कोविदौ व्यवहाराणां प्राय स्तुग्ननिवासिनौ ॥ १८ ॥ सुश्रीलालाग्रजो घासीरामनामा प्रतापवान् ॥ धनिमान्यो राजमान्य स्वभुजार्जितसद्यशाः ॥ १९ ॥ बालप्रवासिनं दैवनोदितो दूरदर्शिनम् ॥ स मातुल मनुप्राप्य कृत्वालापं मनोगतम् ॥ २० ॥ कोशप्रशंसां प्रस्तावे श्रुत्वा तस्योत्सुकं मन ॥ तन्मुद्रीकरणायाशु यदाश्चर्यं भवो भवीत् ॥ २१ ॥ परेश्वरकराङ्केकमिते १९२१ विक्रमहायने ॥ तदैव मुद्रितो भागःप्रथमः साङ्ग इत्यभूत ॥ २२ ॥ उत्तमश्लोकशिष्येण श्रीपादाम्बुजसेविना ॥ धर्म्मीसारस्वतेनैभिरिन्द्रप्रस्थनिवासिना ॥ २३ ॥ जगदानन्दनाथेन पारम्पर्यानुवर्त्तिना ॥ जगदीशोपनाम्नैषा श्लोकैरुद्घाटिता कृतिः ॥ २४ ॥ * ॥ * ॥

अथ शब्दार्थचिन्तामणौ संकेताक्षराणां विवरणम् ॥

अ०	अर्द्धर्चा पुंसिच ॥ अश्वादिभ्य'फञ् ॥	अनु० उ०	अनुशतिकादित्वादुभयपदवृद्धिः ॥
अघ०	अघ्रादिभ्यश्चेति यत् ॥	अन्य०	अन्यत्रापीतिडः ॥
अङ्गु०	अङ्गुल्यादि भ्यष्ठक् ॥	अन्ये०	अन्येषामपीति दीर्घ ॥ अन्येभ्योपीति डः ॥ अन्येभ्योपिदृश्यतेइतिवः । वल ॥
अजा०	अजादित्वाट् टाप् ॥		
अध्या०	अध्यात्मादित्वाट् ठञ् ॥		

	अन्येभ्योपि दृश्यते क्विप् ॥ अन्येभ्योपि दृश्यते इति यप् ॥ अन्येभ्योपि दृश्यन्ते ॥ मनिन्क्वनिप्वनिप् विच एते ॥
अन्येष्व०	अन्येष्वपि दृश्यते इति ड ॥
अब्०	अब्दादयश्चेति साधुः ॥
अर्श्०	अर्शआदिभ्योऽच् ॥
अली०	अलीकादयश्चेति कीकन् ॥
अश्रु०	अश्र्वादयश्चेति साधुः ॥
अश्व०	अश्वपत्यादिभ्यश्चेत्यण् ॥
आ०	आकर्षादिभ्यः कन् ॥
आद्या०	आद्यादिभ्य उपसङ्ख्यानमिति तसिः ॥
इ०	इति ॥
इ०वि०ति०	इतिविष्णुपुराणतिलके
इ०रा०	इतराभ्योपि दृश्यन्ते तसिलादय ॥
इष्०	इष्टादिभ्यश्चेति इनिः ॥
उ०	उक्थादित्वात् ठक् ॥
उत्०	उत्सादित्वादञ् ॥
उद्०	प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ॥
उदा०	उदाहरणम् ॥
उर्०	उरःप्रभृतिभ्यः कप् ॥
उल्०	उल्वादयश्चेति वक्रान्तसाधुः ॥
उलू०	उलूकादयश्चेत्यूकः ॥
ऋ०	ऋत्वादिभ्यः क्तिन्निष्ठावद्वाच्यः ॥
ए०वि०	एतद्विवरणम् ॥
कं०	कण्ड्वादिभ्यो यक् ॥
क०	कर्ममीमांसायाम् ॥
क०ि०	कश्चित् ॥
कच्०	कच्छादिभ्यश्चेत्यण् ॥
कत्०	कत्र्यादिभ्यो ढकञ् ॥
कपि०	कपिलकादित्वाल्लत्वम् ॥
कम०	कमलादिभ्यः खण्डः ॥
कल्या०	कल्याण्यादित्वात् ढक् । इनङागमश्च ॥
का०	काश्यपः । काश्यादित्वात् ञिठः ॥
का०पु०	काशीपुराणम् ॥
कालि०	कालिदासः ॥
का०	कादिभ्य किदितिडः ॥
काशी०	काशीखण्डम् ॥
का०सू०	कापिलसूत्रम् ॥
कि०	किसरादिभ्यष्ठन् ॥
किशो०	किशोरादयश्चेत्योरन् ॥
कु०	कुर्वादिभ्यो ण्य ॥
कु०	कुटादिः ॥
कुला०	कुलालादिभ्यो वुञ् ॥ कुलावंशः ॥
कू	कूर्मपुराणम् ॥
के०	केचित् ॥
कु०	कुञ्जादिभ्यः संज्ञायां वुन् ॥

क्रूद°	क्रूदरादयश्चेतिसाधुः ॥
क्रतू°	क्रतूक्थादिसूत्रान्ताट्ठक् ॥
क्रमा°	क्रमादिभ्योवुन् ॥
ख०	खण्डिकादिभ्याञ् ॥
ख°	खर्जादिभ्यात् उरः ॥
खर्°	खर्जपिञ्जादिभ्य उरोलचौ ॥
खला०	खलादिभ्यइनिर्वक्तव्यः ॥
ग०	गर्गादिभ्योयञ् ॥
गम्°	गम्भीरादयश्चेति ईरन् ॥
गहा°	गहादिभ्यश्चेतिछ ॥
गु०	गुपादिभ्यःकिदितिइलच्।
गुडा०	गुडादिभ्यष्ठञ् ॥
गौ°	गौरादिः ॥
गौ० भा°	गौडभाषा ॥
गृष्°	गृष्ट्यादिभ्यश्चेतिढञ् ॥
ग्रहि०	नन्दिग्रहिपचादिभ्योल्युणिन्यचइतिणिनि. ॥
चतु०	चतुर्वर्णादीनांस्वार्थे उपसंख्यानम् । ष्यञ् ॥
चु०	चुरादिः ॥
छ०	छत्रादिभ्योणः ॥
छान्°	छान्दस ॥
छा°भा°	छान्दोग्यभाष्यम् ॥
छे०	छेदादिभ्यो नित्यमिति-ठञ् ॥
ज०	जन्वादयश्चेतिसाधुः ॥
जु०	जुहोत्यादिः ॥
ज्व०	ज्वलादिभ्योणः ॥
ज्यो°	ज्योत्स्नादिभ्यादण् ॥
त°	तथाच ॥
त०छ०प०	तदुक्तं छन्दोगपरिशिष्टे ॥
तडा०	तडागादयश्चेतिनिपातः ॥
त० प०	तत् पक्षविषम् ॥
तर०	तरत्यादिभ्यश्चेत्यङ्कुच्
ता०	तारकादिभ्यादितच् ॥
ति०	तिकादिभ्यःफिञ्
तुन्०	तुन्दादिभ्यइलच्चेतिइनिश्च
तु०	तुदादिः
तुषा०	तुषारादयश्चेत्यारन् ॥
दं°	दण्डादिभ्यात् यत् ॥
दाम°	दामन्यादित्रिगर्त्तषष्ठाच्छः ॥
दि°	दिगादिभ्योयदिति यत् । दिवादि ॥
दी°	दीपिका ॥
दृ०	दृढादिः । वर्णदृढादिभ्यः ष्यञ्च । इमनिच्च ॥
नं°	नन्द्यादिभ्यस्ल्युः। नन्दिग्रहिपचादिभ्योल्युणिन्यचः॥
नडा°	नडादिभ्यात् फक् । नडादीनांकुक्चेतिकः ॥
नद्या°	नद्यादिभ्योढगितिढक् ॥
न्यङ्°	न्यङ्क्वादिभ्यात् कुत्वम्॥
न्या°	न्यायसूत्रम् ॥

ना° नारदः ॥
नि° निपातः ॥
नि° निदानम् ॥
नै° नैषध ॥
प° पचाद्यच् । पचाद्याद्यच्॥
प° नन्दिग्रहिपचादिभ्यो ल्यु-
णिन्यच. ॥
प॰प° पराशरपद्धतिः ॥
पर्फ॰ पर्फरीकादयश्चेती कन् ॥
प॰भा° पर्वतभाषा ॥
पर्॰ पर्पादिभ्य.ष्ठन् ॥
पर्श्वा॰ पर्श्वादियौधेयादिभ्यो ऽण
औ ॥
प॰स° पराशरसंहिता ॥
पा॰ पामादिभ्यात् नः ॥
पा॰पा॰ पाद्मे पातालखण्डः ॥
पाचा॰ पाचाद्यन्तस्यनेति स्त्रीत्वं-
न ॥
पार्स्॰ पारस्करादिभ्यात् सुट् ॥
पाश॰ पाशादिभ्योय' ॥
पि॰ पिच्छादिभ्यात् इलच् ॥
पिञ्ज॰ खर्जपिञ्जादिभ्यज रोल
चाविन्त्यू लच् ॥
पिना° पिनाकादयस्सेच्याकः ॥
पु° पुष्करादिभ्योदेशेइति इ-
नि. । पुराणम् ॥
पुरो° पत्यन्तपुरोहितादिभ्योयक्
पृ° पृषोदरादीनि यथोपदि-
ष्टम ॥
पृथ्° पृथ्वादिभ्य इमनिज्वा ॥
प्र° प्रसिद्ध' । प्रज्ञादिभ्यश्चेति
स्वार्थे ऽण् प्रत्ययः ॥
प्रति° प्रतिजनादिभ्य खञ् ॥
प्रा°वि° प्रायश्चित्त विवेकः ॥
फ° फलम् ॥
ब° बलादिभ्योमतुप् ॥ बसिष्ठः
। बहुलमन्यत्रापी तियुच्॥
वङ्° वङ्क्यादयश्चेति क्रिन् ॥
बला° बलाकादयस्सेच्याकः ॥
वसं° वसन्तादिभ्यष्ठक् ॥
बह्वा° बह्वादिभ्यश्चेति ङीष् ॥
व॰वृ° वर्षवृत्तप्रभेदः ॥
बा° बाहुलकात । बाह्वादि-
भ्यादिञ् ॥
वा°पु° वायुपुराणम् ॥
वाहि° वाहिताग्न्यादिषु॥
वि° विशेषः । विल्वाद्यण् ॥
विडा° विडादिभ्यःकिदित्यक्षम् ॥
विदा° अनृष्यानन्तर्ये विदादिभ्यो
ऽञ् ॥
वि°ध° विष्णुधर्मोत्तरम् ॥
विन° विनयादिभ्यष्ठः इति स्वा
र्थेठक् ॥
वि°पु° विष्णुपुराणम् ॥
वी° वीरमित्रोदयः ॥
वे°भा° वेदभाष्यम् ॥

चेत०	चेतनादिभ्यो जीवतीति-ठञ् ॥
वै०	वैदिकप्रयोग ॥
वै०प०	वैद्यकपरिभाषा ॥
वै०म०	वैद्यकमतम् ॥
वृ०	वृक्षे ॥
वृक्षा०	वृक्षादिभ्यःखण्डः ॥
वृषा०	वृषादिभ्यश्चिदितिकन ॥
वृह०	वृहद्धर्मपुराणम् ॥
व्यु०	व्युत्पत्त्या ॥
भा०	भावप्रकाशः ॥
ब्र०	ब्रह्मवैवर्त्तपुराणम् ॥
ब्र०पु०	ब्रह्मपुराणम् ॥
ब्र०वै०ब्र०	ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥
ब्रा०	गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ष्यञ् ॥
व्री०	व्रीह्यादिभ्यश्चेतिइनिः ॥
व्या०व०	व्यासवचनम् ॥
भा०	भागवतम् ॥
भा०प०	भाषापरिच्छेद ॥
भा०प्र०	भावप्रकाशः ॥
भार०	भारत ॥
भि०	भिद्भिदादिभ्योऽङ् ॥
भिक्षा०	भिक्षादिभ्योऽण् ॥
भी०	भीमादयोऽपादाने ॥
भू०	भूमि ॥
भ्वा०	भ्वादिः ॥
म०	मत्वर्थीय ॥
मद्गु०	मद्गुरादयश्चेति उरच् ॥
मनो०	द्वन्द्वमनोज्ञादिभ्यश्चेति
म०भा०	महाभारतम् ॥
मयू०	मयूरव्यंसकादित्वात् ॥
मावृ०	माघावृत्तम् ॥
	वुञ् ॥
महा०	महाभारते ॥ महाभारतम् ॥
मा०त०	मायातन्त्रम् ॥
मि०	मिथिलादयश्चेति इलच ॥
मित०	मितद्र्वादित्वात् डु ॥
मु०तं०	मुण्डमालातन्त्रम् ॥
मू०	कप्रकरणे मूलविभुजादिभ्य उपसंख्यानमितिक ॥
मूले०	मूलेरादयश्चेत्येरक् ॥
मृ०	मृगय्वादयश्चेतिक ॥
मो०	मोक्षधर्म ॥
य०	यजादित्वात् । यथा ॥
या०	यावत् । यावादिभ्यःकन् ॥
याज्ञ०	याज्ञवल्क्य ॥
यु०	हायनान्तयुवादिभ्योऽण् ॥
यौ०	पर्श्वादियौधेयादिभ्योऽणञौ ॥
र०	रसादिभ्यश्चेति मतुप् ॥
रा०	रामायणम् ॥
राज०	राजदन्तादिषु परम् ॥
रानि०	राजनिर्घण्ट ॥
रेव०	रेवत्यादिभ्यष्ठक् ॥

ल०	लक्षणम् ॥
ली०	लीलावती ॥
लो०	लोमादिभ्यात् श
ला०	लादिभ्यश्चेतिमत्वम् ॥
श०	शकन्ध्वादि' ॥
शका०	शकादिभ्योटन् ॥
शम्०	शमादिभ्योऽथच् ॥
शर्०	शर्करादिभ्योण् ॥
शा०	शाकपार्थिवादि' । शाखादिभ्योय' ॥
शार्०	शार्ङ्गरवाद्यञो ङीन् ॥
शि०	शिवादिभ्योऽण् ॥
शु०	शुभ्रादिभ्यश्चेतिढक् ॥
शुण्०	शुण्डिकादिभ्योऽण् ॥
श्री०	श्रीभागवतम् ॥
स०	समासः ॥
स०कं०	सरस्वतीकण्ठाभरणम् ॥
स०	सम्पदादिभ्यात्क्विप् ॥
सङ्	सङ्काशादिभ्योण्य ॥
संज्ञा०	संज्ञापूर्वकत्वाद्वृद्ध्यभावः ॥
सम्०	सम्प्रसारणम् ॥
सर्०	सर्वधातुभ्योमनन् ॥
सर्व०	सर्वधातुभ्यइन् । सर्वधातुभ्यःष्ट्रन् । सर्वधातुभ्योऽसुन्
सा०द०	साहित्यदर्पण' ॥
सि०	सिध्मादिभ्यश्चेतिलच् ॥
सिन्०	सिन्ध्वादिभ्यादण् ॥
सिमु०	सिद्धान्तमुक्तावली ॥
सि०शि०	सिद्धान्तशिरोमणि ॥
स्त्रि०	स्त्रियाङ्क्तिन् ॥
सु०	सुषामादिषुचेतिषत्वम् ॥
सुवा०	सुवास्त्वादिभ्योऽण् ॥
स्थूला०	स्थूलादिभ्यःप्रकारवचने कन् ॥
स्म०	स्मरणम् । स्मृति ॥
स्वा०	स्वार्थे ॥
ह०	हरिवंश ॥
हरि०	हरितादिभ्योऽञ् ॥
हरी०	हरीतक्यादिभ्यश्चेतिफलप्रत्ययस्यलुप् ॥
हे०	हेमचन्द्र. ॥

इक्०	इक्कृष्यादिभ्य. ॥
इन्०	इनमपादिभ्य ॥
इण्०	ईणजादिभ्य. ॥
ण्वुल्०	धात्वर्थनिर्देशे ण्वुल्वक्तव्य । सञ्ज्ञायाम् ॥
क:०	अज्ञाते । कुत्सिते । अल्पे । ह्रस्वे ॥
कन्०	सञ्ज्ञायाम् । अनुकम्पायाम् । अवक्षेपेकन् । इवेप्रतिकृतौ । सञ्ज्ञायांच ॥
क्षुभ्०	क्षुभ्नादिषु चेतिणत्वाभाव. ॥

तत् सत्

श्रीगणेशाय नमः

अथ शब्दार्थचिन्तामणौमंगलम्

तत्रादौ मङ्गलाचरणमभिधेयादिकञ्च

नम श्री सद्गुरवे ॥ ॥ श्रीमद्धरिहरानन्दनाथाभिन्नं स्वदेशिकम् नारायणमहं वन्दे सच्छास्त्रज्ञानभास्करम् ॥ लम्बोदरं महाकाय मेकदन्तं गजाननम् । गौरीप्रियं मुदा वन्दे सर्वविघ्नविनाशनम् ॥ २ ॥ नमो देवि महाविद्ये भजामि चरणौतव । देहिज्ञानप्रकाशं मेनिखिलार्थं प्रसिद्धये ॥ ३ ॥ श्रीशारदां शारदचन्द्रकान्ति हृदम्बुजे ऽभीतिवर दधानाम् । पुस्त विपञ्चीं सुकरैः प्रसन्नां ध्याये ऽनिश आश्रहरां त्रिनेत्राम् ॥ ४ ॥ वेद्यं ब्रह्मादिभि र्ध्येयं योगीन्द्रै र्यन्महत्पदम् ॥ तत् तत्त्वं तत्त्व मस्यादिवाक्यै रिष्ट भवाम्यहम् ॥ ५ ॥ यदज्ञानादिद जात यज्ज्ञानेविलयंव्रजेत् । तन्निर्गुण निर्विशेषं ब्रह्मात्मानं समाश्रये ॥ ६ ॥ कोशाननेकानवलोक्य यत्नाच्छास्त्राणि भूयः प्रविचार्य्य तेभ्य. । बालावोधाय लिखामि शब्दान् सार्थन् सुसङ्गृह्यमुदे वुधानाम् ॥ ७ ॥ अल्पा

बुधोऽल्पबुद्धींश्च द्विजान् दृष्ट्वा कलावथ। सुखानन्दोऽलिखच्चैतत् कोषं सुख सुबोधदम् ॥ ८ ॥ सलिङ्गालिङ्गशब्दानां व्यानायत पुरः पुरः। तत्तदाद्यार्थलेखो हि समासार्थौ विधीयते ॥ ९ ॥ जिज्ञासा यत्र कुत्रापि शास्त्रीये शब्द उद्भवेत्। तदैवैतत् पश्यता ऽनुभूयते कृतकृत्यता ॥ १० ॥ तावद् भ्रमति शब्दार्थचिन्ताव्याकुलमानसः। सुश्रद्धानः स्थिरधीर्यावदेनं नपश्यति ॥ ११ ॥ चतुर्दशसु विद्यासु प्रायः शब्दो न तादृशः। मातृकानुक्रमेणाऽत्र सपर्यायो निवेशितः ॥ १२ ॥ निदर्शनेषु शब्दानां तत्तच्छास्त्रसमुद्धृता। गद्यपद्यमयी वाणी वर्णितास्मिन् क्वचित् क्वचित् ॥ १३ ॥ केषाञ्चिद्देशभाषापि सुखबोधाय दर्शिता। अतः परोपकृतये कोऽन्यो भवितुमर्हति ॥ १४ ॥ शब्दार्थचिन्तामणिनामकृतं कोशेषु सर्वेषु च रत्नभूतम्। श्रीमत् सुखानन्दबुधेन कृतद्विजोपकारार्थमिदं प्रभूतम् ॥ १५ ॥ पण्डितै राजधनिनां कृता ग्रन्था ह्यनेकशः धनाढ्ये तु स्वादेतत् सर्वान्तर्यामितुष्टये ॥ १६ ॥ १९२० ॥ खनेत्रशशभूयुक्ते वैक्रमे वत्सरे शुभे। मार्गस्यासितपञ्चम्या मारब्धो मुद्रितुं ह्यसौ ॥ १७ ॥

अथ शब्दार्थचिन्तामणिः

—00000—

अ । । । अभावे ॥ स्वल्पार्थे ॥ प्रतिषेधे ॥ अनुकम्पायाम् ॥ सम्बोधने ॥ अधिक्षेपे ॥ स्वराणामादिमेवर्णे ॥

अः । पुं । वासुदेवे ॥ महेश्वरे नभो-

यमकारः ॥ यद्वा ॥ अततिसर्वं व्याप्नोति । अततेड. ॥ न । परब्रह्मणि ॥

अंशः । पुं । वण्टके । भागे ॥ स्कन्धे ॥ वस्तुन एकदेशे ॥ नवांशे ॥ अंशयते ।

अंशविभाजने । अदन्त. । कर्मणिघञ् ॥
अंशक । पुं । दायादे ॥ अंशहारी अवश्यमंशंहरतीत्यर्थः । अंशहारीतिकन् ॥ अल्पांशे ॥ अल्पार्थेकन् ॥ न । वासरे । दिने ॥
अंशी । त्रि । भागाधिकारिणि । भागिनि ॥ अंशोऽस्यास्ति । इनिः ॥
अंशुः । पु । प्रभायाम् ॥ सूत्रादिसूक्ष्मांशे ॥ किरणे ॥ सूर्ये ॥ अंशयति । अंशविभाजने । चुरादि. । मृगय्वादित्वात्कुः ॥ लेशे ॥ वेगे ॥
अंशुकम् । न । सूक्ष्मवस्त्रे ॥ वस्त्रमात्रे ॥ उत्तरीये ॥ परिधानीये । अधोवस्त्रे ॥ अंशून्कायति । कैशब्दे । आतइतिकः ॥ यद्वा । अंशुभिःकाशते । काशृदीप्तौ । अन्येष्वपीतिडः ॥ तेजपाताख्यापत्रे ॥ त्रि । अल्पांशे ॥ अल्पेइतिकन् ॥
अंशुजालम् । न । प्रभापटले ॥ अंशूनां जालमिव ॥
अंशुधरः । पु । सूर्ये ॥ धरति । धृञ्० । अच् । अंशूनांधरः ॥ त्रि । प्रभाविशिष्टे ॥
अंशुपट्टः । पुं । पट्टशाटके ॥
अंशुमान् । पुं । सूर्ये ॥ चिन्त्र्याचिप्रकाशे परमात्मनि ॥ सूर्यवंशीयच्छपान्तरे ॥ त्रि । अंशुविशिष्टे ॥ अंशवो विद्यन्ते ऽस्य । तदस्यास्तीतिमतुप् ॥
अंशुमती । स्त्री । परदेवतायाम् ॥ अंशवः सन्त्य ऽस्याः । मतुप्ङीपौ ॥ शालपर्ण्याम् ॥ अंशुमत्याः फलंमूलञ्चांशुमती । अनुदात्तादेश्चेत्यञ् फलपाकमूलेष्विलिलुपि युक्तवद्भाव. ॥
अंशुमत्फला । स्त्री । कदल्याम् ॥ अंशुमन्ति सूक्ष्मावयववन्ति फलान्यस्याः । अंशुमानिव वा फलान्यस्याः । अजादित्वाट्टाप् ॥
अंशुमाली । पु । राजभेदे ॥ भास्करे ॥ अंशूनां माला । साऽस्ति अस्य । व्रीह्यादित्वा दिनिः ॥
अंशुल । पुं । चाणक्यमुनौ । ब्रोणिके ॥ इति त्रिकाण्डशेषः ॥
अंशुहस्तः । पु । सूर्ये ॥
अंशूदकम् । न । हंसोदके ॥ यथा । दिवा रविरैर्जुष्ट निशि शीतकरांशुभि. । सेयमंशूदकं नामस्निग्ध दोषघ्नयापहम् ॥ अंशूनामुदकम् ॥
अंसः । पुं । न । भुजशिरसि । स्कन्धे ॥ अंस्यतेसमाहन्यते । असससमाघाते । घञ् ॥ यद्वा । अमति अम्यते वा

भारादिना। अमगतौ। अमेःसनू ॥ पु। विभागे ॥

अंसकूट.। पु। ककुदि। वृषाङ्गे। चूडो इति ढाठइतिच भाषाप्रसिद्धे॥ अंसे कूटं.॥

असल.। त्रि। मांसले। पुष्ट। बलइति ॥ अंसोस्यास्ति। वत्सांसाभ्यां कामबले इतिलच्॥

अंहति.। स्त्री। त्यागे। दाने॥ हन्ति दुरितमनया। हन्तेरंहचेत्यतिः॥ रोगे॥

अंहती। स्त्री। अंहतौ॥ बह्वादित्वात् पक्षेङीष्॥

अंहः। न। दुःखे॥ स्वधर्मत्यागे। दुरिते॥ अमति गच्छति प्रायश्चित्तादिना। अमगत्यादिषु। अमे-र्हुक्चेत्यसुन् हुगागमश्च॥ अमन्तिगच्छन्त्यधोनेनवा॥ अहेरसुना सिद्धे अघेरसुनि अङ्घ इतिमा भूदिति अमेर्हुक्चेतिरूपम्। तथा च। स्यान्मध्योष्मचतुर्थत्वमंहसोरंहसस्तथेति द्विरूपकोशः। एवञ्च। दत्ताघाः सिद्धसङ्घैर्विदधतुघृणयः शीघ्रमङ्घोविघातमितिपाठोऽनुप्रासरसिकानां प्रामादिक इति वदन्ति॥

अकम्। न। पापे॥ दुःखे॥ नकम्॥ कंसुखं तद्विरुद्धंवा॥ नलोपेनञः॥

अकचः। पुं। केतुग्रहे॥ त्रि। केशहीने॥

अकनिष्ठगः। पुं। बुद्धमुनौ॥

अकम्पन.। पुं। राक्षसान्तरे॥

अकम्पित.। पु। बौद्धगणाधिपविशेषे॥ त्रि। कम्पशून्ये॥

अकरणि:। स्त्री। शापे। आक्रोशने॥ यथा। अकरणि रिह भूयादप्रशस्तस्यधातु रिति॥ अकरणम्। आक्रोशेनञ्यनिः॥

अकरा। स्त्री। आमलक्याम्॥ त्रि। करशून्ये॥ अकरः। अकरम्॥

अकरुण.। त्रि। निर्दये॥ नकरुणः॥

अकर्कशः। त्रि। कोमले॥

अकर्णः। त्रि। बधिरे॥

अकर्त्ता। त्रि। अक्रिये। अव्यापारे। कर्तृत्वरहिते॥ नकर्त्ता। नलोपोनञः॥

अकर्मण्यः। त्रि। क्रियासुमन्दे। निकम्मा इतिभाषा॥

अकर्म। न। तूष्णीम्भावे॥ मोक्षे॥ न विद्यते कर्मयस्मिन् तत्॥ त्रि। कार्याक्षमे॥

अकर्मी। त्रि। ब्रह्मविदि॥ अकर्मअस्ति अस्य। व्रीह्यादित्वादिनिः। नकर्मी वा॥ कर्मानुष्ठानरहितेअवधूते॥

यथा ॥ अनुतिष्ठन्तु कर्माणि परलोकयियासव. । सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथमिति ॥

अकल्कनः । त्रि । } वीतदम्भे ॥
अकल्मषः । त्रि । }

अकस्मात् । । । सहसार्थे । अतर्कितनिमित्तके ॥ यथा । अकस्मायुवती वृद्ध केशेष्वाकृष्यचुम्बति । पतिनिर्दयमाविकृष्य हेतुरत्रभविष्यतीति ॥

अकाम. । त्रि । वाह्यविषयकामनाशून्ये ॥ नविद्यतेकामो ऽस्य ॥ यथा । दृष्टानुश्रविकावाह्याः कामायस्मन्सन्त्यसौ । अकामस्माऽश्नुते ब्रह्मपूर्णकामत्वेनसिध्यतीति ॥

अकामकार । पु । यथेच्छानाचरणे ॥ नकामकारः ॥

अकामहत. । त्रि । आब्रह्मलोकामन्त्वादर्वाचीनेष्वानन्देषु वितृष्णे ॥ कामेनहतः कामहतः । नकामहत. ॥

अकाय. । त्रि । अशरीरे ॥ लिङ्गशरीरवर्जिते ॥ नविद्यते कायोयस्यसः ॥

अकारः । पुं । अ अक्षरे । वर्णानांमध्ये भगवद्विभूतौ ॥ अवर्णनिर्देशे ॥ वर्णोत्कारः ॥

अकालः । पुं । कालाशुद्धौ ॥ यथा । अनुराधर्क्षमारभ्यषोडशर्क्षेषु भास्करः । यावच्चरतिनैतावदकालं मुनयो विदुरिति ॥ असमये ॥ त्रि । तद्विभिन्ने ॥

अकालदृष्टिः । स्त्री । सहस्याद्विषुवर्षणे ॥ यथा । पौषादिचतुरो मासान् प्रोक्ता दृष्टिरकालजा । अत्र यात्रादिक तत्पवर्जयेत्ससप्तवासरानिति ॥

अकिञ्चनः । त्रि । दीने ॥ नास्ति किञ्चन यस्य । मयूरव्यंसकादित्वात्समासः ॥ निष्कामे ॥

अकिञ्चनिमा । पु । आकिञ्चन्ये ॥ अकिञ्चनस्य भावः । इमनिच् ॥

अकीर्त्तिकरम् । त्रि । कीर्त्त्यभावकरे । अपकीर्त्तिकरे ॥ नकीर्त्तिकरम् ॥

अकुप्यम् । न । स्वर्णरजतात्मकेधने ॥ कुप्यादन्यत् ॥

अकुलसंज्ञः । त्रि । तिथिवारर्क्षविशेषे ॥ यथा । स्वात्यन्तकाश्विमसुनौ याकरानुराधादित्यश्रुवाणि विषमास्तिथयो ऽकुला स्युः । सूर्येन्दुमन्दगुरवश्चेति ॥

अकुशलम् । त्रि । अशोभने ॥ नकुशलम् ॥

अकूपारः । पु । कूर्मराजे ॥ महोदधौ ॥ कुंपृष्ठीं पिपर्त्ति । पृभ्रमनपूरणयोः । कर्मण्यण् । अन्येषा

मपीति दीर्घः । नञ् समासः ॥ उप लादौ ॥ कण्ठे ॥

अकूर्चः । पुं । बुद्धे ॥ त्रि । कैतवहीने ॥

अकूवारः । पु । समुद्रे ॥

अकृतम् । त्रि । नित्ये ॥ मोक्षे ॥ अविहिते ॥ कार्य्ये ॥ प्रमाणाविषये ॥ स्वयमजनिते ॥ नकृतम् ॥ अनिष्पादिते ॥ यथा । कालातीतन्तु यत्कुर्य्यादकृत तद्विनिर्दिशेदितिस्मृतिः ॥ स्त्री । प्रकृतिविशेषे ॥ यथा ऽपांनिम्बदेशगमनोद्दिष्टयया प्रकृतिः श्राद्धकेन चित् कृता ॥

अकृतकः । त्रि । स्वाभाविके ॥ नकृतकः ॥

अकृतज्ञः । त्रि । उपकारज्ञानिनि । कृतघ्ने ॥

अकृतबुद्धिः । त्रि । शास्त्राचार्य्योपदेशन्यायै रनुपजनितविवेकबुद्धौ ॥ अकृताबुद्धिर्यस्य येनवा ॥

अकृतात्मा । त्रि । यमादिभिरशोधितान्तःकरणे ॥ शास्त्रेणासंस्कृतान्तःकरणे ॥

अकृताभ्यागमः । पुं । दोषविशेषे । अकृतयोः पुण्यपापयोरकस्मात्फलदातृत्वे ॥

अकृत्रिमः । त्रि । अकरणजे । असन्ये । सिद्धे ॥

अकृत्रिमानन्दः । पु । स्वरूपभूतानन्दाभिव्यञ्जके निदिध्यासने ॥ अकृत्रिमस्तासा वानन्दश्च ॥ त्रि । कृत्रिमानन्दविरहिणि ॥ अविद्यमानः कृत्रिमानन्दो ऽस्य ॥

अकृत्स्नवित् । त्रि । अनात्माभिमानिनि ॥ अकृत्स्नवेत्ति । विद्ज्ञाने । क्विप् ॥

अकृष्णकर्मा । त्रि । निष्पापे । अपापकर्मणि ॥ अकृष्णं निष्पापत्वात् शुद्धंकर्मास्य ॥

अकोटः । पुं । गुवाकवृक्षे । छटाफले ॥

अकौशलम् । न । अकौशले ॥

अक्का । स्त्री । मातरि । अनन्याम् । अम्बायाम् ॥

अक्त' । त्रि । व्याप्ते ॥ युक्ते ॥ परिच्छिन्ने ॥ अञ्जेर्गतौक्तः । अक्तपरिमाणस्य वाचका इति भाष्यस्यकैयटेन तथा व्याख्यातत्वात् ॥ अनक्ति व्यक्ती वा । अंजूव्यक्त्यादौ । अतिस्थिभ्यः क्तः ॥

अक्रतु' । त्रि । अकामे । दृष्टादृष्टवाह्यविषयोपरतबुद्धौ ॥

अक्रान्ता । स्त्री । बृहत्याम् ॥ त्रि । अनाक्रान्ते ॥

अक्रियः । त्रि । श्रौतस्मार्त्तक्रियात्यागिनि ॥ अव्यापारे । अकर्त्तरि ॥ कुकर्मविशिष्टे ॥

अक्रूरः । पुं । श्वफल्कतनये । गान्दिनीसुते ॥ त्रि । अकठिने । अनिष्ठुरे ॥ नक्रूरः ॥ क्रौर्यवान् क्रूरः सनेत्यक्रूरः । यद्वाक्रूर इति भावप्रधानो निर्देशः । नविद्यते क्रौर्यमस्येत्यक्रूरः ॥

अक्रोधः । पुं । परैराक्रोशे ताडनेवाकृते सति प्राप्तो यःक्रोधस्तस्य तत्कालोपशमने ॥ त्रि । क्रोधरहिते ॥

अक्रोधनः । त्रि । क्रोधरहिते ॥

अक्लमः । त्रि । सततव्यापारेप्यश्रान्ते ॥ अविद्यमानः क्लमोयस्यसः ॥

अक्षः । पुं । रथावयवे । चक्रे ॥ चक्रधारणदारुभेदे । नभ्ये ॥ ज्ञातार्थे ॥ व्यवहारे । आयव्ययचिन्तायाम् ॥ पाशके । येन द्यूतविद्यायामेजति ॥ रुद्राक्षे ॥ इंद्राक्षे ॥ विभीतकतरौ ॥ ज्ञाने ॥ आत्मनि ॥ रावणौ ॥ सर्पे ॥ शकटे ॥ षोडशमाषेषु । कर्षे ॥ जात्यन्धे ॥ गरुडे ॥ पलभायाम् ॥ यथा । चद्राग्निनिघ्नापलभाद्वितात्वलक्षावधिः स्यादिह दक्षिणोत्थ इति ॥ न । सौवर्चले लवणे ॥ तुत्ये ॥ हृषीके ॥ अश्नुते अक्षति वा अक्ष्यते वा ऽनेना नवा अक्षूव्याप्तौ । पचाद्यच् घञ्वा ॥ अश्नुते ऽर्थम् । अशूव्याप्तौ । अशेर्देवने इति सौत्रा ॥

अक्षकः । पुं । तिनिशे ॥ इतिरत्नमाला ॥

अक्षगणः । पु । श्रोत्रादीन्द्रियसङ्घाते ॥ अक्षाणां गणः ॥

अक्षचरणः । पुं । अक्षपादे ॥

अक्षतम् । न । षण्डे ॥ पुं । ॰ भू ॰ । लाजेषु ॥ क्षणनम् । क्षणुहिंसायाम् । नपुंसकेभावेक्तः । अनुदात्तोपदेशेत्यादिनाऽलोपः ॥ नक्षत येषांते ॥ मुकुटस्त्वमरव्याख्यावसरे लाजाः पुम्भूम्नि ते ऽक्षतमितिपठित्वा कर्मणिक्तः । क्षतंखण्डितम् । नक्षतमक्षतमितिविगृह्य नित्यपुल्लिंगानित्यबहुवचनान्ताश्च लाजा अक्षतमितिव्याचख्यौ ॥ केचित्तु अखण्डतण्डुला अक्षतमित्याहुः ॥ पु । यवे ॥ त्रि । अहिंसिते ॥ अक्षये । अखण्डिते ॥

अक्षता । स्त्री । कर्कटशृङ्ग्याम् ॥ पुरुषसंसर्गरहितायां स्त्रियाम् ॥ न क्षता ॥

अक्षदर्शक. । पु । प्राड्विवाके । धर्माध्यक्षे ॥ अक्षवेधके ॥ पश्यति । दृशिर्प्रेक्षणे । ण्वुल् । अक्षाणां व्यवहाराणां दर्शकः ॥

अक्षदृक् । पु । व्यवहारज्ञातरि । अक्षदर्शके ॥

अक्षदेवी । त्रि । द्यूतकृति । धूर्ते ॥ अक्षैर्दीव्यति । दिवुक्रीडादौ । सुपीतिणिनिः ॥

अक्षद्यूः । पु । अक्षदेविनि ॥ अक्षैर्दीव्यति । दिवु० । क्विप् । च्छ्वोरिति ऊठ् ॥

अक्षधूर्त्तः । पु । द्यूतकारे । कितवे ॥ अक्षेषुधूर्त्तः । सप्तमीशौण्डैरिति समासः ॥

अक्षधूर्त्तिलः । पुं । वृषे ॥ इति शब्दार्णवः ॥

अक्षपाद । पु । नैयायिके । गौतमे ॥

अक्षपीडा । स्त्री । यवतिक्ताख्यलतायाम् ॥

अक्षमः । त्रि । क्षमताशून्ये ॥ क्षमारहिते ॥

अक्षमा । स्त्री । ईर्ष्यायाम् । अक्षान्तौ ॥

अक्षमाला । स्त्री । अक्षसूत्रे । अकारादिक्षकारान्तवर्णमालायाम् ॥ अरुन्धत्याम् ॥ अक्षमाला वशिष्ठेन संयुक्ताधमयोनिजेतिवचनात् ॥ रुद्राक्षमालायाम् ॥

अक्षय. । पु । अनन्ते । अक्षयकालाभिमानिनि ॥ त्रि । क्षयाभावे । क्षयरहिते ॥ अव्यये ॥ ब्रह्मनिष्ठे ॥ अ.वासुदेवः तस्मिन् क्षयोनिवासोऽस्य ॥

अक्षयकाल. । पुं । अक्षयकालाभिमानिनि परमेश्वराख्यकाले ॥ अक्षयश्चासौकालश्च ॥

अक्षयतृतीया । स्त्री । वैशाखशुक्लतृतीयायाम् ॥ यथा । वैशाखे मासि राजेन्द्र शुक्लपक्षे तृतीयिका । अक्षयासातिथिः प्रोक्ता कृत्तिकारोहिणीयुता ॥ तस्यांदानादिकं पुण्यमक्षय समुदाहृतमिति ॥ इयं सत्ययुगाद्या

अक्षया । स्त्री । रव्यादिवारैः सप्तम्यादितिथिषु ॥ यथा । अमावै सोमवारेण रविवारेण सप्तमी । चतुर्थी भौमवारेण अक्षयादपिचाक्षया इतिभविष्यपुराणम् ॥ क्षयरहितायाम् ॥ नास्तिक्षयोयस्याः सा ॥

अक्षरम् । न । नक्षरतीति व्युत्पत्त्या अविनाशिनि निर्विशेषे प्रणवाख्ये ब्रह्मणि कूटस्थेनित्ये आत्मनि ॥ यथा । क्षरादिवद्धर्मत्वादक्षरं ब्रह्मभण्यते । कार्यकारणरूपन्तु नश्वरंक्षरमुच्यते ॥ यत्किञ्चिद्वस्तुलोकेस्मिन् वाचोगोचरतागतम् । प्रमाणस्य चतत्सर्वमक्षरेप्रतिषिध्यते ॥ यदप्रबोधात्कार्पण्यंप्राकृतंयत्प्रबोधतः । तद

क्षरं प्रवेोद्भव्यं यथोक्तेश्वरवर्त्मनेति॥ ईश्वर वर्त्मनेतिप्रसिद्धत्वादितटस्थ लक्षणद्वारेणार्थ: ॥ अकारादिक्ष कारान्तवर्णे॥ यथा। षाण्मासिके तुसम्प्राप्ते भ्रान्ति: संजायतेयत:। धात्राक्षराणि सृष्टानि पत्रारूढान्य त: पुरेति ॥ तत्पञ्चविधंलिपिश ब्दे द्रष्टव्यम्॥ अपामार्गे ॥ गगने- ॥ मोक्षे। अपवर्गे॥ धर्मे॥ तपसि॥ अध्वरे ॥ अव्याकृताख्ये मूलका रणे॥ पु॥ शङ्करे॥ अजे। विष्णौ ॥ जीवे॥ नक्षरति । क्षरसञ्चलने । पचाद्यच्॥ यद्वा । अश्नुते । अशू व्याप्तौ। अशे: सर:॥ त्रि। अक्षर णीये। अक्षुते॥

अक्षरचण: । पुं । लेखकोत्तमे ॥ अक्षरैर्वित्त. । तेनवित्तस्चुञ्चुप्च- णपावितिचणप्॥

अक्षरचुञ्चु: । पु । लेखकोत्तमे ॥ अक्षरैर्वित्त:। तेनवित्तइतिचुञ्चुप्॥

अक्षरजननी। स्त्री । लेखन्याम् ॥ प्रकृतौ ॥ अक्षराणा मक्षरस्यवा जननी॥

अक्षरजीवक:। पु। लेखके ॥ लेखके ऽक्षरपूर्वा स्युश्चणजीवकचुञ्चवइति हेमचन्द्र:॥

अक्षरजीविक:। पु । कायस्थजातौ॥ अक्षरैर्जीविकायस्यस: ॥ लेखक: स्याल्लिपिकर: कायस्थो ऽक्षरजीवि कइतिहलायुध: ॥ त्रि । अक्षरजी- विनि॥

अक्षरतूलिका। स्त्री। लेखन्याम्॥ अ क्षराणां तूलिका॥ इतिजटाधर:॥

अक्षरधी:। स्त्री। अक्षरे ब्रह्मणिधीर्या भ्य: इतिव्युत्पत्त्या श्रुतिषु ॥ त्रि। ब्रह्मनिष्ठे॥

अक्षरपङ्क्ति:। स्त्री । छन्दोभेदे ॥ यथा। चेद्भगणान्तेगदययोग.। इत्थि रिहोक्ता साऽक्षरपङ्क्तिरिति॥

अक्षरमुख.। त्रि। कालाक्षरिके। शि क्षिताक्षरे॥ इतित्रिकाण्डशेष:॥

अक्षरविन्यास:। पु। लिपौ॥ अक्षरा णांविन्यास.॥

अक्षरसमुद्भव.। पु । अपौरुषेयत्वेन निरस्तसमस्ताशङ्केवेदे॥ अक्षरात्प रमात्मन: समुद्भव. आविर्भावोय स्यस.॥

अक्षवती । स्त्री। द्यूतक्रीडाविशेषे । चौपडइतिभाषा॥ अक्षा: पाशका: सन्त्यस्याम्। मतुप् । लोकात्स्त्री त्वम्॥

अक्षवाट:। पु। मल्लभूमौ। नियुद्धभुवि । अखाडा इति भाषा॥

अक्षवित्। त्रि। व्यवहारज्ञे॥ द्यूतज्ञे॥

अक्षविवर्त्तः । पुं । द्यूतप्रभेदे ॥

अक्षसूत्रम् । न । जपमालायाम् ॥

अक्षाग्रकीलकः । पुं । अणी । रथचक्राग्रस्थितकीले । अणी इतिभाषा ॥ अक्षस्यनाभिमध्यकाष्ठस्यान्तेबन्धार्थंकीलकः ॥

अक्षान्तिः । स्त्री । परोत्कर्षासहने । ईर्ष्यायाम् ॥ नक्षमणम् । क्षमूसहने । दिवादिः । अक्षाषित्त्वात् क्तिन् । अनुनासिकस्येतिदीर्घे नञ्समासः ॥

अक्षारलवणम् । न । अकृत्रिमे सैन्धवादौ ॥ यथा । ... क्षीर गोघृतंचैव धान्यंमुद्गास्तिलायवाः । समुद्रसैन्धवेनैव अक्षारलवणं स्मृतमिति स्मृति ...

अक्षि । न । चक्षुषि । अश्नुते ऽनेनवा ॥ अशूव्याप्तौ संघातेच । अशेर्निदितिक्सिः । यद्वा । अक्षति । अक्षूव्याप्तौ । इन् ॥

अक्षिकूटः । पु । ईषिकायाम् । गजाक्षिपुटके ॥

अक्षिगत. । त्रि । द्वेष्ये ॥ इत्यमरः ॥ अक्षिगतवध्येदृक् ...

अक्षिभेषजम् । न । लोध्रे ॥

अक्षिविकूणितम् । न । अपाङ्गदृष्टौ । कटाक्षे ॥

अक्षीणः । त्रि । पूर्णे ॥ अदीने ॥ न क्षीणः । यथा । अक्षुण्णध्यानविषीदेत काले काले ऽशनक्वचित् । अवध्यान कुप्येद्दृष्टतिमानुभयं दैवतन्त्रितम् ॥ इतिमत्वानदीनोयोऽधृतो ऽक्षीणउच्यत इति ॥

अक्षीवम् । न । वशिरे । सामुद्रलवणे ॥ पु । शिग्रौ ॥ त्रि । अमत्ते ॥ नक्षीवति अनेनवा अक्षीवयति वा । क्षीवृमदे । पचाद्यच् ॥ अक्षा. ई. । अक्षीवाति वायतिवा । वागतिगन्धनयोः आवैशेषिकेवा । आतो नुपेतिकः ॥

अक्षोभः । पु । मनसि ॥ अक्षाणामीशः ॥

अक्षोटः । पु । शैलाख्यपीलौ । कर्पराले । अखरोटइतिख्याते ॥ अक्षणोति । अक्षूव्याप्तौ संघातेच । बाहुलकादोट. ॥ अक्षस्येवओटाः पर्यान्तस्येतिवा ॥

अक्षोटक. । पु । कर्परालवृक्षे । पर्वतपीलौ ॥ यथा । अक्षोटकोपिवाताद्दसदृशः कफपित्तकृद्दिति ॥ अक्षोटात्स्वार्थेकः ॥

अक्षोपकरणम् । न । द्यूतसाधने ॥

अक्षोभः । पुं । आलाने । शङ्कौ । हस्तिबन्धनस्तम्भे ॥ त्रि । क्षोभरहिते ॥

अक्षोभ्यः । पुं । शिवे ॥ रागद्वेषादि

भिः शब्दादिविषयैरसुरैश्च नचो भ्यते चोभविचेप व्यर्थानप्राप्यते । चुभेर्हेतुमण्ण्यन्ता दचोयदितिय त्प्रत्ययः ॥ चि । अप्रधृष्ये ॥

अचोहिणी । स्त्री । सेनाविशेषे । दशानीकिन्याम् ॥ सायथा ॥ इभाः २१८७० । रथाः २१८७० । अश्वाः ६५६१० । पदातयः १०९३५० । उ क्तञ्च । अचोहिण्या मित्यधिकैःसप्त त्याद्यष्टभिःशतैः । संयुक्तानि सहस्राणि गजानामेकविंशति. ॥ एवमेवर थानान्तु संख्यानंकीर्त्तितंवुधैः । प चषष्टिसहस्राणि षट्शतानिदशैव तु ॥ संख्यातास्तुर गास्तज्ज्ञैर्विना रथतुरंगमैः । नृणाशतसहस्रंतु स हस्राणि नवैवतु । शतानिचीणि चान्यानि पंचाशच्चपदातयः इति ॥ समस्तसंख्ययातु । खद्वयस्वरवस्विं दुनेत्रै रचोहिणीमतेति ॥ २१ ८७०० ॥ ऊहःसमूहोऽस्त्यस्याः इनि । अचाणामूहिनी । पूर्वपदादिति णत्वम् । अचादूहिन्या मिति द्दिः ॥

अचूणम् । त्रि । अखण्डे ॥ अस्तुते । अमृण्याम्निसघातेच । कृत्स्नभूम्ना कृतः ॥ न । काले ॥

अक्षहूः । पुं । प्रियालवृक्षे ॥ इतिराज निर्घण्टः ॥

अखट्टिः । पु । असद्व्यवहारे ॥ इतित्रि काण्डशेषः ॥

अखण्डम् । त्रि । पूर्णे । खण्डशून्ये ॥ अनन्ते ॥ नखण्ड्यते । खडिभेदने । घञ् ॥ नास्तिखण्डोऽस्यवा ॥

अखण्डनः । पुं । काले ॥ इति शब्द चन्द्रिका ॥

अखण्डपरशुः । पुं । परशुरामे ॥ न खण्ड. अखण्डः केनाप्यखण्डितः प रशुः कुठारोऽस्य ॥

अखातम् । पु । न । देवखाते । अकृ त्रिमजलाशये ॥ खाताद्भिन्नम् ॥

अखिलम् । चि । विश्वस्मिन् । कृत्स्ने ॥ नखिलमस्य ॥

अखिलाधारम् । चि । ब्रह्मणि ॥ अखिलस्याकाशादिप्रपञ्चस्याधारमा श्रयस्तदितिविग्रहः । आश्रयशब्दः सृष्टिप्रलययोरप्युपलक्षणार्थः ॥

अगः । पु । पर्वते ॥ वृक्षे ॥ सरीसृपे ॥ भानौ ॥ नगच्छति । गम्लृगतौ । अन्येभ्योपीति अन्येष्वपीतिवाड. ॥ नगोऽप्राणिष्विति पाक्षिकोऽप्रकृ तिभावः ॥

अगजः । चि । गिरिसम्भवे ॥ न । शि- लाजतुनि ॥

अगतिः । पु । अनवबोधे । अपरिज्ञा-

ने ॥

अगदः । पुं । औषधे ॥ त्रि । नीरुजि ॥ गदविरुद्धः । नगदो ऽस्मादितिवा ॥

अगदङ्कारः । त्रि । चिकित्सके ॥ अगदमरोगंजन्तुकरोति । कर्मण्यण् । कारेसत्यागदस्येतिमुम् ॥

अगदतन्त्रम् । न । वैद्यविद्याङ्गविशेषे ॥ यथा । अगदतन्त्रंनामसर्पकीटलूतावृश्चिकमूषिकादिदष्टविषव्यञ्जनार्थं विविधविषसंयोगविषोपहतोपशमनार्थमितिसुश्रुत. ॥

अगमः । पु । वृक्षे ॥ नगच्छति । गम्लृगतौ । पचाद्यच् ॥

अगम्य । त्रि । अज्ञेये ॥ गमनायोग्ये ॥ नगम्यः ॥

अगस्तिः । पु । मुनिविशेषे ॥ विन्ध्याख्यम् अगमस्यतीत्यगस्तिः । अस्यतेः क्तिच्क्तौचेतिक्तिच् । बाहुलकाच्चिर्वा । शकन्ध्वादि ॥ वकद्रौ ॥ अगस्तिः पित्तकफजिच्चतुर्थकहरोहिमः । रूक्षोवातकरस्तिक्त प्रतिश्यायनिवारण ॥

अगस्तिद्रुः । पु । वकपुष्पवृक्षे । मुनिद्रुमे ॥ इतित्रिकाण्डशेष ॥

अगस्त्यः । पुं । वकद्रौ ॥ मुनिभेदे । पुलस्त्यतनये ॥ अगं विन्ध्यस्त्यायतिस्तभ्नाति । स्त्यैसङ्घाते । आतोऽुपसर्गेकः ॥

अगस्त्याश्रमः । पु । अगस्त्यकुण्डइतिनाम्नाकाश्यांप्रसिद्धेस्थाने ॥ मलयाचलेवर्त्तमाने मुनिवासस्थाने ॥

अगस्तिकुसुमम् । न । मुनिद्रुमपुष्पे ॥ अगस्तिपुष्पशाके ॥ अस्यगुणायथा । अगस्तिकुसुम शीतचतुर्थकनिवारणम् । नक्तान्ध्यनाशनतिक्तकषायंकटुपाकिच ॥ पीनसश्लेष्मपित्तघ्नवातघ्नमुनिभिर्मतम् ॥ आगस्त्यंकुसुमं तथा मृदुफलं केनाहृतंजन्तुनाधन्यंचाद्यदिनं यदद्यमिलितंकस्याश्रमालोकितम् । स्विन्नंतक्रयुतंसहिंगुलवणं तत्सेव्यतेपाचितभोक्ता संततभाषितं प्रियतमेनाद्यापिसम्प्रापितमिति ॥

अगाधम् । त्रि । अतलस्पर्शे । अतिगम्भीरे ॥ दुर्बोधाशये ॥ न । छिद्रे ॥ नास्तिगाधं स्थितिरत्र । नञोऽस्त्यर्थानामिति वहुव्रीहिः ॥

अगाधजल । पुं । ह्रदे ॥ त्रि । अतलस्पर्शजलविशिष्टे ॥ अगाधजलंयत्र ॥

अगारम् । न । गृहे ॥ अगान्नगच्छति । ऋगतौ । कर्मण्यण् ॥

अगारदाही । त्रि । गृहदाहके ॥

अगुः । पुं । राहुग्रहे ॥ त्रि । किरणरहिते ॥

अगुरुः । न । जोङ्गके । सुगन्धिकाष्ठ-

भेदे । अगर इति भाषा ॥ अगुरु

ण्याकटुस्त्वच्यतिक्त तीक्ष्णञ्चपित्तल

म । लघुकर्णाक्षिरोगघ्न शीत

वातकफप्रणुत् ॥ अगुरुर्वापुंसीति

वोपालितः । शिंशपायाम् ॥ का

लागुरुणि ॥ क्लि । लघुनि ॥ नगुरु

स्मात् ॥

अगूढगन्धम् । न । हिङ्गुनि ॥ इतिरा

जनिर्घण्टुः ॥

अगोचरम् । क्लि । इन्द्रियजन्यप्रत्य

क्षाविषये ॥

अगौकाः । पुं । शरभे । खगे ॥ सिंहे

॥ त्रि । अद्रिवासिनि । अद्रिगे ॥ अ

गः ओकोयस्यसः ॥

अग्नायी । स्त्री । वन्हिपत्न्याम् ॥

अग्नेः स्त्रीत्यस्मिन्नर्थे वृषाक

प्यग्निकुसितेत्यादिसूत्रेणाग्निशब्द

स्यैकारादेशोङीप्च ॥ त्रेतायुगे ॥

अग्निः । पुं । अङ्गयन्ति अध्यजन्मप्रा

पयन्तीतिव्युत्पत्त्या हविःप्रक्षेपाधि

करणेषु गार्हपत्याहवनीयदक्षिणा

ग्निसभ्यावसथ्यौपासनाख्येषु षड

ग्निषु ॥ पावके । वैश्वानरे ॥ अस्य

गुणा यथा । रूपनेत्रेन्द्रियपाकःस

न्तापस्तीक्ष्णतालघुता । वर्णोभ्राजि

ष्णुतामर्षः शौर्यमग्नेर्गुणाअमीति ॥

षट्सुधूमाग्न्यादिषु ॥ यथा । अर्वा

निष्कासनार्थायक्रमाजज्ञेयाः षडग्न

यः । धूमाग्निश्चैवदीपाग्निर्मन्दाग्नि

र्मध्यम स्तथा ॥ खराग्निश्च भडाग्नि,

श्च तेषांवक्ष्यामि लक्षणम् ॥ वि

ज्वालोयोधूमशिखो धूमाग्निःसउदा

हृतः ॥ ससारमतिशुष्कं यन्मुष्टिम

ध्येसमेष्यति । तत्काष्ठ काष्ठमित्याहु

हुः खदिरादिसमुद्भवम् ॥ द्वाभ्यां

तस्यचतुर्थाभ्यां दीप्तिर्दीपाग्निरुच्य

ते । चतुरस्रेन तेनैवमन्दाग्निः

परिकीर्त्तितः ॥ अर्द्धीकृताभ्यांद्वा

भ्यांतुमध्यमाग्निरुदाहृतः । अर्द्धै

स्तैः पञ्चभिः प्रोक्तःखराग्निः सर्वक

र्मसु ॥ मस्तकावधिपात्रस्य चतुर्दि

क्षुक्रमेणच । प्रसरतियदाज्वाला

सभडाग्निरुदीरितः ॥ सार्द्धयामञ्च

यामञ्चयाममेकमुहूर्त्तकम । मुहूर्त्त

मात्रमित्येवमर्कार्थंवन्हय.स्मृताः इ

ति ॥ चित्रकाख्यौषधौ ॥ तृतीये ॥

चतुष्कले ॥ आदिगुरोः सन्नाथाम ॥

कृत्तिकानक्षत्रे ॥ अङ्गति ऊर्द्ध्वं गच्छ

ति । अगिगतौ । अङ्गेर्नलोपश्चे

तिनिर्नलोपश्च ॥ रक्तचित्रके ॥ भल्ला

तके ॥ निम्बूके ॥ पित्ते ॥ स्वर्णे ॥

अग्निकः । पुं । इन्द्रगोपकीटे ॥ इति

हेमचन्द्रः ॥

अग्निकणः । पुं । स्फुलिङ्गे ॥ अग्नेः

कथा: ॥ इत्यमर: ॥

अग्निकारिका । स्त्री । अग्निकार्ये ॥ इति हेमचन्द्रः ॥

अग्निकार्य्यम् । न । होमादौ हविर्होनादिपूर्वकाग्निज्वालने । अग्नीन्धने ॥ अग्नौसायप्रात:समिद्धोमानुष्ठाने ॥ अग्न्यावग्नेर्वाकार्य्यम ॥

अग्निकाष्ठम् । न । अगुरुणि ॥ इति राजनिर्घण्ट ॥

अग्निकुक्कुट: । पुं । ज्वलदग्नितृणोल्कायाम् ॥ इतिचिकाण्डशेष: ॥ अग्ने कुक्कुट: ॥

अग्निक्रीडा । स्त्री । खधूपादिन्यासे । हवाइ इतिभाषाप्रसिद्धे ॥

अग्निगर्भ: । पुं । औषधविशेषे । अग्निनिर्यासे । अग्निजारे ॥ सूर्यकान्तमणौ ॥

अग्निगर्भा । स्त्री । महाज्योतिष्मत्याम ॥ इति राजनिर्घण्ट: ॥

अग्निचित् । पुं । साग्निके । अग्निचेतरि ॥ इत्यमर: । अग्निमचैषीत् । चिञ्चयने । अग्नौचेरि ति क्विप् तुक् ॥

अग्निचित्या । स्त्री । अग्नेश्चयने ॥ चित्याग्निचित्ययोरितिभावेयप्रत्ययस्तुक्चनिपात्यते ॥

अग्निचूडा । स्त्री । अग्निशिखायाम् ॥

अग्निज । पुं । भल्लातके । भिलावा ख्ये ॥ अग्निजारवृक्षे ॥ त्रि । अग्नेर्जातमात्रे ॥

अग्निजास । पुं ।
अग्निजार: । पुं ।
अग्निजाल । पुं ।
औषध विशेषे । वडवाग्निमले । सिन्धुफले इति राजनिर्घण्ट. ॥

अग्निजिह्वा । स्त्री । अग्नेर्ज्वालायाम ॥ लाङ्गलीवृक्षे ॥ योगविशेषे ॥ यथा । सप्तषष्ठ्यादितिथय: सोमवारादिभिर्युता: । अग्निजिह्वा: सप्तयोगामङ्गलेष्वतिगर्हिता' इति॥ काल्यादिसप्तसु ॥ यथा । कालीकपालीचमनोजवाचसुलोहितायाचसुधूम्रवर्णा । स्फुलिंगिनीविश्वरुचीच देवीलेलायमाना इतिसप्तजिह्वा इतिप्रथममुण्डकश्रुति: ॥

अग्निज्वलिततेजन: । पुं । अग्निना दीप्तफलके । आयुधविशेषे ॥

अग्निज्वाला । स्त्री । वन्हिशिखायाम ॥ धातृपुष्पिकायाम ॥ लाङ्गलिक्यावधौ ॥ अग्नेरिवज्वालास्या: । अग्नेर्ज्वालेववा । रक्तपुष्पत्वात् ॥

अग्निदमनी । स्त्री । क्षुपविशेषे । वहुकण्टकायाम् । गुच्छफलायाम्

अग्निदीप्ता । स्त्री । महाज्योतिष्मतीवृक्षे ॥ इति राजनिर्घण्ट: ॥

अग्निदेवा । स्त्री । कृत्तिकानक्षत्रे ॥ इ

ति हेमचन्द्रः ॥

अग्निध्वज । पुं । मखवाहे । धूमे । धूँवाँ इति भाषा प्रसिद्धे ॥

अग्निनिर्यासः । पु । अग्निजारवृक्षे ॥

अग्निपत्री । स्त्री । अग्निवल्ली अगिया इतिलोकप्रसिद्धौषधौ ॥

अग्निपुराणम् । न । आग्नेये ॥ तत्र श्लोकसंख्या यथा । षोडशैवसहस्राणि पुराणंचाग्निसंज्ञितमिति ॥

अग्निभम् । न । स्वर्णे ॥ कृत्तिकानक्षत्रे ॥

अग्निभूः । पुं । कार्त्तिकेये ॥ पुराकिल तारकोपद्रुतदेवरक्षार्थं शिवेनाग्निरूपस्ववीजवन्हिमुखेक्षिप्तेनाग्निनाकृत्तिकासुक्षिप्तंतास्वदेवागतगर्भसत्रपाः शरवणे प्रविश्यप्रसूता तेनाग्निभूरितिसर्वानन्दः ॥ न । जले ॥ त्रि । अग्निजाते ॥ अग्नेर्भवति । भू । क्विप् ॥

अग्निमूर्त्तिः । पुं । बौद्धभेदे ॥ इतिहेमचन्द्रः ॥

अग्निमणिः । पु । सूर्यकान्ते ॥ इति जटाधरः ॥

अग्निमन्थः । पुं । श्रीपर्णे । गणिकारिकायाम् । अरणीतिख्याते ॥ अग्निमन्थः श्वयथुहृद्वीर्योष्णः कफवातहृत् । पाण्डुनुत् कटुकस्तिक्तस्तुवरोमधुरोऽग्निद ॥ अग्निमन्थकुसुमशाकस्तु । अग्निमन्थभवकुसुमनीता ससराजमुद्गयोसुसाधिता । तक्रतप्तघृतयुक्तपाचिताहिंगुनागजनितवासवासिता ॥ अग्निमन्थोयहृद्यश्चदोषशमनः सरः । आध्मानच्छर्दिकाशोथचक्षूरोगविषापहः ॥

अग्निमथति । मन्थविलोडने । कर्मण्यण ॥ अयपर्णे ॥

अग्निमुखः । पुं । देवे ॥ विप्रे ॥ चित्रके ॥ अग्निर्मुखयस्य ॥ न । कल्पेव्वोषुपल्वसु ॥

अग्निमुखी । स्त्री । भल्लातके । भिलावा इतिख्याते ॥ लाङ्गलिकायाम् ॥ अग्निरिवमुखमस्याः । गौरादिः ॥

अग्नियन्त्रम् । न । अग्न्यस्त्रविशेषे । तोप वन्दूक अगन गन इत्यादिभाषा प्रसिद्धे ॥

अग्निरक्षणम् । न । अग्न्याधाने ॥ अग्निपालने ॥ अग्ने रक्षणम् ॥

अग्निरजाः । पुं । इन्द्रगोपाभिधेकीटे ॥

अग्निरुहा । स्त्री । मांसरोहिण्याम् ॥

अग्निवल्लभः । पुं । राले ॥ सालवृक्षे ॥

अग्निवाह । पुं । छागे ॥ अग्नेर्वाह ॥ धूमे ॥

अग्निवित् । पुं । अग्निचिति । अग्निहोत्रिणि ॥

अग्निबीजम् । न । }
अग्निवीर्यम् । न । } स्वर्णे ॥

अग्निव्रतम् । न । भूभुजोव्रतविशेषे ॥ यथा । प्रतापयुक्तस्तेजस्वीनित्य-स्यात्पापकर्मसु । दुष्टसामन्तहिंस्त्रश्चतदाग्नेयव्रतस्मृतमिति ॥

अग्निशरणम् । न । दक्षिणाग्निगार्हपत्याहवनीयसभ्यावसथ्यशालायाम ॥ अग्नीनाशरणम् ॥

अग्निशाला । स्त्री । अग्निशरणे ॥ अग्नीनांशाला ॥

अग्निशिखम् । न । कुसुम्भपुष्पे ॥ कुङ्कुमे ॥ अग्नेरिवशिखाकेसरो ऽस्य॥ स्वर्णे ॥ पुं । कुसुम्भवृक्षे ॥ दीपे ॥ वाणे ॥ इतिशब्दरत्नावली ॥

अग्निशिखा । स्त्री । लाङ्गलिक्याख्यौषधौ ॥ अग्नेरिवशिखायस्या ॥ विशल्यायाम् । शाकभेदे ॥ अग्नेरिवशिखासन्तापोयस्याः ॥ ज्वालायाम ॥

अग्निशेखरम् । न । कुङ्कुमे ॥

अग्निष्टुत । पुं । अग्निष्टोमस्यविकृतिरूपे क्रतुविशेषे । अग्निः स्तूयते ऽस्मिन् क्रतुविशेषे । ष्टुञ् स्तुतौ । सम्पदादित्वादधिकरणे क्विप् । अग्नेः स्तुत्स्तोमसोमा इति षः ॥

अग्निष्टोम. । पुं । यज्ञविशेषे ॥ अग्नीनांस्तोमः । अग्नेः स्तुत्स्तोम

सोमाइतिषः ॥ अग्निष्टोमार्थग्रन्थे ॥

अग्निष्ठः । पुं । लोहमयेतण्डुलादिभर्जनपात्रे ॥

अग्निष्वात्तः । पुं । दिव्यपितृभेदे ॥ यथा । अग्निष्वात्ताश्चदेवानांमारीच्यालोकविश्रुता इति॥ अपिच । अग्निष्वात्तादयोलोके पितरश्चिरवासिनःइति । चिरलोकपितरइत्यर्थः ॥ अग्निनाष्वुष्टु यथास्यादेवमात्ताः भक्षिताः श्रौतस्मार्त्ताग्नि दग्धाइत्यर्थः । एवञ्चात्रमूर्धन्यादेशोनयुक्तः । मन्वादिस्मृतिषु मूर्धन्यषकारवाने वपाठ ॥ नित्यबहुवचनान्तोय मितिकेचित् ॥

अग्निहोत्रम् । न । यज्ञभेदे । अग्न्याधाने ॥ सायंप्रातःकालयोर्नियमेनानुष्ठेयेकर्मविशेषे ॥ अग्नयेहोत्रमत्रेतिबहुव्रीहिः ॥ पुं । अग्नौ ॥ हविषि ॥ इतिमेदिनिकरः ॥

अग्निहोत्रहवणी । स्त्री । यज्ञाङ्गभूते निर्वापसाधने काष्ठपात्रविशेषे ॥

अग्निहोत्री । पुं । अग्निहोत्रयुक्ते । अग्निचिति ॥ अग्निहोत्रमस्यास्ति । अतइनिठनावितीनि । योनर्चिषिजुहोत्यग्नौव्यङ्गारिणिचमानवः । मन्दोग्निरामयावीचदरिद्रश्चसजायते ॥

अग्नीत् । पुं । ऋत्विग्भेदे ॥ अग्निमिन्धे । जिइन्धीदीप्तौ । क्विप् । न लोप ॥ यज्ञमण्डपभेदे ॥

अग्नीध्र । पुं । धनद्वारावरणीये ऋत्विग्विशेषे ॥ तस्यकर्माग्निरक्षणम् ॥ अग्निविशेषे ॥

अग्नीध्रा । स्त्री । अग्निकार्य्ये । हविर्दानादिपूर्वकाग्निज्वालने ॥

अग्नीध्रीयः । पुं । दक्षिणाग्नौ ॥

अग्नीन्धनम् । न । अग्निकार्ये ॥ अग्नौ इन्धनम् ॥

अग्नीषोमीयम् । न । अग्नीषोम्येष्टिविधि ॥ अग्नीषोमौदेवतेअस्य । द्यावापृथिवीसुनासीरेत्यादिनाछ ॥

अग्नीषोम्यम् । न । हैविर्विशेषे ॥ अग्नीषोमौदेवते अस्य । द्यावापृथिवीत्यचस्यचकारात्यत ॥

अग्न्याधानम् । न । श्रौताग्निसत्कृतौ । अग्निहोत्रे । अग्निरक्षणे ॥ अग्नेः आधानम् । अग्निहोत्रमित्यर्थ ॥

अग्न्याधेयम् । न । आहवनीयाद्यग्न्युत्पादकेकर्मणि ॥

अग्न्यालय । पुं । अग्न्याधारकुण्डे ॥ अग्नेःआलय. ॥

अग्न्युत्पात । पुं । उल्कापातादिदिव्यवैकृते आकाशादिष्वग्नि विकारे । उपाहिते ॥ अग्नेरुत्पातनुमुत्पातो वैकृतम् ॥ अग्निनिष्ठोत्पाते ॥ मन्त्रादिनाग्नेर्दाह शक्तिनिवारणे इत्यर्थ ॥

अग्रम् । न । पुरस्तात् ॥ उपरि ॥ पल परिमाणे ॥ आलम्बने ॥ समूहे ॥ वृक्षादिशिरसि । प्रान्ते ॥ भिक्षाविशेषे । ग्रासचतुष्टये ॥ ग्रासप्रमाणा भिक्षास्यादग्र ग्रासचतुष्टयमि ति स्मृते । त्रि । अधिके ॥ प्रथमे ॥ प्रधाने ॥ अग्यते अगतिवा । अगकुटिलायांगतौ । ऋज्रेन्द्रेतिसाधु ॥

अग्रकाण्ड । पुं । स्तोमवल्ल्याम । काण्डीरे ॥

अग्रग । त्रि । सेवके । अग्रेसरे ॥ अग्रेगच्छति । गम्लृगतौ । अन्यत्रापीतिड ॥

अग्रगण्यः । त्रि । अग्रेगणनीये ॥ यथा । शमनभवनयाने यज्ञवानग्रगण्य इतिमहानाटकम ॥

अग्रगामी । त्रि । अग्रगे । अग्रेसरे ॥

अग्रजः । पुं । ज्येष्ठे भ्रातरि ॥ ब्राह्मणे ॥ त्रि । पूर्वजाते ॥ अग्रेजात. सप्तम्यां जनेर्ड ॥

अग्रजङ्घा ॥ स्त्री । जङ्घाग्रभागे । प्रतिजङ्घायाम् ॥

अग्रजन्मा । पुं । द्विजे ॥ ज्येष्ठे भ्रातरि ॥

अग्रथि॥ अग्रेआद्योजन्माऽस्य॥

अग्रजात. । पुं । विप्रे॥ त्रि । पूर्वजाते ॥ अग्रेजात ॥

अग्रजाति. । पुं । ब्राह्मणे॥ अग्रेजातिर्जन्मास्य॥

अग्रणी'। त्रि । अग्रिमे । उत्तमे॥ अग्रं नयति । णीञ्प्रापणे। सत्सूद्विषेतिक्विप्।' अग्रग्रामाभ्यामितिणत्वम्॥ विष्णौ॥ सर्वेषामग्रणीर्विष्णुसेव्यःपूज्यःसनित्यश इतिमोक्षधर्मः॥ अग्रमुत्कृष्टनिरस्तसकलदुःखानुषङ्गपरमानन्दस्वरूप पदंस्थाननयतिमुमुक्षूनितितथा॥

अग्रत'। । प्रथमे॥ पुरोऽर्थे॥ यथा । अग्रतश्चतुरोवेदाइति॥ अग्रेइति। आद्यादित्वाततसि'॥ अग्रे॥

अग्रतःसरः। त्रि । अग्रगामिनि। पुरोगे॥ अग्रतःसरति । सृगतौ। पुरोग्रतोग्रेषुसर्त्तेरितिटः॥

अग्रदानो। पुं। आग्रहारिके। प्रेतसंमल[illegible]तिलादि द्रव्यग्राहिणि पतितब्राह्मणे॥ यथा। लोभीविप्रश्चशूद्राणामग्रेदान गृहीतवान्। ग्रहणेमृतदानानामग्रदानी बभूवस इतिब्रह्मवैवर्त्तपुराणम्॥

अग्रपर्णी। स्त्री। गौडभाषायाम्[illegible]शीतिप्रसिद्धौषधे। अजलोमाख्यवृक्षे॥

अग्रमांसम। न। हृदयान्तर्गतमांसभेदे। वुक्कायाम्॥ अग्र मुख्यमांसम्॥ उदरमध्यवर्त्तिमांसवर्धनरूपरोगविशेषे॥

अग्रयाणम्। न। प्रथमे॥ नासीरे। सेनाविशेषे॥

अग्रयायी। त्रि। अग्रेसरे॥

अग्रलोहिता। स्त्री। चिल्लीशाके॥ इति राजनिर्घण्ट॥

अग्रसन्धानी। स्त्री। यमपञ्जिकायाम्। जीवानांशुभाशुभकर्मलिखितयमस्यपुस्तके॥

अग्रसर. । त्रि। अग्रगामिनि॥ अग्रेसरति। बाहुलकाट्ट॥ पुरोगाग्रतोग्रेषुसर्त्तेरितिटोवा॥

अग्रहः। पुं। वानप्रस्थे॥

अग्रहायण। पुं। मार्गमासे। मार्गशीर्षे॥

अग्रायणीयम्। न। वादस्यभेदे॥

अग्राह्य'। त्रि। परमेश्वरे॥ इन्द्रियाऽविषये॥ नग्राह्यः॥ ग्रहणायोग्ये॥ यथा। अग्राह्य शिवनैवेद्यंपत्रपुष्पफलजलम्। सालग्रामशिलास्पर्शात्सर्वंयातिपवित्रताम्मिति॥

अग्रिम'। त्रि। ज्येष्ठे॥ उत्तमे॥ अग्रेजातः। तत्रभवोवा। अग्रादिपश्चाड्डिमच्॥

अग्रिमा । स्त्री । लवनीफले । लोना इतिगौडप्रसिद्धेफलवृक्षे ॥

अग्रिय. । पुं । ज्येष्ठसोदरे ॥ त्रि । प्रधाने ॥ इत्यमर ॥ अग्रेभव । घ ॥

अग्रीय । त्रि । अग्रियार्थे॥ अग्रेभव । छप्रत्यय ॥

अग्रे । ा । प्रधाने ॥ विभक्तिप्रतिरूपकोनिपात ॥

अग्रेग । पुं । अग्रगे ॥ अग्रेगच्छति । गमॢगतौ । क्विप् । ऊङ्चगमादीनामित्यूङ् । अनुनासिकलोपश्च । अग्रेग्वौ अग्रेग्व इत्यादिवोध्यम ॥

अग्रेदिधिषू । पुं । पुनर्भूभर्त्तरि । प्रधानपुनर्भूभार्ये ॥ अग्रेप्रधानदिधिषूर्यस्य । अग्रेइतिविभक्तिप्रतिरूपकोनिपात । समासान्तविधेरनित्यत्वान्नकप् ॥

ग्रेदिधिषू । स्त्री । ज्येष्ठायांसोदरभगिन्यामनूढायां याकनिष्ठा विवाह्येन दीयतेतस्याम् ॥ उक्तञ्चलोकाक्षिणा । ज्येष्ठायांयद्यनूढायां कन्यायामुह्यतेऽनुजा । साचाग्रेदिधिषूर्ज्ञेयापूर्वा तुदिधिषु स्मृतेति ॥

अग्रेवणम् । न । वनस्याग्रभागे ॥ वनस्याग्रे । राजदन्तादिषु निपातनात्सप्तम्याअलुक् । वनपुरगेतिणत्वम ॥

अग्रेसरः । त्रि । अग्रगे । पुरोगमे ॥ अग्रमग्रेणाग्रे वासरति । सृगतौ । पुरोग्रतोऽग्रेषुसर्त्तेरितिट अग्रेइति एदन्तत्वनिपातनात ॥

अग्रेसरिक । त्रि । अग्रगामिनि ॥

अग्र्य । त्रि । अग्रिमे । प्रधाने ॥ पुं । ज्येष्ठभ्रातरि ॥ प्रतिष्ठिते ॥ अग्रेभव । अग्राद्यत ॥ अग्रेसाधुर्वा । तत्रसाधुरितियत् ॥ अग्रइववा । शाखादिभ्योय ॥

अघम् । न । व्यसने ॥ दुःखे ॥ दुरिते । पापे ॥ अपराधे ॥ त्रि । तद्वति ॥ पापाचरणे ॥ अघतेगच्छतिदानादिना । अघिगतौ । पचाद्यच् । आगमशास्त्रस्याऽनित्यत्वान्ननुम ॥ अङ्घ्यतेऽनेनवा ॥ अघविद्यतेऽस्यअर्श आद्यच् ॥

अघमर्षणम् । त्रि । पापनाशिमन्त्रविशेषे । सर्वैनसामपध्वंसिनिजप्ये ॥ अघमर्षति । मृषुसहने । सहनमभिभव । यद्वा । मृष्यति । ल्युट् । स्त्रियांटित्वान्ङीप् ॥

अघमारः । पुं । यमे ॥ अघेनपापविशेषेणअत्युग्रेण अकाले मारयतिइतिअघमारः अजन्तः ॥

अघायुः । त्रि । पापजीवने ॥

अघोर । पुं । गिरिशे ॥ त्रि । अभयानके ॥

अघोरा । स्त्री । भाद्रकृष्णचतुर्दश्याम ॥

यथा । भाद्रमास्यसितपक्षेऽघोरा स्याच्चतुर्दशी । तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवमितिस्मृतिः ॥

अघोः । ं । सम्बोधने ॥

अघन्यः । पुं । प्रजापतौ ॥ अघन्यादिस्वात्हन्तेर्यक्अडागमउपधालोपश्च ॥ हन्तुमशक्यो ऽघन्यःपर्वतइतिवेदभाष्यम् ॥

अघन्या । स्त्री । सौरभेय्याम् ॥ नहन्यतेनहन्ति वादातारम् । अघन्यादयश्चेतिसाधुः ॥

अङ्कः । पुं । रूपकभेदे ॥ चिन्हे ॥ आजौ ॥ भूषणे ॥ कुचभूषायाम ॥ रूपके ॥ अंशे ॥ अन्तिके ॥ उत्सङ्गे ॥ स्थाने ॥ प्रकरणे ॥ अगे ॥ कटिप्रदेशे ॥ नाटकादिपरिच्छेदे ॥ एकादिरेखायाम् ॥ अपराधे ॥ नवसु ॥ नवमाङ्के ॥ अङ्क्यतेऽनेन । अकिलक्षणे । हलश्चेतिघञ् ॥

अङ्कतिः । पुं । अग्निहोत्रिणि ॥ वन्हौ ॥ वेधसि ॥ वायौ ॥ अञ्चति । अञ्चुगतौ । अञ्चेःकोविस्यतिःकश्चान्तादेशः ॥

अङ्कनम् । न । संख्यागस्थाने ॥ चिह्नयुतीकरणे । आंकनाइतिख्याते ॥

अङ्कपालिका । स्त्री । आश्लेषे । आलिङ्गने ॥

अङ्कपाली । स्त्री । परीरम्भे । धात्र्याम् ॥ वेदिकायाम् ॥ इतिमेदिनी ॥ कोटयामितिहेमचन्द्रः ॥

अङ्कलोथ्यः । पुं । चिञ्चोटके । चेचकोइतिगौडभाषाप्रसिद्धे ॥

अङ्गः । न । चिन्हे ॥ शरीरे ॥ अञ्चति । अञ्चुगतिपूजनयोः । अञ्च्यञ्जियुजिभृजिभ्यःकुश्चेत्यसुन कवर्गश्चान्तादेशः । अङ्कसी । अङ्कांसि ॥

अङ्कितः । त्रि । चिन्हिते । लाञ्छिते ॥ इतिव्याडिः ॥

अङ्किनी । स्त्री । अङ्कानांसमूहे ॥ खलादित्वादिनिः ॥

अङ्की । स्त्री । मृदङ्गभेदे । अङ्क्ये ॥

अङ्कुरः । पुं । रुधिरे ॥ लोम्नि ॥ सलिले ॥ अभिनवोद्भिदि ॥ अङ्क्यते । अकिलक्षणे । मन्दिवाशिमथीत्युरच् ॥

अङ्कुरितः । त्रि । उदयति ॥

अङ्कुशः । पुं । न । सृण्याम् ॥ बाधायाम् । अङ्क्यतेऽनेन । अकि । लाञ्छिवर्णसिपर्णसितखङ्गलाङ्कुशेति निपातनादुशच् ॥

अङ्कुशदुर्द्दुरः । पुं । गम्भीरवेदिनि ॥

अङ्कुशी । स्त्री । कलाकाकृतिसाधने ॥ बौद्धमातरि । जिनानांचतुर्विंशतिशासनदेव्यन्तर्गतदेवीविशेषे ॥ इतिहेमचन्द्रः ॥

अङ्कूर । पुं । अङ्कुरे । अभिनवोद्भिदि ॥ अङ्क्यते । अङ्किलक्षणे । खर्जूरादित्वादूरः ॥

अङ्कोटः । पुं । निकोचके । अङ्कोले । टेराइतिख्यातवृक्षे ॥ अङ्कोटकःकटुस्तीक्ष्णःस्निग्धोष्णस्तुवरोलघुः । रेचनःकृमिशूलामशोथग्रहविषापहः ॥ विसर्पकफपित्तास्रमूषकस्यविषापहः । तत्फलंशीतलंस्वादुश्लेष्मघ्नंबृंहणंगुरु ॥ बल्यंविरेचनंवातपित्तदाहक्षयास्रजित् ॥ अङ्क्यते । अङ्किलक्षणे । बाहुलकादोटः ॥

अङ्कोठः । पुं । अङ्कोटे । टेराइतिख्यातवृक्षे । आकोडइतिगौडभाषाप्रसिद्धे ॥ अङ्क्यतेबाहुलकादोठः ॥

अङ्कोलः । पुं । अङ्कोटवृक्षे ॥

अङ्कोलिका । स्त्री । आलिङ्गने ॥ इतिशब्दमाला ॥

अङ्कोल्लसार । पुं । । स्थावरविषप्रभेदे द्रुमान्तरे ॥ इतिहेमचन्द्रः ॥

अङ्क्यः । पुं । मृदङ्गभेदे ॥ यथा । सार्द्धतालत्रयायामश्चतुर्दशाङ्गुलाननः । हरीतक्याकृतिर्यःस्यादङ्क्योऽङ्केसहिवाद्यतेइतिभरतः ॥ अपिच । हरीतक्याकृतिस्त्वङ्क्योयवमध्यस्तथोर्द्धकः । आलिङ्ग्यश्चैव गोपुच्छोमध्यदक्षिणवामगाः ॥

अङ्ग । ा । सम्बोधने ॥ अङ्गति । अगिगतौ । पचाद्यच् । हर्षे ॥ सङ्गमे ॥ असूयायाम् ॥ पुनरर्थे ॥ अङ्गनरा् । घञ् । मूर्खोपिनावमन्तव्यःकिमङ्गविद्वान ॥

अङ्गम् । न । काये । गात्रे ॥ अवयवे । प्रतीके ॥ उपाये ॥ श्रुतेःशिक्षादिषट्सु ॥ यथा । शिक्षाकल्पोव्याकरणंनिरुक्तंछन्दएवच । ज्योतिषञ्चषडङ्गानिकथितानिमनीषिभिः ॥ मनसि ॥ यथा । हिरण्यगर्भाङ्गभुवम्मुनिर्हरिरितिमाघः ॥ क्लीवैकत्वेतुअप्रधाने ॥ तल्लक्षणंयथा । तदीयप्रधानफलजनकव्यापारजनकत्वेसतितदीयप्रधानफलाजनकत्वमङ्गत्वम् ॥ पुंभूम्नि ॥ नीवृति ॥ यथा । वैद्यनाथसमारम्भभुवनेशान्लगश्शिवे । तावदङ्गाभिधोदेशोयात्रायांनहिदुष्यतीति ॥ अङ्गाःक्षत्रियविशेषाःतेषांनिवासोजनपद अङ्गाः । तस्यनिवासइत्यणोजनपदेलुप्लुपियुक्तवद्व्यक्तिवचने । त्रि । अङ्गवति ॥ अन्तिके ॥ अङ्ग्यते ज्ञायतेऽनेन । अगिगतौ । घञ् ॥ अङ्गति । अञ्चा ॥ सम्पादके ॥ षट्सु ॥ लग्ने ॥

अङ्गलक्षः । पुं । गान्धर्वेदनायाम् ॥ इति दैवकम ॥

अङ्गज् । पुं । अनङ्गे ॥ केशे ॥ पुत्रे ॥ गदे । न । रुधिरे ॥ मले ॥ अङ्गात

अङ्गेभ्योवा जातः । जनी । ड ॥ कन्यायामङ्गजा मता ॥ त्रि । कायजे ॥

अङ्गणम् । न । अङ्गने ॥ पृषोदरादित्वात्साधुत्वम् ॥ अङ्ग्यतेऽत्र । अगि । ल्युट् । अनादेशस्य बाहुलकात्साधुत्वमित्येके ॥

अङ्गतिः । पुं । अग्निहोत्रिणि ॥ वह्नौ ॥ वेधसि ॥ विष्णौ ॥ इति शब्दरत्नावली ॥

अङ्गदः । पुं । वालिवानरपुत्रे ॥ न । केयूरे ॥ त्रि । अङ्गदातरि ॥ अङ्गदयते द्यतिवा । दैङ् रक्षणे दैप् शोधने दो अवखण्डने वा । आतोनुपेतिकः ॥

अङ्गदा । स्त्री । याम्यदिग्दन्तिहस्तिन्याम् ॥

अङ्गनम् । न । प्राङ्गणे ॥ याने ॥ अङ्ग्यतेऽनेन । अगिगतौ । करणेऽधिकरणेल्युट् ॥

अङ्गना । स्त्री । कामिन्याम् ॥ प्रशस्तान्यङ्गान्यस्याः । अङ्गात्कल्याणे इति नः ॥ सार्वभौमस्योत्तरदिग्गजस्य योषिति ॥ अङ्गति । अगिगतौ । युच् ॥

अङ्गनाप्रियः । पुं । अशोकपादपे ॥

अङ्गपः । पुं । कर्णे ॥

अङ्गपालिः । पुं । आलिङ्गने ॥ इति त्रिकाण्डशेषः ॥

अङ्गभूः । पुं । पुत्रे ॥ स्मरे ॥

अङ्गमर्दः । पुं । अङ्गसंवाहके । नापितादौ ॥

अङ्गमर्दकः । पुं । अङ्गमर्दे । अङ्गमर्दिनि ॥

अङ्गमेजयत्वम् । न । अङ्गकम्पने ॥ आसनस्थैर्यविघाते ॥ सर्वाङ्गगात्रवेपथौ । आसनमनसोःस्थैर्यस्यबाधके ॥

अङ्गरक्तः । पुं । गुण्डारोचन्याम् । पिकाचेष्टये । त्रि । रञ्जिते ॥

अङ्गरक्षणी । स्त्री । आयस्याम् । जालिकायाम् । लोहिकासंज्ञावाङ्गलिभाषाप्रसिद्धायाम् ॥

अङ्गरागः । पुं । चन्दनाद्यैरङ्गलेपे । विलेपने ॥ अङ्गेषुरागः ॥

अङ्गराट् । पुं । अङ्गदेशाधिपे । कर्णे ॥

अङ्गलक्ष्मीः । स्त्री । देहकान्तौ ॥

अङ्गलोड्यः । पुं । चिञ्चोटतृणे ॥

अङ्गवः । पुं । शुष्कफले । याने ॥

अङ्गविकृतिः । पुं । अपस्माररोगे ॥ अङ्गविकारे ॥

अङ्गविक्षेपः । पुं । अङ्गुल्याऽवङ्गस्याल नह्रपेन्नृत्ये । अङ्गविक्षेपणे । अङ्गहारे ॥ अङ्गानांविक्षेपोयत्र ॥

अङ्गवैकृतम् । न । अङ्गविकारे । इङ्गिते ॥

अङ्गः । न । पक्षिणि ॥ अञ्च्यते । अञ्जू व्यक्त्यादौ । अञ्ज्यञ्जियुजिभृजिभ्यः

अङ्गा | अङ्गार

कुश्चेत्यसुन्। कवर्गश्चान्तादेशः। अङ्गसी अङ्गासि ॥

अङ्गसंस्कारः। पुं। परिकर्म्मणि। शरीरशोभाजनककर्मणिस्नानादौ॥ अङ्गसंस्क्रियतेऽनेन। सम्पूर्वात्करोतेर्घञ्॥

अङ्गहारः। पुं। अङ्गविक्षेपे। अङ्गुल्यादिविन्यासभिदि। अङ्गानांस्थानात् स्थानान्तरेनयने॥ अङ्गस्यहरणम्। हृञ्हरणे। घञ्॥

अङ्गहारिः। पुं। अङ्गहारे॥ इतिभरतधृतोहड्डचन्द्रः॥

अङ्गहीनः। त्रि। अङ्गे। काणादौ॥ अङ्गेन अङ्गाभ्यां अङ्गैर्वा हीनः॥

अङ्गारः। पुं। महीसुते॥ त्रिकाण्डशेषः॥ हितावल्याम्॥ पुं। न। अलाते। निर्धूमाग्निपिण्डे॥ अङ्गति। अगिगतौ। अङ्गिमदिमन्दिभ्यआरन्॥ अङ्गत्यर्थित्वा। चङ्गतौ। कर्मण्यण्॥

अङ्गारकः। पुं। कुजे। भौमे॥ अङ्गानिदूयर्थिपीनत्वात्। चङ्गतौ॥ कर्मण्यण्। स्वार्थांकन्। यद्वा। अङ्गारइवरक्तवर्णत्वात्। इवेप्रतिकृताविति कन्॥ उल्मुकाग्ने॥ कुरुण्टके॥ भृङ्गराजे॥

अङ्गारकतैलम्। न। स्वनामख्यातपक्वतैलविशेषे॥ तस्यपाकप्रकारो यथा।

मूर्वालाचाहरिद्रेद्वेमञ्जिष्ठासेन्द्रवारुणी। बृहतीसैन्धवकुष्ठंरास्नामांसीशतावरी॥ आरनालाढकेनैवतैलप्रस्थंविपाचयेत। तैलमङ्गारकनाम सर्वज्वरविमोक्षणमितिसुखबोधः॥

अङ्गारकमणिः। पुं। प्रवाले॥ इति राजनिर्घण्टः॥

अङ्गारकर्कटी। स्त्री। अँगाकडी बाटी लिट्टी इत्यादि प्रसिद्धिगतायाम॥ यथा। शुष्कगोधूमचूर्णन्तुसाम्बुगाढविमर्दयेत्। विधायवटकाकारंनिर्धूमेष्वग्नौ पचेत्॥ अङ्गारकर्कटीह्यषाबृंहणीशुक्रलालघुः। दीपनीकफकृद्बल्यापीनसश्वासकासजित्॥

अङ्गारकुष्ठकः। पुं। हितावल्याम्। कुष्ठे॥

अङ्गारधानिका। स्त्री। हसन्त्याम्॥ स्वार्थेकन्॥

अङ्गारधानी। स्त्री। अङ्गारधारिण्याम्। हसन्त्याम॥ अङ्गाराधीयन्तेऽस्याम्। डुधाञ्धारणपोषणयोः। ल्युट्। ङीप्॥

अङ्गारधारिणी। स्त्री। अङ्गारधान्याम्। अङ्गाराणांधारिणी॥

अङ्गारपरिपाचितम्। न। शूलादिना पक्वमांसे॥ अङ्गारेषुपरितःपाचितम्॥ त्रि। अङ्गारपक्वे॥

अङ्गारपर्णः । पुं । चित्ररथाख्यगंधर्वे ॥ इतिमहाभारतम् ॥

अङ्गारपुष्पः । पुं । जीवपुत्रद्रुमे ॥ इति रत्नमाला ॥

अङ्गारमञ्जरी । स्त्री ।
अङ्गारमञ्जी । स्त्री । } करञ्जभेदे ॥

अङ्गारवल्लरी । स्त्री । करञ्जभेदे ॥ अङ्गारवर्णपर्णावल्लरी ॥ भार्ग्याम् ॥ गुञ्जायाम ॥

अङ्गारवल्ली । स्त्री ॥ महाकरञ्जे ॥ भार्ग्याम् ॥ अङ्गारवतवल्लीअस्याः । समासान्तविधेरनित्यत्वात् । नकप् ॥

अङ्गारशकटी । स्त्री । हसन्त्याम् ॥ अङ्गाराणांशकटी ॥

अङ्गारिः । स्त्री । हसन्त्याम् ॥ इतिजटाधरः ॥

अङ्गारिका । स्त्री । इक्षुकाण्डे ॥ किंशुककोरके ॥ इतिमेदिनी ॥

अङ्गारिणी । स्त्री । हसन्त्याम् ॥ भास्करस्यक्तदिशि ॥

अङ्गारितम् । त्रि । दग्धे ॥ अङ्गाराणि सञ्जातान्यस्य । तारकादित्वादितच् ॥ न । पलाशकलिकोद्गमे ॥

अङ्गारिता । स्त्री । हसन्त्याम् ॥ लताभावे ॥ नदीभेदे ॥

अङ्गार्य्यं । स्त्री । अङ्गाराणांसमूहे ॥ पाशादिभ्योयः ॥

अङ्गावबद्धम् । न । अङ्गाश्रितोपासने ॥ अङ्गे अङ्गेषुवाअवबद्धम ॥ त्रि । अङ्गबद्धे ॥

अङ्गिका । स्त्री । कञ्चुके "आँगी इति भाषाप्रसिद्धे ॥

अङ्गी । त्रि । प्रधाने । मुख्ये ॥ अवयविनि ॥

अङ्गिराः । पुं । मुनिभेदे ॥ बृहस्पतौ ॥ अङ्गिरआङ्गिरसयोरभेदोपचारात् ॥ प्रभवादिषुषष्ठवर्षे ॥ यथा । निरातङ्कंजगतसर्वंधनयौवनगर्वितम् । अङ्गिरसिप्रजाःसर्वानित्योत्साहावरानने इति ॥ अङ्गति । अगिगतौ । अङ्गिराइतिअङ्गतेरसिरिडागमश्चनिपातितः ॥

अङ्गीकारः । पुं । अभ्युपगमे ॥ अङ्गीकरणम् । अङ्गीतिच्व्यन्तम् । तत्पूर्वात्कृञोभावेघञ् ॥

अङ्गीकृतम । त्रि । स्वीकृते । उरीकृते ॥ यथा । आयातयातेनभवाम्बुराशौजातोमहानेवममप्रयासः । मोक्षायनाथस्य पदप्रसादादङ्गीकृतः सम्प्रतिकौलमार्गइति ॥ अनङ्गमङ्गमकारि ॥

अङ्गुः । पुं । अङ्गे ॥

अङ्गुरिः । स्त्री । अङ्गुल्याम् ॥

अङ्गुरी । स्त्री । अङ्गुल्याम् । पाणिपादाङ्गुल्याम् ॥

अङ्गुरीयः । पुं । न । } अङ्गुलिभूषणे ॥
अङ्गुरीयकः । पुं । न । }

अङ्गुलः । पुं । अङ्गुष्ठे ॥ अवमाने ॥ वात्स्यायनमुनौ ॥ न । अष्टसख्यवादरमाने ॥ अष्टभिस्तैर्भवेज्ज्यैष्ठ मध्यमसप्तभिर्यवैः । कन्यसषड्भिरुद्दिष्टमङ्गुलमुनिसत्तम ॥ मानतुपाश्वेन । षड्यवा. पार्श्वसम्मितादूति कात्यायनदर्शनात् ॥ अङ्गति । अगि गतौ । वाहुलकादुलः ॥

अङ्गुलिः । स्त्री । करशाखायाम् ॥ गजस्य कर्णिकायाम् । हस्तिशुण्डाग्रभागे ॥ अङ्गति । अगिगतौ । ऋतन्यञ्जीत्यङ्गेरुलिः ॥यद्वा । अङ्गुपाणिपादभवमवयवत्वात्ति । वाहुलकात्डिः ॥

अङ्गुलितोरणम् । न । अर्द्धचन्द्रे । गलेहस्ताधाने ॥ चन्दनादिद्वाराललाटेकृतेऽर्द्धचन्द्रे ॥ इतिहारावली ॥

अङ्गुलिचः । पुं । अङ्गुलिकवचे ॥ अङ्गुलीस्त्रायते । त्रैङ्पालने । कप्रत्ययः ॥

अङ्गुलिमुद्रा । स्त्री । साक्षराङ्गुलिभूषणा ॥अङ्गुल्यामुदराति । आतइतिकः॥ मोदतेवा । मुदहर्षे । स्फायितञ्चीतिरक्वा । अङ्गुल्याःमुद्रा ॥

अङ्गुलिमुद्रिका । स्त्री । साक्षराङ्गुलिभूषायाम् ॥ अङ्गुलिमुद्रैव । स्वार्थेकन् ॥

अङ्गुलिमोटनम । न । अङ्गुलिध्वनौ । स्वच्छव्याम् ॥ इतिहारावली ॥

अङ्गुलिसन्देशः । पुं ।अङ्गुलिशब्दे । अङ्गुलिमोटने ॥ इतिहारावली ॥

अङ्गुली । स्त्री । करशाखायाम् ॥ साक्षमेणपञ्चधा । यथा । अङ्गुष्ठस्तर्जनी मध्यानामिकाचकनिष्ठिकेति ॥ गजकर्णिकायाम् । हस्तिशुण्डाग्रे ॥ वह्वादिषुइतः प्राण्यङ्गादितिपक्षेङीष् ॥

अङ्गुलीकण्टकः । पुं । नखे ॥

अङ्गुलीमुद्रिका । स्त्री । साक्षराङ्गुलिभूषायाम ॥

अङ्गुलीयम् । न । पुं । ऊर्मिकायाम् ॥अङ्गुलीभवम् । जिह्वामूलाङ्गुलेश्छः॥

अङ्गुलीयकम् । न । पुं । अङ्गुलीभूषणे । ऊर्मिकायाम् ॥ यथा । अय मैथिल्य भिज्ञानंकाकुतस्थस्याङ्गुलीयक इतिभट्टिः ॥ स्वार्थेकन् ॥

अङ्गुलीसम्भूतः । पुं । कररुहे । नखे ॥

अङ्गुष्ठः । पुं । अङ्गुलिभेदे । वृद्धाङ्गुलौ॥ अङ्गौपाणौतिष्ठति । ष्ठा । सुपीतिकः । अम्बाम्बेतिषत्वम् ॥

अङ्गुष्ठमात्रः । त्रि । अङ्गुष्ठपरिमाणे ॥ अङ्गुष्ठपरिमाणहृदयपुण्डरीक तच्छिद्रवर्त्त्यन्तःकरणोपाधिरङ्गुष्ठमात्रः । अङ्गुष्ठमात्रवंशपर्वमध्यवर्त्त्यम्बरवत् ॥

अङ्गूषः । पुं । नकुले ॥ बाणे ॥ इत्युणादिकोषः ॥

अघः । पुं । पातके । दुरिते ॥ अङ्घ्यतेऽनेन । अघिगत्याक्षेपे । घञ् ॥

अङ्घ्रिः । पुं । पादे ॥ द्रुमूले ॥ अङ्घति । अनेनवा । अङ्घिगतौ । वक्र्यादयश्चेतिसाधुः ॥

अङ्घ्रिनामकः । पुं । वृक्षमूले ॥ इत्यमरः ॥

अङ्घ्रिनाम । न । वृक्षमूले ॥ अङ्घ्रेर्नामनामयस्य ॥ इतिहेमचन्द्रः ॥

अङ्घ्रिपः । पुं । द्रुमे ॥ अङ्घ्रिभिःपिबति । पापाने । सुपीतियोगविभागात्कः ॥

अङ्घ्रिपर्णिका । स्त्री । पृश्निपर्ण्याम् । पिठवनोतिख्यातायाम् ॥ अङ्घ्रेरारभ्यपर्णान्यस्याः । ङीष् । स्वार्थेकन् ॥

अङ्घ्रिपर्णी । स्त्री । पृश्निपर्ण्याम् ॥

अङ्घ्रिवल्लिः । स्त्री । पृश्निपर्ण्याम् ॥ अङ्घ्रेरारभ्यवल्लिरस्याः ॥

अङ्घ्रिवल्लिका । स्त्री । पृश्निपर्ण्याम् । चाकुलिया इति गौडभाषाप्रसिद्धायाम् ॥

अङ्घ्रिवल्ली । स्त्री । पृश्निपर्ण्याम् ॥

अङ्घ्रिस्कन्धः । पुं । गुल्फे ॥

अचक्षु । त्रि । मन्दचक्षुषि ॥ नेत्रहीने । अन्धे ॥ नचक्षुर्यस्य ॥

अचण्डी । स्त्री । सुकरायाम् ॥ अकोपनस्त्रियाम् ॥ नचण्डी ॥

अचर । पुं । स्थावरे ॥ चरति । चरतेरच् । नचर ॥ त्रि । स्थिरे ॥

अचरमम् । त्रि । प्रधाने । श्रेष्ठे ॥

अचल । पुं । शैले ॥ कीले ॥ शिवे ॥ त्रि । अकम्पे । स्थिरे ॥ अविकारिणि । कूटस्थे ॥ नस्वरूपान्नसामर्थ्यान्नच ज्ञानादिकाद्गुणात् । चलनविद्यते यस्येत्यचल कीर्त्तितोच्युतः ॥ सुपुसिमूर्च्छास्तब्धीभावादिरूपचलयस्य चाचलनरहिते ॥ दीर्घकालादरनैरन्तर्यसत्कारसेवनैर्विजातीयप्रत्ययादूषिते आत्मतत्वे । अचक्रिये ॥ चलति । चलकम्पने । पचाद्यच् ॥ नचलः ॥

अचलकीला । स्त्री । भूमौ ॥ इतिशब्दरत्नावली ॥

अचलत्विट् । पुं । कोकिले ॥ इतिशब्दचन्द्रिका ॥

अचलप्रतिष्ठः । त्रि । अनतिक्रान्तमर्यादे ॥ पुं । समुद्रे ॥ अचलानांमैनाकादीनांप्रतिष्ठायस्मिन् ॥

अचलभ्राता । पुं । बौद्धगणाधिपविशेषे ॥ सतुशेष जैनाचार्यस्यैकादशशिष्यान्तर्गत इतिहेमचन्द्रः ॥

अचला । स्त्री । भुवि ॥ नचलति । चलकम्पने । पचाद्यच् ॥ यद्वा । अचला भूधराः सन्त्यस्याम । अर्शआदिभ्योजि

न्यच ॥

अचलाधिप. । पुं । हिमवति ॥ अचलानामधिपः ॥

अचापलम् । न । चापलाभावे ॥ नचापलम ॥

अचिन्त्यः । चि । अयमीदृशइतिप्रपञ्चलक्षणत्वेनचिन्तयितुमशक्ये। मनसोऽविषये परब्रह्मणि ॥ चिन्त्योनुमेयस्तद्भिन्नलक्षणे । शब्दवृत्तेरिवमनोवृत्तेरप्यविषये । इयत्तयापरिच्छेत्तुमयोग्ये। प्रमाणादिसाक्षित्वेनसर्वप्रमाणागोचरे ॥ नचिन्त्यः ॥ अचिन्त्याःखलुयेभावानतांस्तर्केणयोजयेत्। प्रकृतिभ्यःपरयच्चतदचिन्त्यस्यलक्षणम ॥

अचिन्त्यात्मा । पुं । सर्वभूतप्रणेतरि । परमेश्वरे ॥

अचिरद्युतिः। स्त्री । विद्युति ॥ अचिरंद्युतिर्यस्याःसा ॥

अचिरप्रभा । स्त्री । विद्युति ॥ अचिरप्रभायस्या'सा ॥

अचिररोचि । स्त्री । विद्युति ॥ अचिररोचिर्यस्याःसा ॥

अचिरा । स्त्री । अर्हतांमातृविशेषे ॥

अचिरांशुः । स्त्री । तडिति ॥ अचिरअंशवोयस्या,सा ॥

अचिराङ्गलता । स्त्री । विद्युति । अचिरमङ्गलतायस्याःसा ॥

अचिरात् । ा । अविलम्बे। शीघ्रे ॥

अचिराभा । स्त्री । सौदामिन्याम् ॥ अचिरमाभायस्यासा ॥

अचेतनम । चि । व्यक्ते ॥ प्रधाने ॥ जडे ॥ सर्वएवप्रधानबुद्ध्यादयोऽचेतनाः ननुवैशेषिकवच्चैतन्यबुद्धेः । नचेतनम॥ सेन्द्रियचेतनद्रव्यंनिरिन्द्रियमचेतनमितिचरक ॥

अचेताः। चि। विवेकशून्ये॥ दुष्टचित्ते॥ नास्तिचेतोयस्य ॥

अचैतन्यम । न। चेतनाभावे । अज्ञाने ॥ यथा। अचैतन्यमिदंविश्वंचैतन्यदेवमेवतत् । नजानन्त्यपिशास्त्रज्ञाभ्रमन्त्ये वहिर्केवलमिति ॥ चि । तद्वति ॥

अच्छः । पुं । भल्लूके ॥ स्फटिके ॥ चि । निर्मले ॥ छोछेदने । नछ्यतिदृष्टिम । सुपीतियोगविभागात्कः। नछ्यतेवा । अन्येष्वपीतिड' ॥

अच्छटाभा । स्त्री । विद्युति ॥

अच्छभल्लः । पुं । भल्लूके ॥ अच्छमाभिमुख्येनभल्लते हिनस्ति । भल्लपरिभाषणहिंसादानेषु । पचाद्यच् ॥

अच्छम । ा । आभिमुख्ये ॥

अच्छावाकः । पुं । ऋत्विग्विशेषे ॥

अच्छावाकीयम् । न । अच्छावाकस्यकर्मभावयोः ॥ छोचाभ्य ष्क ॥ ऋत्वि

शेषे ॥ अच्छावाकृशब्दोऽस्मिन्नस्ति । मतौछ'वृत्तसाम्नोरितिछः ॥

अच्युतः । पुं । विष्णौ । अप्रच्युतसच्चिदानन्दस्वभावे । देशकालवस्तुषुच्युतिरहिते । सर्वदानिर्विकारे ॥ कृष्णे । वासुदेवे ॥ स्वरूपभूतसामर्थ्यात् नच्युतोनच्यवते नच्यविष्यतेय·सोऽच्युतः ॥ यस्मान्नच्युतपूर्वोहमच्युतस्तेन कर्मणेतिभगवतोवचनम् ॥ नास्तिच्युतंस्खलनस्वपदाद्यस्य ॥ यद्वा । नच्योतिष्ट । च्युङ्गतौ । भौवादिकः । गत्यर्थेतिक्त· ॥ द्वादशेसर्गे ॥ त्रि । स्थिरे ॥

अच्युतभावः । पुं । विष्णुभक्तौ ॥ अच्युतेभावः ॥

अच्युतमूर्त्तिः । पुं । विष्णौ ॥

अच्युताग्रजः । पुं । बलदेवे ॥ शक्रे ॥ अच्युतस्यअग्रजः । षष्ठीतत्पुरुषः ॥

अच्युतावासः । पुं । अश्वत्थवृक्षे ॥

अजः । पुं । हरे ॥ विष्णौ ॥ अजतिगच्छतिभक्तहृदयम् अजतिक्षिपतिश्रत्रूनसुरान्प्रति । अजगतिक्षेपणयोः । अच् ॥ नहिजातोनजायेहंनजनिष्येकदाचन । क्षेत्रज्ञःसर्वभूतानांतस्मादहमजःस्मृत इतिभारते ॥ वेधसि ॥ स्मरे ॥ आद्विष्णोरजायत । जनीप्रादुर्भावे । पञ्चम्यामजाताविति डः ॥ छागे ॥ अजति । अजगतौ । पचाद्यच । अजाविभ्यामिति निर्द्देशात्‌नवीभावः ॥ मेषे ॥ मेषराशौ ॥ रघुराजपुत्रे ॥ जन्मादिविक्रियारहिते आत्मनि ॥ माक्षिकधातौ ॥ विधौ । सोमे ॥ त्रि । जन्मशून्ये । नजायते इतिव्युत्पत्त्याआद्यविकारशून्ये ॥ अवयवावयविविभागरहिते ॥ नजायते । जनीप्रादुर्भावे । अन्येष्वपीतिडः ॥ आत्‌विष्णोर्जायतेवा ॥

अजएकपात् । पुं । एतन्नामके देवविशेषे ॥

अजकर्णः । पुं । छागकर्णे ॥ सालतरोः प्रभेदे । मरिचपत्रे ॥ अजकर्णःकटुस्तिक्तःकषायोष्णोव्यपोहति । कफपाण्डुश्रुतिगदान्मेहकुष्ठविषव्रणान् ॥

अजकर्णकः । पुं । सालवृक्षे ॥

अजकवम् । न । पुं । शिवधनुषि ॥ अजकौविष्णुब्रह्माणौ वाति । वागतिगन्धनयोः । सुपीति आतोनुपसर्गइति वाकः ॥

अजकावः । पुं । न । पिनाके ॥ अजोविष्णुःकोब्रह्माताववतीत्यजकावः ॥

अजगः । पुं । विष्णौ ॥

अजगन्धा । स्त्री । बर्बरायाम् ॥ अजमोदायाम् ॥ अजस्येवगन्धोयस्याः । अजशब्दःस्वगन्धेनाचयिकः ॥

अजगन्धिका । स्त्री । वर्वरायाम् । वा वुइ इतिख्याते शाकान्तरे ॥ अजस्येव गन्धोऽस्याः । अजशब्दः स्वगन्धेनाच्च णिकः ॥ उग्रगन्धायाम् ॥

अजगन्धिनी । स्त्री । अजशृङ्ग्याम् ॥

अजगरः । पुं । अहिभेदे । वाहसे ॥ गिरतीतिगरः । गनिगरणे । पचा द्यच् । अजस्यगरः ॥ अजोनित्यो ग रोविषयस्येतिवा ॥

अजगवम् । न । पिनाके । शिवचापे ॥ अजेनब्रह्मणा गम्यते प्राप्यते । गम्लृग तौ । अन्येष्वपिदृश्यतेइतिडः । अजछा गगच्छतियत्त्वेनप्रविशतीतिवा । अ जगोविष्णुरस्तिशरत्वेनास्मिन् । गा यत्यजगात्मन्यायामितिव ॥

अजगावम । न । ईशचापे । पिनाके ॥ इतिशब्दमाला ॥

अजजीवकः । पुं । अजाजीविनि । जावाले ॥ अजैर्जीविकायस्य ॥

अजटा । स्त्री । भूम्यामलक्याम् ॥

अजडा । स्त्री । भूम्यामलक्याम् ॥ क पिकच्छ्वां ॥

अजथ्या । स्त्री । स्वर्णयूथिकायाम ॥ अ जाय अजायैवा हिता । अजाविभ्यां थ्यन् । तसिलादिष्वितिपुंवद्भाव ॥

अजदण्डी । स्त्री । ब्रह्मदण्डीवृक्षे ॥

अजननिः । पुं । अनुत्पत्तौ ॥ आक्रोश ने ॥ अजननम् । आक्रोशेनञ्यनिः ॥ यथा । तस्याजननिरेवास्तु ।

अजनयोनिः । पुं । ब्रह्मणि । चतुराने ॥

अजनाभः । पुं । अस्मिनवर्षे ॥ भरता धिकारातभारतइतिव्यपदेश पूर्वंत, अजनाभइति ॥

अजन्यम् । न । उत्पाते ॥ त्रि । निन्द्ये ॥ अजनेसाधु । तत्रसाधुरितियत् । नञ् न्यतेवा । जनेयक् । तकिशसिचति यतिजनिभ्योयद्वाच्य इतियद्वा ॥

अजप । त्रि । असद्ध्येतरि ॥ जपाभाव वति ॥ पुं । छागपालके । यथा । स्रो पधीर्नामरूपाभ्याजानतेह्यजपावने इतिचरकः ॥ अजम् अजान्वापाति । पारक्षणे । आतोनुपसर्गेइतिकः ॥

अजपा । स्त्री । सन्ध्यावन्दनहीनाया म् ॥ देवताभेदे ॥ गायत्रीविशेषे ॥ यथा । अजपानामगायत्रीजीवोजप तिनित्यश । अजपांजपतोनित्य पुन र्जन्मनंविद्यते इति । अस्याविधानंद क्षिणामूर्त्तिसंहितायांस्पष्टम ॥

अजपात् । पुं । पूर्वभाद्रपदनक्षत्रे ॥

अजपाद । पुं । विष्णुपदे

अजभक्ष । पुं । वर्बुरवृक्षे ॥ इतिराज निर्घण्टः ॥

अजमीढ । पुं । युधिष्ठिरे ॥ इतिशिका ण्डशेष. ॥

अजमोदा । स्त्री । उग्रगन्धायाम् ॥ यवान्याम् ॥ अजमोदयति । मुदह र्षे । णयन्तः । कर्मण्यण् । अजादित्वाट्टाप् ॥ यद्वा । अजेममोदते मोदतेवा । पचाद्यच् षष्ठ्या ॥ अजमोदाकटुस्तीक्ष्णादीपनीकफवातनुत् । उष्णाविदाहिनी हृद्यावृष्यावलकरी लघुः । नेत्रामयकृमिच्छर्दिहिध्मावस्तिरुजोहरेत् ॥

अजम्भः । पु । भेके ॥ नसन्तिजम्भाःदन्ताः अस्य ॥ इतिशब्दरत्नावली ॥

अजयः । पुं । पराजये ॥ राढदेशप्रसिद्धनदविशेषे ॥

अजया । स्त्री । भङ्गायाम् । विजयायाम् ॥

अजय्यम । त्रि । जेतुमशक्य ॥ नेजय्यम् ॥

अजरः । त्रि । जरारहिते ॥ पुं । आत्मनि । देवे । नजीर्यते नविपरिणमते इत्यजर आत्मेत्यर्थः ॥

अजरा । स्त्री । जीर्णदारुणि । गृहकन्यायाम् । घृतकुमारीतिप्रसिद्धायाम् ॥

अजर्य्यम् । न । सङ्गते । सौहृदे ॥ नजीर्य्यति । वृष्वयोहानौ । नञ्पूर्वात् जीर्य्यतेः सङ्गतेविशेष्ये अजर्य्यंसङ्गतमितिकर्त्तरियन्निपात्यते । तेन सङ्गतमार्य्येणरामाजर्य्यं कुरुद्रुतम् ॥ सङ्गतं युक्तम् ॥

अजलम्बनम् । न । स्रोतोञ्जने ॥

अजलोमा । पुं । शुयाशिम्बीतिगौडभाषाप्रसिद्धवृक्षे । मर्क्काहृस्वायाम् ॥ । न । अजलोम्नि ॥

अजवल्ली । स्त्री । मेषशृङ्ग्याम् । विषाण्याम् ॥

अजवीथी । स्त्री । दक्षिणमार्गे नक्षत्रविशेषाणासत्ताविशेषे ॥ यथा । मूलाषाढोत्तराषाढा अजवीथ्य भिशब्दितेति ॥

अजशृङ्गी । स्त्री । विषाण्याम् । शृङ्ग्याम् । मेढासींगीतिख्यातायाम् ॥ अजःशृङ्गमस्याः । अजशब्दोऽजशृङ्गसदृशेलाक्षणिकः । गौरादित्वानङीष् ॥

अजस्रम् । न । निरन्तरे । सन्तते ॥ कालत्रयावस्थायिनि ॥ नजस्यति । जसुमाक्षणे । नमिकम्पिस्म्यजसकमहिंसदीपोर इतिरः । क्रियाविशेषणत्वेस्यक्लीवत्वम् । द्रव्यविशेषणत्वेतुवाच्यलिङ्गत्वम् ॥

अजस्रम् । T । नित्ये । सातत्ये ॥

अजहत्स्वार्था । स्त्री । उपादानलक्षणायाम् । अजहल्लक्षणायाम् । स्वोयार्थापरित्यागिन्यां लक्षणायाम् ॥ यथा । कुन्ताःप्रविशन्तिइत्यत्र कुन्तधारिणि पुरुषेलक्षणा ॥

अजहल्लक्षणा । स्त्री । अजहत्स्वार्थायाम् ॥ वाच्यार्थापरित्यागेनतत्सम्बन्धिनिवृत्तिरजहल्लक्षणेति । यथा । शोणोधावतीत्यत्रवाक्येशोणगुणगमनलक्षणस्य वाक्यार्थस्यविरुद्धत्वात्तत्परित्यागेनतदाश्रयाश्वादिलक्षणयातद्विरोधपरिहार सम्भवादजहल्लक्षणा । शोणपदेस्ववाच्यशोणगुणापरित्यागेन तदाधारलक्षणेत्यर्थः ।

अजहल्लिङ्गः । पुं । स्वलिङ्गात्यागिनि ॥ विशेषणभूतोपि स्वलिङ्गात्यागीश ब्दोऽजहल्लिङ्ग इत्युच्यते ॥

अजहा । स्त्री । शूकशिम्बाम्, ॥ कपिकच्छाम् ॥

अजा । स्त्री । मायायाम ॥ छागल्याम् ॥ अजति । अजगतौ । पचाद्यच् ॥ अजाद्यतष्टाप् ॥ नजायते इतिवा ॥ अजाविभ्यामिति निर्देशाद्वी । अजा

अजागर् । पुं । भृङ्गराजे ॥ त्रि । जागरणरहिते ॥

अजाजी । स्त्री । काकोदुम्बरिकायाम् ॥ कृष्णजीरके ॥ श्वेतजीरके ॥ इलिराजनिर्घण्टः ॥ अजमजति । अजगतिक्षेपणयोः । कर्मण्यण् । ङीप् । बहुलतग्रीतिवीन ॥

अजाजीव । पुं । छागोपजीविनि । जाबाले ॥ अजाआजीवो जीविकाऽस्य ॥

अजातशत्रुः । पुं । युधिष्ठिराख्यपाण्डवे ॥ स्वयमविद्वेषणशीलत्वात्अजातशत्रुर्यस्य ॥

अजातिः । स्त्री । अनुत्पत्तौ ॥ हेतुफलयोः कार्यकारणभावानुपपत्तौ ॥ पूर्वापरापरिज्ञानमजातेःपरिदीपकम् । नियतेपौर्वापर्येनिर्द्धारितेजातिसिद्धातिलदभावेतदसिद्धिरित्यर्थः॥ त्रि । जन्मरहिते ॥ जातिर्जन्मतद्रहितः ॥ अविद्यमानाजातिरस्यवा ॥

अजादनी । स्त्री । क्षुद्रदुरालभायाम् ॥

अजादुग्धम् । न । छागीदुग्धे ॥

अजानेय । पुं । अश्वभेदे । उत्तमाश्वे ॥ त्रि । निर्भये ॥

अजान्त्री । स्त्री । नीलवृक्षायाम् । नीलावोनाइतिभाषा ॥ वृद्धदारके ॥

अजापाल । पुं । अजाजीवे ॥ अजां पालयति । पालनरक्षणे । कर्मण्यण् ॥

अजाप्रिया । स्त्री । बदर्याम ॥

अजि । पु । तेजसि ॥ अजति वीयते वा । अजगतिक्षेपणयोः । खनिकष्यजी त्यादिनाइप्रत्ययः ॥

अजीतः । पुं । विष्णौ ॥ तीर्थङ्करजिनभेदे ॥ भाविबुद्धे ॥ त्रि । अनिर्जिते ॥ नजीयतेस्म । जिजभिभवे । क्तः । नजितः ॥

अजितसम्भवः । पुं । मनोज्ञे । बुद्धभेदे ॥

अजितात्सम्भवोयस्य ॥ त्रि । आभ्यामन्यस्मिन् ॥

अजिनम् । न । चर्मणि ॥ त्रि । अवुद्धके ॥ अजति वीयतेवा ।अजगतौ । अजेरजव्येति इनच् ॥

अजिनपत्रा । स्त्री । चर्मदत्र्याम । जतुकायाम् ॥ अजिनमिवपत्रमस्याः ।

अजिनपत्री । स्त्री । जतुकायाम ॥

अजिनयोनिः । पुं । हरिणे ॥ अजिनस्ययोनिः ॥ कदलीकन्दलीचीनश्चमूरुप्रियकावपि । समूरुश्चेतिहरिणा अमीअजिनयोनयः ॥

अजिरम् । न । प्राकाराद्वहिःक्रीडास्थाने । प्राङ्गणे ॥ वाते ॥ विषये । रूपादौ ॥ दर्दुरे ॥ तनौ ॥ अजन्त्यनेनवा । अजगतौ । अजिरशिशिरेतिसाधु ॥ नजीर्यति । जूष्वयोहानौ । अजिरशिशिरेतिकिरच्‌कवर्णलोपश्चनिपात्यतइत्युक्तदशपादीवृत्तौ ॥

अजिरा । स्त्री । नद्याम् ॥

अजिह्मः । त्रि । सरले । ऋजौ ॥ भिन्नोजिह्मात् ॥

अजिह्मगः । पुं । शरे ॥ जिह्मस्याभाव । अजिह्ममृजुगच्छति । गम्लृगतौ । अन्येष्वपीतिडः । त्रि ।अवक्रगे ॥

अजिह्वः । पुं । भेके ॥ भिन्नौ ॥ यथा । इदमिष्टमिदनेति योश्नन्नपिनसज्जते । हितसत्यमितवक्तितमजिह्वप्रचक्षते ॥ त्रि । जिह्वाशून्ये ॥ नविद्यतेजिह्वायस्य ॥

अजीकवः । पुं । अजगवे । पिनाके ॥

अजीगर्त्त । पुं । शुनःशेफस्यपितरि । ऋषिविशेषे ॥

अजीर्णम् । न । अपाके । पक्वाशये । रोगभेदे ॥ नजीर्णम् ॥ अनात्मवन्तःपशुवद्भुञ्जतेये ऽप्रमाणतः । रोगानीकस्यतेमूलमजीर्णं प्राप्नुवन्तिहि ॥ अनात्मवन्तःअवुद्धिमन्तः। त्रि । जीर्णाभावविशिष्टे ॥

अजीर्यन् । त्रि । वयोहानिमप्राप्नुवति ॥

अजीवः । त्रि । मृते ॥ अवसन्ने ॥ अनेकान्तवादिनां द्वितीयेपदार्थे । सचपुद्गलाकाशधर्माधर्मास्तिकायैश्चतुर्विध. ॥

अजीवनिः । स्त्री । शापोक्त्यजीवनाभावे ॥ जीवनाभावे ॥ शापे ॥ अजीवनिस्तवभूयात् ॥

अजैकपात् । पुं । रुद्रविशेषे ॥ पूर्वाभाद्रपदनक्षत्राधिदैवते ॥

अजैकपादः । पुं । रुद्रविशेषे ॥

अज्जुका । स्त्री । नाट्योक्त्यागणिकायाम् ॥ अर्जति । अर्जअर्जने । समि

कसद्दतिवाहुलकादुकनरस्यजः ॥

अज्झटा । स्त्री । भूम्यामलक्याम् । वितुन्नके । स्वच्छयमास्यें । अत्आस्यर्यकारीभट्‌सङ्घातोऽस्या ॥ अष्ति क्षिप् । भटति । भटसघाते । अच । टाप् । अज्ञासौझटाचवा ॥

अज्झल. । पुं । अङ्गारे । कोकिले । अगाराद्गतिभ.षायाम् इतिचिकाण्डशेषः ॥ न । फलके । चर्मणि । ढाल इति भाषायाम् ॥ इतिहेमचन्द्रः ॥

अज्ञः । त्रि । जडे । श्रुतितात्पर्यानभिज्ञे ॥ अनधीतशास्त्रत्वेनात्मज्ञानशून्ये अविवेकिनि ॥ मूर्खे ॥ नजानाति । ज्ञाअवबोधने । इगुपधज्ञाप्रीकिर.कः ॥

अज्ञातः । त्रि । अज्ञानेनावृते । अविदिते । नज्ञात ॥ यथा । अज्ञातकुलशीस्यवासोदेयोनकस्यचित् । मार्जारस्यहिदोषेणहतोगृध्रोजरद्गव इतिहितोपदेशे ॥

अज्ञानम् । न । अविद्यायाम् ॥ ज्ञानविरुद्धमज्ञानम् । ज्ञाननिवर्त्य त्वात् ॥ यथा । एक शत्रुर्नद्वितीयोस्तिशत्रुरज्ञानतुल्यःपुरुषस्यराजन । येनावृत्त कुरुतेकार्यतेचघोराणिकर्माणिसुदारुणानीति ॥ विपरीतदर्शने ॥ यत्प्रसादाद्विदादिसिध्यती वदिवानिशम् । तमप्यपन्हुतेऽविद्वानाज्ञानस्यास्तिदुष्करम् ॥ प्रपञ्चोपादाने । अविवेके । आवरणविक्षेपशक्तिमति । अनाद्यनिर्वाच्ये । अन्नृते । अनर्थव्रातमूले । आत्माश्रयविषये ॥ यथा । यस्याज्ञानभ्रमस्तस्याभ्रान्तःसम्यक्चवेत्तिसः । जडनविद्यादेत्वस्यान्ज्ञातोऽज्ञानजडाश्रयमिति ॥ अविद्यामायादिशब्दवाच्येतमसि ॥ अमानित्वादिविपरीत यन्मानित्वादिविंशतिसङ्ख्याक तस्मिन ॥ कर्त्तव्याकर्त्तव्यादिविषयविवेकाभावे ॥ लक्षणन्तु । सदसद्भ्यामनिर्वचनीय त्रिगुणात्मक ज्ञानविरोधि भावरूपमहमज्ञइत्यनुभवात् भावत्वेनव्यपदेशरूप यत्किञ्चिदितिवदन्ति ॥ तच्च । मूलकारणत्वात् सत्वरजस्तमोगुणानां साम्यावस्थारूपत्वाच्च मूलप्रकृतिःप्रलयावस्था अव्यक्तम् अव्याकृतम् महासुषुप्तिः कूटवन्निर्विकारेणतिष्ठतीति कूटस्थम ज्ञान विनानश्यरतीत्यक्षरमितिव्यपदिश्यते ॥ अविज्ञात चाज्ञानमिति न्यायसूत्रम् । ५ । । ६० । भावेक्तः । चकारस्तुपरिषदाविज्ञातस्येत्यादनुकर्षणार्थः । तथा च । परिषदाविज्ञातस्य वादिनाविरभिहितस्याप्य विज्ञानमित्यर्थः । इदम्व किम्वदसि वुध्यतस्वनेत्यादि

विष्कारणेनज्ञातुंशक्यते इत्यर्थः ॥ त
मआदिपञ्चसु ॥ तम १ । मे हः २ ।
महामोह ३ । तामिस्र ४ । अ
न्धतामिस्रम् ५ । इति । ष्टकाले
ब्रह्मा प्रथमम् पञ्चप्रकार ज्ञानस
सर्ज इतिश्रीभागवतम् ॥
अज्ञानकार्य्यम । न । स्थूलसूक्ष्मप्रपञ्च
द्वये ॥ अज्ञानस्यकार्य्यम् ।
अज्ञानजम । त्रि । अज्ञ नोपदाने ।
अज्ञानादावरणशक्तिरूपादुद्भूते ॥ अ
ज्ञानाज्जातम् । जनी० । डः ॥
अज्ञानप्रभवः । पुं । अज्ञानात् स्वस्व
रूपास्फुरणात् प्रभवतीति व्युत्पत्त्या
समस्तप्रपञ्चे ॥ त्रि । अज्ञानादुत्पन्ने ॥
अज्ञानशक्ति । स्त्री । आवरणशक्तिविक्षे
पशक्त्योः ॥ अज्ञानस्यशक्ति ॥
अज्ञानसम्भूतः । त्रि । अविवेकादुत्पन्ने ॥
अज्ञानात्सम्भूत ॥
अज्ञानसम्मोह । पुं । अज्ञाननिमित्त
विपर्यये ॥ अज्ञानेनसम्मोह ॥
अज्ञानी । त्रि । अविदुषि । अज्ञान
विशिष्टे ॥ आतत्त्वबोधमज्ञानीवध्य-
तेनन्तजन्मभि ॥
अज्ञेय । त्रि । ज्ञानाविषये ॥
अञ्चतिः । पुं । मारुते ॥ अञ्चति ।
अञ्चु । अञ्चेः कोवेत्यतिः ॥
अञ्चलः । पुं । वस्त्रान्ते । आंचर इति

आचल इतिच भाषा प्रसिद्धे ॥
अञ्चितम् । त्रि । पूजिते ॥ शोभने ॥
अञ्च्यतेस्म । अञ्चुपूजायाम् । क्तः ।
अञ्चे पूजायामितीट । नाञ्चे पूजा
यामितिनलोपाभाव ॥
अञ्जनम् । न । कज्जले ॥ अक्तौ ॥
सौवीरे ॥ रसाञ्जने ॥ मसौ ॥ पुं ।
दि ङ्मतङ्गजे । अञ्जनवर्णेप्रतीचि
दिग्गजे ॥ उपाधौ ॥ ज्योष्ण्याम् ॥ अ
ज्ञाने । आवरणे ॥ अज्यतेनयनम-
नेन । अञ्जूव्यक्त्यादौ । करणेल्युट् ॥
दिवानतुप्रयोक्तव्यं नेत्रयोस्तीक्ष्णम-
ञ्जनम । विरेकदुर्बलादृष्टिरादित्य
प्राप्यसीदति ॥
अञ्जनकेशी । स्त्री । हट्टविलासिनीना
मगन्धद्रव्ये ॥ अञ्जनमिवकेशाअस्याः ॥
अञ्जना । स्त्री । वायुपत्न्याम् । हनु
मन्मातरि ॥
अञ्जनाधिका । स्त्री । अञ्जनिकायाम् ॥
अञ्जनावती । स्त्री । सुप्रतीकाख्यदिग्ग
जभार्य्यायाम् ॥ अञ्जनवर्णत्वात्अञ्ज
नमस्त्यस्या । मतौवञ्चचइतिदीर्घः ॥
अञ्जनिका । स्त्री । ज्योष्ट्रीविशेषे । अ
ञ्जनहारी इतिभाषाप्रसिद्धे । छा-
लिन्याम् ॥ क्षुद्रमूषिकायाम् ॥
अञ्जनी । स्त्री । लेप्यनार्य्याम चन्द-
नादिलेपनयोग्यायाम् ॥ कटुकावृ-

च ॥ काखाञ्जनीवृक्षे ॥

अञ्जलि. । पुं । हस्तसम्पुटे । मिलितप्रसृत्योः ॥ कुडवपरिमाणे ॥ अञ्च्यतेऽनेन । अञ्चूव्यक्त्यादौ । ऋतन्यञ्जीत्यञ्जेरलिच् ॥

अञ्जलिकारिका । स्त्री । लज्जालुके । सञ्ज्ञायाम् ॥ पुत्तलिकायाम ॥ त्रि । साञ्जलौ ॥ अञ्जले.कारका ॥

अञ्जलिनी । स्त्री । लज्जालुके ॥

अञ्जसः । त्रि । प्राञ्जले । अवक्रे ॥

अञ्जसा । । । साक्षात् ॥ तत्त्वे ॥ शीघ्रे ॥ आर्जवे ॥ अनायासे ॥ अञ्जनम् । अञ्जूव्यक्त्यादौ । कृत्यल्युटोवहुलमिति भावेपचाद्यच् । अञ्जयति साधयतिवा । णो अन्तकर्मणि षैक्षयेवा । पचाद्यच् क्विब्वा ॥

अञ्जसाकृतम् । त्रि । आर्जवेनकृते ॥ अञ्जसउपसङ्ख्यानादऽलुक ॥

अञ्जि. । पुं । प्रेषणिके । प्रेरके ॥

अञ्जिष्ट' । पुं । भास्करे ॥ अनक्ति । अञ्जूव्यक्तिम्रक्षणकान्तिगतिषु । ऋतन्यञ्जीत्यादिनाऽञ्जेरिष्टच् ॥

अञ्जीरम । न । ख्यातेवृक्षभेदे ॥ अस्यगुणाः ॥ शीतलत्वम् । स्वादुत्वम् । गुरुत्वम् । वायुपित्तरक्तक्रिमिशूलहृत्पीडाकफमुखवैरस्यनाशित्वम् । अग्निकारित्वञ्चेतिराजनिर्घण्टराजवल्लभौ ॥ लघ्वक्षीरमस्मादल्पगुणम् ॥

अट् । । । आश्चर्ये ॥

अटनम्' न । भ्रमणे ॥ अटगतौ । भावेल्युट् ॥

अटनि. । स्त्री । चापाग्रभागे ॥ अटतिगुणोऽत्र । अटगतौ । वाहुलकादनि ॥

अटनी । स्त्री । चापाग्रभागे । धनुष्कोट्याम् ॥ कृदिकारादितिवाङीष् ॥

अटरुष. । पुं । वासके ॥ अटान्गच्छतो रुषति । रुषहिंसायाम् । मूलविभुजादित्वात्कः ॥

अटरूष । पुं । वासके ॥ अटैरूष्यति । रूषभिरुषणे । इगुपधेतिकः ॥

अटवि । स्त्री । वने ॥ अटन्त्यत्र । अटगतौ । पद्यटिभ्यामवि ॥

अटवी । स्त्री । अरण्ये ॥ अटन्त्यत्र । अटगतौ । पद्यटिभ्यामवि. । कृदिकारादितिवाङीष् ॥

अटा । स्त्री । भ्रमणे । पर्य्यटने ॥ इति रत्नकोषोनीलकण्ठश्च ॥ अटनम् । अट॰ । भिदादिपाठादङ ॥

अटाट्या । स्त्री । भ्रमणे । पर्य्यटने ॥ अटनम् । अट॰ । परिचर्य्यापरिसर्य्यामृगयाऽटाट्यानामुपसङ्ख्यानमित्यटते र्यक्रियाशब्दस्यद्वित्वम् पूर्वभागेयकारनिवृत्तिर्दीर्घश्चनिपात्यते ॥

अट्ट । पुं । हर्म्यपृष्ठे परिनिकेते । चौ

मे ॥ अत्यर्थे ॥ हट्टे ॥ गृहान्तरे ॥ चतुष्के ॥ प्राकाराग्रस्थितरथ्यागृहे ॥ न । ओदने ॥ अद्यते । अट्टअतिक्रमणे । कर्मणिघञ् । अट्टयतिवा । अच् ॥ शुष्के ॥

अट्ट । ा । उच्चैरर्थे ॥ अत्युच्चे ॥

अट्टनम् । न । चक्रफलास्त्रे ॥ इतिचिकाण्डशेषः ॥

अट्टहास । पुं । महाहासे । अत्यर्थहासे । हसिते ॥ अट्टश्चासौहासश्च ॥ शिवे ॥ रिहस्थानविशेषे ॥ अट्टहासेमहानन्दादेवोवर्त्तते ॥ अट्टहासेमहानन्दोमहानन्दामहेश्वरीत्यागम ॥

अट्टहासकः । पुं । कुन्दपुष्पवृक्षे ॥

अट्टहासी । पुं । शिवे ॥ अट्टहासोऽस्यास्ति । इनिः ॥

अट्टाल । पुं । सौधोच्चगृहे । प्राकारादुपरितने उन्नतस्थाने ॥ यथा । भज्यमानपुरोद्यानप्राकाराट्टालगोपुरमिति श्रीभागवतम् ॥

अट्टालकः । पुं । सौधोच्चगृहे । उपरितनगृहे । चौमे । अट्टे । अट्टाइति भाषायाम ॥

अट्टालिका । स्त्री । सौधोच्चगृहे । अटारी इतिभाषाप्रसिद्धे । नृपागारे ॥ इति जटाधरः ॥

अट्टालिकाकारः । पुं । शूद्रागर्भेचित्रकारौरसजातजातिविशेषे । राजइतिभाषा ॥ यथा । कुलटायाञ्चशूद्रायांचित्रकारस्यवीर्यतः । बभूवाट्टालिकाकारः पतितोजारदोषत इतिब्रह्मवैवर्त्तपुराणम् ॥

अट्टिका । स्त्री । शाकादिवद्धमुष्टौ । अट्टी इतिभाषा ॥

अड्या । स्त्री । भ्रमणे । पर्यटने ॥ तीर्थमिकवृथाड्याचकामजोदश्ककोगणा इतिमनुः ॥

अड्डुः । पुं । लकुचद्रुमे ॥

अणकः । त्रि । कुत्सिते । गर्ह्ये ॥ अणति । अणशब्दे । पचाद्यच् । कुत्सायांकन् ॥

अणव्यम । न । व्रीहिभित्क्षेत्रे । क्षागावीने ॥ अणूनांभवनक्षेत्रम् । विभाषातिलमाषोमाभङ्गाणुभ्य इतियत ॥

अणिः । स्त्री । पुं । अक्षाग्रकीलके । रथचक्राग्रस्थितकीले ॥ अश्रौ । सूच्याग्रे ॥ सीम्नि ॥ अणति । अणशब्दे । सर्वधातुभ्यइन ॥

अणिमा । पुं । ऐश्वर्यविशेषे ॥ सचअष्टविभूतिष्वेका । यतःअणुर्भवतिशिलामपिप्रविशति । यत्प्रभावात्देवाःसिद्धाश्चसूक्ष्मीभूयालक्षिताः सर्वत्रविचरन्ति ॥ अणोर्भाव । इमनिच् । टेरिति टिलोपः । इष्टेमेयस्तु ॥

अणिष्ठः । त्रि । अणुतमे ॥

अणीयान्। त्रि। अतिसूक्ष्मे। अत्यल्पे। सूक्ष्मतरे। कनीयसि॥ अयमनयोरतिशयेनाणुः। अजादीगुणवचनादेवेतीयसुन्॥

अणु। पुं। चीणाइतिख्याते ब्रीहिविशेषे॥ लेशे॥ परमाणौ॥ पुरुषे। आत्मनि॥ सौक्ष्म्यातिशयशालित्वादणुः। पृथिव्याद्याकाशान्तानांभूतानांपूर्वपूर्वमपेक्ष्योत्तरोत्तरस्य सौक्ष्म्यातिशयान्मूलकारणस्य सर्वातिशायिसौक्ष्म्यवत्तयाअणुरिवाणुरितिसौक्ष्म्यगुणयोगाक्षीणानामात्मनोऽणुरिति॥ त्रि।सूक्ष्मे॥ अणति अण्यतेवा। अण शब्दे। कणश्रेभ्यु॥ धान्येनदिन्युर्वा॥

अणुकः। त्रि। निपुणे॥ अल्पे॥ सूक्ष्मे॥ अणुप्रकार। स्थूलादिभ्यः प्रकारवचनेकन्॥ यावादिषुअणुनिपुण इतिस्वार्थेकनवा॥

अणुभा। स्त्री। विद्युति॥

अणुमाचिकः। पुं। पुर्य्यष्टकयुक्तजीवे॥ अणवोमाचाः पुर्य्यष्टकरूपायस्यसोऽणुमाचिकः॥

अणुरेवती। स्त्री। दन्तीवृक्षे॥

अण्डम्। न। मुष्के॥ पेशीकोशे। पक्ष्यादिप्रादुर्भावककोशे। अण्डाइति भाषाप्रसिद्धे॥ नातिस्निग्धानिहृष्याणिस्वादुपाकरसानिच। वातशान्यति शुक्राणि गुरूण्यण्डानिपक्षिणाम्॥ वीर्य्ये॥ अमत्यस्मात्अमगत्यादिषु। अमन्ताडुः॥ अमन्तिसम्प्रयोगंयान्त्यनेनेतिवा॥

अण्डकः। पुं। मुष्के। अण्डकोशे॥ इति हेमचन्द्रः॥

अण्डकोटरपुष्पी। स्त्री। नीलरास्नायाम्। नीलवुन्हेतिख्यातायाम्॥

अण्डकोषः। पुं। वृषणे। मुष्के॥ अण्डयोःकोषः कुट्मलः॥

अण्डजः। पुं। सरटे॥ अहौ॥ खगे॥ झषे॥ अण्डजाःपक्षिणःसर्पानक्रामत्स्याश्चकच्छपाः। यानिचैवप्रकाराणिस्थलजान्यौदकानिच॥ इतिमनुः॥ अण्डात्सम्भवतिततोजायतेवा। जनीप्रादुर्भावे। पञ्चम्यामजातावितिडः। त्रि। अण्डजातमात्रे॥ अण्डेजातः।सप्तम्यांजनेर्डः॥

अण्डजा। स्त्री। मृगनाभौ॥ इतिविश्वमेदिनीहेमचन्द्राः॥

अण्डालुः। पुं। मत्स्ये॥ इतिशब्दचन्द्रिका॥

अण्डीरः। पुं। पुरुषे॥ शक्ते॥

अतटः। पुं। प्रपाते। शैलोच्चदेशे॥ नतटमच॥

अतद्गुणः। पुं। अलङ्कारविशेषे। यथा। तद्रूपाननुहारश्चेदस्यतत्स्यादत

गुणः। यदितु तदीयवर्णसम्भवन्त्याम पियोग्यतायामिदन्यूनगुणं नगृह्णी यात् तदाभवेदतद्गुणोनाम। उदाह रणम्। धवलोऽसि जहवि सुन्दर त हवितुए मज्झ रजिअ हिअअम्। रा अभरिएवि हिअए सुहअ णिहित्तो णरत्तोसि ॥ ※ ॥ अस्यसंस्कृतन्तु। धवलोसि यद्यपिसुन्दर तथापित्वया ममरञ्जित हृदयम्। रागभरितेपि हृदये सुभगनिहितोनरक्तोसीति ॥ धवलोनिर्मलः श्वेतश्च रागोलौहि त्यमनुरागश्च। धवलपदस्य वृषभ परत्वमपिकेचिदाहुः। अत्रोत्तरार्द्धे अप्रस्तुतेननायकेननिवेदनीयत्वा त्त्वयाप्रकृतस्यहृदयस्यगुणाननुहरणा दतद्गुणोऽलङ्कारः ॥ ※ ॥ अत्रातिरक्ते नापिमनसासंयुक्तो नरक्ततामुपगत इत्यतद्गुणः। किञ्च। तदित्यप्रकृत मस्येतिच प्रकृतमत्र निर्दिश्यते ते नयद् प्रकृतस्यरूप मकृतेन कृतोपि निमित्तान्नानुविधीयते सोऽतद्गुणाद् त्वपिप्रतिपत्तव्यम्। यथा। गाङ्गम म्बुसितमम्बुयामुन कज्जलाभमुभय चमज्जतः। राजहंसतवसैवशुभ्रता चीयतेनचनचापचीयते ॥

अतद्व्यावृत्तिः। स्त्री। प्रपञ्चनिरसने ॥ तच्छब्देनब्रह्मोच्यते। अतच्छब्देनतद तिरिक्तमज्ञानादि। नतत् अतत्। तस्यातदः प्रपञ्चस्य व्यावृत्तिः निरस नमित्यर्थात् ॥

अतन्द्रितः। त्रि। अनलसे ॥ नतन्द्रि तः ॥

अतर्कितः। त्रि। अविचारिते ॥

अतर्क्यः। पुं। स्वबुध्यभ्यूहेनकेवलेनत र्केणातर्कितुमशक्येपरमात्मनि ॥ स्व बुध्यभ्यूहेनकेवलेनतर्केणातर्क्यमाणे ऽणुपरिमाणेकेनचितस्थापितेआत्म नि। ततोऽणुतरमन्योऽभ्यूहति। ततो प्यन्योऽणुतममिति। नहितर्कस्यनि ष्ठाक्वचिद्विद्यते। त्रि। तर्कितुमशक्ये।

अतलम्। न। पातालभेदे ॥ त्रि। उ परि ॥

अतलस्पर्शम्। त्रि। अतिगम्भीरे। अगा धे इत्यमरः ॥ ॥ तलस्याधोभागस्य स्पर्शः। नास्तितलस्यस्पर्शोऽत्र ॥

अतलस्पृक्। त्रि। अगाधे ॥ इतिहेम चन्द्रः ॥

अतलादिः। पुं। अधोऽधोविद्यमाने ष्वतलवितलसुतलरसातलतलातल महातलपातालनामकेषुसप्तसु ॥ अतलमादिर्यस्य वितलादिसमूहस्य सोयमतलादिः ॥

अतः। । । हेतौ। कारणे ॥ अपदेशे ॥ निर्देशे ॥ एतस्मात्। तसिल्।

एतद्दोन् ॥

अतसः । पुं । वायौ ॥ क्षौमे ॥ प्रहरणे ॥ आत्मनि ॥ अतति । अतसातत्यगमने । अत्यविचमितमिनमीत्यादिना ऽसच् ॥

अतसी । स्त्री । क्षुमायाम् । प्रसिद्धधान्ये ॥ यथा । अतसीमधुरातिक्ता स्निग्धापाकेकटुर्गुरु । उष्णादृक्शुक्रवातघ्नीकफपित्तविनाशिनीति भावप्रकाशः ॥ । गौरादि ॥

अतसीतैलम् । न । अतसीस्नेहे ॥ स्नेहे तैलच् । अतसीतैलमाग्नेय स्निग्धोष्णकफपित्तकृत् । कटुपाकमचक्षुष्यं बल्यवातहरगुरु ॥ मलकृद्रसतः स्वादुग्राहित्वग्दोषहृद्घनम् । वस्तौ पाने तथाभ्यंगेनस्येकर्णस्यपूरणे ॥ अनुपानविधौचापि प्रयोज्यवातशान्तये ॥

अतस्क । त्रि । असयतेन्द्रिये ॥

अति । ा । प्रशंसायाम् ॥ प्रकर्षे ॥ लङ्घने ॥ अतिशये । नितान्ते ॥ असम्भृतिक्षेपे ॥ स्तुतौ ॥ पूजायाम् ॥ अतति । अतसातत्यगमने । इन्प्रत्ययः ॥

अतिकटुः । त्रि । निम्बादौ ॥ अतिशयेनकटुः ॥

अतिकथः । त्रि । अश्रद्धेये ॥ नष्टधर्मे ॥ नष्टे ॥ अतिक्रान्ता कथायस्य ॥

अतिकथा । स्त्री । अपार्थभाषणे ॥

अतिकन्दः । पुं । हस्तिकन्दवृक्षे ॥

अतिकृतिः । स्त्री । पञ्चविंशत्यक्षरायां वृत्तौ ॥

अतिकृच्छ्रम् । न । व्रतविशेषे ॥ यथा । एकैकग्रासमश्नीयात् त्र्यहाणित्रीणिपूर्ववत् । त्र्यहञ्चोपवसेदन्त्यमतिकृच्छ्रंचरन द्विजः ॥ इतिस्मृतिः प्रायश्चित्तविवेके ॥

अतिक्रमः । पुं । अतिपाते । क्रमोल्लङ्घने ॥ अतिक्रमणम् । क्रमुपादविक्षेपे । घञ् । नोदात्तोपदेशेतिन वृद्धिः ॥ अभिक्रमे ॥ अहितान् प्रत्यभीतस्य रणेयानमतिक्रमः इत्यमरः ॥

अतिक्रमणम् । पुं । उचितादधिकस्यानुष्ठाने ॥ निष्पन्नेपिवस्तुनिक्रियामप्रवृत्तौ ॥ यथा । अतिसिक्तमेव भवता । अत्रातिरतिक्रमणेचेतिकर्मप्रवचनीयसंज्ञयाषत्वाभावः ॥

अतिक्रमणीयः । त्रि । अतिक्रमणार्हे ॥ यथा । महात्मानातिक्रमणीयोविजानतेति ॥

अतिक्रान्तः । त्रि । अतीते ॥ कृतातिक्रमे ॥

अतिगण्डः । पुं । षष्ठयोगे ॥ अत्रजातस्य फलयथा। कलिप्रियोवेदविनिन्दकश्च धूर्त्तः कृतघ्नोगलरोगयुक्तः । सरोऽमदे

च'पुरुषोतिदीर्घ'प्रकाण्डगण्डस्वति गण्डअस्मेति । चि । बृहद्गण्डे ।

अतिगन्ध' । पुं । भूतृणे । चम्पके । मुद्गरवृक्षे । गन्धके । इतिराजनिर्घण्टः ।

अतिगन्धालुः । पुं । पुत्रदात्रीलतायामितिराजनिर्घण्टः ।

अतिगम्भीरः । चि । दुष्प्रवेशे । महासमुद्रवत्प्रवेष्टुमशक्ये ।

अतिगर्वितः । चि । अहङ्कारातिशयशानि । समुद्धते । अतिशयेनगर्वित' ।

अतिगुहा । स्त्री । पृश्निपर्ण्याम् । चि । गुहातिक्रामके ।

अतिगुह्याष्टकम । न । श्रीशैलादिषु । यथा । श्रीशैलजल्पकेदारभैरवाश्मातकेश्वराः । हरिश्चन्द्रमहाकालमध्याः सातिपदाह्वयाविति मृगेन्द्रसंहिता ।

अतिचरः । चि । शीघ्रगे ।

अतिचरा । स्त्री । स्थलपद्मिन्याम् । चारव्याम । पद्मचारिण्योषधौ । अति चरति । चरगतिभक्षणयोः । पचाद्यच् ।

अतिचारः । पुं । शीघ्रगमने। अतिक्रम्य गमनम् । कुजादिपञ्चग्रहाणांराशिभोगकालासमाप्तौ राश्यन्तरगमनम् । तत्रपूर्वराशिगमनेवक्रातिचारः। परराशिगमनेअतिचारः । एतौगुरोश्चेद्दृकालोभवति । गुरुस्तुयदिपुनः पूर्वराशिनायातितदामहातिचारः। तेनलुप्तसवत्सरोभवतिग्रहाणांस्वभोग्यमानराशौ वपिवक्रातिचारौभवतः । तचनाकालः । इतिस्मृतिज्योतिषे उक्तम् ।

अतिच्छत्रः । पुं । छत्रायाम् । स्थूलतृणविशेषे । रक्तवर्णकोकिलाक्षके तालमखानाइतिभाषाप्रसिद्धे । पाताले । जलजतृणभेदे । अति क्रान्तश्छत्रम् ।

अतिच्छत्रकः । पुं । भूतृणे ।

अतिच्छत्रा । स्त्री । शतपुष्पायाम् । शलुपा इति मौरीइतिच गौडभाषाप्रसिद्ध शताह्वायाम । सोंफ इति भाषा । छत्रमतिक्रान्ता अत्यादय इतिसमासः ।

अतिजगती । स्त्री । त्रयोदशाक्षरायां वृत्तौ ।

अतिजवः । चि । अतिवेगाढ्ये । जङ्घाले । अतिशयितोजवोवेगोयस्य ।

अतिजागरः । पुं । नीलक्रौञ्चे । नीलवके ।

अतिडीनम् । न । पक्षिणःप्रचण्डगमने दीर्घपतनेवा ।

अतितितीर्षत् । चि । अतिततुमिच्छति ।

अतितीक्ष्ण । त्रि । मरीचादौ ॥ पुं । शोभाञ्जने ॥

अतितीव्रा । स्त्री । गण्डदूर्वायाम् ॥

अतिथि । पुं । कुशपुत्रे ॥ त्रि । आगन्तुके । अदृष्टपूर्वगृहमागते ॥ कोपे ॥ तिथिभिन्ने ॥ अतति । अतसातत्यगमने । ऋतन्यञ्जीन्यतेरिथिन् । नविद्यते द्वितीयातिथिरस्येतिवा ॥ यथा । एकरात्रन्तुनिवसन्नतिथिर्ब्राह्मणः स्मृतः । अनित्यं हिस्थितोयस्मात्तस्माद तिथिरुच्यते । नैकग्रामीणमतिथिं विप्रसाङ्गतिकतथा । उपस्थितगृहेविद्यात् भार्यायत्राग्नयोपिवा इतिमनुः ॥ अध्वनीनोऽतिथिर्ज्ञेयइतिचस्मृति. ॥ सर्वास्ववस्थास्वतिथि र्नोपेक्ष्योहिगृहस्थितैः । अतिथी । स्त्री । ॥

अतिथिपूजनम् । न । न्टयज्ञे ॥ इतिहेमचन्द्रः ॥

अतिथिसपर्या । स्त्री । अतिथिसेवायाम् । पञ्चमहायज्ञेषुन्टयज्ञे ॥ अतिथीनामदृष्टपूर्वाणां गृहमागतानांसपर्याणम् । सपरपूजायाम् । कण्ड्वादिभ्योयक् । अप्रत्ययात् । सपर्यापूजा ॥

अतिदिष्ट. । त्रि । अतिदेशविशिष्टे ॥ यथा । नसमानगोत्रांभार्यांविन्देत इत्यनेनशूद्रस्यापिसगोत्राकथननिषिध्यते इति चेत् अत्रोपदिष्टातिदिष्टगोत्रस्यैवनिषेधो नत्वतिदिष्टातिदिष्टशूद्रगोत्रादेरित्युदाहृतत्वम् ॥

अतिदीप्य । पुं । रक्तचित्रकवृक्षे ॥ इतिराजनिर्घण्टः ॥

अतिदेशः । पुं । अन्यत्रश्रुतस्य अन्यत्रान्वये । यथा । अन्यत्रैवप्रणीतायाःकृत्स्नायाधर्मसन्ततेः । अन्यत्रकार्यतःप्राप्तिरतिदेशोभिधीयतेइति ॥ प्रकृतात्कर्मणोयस्मात्तत्समानेषु कर्मसु । धर्मप्रदेशोयेनस्यात् सोतिदेशइतिस्मृत ॥ इतिदर्शितोऽतिदेश पूर्वाचार्यैः ॥

अतिधन्वा ॥ पुं । ऋष्यन्तरे । शौनके ॥

अतिधृतिः । स्त्री । ऊनविंशत्यक्षरायां वृत्तौ ॥

अतिनु । त्रि । अतीतनौके ॥ नावमतिक्रान्त अत्यादयइतितत्पुरुष । ह्रस्वोनपुंसकइतिह्रस्व ॥ अतिनौ. पुमान् स्त्री वा ॥

अतिपतनम् । न । अत्यये । अतिक्रमणे ॥

अतिपत्तिः । स्त्री । अतिपाते ॥

अतिपत्रः । पुं । हस्तिकन्दवृक्षे ॥ शाकवृक्षे ॥ इतिराजनिर्घण्टः ॥

अतिपन्थाः । पुं । सत्पथे ॥ अतिःपूजायाम् । कुगतीतिसमासः । नपूजनात् ॥

अतिपातः । पुं । अतिक्रमे । पर्यये ॥ अतिक्रम्यपतनम् । पत्लृगतौ ।

घञ् ।

अतिपातकम् । न । नवविधपापमध्ये गुरुतरपातके । तत्त्रिविधम् । पुंसो मातृदुहितृस्नुषागमनजन्यम् । स्त्रिया स्तु पुत्रपितृश्वशुरगमनजन्यमि तिप्रायश्चित्तविवेकः ॥

अतिपातकी । पुं । स्त्री । पापिविशेषे । यथा । मातरं भगिनीं वापि तथा दुहि तरं शिवे । गन्तारो ब्राह्मणा येच मत्तागु रुनिघातकाः ॥ कुलधर्मं समाश्रित्य पुनस्त्यक्तकुलक्रियाः । विश्वासघाति नोलोका अतिपातकिनः स्मृताः ॥ इ तिश्रीमहानिर्वाणतन्त्रम् ॥

अतिपातितः । त्रि । अतिक्रान्ते ॥

अतिपेलवता । स्त्री । सुकुमारतरता याम् ॥

अतिप्रसक्तिः । स्त्री । अत्यन्तसेवने ।

अतिप्रसङ्गः । पुं । अतिप्रसक्तौ ॥ अन्य स्योद्देशेन अन्यदोषस्यापिसम्भावनुप्रा ने ॥

प्रतिबला । स्त्री । कङ्कतिकायाम् । पीत वाट्यालके ॥ विद्याविशेषे ॥ मध्यबला म् । त्रि । बलिनि ॥ अतिशयितबल यस्यायस्मिन्वा ॥

अतिभरः । पुं । अतिविस्तारे ॥

अतिभीः । पुं । वज्रज्वालायाम् ॥ त्रि । अतिभयान्विते ॥

अतिभूमिः । स्त्री । अतिशये । आधिक्ये ॥ अमर्यादायम् ॥ अतिक्रान्ताभू मिः । विपद्भिनदूषितातिभूमिरिति माघः ॥

अतिमङ्गल्यः । पुं । विल्वे ॥ त्रि । मङ्गला ढ्ये । अतिशयमङ्गलजनके ॥

अतिमर्यादम् । न । अतिशये । निर्भये ॥ त्रि । तद्युक्ते ॥ अतिशयिते ॥

अतिमात्रम् । न । अतिमर्यादे । अति शये ॥ मात्रास्तोकं तामतिक्रान्तम् । गोस्त्रियोरितिह्रस्वः । अस्यक्रियावि शेषणत्वेक्लीवता । द्रव्यत्राचित्वेत्रिलि ङ्गता ॥

अतिमानिता । स्त्री । आत्मनि पूज्यत्वा तिशयभावनायाम् ।

अतिमुक्तः । त्रि । निःसङ्गे । निष्फले ॥ अतिशयेन मुक्तः ॥ पुं । वासन्त्याम् ॥ अतिक्रान्तो मुक्तां शौक्ल्यात् । गो स्त्रियोरिति ह्रस्वः ॥ यद्वा । मुक्तान् विरक्तान् ॥ तिनिशे ॥ अतिशयितो मुक्तो विस्तारोऽस्य ॥

अतिमुक्तकः । पुं । अतिमुक्तार्थे ॥ तिनि शे ॥ तिन्दुकवृक्षे ॥ पुष्पवृक्षविशेषे । भ्रमरानन्दायाम् ॥ अतिशयितो मु क्तोविस्तारोऽस्य ॥

अतिमैत्रः । पुं । नवमतारायाम् ॥ त्रि । परममित्रे ॥

अतिमोदा । स्त्री । नवमल्लिकायाम् ॥
अतियातः । त्रि । अतिक्रम्यगते ॥
अतिरथः । पुं । योद्धृविशेषे । यथा । अमितान्योधयेद्यस्तुसम्प्रोक्तोतिरथस्तुस इति ॥
अतिरसा । स्त्री । मूर्वालतायाम् ॥ रास्नायाम् । क्लीतनके ॥
अतिरात्र. । पुं । यागविशेषे ॥ अतिक्रान्तोरात्रम् । अह सर्वैकदेशेभ्यश्च ॥
अतिरिक्तः । त्रि । अतिशयिते । श्रेष्ठे ॥ भिन्ने ॥ अधिके ॥ अतिरिच्यतेस्म । रिचिर्विरेचने । क्त ॥
अतिरुट् न । क्रोधाधिक्ये ॥
अतिरूक्षः । त्रि स्नेहशून्ये ॥ पुं । कङ्कोद्रवादौ ॥ अतिक्रान्तोरूक्षम् । अत्यादय इतिसमास ॥
अतिरेक । पुं । पृथग्भावे । अतिशये ॥
अतिरोगः । पुं । क्षयव्याधौ ॥
अतिरोमश. । पुं । वनच्छागे ॥ त्रि । रोमातिशयाढ्ये ॥
अतिरोमशा । स्त्री । नीलवुन्हायाम् ॥
अतिवक्ता । त्रि । वावदूके । वाचोयुक्तिपटौ ॥ अतिवक्ति । साधुकारित्वेन्तृच्त्वा ॥
अतिवर्णाश्रमी । पुं । पञ्चमाश्रमिणि ॥ सब्रह्मतसंहितायां मुक्तिखण्डेपञ्चमाध्याये परमेश्वरेणवर्णितः । यथा । ब्रह्मचारीगृहस्थश्च वानप्रस्थोयभिक्षुकः । अतिवर्णाश्रमीतेपिक्रमात्छ्रष्ठाविचक्षणा. ॥ अतिवर्णाश्रमीप्रोक्तो गुरुः सर्वाधिकारिणाम् । नकस्यापि भवेच्छिष्योयथाहं पुरुषोत्तम ॥ अतिवर्णाश्रमीसाक्षाद्गुरूणांगुरुरुच्यते । तत्समोनाधिकश्चास्मिन्लोकेस्त्येवनसंशय. ॥ य.शरीरेन्द्रियादिभ्योविभिन्नसर्वसाक्षिणम् । पारमार्थिकविज्ञानसुखात्मानस्वयम्प्रभुम् ॥ परतत्त्वविजानातिसोतिवर्णाश्रमी भवेत् ॥ योवेदान्तमहावाक्यश्रवणेनैवकेशव । आत्मानमीश्वरवेद सोतिवर्णाश्रमी भवेत् ॥ योवस्थात्रयनिर्मुक्तमवस्थासाक्षिणसदा । मन्नादेव विजानाति सोति० ॥ वर्णाश्रमादयोदेहेमाययापरिकल्पिता । नात्मनोबोधरूपस्यममतेसन्तिसर्वदा । इतियोवेदवेदान्तै सोति ० ॥ आदित्यसन्निधौ लोकश्चेष्टतेस्वयमेवतु । तथामेसन्निधावेवसमस्तंचेष्टतेजगत् ॥ इतियोवेद० ॥ सुवर्णेहारकेयूरकटकस्वस्तिकादय' । कल्पितामाययातद्वज्जगन्मय्येवसर्वदा । इतियोवेद० ॥ शुक्तिकायां यथातारकल्पितमाययातथा । महदादिजगन्मायामयमय्येवकल्पितम् ॥ इतियो० ॥ चाण्डालदेहेपश्वादि

रीरेब्रह्मविग्रहे । अन्येषुतारतम्येन स्थितेषुपुरुषोत्तम । व्योमवत्सर्वदा व्याप्त सर्वसम्बन्धवर्ज्जित. । एकरूपो महादेव. स्थित सोऽहपरामृत. इति यो० ॥ विमूढदिग्भ्रमस्यापियथापूर्वा विभातिदिक् । तथाविज्ञानविध्वस्त जगन्मेभातितन्नहि । इतियो० ॥ यथास्वप्नप्रपञ्चोयमयिमायाविजृम्भित. । तथा जाग्रत्प्रपञ्चोपिमयिमायाविजृम्भित. । इतियो० ॥ यस्ववर्णाश्रमाचारोगलित.स्वात्मदर्शनात् । सवर्णा नाश्रमान्सर्वानतीत्यस्वात्मनिस्थित: ॥ यस्त्यक्त्वा स्वाश्रमान्सर्वान स्वात्मन्येव स्थित पुमान । सोतिवर्णाश्रमी प्रोक्त:सर्ववेदार्थवेदिभि: ॥ नदेहोनेन्द्रियं प्राणोनममे त्वबुद्ध्यहङ्कृती । नचित्तनैवसामायानचव्योमादिकजगत् ॥ नकर्त्तानचभोक्ताचनचभोजयिता तथा । केवलचित्सदानन्दब्रह्मैवात्मायथार्थत: ॥ जलस्यचलनादेव चञ्चलत्वयथारवे: ॥ तथाहङ्कारसंसारादेवसंसारआत्मन: ॥ तस्मादन्यगतावर्णाआश्रमाअपिकेशव । आत्मन्यारोपिताएवभ्रान्त्याते ऽनात्मवेदिना ॥ नविधिर्ननिषेधश्चनवर्ज्यावर्ज्यकल्पना । आत्मविज्ञानिनांमास्ति तथाचान्यज्जनार्द्दन॥ आत्मविज्ञानि

नांनिष्ठामीदृशीमम्बुजेक्षण। मायामोहितामर्त्त्या नैवजानन्तिसर्वदा ॥नमांसचक्षुषानिष्ठाब्रह्मविज्ञानिनामियम्। द्रष्टुंशक्यास्वत:सिद्धाविदुषा सैवकेशव ॥ यत्रसुप्ताजनानित्यप्रबुद्धस्तत्रसयमी । प्रबुद्धायत्रतेविद्वान् सुषुप्तस्तत्रकेशव ॥ एवमात्मानमद्वन्द्वनिराकारनिरञ्जनम् । नित्यशुद्ध निराभाससच्चिन्मात्रपरामृतम् येविजानातिवेदान्तै:स्वानुभूत्याचनिश्चितम्। सोतिवर्णाश्रमीप्रोक्त. सएवगुरुत्तम. इति ॥

अतिवर्त्तुल: । पुं । वाँटुलाकडा इति गौडभाषाप्रसिद्धकलायविशेषे ॥

अतिवाद: । पुं । पारुष्यवादे । अप्रियवचसि ॥ अतिक्रम्यउक्तिरतिवाद: । घञ् ॥

अतिवादी । त्रि । सर्वानतीत्यवदितुशीले ॥

अतिवाहित: । त्रि । गमिते ॥

अतावकट: । पुं । दुष्टहस्तिनि ॥ त्रि । अतिकराले ॥ अतिशयेनविकट' ॥

अतिविदाही । त्रि । सन्तापकेराजिकादौ ॥ अतिशयेनविदाही ॥

अतिविषा । स्त्री । अतीसाख्ये । पर्यायास्तु । अतिविषाशुक्लकन्दाचेयाविश्वा चभङ्गुरा । श्यामकन्दाप्रतिविषाशृ

ङ्गीचोपविषाविषेति ॥ अपिच । विषाख्यतिविषाविश्वाभृङ्गी प्रतिविषा च या । शुक्लकन्दाचोपविषाभङ्गुरा श्यामवल्लभा ॥ विषासोष्णाकटुस्तिक्तापाचनोद्दीपनी हरेत्। कफपित्तातिसारामविषकासवमिक्रमीनितिभावप्रकाश.॥ त्रिविधातिविषाज्ञेयाशुक्लाकृष्णातथारुणा।रसवीर्यविपाकेषुनिर्विशेषगुणाधिकेतिराजनिर्घण्टः ॥ त्रि । विषातिक्रामके । विषमतिक्रान्ता ॥

अतिवेलम । न । अतिशये ॥ त्रि । अतिशयिते॥ अतिक्रान्तवेलांमर्यादाम् । अत्यादयः क्रान्ताद्यर्थेद्वितीययेतिसमासः । अस्यक्रियाविशेषणत्वेक्लीवत्वम् । द्रव्यविशेषणत्वेतुत्रिलिङ्गत्वम ॥

अतिव्यथा । स्त्री । पीडायाम् । अतिशययातनायाम् ॥

अतिव्याप्ति. । स्त्री । अतिशयव्यापने ॥ अलक्ष्येलक्षणगमने॥यथा। साध्याभाववदवृत्तित्वमितिव्याप्तिलक्षणे धूमवानवह्नेरित्यत्रधूमाभावाधिकरणह्रदवृत्तित्वाभावमादायअतिव्याप्तिरितितार्किकाः ॥ स्वाश्रयवृत्तिप्रागभावच्छेदेन रविभुज्यमानराशीयरविसंयोगविशिष्टस्वाश्रितमलक्षणकत्वमलमासत्वम् । भानुलङ्घितेऽति व्याप्तिवारणाय औत्पातिकभिन्नत्वेन विशेषणीयम् ॥ मुख्यफलजनकव्यापारजनकत्वे सति मुख्यफलाजनकत्वमङ्गत्वम् घटादावतिव्याप्तिवारणाय सत्यन्तम् इतितिथ्यादितत्त्वटीका ॥

अतिशक्तिता । स्त्री । विक्रमे । वीरसामर्थ्ये ॥ अतिशयिताशक्तिर्यस्य । तस्यभावः । तल् ॥

अतिशक्तिभाक् । त्रि । अतिशयशक्तिविशिष्टे॥

अतिशय । पुं । उत्कर्षे । अत्यर्थे ॥ अतिशेते । अतिपूर्वात्शीङ्पधाच्च् । यद्वा। अतिशयनम् । भावे एरच् । अस्यद्रव्यवचनत्वेपिपुल्लिङ्गतैव । घञवन्ताःपुंसीतिवचनात् ॥ सतत क्रियान्तरेणाव्यवधानम्। अतिशयस्तु पौनःपुन्यमितिभेदः॥

अतिशयितः । त्रि । अतिक्रान्ते॥

अतिशयोक्तिः। स्त्री। अर्थालङ्कारभेदे॥ अस्यलक्षणादयो यथा। निगीर्याध्यवसानन्तुप्रकृतस्यपरेणयत्। प्रस्तुतस्ययदन्यत्वंयद्यर्थोक्तौचकल्पनम्। कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः। विज्ञेयातिशयोक्तिःसेति । उपमानेनान्तर्निगीर्णस्यो पमेयस्ययदध्यवसानंसैका । यथा । कमलमनम्भसि क

मले च कुवलये तानिकनकलतिका
याम । साचसुकुमारसुभगेत्युत्पात
परपराकेयम् ॥ अत्रमुखादिकमला
दिरूपतयाध्यवसितम् ॥ यत्रतदेवा
न्यत्वेनाध्यवसीयतेसापरा । यथा ।
अन्नलडहत्तणअ अन्नाविअकाइ व
त्तणच्छाआ । सामासामण्णपआवइ
णो रेहधिअ णहोइ ॥ "अन्यसत्कृत
यथा । लडहशब्द.सौकुमार्ये । अन्यत्
सौकुमार्यमन्याकापिचवर्त्तनच्छाया ।
श्यामासामान्यप्रजापते रेखैवनभव
तीति ॥ वर्त्ततेजीवतीति वर्त्तनश
रीरंतस्यछायाकान्ति. श्यामाषोडश
वर्षिकीस्त्री सामान्यत. सर्वसाधार
णोरेखैवेतिनिर्माणपरिपाटीरेखामा
त्रेणापिनास्तीतिभावः । इयमन्यत्वव
र्णनरूपातिशयोक्ति„॥ यद्यर्थस्ययदि
शब्देनचेच्छब्देनवोक्तौयत्कल्पनमर्था
दसम्भाविनोर्थस्यसातृतीया । यथा ।
राकायामकलङ्कंचेदमृतांशोर्भवेद्व-
पु । तस्यामुखतदासाम्यपराभवम
वाप्नयात् ॥ कारणस्यशीघ्रकारितां
वक्तुंकार्यस्यपूर्वमुक्तौचतुर्थी । यथा ।
हृदयमधिष्ठितमादौमालत्याःकुसुम
चापबाणेन । चरमंरमणीवल्लभलो
चनविषयंत्वयाभजतेति ॥
अतिशर्करी । स्त्री । पञ्चदशाक्षरा
यांवृत्तौ ॥
अतिशायनम् । न । आधिक्ये । प्रकर्षे ॥
अतिपूर्वाच्छेतेर्ल्युट् । अतिशयनमे
व । अतिशायनेतमबिष्ठनावितिनिर्दे
शाद्दीर्घ ॥
अतिशीतम् । त्रि । अतीतानिशीतानि-
इतिविग्रहे अव्ययविभक्तीत्यादिनाऽ
त्ययेऽव्ययीभाव. ॥ त्रि । शीतातिशय
विशिष्टे ॥
अतिशेष' । त्रि । अतिशिष्टे । अवशिष्टे ॥
अतिशोभनः । त्रि । अतिशयशोभायुक्ते ॥
॥ श्रेष्ठ ॥ अतिशयेनशोभन ॥
अतिसर्गः । पुं । कामचारानुज्ञायाम् ॥
दाने ॥
अतिसर्जनम् । न । विलम्भे । दाने ॥ व
धे ॥ सृजविसर्गे । ल्युट् ॥
अतिसहः । त्रि । अतिसहिष्णौ ॥ अत्य
न्तसहते । षहमर्षणे । पचाद्यच् ॥
अतिसार' । पुं । उदरामये । बहुद्रवम
लनि' सरणरोगे ॥
अतिसारकी । त्रि । अतिसारान्विते ।
सातिसारे ॥ अतिसारोऽस्यास्ति । वा
तातीसाराभ्यांकुक्चेतीनिः ॥
अतिसृष्टः । त्रि । दत्ते ॥ नियुक्ते ॥
अतिसौरभः । पुं । सहकारे ॥ अतिश
यितसौरभमस्य ॥
अतिस्थूलः । त्रि । अत्यन्तपीने ॥ अत्य

लक्षणाम् । मेदोमांसातिवृद्धत्वा-
च्चलस्फिगुदरस्तन । अयथोपचयो
त्साहोनरोऽतिस्थूलउच्यते ॥ अयथो
पचयोत्साह । नयथाउचित उपच
योमांसोपचय. उत्साहोवलञ्चयस्य
स ॥

अतिस्फिर: । त्रि । स्फोष्ठे । अतिशयित
स्फूर्त्तिशालिनि ॥

अतिहसितम् । न । अतिशयहास्ये ॥

अतिहास. । पुं । हास्यभेदे । सशब्दहा
से ॥ अतिहसनम् । हसेहसने । भा
वेघञ् ॥

अतिहिमम् । I । हिमस्यात्यये ॥

अतीत. । त्रि । वर्त्तमानध्वसप्रतियोगि
नि । अतिक्रम्यगते । भूतकाले ॥गते
। भूते ॥ यथा । ननस्यन्यूनसप्ताब्दे
नातीताशीतिवत्सरे । इतिवैद्यकप
रिभाषा ॥ मानप्रभेदे ॥ इतिसङ्गी
तशास्त्रम् ॥ अतिपूर्वादिणोगत्यर्थो
कर्मकेतिकर्त्तरिक्त ॥

अतीतकाल । पुं । हेत्वाभासविशेषे ।
वाधिते ॥ यथा । कालात्ययापदिष्ट
कालातीत: । इतिन्यायसूत्रम् १ ।
४९ ॥ अतीतकालस्यसमानार्थकत्वा
त् कालातीतशब्देनोक्तम् । कालस्य
साधनकालस्य अत्ययेअभावे अपदि
ष्ट: प्रयुक्तोहेतु । एतेनसाध्याभाव
प्रमालक्षणार्थं इतिसूचितम् । सा
ध्याभावनिर्णये साधनासम्भवादयमे
ववाधितसाध्यक इतिगीयते । यथा ।
वह्निरनुष्ण कृतकत्वादित्यादौ ॥

अतीतद्वैतम् । न । प्रत्यगात्मतत्त्वे ॥
त्रि । द्वैताभाववति ॥ अतीत द्वैत
यस्मादिति ॥

अतीतद्वैतभानम् । न । प्रत्यगात्मन
साक्षात्कारे ॥ अतीतद्वैतस्यात्मनो
भानसाक्षात्कार ॥

अतीन्द्र. । पुं । विष्णौ ॥ ज्ञानैश्वर्यादि
भि स्वभावसिद्धैरिन्द्रमतीत्यस्थित ॥
इन्द्रमतीत अत्यादय क्रान्ताद्यर्थे द्वि
तीययेतिसमास ॥

अतीन्द्रियम् । त्रि । इन्द्रियाग्राह्यवस्तुनि
। अप्रत्यक्षे ॥ इन्द्रियमतिक्रान्तम् ॥
मनसि ॥ इन्द्रियमतीत्यवर्त्तमान
त्वात् ॥

अतीन्द्रियग्राह्य: । त्रि । मनोग्राह्ये । प
रमात्मनि ॥ यथा । नैवासौचक्षुषा
ग्राह्योनचशिष्टैरपीन्द्रियै । मनसा
तुप्रसन्नेनगृह्यते सूक्ष्मदर्शिभिरिति
व्यास ॥

अतीर्य्यम । त्रि । दुस्तरे ॥

अतीव । I । अतिशये ॥ अतिच इवच॥

अतीसार: । पुं । उदरामये ॥ अतिसर
ति । सृगतौ ।व्याधिमत्स्यवलेषुचेति

वार्त्तिकाद्घञ् । अन्तर्भावितण्यर्थो वा सरति । रुधिरादिकमतिशयेन सारयतीत्यर्थः । उपसर्गस्य घञीति दीर्घः ॥

अतीसारकी । त्रि । अतीसाररोगयुक्ते । अतीसारोऽस्त्यस्य । वातातीसाराभ्यां कुक्चेतीनिः ॥

अतीसारभेषजम् । न । लोध्रे । अतीसारस्यभेषजम् ॥

अतुलः । पुं । तिलवृक्षे । इतिशब्दचन्द्रिका ॥ त्रि । तुलोज्झिते । निरुपमे । अपरिमिते । तुलाउपमानमस्यनविद्यते । शेषाद्विभाषेतिविकल्पान्नकप् । उपसर्जनह्रस्वः ।

अत्कः । त्रि । पथिके । इत्युणादिकोषः । अतति । अतसातत्यगमने । इण्भीकापाशल्यतिमर्चिभ्यः कन् ॥

अत्ता । स्त्री । ज्येष्ठभगिन्याम् । मातरि । प्राकृतभाषयाम्श्वश्र्वाम् ।

अत्ति । स्त्री । नाट्योक्त्या ज्येष्ठभगिन्याम । मातरि ।

अत्तिका । स्त्री । नाट्योक्त्या ज्येष्ठभगिन्याम् । मातरि । अत्तामाता । सैव । सम्रायांकन ॥

अत्नुः । पुं । भानौ । सूर्ये ।

अत्यः । पुं । तुरङ्गे । अश्वे ॥ वैदिकोऽयं शब्दः ॥

अत्यध्यक्ष । त्रि । इन्द्रियाऽगोचरे । अतीन्द्रिये । अक्षेषु अध्यक्षम । विभक्त्यर्थे-व्ययीभावः । अतिक्रान्तोऽध्यक्षम् ।

अत्यन्तम् । न । अतिशये । यथा । "अत्यन्तकठिनौ तथापिहृदयानन्दायकौ वक्षोजाविति नरहरिकविः ॥ त्रि । न सुक्ते । सर्वानअन्तान्परिच्छेदानतिक्रान्ते । निरतिशये । नितान्ते । अवसानमतिक्रान्ते ॥

अत्यन्तकठिनम् । न । उलूखलेवुसवत्कुशचन्दनादिसर्वद्रव्ये । त्रि । अतिशयकाठिन्यविशिष्टे ॥

अत्यन्तकोपनः । त्रि । चण्डे । अत्यन्तं कुप्यति । कुपक्रोधे । क्रुधमण्डार्थेभ्यश्चेतियुच् ॥

अत्यन्तगामी । त्रि । अत्यन्तिके । अतिशयगमनशीले । इतिहेमचन्द्रः ॥

अत्यन्तसयोग । पुं । साकल्येनसम्बन्धे । निरन्तरसन्निकर्षे । अन्तमवसानमतिक्रान्तोऽत्यन्तः । सचासौसयोगश्च ।

अत्यन्तसुकुमारः । पुं । कङ्गुनीवृक्षे । इतिराज निर्घण्टः । त्रि । अतिकोमले ।

अत्यन्ताभाव । पुं । त्रैकालिक संसर्गावच्छिन्नप्रतियोगिताके अभावविशेषे

यथाभूतले घटोनास्तीति ॥

अत्यन्ताभावसम्पत्ति । स्त्री । स्वरूपेणाप्यप्रतीतौ ॥

अत्यन्तिक । पुं । अत्यन्तगामिनि । अतिशयभ्रमणकारिणि ॥ इतिहेमचन्द्रः ॥

अत्यन्तीन । त्रि । अतिशयितगतिशीले । अत्यन्तगामिनि ॥ अन्तस्याऽत्ययः । अत्ययेऽव्ययीभावः । अत्यन्तगामी । अवारपारात्यन्तानुकामगामीतिखः ॥

अत्यम्लम । न । वृक्षाम्ले । तंतडीकइति भाषाप्रसिद्धवृक्षफलविशेषे ॥

अत्यम्लपर्णी । स्त्री । वल्लिकूरणे । अत्यम्लानिपर्णानियस्याः । पाककर्णेत्यादिनाङीष् ॥

अत्यम्ला । स्त्री । अत्यम्लपर्ण्याम् । वनबीजपूरे । मधुटावा इतिगौड भाषाप्रसिद्धे ॥

अत्यय । पुं । अतिक्रमे ॥ दण्डे ॥ अभावे । विनाशे ॥ दोषे ॥ कृच्छ्रे ॥ अतिगमने ॥ कार्यस्यावश्यम्भावे ॥ अत्ययनम् । अनेनवा । इणगतौ इगतौवा । एरच् ॥

अत्यर्थम् । न । अतिशये ॥ त्रि । अतिशययुक्ते ॥ अर्थोनिवृत्तिविषयोवा तमतिक्रान्तमत्यर्थम् ॥ अस्यक्रियावि

शेषणत्वे क्लीवत्त्वम् । द्रव्यवाच्यत्वे वाच्यलिङ्गत्त्वम ॥ इत्यमरः ॥

अत्यल्पम् । त्रि । अल्पीयसि ॥ इत्यमर अतिशयेनाल्पम् ॥ ॥

अत्यष्टि । स्त्री । सप्तदशाक्षरायांवृत्तौ ॥ सप्तदशसंख्यायाम् ॥

अत्याकार: । पुं । न्यक्कारे । तिरस्कारे ॥ त्रि । महादेहे ॥

अत्यागी । पुं । कर्मफलत्यागित्वेपिकर्मानुष्ठायिनि । अत्ये । गौणसन्यासिनि ॥

अत्याधानम् । न । अतिक्रमे ॥ उपक्षेपे ॥ उपरिस्थापने ॥

अत्यायम । न । अतिगमने ॥

अत्याल: । पुं । रक्तचित्रकवृक्षे ॥

अत्याशा । स्त्री । असम्भावनीयवाञ्छायाम । अत्यन्तस्पृहायाम् ॥ यथा । अत्याशाभिरुपागताध्वगगणानधन्याव नीतापितान् नेयत्तर्पयितुंक्षमोस्मि समतद्दुःखैर्मनोदूयते ॥ इत्युद्भट ॥

अत्याश्रम: । पुं । परमहंसे ॥ ब्रह्मचर्यादीनहंससन्यासान्तानाश्रमधर्मवत-आश्रमानतिक्रम्यवर्त्तमानोयःसन्न्यस्याश्रमशब्देनोच्यते ॥

अत्याश्रमी । पुं । उत्तमाश्रमिणि । पूर्वाश्रमत्रयमतीत्यसर्वकर्मत्यक्तास्थितेपरमहंसपरिव्राजके ॥

अत्यासः । पुं । व्यतिक्रमे ॥

अत्याहितम् । न । महाभीतौ ॥ जीवानपेक्षिकर्मणि ॥ अतीवाधीयतेस्म मनसि । डुधाञःक्तः । दधातेर्हिः ॥ अतीवासमन्तादहितवा ॥

अत्युक्तिः । स्त्री । असम्भवोक्तौ । आरोपितस्यकथने ॥ अलङ्कारविशेषे ॥ यथा । अत्युक्तिरद्भुतातथ्यशौर्य्यौदार्य्यादिवर्णनम् । त्वयिदातरिराजेन्द्रयाचकाः कल्पशाखिनइतिचन्द्रालोकः ॥

अत्युक्था । स्त्री । स्त्रीछन्दसि ॥ गौस्त्री ॥ गोपस्त्रीभिः । कृष्णोरेमे ॥

अत्युच्छ्रितः । त्रि । अतिप्रवृद्धे ॥ अत्युच्छ्रितस्यदमनमुचितम्च श्रुतौ श्रुतम ॥

अत्यूहः । पुं । दात्यूहे । कालकण्ठके ॥ अतिशयवितर्के ॥ त्रि । बहुतर्कवति ॥

अत्यूहा । स्त्री । नीलिकायाम् । नीलसिन्दुवारे ॥ इतिमेदिनी ॥

अत्र । I । अधिकरणे । अस्मिन् ॥ एतस्मिन् । सप्तम्यास्त्रल् । एतदोऽन् ॥

अत्रभवान् । त्रि । श्लाघ्ये । पूज्ये ॥ इतिहेमचन्द्र ॥ इतराभ्योऽपिदृश्यन्त इतिप्रथमार्थेप्राक्दीव्यतीयस्त्रल् । सुपसुपेतिसमास.

अत्रिः । पु । मुनिविशेषे । अनुसूयापतौ ॥ अत्तिअद्यतेवा । अदभक्षणे । अदेस्त्रिनिश्चेतिचकारात्त्रिप् । अत्रिः । अत्री । अत्रय ॥

अत्रिजातः । पुं । विधौ । चन्द्रे ॥ द्विजे ॥

अत्रिदृग्ज । पुं । चन्द्रे ॥ इतिहेमचन्द्रः ॥

अत्री । पुं । मुन्यन्तरे ॥ अत्ति । अद० । अदेस्त्रिनिश्चेतिचिनिः । अत्री । अत्रिणौ । अत्रिणः ॥

अत्रिनेत्रजः । पुं । चन्द्रमसि ॥ इतिजटाधरः ॥

अत्रिनेत्रप्रसूतः । पुं । शशिनि ॥ इतिहलायुधः ॥

अत्रिनेत्रभूः । पुं । सोमे । शशधरे ॥ इतित्रिकाण्डशेषः ॥

अथ । I । सम्प्रश्ने ॥ अधिकारे । अथस्नानविधिः॥ मङ्गले । अथपरस्मैपदानि ॥ विकल्पे ॥ अनन्तरे । स्नातोऽथभुङ्क्ते ॥ अन्वादेशे ॥ प्रतिज्ञायाम् । गोदोभवानथेतिब्रूमः ॥ प्रश्ने । अथशक्तोसिभोक्तुम् ॥ कार्त्स्न्ये ॥ आरम्भे । अथशब्दानुशासनम् ॥ समुच्चये । भीमोऽथार्जुन ॥ अर्थ्यते । अर्थयाञ्चायाम् । अन्येभ्योऽपीतिडः । पृषोदरादित्वाद्रलोपः ॥

अथकिम् । I । स्वीकारे ॥

अथर्वणः । पुं । शिवे ॥ इतित्रिकाण्डशेषः ॥

अथर्वणिः । पुं । अथर्वज्ञब्राह्मणे ॥ पु

रोधसि ॥ इतिमेदिनी ॥ ईश्वरे ॥
अथर्वा । पुं । ब्राह्मणे ॥ अथर्वणा प्रोक्ते ग्रन्थे धर्मे आम्नाये वा अथर्वा । अथर्वणोवेतिवार्तिकादणोवालुक् । पक्षेआथर्वण ॥ न । वेदे ॥
अथर्ववित् । पुं । अथर्ववेदाभिज्ञेवसिष्ठादौ ॥
अथर्ववेद । पुं । मायेणाभिचारार्थे ऋग्वेदांशे । छान्दोग्याद्युपनिषत्प्रसिद्धेच तुर्यवेदेपञ्चाशच्छाखात्मके ॥
अथर्वाधिपति । पुं । बुधे । शशिजे ॥
अथवा । I । पक्षान्तरे ॥
अथो । I । अथार्थेषु ॥ अधिकारभेदे ॥ अप्यर्थे ॥ अर्थयते । अर्थभाज्ञायाम् । बाहुलकाड्डोः । पृषोदरादित्वाद्र्लोपः ॥
अद् । I । आश्चर्य्ये ॥ अत्ति । अदभक्षणे । क्षिप ॥
अदक । त्रि । दन्तरहिते ॥ भक्षयितरि ॥ इतिछान्दोग्योपनिषत् ॥
अदत्ता । स्त्री । अपरिणीतायाम् ॥ इतिस्मृति ॥
अदत्तादायी । त्रि । चौरे ॥
अदनम् । न । भक्षणे ॥ इतिहेमचन्द्रः ॥
अदनीय । त्रि । भक्ष्ये ॥
अदभ्रम् । त्रि । बहुले । अनल्पे ॥ दभ्रादन्यत । नञ्समास. ॥

अदभ्रचक्षुः । न । ज्ञानचक्षुषि ॥ त्रि । तद्वति ॥
अदर्शनम । त्रि । अतीन्द्रिये ॥ न । विनाशे ॥ लोपे ॥ दर्शनस्याभाव. ॥
अदल । पुं । हिज्जले ॥ त्रि । दलवर्जिते । दलरहिते ॥
अदला । स्त्री । घृतकुमार्याम् ॥
असौ । त्रि । परस्मिन् । परत्र ॥ पुरोवर्त्तिनोनिर्देशे ॥ असौपुमान् । असौस्त्री । अदः कुलम् ॥
अदाता । त्रि । कृपणे । दानशक्तिरहिते ॥ यथा । अदाताप्रुरुषस्त्यागीस्वधनं त्यज्यगच्छतीति ॥
अदान्त । त्रि । तपःक्लेशासहिष्णौ । अकृतबाह्येन्द्रियनिग्रहे ॥
अदाह्यः । पुं । परमात्मनि ॥ त्रि । दहनानर्हे वस्तुनि ॥
अदिति । स्त्री । भुवि ॥ देवमातरि ॥ पार्वत्याम ॥ पुनर्वसुनक्षत्रे ॥ त्रि । अखण्डे ॥ दितिभिन्ना अदितिः ॥ न ञोदाञोडितिरिति शाकटायनोक्ते डिति प्रत्ययान्तोवा । अदनाददितिर्वा ॥
अदितिनन्दन. । पुं । देवे ॥ अदितेर्नन्दनइतिविग्रहः । कृद्योगाच षष्ठीसमस्तइतिसमास ॥
अदिती । स्त्री । अदित्याम् ॥ कृदिका

रादित्तिनञ्स्यदितिशब्दान्ङीष् ।

अदीनः । त्रि । उदारे ॥ नदीन. ॥

अदीनात्मा । त्रि । अतिव्यसनपरम्पराया मप्यक्षुभितान्तकरणे ॥ अदीनआत्मायस्य ॥

अदृढ' । त्रि । अस्थिरे ॥

अदृक् । त्रि । अन्धे ॥ अन्धे ॥ नदृगस्य ॥

अदृश्यम् । न । द्रष्टृरूपे । अधिष्ठानचिद्रूपे ॥ त्रि । इन्द्रियागम्ये ॥ यथा । कन्याद्रेरतिकोमला त्रिभुवनव्याप्ताप्यदृश्याजनैरिति ॥ नदृश्य. ॥

अदृष्टम । न । भाग्ये । प्रागजन्मकर्मणि ॥ महीभुजां वह्नितोयादिजेभये ॥ आदिमा हुताशनोजलंव्याधिर्दुर्भिक्षमरणतथा । अतिवृष्टिरनावृष्टिर्मूषकाःशलभादयोगृह्यन्ते । भयहेतुत्वाद्भयम् अदृष्टहेतुकत्वाददृष्टम् ॥ त्रि । अवीक्षिते ॥ यथा । अदृष्टदर्शनोत्कण्ठादृष्टेविच्छेदभीरुतेति ॥

अदृष्टपूर्वः । त्रि । पूर्वमदृष्टे ॥ पूर्वंदृष्टो दृष्टपूर्व' । सुप्सुपेतिसमास' । ततो नञ्समासः ॥

अदृष्टभेदः । पुं । गुणपरिणामे ॥

अदृष्टिः । स्त्री । सरोषवक्रदृष्टौ । क्रूरदृष्टौ ॥ विरुद्धादृष्टिरदृष्टिः ॥

अदृष्टिका । स्त्री । सरोषवक्रदृष्टौ ॥

अदेवमातृकः । पुं । नदीमातृकदेशे ॥

अद्मः । पुं । पुरोडाशे ॥ अत्ति अद्यतेवा । अदभक्षणे । गनगम्यद्योरितिगन् ॥

अद्धा । ।। तत्त्वे ॥ सत्यात । स्फुटे ॥ अवधारणे ॥ अतिशये ॥ अतसन्ततगमनधयति दधातिवा । विच ॥

अद्भुतम् । न । उत्पातभेदे ॥ विस्मये । चेतसोविस्मयाख्यविकारे ॥ पुं । शृङ्गारादिनवरसान्तर्गतरसभेदे ॥ अत्आकस्मिकार्थेऽव्ययम् । तस्यभवनम् । अदिभुवोडुतच ॥

अद्भुतस्वनः । पुं । महादेवे ॥ इतित्रिकाण्डशेषः ॥

अद्मनिः । पुं । पावके ॥ अग्नौ ॥ अत्ति । अद० । अदेर्मुट्चेत्यनि. ॥

अद्मरः । त्रि । वहुभोक्तरि । भक्षके ॥ अत्ति । अदभक्षणे । सृघस्यदः क्मरच् ॥

अद्य । ।। इदानीम् । वर्त्तमानदिने ॥ अस्मिन्नहनि । सद्यः पक्षत्परार्य्यैषमइतिइदमोऽश्भावोद्यश्चनिपात्यते॥

अद्यतनः । पुं । कालप्रभेदे । अतीतायारात्रे रन्त्ययामेन आगामिन्यारात्रेराद्ययामेनचसहितेदिवसे ॥ अतीतरात्रेरन्त्ययामद्वयेन आगामिरात्रेराद्ययामद्वयेनचसहिते दिवसे॥ त्रि । अद्यभवे ॥ सायञ्चिरमित्यादिनाष्ट्युट्युलौतुटच ॥

अद्यत्वे । ा । इदानीमित्यर्थे ॥

अद्यश्वीना । स्त्री । आसन्नप्रसवायाम ॥ अद्यश्वोवाविजायते । अद्यश्वीनावष्ट ब्ध इतिखप्रत्ययान्तः साधुः ॥ अवष्ट ब्ध माचेवानिपातनम् ॥ त्रि। आसन्न मृत्युके ॥

अद्रिः । पुं । पर्वते ॥ शाखिनि ॥ सूर्ये ॥ मानभेदे ॥ अत्ति अद्यतेवा । अद भक्षणे । अदिशदोतिक्रिन् ॥ स- सांके ॥

अद्रिकर्णी । स्त्री । अपराजितायाम् ॥

अद्रिकीला । स्त्री । भूमौ ॥ अद्रयः कीलायस्याम् ॥

अद्रिकूटः । पुं । देव्याःस्थानविशेषे ॥ यथा । अद्रिकूटेमहायोगी रुद्राणी परमेश्वरीति ॥

अद्रिजम् । न । शैलजे । शिलाजतु नि ॥ त्रि । अद्रिसम्भवे ॥ अद्रौजातम् । जनी । सप्तम्यांजनेर्डः ॥ अद्रेर्वा जातम् । पञ्चम्यामितिडोवा ॥

अद्रिजतु । न । शिलाजतुनि । शैलनि र्यासे ॥ अद्रेर्जत्विव । षष्ठीतत्पुरुषः ॥

अद्रिजा । स्त्री । पार्वत्याम् ॥ अद्रेर्जाता । जनी । पञ्चम्यामजातावितिड ॥ सैंहलीवृक्षे ॥

अद्रिजित् । पुं । वासवे ॥ अद्रीनजयति । जि० । सत्सूद्विषेतिक्विप । तुक् ॥

अद्रितनया । स्त्री । पार्वत्याम् ॥ अद्रेः तनया ॥

अद्रिभिद् । पुं । मघवति । इन्द्रे ॥ अद्रीन् गोत्रान्भिनत्ति । भिदि क्विप् तुक् ॥

अद्रिभूः । पुं । आखुकर्णीलतायाम् ॥

अद्रिराजः । पुं । हिमाद्रौ ॥ अद्रीणांराजा । टच् ॥

अद्रिसारः । पुं । लोहे ॥ अद्रे सार ॥

अद्रीशः । पुं । हिमाद्रौ ॥ शिवे ॥ अद्रीणामीशः ॥

अद्रोहः । पुं । द्रोहाभावे ॥ नद्रोहः ॥ त्रि । तद्वति ॥ अद्रोहोऽस्यास्ति । अर्शआद्यच ॥

अद्वयम् । त्रि । स्वगतभेदशून्ये । अद्विती ये ॥ पु । बुद्धे ॥

अद्वयकारणम् । न । जगतोऽभिन्ननि मित्तोपादानेब्रह्मणि ॥

अद्वयवादी । पु । बुद्धे ॥ वैदान्तिके ॥ अद्वयमद्वैतवदत्यवश्यम् । आवश्यके णिनि ॥ त्रि । अद्वयवक्तरि ॥

अद्वितीय । त्रि । केवले । एकस्मिन् ॥ न । विजातीयभेदरहिते आत्मतत्त्वे ॥ नविद्यतेद्वितीयोऽस्य ॥

अद्वेष्टा । त्रि । द्वेषाभावविशिष्टे ॥ सर्वाणिभूतान्यात्मत्वेनपश्यन्नात्मनोदुःख हेतावपिप्रतिकूलबुध्यभावाद्योनद्वेष्टितस्मिन् ॥

अद्वैत । त्रि । सजातीयविजातीयद्वितीयशून्ये पूर्णपरमात्मनि ॥ भेदविकल्परहिते ॥ यथा । द्वैताप्रतीतावनाऽनर्थः किन्त्वानन्दो महानिति । अत्र लौकिकदृष्टान्तःस्त्रीवाक्येनेरित श्रुतौ ॥ स्त्रियावियुक्तस्तद्गेहपश्यन्कामेनपीड्यते । आलिङ्गितस्तयैकत्त्वमाप्यानन्देनतृप्यति ॥ चित्तानुरागसिद्ध्यर्थंप्रिययेतिविशेषणम् । दुष्टायांसत्यपिस्त्रीत्वेचेतो नैवानुरज्यति ॥ चेचा ग्रामादिकवाह्य गृहकृत्यंतथान्तरम् । आलिङ्गित सुखाविष्टोनवेत्तिद्वयमप्यसौ । [illegible] नतदानिरुद्धोऽस्मिन्तोपरिस्वजन । अप्राप्यचित्तविक्षेपम[illegible]आत्त्या[illegible]न्दसागरे ॥ एवमसौसुषुप्तौधाम्नि[illegible]पर[illegible]त्मना । नवहिर्जागरंनान्तः [illegible]स्वप्नञ्चद्वैतमीक्षते ॥ आनुकूल्यमालिङ्ग[illegible]द्वैतनादर्शनतोनहि । तत कामभयाभावादात्मानन्देनिमज्जतीति ॥

अद्वैतवादी । पुं । बुद्धे ॥ त्रि । विवेकिनि ॥ ब्रह्मात्मैक्यवादिनि ॥ [illegible]मत यथा । ब्रह्मैवसत्त्यम्प्रत्त्यक्षादिप्रमाणै सिद्धम । विश्वन्तुब्रह्मण्यारोपितम् । यथारज्जु रज्जुस्वरूपाज्ञानातसर्पवत्प्रतिभाति तथाब्रह्मस्वरूपाज्ञानात् विश्वंवस्तुवत् प्रतिभाति । प्रकृतिर्जीवस्यापिपर्यवसाने ब्रह्मैव ब्रह्मान्यतसद्वस्तुनास्तीति ॥

अधःक्रिया । स्त्री । अपमाने ॥ अधःकरणम् । कृञ शच ॥

अधश्चितम । त्रि । न्यञ्चिते । अधस्थितवस्तुनि ॥

अधःपुष्पी । स्त्री । अवाकपुष्पिकायाम् हेठाहुली इतिगौडभाषा ॥ गोजिह्वायाम ॥ अध पुष्पाण्यस्याः । गौरादित्वान्ङीष् ॥

अधनः । त्रि । भार्यादित्रिषु ॥ यथा । त्रय एवाऽधनाराजन्भार्यादासस्तथासुत । यत्तेसमधिगच्छन्तियस्यतेतस्यतद्धनमितिमात्स्ये ३१ अध्याय ॥

अधमः । त्रि । कुत्सिते ॥ न्यूने ॥ पुं । उपपतिभेदे ॥ अवत्त्यस्मादात्मानम् । अवरक्षणादौ । अवद्यावमाधमावरेफाःकुत्सितेइत्त्यमप्रत्त्ययेनिपातः । तत्रैववकारस्यपक्षेधकारः ॥ यद्वा । नधम्यते धमतिवा । धमध्वानेसौत्रः । पचाद्यच्वा ॥ यद्वा । अधोभवः । अवेधसोर्लोपश्चेतिस्वामी ॥

अधमर्णः । त्रि । ऋणिनि । ऋणकारिणि ॥ अधमदु खमदम्रणयस्य ॥ अधमऋणेइतिऋणमाधमर्ण्येइतिनिपातनात्सप्तम्यन्तोत्तरपदेनवासमास ॥

अधमर्णिकः । त्रि । अधमर्णे ॥

अधमा । स्त्री । नायिकाभेदे ॥

अधमाङ्ग । न । चरणे । पादे ॥

अधर । पुं । ओष्ठे । उत्तराधरोष्ठमात्रे ॥ अधरलक्षणं यथा । पाटलोवर्त्तुल स्निग्धोरेखाभूषितमध्यभू । सीमन्तिनीनामधरोराज्ञाङ्केवप्रियाभवेत् ॥ श्याम स्थूलोधरोष्ठ स्याद्वैधव्य कलहप्रद । मसृणोमत्तकाशिन्या श्चोत्तरोष्ठ सुभोगद ॥ इतिसामुद्रकम ॥ पुं । न । स्मरागारे । रतिमन्दिरे ॥ चि । हीने ॥ तले । अनूर्द्ध्वे ॥ नधरति । धृञ्धारणे । पचाद्यच ॥ यद्वा । धरादुन्नातकठिनाद्वाऽन्य ॥ न भ्रियते । धृङ्अनवस्थाने । पुंसीति-घोवा । नञ्समास ॥ धरासम्बन्धरहिते ॥ हीनवादिनि ॥

अधरत । T । अधोभागे ॥ अधरस्मात् । तसिल् ॥

अधरमधु । न । अधरामृते । वक्त्रासवे ॥

अधरस्तात् । T । अधोभागे । अधरत ॥

अधरा । स्त्री । अधोदिशि ॥ नीचायाम् ॥

अधरात् । T । अधोभागे ॥ उत्तराधरदक्षिणादातिरितिस्वार्थेआति । वसत्यागतोरमणीयवा ॥

अधरीकृत । चि । तिरस्कृते ॥

अधरीण । चि । धिक्कृते । तिरस्कृते ॥

अधरेण । T । अधो दिशि देशे काले च । एनबन्यतरस्यामदूरेऽपंचम्या इतिस्वार्थे एनप् । वसति रमणीयवा ॥

अधरेद्यु । T । परस्मिन्नहनि ॥ अधरस्मिन्नहनि । सद्य परुदित्यादिनाऽधरशब्दात् एद्युसप्रत्ययोनिपात्यते ॥

अधर्म । पुं । ब्रह्मवधादिनिषिद्धकर्मजन्ये पापे ॥ वेदेनिषिद्धे । नानाविधदुःखसाधने । धर्मविरोधिनि ॥ धर्मविरुद्धोऽधर्म ॥ न । परब्रह्मणि ॥ धर्मरहितत्वात् ॥ चि । ब्रह्मविदि ॥

अधर्मज्ञ । चि । धर्मविचारनिष्ठारहिते । तत्त्वासारत्वप्रत्ययवति ॥

अधर्ममित्र । पुं । कलियुगे ॥ अधर्मोमित्रयस्य ॥ चि । अधर्मप्रिये । मिथ्यावादिनि ॥

अधर्मास्तिकाय । पु । धर्मप्रतिवन्धकृति ॥

अधश्चर । पुं । चौरे ॥ चि । अधोगामिनि ॥

अधश्शय्या । स्त्री । अखट्वाशयने ॥

अधश्शल्य । पुं । अपामार्गे । ऊंगाइति ख्याते ॥

अधश्शाख । पुं । ससाराश्वत्थवृक्षे ॥ अधइति अर्वाचीना कार्योपाधयोहिरण्यगर्भादयोग्रह्यन्ते ते नानादिक्‌प्रसृतत्वात् शाखाइवशाखाअस्येतिव्युत्पत्त्यामायामय ससाराश्वत्थवृक्षोऽभ

शाखशब्देनोच्यते ॥

अध । र । पाताले ॥ नीचैरर्थे । तले । अधोभागे ॥ स्मरालये ॥ अधरस्मिन् अधरस्याम् अधरस्मात अधरस्याः अधरः अधरावा । वसत्यागतोरम णीयवा । पूर्वाधरावराणामित्यसिर धादेशश्च ॥

अधस्तात । र । कामगेहे । योनैा ॥ अनुज्ञार्थे । अधोभागे ॥ अधरस्मिन् अधरस्याम अधरस्मात् अधरस्याः अधर: अधरावा दिक् । दिक्छब्दे भ्य सप्तमोपञ्चमीत्यादिनाअस्ताति प्रत्ययस्तद्योगेनास्तातिचेत्यधरस्या धादेशः ॥

अधस्ताद्गमनम् । न । अधर्मेणसुतला दिषुगमने ॥ अधोगमने ॥

अधार्मिके । चि । पापिनि । अधर्मेण व्यवहर्त्तरि । शास्त्रप्रतिषिद्धागम्यागमनाद्यनुष्ठातरिमानुषे ॥ नाधार्मिके वसेद्ग्रामेनग्रूद्रवहुलेभृशमिति मनुः ॥

अधार्ष्ट्यम् । न । असामर्थ्ये ॥

अधि । र । अधिकारे ॥ ईश्वरे ॥ अधिकृत्यार्थे ॥ आधिक्ये ॥ उपरि ॥ अधिकार्थे ॥ यथा अधिमास । अधिको मासइत्यर्थः ॥

अधिकम् । न । अर्थालङ्कारभेदे ॥ यथा । महतोर्यन्महीयांसावाश्रिता श्रययो क्रमात । आश्रिताश्रयिणौ स्यातांतनुत्वेप्यधिकन्तुतत् ॥ आश्रितमाधेयम । आश्रयस्तदाधार । तयोर्महतोरपि विषयेतदपेक्षयातनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्ष विवक्षया यथाक्रमयदधिकतरतांव्रजतस्तद्द्विविध मधिकनाम । क्रमेणोदाहरणम् । अहोविशालभूपाल भुवनचितयोदरम् । मातिमातुमशक्यापियशोराशिर्यदत्रते ॥ युगान्तकालप्रतिसहृतात्मनोजगन्तियस्यांस विकाशमासत । तनैाममुत्तचनकैटभद्विषस्तपोधनाभ्यागमसम्भवा मुद इति ॥ फले ॥ अध्यारूढम् । अधिकमिति अध्यारूढशब्दात्कन उत्तरपदलोपश्च ॥ * ॥ हेतूदाहरणाधिकमधिकम ॥ न्या ५ । ५६ । हेतूदाहरणेत्युपलक्षणम् दूषणाद्यधिकमपि बोध्यम् । तथाच । कृतकर्तव्यापुनरुक्ताभिधानमितिफलितम् । अनुवादस्तु नकृतकर्त्तव्य साभिप्रायत्वात् । प्रतिज्ञाधिकञ्चपुनरुक्तम् धूमादालोकात् महानसवत्चत्वरवदित्यादिक न्तुविनासमयवन्धदार्ढ्यादिभ्रमाद्युक्तमधिकम् । यथा । महानसमहानसवदितितुनाधिकङ्किन्तु पुनरुक्तम् ॥

चि। उत्कृष्टे। अतिरिक्ते। समधिके॥

अधिकरणम्। न। आधारकारके। यत्रभवतितस्मिन्। कर्त्तृकर्मद्वाराक्रियाश्रयइत्यर्थः॥ एकन्यायोपपादने॥ मीमांसाग्रन्थे॥ अधिक्रियते वेदविचारोऽस्मिन्ननेनवेत्यधिकरणवेदविचारग्रन्थात्मिकामीमांसेत्यर्थः॥ यथाहु। विषयोविशयश्चैवपूर्वपक्षस्तथोत्तरम्। निर्णयश्चेतिपञ्चाङ्गशास्त्रेऽधिकरणंस्मृतमिति॥ एवक्रमेणविवेचनमत्राधिक्रियतइत्यधिकरणम्॥ अधिपूर्वात्कृञोल्युट्॥

अधिकरणविचाल। पुं। द्रव्यस्यसख्यान्तरापादने॥ यथा। एकराशिंपञ्चधाकुरु। अनेकराशिमेकधाकुरु। सएवाधिकरणविचालोयदेकमनेकंक्रियते यद्यनेकमेकंक्रियते सोप्यधिकरणविचालइतिभाष्यम्॥

अधिकरणसिद्धान्त। पुं। सिद्धान्तविशेषे॥ यथा। यत्सिद्धावन्यप्रकरणसिद्धिः। सोधिकरणसिद्धान्तः। १। ३० यस्यार्थस्यसिद्धौजायमानायामेव अन्यस्य प्रकरणस्य सिद्धिर्भवति सोधिकरणसिद्धान्तइत्यर्थः॥

अधिकर्त्तव्येम्। न। अधिकरणेयज्ञवतितस्मिन्॥

अधिकर्द्धि। चि। महासम्पद्युक्ते। समृद्धे॥ इत्यमरः। अधिकाऋद्धिरस्य॥

अधिकार्म्मिक। पुं। हट्टाध्यक्षे। हाटका चौधरी इतिभाषाप्रसिद्धे॥

अधिकाङ्गम्। न। कञ्चुकादिनिबन्धने। सारसने। कञ्चुकादिदार्ढ्यार्थंशूरैर्मध्यकायेनिबद्धेपट्टिकादौ॥ चि। एकविंशत्यङ्गुलादौ॥ अधिकमङ्गात्॥

अधिकार। पुं। विधिपुरुषसम्बन्धे॥ प्रक्रियायाम्। राज्ञांछत्रधारणादिव्यापारे॥ अधिआधिक्यस्यकरणम्। कृञोभावेघञ्॥ अधिकृतदेशादौ॥ यथा। निजाधिकारोयम्। अयम्पराधिकारः॥ प्रकरणे॥ यथा। नैमित्तिकोयप्रायश्चित्ताधिकारः॥ क्रियाजन्यफलभागित्वरूपे प्रतिकर्मणिभिन्ने। स्वामित्वे॥ यथा। सर्वेस्युरधिकारिण इतिस्मृतिः॥ प्रभुयोजने॥ व्याकरणमतेपूर्वसूत्रस्थितपदस्यपरसूत्रेषूपस्थितौ। अनुवृत्तौ॥ सचिविधोयथा। सिंहावलोकिताख्यश्चमण्डूकप्लुतिरेवच। गङ्गास्रोतइतिख्यातअधिकारास्त्रयोमता इति॥

अधिकारविधि। पुं। कर्मजन्यफलस्वाम्यबोधकेविधौ॥ कर्मजन्यफलस्वाम्यञ्चकर्मजन्यफलभोक्तृत्वम्। सचयजेतस्वर्गकाम इत्यादिरूपः। स्वर्गमुद्दिश्ययागविद्धिधताऽनेनस्वर्गकामस्यया

गजन्यफलभोक्तृत्त्वप्रतिपाद्यते । यस्याहिताग्नेरग्निर्गृहान्दहेत् सोऽग्नये क्षामवतेऽष्टाकपालं निर्वपेदित्यादिनाऽग्निदाहादौ निमित्ते कर्मविधतानिमित्तवतः कर्मजन्यपापक्षयरूपफलस्वाम्यमतिपाद्यते । एवमहरहः सन्ध्यामुपासीतेत्यादिना शुचिविहितकालजीविनः सन्ध्योपासनजन्यप्रत्यवायपरिहाररूपफलस्वाम्यं बोध्यते । तच्चफलस्वाम्यतस्यैव योऽधिकारविशिष्टः । अधिकारश्चसएव यद्विधिवाक्येषु पुरुषविशेषणत्वेनश्रूयते । यथा काम्येकर्म्मणि फलकामना । नैमित्तिके निमित्तनिश्चयः । नित्येसन्ध्योपासनादौ शुचिविहितकालजीवित्वम् । अतएव राजा राजसूयेन स्वाराज्यकामो यजेतेत्यनेन विधिवाक्येन स्वाराज्यमुद्दिश्य राजसूयं विदधतापि न स्वाराज्यकाममात्रस्य तत्फलभोक्तृत्वं प्रतिपाद्यते । किन्तु राज्ञः सतः स्वाराज्यकामस्यैव राज्यत्वस्याप्यधिकारिविशेषणत्वेनश्रवणात् । विशेषः शास्त्रे ॥

अधिकारी । पुं । प्रमातरि । यथा । विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन्जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गताखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता वेदान्ताधिकारीति लक्षणलक्षिते पुरुषे । त्रि । अधिकारविशिष्टे । प्रभौ । अधिकारोऽस्त्यस्य । अतइनिठनाविति इनिः ॥

अधिकार्थवचनम् । न । स्तुतिनिन्दाफलकेऽध्यारोपितार्थवचने ॥

अधिकृतः । त्रि । अध्यक्षे । आयव्ययाऽवेक्षके । व्यापारिते । कृताधिकारद्रव्ये । अधिअधिकउपरिवाक्रियते स्म क्तः ॥

अधिक्रमः । पुं । आक्रमणे । अधिक्रमणम् । क्रमुपादविक्षेपे । घञ् । अधिक्रम्यते वा कर्मणि घञ् । नोदात्तेति वृद्ध्यभावः ॥

अधिक्षिप्तः । त्रि । स्थापिते । प्रणिहिते । कुत्सिते । भर्त्सिते । प्रतिक्षिप्ते । कृताक्षेपे ॥ अधिक्षिप्यते स्म । क्षिप प्रेरणे क्त ॥

अधिक्षेप । पुं । तिरस्कारे ॥

अधिगतः । त्रि । प्राप्ते ॥ यथा । अधिगतपरमार्थाः पण्डिताइति । अधिगम्यते स्म । गम्ऌ ० । क्तः ॥

अधिगमः । पुं । साक्षात्कारे । प्राप्तौ । स्वीकरणे । अधिगमनम् । गम्ऌ । घञ् ॥

अधित्यका । स्त्री । शैलस्योर्ध्वभूमौ ॥ अद्रेरध्यारूढाभूमिः । उपाधिभ्यांत्य कन्नासन्नारूढयोरितित्यकन् । त्य कनस्त्रनिषेधइतिनेत्त्वम् ॥

अधिदैवतम् । न । पुरुषे ॥ पुरुषोहिर ण्यगर्भः दैवतान्यादित्यादीन्यधिकृ त्यचक्षुरादिकरणान्यनुगृह्णातीति तथोच्यते ॥ देवताविषयदर्शने ॥ दे वताया अधियत्तदधिदैवतम ॥

अधिनाय । पुं । गन्धे ॥

अधिपः । त्रि । प्रभौ ॥ राज्ञि ॥ अधि पाति । पारक्षणे । आतश्चोपसर्गइ तिकः ॥

अधिपति । पुं । प्रभौ ॥ राज्ञि ॥ अधि ष्ठायपालयितरि ॥ अधि पाति । पार क्षणे । पातेर्डतिः ॥

अधिभू । पुं । प्रभौ ॥ अधिभवति । भू सत्तायाम । भुव' सञ्ज्ञान्तरयोरिति क्विप् ॥

अधिभूतम् । न । चरेभावे ॥ चरतीति चरोविनाशी । भावोयत्किञ्चिज्जनि मद्वस्तुभूत प्राणिजातमधिकृत्यभव तीतितथोच्यतइतिस्वामी ॥

अधिमांसक । पु । दन्तरोगविशेषे ॥ यथा । हानव्येपश्चिमेदन्ते महान्शो थोमहारुज. । लालास्रावीकफकृतो विज्ञेय सोधिमांसक' ॥ ११ ॥

अधिमासः । पुं । असङ्क्रान्तिमासे । रविसङ्क्रान्तिरहितेचान्द्रमासे । म लमासे ॥ यथा । असङ्क्रान्तमासोऽधि मास' स्फुट स्यादिति । अपिच । द्वा त्रिंशद्भिर्गतैर्मासैर्दिनै षोडशभिस्त- था । घटिकानांचतुष्के णपतति ह्यधि मासक इति ॥ एतच्चसम्भवार्थंनतु नियमार्थम् ॥ अधिअधिकोमास ॥

अधियज्ञ । पु । विष्णौ ॥ अधियज्ञो ह मेवात्रदेहेइतिवचनात सर्वयज्ञा धिष्ठाता सर्वयज्ञफलदायक' सर्वय ज्ञाभिमानिनीविष्णवाख्यादेवता । यज्ञोर्हिविष्णु सचअधियज्ञ. । अय वासुदेवएव न भिन्न. कश्चित । अतएव परब्रह्मण सकाशातअत्यन्ता भेदेनैवात्मामतिपत्तव्यइति । सचाच नुष्यदेहे यज्ञरूपेण वर्त्तते । बुध्या दिव्यतिरिक्तो विष्णुरूपत्वात् मनुष्य देहे च यज्ञावस्थानम् यज्ञस्यमनु ष्यदेहनिर्वर्त्त्यत्वादित्यर्थ' ॥

अधियोग । पुं । यात्रायोगान्तरे ॥ य था । बुधगीष्पतिभार्गवानांमध्ये द्वौ ग्रहौचेत्केन्द्रे अथवापञ्चमनवमेस्था ने स्थानभेदेन स्थानैक्येन वा स्थि- तौ स्यातां तदाऽधियोगोभवति तदा यात्रुर्जयोभवेत ॥

अधिरथ । पुं । कर्णस्यपितरि ॥

अधिराट् । पुं । सम्राजि ॥ अधिअधिक राजते । राज् । क्विप् ॥

अधिराज्यभाक् । पुं । अधिराजि ॥

अधिरूढम् । न । अङ्कुरे ॥ तालवीजाङ्कुरास्थिमज्जार्द्रौ ॥ त्रि । आक्रान्ते ॥

अधिरूढिः । स्त्री । आरोहणे ॥

अधिरोहिणी । स्त्री॥ वंशकाष्ठादिरचितेसोपाने । नि,श्रेण्याम् ॥ अधिरुह्यतेऽनया । रुहप्रादुर्भावे । करणे ल्युट् ॥

अधिवचनम् । न । नाम्नि । समाख्याम् ॥ इतित्रिकाण्डशेषः ॥

अधिवास । पुं । गन्धमाल्याद्यैः संस्कारे ॥ निवासे ॥ अधिवसनम् । वस । घञ् ॥

अधिवासनम् । न । पूजार्थेगन्धमाल्यादिभिः संस्कारे । गन्धमाल्यादिभिरङ्गसंस्कारे ॥ अधिकमास्यते । वासउपसेवायाम् । चुरादिः । ल्युट् ॥

अधिवासितः । त्रि । सञ्जातगन्धे ॥ कृताधिवासे ॥

अधिविन्ना । स्त्री । अनेकभार्यस्यप्रागूढायांस्त्रियाम् । कृतसापत्निकायाम् । अध्यूढायाम् ॥ अधिउपरिविन्नलाभोस्याः ॥ यद्वा । अधिकाविन्नालब्धायस्याः ॥

अधिश्रयणम् । न । चुल्ल्याद्युपरिस्थापने ॥

अधिश्रयणी । स्त्री । चुल्ल्याम् । अंग्लन्ते ॥ इत्यमरः ॥ अधिश्रीयतेऽन्न । श्री ञ्पाके । अधिकरणेल्युट् । ङीप् ॥

अधिष्ठाता । त्रि । अध्यक्षे । प्रवृत्तिनिवृत्तिकारणे ॥ योयस्यप्रवर्त्तकोनिवर्त्तकश्चसतस्याधिष्ठातेतिव्यवहारः ॥

अधिष्ठानम् । न । पुरे ॥ चक्रे ॥ प्रभावे ॥ अध्यासने ॥ स्थाने । कल्पनाधारभूते । इच्छाद्वेषसुखदुःखचेतनाद्यभिव्यक्तेराश्रये । कूटस्थचैतन्ये । अन्नातेन्नस्थवि ॥ अधितिष्ठन्ति भूतान्युपादानकारणत्वेनेतिव्याख्यानात् ॥ शरीरे ॥ जीवरूपेणप्रविश्यसदैवाधितिष्ठत्यस्मिन्नितिव्याख्यानात । अध्यस्तस्यस्वरूपे ॥ अधिष्ठीयतेऽनेनास्मिन्वा । ष्ठा । भावकरणादौल्युट् ॥ अधिष्ठानावशेषोहिनाशः कल्पितवस्तुनइतिन्यायः ॥

अधिष्ठितः । त्रि । स्थिते ॥ आश्रिते ॥

अधीतः । त्रि । पठिते । कृताध्ययने ॥ अधिगते । प्राप्ते ॥ अधिपूर्वादिङोगत्यर्थाकर्मकेतिक्तः ॥

अधीतिः । स्त्री । अध्ययने । पठने ॥

अधीती । त्रि । अध्ययनविशिष्टे । अधीतवति ॥ अधीतमनेन । इष्टादिभ्यश्चेतिकर्त्तरीनिः ॥

अधीनः । त्रि । आयत्ते ॥ इनमधिगत । अत्याद्यय इतिसमासः । अधिउपरि इनोऽस्येतिवा ॥

अधीयान । त्रि । पठमाने ॥ वेदाध्ययनवति ॥ यथा । अधीयानं पण्डितम्मन्यमानोयोविद्ययाहन्तियशः परेषाम । तस्यान्तवन्तस्तुभवन्तिलोका नचास्यतद्ब्रह्मफलददातीति महाभारतम् ॥

अधीरः । त्रि । कातरे ॥ चञ्चले ॥ न धीरोधैर्य्यंयस्य ॥

अधीरा । स्त्री । विद्युति ॥ मानिनीभेदे ॥ यथा । ज्ञातेऽन्यासङ्गिनिपतौ खण्डितेर्ष्याकषायिता । अधीराश्रुविमुञ्चन्तीविज्ञेयाचाचनायिकेतिदशरूपके ॥

अधीश । त्रि । प्रभौ । ईश्वरे ॥ यथा । अधीशेनावितंविश्वंनाशयान्तिविनश्वव । ततपातृन्पातिविश्वेशस्तस्मा ल्लोकहितेरभवेदिति ॥ निनश्चवो नाशयितुमिच्छवः । नश्यतिरन्तर्भावितण्यर्थः ॥ कामे ॥

अधीश्वरः । पुं । वृद्धे ॥ पुं । स्त्री । प्रणता खिलसामन्तावनिपाले । सर्वसिद्धिहितन्त्रपवशकारिणि ॥ अधिकईश्वरः । राजातुप्रणताशेषसामन्तःस्यादधीश्वरः ॥ स्त्रियामधीश्वरी ॥

अधीष्टः । पुं । सत्कारपूर्वकेव्यापारे ॥ त्रि । सत्कृत्यव्यापारिते ॥

अधुना । T । सम्प्रतीत्यर्थे ॥ अस्मिन्काले । अधुनेतिनिपातितः इदमोऽशभावोधुनाचप्रत्यय ॥

अधुनातनम । त्रि । इदानींतने । वर्त्तमानकालवृत्तौ ॥ अधुनाभवः । सायचिरमितिट्युप्रत्ययः । स्त्रियांङीपि । अधुनातनी

अधृष्ट । त्रि । लज्जावति । शालीने ॥ नधृष्टः ॥

अधृष्यः । त्रि । प्रगल्भे । अधर्षणीये । अनभिभवनीये ॥ नधृष्य ॥

अधृष्या । स्त्री । नदीप्रभेदे ॥ नधृष्या॥

अधोंशुकम् । न । परिधेयवस्त्रे । अन्तरीये ॥ अध अधोभागस्यअंशुकम् ॥

अधोक्षः । त्रि । जितेन्द्रिये ॥

अधोक्षजः । पुं । विष्णौ ॥ अधः अक्षजं ज्ञान यस्मादितिव्युत्पत्तेः ॥ अधः कृतमक्षजमैन्द्रियकंज्ञानयेन ॥ अधोक्षाणांजितेन्द्रियाणांजायते प्रत्यक्षो भवतिवा ॥ अक्षमिन्द्रिये अधइन्द्रियपादौ ताभ्यांजातः । अन्येभ्योपिदृश्य तइतिडः ॥ अधोनक्षीयते जातुयस्मा त्तस्मादधोक्षजइत्युयोगपर्वोक्तिः । यद्वा ॥ अधःशब्देनपृथिवीवाच्निना- अण्डस्याधरकपालमुच्यते द्युवाचके

नामशब्देनचोपरितनकपालमुच्यते । ताभ्यांशब्दाभ्यांतन्मध्यंलक्ष्यते । तथाचाधोक्षयोरण्डस्याधरकपालो-त्तरकपालयोर्मध्येवैराजरूपेणजाय तेइत्यधोक्षजः । सप्तम्यांजनेर्डइतिड प्रत्ययइत्यभिप्रेत्यनिर्वचनान्तरमा-हभाष्यकारः । द्यौरन्तरीक्षं पृथिवी-चाधस्तयोर्यस्माद्जायतमध्येवैराज रूपेणेतिवा अधोक्षजः ॥

अधोगतिः । स्त्री । नरके ॥

अधोघण्टा । स्त्री । अपामार्गे ॥ इति रत्नमाला ॥

अधोजिह्विका । स्त्री । तालुमूलस्थक्षुद्रजिह्वायाम् ॥

अधोदृष्टि । त्रि । निजविनयख्यापनाय सततमधएवनिरीक्षणकर्त्तरि । विनीते ॥ अधो दृष्टिर्यस्यसः ॥

अधोभुवनम् । न । पाताले । बलिसद्मनि ॥ इत्यमरः ॥ अधस्तनङ्गुल्मञ्च ॥

अधोमर्म । न । गुदे । गुह्यद्वारे ॥ इतिहेमचन्द्रः ॥

अधोमुख । त्रि । अवाङ्मुखे ॥ न क्षत्रविशेषेषु ॥ यथा । मूलाश्लेषाकृत्तिकाश्चविशाखाभरणी तथा । मघापूर्वाचयचैव अधोमुखगणाः स्मृत इति ॥

अधोमुखा । स्त्री । गोजिह्वायाम् ॥

अधोलोक । पुं । पाताले ॥ अधश्चासौ लोकश्च ॥

अधोवायु । पुं । अपानवायौ । पर्दे ॥

अध्यक्ष । पुं । क्षीरिकावृक्षे ॥ त्रि । अधिकृते । राज्ञोहस्त्यश्वरथपदात्यर्थादिस्थानेषुकर्मावेक्षितरिपुरुषे । आयव्ययादिनिरीक्षके ॥ अधिगतोक्ष-व्यवहारम् । प्रादयइतिसमासः ॥ इन्द्रियजन्यज्ञाने । प्रत्यक्षे । नियन्तरि ॥ अधिगतोऽक्षम् । अधिगतोऽक्षेणवा ॥ अक्षेषु व्यवहारेषु आयव्ययचिन्तासु योगक्षेमप्रापणरूपव्यवहारेषुवा अधिकृतोऽध्यक्षः ॥ अधिकृतान्यक्षाण्यस्यवा । अध्यक्ष्णोतिवा । अक्ष्णुव्याप्तौ । पचाद्यच् ॥ अध्यक्षतिवा ॥ अध्यक्षयति प्रत्यक्षयतीति अध्यक्षशब्दात् तत्करोतितदाचष्टइतिणिजन्तात् पचाद्यज्वा ॥

अध्यग्नि । न । अध्यग्निधने ॥ ? । अग्निमध्ये ॥

अध्यग्निधनम् । न । विवाहकालेऽग्निसन्निधौपित्रादिभिर्दत्तधने ॥ यथा । विवाहकालेयत् स्त्रीभ्योदीयतेह्यग्निसन्निधौ । तदध्यग्निकृतसद्भिः स्त्रीधनपरिकीर्त्तितमिति ॥

अध्यण्डा । स्त्री । शूकशिम्बाम् ॥ भूम्यामलक्याम् ॥ अधिकमण्डबीजम-

स्या ॥

अध्यधीन । वि । अत्यन्तपरतन्त्रे । गर्भदासे ॥

अध्ययनम । न । पठने । विधिवद्गुरुमुखादध्यात्मादिविद्यानामक्षरस्वरूपग्रहणे । गुरूच्चारणानूच्चारणे ॥ अधीयते । इङ अध्ययने नित्यमधिपूर्व । वहुलवचनात्कर्मणिल्युट ॥ प्राङमुखत्वादिनियमसहितस्यपुरुषस्य ऋगादेरभ्यासे ॥ अध्ययनलक्षणाप थमासिद्धिस्तारमुच्यते । यस्यशिष्याचार्यसम्बन्धेनसांख्यशास्त्रग्रन्थतोऽर्थतश्चाधीत्यज्ञानमुत्पद्यतेतस्य सा ध्ययनहेतुकासिद्धि. अध्ययनम ॥ किन्तु थाध्ययनेनाचहृढवन्धकरणेच । पठितव्यतदेषाशुमोचयेद्भववन्धनात् ॥ इत्युपदेशोमुमुक्षुषु ॥

अध्यर्द्धम् । वि । सार्द्धे ॥ अधिकमर्द्धंयस्य । अध्यारूढमर्द्धंयस्मिन्वा । प्रादिभ्योधातुजस्येतिसाधु ॥

अध्यवसाय । पुं । निश्चये । इदमित्थमेवेतिविषयपरिच्छेदे । उत्साहे ॥ अध्यवसानम् । षोन्तकर्मणि घञ् । आतोयुक् ॥ अध्यवसायश्चबुद्धिव्यापारोज्ञानम । उपात्तविषयाणामिन्द्रियाणांवृत्तौसत्त्यांबुद्धे. रजस्तमोभिभवेसतिय सत्त्वसमुद्रेक. सोध्यवसाय इतिवृत्तिरितिचाख्यायते ॥ बुद्धौ ॥ क्रियाक्रियावतोरभेदविवक्षया सर्वोव्यवहर्त्ता आलोच्य मत्वा अहमत्राधिकृतइत्यभिमत्य कर्त्तव्यमेतन्मयेत्यध्यवस्यति ततश्च प्रवर्त्तते इति लोकसिद्धम । तत्रकर्त्तव्यमितियोयनिश्चयश्चितिसन्निधावापन्नचैतन्यायाबुद्धे सोध्यवसायोबुद्धेरसाधारणव्यापार ॥

अध्यशनम् । न । अजीर्णापरिभोजने ॥ यथा । अजीर्णेभुज्यतेयत्तुतदध्यशनमुच्यतेइति ॥ अधिकमशनमध्यशनम ॥

अध्यस्त । वि । कृताध्यासे ॥

अध्यात्मम । । । आत्मतत्त्वे ॥ स्वभावोध्यात्ममुच्यते । अस्यार्थः । स्वोभावः स्वरूपमत्यक्चैतन्यम् । आत्मानं कार्यकारणसघातंदेहमधिकृत्यमोक्तृतयावर्त्तमानमध्यात्ममुच्यतेइतिमधुसूदन: ॥ परस्यब्रह्मण:प्रतिदेहमत्त्वगात्मभाव: स्वभावइति स्वोभावं स्वभावोध्यात्ममुच्यतेआत्मानंदेहमधिकृत्यप्रत्यगात्मतयाप्रवृत्त परमार्थब्रह्मावसानवस्तुस्वभावोध्यात्ममुच्यतेअध्यात्मशब्देनाभिधीयतेइतिभाष्यकारा: ॥ स्वस्यैवब्रह्मणएवांशतयाजीवरूपेणाभवनस्वभाव:सएवात्मानंदेहमधि

कृत्यभोक्तृत्वेनवर्त्तमानोऽध्यात्मशब्दे नोच्यतइत्त्यर्थइतिश्रीधरस्वामिनः ॥ आत्मविषयदर्शने ॥ करणग्रामे ॥ आत्मनिइतिविभक्त्यर्थेऽव्ययीभाव । अनश्चेतिटच् । नस्तद्धितइतिटेर्लोप ॥ आत्मनोऽधि आत्मविषयमध्यात्मम् ॥

अध्यात्मज्ञानम् । न । आत्मानमधिकृत्य प्रवृत्ते आत्मानात्मविवेकज्ञाने ॥

अध्यात्मनिरतः । त्रि । परमात्मस्वरूपालोचनतत्परे ॥ अध्यात्मे आत्मज्ञानेनित्यः प विष्टिनः

अध्यात्मयोगः । पुं । विषयेभ्यः प्रतिसंहृत्यचेतस आत्मनि समाधाने ॥

अध्यात्मविद्या । स्त्री । आत्मतत्त्वविद्यायाम ॥

अध्यापकः । त्रि । अध्यापयतरि । उपाध्याये ॥ अध्यापयति । इङ् अध्ययने ण्वुल ॥

अध्यापनम् । न । विप्रस्यासाधारणकर्मविशेषे । ब्रह्मयज्ञे : पाठने । विद्याप्रदाने ॥ अध्यापनं ब्राह्मणस्यवृत्तिर्न बाशब्दमंतरेण पश्चिमाप्नुवन्तिमिथ्याइतिके यट. । अतोब्राह्मणेनावश्यंशब्दाखेयाः । नचान्तरेणव्याकरणलघुनोपायेन शब्दाः शक्याविज्ञातुमितिभाष्यम् ॥

अध्यापयिता । त्रि । पाठगुरौ । अध्यापनकर्त्तरि । उपाध्याये ॥

अध्यापित । त्रि । पाठिते ॥

अध्याय । पुं । अध्ययने ॥ प्रकरणे । पुराणपरिच्छेदे ॥ यथा । सर्गोवर्गः परिच्छेदोद्घाताध्यायाङ्कसङ्ग्रहाः । उच्छ्वास परिवर्त्तश्चपटलः काण्डमेवच ॥ स्थानप्रकरणञ्चैवपर्वोह्लासान्हिकानिच ॥ पुराणादौपरिच्छेदा अनेकेपरिकीर्त्तिताइति ॥ त्रि । ध्यानशून्ये ॥ अधीयतेऽसौ । इङ० । नित्यमधिपूर्व. । इङश्चेतिघञ् ॥ यद्वा । अधीयतेऽस्मिन् । अध्यायन्यायेति घञन्तोनिपात्यते ॥

अध्यारूढम् । त्रि । समारूढे । कृतारोहणे ॥ अभ्यधिके ॥ अध्याङ्पूर्वाद्रुहेर्गत्यर्थाकर्मकेत्यादिनाकर्त्तरिकर्मणिवाक्तः । ढत्वधत्वष्टुत्वढलोपदीर्घाः ॥

अध्यारोपः । पुं । असर्पभूतायांरज्जौ सर्पारोपवत् वस्तुन्यवस्त्वारोपे । सच्चिदानन्दानन्ताद्वयब्रह्मण्यज्ञानादिसकलजडसमूहस्यारोपणे ॥

अध्यावाहनिकम् । न । पितृगृहात्भर्तृगृहंनीयमानयास्त्रियालब्धधने ॥ यथा । यत्पुनर्लभतेनारीनीयमाना हिपैतृकात् । अध्यावाहनिकनामतत्स्त्रीधनमुदाहृतमितिकात्यायनः ॥ पैतृकादित्येकशेषात्पितृमातृकुला

तयन्नभतेधनमितितदर्थः ॥

अध्याशनम् । न । भुक्तस्योपरिभूयोभोजने ॥ यथा । राजन्नध्याशन त्वाज्यत्वाज्यतुविषमाशनम् । त्यजेद्विरुद्धमाहार तत्सर्वंदोषकारकमिति ॥

अध्यासः । पुं । स्मृतिरूपेपरचपूर्वदृष्टावभासे । यत्रयदध्यासस्तद्विवेकाग्रहणनिबन्धने भ्रमे । यत्रयदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनायाम् । अन्यत्रान्यधर्मावभासे । वस्तुन्यन्यबुद्धौ । अविद्यायाम् ॥ आसनम् । आसउपवेशने । घञ् । अधिउपरिआसः ॥

अध्यासितः । त्रि । निषेविते ॥ अधिष्ठिते ॥

अध्याहरणम् । न । ऊहने । तर्कणे ॥ अध्याङ् पूर्वाद्धरतेर्ल्युट् ॥

अध्याहारः । पुं । तर्के । ऊहे । आकांक्षासमापकपदानुसन्धाने ॥ अध्याहरणम । अध्याङ् पूर्वाद्धृञोभावेघञ् ॥ अपूर्वोत्प्रेक्षणे ॥

अध्युषितः । त्रि । उषिते । वसाइति भाषा ॥

अध्युष्ट. । त्रि । सार्द्धत्रिसङ्ख्यायाम् ॥

अध्युष्ट्रः । पुं । उष्ट्रयुक्तरथे ॥ उष्ट्रवाह्यप्रेङ्खायाम् ॥ इतिहारावली ॥

अध्यूढः । पुं । ईश्वरे ॥ त्रि । अधिकसमृद्धे । सम्रुद्धे ॥ उपरिभावेनस्थिते ॥ यथा । स्तूत्यध्यूढसीमेति ॥

अध्यूढा । स्त्री । कृतसापत्निकायाम् । कृताऽनेकविवाहस्यप्रागूढयोषिति ॥ अधिउपरिऊढमुद्वहनमस्या ॥

अध्येषणम । न । गुर्वादेराराध्यस्यप्रवर्त्तनायाम् । प्रार्थनायाम् ॥ समानस्याधिकस्यवाऽऽऋत्विगाचार्यादेः प्रवर्त्तनायाम् ॥

अध्येषणा । स्त्री । याचने ॥ निकृष्टस्योत्कृष्टप्रतिप्रवर्त्तनायाम् । गुर्वादेःप्रार्थनयाक्वचिदर्थेनियोजनेइतिस्वामी । सनौ । गुर्वाद्याराधने ॥ अध्येषणाम् । इषेरनिच्छार्थस्येतियुच् ॥

अध्येष्यमाण. । त्रि । अध्ययनकरिष्यमाणे ॥

अध्रुवः । त्रि । अनित्ये ॥ अस्थिरे । फलजनकतानियमशून्ये ॥ नध्रुवः ॥

अध्वग' । पुं । पथिके ॥ सूर्ये ॥ उष्ट्रे ॥ खेसरे । खच्चरइतिभाषा प्रसिद्धे ॥ अध्वानगच्छतीतिविग्रहे अन्तात्यन्ताध्वदूरपारसर्वानन्तेषुडः इत्यादिनागमेर्डः प्रत्ययः ॥

अध्वगभोग्यः । पुं । आम्रातकवृक्षे ॥

अध्वगा । स्त्री । गङ्गायाम् ॥ टाप् ॥ इति त्रिकाण्डशेष. ॥

अध्वजा । स्त्री । स्वर्णुलीवृक्षे । हेमपुष्प्याम् ॥

अध्वा । पुं । मार्गे । गन्तव्यत्वेनलोकप्रसिद्धेक्रोशयोजनादौनियतपरिमा

णे ॥ सस्थाने ॥ अवस्कन्दे ॥ काले ॥ अन्तिवचम्। अदभचणे। अदेर्ड्चेविक्वनिप् घस्चान्तादेश: ॥

अध्वनीन: । वि । पथिके ॥ अध्वानमलगच्छति । अध्वनीयत्खाविति ख. । आत्माध्वानौखे इतिटिलोपोन ॥

अध्वन्य: । वि । पथिके ॥ अध्वानमलगच्छति । अध्वनीयतखाविति यत् । येचाभावकर्मणोरितिटिलोपोन ॥

अध्वर । पुं । क्रतौ ॥ सावधाने ॥ वसुभेदे ॥ नध्वरति । ध्वृकौटिल्ये । अच ,॥ अध्वानराति वा । आतोनुपतिक: ॥

अध्वरथ: । पुं । परिघातिके । अध्वगमनापयुक्तरथे ॥ इतिहेमचन्द्र: ॥ दूते । अध्वनेरथ: । अध्वारथोऽस्यवा ॥

अध्वर्यु: ॥ पुं । यजुर्वेदर्त्विजि ॥ अध्वरमिच्छति । सुपद्मातक्यच् । कव्यध्वरपृतनस्यर्चिलोपः । क्याच्छन्दसी त्युः ॥ मध्वरति । ध्वृकौटिल्यौ। विच् । अध्वरयाति । यौतिवा मिवलद्रवा दित्वाडडुर्वा ॥

अध्वर्यु: । स्त्री । अध्वर्युशाखाध्येत्र्याम् ॥ अध्वर्युशाखाध्येतृवशोद्भवायाम् ॥ योपधस्वादूङ्न ॥

अध्वशल्य: । पुं । अपामार्गे ॥

अध्वान्तशावव: । पुं । स्योनाकद्रौ ॥

अन: । पुं । प्राणे ॥ अनितिति । अनप्राणने । अच् ॥

अनशुमत्फला । स्त्री । कदल्याम् ॥ इति जटाधर: ॥

अनचम् । वि । अचशून्ये ॥ अन्धे । अचिविहीने ॥

अनचरम् । न । दुर्वचने । गुणाक्षेपकदोषोत्थवाक्ये । अवाच्ये । निन्दावचने । दुर्वचसि । गाली इतिभाषायाम् ॥ नसन्त्यस्तान्यचराणियस्मिन । अचराणामप्राशस्त्यचार्थद्वारकम् ॥

अनचि । न । मन्दाच्चिण ॥ वि । तद्वति ॥

अनगार' । पुं । ऋषौ । मुनौ ॥ वि । अगारशून्ये ॥

अनग्नि: । पुं । श्रौतस्मार्त्तकर्महीने ॥ यथा । अनग्निराश्रमा:कलाविति । अग्निसंस्काररहितेपरिव्राजके । अथ शौनक: । सर्वसङ्गनिवृत्तस्यध्यानयोगरतस्यच । नतस्यदहनकार्यंनैवपिण्डोदकक्रिया ॥ निदध्यातप्रणवेनैर्वविल्लेभिच्चो: कलेवरम । प्रोचणखननञ्चैवसर्वंतेनैवकारयेदिति ॥

अनग्निका । स्त्री । दृष्टरजस्कायांकन्यायाम् ॥

अनघ: । वि । निर्मले ॥ अपापे ॥ मनोज्ञे । कृष्णे ॥ अदु:खे ॥ अव्यसने ॥ अघनविद्यतेयस्य ॥

अनङ्गम । न । आकाशे ॥ मनसि ॥ पुं । मदने ॥ नास्ति अङ्गमस्य । नाङ्गत्वा नमस्मादितिवा ॥ दशास्यावस्था भवन्ति । तद्यथा । दृङ्मनस्सङ्गसंकल्पाजागरः कृशतारतिः । ह्रीत्यागोन्मादमूर्च्छाश्चइत्यनङ्गदशादशेति ॥ त्रि । अङ्गरहिते ॥

अनङ्गकम् । न । मनसि ॥

अनङ्गशेखरः । पुं । दण्डकछन्दोभेदे ॥ यथा । प्रतापतापतापितप्रतीपभूपते शरन्निशानिशाकरप्रभालसद्यशोधन स्वदानवारिधारयादरिद्रतानलज्वलद्द्विजालितापहारकस्वभावशोभन । भुजङ्गमङ्गलोदितः प्रसङ्गसङ्गतेःसभान्तरेनिवेदितोविधायकःकविप्रिय. क्रमाल्लघौगुरौयथेच्छयानिवेशिते भवेदनङ्गशेखरः सुधांशुशेखरप्रियइति ॥

अनङ्गासुहृत् । पुं । शिवे॥इतिहेमचन्द्रः॥

अनच्छ. । त्रि । कलुषे ॥ भिन्नोऽच्छात् । नञ्तत्पुरुषः । नलोपोनञः । तस्मान्नुडचि ॥

अनञ्जनम् । न । व्योम्नि ॥ तत्त्वे ॥ पुं । नारायणे ॥ त्रि । अञ्जनशून्ये ॥ नास्तिअञ्जनमस्मिन् ॥

अनडुज्जिह्वा । स्त्री । गोजिह्वाख्ये ॥

अनड्वान् । पुं । षण्डे । वृषभे ॥ अनः

शकटंवहति । वहप्रापणे । अनसिवहेःक्विप् अनसोडश्चेतिक्विप् अनसोडान्तादेशश्च । यजादित्वात सम्प्रसारणम ॥

अनडुही । स्त्री । सौरभेय्याम् । गौरादित्वान्ङीष् ॥

अनड्वाही । स्त्री । सौरभेय्याम् ॥ आमनडुहः स्त्रियांवावक्तव्यइतिअनडुहआमिगौरादित्वान्ङीष् ॥

अनतिरेकः । पुं । अभेदे ॥

अनद्यः । पुं । गौरसर्षपे ॥ इतिराजनिर्घण्टः ॥

अनध्यक्षः । त्रि । अध्यक्षभिन्ने ॥ अप्रत्यक्षे ॥

अनध्यायः । पुं । अनध्ययने ॥ सचद्विविधोनित्योनैमित्तिकश्चेति । तथाहि । चातुर्मास्यद्वितीयासुमन्वादिषुयुगादिषु । अष्टकासुचसङ्क्रान्तौशयनेर्बोधनेत्वरे. ॥ अनध्यायंप्रकुर्वीततथासोपपदासुच ॥ नैमित्तिकास्तु । निर्घातभूकम्पोल्कादिपतनादिसर्वाङ्गतेषु । अग्न्युत्पाते । अकालवृष्टौ । सन्ध्यागर्जने । चौरैरुपद्रुतेग्रामे । सङ्ग्रामे । सोमसूर्यग्रहे । दिग्दाहे । विद्युत्सन्निपाते । इत्यादिषुनैमित्तिकानध्यायः । छिद्राण्येतानिविप्राणांयेऽनध्यायाःप्रकीर्त्तिताः । छिद्रेभ्यःसुव्रतिब्रह्म

प्राञ्चयोन यदर्जितम् ॥ तत्कालेतस्य रत्नासिश्रियं ब्रह्मयशोवलम । सर्वं प्राद्रायगच्छन्ति वर्जयन्तीप्सितफलमिति ॥

अननुगतम् । न । आत्मतत्त्वे ॥ त्रि । अनुगतभिन्ने ॥

अननुभाषणम । न । विज्ञातस्यपरिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् । पश्य ०५।५९ ॥

अनन्तः । पुं । केशवे ॥ यथा । गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः । नान्तगुणानांगच्छन्तितेनाऽनन्तोयमव्ययइतिविष्णुपुराणम् ॥ अन्तःसीमाद्यन्तानविद्यतेयस्य ॥ शेषे । नागजातिराजे ॥ वलदेवे ॥ सिन्दुवारवृक्षे ॥ अनन्तजिति ॥ त्रि । अनवधौ ॥ अपरिच्छिन्ने । अविनाशिनि । व्यापित्वान्नित्यत्वात्सर्वात्मत्वात्देशकालवस्तुपरिच्छेदशून्ये परमेश्वरे ॥ अविद्यमानोऽन्तः कार्योयस्य ॥ अखण्डे ॥ न । सुरवर्त्मनि ॥ अभ्रके ॥ नास्त्यन्तोयस्य ॥

अनन्तकरः । त्रि । असमाप्तिकरे ॥ अनन्तकरोति । दिवाविभेतिटः ॥

अनन्तजित् । पुं । बुद्धगणभेदे । जिनानांचतुर्विंशत्यन्तर्गतचतुर्दशजिने ॥ अनन्ते ॥ अनन्तंजयतिजेष्यतिवा । जिजये । क्विप् । तुक् ॥ विष्णौ ॥ अनन्तान्यसंख्यातानिभूतानि युद्धक्रीडादिषुसर्वचाचिन्त्यशक्तितयाजयतीति ॥

अनन्ततीर्थकृत । पुं । अनन्तजिति । बुद्धगणप्रभेदे ॥ इतिहेमचन्द्रः ॥

अनन्तमात्रः । त्रि । एतावत्त्वमस्येतिपरिच्छेत्तुमशक्ये ॥ मात्रापरिच्छित्तिःसा अनन्तायस्य ॥

अनन्तमूर्त्तिः । पुं । सर्वात्मनि । परमात्मनि । अखण्डैकरसे ॥ अनन्तादेशतः कालतोवस्तुतःस्वरूपतस्तावत्परिच्छेदरहितामूर्त्तिः स्वभावोयस्य ॥

अनन्तमूलः । पुं । करालाख्यौषधौ ॥ सुगन्धायाम् । स्थूलग्रन्थौ । वचाप्रभेदे ॥

अनन्तरम् । न । पराचीनकाले । पश्चादर्थे ॥ त्रि । चिदेकरसेपरमात्मनि ॥ नयस्यअन्तरंभिन्नजातीयकिञ्चिद्विद्यतेस ॥ छिद्रशून्ये ॥ सन्निहिते । अव्यवहिते । ससत्ते ॥ अन्तरछिद्रतच्छून्यम् ॥

अनन्तरितम् । त्रि । अव्यवहिते ॥

अनन्तरूपः । पुं । भगवति । विश्वरूपे ॥ त्रि । अनन्तरूपविशिष्टे ॥ अनन्तानि रूपाणियस्य ॥

अनन्तलोकः । पुं । स्वर्गलोके । अनन्तश्चासौलोकश्च ॥

अनन्तविजयः । पुं । युधिष्ठिरस्यशङ्खे ॥ अनन्तोविजयोयस्मिन् ॥

अनन्तवीर्यः । पुं । अर्हद्भेदे । भाविकल्पेजिनानांचतुर्विंशत्यन्तर्गतेत्रयोविंशेतीर्थकरजिने ॥ त्रि । दृढवीर्ये । अनन्तप्रभावे ॥ अनन्तानिवीर्याणियस्मिन् । अनन्तवीर्यंयस्यवा ॥

अनन्तव्रतम् । न । भाद्रशुक्लचतुर्दशीकर्त्तव्येऽनन्तदेवस्यव्रते ॥

अनन्तशीर्षा । स्त्री । वासुकेः पत्न्याम् ॥

अनन्ता । स्त्री । विशल्यायाम् । शाकभेदे ॥ शारिवायाम् ॥ दुरालभायाम् ॥ दूर्वयोः ॥ कणायाम् ॥ पथ्यायाम् ॥ पार्वत्याम् ॥ आमलक्याम् ॥ विश्वम्भरायाम् ॥ गुडूच्याम् ॥ अग्निमन्थवृक्षे ॥ यवासे ॥ वृद्धयवान्तरे । तारायाम् ॥ नास्त्यन्तोऽस्याः ॥ अनन्तः शेषोस्तिधारकोऽस्याः अर्शआद्यच् ॥

अनन्तात्मा । पुं । नारायणे ॥ देशतः कालतोवस्तुतश्चापरिच्छिन्नस्वरूपत्वात् अनन्तः आत्माअस्य ॥

अनन्तिका । स्त्री । माघोर्जमाधवेषाणांपूर्णमासीषु ॥

अनन्तेशः । पुं । हरे ॥

अनन्दः । त्रि । अनानन्दे । असुखे ॥ औपनिषदोयम् ॥

अनन्यः । त्रि । सर्वभोगनिस्पृहे । सर्वाद्वैतदर्शिनि । अहमेवभगवान्वासुदेवः सर्वात्मा न मद्व्यतिरिक्तंकिञ्चिदस्तीतिज्ञानवतिब्रह्मात्मैक्यनिष्ठे । अपृथग्दर्शिनि ॥ नविद्यतेऽन्योविषयोयस्य यस्मिन्वा । अन्योभेददृष्टिविषयोनविद्यतेयस्यवा । नविद्यते स्वेष्टविनाऽन्यदालम्बनयस्येतिवा ॥ अद्वितीये । एकाकिनि ॥

अनन्यगतिकः । त्रि । एकाश्रये । गत्यन्तररहिते ॥ यथा । अनन्यगतिकेजनेविगतपातकेचातकेयथाबचितथा कुरुप्रियतथापिनान्यभजे इत्युद्भटः ॥

अनन्यचेताः । त्रि । तदेकचित्ते ॥ नअन्यचेताः ॥

अनन्यजः । पुं । कामे ॥ नास्त्यन्ययस्मात्अनन्योविष्णुः । ततोजातः ॥ मनसोऽन्यस्मान्नजायते इतिवा । त्रि । अनन्यभवे ॥

अनन्यभवः । त्रि । अन्यस्यासाध्ये ॥ अन्यस्यनभवतीति तथा । पचाद्यजन्तोत्तरपदेननञ्समासः ॥

अनन्यभावः । त्रि । एकान्तभक्ते ॥ नविद्यतेअन्यस्मिन भावो यस्य ॥

अनन्यवृत्तिः । त्रि । एकाग्रे । एकताने ॥ इत्यमरः ॥ नअन्यावृत्तिरस्य ॥

अनन्वक् । त्रि । अननुगते ॥ अनुअञ्चतीत्यन्वक् । नअन्वक् अनन्वक् ॥

अनन्वय । पुं ।अर्थालङ्कारविशेषे ॥ यथा । उपमानोपमेयत्वे एकस्यैवैकवाक्यगे । अनन्वय ॥ उपमानान्तरसम्बन्धाभावोऽनन्वय. । यथा । नकेवलंभातिनितान्तकान्तिर्नितम्बिनी सैवनितम्बिनीव । यावद्विलासायुधलास्यवासास्ते तद्विलासाइवतद्विलासाः॥ अत्रएवकारोभिन्नक्रमः । सानितम्बिन्येवकेवलनितम्बिनीवनितान्तकान्तिभातीति न यावत्अपित्वन्यथं'।ते अनुभवैकगोचरास्तस्याविलासास्तद्विलासाइवभान्तीति वचनविपरिणामेनान्वयः । कीदृशाः। विलासायुधस्यकामस्यलास्योल्लस्यंतस्यवासानिवासभूताः। नितम्बिनीसैवनितम्बिनीवतन्मात्रनितम्बिनीसदृशीतिवार्थः । तेनस्फुटतयाव्यक्त्यैक्यलाभः। एवञ्चतत्रैवतदुपमा नाऽन्येतीत्यनन्वयोऽलङ्कारः । तत्फलञ्च निरुपमत्वबोधः । इतिकाव्यप्रकाशोदाहरणस्यार्थः ॥

अनपदेशः । पु । असाधके ॥

अनपरम् । त्रि । पश्चाङ्गाविकार्यसम्बन्धविधुरे पत्थगभिन्नेब्रह्मणि ॥ अपरंकार्यंनविद्यतेयस्यततअकार्य्यमिति यावत् ॥ इतरशून्ये ॥

अनपवर्गवीर्यः । त्रि । अक्षीणप्रभावे ॥

अनपायी । त्रि । अपायविधुरे । अनश्वरे ॥ निश्चले ॥

अनपेक्षः । त्रि । निरपेक्षे । सर्वेषभोगोपकरणेषुयदृच्छोपनीतेष्वपिविःस्पृहे ॥ अपेक्षावर्जिते । हेये ॥

अनभिज्ञः । त्रि । अविदुषि । मूर्खे ॥ न अभिज्ञ. ॥ यथा । धिक्त्वांचूततरोपरापरपरिज्ञानाऽनभिज्ञोभवानिति॥

अनभियुक्तः । त्रि । अनादृते ॥ असम्मते ॥

अनभिलाषः । पुं । अरुचौ ॥ अनिच्छायाम् ॥

अनभिव्यक्तिः । स्त्री । अनुद्भूतरूपवत्त्वेन अव्याकृते ॥

अनभिष्वङ्गः । त्रि । पुत्रादौप्रीतिहीने ॥ अन्यस्मिन्सुखिनिदुःखिनिवाऽहमेवसुखीदुःखीचेतिअनन्यभावनया प्रीत्यतिशयोऽभिष्वङ्गस्तद्रहिते ॥

अनभ्युदितम् । त्रि ।अनभिप्रकाशिते ॥

अनम. । पुं । द्विजे । ब्राह्मणे ॥ इतित्रिकाण्डशेष. ॥

अनमितम्पचः । त्रि । कृपणे ॥ नमितम्पचोऽमितम्पचः । तद्भिन्नोऽनमितम्पचः ॥

अनम्बरः । पुं । बौद्धविशेषे ॥ इतिसिद्धान्तशिरोमणौगोलाध्यायः ॥

अनयः । पुं । अशुभदैवे ॥ विपदि ॥ व्य

सने ॥ अनीतौ । द्यूतविद्यांप्रसक्तग तौ । तेषामप्रदक्षिणगमने ॥ ननय नम् अनेनवा । णीञ्प्रापणे । एरच् । विरोधेनञ् ॥ अयातशुभावहवि-धेरन्य' ॥

अनर्गलम् । त्रि । प्रतिबन्धकरहिते । निरावाधे ॥ नविद्यते अर्गलंयस्मिन् ॥

अनर्घः । त्रि । अमूल्ये ॥

अनर्थ' । पुं । हरौ ॥ नविद्यतेअर्थः प्रयोजनमस्य आप्तकामत्वात् ॥ त्रि । अर्थिनःप्रतिकूले ॥ यथा । अर्थमनर्थं भावयनित्यंनास्तिततःसुखलेशः सत्यम् । पुत्रादपिधनभाजांभीतिः सर्वत्रैषाविहितारीतिरितिमोहमुद्गर' ॥ नञर्थः ॥ अर्थरहिते ॥

अनर्थकम् । न । प्रलापे । समुदायार्थरहितसार्थवाक्ये । असद्वाक्ये ॥ त्रि । व्यर्थे ॥ नञर्थोयस्य । अर्थान्नञरत्युर. प्रभृतिषुपाठान्नित्यंकप्समासान्तः ॥

अनर्थमूलम् । न । आत्माज्ञाने ॥ यथा । आत्माज्ञानमनर्थानांमूललोकेपिनेतरत् । स्वपराज्ञमप्याप्यायुध्यम्प्रियतएवहीति ॥

अनर्थान्तरम् । न । अभेदे ॥ एकार्थे ॥

अनर्थी । त्रि । निस्पृहे ॥

अनलः । पुं । वन्हौ ॥ नविद्यते अलं पर्याप्तिर्यस्येत्यनलः ॥ वसुभेदे ॥ नला

भावे ॥ कृत्तिकानक्षत्रे ॥ भृषु ॥ चित्रके ॥ रक्तचित्रके ॥ भल्लातके ॥ पित्ते ॥ अनित्यनेन । अनप्राणने । हृष्मादित्वात्कलच् ॥ ५० वत्सरे ॥ यथा । दुर्भिक्षंजायतेघोरंधान्यौषधिमपीडनम् । अनलेचसमाख्यातंनात्रकार्याविचारणेति॥ भगवतिवासुदेवे॥अलनम् अलः॥अलेर्भूषणाद्यर्थाद्भावेघञ्।संज्ञापूर्वकत्वान्नवृद्धिः। घञर्थेकोवा । अलः पर्याप्तिः शक्तिसम्पदौपरिच्छित्तिरियत्तासानविद्यतेऽस्यत्यनल' ॥

अनलदः । पुं । जले ॥ अनलं सन्तापंद्यतिखण्डयति इतिविग्रहः ॥

अनलनामा । पुं । चित्रके ॥

अनलप्रभा । स्त्री । ज्योतिष्मतीलतायाम् ॥

अनलप्रिया । स्त्री । अग्नायाम् ॥ अनलस्यप्रिया ॥

अनलिः । पुं । मुनिद्रुमे । वकवृक्षे ॥ इति त्रिकाण्डशेषः ॥

अनल्प' । त्रि । बहुषु ॥

अनवः । त्रि । प्राचीने ॥ ननवः ॥

अनवधानम् । न । अमनोयोगे ॥ प्रमादे ॥ त्रि । तद्विशिष्टे ॥ नअवधानमस्य ॥

अनवधानता । स्त्री । प्रमादे । अविमृष्ट

त्त्वे ॥ नञ्अवधानमस्य । तस्यभावः । तल् ॥ यथा । कर्त्तव्याकरणं यत्रसमर्थस्य कस्यचिद्भवेत् । उच्यतेह्वितयंतत्रप्रमादोऽनवधानतेतिशब्दरत्नावली ॥

अनवनः । त्रि । अरक्षणे । हन्तरि ॥ अवतेः कर्त्तरिल्युट् । न अवनंरक्षणंयस्मात् ॥

अनवमः । त्रि । समाने । सदृशे ॥ नञ्अवमः ॥ नवमादन्यस्मिन् ॥ ननवमः ॥

अनवरः । त्रि । प्रधाने । श्रेष्ठे । अकनिष्ठे ॥ नञ्अवरः ॥

अनवरतम् । न । अविरते । निरन्तरे ॥ उत्कृष्टे ॥ नास्ति अवरतंयत्र । क्रियाविशेषणत्वेऽस्यक्लीवत्वम् । द्रव्यविशेषणेतुत्रिलिङ्गत्वम् ॥

अनवरार्द्धः । त्रि । मुख्ये ॥ अवरस्मिन्नर्द्धे भवः । अर्द्धाद्यत् । परावराधमोत्तमपूर्वाच्च । नञ्अवरार्द्धः । नञितिसमासः ॥

अनवलोभनम् । न । सीमन्तोन्नयनानन्तरं चतुर्थमासिकर्त्तव्येसंस्कारविशेषे ॥ चतुर्थेऽनवलोभनमित्याश्वलायनः ॥

अनवसरः । त्रि । निरवकाशे ॥ पुं । अवसरस्याभावे ॥

अनवस्करम् । त्रि । निश्शोध्ये । निर्मले । अपनीतमले ॥ नावस्करोत्र ॥

अनवस्थः । त्रि । अवस्थितिरहिते ॥ नअवस्थाप्रतिष्ठायस्यसः ॥

अनवस्था । स्त्री । तर्कविशेषे ॥ तस्यलक्षणं यथा । उपपाद्योपपादकयोरविश्रान्ति रितिमीमांसकाः ॥ अव्यवस्थितपरम्परारोपाधीनानिष्टप्रसङ्गः ॥ यथा । यदिघटत्वघटजन्यत्वव्याप्यं स्यात् कपालसमवेतत्वव्याप्यंनस्यात् ॥ स्थित्यभावे ॥

अनवस्थानम् । न । अव्यवस्थाने ॥ पुं । वायौ । पवने ॥ त्रि । चञ्चले ॥ नञ्अवस्थानंयस्य ॥

अनवस्थितः । त्रि । अव्यवस्थिते ॥

अनवस्थितत्वम् । न । लब्धायामपिसमाधिभूमौप्रयत्नशैथिल्याच्चित्तस्यतत्राप्रतिष्ठितत्वे ॥

अनवस्थितिः । स्त्री । चापले ॥ मात्सर्यद्वेषरागादेश्चापलन्त्वनवस्थितिः ॥ नञ्अवस्थितिः ॥

अनशनम् । न । उपवासे ॥ कामानशने ॥ त्रि । तद्वति ॥ नञ्अशनं भक्षणंयस्मिन् यस्यवातत् ॥

अनश्नन् । त्रि । अभुञ्जाने ॥

अनश्वरः । त्रि । शाश्वते ॥ ननश्वरः ॥

अनः । न । शकटे ॥ मातरि ॥ ओदने ॥ प्राणिजन्मनि ॥ अनितिचोत्करोति । अनप्राणने । असुन् ॥

अनसूया । स्त्री । अत्रेःपत्न्याम् । कर्द्दमुने कन्यायाम् ॥ त्रि । असूयाशून्ये ॥ अभ्यालच्चणंयथा । नगुणानगुणिनोहन्तिस्तौतिमन्दगुणानपि । नान्यदोषेषुरमतेसानसूयाप्रकीर्त्तितेति वृहस्पतिः ॥

अनसूयुः । त्रि । अनिन्दके ॥ सन्तःप्रणयिवाक्यानिगृह्णन्तिह्यनसूयवइतिभट्टपादाः ॥

अनहंवादी । त्रि । गर्वोक्तिरहिते ॥ यः कर्त्ताहमितिवदनशीलो न भवतिसः ॥

अनहङ्कारः । त्रि । अहङ्कारविधुरे ॥

अनहङ्कृतिः । स्त्री । गर्वाभावे । अशौचे ॥ इतित्रिकाण्डशेषः ॥

अनाकारः । त्रि । निराकृतौ । निराकारे ॥

अनाकुलम् । त्रि । अव्यग्रमनसि । एकाग्रमनसि ॥ स्थिरे । एकाग्रे ॥ असङ्कीर्णे ॥ नञाकुलम् ॥

अनाक्रान्तः । त्रि । अपराजिते ॥ नञाक्रान्तः ॥

अनाक्रान्ता । स्त्री । कण्टकार्याम ॥ न आक्रान्ता ॥

अनागतः । त्रि । वर्त्तमानप्रागभावप्रतियोगिनिकाले । भविष्यति ॥ अनायाते । असम्पस्थिते ॥ अज्ञाते ॥ यथा । अनागतादिलिङ्गेननस्यादनुमितिस्तदेतिकारिकावली ॥ न आगतः ॥

अनागतार्त्तवा । स्त्री । अरजस्कस्त्रियाम । नग्निकायाम् ॥ अनागतमार्त्तवंरजोऽस्याः ॥

अनाचारः । पुं । कदाचारे । श्रुतिस्मृतिविरुद्धकर्मकरणे ॥ सर्वदेशेष्वनाचारः पथितान्मूलवर्णाम् । त्रि । तद्विशिष्टे ॥

अनातपः । पुं । छायायाम् । रौद्राभावे ॥

अनात्मा । पुं । शरीरादौ ॥ यथा । अप्राप्तः प्राप्यतेयोयमप्यक्तस्त्यज्यतेतथा । जानीयात्तमनात्मानंबुद्ध्यान्तवपुरादिकमिति ॥

अनात्म्यः । त्रि । रागादिदोषरहिते ॥ आत्मनिमनसिभवम् रागादि । तद्रहितः ॥

अनाथः । त्रि । स्वतन्त्रे । प्रभुहीने ॥ न विद्यतेनाथोयस्य ॥

अनादरः । पु । परिभवे । तिरस्कृतौ ॥ नञादरः ॥

अनादिः । पु । परमेश्वरे ॥ चतुर्वक्त्रेब्रह्मणि ॥ त्रि । आदिरहिते ॥ नविद्यते आदिःकारणंयस्यसः ॥ यथा । जीवईशोविशुद्धाचितत्तेषांभेदःपरस्परम । अविद्यातच्चितोर्योगः षडस्माकमना

द्वयः ॥ इतिवेदान्तरहस्यम ॥

अनादित्वम् । न । उत्पत्तिमत्त्वेसति सहेतुत्वेसतिकेनाप्यविदितमूलकारणत्वे ॥ भावेत्वः ॥

अनादिनिधनः । त्रि । आद्यन्तशून्ये षड्भावविकारवर्जिते परमेश्वरे ॥ आदिर्जन्मनिधनंविनाशः । आदिश्चनिधनञ्च आदिनिधने जन्मविनाशौत द्वयंनविद्यतेयस्यसः ॥

अनाहतम् । त्रि । अवज्ञाते । कृततिरस्कारे ॥ नञाहतम् ॥

अनापन्नः । त्रि । अप्राप्ते ॥ नञापन्न. ॥

अनामकम् । न । अर्शोरोगे ॥ पुं । मलमासे ॥ अप्रशस्तंनामाऽस्य ॥

अनामयम् । ा । न । आरोग्ये ॥ अविद्यातत्कार्यात्मकरोगरहिते मोक्षाख्ये पुरुषार्थे ॥ आत्मरूपे ॥ अस्तिजायते वर्द्धतेइत्त्यादिषड्भावविकारशून्यमात्मरूपम तेषांविकाराणां देहोपाधिनिष्ठत्वात् आत्मनश्चदेहाभावात्तद्विकाररहितमनामयमात्मैवेत्यर्थः ॥ आमयस्याऽभावः । अर्थाभावे ऽव्ययीभावः ॥ त्रि । तद्विशिष्टे ॥ अनामयमस्त्वस्य । अच् ॥

अनामयावी । त्रि । व्याधिविवर्जिते । हीरामणी ॥ नआमयावी ॥

अनामा । स्त्री । उपकनिष्ठाङ्गुलौ ॥ न नामग्रहणयोग्यमस्याः । ब्रह्मणोऽनयाशिरश्छेदनात् । अतएवास्यांपवित्रीक्रियते । डाप् ॥

अनामिका । स्त्री । अनामायाम् ॥ अनामैव । स्वार्थेकः । प्रत्ययस्थादितीत्वम् ॥

अनायत्तः । त्रि । अनधीने । अवशीभूते ॥ यथा । एतावज्जन्मसाफल्यं यदनायत्तवृत्तितेति ॥

अनायस्तः । त्रि । आयासहीने ॥

अनायासः । पुं । अक्लेशे । यत्नाभावे ॥ अस्यलक्षणन्तु । शरीरंपीड्यते येन सुशुभेनापि कर्मणा । अत्यन्तंतन्न कुर्वीतअनायासः सउच्यतइत्त्येकादशीतत्त्वम् ॥ यथा । अनायासेनमरणांविनादैन्येनजीवनम् । अनाराधितगोविन्दचरणस्यकथंभवेदिति ॥

अनायासकृतम् । त्रि । विनायत्नकृते ॥ न । फाण्टे ॥ अनायासेनकृतम् ॥

अनारतम् । न । सन्तते ॥ त्रि । तद्युक्ते ॥ आङ्पूर्वोरमिर्विरामे । अविद्यमानमारतंयस्मिन् ॥ क्रियाविशेषणत्वे क्लीवत्वम् । द्रव्यविशेषणेतु त्रिलिङ्गत्वम् ॥

अनारम्भणम् । त्रि । निरालम्बे ॥

अनारम्भः । पुं । अननुष्ठाने ॥ नञारम्भः ॥

अनार्जवः । पुं । रोगे ॥ ऋजुत्वाभावे॥ त्रि । तद्वति ॥

अनार्त्तवम् । न । पौषादिमासचतुष्टये वर्षाभवेजले ॥ यथा । अनार्त्तवप्रमुंचन्तिवारिवारिधरास्तुयत् । तन्नि दोषायसर्वेषां देहिनांपरिकीर्त्तितमिति ॥ ऋतौभवम् आर्त्तवम् । नआर्त्तवम् ॥

अनार्य्यः । त्रि । दुर्जने । दुःशीले ॥ नआर्य्यः ॥

अनार्य्यकम् । न । अगुरुकाष्ठे ॥ इतिराजनिर्घण्टः ॥

अनार्य्यजम् । न । जोङ्गके ॥ इतिहेमचन्द्रः ॥ त्रि । नीचजाते ॥

अनार्य्यजुष्टम । त्रि । मुमुक्षुभिरसेविते ॥ अनार्य्यजुष्टम ॥

अनार्य्यतिक्तः । पुं । भूनिम्बे । चिरातिक्ते ॥ अनार्यप्रियत्वात्तैतिक्तश्च शाकपार्थिवादिः ॥

अनाविद्धः । त्रि । अनभिभूते ॥ नआविद्धः ॥

अनाविल । त्रि । निर्म्मले ॥ नआविलः ॥

अनावृतः । त्रि । प्रथमे ॥ आवरणवर्जिते ॥

अनावृष्टिः । स्त्री । वर्षणाभावे । ईतिविशेषे ॥

अनाशकम् । न । कामानशने ॥ ननुभोजननिवृत्तिरनाशकम् भोजननिवृत्तौम्रियतएवेति तपसानाशकेनेत्यत्रन्त्यभाष्यम् ॥

अनाशकायनम् । न । उपवासपरायणत्वे ॥

अनाशी । पुं । अपरिच्छिन्ने । आत्मनि ॥

अनाश्रितः । त्रि । अनपेक्ष्यमाणे । फलाभिसन्धिरहिते ॥ नआश्रितः ॥ आश्रयप्राप्तिरहिते ॥

अनाश्वान् । त्रि । अशनमकुर्वाणे ॥ उपेयिवाननाश्वाननूचानश्चेतिनञ्पूर्वादश्नातेःक्वसुरिटोभावश्चनिपात्यते । धृतजपधृतेरनाशुषइतिभारविः ॥

अनासिकः । त्रि । नासिकारहिते । विरूपे ॥

अनास्था । स्त्री । अनादरे ॥ आस्थाभावे ॥

अनाहतम् । न । षट्चक्रान्तर्गतहृदयस्थेद्वादशदले चतुर्थचक्रे ॥ यथा । शब्दब्रह्ममयशब्दानाहततत्रदृश्यते । अनाहताख्यतत्पद्मंमुनिभिःपरिकीर्त्तितम् । आनन्दसदनंतत्तुपुरुषाधिष्ठितंपरमितिदेवीभागवतम् ॥ अनाहतोनामताडनंविनाजायमानःशब्दः ।

सोनाहतःशब्दोयस्मिंस्तच्छब्दानाह
तम्। वा हिताग्न्यादित्वात्साधु॥ पु
रुषाधिष्ठितमरुद्राधिष्ठितम्॥ अनाह
तशब्दोमध्यमावाणीरूपोज्ञेयः॥ चि।
छेदोभोगःचालनञ्चहननम् तद्रहि
तेवस्त्रे। नूतनवस्त्रे॥ आघातरहिते॥
अगुणिताङ्के॥ आहन्यतेस्मक्तः॥ न
आहतवा॥

अनिकेत'। चि। नियतनिवासरहिते
॥ नास्तिनिकेतोऽस्य॥

अनिक्षुः। पुं। इक्षुतुल्यायाम्। खाक्-
डेति आनाखुइतिच गैाडख्याते॥ न-
इक्षु'। सादृश्येनञ्॥

अनिगीर्णः। त्रि। अनुक्ते॥ विषस्यानि
गीर्णस्येतिसाहित्यदर्पणम्॥

अनिङ्गनम्। त्रि। अचले। निर्वातप्र-
दीपकल्पे॥.

अनित्यः। चि। अध्रुवे। विनाशिनि।
बाधयोग्ये॥ व्यक्ते। कालाद्यवच्छिन्ने।
नश्यस्यतीतिलोकागमयोर्व्यवहार-
योग्ये॥ ननित्यः॥ यथा। धर्मोनि
त्यःसुखदुःखेत्वनित्येजीवोनित्योहे
तुरस्याप्यनित्यः॥ इतिभारतेभार-
तसाविची॥

अनिद्रः। पुं। लयावस्थया स्पर्शशून्ये पर
मात्मनि॥ चि। निद्राशून्ये॥

अनिभृतः। चि। चपले। अविनीते॥
ननिभृत.॥

अनिमिष.। पुं। स्त्री। सुरे॥ मत्स्ये॥ पुं
। विष्णौ॥ अलुप्तदृष्टित्वात्॥ काले
॥ ननिमिषति। मिषस्पेषणे।,इगु
पधेतिकः। नञ्समासः॥

अनिमिषक्षेत्रम्। न। नैमिषारण्ये॥

अनिमिषाचार्य.। पुं। गुरौ। बृहस्प
तौ॥अनिमिषाणांदेवानामाचार्यः॥

अनिमेषः। पुं। देवे॥ अविद्यमानोनि
मेषोऽस्य॥ मत्स्ये॥

अनियत.। चि। अनैकान्तिके। अनि
त्ये। अस्थायिनि॥ ननियतः॥

अनियन्त्रितः। त्रि। उच्छृङ्खले। उ
द्दामे॥

अनिरुक्त.। चि। वाचामगोचरे॥

अनिरुद्धः। पुं। कामपुत्रे। मनसोऽधि
ष्ठातरि। उषापतौ॥ न। सन्धाने
। पश्वादिबन्धनरज्जौ॥ त्रि। अप्र
तिरुद्धे॥ चरे॥ ननिरुद्धोऽनिरुद्धः।
युद्धेकेनापिननिरुद्धः॥

अनिरुद्धपथम्। न। व्योम्नि॥ त्रि। अ
वारितपथे॥ अनिरुद्धः रोधशून्यः
पन्थायस्मिन् यस्यवा॥

अनिरुद्धभामिनी। स्त्री। स्वैरिण्याम्॥
वाणकन्यायाम्। उषायाम॥ अनि-
रुद्धाचासैाभामिनी। अनिरुद्धस्यभा
मिनीवा॥

अनिरोध: । पु । अप्रतिबन्धे ॥

अनिर्द्देश्य: । त्रि । निर्द्देष्टुमशक्ये ॥ वच नागोचरेपरमेश्वरे ॥ स्वसंवेद्यत्वात् परस्मैइदंतदितिनिर्द्देष्टुमशक्यत्वात् ॥ ननिर्द्देश्य: ॥ निर्विशेषेसच्चित्सुखमा त्रलक्षणोवस्तुनिधर्मोणासंभावादिद- तदित्यादिसाधारणशब्दे द्रव्यं शुक्ल: पाचकइत्यादिविशेषशब्देश्चनिर्द्देष्टुं शक्यतइत्यनिर्द्देश्य:परमेश्वर: । श्रु- त्यापिजातिगुणक्रियासत्ताभिर्निर्द्दे- ष्टुमशक्यइत्यर्थ: ॥

अनिर्माल्या । स्त्री । लङ्कापिकायाम् ॥ त्रि । निर्माल्यशून्ये ॥

अनिर्वचनीय: । त्रि । निर्वचनायोग्ये । वाक्यागम्ये ॥

अनिर्विण्ण: । त्रि । विषादरहिते ॥ ननि र्विण्ण' । नविद्यते निर्वेदोऽस्यवा ॥ अ विरक्ते ॥

अनिर्विण्णचेता. । त्रि । अविरक्तचित्ते ॥ इहजन्मनिजन्मान्तरेवा अस्मिन्वर्षे वर्षान्तरेवा अवश्यंवासेत्स्यतिकिंत्वर येतिधैर्ययुक्ते ॥ अनिर्विण्णं चेतोयस्य ॥

अनिल: । पुं । वाते ॥ अनन्त्यनेन । अ अप्राणने । सलिकल्यनिमहिभडिभ लिडशण्डिपिण्डितुण्डिकुकिभूभ्यइल च ॥ गणदेवताभेदे ॥ वाता:पंचाश दूनका: ॥ इलति प्रेरणांकरोति इ तिइक: । तद्रहित: ॥ वसुभेदे ॥ स्वा तिनक्षत्रे ॥ त्रि । इलाशून्ये ॥

अनिलघ्नक: । पुं । विभीतकवृक्षे ॥ इति राजनिर्घण्ट: ॥

अनिलबन्धु: । पुं । कृत्तिकायाम् ॥ वन्हौ ॥

अनिलयन: । त्रि । अनाधारे ॥

अनिलसख: । पुं । वन्हौ ॥ अनिलस्य सखा । राजाह: सखिभ्यष्टच् ॥

अनिलान्तक: । पुं । इङ्गुदीवृक्षे ॥

अनिलामय: । पुं । वातरोगे ॥

अनिशम् । न । सदा । सना । अविरते ॥ निशा व्यापाररहितत्वमुपचारात् । नास्तिनिशाऽस्मिन् । क्रियाविशेषण त्वेऽस्यक्लीवत्वम् द्रव्यविशेषणेतुत्रिलि ङ्गत्वम् ॥ रात्रिवर्जिते ॥

अनिशम् । I । सातत्ये ॥

अनिष्टम् । न । प्रतिकूलवेदनीये नार कतिर्यगादिलक्षणे पापफले ॥ अप कारे ॥ नइष्टमितिविग्रह: ॥ त्रि । अ नभिलषिते ॥ यथा । इष्टनाशादनि ष्टाप्ते' करुणाख्योरसोभवेदितिसाहि त्यदर्पण: ॥

अनिष्टा । स्त्री । नागवलायाम् ॥

अनिसृष्ट: । त्रि । अनियुक्ते ॥

अनीक: । पुं । न । रणे ॥ सैन्ये । सेना माने ॥ अनित्यनेन । अनप्राणने ।

अनिङ्कषिभ्यांकिच्चेतिईकन्॥ अनन म्। अनगतौ प्राणनेवा। अनीकाद् यश्चेतिसाधुः॥ अनयनंवा। णीञ्-प्रापणे। बाहुलकात्कक्। नञ्स मासः॥

अनीकस्थः। पुं। रणगते॥ हस्तिशि क्षाविचक्षणे॥ रक्षिवर्गे। राजरक्षि णि॥ चिह्ने॥ वीरमर्द्दलवाद्ये। जय ढक्केतिप्रसिद्धवाद्ये॥ त्रि। सैन्यस्थे॥ अनीकेतिष्ठति। ष्ठा। सुपीतिकः॥

अनीकाधिकृतः। त्रि। सेनापतौ॥

अनीकिनी। स्त्री। सेनायाम्॥ तिसृषुच मूषु। इभाः २१८७। रथाः २१८७। अश्वाः ६५६१। पदातयः १०९३५। एतत्परिमाणविशिष्टसेनाभेदे। स मस्तसंख्यया २१८७० सप्तत्यधिकाष्ट शताधिकसहस्राधिकायुतद्वये॥ अ क्षौहिणीदशमांशेयं संख्या। अनी-कोरणोस्तिप्रयोजनत्वेनयस्याः। इ-निः। ङीप्॥ त्रि। अनीकिनि॥

अनीचदर्शी। पुं। बुद्धभेदे॥

अनीशः। पुं। विष्णौ॥ नविद्यते ईशो नियन्ता स्वामीवास्य॥ ईश्वरभिन्ने॥ प्रवृत्तिनिवृत्त्योरस्वतन्त्रे॥ यथा। अ ज्ञोजन्तुरनीशोयमात्मनः सुखदुःख योः। ईश्वरप्रेरितोगच्छेत्स्वर्गंवाश्व भ्रमेववेतिस्मृतिः॥

अनीशा। स्त्री। दीनभावे॥

अनीश्वरः। त्रि। नास्तिशुभाशुभयोः कर्मणोः फलदातेश्वरइतिवादिनि॥

अनीहः। त्रि। फलाशारहिते॥ निश्चे ष्टे॥ नास्तिईहायस्यसः॥

अनु। अ। हीने॥ सहार्थे॥ पश्चादर्थे ॥ सादृश्ये॥ लक्षणे॥ इत्थंभूताख्या ने॥ भागे॥ वीप्सायाम्॥ अनुक्रमे॥ आयामे॥ समीपे॥ अनिति। अन प्राणने। बाहुलकादुः॥

अनुकः। त्रि। कामिनि। कामयितरि-॥ अनुकामयते। अनुकाभिकेति-साधु'॥

अनुकम्। अ। वितर्के॥

अनुकम्पा। स्त्री। दयायाम्॥ आनृशं स्ये॥ अनुकम्पनम्। कपिकिञ्चल ने। गुरोश्चेत्यः॥

अनुकम्प्यः। त्रि। कृपायोग्ये॥ अनुक म्पितुंयोग्यः। ण्यत्॥

अनुकरणम्। न। अनुकृतौ। सदृशी करणे॥ तद्विविधम्। शब्दानुकरण म् अर्थानुकरणञ्च। यथार्थरहितस्य केवलशब्दस्यसदृशकरणम् तच्छब्दा नुकरणम्। यथार्थविशिष्टस्यसदृशक रणम् तदर्थानुकरणम्। इतिवैया-करणाः॥

अनुकर्षः। पुं। रथाधःस्थदारुणि॥ र

थस्याधस्तनभागे यद्दारुधारणकाष्ठं-
तिष्ठति यतोधस्तकमुपरिपट्टकर्म यच्च
चक्रंतदनुकर्षशब्दवाच्यमित्यर्थ. इ-
तिभरतः॥ अवकर्षणे॥ अनुकृष्यते।
कृषविलेखने। घञ्॥

अनुकर्षणम्। न। आकर्षणे। अवकर्ष
णे॥

अनुकल्पः। पुं। मुख्यकल्पादधमे गौण-
कल्पे। प्रतिनिधौ। गौणविधौ॥ अ
नुहीनःकल्पः। प्रादिसमासः॥ यथा
व्रीहिभिर्यजेतेतिमुख्योविधिः। व्रीह्य
भावेनीवारैर्यजेतेतिगौणोविधिः॥
सशक्तेन नानुष्ठातव्यः। यथा। प्रभुःप्र
थमकल्पस्ययोनुकल्पेनवर्त्तते। नसा
म्परायिकंतस्यदुर्म्मतेर्विद्यतेफलम्॥
इतिमनुः॥

अनुकामीनः। त्रि। कामङ्गामिनि। यथे
ष्टगमनशीले॥ कामस्यसदृशम्। य
थार्थेव्ययीभावः। अनुकामंगामीत्य
र्थे। अवारपारात्यन्तानुकामंगामी-
तिखः॥

अनुकारः। पुं। सुसदृशक्रियायाम्।
अनुहारे॥ अनुकरणम्। सदृशरूप
वेशभाषाद्याविष्करणम्। अनुकृ०।
घञ्॥ उपमायाम्॥ अनुकूलकरणे॥

अनुकूलः। पुं। पतिभेदे॥ अस्यल
क्षणं यथा। सर्वदापराङ्गनापराङ्मु
खत्वे सतिसर्वदास्वजायानुकूलत्वमि
ति॥ त्रि। तत्तदिच्छाचरणशीले।
अनुरक्ते॥ सहाये। सहकारिणि॥
अनुकूलादितिविग्रहः॥

अनुकूलता। स्त्री। दाक्षिण्ये॥ भावे
तल्॥

अनुकूला। स्त्री। स्यादनुकूलाभतनग
णाश्चेदितिलक्षणलक्षितायावृत्तौ॥
यथा। वल्लववेशमुररिपुमूर्त्तिं गोप
मृगाक्षीकृतरतिपूर्त्तिः। वाञ्छति
सिद्धौ प्रणतिपरस्य स्यादनुकूलाजग
तिनकस्येति॥ छन्दोवृत्ते॥

अनुकृतिः। स्त्री। अनुकरणे॥ अनुक
रणम्। कृञ्०। क्तिन्॥

अनुक्रमः। पुं। यथाक्रमे। परिपाट्या
म्॥ अनुक्रमणम्। क्रमुपादविक्षेपे।
घञ्। नोदात्तोपदेशेतिनवृद्धिः॥
अनुक्रमणिकायाम्॥

अनुक्रमणिका। स्त्री। भूमिकायाम्।
ग्रन्थादेर्मुखबन्धे॥ पुराणादेस्तत्तद्विव
रणस्यसंक्षेपेणपुनःकथने॥

अनुक्रमणी। स्त्री। ग्रन्थादेर्मुखबन्धे।
भूमिकायाम्॥

अनुक्रान्तः। त्रि॥ अनुक्रमेणोक्ते॥

अनुक्रियमाणः। त्रि। विडम्बमाने॥

अनुक्रोशः। पुं। दयायाम्॥ यथा। गु
णाधिकान्मुदंलिप्सेदनुक्रोशंगुणाध-

मात् । मैत्रीसमानादन्विच्छेनता पै.परिभूयते इति ॥ अनुक्रोशन्त्यनेन । क्रुशआह्वानेरोदनेच । हलश्चेतिघञ् ॥

अनुगः । त्रि । अनुगते । अन्वचे ॥ अनुगच्छति । गम्लृगतौ । अन्येभ्योपीतिडः ॥

अनुगतः । त्रि । सेवके । अनुगे । पश्चाद्व्याप्ते ॥ नियते ॥ अनुगम्यतेस्म । गम्लृ० । क्त ॥

अनुगमः । पुं । उपसर्पणे ॥ यथा । कृतेतुदीयतेगत्वाचेतायामाहूतायवै । द्वापरेयाचमानायकलौत्वनुगमान्विते ॥ इतिस्मृतिः ॥ पश्चाद्गमने ॥ न्यायमते येनरूपेण तावत्पदार्थग्रहः तद्रूपंतावत्पदार्थानुगमकम् तस्यक्रियायाम् ॥

अनुगमनम् । न । पश्चाद्गमने ॥ सहगमने ॥

अनुगवीनः । पुं । गोपाले ॥ गोःपश्चात् इतिअनुगु । पश्चादर्थेऽव्ययीभावः । गोः पश्चात् पर्याप्तंगच्छतीत्यर्थे अनुग्वलंगामीतिखः ॥

अनुगामी । त्रि । कामगामिनि ॥ पश्चाद्गामिनि ॥ स्त्री । अनुगामिनी ॥

अनुगिरम् । ा । गिरेःसमीपम् । सामीप्येऽव्ययीभाव. । गिरेश्चसेनकस्येति समासान्तष्टच् ॥

अनुग्रहः । पुं । प्रसन्नतायाम् । फलदाने ॥ इष्टसम्पादनेच्छायाम् । अभ्युपपत्तौ । अनिष्टनिवारणपूर्वकेष्टसाधने ॥ यथा । विरूपोन्मत्तनि.स्वानामकृत्वापूर्वकंहियत् । पूरणंदानमानाभ्यामनुग्रहउदाहृतइति ॥ तारकासु ॥ अनुग्रहणम् । ग्रहउपादने । ग्रहवृद्रिश्चयप् ॥

अनुग्राहकः । त्रि । समर्थके ॥ अनुगृह्णातीतिग्रहेर्ण्वुल् ॥

अनुचरः । त्रि । सहाये ॥ दासे । सेवके ॥ अनुचरति । चरगतौ । चरेष्टः॥

अनुचिन्तनम् । न । अनुध्याने ॥

अनुच्छिष्टम् । त्रि । पवित्रे ॥ नउच्छिष्टम् ॥

अनुजः । पुं । कनीयसि । कनिष्ठसोदरे ॥ अनुपश्चाज्जातः । उपसर्गेचसंज्ञायामितिडः ॥ त्रि । पश्चाज्जाते॥ । न । प्रपौण्डरीकनामनिसुगन्धिद्रव्ये ॥

अनुजन्मा । पुं । कनीयसि ॥ अनुपश्चाज्जन्मयस्यस ॥

अनुजा । स्त्री । त्रायमाणायाम् ॥ कनिष्ठायांभगिन्याम् ॥

अनुजाता । स्त्री । कनिष्ठायांभगिन्याम् ॥

अनुजिघृक्षा । स्त्री । अनुग्रहीतुमिच्छा

याम् । ग्रहेःसन्नन्तादप्रत्ययेटाप् ॥

अनुजीवी । चि । सेवके ॥ अनुजीवितुंशील. सुपीतिणिनि. ॥

अनुज्ञा । स्त्री । अनुमती ॥ यथा । नाग्न्योर्नवाञ्चणयोर्नगुरुशिष्ययोरन्तराव्यपेयात् अनुज्ञयातुव्यपेयात् इतितिथ्यादितत्त्वम् ॥ समस्य समंप्रत्युत्कर्षनिकर्षौदासीन्येन प्रवर्त्तनायाम् ॥ अनुज्ञायते इति अनुपूर्वाज्ज्ञानातेरातश्चोपसर्ग इत्यङ् ॥

अनुज्ञातः । चि । अनुमते ॥

अनुज्येष्ठम् । ा । ज्येष्ठानुक्रमेणेत्यर्थे ॥ ज्येष्ठस्य आनुपूर्व्येण । अव्ययंविभक्तीत्यव्ययीभाव ॥

अनुतर्षः । पुं । सुरापानपात्रे ॥ तृष्णायाम् ॥ अभिलाषे ॥ शीधुपाने । सर्के ॥ अनुतर्षणम् । ञितृषापिपासायाम् । घञ् ॥ मद्ये ॥ अनुतृष्यत्य नेन इति ॥

अनुतर्षणम । न । अनुतर्षे ॥ अनुतर्षणम अनेनवा । ञितृषा° । भावेकरणेवाल्युट् ॥

अनुतापः । पुं । पश्चात्तापे ॥ अनुतपनम् । तपसन्तापे । घञ् ॥

अनुत्तमः । चि । वरे । मुख्ये ॥ ईश्वरे ॥ नउत्तमोऽस्मात् ॥ अधमे ॥ नउत्तमः ॥

अनुत्तमाम्भः । न । सांख्यानातुष्टिविशेषे ॥ शब्दादिभोगाभ्यासात प्रवद्धन्त कामाः तेचविषयाप्राप्तौ कामिनंदुन्वन्तीति भोगदोषंभावयतोविषयेपरमेयातुष्टि. साचतुर्थीअनुत्तमाम्भउच्यते ॥

अनुत्तरः । चि । श्रेष्ठे ॥ निरुत्तरे । प्रतिजल्पविवर्जिते ॥ वृष्णे ॥ दक्षिणस्यांदिशि ॥ अधमे । स्थिरे ॥ अनतिशये ॥ उत्तरस्याभाव. उत्तरविरुद्धो वा ॥ नउत्तरोयस्माद्वा ॥

अनुदर्शनम् । न । पुन. पुनरालोचने ॥ अनुवार वारं दर्शनम् ॥

अनुदात्तः । पुं । स्वरभेदे ॥ नीचैरनुदात्त' इतितत्स्वरूपम् ॥ नउदात्त. ॥

अनुदितः । पुं । उदयात् पूर्वमरुणकिरणवतिप्रविरलतारके कालविशेषे ॥ चि । अनुक्ते ॥ अनुत्थिते ॥ नउदितः ॥

अनुद्घात' । चि । प्रतिवन्धनिवृत्तौ ॥ प्रतिघातरहिते ॥

अनुद्दिष्ट. । चि । उद्देशहीने ॥

अनुद्रुत' । चि । अनुगामिनि । अनुगते ॥ न । तालविशेषे ॥ सतुद्रुतार्द्धौ माचाचतुर्थभागोवा । यथा । अर्द्धमाचंद्रुतंज्ञेयंद्रुतार्द्धञ्चाप्यनुद्रुतमिति शब्दरत्नावली ॥

अनुद्विग्नमनाः । त्रि । स्वस्थचित्ते ॥ नउद्विग्नंमनोयस्यसः ॥

अनुद्वेगकरः । त्रि । कस्यचिदप्यदुःखकरे ॥ यथा। अनुद्वेगकरोराजेति।

अनुधावनम् । न । पश्चाद्धावने ॥ अनुसन्धाने ॥ यथा । तस्मिन् कुरङ्गभावाच्चिमुहुश्चित्तंनिवारय । नतन्मनस्तवाधीनं तथातचानुधावनम् ॥ इ कुट्टनट: ॥

अनुध्या । स्त्री । अनुध्याते ॥

अनुध्यानम । न । अनुचिन्तने ॥ अनुग्रहे ॥ आसक्तौ ॥

अनुध्येय. । त्रि । अनुग्राह्ये ॥

अनुनय: । पुं । विनये । प्रणिपाते ॥ सान्त्वने ॥ प्रार्थने ॥ अनुनयनम् । णीञ्° । एरच् ॥

अनुनासिक: । पुं । मुखसहितनासिकयोच्चार्यमाणे वर्णविशेषे॥ त्रि । नासिकामनुगते ॥

अनुनेय: । त्रि । अनुनयार्हे ॥

अनुन्न: । त्रि । अविद्धे ॥ ननुन्न: ॥

अनुपकारी । त्री । प्रत्युपकाराजनके॥ नउपकारी ॥

अनुपथ: । त्रि । अनुवर्त्तिनि ॥ भृत्ये ॥ अनुपश्चात्पन्थायस्य । ऋक्पूरब्धू: पथामानक्षेइत्यः ॥

अनुपदम् । । न । अनुगे ॥ पश्चाद्गमने ॥ पदस्यपश्चात् । पश्चादर्थेऽव्ययीभाव: ॥

अनुपदी । त्रि । अन्वेष्टरि ॥ अनुपदमन्वेष्टा । अनुपदमन्वेष्टेतिसाधु. ॥ अनुपदीगवाम् । गोपदात् पश्चादन्वेषणमगवामेव । तेनहिरण्याद्धावन्वेष्येनभवतीति हरदत्त. ॥ हलायुधस्तुसामान्ये नान्वेषणकर्त्तरीत्याह । खोजी इतिभाषायाम् ॥

अनुपदीना । स्त्री । पन्नध्याम् । पादायामवत्त्यांपादुकायाम् ॥ पदस्यानु । यस्यचायामइत्यव्ययीभाव: । अनुपदंपादायामप्रमाणा बद्धा । अनुपदसर्वैतिख: ॥

अनुपपत्ति: । स्त्री । अभावे ॥ नउपपत्ति: ॥ असङ्गतौ ॥

अनुपम: । त्रि । उत्तमे ॥ नास्तिउपमायस्य ॥

अनुपमा । स्त्री । कुमुदाख्यदिग्गजकरिण्यामित्यमर: ॥ सुमतीकाख्यदिग्गजकरिण्यामितिमेदिनि: ॥ श्रेष्ठत्वान्नास्त्युपमाऽस्य: ॥

अनुपरत: । त्रि । अविरते । सन्तते ॥ नउपरत: ॥

अनुपलब्धि: । स्त्री । प्राप्त्यभावे ॥ ज्ञानाभावे ॥ तत्कारणं यथा। अतिदूरात् सामीप्यादिन्द्रियघातान्मनो ऽन

वस्थानात्। सौक्ष्म्याद्व्यवधानादभि
भवात्समानाभिहाराच्च। ७। उदा
हरणानि यथा। उत्पतन् वियति
पतत्री अतिदूरतया सन्नपिनप्रत्य-
क्षेणोपलभ्यते। लोचनस्थमञ्जनम
तिसामीप्यान्नदृश्यते। बाह्येन्द्रिय
घातोऽन्धत्वबधिरत्वादिस्तस्मात रू
पादयोनेपलभ्यन्ते। अङ्गिकामाद्यु
पहतमना. स्फीतालोकमध्यवर्त्तिन
मिन्द्रियसन्निकृष्टमप्यर्थं मनोनवस्था
नान्नपश्यति। इन्द्रियसन्निकृष्टं प-
रमाण्वादिप्रणिहितमना अपिसौ-
क्ष्म्यान्नपश्यति। कुड्यादिव्यवहितं-
राजदारादिव्यवधानान्नपश्यति। अ
हनिसौरीभिर्भाभिरभिभूतंग्रहनक्ष
त्रमण्डलंनपश्यति। तोयदमुक्तज-
लबिन्दूनजलाशये समानाभिहारा-
न्नपश्यति। चकारोऽनुक्तसमुच्चयार्थः
। तेनानुद्भवोपिसङ्गृहीतः। तद्यथा
। क्षीराद्यवस्थायां दध्याद्यनुद्भवान्न
दृश्यते॥

अनुपशयः। त्रि। असात्म्ये॥

अनुपसंहारी। पुं। हेत्वाभासविशेषे॥
सच अन्वयव्यतिरेकदृष्टान्तरहितो-
नुपसंहारी। यथा। सर्वमनित्यं प्र
मेयत्वादिति। अत्रसर्वस्यापिपक्षत्वा
त् दृष्टान्तोनास्ति। नउपसंहारी॥

अनुपस्कृतम्। त्रि। अविकृते॥ अवि-
गर्हिते॥

अनुपहितः। त्रि। समष्ट्यज्ञानतदुप
हितेश्वरयोराश्रये स्वमहिम्नप्रतिष्ठि
ते अक्षरशब्दवाच्ये चिन्मात्रे॥

अनुपाकृतः। पुं। मन्त्रैः पशौ. स्पर्शन
मुपाकरणं तद्रहितेपशौ॥

अनुपात.। पुं। त्रैराशिकगणिते॥
पश्चात्पतने॥ पूर्वाङ्कपातानुसारेण
पराङ्कपाते॥

अनुपातकम्। न। पञ्चविंशत्प्रकारभि
न्नेमहापातक सदृशपापविशेषे॥

अनुपात्ययः। पुं। क्रमप्राप्तस्यानतिपा
ते। पर्याये॥

अनुपानम्। न। भेषजाङ्गे पेयविशेषे।
भेषजेनसह ततपश्चाद्वा यत्पीयते
तस्मिन्॥ यथा। अनुपानविशेषेणक
रोतिविविधान्गुणानिति वैद्यकम्
॥ समीपस्थोदके॥ अनुगतंपानम्॥

अनुपुष्पः। पुं। शरे॥ इतिशब्दचन्द्रिका॥

अनुपूर्वशः। ।। क्रमेणेत्यर्थे॥

अनुप्रेतः। त्रि। मामुपनयस्वेत्युपनय
नार्थमनुपसन्ने। अननुगते। एका
किनि॥

अनुप्रविष्टः। त्रि। विषयविकारविज्ञाने.
प्रच्छन्ने॥

अनुप्रभूतः। त्रि। अनुव्याप्ते॥

अनुप्रासः । पुं । शब्दालङ्कारभेदे ॥ स यथा । वर्णसाम्यमनुप्रासः। स्वरवैसादृश्येपिव्यञ्जनसदृशत्त्व वर्णसाम्यम् । रसाद्यनुगतः प्रकृष्टोन्यासोऽनुप्रासः ॥ उदाहरण यथा । आदायवकुलगन्धानन्धीकुर्वन पदेपदे भ्रमरान् । अयमेतिमन्दमन्दं कावेरीवारिपावन.पवनइति ॥ छेकवृत्तिगतोद्विधा । छेकाःविदग्धा.।वृत्तिर्नियतवर्णगतोरसविषयोव्यापारः । गतइतिछेकानुप्रासोवृत्त्यनुप्रासश्चेतितद्भेदौ ॥

अनुप्लवः । त्रि । सहाये ॥ अनुगे ॥ अनुपश्चात्प्लवते। प्लुङ्गतौ। पचाद्यच् ॥

अनुबन्धः । पुं । बन्धे ॥ दोषोत्पादे । इच्छातोऽपराधकरणे ॥ यथा । अनुबन्धमवस्थाचदृष्ट्वादण्ड निपातयेदिति ॥ वातादिदोषाणाम प्राधान्ये ॥ उच्चरितप्रध्वंसिनि । विनश्वरे ॥ प्रकृतिप्रत्ययागमादेशानांयः कार्यार्थमासज्यते मचप्रयोगासमवायी सोऽनुबन्धउच्यते॥मुख्यानुयायिनिशिशौ। मुखंपित्रादिकमनुयातियः शिशुस्तस्मिन् ॥ प्रकृतस्यानुवर्त्तने । प्रकृतस्यप्रारब्धस्यअनुवर्त्तने। सम्बन्धे॥ पश्चाद्भाव्यशुभपरिणामे॥ अधिकारिविषयसम्बन्धप्रयोजनेषु ॥ लेशे ॥

फलसाधने॥ अनुबध्यते । बन्धबन्धने । घञ् ॥

अनुबन्धी । त्रि । सहचारिणि॥ अविच्छेदेनव्यापके ॥ अनुबध्नातीति ॥

अनुबन्धी । स्त्री । हिक्कायाम॥ तृष्णायाम् ॥

अनुबोधः । पुं । प्रबोधने । गतगन्धस्य पुनःप्रयत्नेनोद्बोधने ॥ यथा । कस्तूरिकादिनामश्चादेः ॥ पश्चाद्बोधे ॥ अनुबोधनम । बुधअवगमने । भावेघञ् ॥

अनुब्राह्मणी । त्रि । अनुब्राह्मणाध्ययनकर्त्तरि ॥ ब्राह्मणसदृशोग्रन्थोऽनुब्राह्मणम् । तदधीते । अनुब्राह्मणादिनिः ।

अनुभवः । पुं । स्मृतिभिन्नज्ञाने ॥ सद्विविधः यथार्थोऽयथार्थश्चेति । तद्वति तत्प्रकारकानुभवो यथार्थोनुभवः । सैवप्रमेत्युच्यते । तदभाववति तत् प्रकारकश्चायथार्थानुभवः॥ उपलम्भे। उपलब्धौ। साक्षात्कारे । साक्षात् स्वरूपबोधे ॥ अस्यमाहात्म्यन्तु । यस्यानुभवपर्यन्ता दृष्टिस्तत्त्वे प्रवर्त्तते । तद्दृष्टिगोचराःसर्वेमुच्यन्तेसर्वकिल्बिषैरिति ॥ प्रत्यक्षादौ ॥ अनुभवनम् । भू० । ऋदोरप् ॥

अनुभविता । त्रि । चेतने ॥

अनुभावः । पुं । कोषदण्डजतेजसि । प्रभावे । निश्चये ॥ सतांमतिनिश्चये । सतामभिप्रायस्यनिश्चये ॥ भावबोधके रोमांचादौ । कटाक्ष भुजाक्षेप प्रभृतिषु ॥ यथा । भावंमनोगतसाक्षात्स्वहेतुंव्यञ्जयन्तिये । तेऽनुभावा इतिख्याताभ्रूविक्षेपस्मितादय इतिर सार्णवसुधाकरः ॥ भवनंभावः । श्रिणीभुवइतिघञ् । अनुगतोभावोऽनुभावः।प्रादयोगताद्यर्थेइतिसमासः। सामर्थ्ये । अनुभावयति । भुवःपचाद्यच् ॥

अनुभाव्यः । त्रि । अनुभवविषये ॥

अनुभूतः । त्रि । परिचिते ॥ यथा । जयतिश्रीगुरुर्देवोयत्प्रसादादिदंजगत् । अनुभूतंमयासम्यग्दृष्टंनसौरमणपीति ॥

अनुभूतिः । स्त्री । ज्ञानभेदे । अनुभवे ॥ यथा।अनुभूतिंविनामूढोवृथाब्रह्मणिमोदते । प्रतिबिम्बितशाखाग्रफलास्वादनमोदवदिति ॥ प्रत्यक्षानुमित्युपमितिशब्दभेदात्साचतुर्विधाभवति ॥

अनुमतः। त्रि। कृतोल्लाहे । अनुज्ञाते॥

अनुमतकर्म्मकारी । त्रि । आज्ञयाकार्यकर्त्तरि ॥ लिखितपत्राद्यनुसारेणकर्मकर्त्तरि ॥

अनुमतिः । स्त्री । कलोनेन्दुपूर्णिमायाम । अङ्गायाक्तनयायाम् ॥ उदयकालेप्रतिपद्योगात्कलाहीनेचन्द्रेसत्यनुमतिशब्दवाच्यापूर्णिमाभवति ॥ अनुज्ञायाम् । राजादेःसम्मतौ । तांविनायागादिक्रियायाअनिष्पत्तेः ॥ सम्मतिपूर्वकाज्ञायाम् ॥ अनुमन्यतेक्तिच् ॥

अनुमन्ता । त्रि । यदनुमतिंविनाकर्त्तुं नशक्यतेतस्मिन् । अनुमतिदातरि ॥ कार्यकारणप्रवृत्तिषुस्वयमप्रवृत्तोपिपरमात्मा प्रवृत्तइवसन्निधिसत्तामात्रेणतदनुकूलत्वात्स्वव्यापारेषुप्रवृत्तान्देहेन्द्रियादीन्ननिवारयतिकदाचिदपि तत्साक्षिभूतःपुरुषः साक्षीअनुमन्ता ॥

अनुमरणम् । न । अनुसंस्थायाम् । पश्चान्मरणे । भर्त्तरिमृतेतत्पादुकादिकमुरसिनिधायज्वलच्चितारोहणपूर्वकं ब्राह्मणीभिन्नस्त्रिया मरणे ॥ यथा । देशान्तरमृतेपत्यौसाध्वीतत्पादुकाद्वयम् । निधायोरसिसंशुद्धाप्रविशेज्जातवेदसमितिब्रह्मपुराणम् ॥ पृथक्चितिंसमारुह्यनविप्रागन्तुमर्हतीतिस्मृतिः ॥ तवस्वरूपारमणीजगच्छाच्छन्नविग्रहा । मोहाद्भर्त्तुश्चितारोहाद्भवेन्नरकगामिनी-

तिसहमरणानुमरणयोःसामान्यतो निषेधकमागमवचनम् ॥ सहमरणे॥

अनुमा । स्त्री । अनुमितौ । अनुमाने॥

अनुमानम् । न । कल्पने ॥ सांख्यस्मृति परिकल्पिते प्रधाने ॥ स्मृतौ ॥ अनुमीयते श्रुतिरनयेतिव्युत्पत्त्या स्मृतेर पिप्रामाण्यम प्रतिस्मपेक्षत्वात ॥ अनुमितिकरणे ॥ लिङ्गलिङ्गिपूर्वके । पूर्ववत् शेषवत् सामान्यतो दृष्टञ्चेति त्रिविधे अनुमितिसाधने ॥ अत्रोक्तं भाष्यकारैः।सत्सुचवेदान्तवाक्येषुज गतो जन्मादिकारणवादिषु तदर्थ ग्रहणदार्ढ्यायानुमानमपिवेदान्तवाक्या विरोधिभवन् ननिवार्यतइति ॥

अनुमानोक्ति । स्त्री । तर्के ॥ अनुमाने स्यउक्तिः ॥

अनुमितिः । स्त्री । अनुभवविशेषे । पक्षधर्मताज्ञानजन्यज्ञाने । व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञाने ॥ यथा । धूमदर्शनाद्वह्निमान्पर्वतइत्याकारज्ञानमनुमितिः । अस्याव्यापारकारणपरामर्शः । अस्याःकरणंव्याप्तिज्ञानम् ॥ अनुमानम् । डुमिञप्रक्षेपणे क्तिन् ॥

अनुमेयः । त्रि । अनुमातुंयोग्ये ॥

अनुमोदः । पुं । एवमस्त्वित्यकारे अनुमोदने ॥

अनुमोदनम् । न । अनुमोदे ॥

अनुमोदितः । त्रि । अनुज्ञाते । कृतानुमोदने । अनुमते ॥ यथा । भवता यद्व्यवसितंतन्मेसाध्वनुमोदितमिति श्रीभागवतम् ॥

अनुयाजः । पुं । यज्ञाङ्गे ॥ पश्चानुयाजाः । यजेर्घञि प्रयाजानुयाजौयज्ञाङ्गइति कुत्वाभावोनिपातसिद्धः ॥

अनुयायी । त्रि । सदृशे ॥ पश्चाद्गामिनि ॥

अनुयुक्तः । पुं । भृतकाध्येतरि ॥ इति महाभारतम् ॥

अनुयोक्ता । पुं । भृतकाध्यापके ॥ इति महाभारतम् ॥

अनुयोगः । पुं । प्रश्ने ॥ अनुयोजनम् । युजेर्घञ् ॥

अनुयोगकृत् । पुं । आचार्ये ॥ इतिहेमचन्द्रः ॥

अनुयोजनम् । न । प्रश्ने ॥ इतिहेमचन्द्रः ॥

अनुरक्तः । त्रि । अनुरागवति ॥ यथा । अनुरक्तोगुणान्ब्रूतेविरक्तोदूषणानि चेति ॥ अनुकूले ॥

अनुरञ्जनम् । न । अनुरागे । हर्षजनने ॥

अनुरतः । त्रि । अनुरागविशिष्टे । प्रीते । अनुरक्ते ॥ अनुपूर्वात् रमेः क-

र्त्तरि क्तः॥

अनुरतिः । स्त्री । अनुरागे ॥

अनुरहसम् । न । एकान्ते । रहोऽनु । अनुगतंरहः । अनुगतं रहोस्मिन्वा । अन्ववतप्ताद्रहसइत्यच् ॥

अनुरागः । पुं । अन्योन्यप्रीतौ । स्नेहे ॥ अनुगतोरागः ॥

अनुरागी । त्रि । अनुरक्ते ॥ अनरागोऽस्यास्तिअस्मिन् वा । मतुवर्थेइनिः ॥

अनुराधा । स्त्री । सप्तदशनक्षत्रे ॥ अत्रजातस्यफलंयथा । सत्कीर्त्तिकान्तिश्चसदोत्सवःस्याज्जेतारिपूणाञ्चकलाप्रवीणः । स्यात्सप्तवेयस्यकिलानुराधासम्पत्प्रमादौविविधौ भवेतामितिकोष्ठीप्रदीपः ॥ राधामनुगता ॥

अनुरुद्धः । त्रि । निबद्धे ॥

अनुरूपम् । त्रि । सदृशे ॥ योग्ये ॥

अनुरूपम् । अ । सदृशे । प्रतिरूपे ॥ रूपस्ययोग्यम् । यथार्थेयोग्यतायामव्ययं विभक्तीत्यव्ययीभावः । अव्ययीभावश्चेत्यव्ययत्वम् ॥

अनुरोधः । पुं । अनुवृत्तौ । अनुवर्त्तने । आराध्यादेरिष्टसम्पादने ॥ अनुरोधनम् । रुधिर्आवरणे । घञ् ॥

अनुलब्धः । त्रि । अनुविक्ते ॥

अनुलापः । पुं । मुहुर्भाषणे । वारंवारं भाषणे ॥ अनुलपनम् लपव्यक्तायांवा

चि । भावे घञ् ॥

अनुलिप्तः । त्रि । रञ्जिते ॥ कृतानुलेपने ॥

अनुलेपः । पुं । चन्दनादौ ॥ अनुलेपनम् । लिपेर्घञ् ॥

अनुलेपनम् । न । चन्दनादौ ॥ गात्रेगन्धद्रव्यादिलेपने ॥ अनुलिप्यते । लिपउपदेहे । कर्मणिल्युट् ॥

अनुलोमः । पुं । यथाक्रमे ॥ अच्प्रत्यन्ववेत्यच् ॥

अनुलोमजः । त्रि । अनुलोमजाते । अप्रतिलोमजे ॥ यथा । ब्राह्मणात् क्षत्रियागर्भजातः । क्षत्रियात् वैश्यायां जातइत्यादिज्ञेयम् ॥

अनुवत्सरः । पुं । सम्वत्सरे ॥

अनुवर्त्तनम् । न । अनुरोधे । आराध्यादीष्टसम्पादने ॥ अनुगम्यवर्त्तनमाराधनम् ॥ अनुवृत्तौ ॥

अनुवर्त्तितः । त्रि । सेविते ॥

अनुवर्त्ती । त्रि । अनुकूले ॥

अनुवाकः । पुं । ग्रन्थे । अध्यीतऋग्जाते ॥ ऋग्यजुःसमूहे ॥ अनूच्यते । वचपरिभाषणे । घञ् । चजोरिति कुत्वम् ॥

अनुवाक्या । स्त्री । पुरास्तुपाज्यर्थादेवताह्वान्यामृचि ॥ अनुउच्यते । वचेर्ऋहलोर्ण्यत् । चजोरितिकुत्वम् ॥

अनुवि | अनुश

। शब्दसत्त्वात् वचोशब्दसंज्ञाया-
मितिनप्रतिषेध. ॥

अनुवातः । पुं । वायुविशेषे । यःशिष्य
देशाद्गुरुदेशमागच्छतिवायुः सोनु
वातइत्युच्यते ॥

अनुवादः । पुं । प्राप्तस्यपुनः कथने ।
ज्ञातार्थस्यप्रतिपादने।।सहस्योपन्या
से ॥ प्रमाणान्तरावगतस्यार्थस्यशब्दे
नोक्तिरनुवादः ॥ ज्ञातस्यकथने । य
था । अग्निर्हिमस्यभेषजमित्यादिः ।
हिमविरोधित्वस्यार्थे।प्रत्यक्षावगत-
त्वात् । अनुवदनम् । वदअभिवादन
स्तुत्योः । घञ् । कुत्सितेर्थे । विधि
विहितस्यानुवचनमनुवादः । न्या°
२ । ६५ ॥

अनुवासः । पुं । सौरभ्ये ॥

अनुवासनम् । न । स्नेहने ॥ धूपने ॥
वैद्यकोक्तस्नेहवस्तौ ॥ यथा । विधाव
स्तिः परिक्षेयानिरूहश्चानुवासनम्
। कषाय।यैर्निरूहः स्यात्स्नेहाद्यैर-
नुवासनमिति । वासच्छेदेचु° ।
अनुपूर्वात्-भावेल्युट् ॥

अनुविन्नः । त्रि । अनुलब्धे ।

अनुविद्धः । त्रि । खचिते ॥

अनुर्विषमम् । त्रि । अनुगते ॥

अनुविहितः । त्रि । अनुवर्त्तिनि ॥ कर्त्त
रिक्तः ॥

अनुवृत्तः । त्रि । प्रविष्टे । व्याप्ते । पा
लिते ॥ अनुवृत्तिविशिष्टे ॥

अनुवृत्तिः । स्त्री । प्रवाहरूपेणानुगतौ॥
अनुरोधे ॥ आनुकूल्ये । सेवायाम् ॥
अन्वये ॥ अनुवर्त्ततेव्याप्नोति । वृतु
वर्त्तने । क्तिच् ॥ अनुवर्त्तनंवाक्तिन् ॥

अनुवेश्यः । त्रि । तदन्तर्गृहवासिनि ॥

अनुव्रजनम् । न । अनुव्रज्यायाम् । गृहा
गतानांशिष्टानांगमनसमयेकियद्दू
रपर्यन्तंपश्चाद्गमनरूपे शिष्टाचारे ॥
यथा । आयान्तमग्रतोगच्छेत् गच्छ
न्तमनुव्रजेदितिनिगमकल्पद्रुमत
न्त्रम् ॥

अनुव्रज्या । स्त्री । गच्छतोनुगमने । अ
नुव्रजने ॥ अनुव्रजनम् । अनुव्रज्या-
। क्यप् ॥

अनुशयः । पुं । द्वेषे ॥ पश्चात्तापे ॥ अ
नुबन्धे ॥ दीर्घद्वेषे ॥ शास्त्रोक्तकर्मणि
॥ अनुशयनम् अनेनवा । शीङ्स्वप्ने
। एरच् पुंसीतिघोवा ॥

अनुशयी । त्रि । चन्द्रस्थलस्खलितेऽवरो
हतिशीह्र्यादिदेहसंश्लिष्टे वेदविहित
कर्मानुष्ठातरि कर्मिणि ॥ जीवे ॥ अ
नुक्षणवत्प्रणामैश्वरणमूलेशेते इति
तथा ॥

अनुशयी । स्त्री । क्षुद्ररोगान्तर्गतपा
दरोगविशेषे ॥ तल्लक्षणादिर्यथा ॥

गम्भीरामल्पशोथांचसवर्णामुपरि-
स्थिताम् । पादस्यानुशयींतान्तुविद्या
दन्तः प्रपाकिनीम् । हरेदनुशयींवै
वः क्रियया श्लेष्मविद्रधेरितिभावप्रका
शः ।

अनुशरः । पुं । राक्षसे । अनुशृणाति । शृहिंसायाम । अनुपूर्वः । ऋदोरप् ।

अनुशायी । पुं । जीवे ।

अनुशासनम् । न । अनुशिष्टौ । आज्ञा याम । उपदेशे । नियोगवचने । अनु
शिष्यन्ते व्याख्यायते लक्षणादिर्येन ।
शासुअनुशिष्टौ अनुपूर्वः । ल्युट् । अनु
त्पादने । यथा । शब्दानामनुशासन
म । अनुशिष्यन्तेअसाधुशब्देभ्यः शाव
भज्य वोध्यन्तेयेनेतिकरणेल्युट् ।

अनशासितः । त्रि । अनुशिष्टे । अनुशि क्षिते ।

अनुशासिता । त्रि । नियन्तरि । प्रशासि तरि ।

अनुशिष्टः । त्रि । ज्ञापिते । शिक्षिते । आशसे ।

अनुशिष्टिः । स्त्री । कर्त्तव्याकर्त्तव्ययो
र्विविच्यज्ञापने । अनुशासने । अनुशा
सनम । शासु० । स्त्रियांक्तिन् नाकादि
भ्यः । शास इदङहलोः ।

अनुशीलनम् । न । आलोचने । मुहुः सेवने । पुनःपुनरभ्यासे ।

अनुशोचनम् । न । शोके । शुचशोके अनुपूर्वः । ल्युट् ।

अनुश्रवः । पुं । वेदे । गुरुमुखादनुश्रूय
तएव न केनचित्क्रियते अनुपूर्वाच्छृ
णोतेः ऋदोरविच्यप् ।

अनुषक् । ? । अनुमाने ।

अनुषक्तः । त्रि । अनुविषक्ते । अनुगते । अनुसज्यतेस्म । षञ्ज० । क्तः ।

अनुषङ्गः । पुं । करुणायाम । इतिहला
युधः । एकत्रान्वितार्थानामपरत्रान्व
ये । आसक्तौ । न्याये । उपनयस्य श
ब्दस्यनिगमने । यथा । वन्हिव्याप्य
मवांश्चायमतस्माद्वन्हिमानिति । अ
नुषज्यतेऽच । षञ्जसङ्गे । हलश्चेतिघञ्
। अन्योद्देशप्रवृत्तावन्यस्यापिसिद्धौ ।

अनुषङ्गि । त्रि । व्यापके ।

अनुष्टुप् । स्त्री । सरस्वत्याम् । अष्टाक्ष
रायांवृत्तौ । यथा । पञ्चमोलोगु
षष्ठं सप्तमन्तुसमेलगुः । पादेष्विविश्व
मेगश्चेत्श्लोकोऽनुष्टुप् चकीर्तितः ।
क्वचितपादेतुविषमेपञ्चमावाद्यो
पिला: । तेक्वापिसर्वेगाःश्लोकेक्वचि
त् केवलपञ्चमइति । अनुस्तुभ्नाति ।
स्तुन्भु० । क्विप् ।

अनुष्ठानम् । न । क्रियारम्भे । करणे । अनुष्ठीयतेयत् । ष्ठा० । ल्युट् ।

अनुष्ठितः । त्रि । कृते ।

अनुष्णः । त्रि । अलसे । मन्दे । शीतले ॥ उष्णोदन्यः उष्णादन्यः ॥ न । उत्पले ॥

अनुष्णवल्लिका । स्त्री । नीलदूर्वायाम् ॥

अनुसंस्था । स्त्री । अनुमरणे ॥

अनुसञ्चरन् । त्रि । गमनागमने कुर्वति ॥

अनुसन्ततम् । त्रि । अनुस्यूते । अनुगते ॥

अनुसन्धानम् । न । अन्वेषणे ॥ अनुसन्धीयते । डुधाञ्० । ल्युट् ॥

अनुसमुद्रम् । । । समुद्रस्यसमीपे ॥ समुद्रंसमया । अनुर्यत्समयेत्यव्ययीभावः ॥

अनुसरणम् । न । अनुवृत्तौ ॥ अनुपूर्वात् सर्त्तेर्ल्युट् ॥

अनुसर्गः । पुं । प्रतिसर्गे ॥ ब्रह्मादीनामनन्तरोत्पत्तिरूपे ॥

अनुसवम् । न । त्रिकाले ॥

अनुसवनम् । । । सर्वदार्थे ॥

अनुसारः । पुं । पूर्वानुरूपे । अनुसरणे । अनुमाने । अनुसर्त्तव्यम् ॥

अनुसारी । त्रि । अनुसरणकर्त्तर्य्याम् ॥

अनुसृतः । त्रि । उपासिते ॥

अनुस्मृतिः । स्त्री । ध्याने ॥ अनुस्मरणम् । स्मृ० । क्तिन् ॥

अनुस्यूतम् । त्रि । अनुसन्तते ॥ अनुसीव्यते स्म । षिवु० । क्तः । च्छ्वोरिच्यूठ् ॥

अनुस्वारः । पुं । अं इति अचः परे विन्दौ ॥ स्वरति । स्वृशब्दोपतापयोः । अच् । ततः पश्चाद्वा । स्वरणम् भावे घञ्वा ॥ अनुगतःस्वारः । स्वरमनुभवतिवा ॥

अनुहारः । पुं । अनुकारे । सदृशकरणे । सदृशरूपवेशभाषाद्याविष्करणे ॥ अनुहरणम् । हृञ्हरणे । घञ् । उपमायाम् ॥

अनूकः । पुं । गतजन्मनि ॥ न । कुले ॥ शीले ॥ अनूच्यति । उचसमवाये । इगुपधेतिकः । न्यंक्वादिः ॥ त्रिपुरुषानूकमित्यत्रतु त्रीन्पुरुषाननुकायति । कैशब्दे । आतश्चेतिकः । अन्येषामपीतिदीर्घः ॥

अनूचानः । पुं । साङ्गवेदविचक्षणे ॥ अनुवचनसमर्थे ॥ यथा । अनूचानः पण्डितम्मन्यकानोयेविद्ययाहन्तियशः परेषाम् । तस्मान्तवन्तस्तुभवन्ति लोकान्नचाख्यस्य ह्युपकर्षंददातीति-महाभारतम् ॥ त्रि । सविनये । विनीते ॥ अन्ववोचत् । वेदस्यानुवचनंकृतवान्वा । उपेयिवानिति साधुः ॥

अनूचानमानी । त्रि । अनूचानंमन्ये । अनूचानमात्मानंमन्यते इत्यर्थमणीनः । आत्ममाने खश्चेतिणच्चेणिनिः ॥

अनूनः । त्रि । वामने ॥ नीचे ॥

अनूढः । त्रि । अविवाहिते ॥ नऊढः । नञ्समासः । नलोपोनञः । तास्मा

नुडर्थि ॥

अनूचम् । त्रि । अवक्तव्येगुर्वादिनामनि ॥ यथा । आत्मनाम गुरोर्नाम नामातिकृपणस्यच । श्रेयस्कामोनगृह्णीयाज्ज्येष्ठापत्यकलत्रयोरिति ॥ वदः सुपिक्यप्चेति वदेर्भावेक्यप् ॥

अनूनः । त्रि । पूर्णे ॥ नऊनः ॥ अनिन्दिते ॥ नास्तिनूनं यस्य ॥

अनूनकः । त्रि । पूर्णे ॥ ऊनयति । ऊन परिहाणे । अच् । स्वार्थेकन् । नऊनकः ॥

अनूपः । पुं । सैरिभे । महिषे ॥ त्रि । जलप्राये । अम्बुप्रायदेशे ॥ अस्यलक्षणंयथा । वन्हम्बुवंहुवृक्षस्वातश्लेष्ममयान्वितः । देशोऽनूप इतिख्यातः शास्त्रेषुचमनीषिभिरिति ॥ अपि च । नदीपल्वलशैलाढ्यफुल्लोत्पलकुलैर्युतः । हंससारसकारण्डचक्रवाकादिसेवितः ॥ सरोवराहमहिषरुरोहिकुलाकुलः । प्रभूतद्रुमसुखाढ्यो नानापुष्पफलान्वितः ॥ अनेकशालिकेदारकदलीक्षुविभूषितः । अनूपदेशोबालव्योवातश्लेष्ममयार्त्तिमानिति भावप्रकाशः ॥ अनुगता आपोऽत्र । प्रादिभ्योधातुजस्यवाच्योवाचोत्तरपदलोपश्चेतिवहुव्रीहिः । ऋक्पूरित्यः । ऊदनोर्देशे ॥

अनूपजम् । न । आर्द्रके ॥ इतिराजनिघण्टः ॥ त्रि । अनूपोत्पन्नमात्रे ॥

अनूबन्धः । पुं । अनुवन्धे ॥ अनुवध्यते । वन्धवन्धने । घञ् । उपसर्गस्यघञीतिदीर्घः ॥

अनूरुः । पुं । अरुणे । सूर्यसारथौ ॥ अविद्यमानावूरूयस्य ॥

अनूरुसारथिः । पुं । सूर्ये ॥ अनूरुः सारथिर्यस्य ॥

अनृचः । पुं । माणवके ॥ अविद्यमाना ऋचोऽस्य । ऋक्पूरित्यप्रत्ययः

अनृजुः । त्रि । शठे । वक्राशये ॥ नऋजुः ॥

अनृणी । त्रि । ऋणमुक्ते ॥ यथा । एकमप्यक्षरंयस्तु गुरुःशिष्येनिवेदयेत् । पृथिव्यांनास्तितद्द्रव्यंयद्दत्वासोऽनृणीभवेदिति तिथ्यादितत्त्वम् ॥

अनृतम् । न । कृषौ ॥ असत्ये ॥ अयथादृष्टकथने । अयथार्थभाषणे ॥ तत्कथने दोषः । समूलोवाएषपरिशुष्यति योऽनृतमभिवदतीतिश्रुतेः ॥ अवध्यहिंसानुवन्धियथार्थभाषणे ॥ नऋतम् । अनृतम् ॥ विवाहादिपञ्चके त्वनृतभाषणेपापाभावो यथा । विवाहकाले रतिसंप्रयोगेप्राणात्यये सर्वधनापहारे । विप्रस्यचार्थे ह्यनृतं वदेत पञ्चानृतान्याहुरपातकानी-

तिकर्णपर्वणि जिष्णुंप्रति श्रीकृष्णो-क्तिः ।

अनेकः । त्रि । एकभिन्ने । बहुषु ॥ न । व्यक्ते ॥ प्रतिपुरुषं बुध्यादीनां भेदात् ॥ पृथिव्यादिकमपि शरीरघटादिभेदेनाऽनेकमेव । नएकः ॥

अनेकजः । पुं । पक्षिणि ॥ विष्णौ ॥ धर्मगुप्तयेऽसकृज्जायमानत्वात् ॥ त्रि । बहुजाते ॥

अनेकता । स्त्री । परस्परंभिन्नतायाम् ॥ न एकता ॥

अनेकधा । ऽ । अनेकप्रकारे ॥

अनेकप. । पुं । स्त्री । हस्तिनि ॥ अनेकेन करेण मुखेनच पिबति । पापाने । सुपीतिकः ॥

अनेकरूपम् । त्रि । विचित्रे ॥ अनेकानि रूपाणियस्मिन ॥

अनेकसंयुक्तम् । न । लिङ्गशरीरे । अनेकैर्देवमनुष्यादिनानारूपशरीरैःसंयुक्तम् । अनेकाभिः श्रोत्रादिबुध्यन्तसप्तदशकलाभिः संयुक्तंवा ॥ त्रि । बहुभिः सम्बद्धे ।

अनेकान्तः । त्रि । अनियते । अनतिशये ॥

अनेकान्तवादी । त्रि । आर्हते । सप्तपदार्थवादिनि नास्तिकभेदे । यथा । तत्त्वसप्तपदार्थाः स्युर्जीवाजीवास्त्रवास्रवाः । संवरोनिर्ज्जरश्चैवबन्धमोक्षावुभावपि । स्याद्वादलाञ्छितांश्चैतेसर्वेनैकान्तिकत्वतइति ॥

अनेकाश्रितगुणः । पुं । बहुनिष्ठगुणे ॥ सयथा । संयोगः विभागः द्विपृथक्त्वादिःएकत्वान्यसङ्ख्येतिसिद्धान्तमुक्तावली ॥

अनेजत् । त्रि । चलनरहिते । सदैकरूपे ॥ एजतीत्येजत् । एजृकम्पने । चलनं स्थिरत्वप्रच्युतिः । नञ्समासः ॥

अनेडमूकः । त्रि । शठे ॥ मूकबधिरे । वाक्श्रुतिवर्ज्जिते ॥ नास्त्येडमूकोऽस्मात् । एडमूकसदृशोऽनेडमूकइतिवा । सादृश्यस्यनञर्थत्वात ॥ अन्धे ॥

अनेनाः । त्रि । निर्दोषे ॥

अनेहा । पुं । काले । समये ॥ नहन्यते । नञि ५ नएहन्चेत्यसिरेशादेशश्च ॥ ऋदुशनसित्यनङ् ॥

अनैकान्तिकः । पुं । हेत्वाभासविशेषे सव्यभिचारे ॥ साधारणासाधारणानुपसंहारिभेदादनैकान्तिकस्त्रिविधः । ऐकान्तिकोऽव्यभिचारी । नऐकान्तिकः ॥ त्रि । ऐकान्तिकादितरस्मिन् ॥

अनैक्यम् । त्रि । एकताशून्ये । अनेकतायाम् ॥ एकस्यभावऐक्यम् । नऐक्यम ॥

नपुण्यम् । न । अनिपुणतायाम् ॥

अनैश्वर्य्यम् । न । अनीश्वरतायाम् । असामर्थ्ये ॥

अनाकड़ः । पुं । कुठे । वृक्षे ॥ अनस शकटस्याकंगतिं हन्ति । अन्येष्वपीतिड्लौडः ॥

अनौचिती । स्त्री । लोकमर्यादातिक्रमे ॥ न औचिती ॥

अनौपम्यम् । त्रि । आत्मरूपे ॥ यदित्वत्सदृशोद्वितीयः पदार्थो जगत्यांस्यात् तदा तदुपमानेन स आत्मोपमेयः स्यात् नतुतदस्ति तस्मादनौपम्यमात्मरूपम् ॥

अन्तम् । न । स्वरूपे ॥ यथा । वनान्तम् ॥ पुं । नाशे ॥ पुं । न । अवसाने चरमे ॥ त्रि अन्तिके ॥ प्रदेशे ॥ यथा ॥ रम्यैर्हर्म्यतलैर्न किंवसतये श्राव्यं न गीतादिकं किंवाप्राणसमासमागमसुखनैवाधिकप्रीतये। किन्तुभ्रान्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुरच्छायाचञ्चलमाकलय्यसकलं सन्तोवनान्तंगताइति॥ परिग्रहापेक्षयासमाप्तौ ॥ अतिमनोहरे । रुचिरे ॥ अवयवे ॥ निर्णये ॥ इयत्तायाम् । सीमायाम् ॥ यथा । लवणजलान्तानद्यः स्त्रीभेदान्तञ्च मैथुनम् । पैशुन्यंजनवार्त्तान्तं वित्तंदु खत्रयान्तकम् ॥ राज्यश्रीर्ब्र

ह्मभापान्ताद्गलान्त ब्रह्मवर्चसम् । आचारोघोषवासान्तः कुलस्यान्तं स्त्रियश्रृखाः ॥ सर्वेक्षयान्तानिचयाः पतनान्ताःसमुच्छ्रयाः । संयोगाविप्रयोगान्तामरणान्तञ्च जीवितमितिगारुडे-११५ अध्यायः ॥ अमति । अमगत्यादौ । हसिमृग्रिणितिन् ॥ अनतिवा अतिबन्धने । पचाद्यच् ॥ अन्तनम् । घञ्वा ॥

अन्तः करणम् । न । मनोबुध्यहङ्कारचेतस्सु ॥ यथा । मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम् । संशयो निश्चयो गर्वःस्मरणं विषयाअमी इति । अस्योत्पत्तिर्यथा । मिलितैस्तुतैः । अन्तःकरणमेकंस्यादिति । तैःपञ्चभूतस्य सत्वांशैर्मिलितैरन्तःकरण भवतीत्यर्थः । आभ्यन्तरवृत्तित्वादन्तःकरणम् । अन्तःअभ्यन्तरे करणम् ॥

अन्तःकरणदेवता । स्त्री । चन्द्राच्युतचतुर्मुखशङ्करेषु । यथासंख्यंचतुर्णांचतुर्षु ॥

अन्तःकरणविषय । पुं । सङ्कल्पविकल्पनिश्चयाहङ्कार्य्यचैत्याख्येषु ॥ यथासंख्यंचतुर्णां चत्वारो विषयाज्ञेयाः । अन्तःकरणवृत्तिस्तेनाप्येषांव्यवहारः ॥

अन्तःकरणवृत्तिः । स्त्री । मनोवृत्तौ । साचत्रिविधा । यथाहुः । शान्ताघो

रास्तथामूढामनसोवृत्तयस्त्रिधा । वैराग्यक्षान्तिरौदार्यमित्याद्याः शान्तवृत्तयः ॥ तृष्णास्नेहोरागलोभाबित्याद्याघोरवृत्तयः । सम्मोहोभयमित्याद्याःकथितामूढवृत्तयइति ॥ वृत्तिभेदादन्तःकरणं चतुर्विधंभवति ॥ वृत्तिभेदोयथा, । यदातुसङ्कल्पविकल्पकृत्त्वंतदाभवेत्तन्मनइत्यभित्यम् । स्याद्बुद्धिसञ्चन्त्वयदाप्रवेत्तिसुनिश्चितंसंशयहीनरूपम् ॥ अनुसन्धानरूपंतच्चित्तञ्च परिकीर्त्तितम् । अहङ्कृत्यात्मकत्वात्तुतदहङ्कारतागतमिति ॥ सङ्कल्पविकल्पकृत्त्वंयदान्तःकरणंकरोतितदातदन्तःकरणंमनःसंज्ञंभवति । एवमग्रेप्यूह्यम ॥

अन्तःकुटिलः । पुं । शङ्खे ॥ त्रि । वक्रान्तःकरणे ॥

अन्तःपदवी । स्त्री । सुषुम्णायाम् ॥

अन्तःपुरम् । न । भूभुजांस्त्यगारे । शुद्धान्ते ॥ अन्तरभ्यन्तरेपुरंगृहम् । तात्स्थ्याद्राजदारेषु ॥

अन्तःपुराध्यक्षः । पु । शुद्धान्ताधिकृते ॥ तल्लक्षणमाहयुक्तिकल्पतरुः । यथा । वृद्धः कुलोद्गतः शक्तः पितृपैतामहः शुचिः ॥ राज्ञामन्तः पुराध्यक्षोविनीतश्चतथोच्यते ॥

अन्तःप्रज्ञः । पुं । तैजसे ॥ इन्द्रियाद्येष्वन्तयामनसोन्त. स्थत्वात् तद्वासनारूपाप्रज्ञायस्यस. ॥

अन्त.सत्त्वा । स्त्री । गर्भिण्याम् ॥ अन्त अभ्यन्तरे सत्त्वंयस्याःसा ॥ भल्लातक्याम् ॥

अन्तःसुखः । त्रि । बाह्यविषयजनितसुखशून्ये । स्वरूपसुखे ॥ अन्तः अभ्यन्तरे सुखंयस्यसः ॥

अन्तःस्वेदः । पुं । स्त्री । गजे ॥ अन्तः अभ्यन्तरे स्वेदोयस्य सः ॥

अन्तकः । पुं । न शकारिणि । यमे ॥ अन्तंकरोति अन्तयति । तत्करोतीतिण्यन्तात् ण्वुल् ॥ मरणाम् ॥

अन्तकरः । त्रि । नाशकरे ॥ अन्तकरोति । दिवाविभेतिटः ॥

अन्तकर्म । न । नाशने ॥ राघवस्य शरैर्घोरैर्घोरंरावणमाहवे । अन्तराघवेतिसम्बुद्ध्यजम् ॥ स्येतिषोअन्तकर्मणीत्यस्यलोपमध्यमैकवचनम ॥

अन्तकालः । पुं । मरणसमये । समस्तकरणग्रामवैयग्र्यवति ॥ अन्तश्चासौकालश्च ॥

अन्तगः । त्रि । अन्तगामिनि । पारगे ॥ अन्तंगच्छतीतिविग्रहे अन्तात्यन्तेत्यादिनागमे डप्रत्ययः ॥

अन्तगतः । त्रि । अवसानंप्राप्ते ॥ अन्तेगतः ॥

अन्ततः । । । सम्भावनायाम् ॥ अवयवे ॥
पञ्चम्यर्थे ॥ शासने ॥ इतिहेमचन्द्रः ॥
अन्त इत्यर्थे आद्यादित्वात्तसिः ॥

अन्तपालः । पुं । बाह्यरक्षके ॥

अन्तः । । । मध्ये ॥ प्रान्ते ॥ अभ्युपगमे ॥
॥ चित्ते ॥ अमति । अमगत्यादिषु ।
अमेस्तुट्चेत्यरन् । तस्यलुडागमः ।
रेफादकारउच्चारणार्थः ॥

अन्तरम् । न । अवकाशे ॥ यथा अन्त
रंदेहि ॥ अवधौ ॥ यथा मासान्तरेदे
यम् ॥ परिधानांशुके ॥ यथा अन्तरे
शाटकाःपरिधानीया इत्यर्थः ॥ अन्त
र्द्धौ ॥ यथा पर्वतान्तरं गताः स्त्रियः ॥ भे
दे । परस्परवैलक्षण्ये । विशेषे ॥ यथा
। अन्तरज्ञो भव सदा धनस्य च जनस्य
च। विशेषज्ञ इत्यर्थः ॥तादर्थ्ये ॥ ओद
नान्तरस्तण्डुलः । ओदनार्थइत्यर्थः ॥
छिद्रे ॥ यथा । अन्तरं लब्ध्वाअरेःप्रह
रेत् ॥ आत्मीये ॥ अयसोऽभ्यन्तरोमम
॥ विनार्थे ॥ यथा । अन्तरेण पुरुषका
रनकिञ्चित्सिध्यति ॥ बहिरर्थे ॥ यथा ।
अन्तरे चाण्डालगृहः । बाह्यइत्यर्थः
॥ अवसरे ॥ यथा । अन्तरज्ञोहि सेव
कः ॥ मध्ये ॥ यथा । आवयोरन्तरे जा
ताःपर्वताःसरितोद्रुमाः ॥ आत्मनि ॥
यथा । प्रमान्तरंवेद । अन्तरात्मानं
जानातीत्यर्थः ॥ सदृशे ॥ यथा । हकार

स्यवकारोन्तरतमः ॥ अन्तरांति ।
राद्दाने । आतोनुपेतिकः ॥

अन्तरङ्गः । त्रि । आत्मीये ॥ अन्तःअङ्गा
नियस्य ॥

अन्तरज्ञः । त्रि । नीचानीचादिविशे
षाभिज्ञे ॥

अन्तरप्रभवः । त्रि । सङ्कीर्णजातौ । अनु
लोम प्रतिलोमजाते ॥

अन्तरा । । । निकटार्थे ॥ मध्यार्थे ॥ वि
नार्थे ॥ अन्तरेति । इण्गतौ । डाप्र
त्ययः ॥

अन्तरात्मा । पुं । अन्तःकरणे ॥ अन्तःअ
भ्यन्तरे आत्मा ॥ सर्वान्तरे परमात्म
नि ब्रह्मलोकशब्दवाच्ये ॥ यथा । न
कर्मणाकनीयसा इद्धिर्कानान्तरात्म
नः । इतिश्रुतिमेवाकृत्य वेदान्तैर्ग
षणाकृतेति ॥

अन्तरापत्या । स्त्री । गर्भिण्याम् ॥ अन्त
रे अपत्यंयस्याः ॥

अन्तरायः । पुं । विघ्ने ॥ अन्तरायश्चदर्शि
तोयोगदूषणयोगे । व्याधिस्त्यानसं
शयप्रमादालस्याविरतिभ्रान्तिदर्शना
लब्धभूमिकत्वाऽनवस्थितत्वानीति-
॥ चित्तविक्षेपे ॥ अन्तर्मध्ये अन्तरस्य
व्यवधानस्यवा अयनम् अयगतौ । इ
गतौवा । घञ्ऽज्वा ॥ यागे ॥

अन्तरारामः । त्रि । त्यक्तसर्वपरिग्रहत्वे

नवाह्यसुखसाधनशून्ये । अन्तःआरा मोयस्य ।

अन्तरालम् । न । मध्ये । अभ्यन्तरे । अन्तरं लाति । आतोनुपेतिकः । अन्येषामपीतिदीर्घः । । आङ्मश्लेषो वा । मूलविभुजादित्वात्कः ।

अन्तरालकम् । न । अभ्यन्तरे ।

अन्तरिक्षम् । न । अम्बरे । पतत्रिमेघ संचार प्रदेशे । भूलोकसूर्य्यमध्यवर्त्तिनि । द्यावापृथिव्योरन्तरीक्ष्यते । ईक्षदर्शने । कर्मणिघञ् । वेदेछांदसंह्रस्वत्वम् । अन्तर्ऋक्षाणिनक्षत्राण्यस्य पृषोदरादित्वादित्वंवा ।

अन्तरिक्षक्षित् । पुं । वायौ । अन्तरिक्षे क्षयतिवसति । क्षि० । क्विप् । तुक् ।

अन्तरितम् । त्रि । तिरस्कृते । व्यवहिते । व्यवकलिताङ्के । यस्यबाकीइतिभाषा ।

अन्तरिन्द्रियम् । न । अन्तःकरणे । अन्तः अभ्यन्तरे इन्द्रियम् ।

अन्तरीक्षम् । न । नभसि । पतत्रिमेघ संचारप्रदेशे । द्यावापृथिव्योरन्तरीक्ष्यते । ईक्षदर्शनाङ्कनयोः । कर्मणि घञ् । अन्तरीक्ष्यतेजगदस्मिन्निति- अधिकरणव्युत्पत्तिस्तुनोचिता । ल्युटा घञोबाधप्रसङ्गात् । अभ्रकधातौ ।

अन्तरीक्षजलम् । न । आकाशजले । दिव्योदके ।

अन्तरीपः । पुं । न । द्वीपे । अन्तर्गता आपोऽत्र । ऋक्पूरब्धूः समासान्तः । द्व्यन्तरुपसर्गेभ्य इत्यप ईदादेशः ।

अन्तरीयम् । न । अधोंशुके । परिधान वस्त्रे । अन्तरेभवम् । गहादित्वाच्छः । नाभौधृतस्ययद्वस्त्रमाच्छादयतिजानुनी । अन्तरीयंप्रशस्तंतदच्छिन्नमुभयोस्तयोः ।

अन्तरे । । मध्ये । अन्तरेति । इण्गतौ । विच् ।

अन्तरेण । । विनार्थे । मध्यार्थे । अन्तरेति । इणोणः ।

अन्तर्गडुः । त्रि । निरर्थके । रसौली इति भाषायाम् ।

अन्तर्गतम् । त्रि । मध्यप्राप्ते । विस्मृते । अन्तर्गम्यतेस्म अन्तर्गच्छतिस्म वा । गम्लृगतौक्तः ।

अन्तर्गृहम् । न । गृहमध्ये ।

अन्तर्घणः । पुं । वाहीकग्रामविशेषे । हन० । अन्तर्घनोदेशइतिहन्तेर्घनादेशोऽप्प्रत्ययश्चनिपातनात् ।

अन्तर्जठरम् । न । कोष्ठे । कुक्षिमध्ये ।

अन्तर्जलम् । न । अन्तर्जलसाध्येऽघमर्षणजपादौ ।

अन्तर्ज्योतिः । न । अन्तरात्मनि ।

अन्तर्दधनम् । न । मद्यबीजे । किण्व । इतिशब्दचन्द्रिका ।

अन्तर्दाहः। पु। क्रोधसन्तापे। शरीराभ्यन्तरज्वालायाम्॥

अन्तर्द्धा। स्त्री। अन्तर्द्धाने। व्यवधायाम्॥ अन्तर्द्धानम्। डुधाञ०। अन्तःशब्दस्याङ्किविधणत्वेषूपसर्गत्वाद्दात-श्चोपसर्गइत्यङ्॥

अन्तर्द्धानम्। न। अन्तर्द्धा। तिरोधाने॥ शरीरत्यागे॥

अन्तर्द्धिः। पुं। पिधाने। व्यवधाने॥ अन्तर्द्धानम्। अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वादुपसर्गेघोः किरितिकिप्रत्ययः॥

अन्तर्द्वारम्। न। गृहाभ्यन्तर्गूढद्वारे। प्रच्छन्ने॥ अन्तःस्थितंद्वारम्। शाकपार्थिवादिः॥ खिडकीतिख्याते॥ यथा। प्रच्छन्नमन्तर्द्वारंस्यात्पक्षद्वारंतदुच्यत इतिशवरस्वामी।

अन्तर्भूत.। त्रि। मध्यस्थिते। अन्तर्गते॥

अन्तर्मनाः। त्रि। व्याकुलचेतसि। दुःखितमनसि। दुर्मनसि। विमनसि॥ अन्तर्मनोऽस्य॥

अन्तर्यामी। पुं। वायौ॥ यथा। अन्तःप्रविश्यभूतानियोविभर्त्यात्मकेतुभिः। अन्तर्यामीश्वरः साक्षात्पातुनोयद्वशेस्फुटमिति॥ केतुभिः प्राणादिवृत्तिभिः॥ ईश्वरे। प्रत्यक्तमे। अन्तरनुप्रविश्यसर्वेषांभूतानांनियन्तरि॥ सूत्रादप्यान्तरंतत्त्वमन्तर्याम्याख्यमुच्यते॥ त्रि। अन्तर्स्थे। मनोगतस्थे॥

अन्तर्वंशिकः। पुं। अन्तःपुराधिकृते। कुब्जवामनादिजने॥ अन्तरभ्यन्तरोवंशोगृहम्। अन्तर्वंशेनियुक्तः। तत्रनियुक्तइतिठक्। संज्ञापूर्वकत्वान्नवृद्धिः॥ यद्वा अन्तर्वंशोऽस्यास्ति अतइतिठनाविति ठन्॥

अन्तर्वत्नी। स्त्री। गर्भिण्याम्॥ अन्तरस्यांगर्भइतिविग्रहे अन्तःशब्दस्याधिकरणप्रधानत्वेन प्रथमासमर्थत्वाभावे दस्तिनासामानाधिकरण्याऽसम्भवादमासोमतुप् अन्तर्वत्पतिवतोर्नुगित्यनेननिपात्यते नुगागमश्चविधीयते ततस्त्रस्तेभ्य इतिङीप्॥

अन्तर्वमिः। पुं। अजीर्णे अपाके॥ इतित्रिकाण्डशेषः॥

अन्तर्वाणिः। त्रि। शास्त्रज्ञे॥ अन्तर्वाणुरस्य। समासान्तविधेरनित्यत्वान्नच्‌प्रत्ययेतिनकप्। गोस्त्रियोरितिह्रस्वः॥ यद्वा। अन्तर्वाणयति। वणशब्दे। स्वार्थणिजन्तादिच्‌प्रत्ययः॥

अन्तर्विगाहः। पुं। प्रवेशे॥

अन्तर्विगाहनम्। न। प्रवेशने॥

अन्तर्वेदी। स्त्री। नीवृदन्तरे। शशस्थल्याम्। हरिद्वारादारभ्य प्रयागपर्य

र्थिका: प्रकृतितोलिङ्गवचनान्यति-वर्त्तन्तेपीति पुंस्त्वम् ॥ यद्वाविनयादित्वाट्ठक् । इसुसुक्तान्तात्कः । केणेतिह्रस्वः । इकोह्रस्वोङ्योगालवस्येतिवा ॥ यद्वा । अन्धूशब्दात् संज्ञायांकन् । केणइतिह्रस्व. ॥

अन्दूः । स्त्री । निगडे ॥ स्त्रीपादभूषणे ॥ अन्द्यतेऽनेन । अदिबन्धने । अन्दूदृन्भ्वितिकूः ॥

अन्ध । पुं । न । तिमिरे ॥ अदर्शनात्मकाज्ञाने ॥ त्रि । अदृशि । चक्षुर्हीने ॥ पुं । भिक्षौ ॥ यथा । तिष्ठतो व्रजतो वापियस्यचक्षुर्नदूरगम् । चतुर्युगांभुवंमुक्तापरिव्राटसोऽन्धउच्यतेइति ॥ राशिविशेषे ॥ यथा । मेषोवृषोमृगेन्द्रश्चदिवान्धाःपरिकीर्त्तिताः । न्मयुकर्कटकन्याश्चरात्रावन्धाःप्रकीर्त्तिताः इति ॥ अन्धयति । अन्धदृष्ट्युपघाते । पचाद्यच् ॥

अन्धकः । पुं । दैत्यविशेषे । देशभेदे ॥ न्वपान्तरे ॥ मुनिविशेषे ॥ यादवप्रभेदेषु ॥ हिरण्याक्षसुते ॥

अन्धकरिपुः । पुं । शिवे ॥ अन्धकस्यदैत्यस्यरिपुः ॥ श्लेषकाव्यादावन्धकारनाशकत्वात् । सूर्ये । चन्द्रमसि । अग्नौच ॥

अन्धकवर्त्तः । पुं । पर्वतान्तरे ॥

अन्धकान्तकः । पुं । शिवे ॥ अन्धकस्य अन्तकः ॥

अन्धकारः । पुं । न । तेजस्सामान्यभावे । ध्वान्ते ॥ मत्ताप्रभास्त्वावच्छिन्नाभावो ऽन्धकारइतिसामान्यलक्षणायांजगदीशः ॥ भयदृष्टिलेजोवरोधकारित्वं तिक्तत्वं सर्वथाधिकरत्वञ्चेत्यस्यगुणाइतिराजवल्लभ. ॥ मिथ्याप्रत्ययलक्षणे स्वविषयावरणे तद्रुपाद्याज्ञाने ॥ अन्धदृष्ट्युपघाते । चुरादिः । अन्धनम् । घञ् । अन्धंकरोति कर्मण्यण् ॥

अन्धकारिः । पुं । हरे । शिवे ॥ अन्धकस्यअरिः ॥

अन्धकासुहृत् । पुं । ईश्वरे । शिवे ॥ अन्धकासून हरति । क्विप् ।

अन्धकूपः । पु । कर्करान्धुके । सान्धकारकूपे ॥ मोहे । नरकविशेषे ॥ अंधश्चासौ कूपश्च ॥

अन्धतमसम् । न । गाढान्धकारे ॥ अन्धयति । अन्धदृष्ट्युपघाते चुरादिः । अच् । अंधञ्चतत्तमश्च । अवसमन्धेभ्यस्तमसइत्यच् ॥

अन्धतामिस्रः । पुं । अभिनिवेशे ॥ सचाष्टादशविधः । तथाहि । देवाः खल्वणिमादिकमष्टविधमैश्वर्यमासाद्यदशशब्दादीन् भुञ्जानाःशब्दादयो

भोग्यास्तदुपायाश्चाणिमादयोऽस्मा कमसुरादिभिरुपघातिषतेतिविभ्यति तदिदं भयमभिनिवेशोऽन्धतामिस्रो- ष्टादशविषयत्वादष्टादशधेतिसां- ख्या.॥ न। निविडान्धकारमये नरक विशेषे ॥ पञ्चप्रकाराज्ञानान्तर्गता ज्ञानविशेषे। सचविशेषोयथा। देह नाशे अहमेवमृतोऽस्मीतिबुद्धिः॥

अन्धमूषिका। स्त्री। देवताडे॥

अन्धवर्त्मा। पु। वायो सप्तमेस्कन्धे॥ यथा। मरुदिन्द्रःसरभसःसामशोभा नुषीतिपाः। देवीविशोऽन्धवर्त्माचस्क न्ध' सप्तमआधुवादिति ७॥

अन्ध.। न। ओदने॥ अद्यते। अदभ क्षणे। अदेर्नुम् धौचेत्यसुन्॥ अन्ध यतिवा अन्धदृष्ट्युपघाते। असुन्॥

अन्धातमसम्। न। अत्यन्धे। महा न्धकारे॥ अन्धश्च तत्तमश्च। अव समन्धे भ्यस्तमस इत्यच्। अन्येषाम पीतिदीर्घ'॥

अन्धाहि.। पुं। कुंचियाइतिगौडप्रसि द्धे मीनभेदे॥ इतिचिकाण्डशेष.॥

अन्धिका। स्त्री। द्यूतभेदे॥ रजन्या म॥ सर्षप्याम्॥ सिद्धार्थौषधौ॥ स्त्रीविशेषे॥ चक्षुषोरोग विशेषे॥

अन्धु। पुं। कूपे॥ अध्यते। अमग त्यादौ। अजिदृशिकम्यमीति कु

पुंकच॥ यद्वा। अन्धयति। अन्धदृ- ष्ट्युपघाते। मृगय्वादित्वात्कुः॥

अन्धुलः। पुं। शिरीषद्रौ॥

अन्ध्र। पुं। वैदेहेन कारावरस्यस्त्रिया मुत्पादिते अन्त्यजविशेषे॥ देशविशे षे॥ यथा। जगन्नाथादूर्द्धभागमर्वाक् श्रीभ्रमरात्मिकात्। तावदन्ध्राभि धोदेशः मोक्तःश्रीशक्तिसङ्गमे॥

अन्नम्। न। भक्ते। ओदने। स्विन्नतण्डु ले॥ यथा। सस्यंक्षेत्रगतमाहुःसतुषं धान्यमुच्यते। आमवितुषमित्युक्त स्विन्नमन्नमुदाहृतमिति वसिष्ठ'॥ व्रीहियवादौ॥ भक्ष्यभोज्यलेह्यचो ष्यभेदाच्चतुर्विधमन्नंभवति॥ पृथि- व्याम्॥ उपकरणे॥ औपचारिकम र्थंगृहीत्वा दृष्टश्चोपकरणेऽन्नशब्दः। यथा स्त्रियोऽन्नम् पशवोऽन्नम् विशो ऽन्नं राज्ञामित्यादौ॥ चि। भुक्ते॥ अनिति। अन्यन्तेनेनवा। अनप्राणने। कृवृजृसिद्रुपन्यनिस्वपिभ्योनिदितिन न्॥ यद्वा। अद्यतेस्म। अदभक्षणे। क्तः। अन्नाणु इतिनिपातनान्नवहु लंतणीतिवा न जग्धिः॥ यद्वा। अत ति। अत०। धापृवस्यज्यतिभ्योनिइ तिन॥

अन्नकोष्ठकः। पुं। तण्डुलादिरक्षा स्थाने॥ गोलाइतिकाभ्यांयस्यप्रसि

द्रिः ॥ इतिहेमचन्द्रः ॥

अन्नगन्धिः । पुं । अतिसारे । उदरामयरोगे ॥ इतित्रिकाण्डशेष. ॥ अन्नस्यगन्ध इव गन्धोऽस्य । उपमानाच्चेतीत्त्वम् ॥

अन्नदः । त्रि । अन्नदातरि ॥

अन्नदा । स्त्री । अन्नपूर्णायांदेव्याम् ॥

अन्नदाता । पुं । प्रभौ ॥ अन्नस्यदातरि ॥

अन्नपूर्णा । स्त्री । स्वनाम्नाऽतिप्रसिद्धायांदेव्याम् ॥

अन्नपूर्णास्थानम् । न । काश्याम्प्रसिद्धेसिद्धिस्थाने ॥

अन्नप्राशनम् । न । अन्नाशने । यथाविधिबालकस्य प्रथमान्नभोजने ॥ षष्ठे अष्टमे वा मासि बालकस्य पञ्चमे सप्तमे वामासि बालिकायाः प्रथमान्नभक्षणरूपसंस्कारइतिस्मार्त्ताः ॥ अन्नस्यप्राशनम् यस्मिन्तत् ॥

अन्नमय. । पुं । स्थूलशरीरे । प्रथमकोशे ॥ यथा । पितृभुक्तान्नजाद्वीर्याज्जातोऽन्नेनैववर्द्धते । देह.सोऽन्नमयोनात्माप्राक्कोर्द्धंतदभावतइति ॥ अन्नस्यविकारःमयट् ॥ यद्वा । प्रकृतमन्नम् । अन्नंप्रकृतमुच्यतेऽस्मिन वा । तत्प्रकृतवचनेमयट् ॥ स्थूलसमष्ट्याम् । पञ्चीकृतपञ्चमहाभूततत्कार्यात्मके विराड्मूर्त्तौ ॥

अन्नविकारः । पुं । रेतसि । शुक्रे ॥ इतिराजनिर्घण्ट. ॥

अन्नादः । त्रि । अन्नस्यभोक्तरि ॥ अन्नमत्तीतिविग्रहेकर्मण्यण् ॥ दीप्ताग्नौ । आमयाविस्वरहिते ॥ पु । विष्णौ ॥

अन्नाशनम । न । अन्नप्राशने ॥

अन्यः । त्रि । असदृशे । इतरस्मिन् । भिन्ने ॥ अत्यन्तविलक्षणे ॥ सदृशे ॥ अनिति । अनप्राणने । अघ्न्यादित्वात्यः ॥

अन्यत् । ा । अन्यार्थे ॥

अन्यतमः । त्रि । भिन्नतमे । बहूनांमध्येनिर्द्धारितै कस्मिन् ॥ न्यायमते अनेकभेदावच्छिन्नप्रतियोगिताकभेदे ॥ अव्युत्पन्नोयम ॥

अन्यतर. । त्रि । निर्द्धार्ये । द्वयोर्मध्ये निर्द्धारितैकस्मिन ॥ निर्द्धारणेऽतरच् ॥ न्यायमते द्वयावच्छिन्नप्रतियोगिताकभेदे ॥ भिन्नार्थके ॥ अन्यएव । अल्पाच्तरमितिवत्स्वार्थेतरप् ॥ अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद्बिबहुविषयेनिर्द्धारणे वर्त्तेते इतिकैयटः । किंयत्तदभ्योऽन्यत्रडतराभावादिति विवरणम् ॥

अन्यतरेद्युः । ा । अन्यतरदिवसे । अन्यतरस्मिन्नहनि ॥ सद्यः परुदित्या

द्विनान्यतरशब्दादेशुस्प्रत्ययोनिपातितः ॥

अन्यतः । ा । अन्यत्रार्थे ॥ अन्यस्मात् । तसिल ॥

अन्यतस्त्यजायी । त्रि । सपत्नजयशीले ॥

अन्यत्र । ा । व्यतिरेके ॥ अन्यस्मिन् । त्रल ॥ विनार्थे ॥ यथा । अन्यत्रनिधनात्पत्युः पत्नीकेशान्नवापयेत् इति ॥ स्थानान्तरे ॥

अन्यथा । ा । वितथे ॥ अपरार्थे ॥ दुष्टे ॥ अन्येनप्रकारेण । प्रकारवचनेथाल् ॥

अन्यथासिद्धिः । स्त्री । कार्य्याव्यवहितपूर्ववर्त्तित्वेसतिकार्यानुत्पादकत्वे ॥ सापञ्चविधा । यथा यत्कार्य्यम्प्रति कारणस्यपूर्ववर्त्तिता येनरूपेण गृह्यते तत्कार्यम्प्रति तद्रूप मन्यथा सिद्धम् । यथा घटं प्रति दण्डत्वम् ॥ १ ॥ यस्यस्वातन्त्र्येण अन्वयव्यतिरेकौ नस्तः किंतु कारणमादायान्वय व्यतिरेकौ तदन्यथासिद्धम् । यथा घट प्रतिदण्डरूपम् ॥ २ ॥ अन्यम्प्रतिपूर्ववर्त्तितां गृहीत्वैवयस्य यत्कार्य्यम्प्रति पूर्ववर्त्तित्व गृह्यते तस्य तत्कार्य्यंप्रति अन्यथासिद्धत्वम् । यथा-घटादिकं प्रतिआकाशस्य ॥ ३ ॥ यत्कार्य्यजनकं प्रति पूर्ववर्त्तित्वंगृहीत्वैव यस्य यत् कार्य्यं प्रति पूर्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यंप्रति अन्यथासिद्धत्वम् । यथा कुलालपितुर्घटम्प्रति ॥ ४ ॥ अवश्यक्लृप्तनियत पूर्ववर्त्तिनएव कार्यसम्भवे तद्भिन्नमन्यथासिद्धम् । यथा घटम्प्रति रासभादिरितिसिद्धान्तमुक्तावली ॥ ५ ॥ यस्य कारणत्वकल्पनाविनाप्यन्यप्रकारेण-कार्यसिद्धिर्भवेत् सोऽन्यथा सिद्धः तद्धर्मोन्यथासिद्धिः ॥

अन्यदा । ा । कालान्तरे ॥ अन्यस्मिन्काले । सर्वैकान्यकिंयत्तदः कालेदा ॥

अन्यपूर्वा । स्त्री । पौनर्भवायां कन्यायाम् । एकस्मैवागादिनादत्तायांपुनरन्येनविवाहितायां कुमार्याम् ॥ सा-सप्तधा । यथा । सप्तपौनर्भवाः कन्या वर्ज्जनीयाः कुलाधमाः । वाचादत्ता मनोदत्ता कृतकौतुकमङ्गला । उदकस्पर्शिता याच याचपाणिगृहीतिका । अग्निंपरिगतायातुपुनर्भूप्रसवाचया ॥ इत्येताः कश्यपेनोक्ता दहन्तिकुलमग्निवत् । इत्युद्वाहतत्त्वम् ॥

अन्यभृत् । पुं । काके ॥ इति हेमचन्द्रः ॥ त्रि । परेषांपोषके ॥ अन्यंबिभर्त्ति । डुभृञ॰ । क्विप् ॥

अन्यभृतः । पुं । कोकिले ॥ अन्येनभृतः ॥ इतिहलायुध ॥

अन्यवर्द्धित. । त्रि । अन्येन प्रति पालिते

। अन्यपुष्टे । पुं । कोकिले । अन्येन वर्द्धित. ।

अन्यवादी । त्रि । अन्यथावादिनि । अस्थिरवादिनि । व्यवहारेपञ्चविधहीनजनान्तर्गतहीनविशेषोयम् । यथा । अन्यवादीक्रियाद्वेषीनोपस्थायीनिरुत्तरः । आहूतप्रपलायीचहीनः पञ्चविधः स्मृतइतिनारदः ।

अन्यशाखकः । पुं । शाखारण्डे । स्वशाखामुत्सृज्यान्यशाखोक्तकर्मकारिणि- । अन्याशाखा यस्यसः । कप् ।

अन्यादृक् । त्रि । अन्योपमे । अन्यप्रकारे । अन्यइवदृश्यते । दृशिरप्रेक्षणे । त्यदादिषु दृशइतिक्विन् । आसर्वनाम्नः ।

अन्यादृशः । त्रि । अन्योपमे । अन्यप्रकारे । अन्यइवपश्यति दृश्यतेवा । दृशिर् । त्यदादिष्विति कञ् । आसर्वनाम्नः ।

अन्यायः । पुं । अविचारे । परस्वहरणादौ । न्यायभिन्ने । अनौचित्ये । यथा । अन्यायेनापियद्भुक्तं पित्रापूर्वतरैस्त्रिभिः । नतच्छक्यमपाकर्तुं क्रमात्त्रिपुरुषागतमितिनारदः । नन्यायः ।

अन्याय्यम् । त्रि । अयोग्ये । यथा । दृष्टार्थसम्भवेअदृष्टकल्पनायाअन्याय्यत्वमिति । नन्याय्यम् ।

अन्येद्युः । अ । दिवसान्तरे । अन्यस्मिन्नहनि । सद्य.परुदित्यन्यशब्दादेद्युस्प्रत्ययेनिपातितः ।

अन्येद्युष्कः । पुं । विषमज्वरविशेषे । यथा । अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्ततइति । एककालंदोषाभेदया एककालमपि द्वितीयं प्रथमकालेद्व्यंशदोषस्थितेः ।

अन्योदर्य्यः । पुं । स्त्री । वैमात्रेये ।

अन्योन्यम् । त्रि । परस्परार्थे । अर्थालङ्कारविशेषे । यथा । क्रिययातुपरस्परं वस्तुनोर्जनने ऽन्योन्यम् । अर्थयोरेकक्रियामुखेनपरस्परं कारणत्वेसत्यन्योन्यं नामालङ्कारः । उदाहरणम् । हंसाणां सरेहिं सिरीसारिज्जइअहसराणं हंसेहिम । अणोण्णंविअ एए अप्पाणं णवरगरुअन्ति । अस्य संस्कृतंयथा । हंसानांसरोभिःश्रीःसारीक्रियते अथसरसांहंसैः । अन्योन्यमेवएतेआत्मानंकेवलंगुरूकुर्वन्तीति । श्रीः शोभा सारीकरणं श्रेष्ठतासम्पादनम् । अत्रसरोहंसयोः परस्परंशोभासारीकरणरूपोपकारजनकत्वादन्योन्यंनामालङ्कारः । अत्रोभयेषामपि परस्परजनकता किन्तु- श्रीसारतासम्पादनद्वारेण । कर्मव्यतिहारे सर्वनाम्नोद्वेभवतइतिद्वित्वम् ।

असमासवद्भावेपूर्वपदस्थस्य सुप सुर्व-
क्तव्य. ॥

अन्योन्यदृश्य: । त्रि । इतरेतरग्राह्ये ॥

अन्योन्याध्यास: । पुं । अन्योन्यस्मिन्नन्यो
न्यात्मकताअन्योन्यधर्म्मांश्चेत्याचार्य्यै
र्निरूपितेतादात्म्याध्यासे ॥ यथा । ज
लव्योम्नाघटाकाशोयथासर्वस्तिरोहि
त. । तथाजीवेनकूटस्थ: सोन्योन्या
ध्यासउच्यत इति ॥

अन्योन्याभाव: । पुं । तादात्म्यावच्छिन्न
प्रतियोगिताके ॥ यथाघट: पटोन
भवतीति ॥

अन्योन्याश्रय: । त्रि । अन्योन्यापेक्षे ॥ स्व
ग्रहसापेक्षग्रहसापेक्षग्राहके इतिता
र्किका: ॥ तर्कविशेषे ॥ सचात्माश्र
यवत्त्रेधा । तस्यलक्षणम् । स्वापेक्षापे
क्षित्वनिबन्धनोऽनिष्टप्रसंगोन्योन्या-
श्रय: । अपेक्षाच यसौ उत्पत्तौ स्थि-
तौचग्राह्या । तत्राद्या यथा । घटोयं
यद्येतद्घटज्ञानजन्यज्ञानविषय.स्या
त् तदैतद्घटभिन्न: स्यात् ॥ द्वितीया
यथा । घटोयं यद्येतद् घटजन्यजन्य:
स्यात् तदैतद् घटजन्यभिन्न:स्यात ॥
तृतीया यथा । घटोयं यद्येतद्घट
वृत्तिवृत्ति.स्यात् तथात्वेनोपलभ्येत
इतिजगदीश: ॥ परस्परज्ञानसापेक्ष
ज्ञानाश्रयोऽन्योन्याश्रयइतिस्मार्त्ता:
॥ अन्योन्यस्यआश्रय: ॥

अन्वक्षम् । त्रि । अनुगामिनि । अनु
पदे ॥ अनुगतमक्षमिन्द्रियम् ॥ प्रत्य
क्षे ॥

अन्वक्षम् । । । अक्ष्णो: समीपे ॥ अनु
र्यत्समयेत्यव्ययीभाव: । प्रतिपरसम
नुभ्योऽक्ष्णइति समासान्तष्टच् ॥

अन्वक् । त्रि । अनुगे । अन्वक्षे ॥ अन्व-
ञ्चति । अञ्चुगतौ । क्विन् ॥

अन्वय: । पुं । सन्ततौ । कुले ॥ पदा
नांपरस्परेण सम्बन्धे ॥ यथा । विशे
षणंपुरस्कृत्य विशेष्यं तदनन्तरम् ।
कर्त्तृकर्मक्रियायुक्तमेतदन्वयलक्षण-
मिति ॥ अनुगमे । अनुवृत्तौ । का
र्य्यकारणानुवृत्तौ ॥ तत्सत्तानियत
सत्ताकत्वे ॥ द्रव्यस्वामिनां सम्बन्धे ॥
अन्वियते । इगतौ । इण्गतौवा ।
एरच् ॥

अन्वयव्यतिरेकि । त्रि । अन्वयेन व्यति
रेकेणचव्याप्तिमतिहेतौ ॥ यथा व
न्हौ साध्येधूमवत्वम् यत्रधूमस्तत्रा
ग्निरित्यन्वयव्याप्ति. । यत्रवह्निर्ना
स्ति तत्रधूमोनास्तीतिव्यतिरेकव्या
प्ति । यथा महानसह्रदादौ । अ
न्वयव्यतिरेकीस्तोऽस्मिन् । इनि: ॥

अन्वयव्याप्ति: । स्त्री । यत्रधूमस्तत्राग्नि
रित्येवंरूपायांव्याप्तौ ॥ यथा महान

से । अन्वयेनव्याप्तिः ॥

अन्ववसर्गः । पुं । कामचारानुज्ञायाम् ॥ अन्ववसर्जनम् । सृजेर्घञ् ॥

अन्ववायः । पुं । वंशे ॥ कुले ॥ अन्ववाय्यते । अवगतौ । घञ् ॥

अन्वष्टका । स्त्री । साग्नीनामावश्यकेश्राद्धकालविशेषे ॥ अष्टकापश्चात्तिथौ ॥ सातुगौणचान्द्रपौषमाघफाल्गुनाश्विनमासानां कृष्णनवमी । तस्यां साग्नीनांमातृकश्राद्धमिति श्राद्धविवेकः ॥

अन्वक्षम् । ा । प्रत्यक्षमित्यर्थे ॥

अन्वाजे । ा । दुर्बलस्य सामर्थ्याधाने ॥ सप्तमीप्रतिरूपकोयंनिपातः ॥

अन्वाजेकृत्य । ा । } दुर्बलस्यबलमाधा
अन्वाजेकृत्वा । ा । } येत्यर्थे ॥ उपाजेऽन्वाजे इतिगतिसंज्ञा । कुगतीतिसमासः ॥

अन्वाचयः । पुं । चार्थविशेषे । मुख्यसिद्धावप्रधाननिष्पत्तौ ॥ यथा भिक्षामट गाञ्चानयेति । एकस्यप्राधान्याद‌नुरोधेनेतरदन्वाचीयते । चीञ् । कर्मण्येरच् ॥

अन्वादेशः । पुं । किञ्चित्कार्यंविधातुमुपात्तस्य कार्य्यान्तरंविधातुंपुनरुपादानमन्वादेशइतिलक्षिते कथितानुकथनमात्रे ॥ यथा । अनेनव्याकरणमधीतम् एनंछन्दोऽध्यापयेति । अनयोः पवित्रंकुलम् एनयोः प्रभूतं स्वमिति ॥

अन्वाधिः । पुं । एकस्मिन् यदर्पितंवस्तु तेन पुरुषान्तरे अमुष्मिन् स्वामिनि त्वं दास्यसीति यन्निहितं तस्मिन् ॥ इतिविवादार्णवसेतुः ॥ कार्येषु यानेन अमुष्मिन्पुरुषेत्वंदद्या इतिपरिभाष्य यत्समर्पितं तस्मिन् ॥ यथा । अर्थमार्गणकार्येषु अन्यस्मिन् बन्धनात्मम । दद्यास्त्वमितियोदत्तःसद्भिरन्वाधिरुच्यते ॥ इतिकात्यायनः ॥ पुनर्बंधके ॥ पश्चान्मानसीव्यथायाम् ॥

अन्वाधेयम् । न । स्त्रीधनविशेषे ॥ यथा । विवाहात्परतोयत्तु लब्धंभर्तृकुलात्स्त्रिया । अन्वाधेयंतदुक्तंतु लब्धंबन्धुकुलात्तथेति कात्यायनः ॥ अन्यच्च । ऊर्ध्वंलब्धंतुयत्किञ्चित्संस्कारात्प्रीतित स्त्रिया । भर्त्तुःपित्रोःसकाशाद्वा अन्वाधेयंतुतद्भृगुरिति ॥ बन्धुपदेन मातापित्रोरुपादानम् ॥

अन्वायत्तः । त्रि । अनुगते ॥

अन्वारूढः । त्रि । अधिष्ठिते ॥ अन्वाङ्पूर्वात् रुहेर्गत्यर्थेतिक्तः । ढत्वधत्वष्टुत्वढलोपदीर्घाः ॥

अन्वासनम् । न । शुश्रूषणे । उपासने । सेचनस्नेहवस्तौ ॥ अनुशोचने ॥ शिल्पादि

गृहे । अनु असु० । ल्युट् ॥

अन्वाहार्य्यम् । न । मासिके । दर्शश्राद्धे । पितृयज्ञपिण्डानामनुपश्चात् आह्रियते । हृञ् हरणे । ऋहलोर्ण्यत् ॥ यथा । पितृयज्ञन्तुनिर्वर्त्यविप्रश्चेन्दुक्षयेऽग्निमान् । पिण्डान्वाहार्यकंश्राद्धंकुर्यान्मासानुमासिकम् ॥ पितृणां मासिकंश्राद्धमन्वाहार्यंविदुर्बुधाः । तच्चामिषेणकर्त्तव्यंप्रशस्तेनप्रयत्नतः ॥ इतिमनुः ॥ दृष्टेर्दक्षिणायाम ॥ अन्वाहरणीये ॥

अन्वाहार्य्यपचनः । पुं । दक्षिणाग्नौ ॥

अन्वाहितम् । त्रि । यदेकस्यहस्तेनिहितंद्रव्यं तेनापिपश्चादन्यस्यहस्तेस्वामिनेदेहीति निहितम तस्मिन् द्रव्ये ॥

अन्विच्छा । स्त्री । अन्वेषणे ॥

अन्वितम । त्रि । मिलिते । युक्ते ॥ अनुगते ॥ कृतान्वयेपदादौ ॥

अन्विष्टम् । त्रि । अन्वेषिते ॥ अन्विष्यतेस्म । इषइच्छायाम् । क्त ॥

अन्विष्यन । त्रि । विचिन्वति ॥

अन्वीक्षितम् । त्रि । विचारिते ॥

अन्वीतम् । त्रि । अन्विते ॥ अनुगते ॥ अनुपूर्वादिणगताविितिधातोःकर्मणिक्तः ॥ पृषोदरादिः । ईङ् गत्याविन्त्यस्मादाक्तः ॥

अन्वेषणम् । न । अनुसन्धाने । गवेषिते ॥ इषेरनिच्छार्थस्येतियुच् ॥

अन्वेषणा । स्त्री । अनुमार्गणे । गवेषणायाम ॥ तर्कादिनायथावोधितधर्मोद्यन्वेषणे ॥ टाप् ॥

अन्वेषितम् । त्रि । गवेषिते ॥ अन्वेष्यतेस्म । एषृगतौ । इषिर्ण्यन्तोवा । क्तः ॥

अन्वेष्टव्यः । त्रि । ज्ञातव्ये । एषितव्ये ॥

अन्वेष्टा । त्रि । अनुपदिनि । अन्वेषणकर्त्तरि । पैरखगावनेहारा इति भाषा ॥

आपः । स्त्री । भू० । जले ॥ शब्दस्पर्शरूपतन्मात्रसहितादसतन्मात्रादुत्पन्नाःशीतस्पर्शवत्योह्यापः ॥ आप्नुवन्ति । आप्लृव्याप्तौ । आप्नोतेह्रस्वश्चेतिक्विप् ह्रस्वत्वंच ॥

अप । ॥ अपकृष्टार्थे ॥ वर्जनार्थे ॥ वियोगे ॥ विपर्यये ॥ विकृतौ ॥ चौर्ये ॥ निर्देशे ॥ हर्षे ॥ अपोवियोगेविकृतौ विपरीते निदर्शने । आनन्दे वर्जने चौर्ये वारणेसम्यगीरितः ॥ वियोगे । अपयाति । विकृतौ । अपाकृतवान् । विपरीते । अपशब्दः । निदर्शने । अपदिशति । आनन्दे । अपहसति । वर्जने । अपत्रिगर्त्तोवृष्टोदेवः । चौर्य्ये । अपहरति ॥

अपकर्म्म । न । दुष्क्रियायाम् ॥ अपेपसर्गेण कर्म्मशब्दस्य कर्मधारयः ॥

अपकर्षः । पुं । विद्यमानधर्मापचये ॥ अपकृष्यते । कृषविलेखने । घञ् ॥
अपकारः । पुं । द्वेषे ॥ अनिष्टे ॥ अपकरणम । कृञ । घञ ॥
अपकारकः । त्रि । अनिष्टकारिणि ॥ अपकरोति । कृ० । ण्वुल् ॥
अपकारगीः । स्त्री । भर्त्सने ॥ अपकारार्थागीर्वाक् ॥
अपकारी । त्रि । धूर्ते । शठे ॥ अपकारके ॥ यथा । अपकारिणिचेत् क्रोधः क्रोधः क्रोधेकथंनते । धर्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनीति ॥
अपकुशः । पुं । दन्तरोगविशेषे ॥ यथा । वेष्टेषुदाहःपाकश्चताभ्यां दन्ताश्चलन्तिच । अभ्याहताः प्रस्रवन्तिशोणितदन्तवेदना ॥ आध्मायन्तेस्तुतेरक्तेमुखंपूतिचजायते । यस्मिन्सोपकुशोनामपित्तरक्तकृतोगदइति ॥ ७॥
अपकृतः । त्रि । अपकारिणि ॥ न । अपकारे ॥ मित्रस्यचैवापकृतेद्विविधोविग्रहःस्मृतइत्यत्र मित्रस्यापकारे इत्यर्थदर्शनात् ॥
अपकृष्टः । त्रि । अधमे । हीने ॥ अपकृष्यतेस्म । कृषविलेखने । क्तः ॥
अपक्रमः । पुं । पलायने ॥ अपक्रमणम । क्रमुपादविक्षेपे । इञ । अकर्मे ॥
अपक्रिया । स्त्री । द्रोहे ॥ अपकरणम् । कृञः शचेतिश. ॥

अपक्रोशः । पुं । निन्दने । जुगुप्सने ॥ अपक्रोशनम । क्रुश० । घञ् ॥
अपक्वम् । त्रि । अपरिणते । आमे ॥ न पक्वम् ॥
अपक्षेपणम् । न । अधोदेशसंयोगहेतौ कर्मविशेषे ॥ अपपूर्वात् क्षिपेर्ल्युट् ॥
अपगतः । त्रि । मृते ॥ पलायिते । दूरीभूते । गते ॥ अपगच्छतिस्म । गम्लृ० । गत्यर्थेतिक्तः ॥
अपगमः । पुं । अपगमने ॥ गमेरप् ॥
अपगा । स्त्री । नद्याम् ॥ त्रि । अपगामिनि ॥ अपगच्छति । गमॢगतौ । अन्येभ्योपीतिड. । टाप् ॥
अपघनः । त्रि । घनशून्ये ॥ पु । हस्तपादादङ्गेषु । अवयवे ॥ अपहन्यते । अपघनोङ्गमिति करणेऽपघनादेशश्च ॥
अपघातः । पुं । अपहनने ॥ अपहननम । हन्तेर्घञ् । हस्यघः । नस्यतः ॥
अपचयः । पुं॰ व्यये । हानौ । अपहारे ॥ अपचयनम् । चिञ्चयने । एरच् ॥
अपचायितम् । त्रि । अर्चिते ॥ अपचाय्यतेस्म । चायृपूजानिशामनयोः । क्तः ॥
अपचारः । पुं । अहिताचरणे ॥ यथा । योनिप्रदोषात्प्रभवन्तिशिश्ने पञ्चोप

दंशाविविधापचारैरिति॥ वर्णधर्मव्यतिकरे॥ दोषे॥ अविनये॥

अपचारिणी। स्त्री। व्यभिचारिण्याम्॥ अपचारोऽस्तिअस्याः। इनिः॥

अपचारी। त्रि। अपचारवति॥

अपचितम्। त्रि। अर्च्चिते॥ क्षीणे॥ व्ययिते॥ अपचाय्यतेस्म। चायृपूजानिशामनयोः क्तः। चायतेश्चिरितिचिभावः॥

अपचितिः। स्त्री। पूजायाम्॥ व्यये॥ निष्कृतैा॥ हानैा॥ अपचीयते अपचाय्यतेअथवा अपचायनंवा। चायृपूजादैा। क्तिन्। चायते क्तिनिचिभावोवाच्य'॥

अपची। स्त्री। गण्डमालाया अवस्थाविशेषे॥ यथा। तेग्रंथय' केचिदवाप्तपाका स्रवन्तिनश्यन्तिभवन्तिचान्ये। कालानुबन्धं चिरमादधातिसैवापचीतिप्रवदन्तिकेचिदिति॥ ते ग्रन्थय. गण्डमालायाएवगण्डा:॥

अपजय.। पुं। भङ्गे। पराजये॥ अपजयनम्। जिजये। एरच्॥

अपटान्तरम्। त्रि। आसक्ते। अव्यवहिते। संसक्ते॥ पटेनतिरस्करिण्या अन्तरम। नपटान्तरमत्र॥

अपटी। स्त्री। काण्डपटे। वस्त्रप्राकरणे। कनात इतिभाषा॥ इतिहेमचन्द्रः॥ त्रि। पटशून्ये॥

अपटुः। त्रि। अचतुरे। कार्य्याक्षमे॥ पटोरन्यः॥ रोगिणि। आमयाविनि॥

अपतर्पणम्। न। रोगादैाभोजनाभावे। लङ्घने॥ इतिहेमचन्द्रः॥ अपपूर्वात् तृपेर्ल्युट्॥

अपतानकम्। न। वायुरोगविशेषे। प्रताने॥ यथा। दृष्टिंसंस्तभ्यसंज्ञांचहत्वाकण्ठेनकूजति। हृदिमुक्तेनरःस्वास्थ्यंयाति मोहंवृतेपुन॥ वायुनादारुणंप्राहुरेके तदपतानकमिति॥

अपत्यम्। न। सन्ताने। दुहितरि॥ पुत्रे॥ नपतन्तिपितरोऽनेन। पत्लृगतैा। वाहुलकाद्यत्। अघ्न्यादिर्वा॥ यन्निमित्तंयस्यापतनंतत्तस्यापत्यमितिफलितोर्थ.। तथाचपैात्रादिरपि पितामहादीनामपतनेहेतुरिति तेषामपत्यंभवति॥

अपत्यदा। स्त्री। क्षुपविशेषे। गर्भदात्र्याम्॥

अपत्यपथः। पुं। भगे। योनैा॥

अपत्यशत्रु.। पु। कुलीरे। कर्कटे॥

अपत्र.। पुं। करीरे॥ नविद्यन्ते पत्राणियस्य॥ त्रि। पत्रहीने॥

अपत्रप:। त्रि। निर्लज्जे॥ अपगता त्रपायस्यसः॥

अपत्रपा। स्त्री। परतोह्रियाम्। भिन्ना

पुरस्तोजातलज्जायाम् ॥ स्त्री माने । इतिरत्नकोशः ॥

अपत्रपिष्णुः । त्रि । लज्जाढ्ये । लज्जाशीले । स्वभावतः सत्रपे । अपत्रपते । अलंकृञिति तीष्णुच् ॥

अपथम् । न । । । अमार्गे । पथोऽभावः । नञितितत्पुरुषः । पथोविभाषेलिपाच्चिकोऽप्रत्ययः ॥ अपथानिगाहते मूढः । अपथंनपुंसकम् । तत्पुरुषइत्येव । अपथोदेशः । अपथानदी ॥ अपथे पदमर्पयन्तिहि श्रुतवन्तोपिरजोनिमीलिता. ॥ योनौ ॥

अपन्थाः । पुं । अपथे । मार्गाभावे ॥ पथोऽभावः नञितितत्पुरुषः । अपथंनपुंसकमिति कृतसमासान्तस्यनिर्देशान्नक्लीवत्वम् ॥

अपथ्यम् । त्रि । रोग्यभोज्ये । अहिते ॥ नपथ्यम् ॥

अपदस्थः । त्रि । स्वकर्मच्युते ॥

अपदानम् । न । वृत्तेकर्मणि । अवदाने ॥ हस्ति: प्रवर्तनं साप्रशस्ता विद्यते यत्र तत्र । यत्र कर्मणि हस्तिः सर्वैः प्रशस्यते तस्मिन्नित्यर्थः । दैप् शोधने । भावे ल्युट् । निन्द्यदाने ॥ अपकृष्टंदानम् ॥

अपदान्तरम् । त्रि । अनन्तरे । अव्यवहिते ॥ नपदान्तरमत्र ॥

अपदिशम् । न । । । दिक्कोणे । दिशोर्मध्ये । विदिशि ॥ दिशोर्मध्यम् । अव्ययमिति योगविभागात्समासः । दिशशब्दस्यशरदादिषु पाठाट्टच् । अव्ययीभावश्चेतिसूत्राभ्यांक्लीवत्वाव्ययत्वयोर्विधानम् । तेननाव्ययीभावादतोमत्वपंचम्या इत्यादिप्रवृत्तिः ॥ अपेतिमध्यवाची आवन्तेन समासेतु टजनापेक्षित. ॥

अपदिष्टः । त्रि । प्रयुक्ते ॥ यथाकालात्ययापदिष्टः । अपदिश्यते । दिशअतिसर्जने । क्त ॥

अपदेशः । पुं । शरव्ये । लक्ष्ये । निमित्ते ॥ व्याजे ॥ स्थाने ॥ अपदेशनम् - अपदिशते वा । दिश अतिसर्जने । घञ् ॥

अपध्वंसजः । पुं । वर्णसङ्करे । यथा । शूद्रायांतु सधर्माणः सर्वेऽपध्वंसजाः स्मृता इतिमनुः ॥

अपध्वस्तः । त्रि । परित्यक्ते । निन्दिते । अवचूर्णिते । अपध्वंसतेस्म । ध्वंसु अधःस्रंसने गतौच । क्तः ॥

अपनयनम् । न । अधःप्रापणे । दूरीकरणे । खण्डने ॥

अपनीतः । त्रि । विनीते । कृते ॥

अपनुतिः । स्त्री । अपनोदे । खण्डने ॥

अपनेयः । त्रि । अपनोद्ये । निरस्ये ॥

अपनोद. । पुं । अपनोदने ॥

अपनोदनम् । न । दूरी करणे ॥

अपपात्रितः । त्रि । उत्कटदोषैर्ज्ञातिभि र्भिन्नोदकीकृते ॥ यथा । अपपात्रितस्यरिक्थपिण्डोदकानि निवर्त्तन्त इतिशङ्खापस्तम्बौ ॥

अपभ्रंशः । पुं । अपशब्दे । अशास्त्रशब्दे । असंस्कृतशब्दे । ग्राम्यभाषायाम् ॥ यथा दण्डी । आभीरादिगिरःकाव्येष्वपभ्रंशइतिस्मृतः । शास्त्रेषुसंस्कृतादन्यदपभ्रंशतयोदितमिति ॥ संस्कृतादपभ्रश्यति । भ्रंशुअध.पतने । पचाद्यच । पतने ॥ यथा । अन्याह्लादि र्भवति महतामप्यप भ्रंशनिष्ठेत्यभिज्ञानशकुन्तला ॥

अपमः । पुं । क्रान्तौ । सूर्यगमनार्थतिर्यग्गोलरेखायाम् ॥

अपमानम् । न । अनादरे ॥ अस्यपर्यायायथा । स्यादवज्ञापरीहार परिहारः पराभाव' । अपमानपरिभवस्तिरस्कारस्तिरस्क्रिया ॥ अवहेलाच हेला स्यादवहेलनहेलने । च्पेपोनिकार धिक्कारौपर्याया'स्युरनादर इतिशब्द रत्नावली ॥ यथा । वेदस्यब्राह्मणानाञ्च अपमानादधोगतिरिति ॥

अपमित्यकम् । न । ऋणे ॥

अपमृत्यु. । पु । विनारोगेणमरणे ॥ पश्चिमतस्समगदंष्ट्रिशृङ्गिनखिपतना-शनवज्राग्निविषवन्धजलप्रवेशाद्युच्चतादिजन्यमरणे इतिकेचित् ॥ अपकृष्टोमृत्युः ॥

अपमृषितम् । न । अविस्पष्टवाक्ये ॥

अपयानम् । न । पलायने ॥ यामापणे अेमपूर्वः । ल्युट् ॥

अपरम् । न । गजपश्चार्द्धे ॥ त्रि । इतरस्मिन ॥ अर्वाचीने ॥ निकृष्टे । द्रव्यादिसामान्ये ॥ कार्ये ॥ सन्निकृष्टे । परं नभवतीत्यपरम् ॥ पु । पाद पश्चिमे ॥ अपर'पश्चिम'पाद' इतिगजप्रकरणे वैजयन्ती ॥

अपरक्तः । त्रि । अननुकूले ॥ विरक्ते ॥

अपरताल' । पु । गिरिविशेषे ॥

अपरति । स्त्री । निवृत्तौ ॥ अपरमेभावे क्तिन् ॥

अपरत्र । । । पश्चादर्थे ॥

अपरत्वम् । न । अपरव्यवहारकारणे ॥ तद्द्विविधम । दिक्कृतं कालकृतञ्चेति । समीपस्थे दिक्कृतम् कनिष्ठे कालकृतमिति । अपरस्यभावः ॥

अपरपक्ष. । पुं । कृष्णपक्षे ॥

अपररात्रः । पुं । रात्रिशेषे । उत्तमन्द्रे ॥ अपरंरात्रेः । पूर्वापराधरेति समासेअङः सर्वैकदेशेत्यच ॥

अपरवक्त्रम् । न । वैतालीयसंज्ञके वृत्ते ॥

अपरवैराग्यम। न। वैराग्यविशेषे। यतमानसंज्ञाव्यतिरेकसंज्ञैकेन्द्रिय-संज्ञावशीकारसंज्ञाभेदाच्चतुर्विधे सम्प्रज्ञातस्यान्तरङ्गे। असम्प्रज्ञातस्य वहिरङ्गे॥

अपरस्पर:।त्रि। क्रियाया: क्रियावतां च सातत्त्ये। अपरश्च परश्चेति द्वन्द्व:। अपरस्परा: क्रियासातत्येइति सुट्निपात्यते क्रियासातत्त्ये। अपरस्परं गच्छन्ति। सततमविच्छेदेन गच्छन्तीत्यर्थ:। निर्दिष्टं कर्मसातत्त्ये सुधीभिरपरस्परम्। क्रियावतां सातत्त्ये तु स्त्रिनयम्। अपरस्परा:सार्था: स्त्रियश्च गच्छन्ति अपरस्पराणि कुलानि॥

अपरा। स्त्री। जरायौ॥ पश्चिमदिशि॥

अपराग:। पुं। अप्रीतौ। द्वेषे॥

अपराङ्गम्। न। गुणीभूतव्यङ्गभेदे॥ इतिकाव्यप्रकाश:॥

अपराजित.। पुं। ईशे॥ विष्णौ॥ ऋषिभेदे॥ नपराजित:। गन्धधूपे। त्रि। अजिते॥

अपराजिता। स्त्री। उमायाम्। जयायाम्। आस्फोतिप्रसिद्धायाम्। जयन्त्याम। अश्मनपर्ण्याम्॥ शेफाल्याम॥ शमीभेदे। शंखिन्याम्॥ क्षुपप्रभेदे। स्वल्पफलायाम्॥ गिरिकर्ण्याम्। विष्णुक्रान्तायाम्॥ श्वेतनीलपुष्पभेदाद्द्विविधे अपराजिते। अपराजिते कटूमेध्ये शीतेकण्ठ्ये सुदृष्टिदे। कुष्ठमूत्रत्रिदोषाम शोथव्रणविषापहे। कषायेकटुपाकेचतिक्तेचस्मृतिबुद्धिदे। ऐशान्यांदिशि। नपराजिता॥ ब्रह्मलोकेहिरण्यगर्भपुर्य्याम्। ब्रह्मचर्यसाधनवद्भ्योऽन्यैर्नजीयते इति। जी॰। क्त:।

अपराद्ध'। त्रि। अपराधिनि। अपराध्यति। राध॰। क्त:।

अपराद्धपृषत्क:। त्रि। लक्ष्याप्राप्तशरे। अपराद्ध: पृषत्कोबाणोऽस्य। अपराद्धपृषत्कोसौ लक्ष्याद्यश्च्युतसायक:।

अपराध:। पुं। आगसि। दण्डयोग्यकर्मणि। अपराधनम्। राधसंसिद्धौ घञ्॥ त्रि। राधाभाववति।

अपराधी। त्रि। कृतापराधे। भेददर्शिनि। अथोक्तंविद्यारण्यगुरुभि:।विप्रञ्चवत्ब्रह्मलोकदेवभूतादिकं जगत्। स्वस्माद्भेदेन पश्यन्तंक्रोशये दपराधिनम्। यदस्तितन्नजानातियन्नेवास्ति तदीक्षते। इत्येवमपराधोस्यविद्यते भेददर्शिनइति। योन्यथासन्तमात्मानमन्यथा प्रतिपद्यते। किंतेननकृतं पापंचौरेणात्मापहारिणेति॥

अपरान्त। त्रि। पाश्चात्त्ये॥ अपरान्तास्तुपाश्चात्त्या इतियादव:॥ समुद्रमध्य

देशवर्त्तिजने । यथा । अवकाशंकिलोदन्वान् रामायाभ्यर्थितोददौ । अपरान्तमहीपालव्याजेनरघवेकरमिति ॥

अपराप्रकृतिः । स्त्री । भूमिरापोनलोवायुः खंमनोबुद्धिरेवच । अहंकार इतीयंमेभिन्नाप्रकृतिरष्टधा । अपरेयमितिभगवद्गीता ॥ चेतनत्वशून्यायाम् । अपरायांशक्तौ ॥ अपराचासौप्रकृतिश्च ॥

अपराभुक्तिः । स्त्री । पातालादिकलान्तावर्त्तिविविधैश्वर्यसम्पन्नतत्तद्भुवनवासिस्वभावे ॥

अपरामुक्तिः । स्त्री । मंत्रमंत्रेश्वरत्वे ॥ अपराचासौमुक्तिश्च ॥

अपराविद्या । स्त्री । ऋग्वेदादिविद्यायाम् ॥ ऋग्यजुःसामाथर्वाख्यावेदाअङ्गानिचद्विज । शिक्षाकल्पोव्याकरणंनिरुक्तंज्योतिषांगतिः ॥ छन्दोभिधानंमीमांसाधर्मशास्त्रपुराणकम् । न्यायोवैद्यकगान्धर्वंधनुर्वेदोर्थशास्त्रकम् ॥ अपरेयं पराविद्यायया ब्रह्माधिगम्यते । अपराचासौविद्याच ॥

अपराशक्तिः । स्त्री । अपराप्रकृतौ ॥ अपराचासौशक्तिश्च ॥

अपराह्णः । पुं । दिनान्तांशे ॥ तस्यभेदाः । द्विधाविभक्तस्यदिनस्यशेषभागः । त्रिधाविभक्तस्यदिनस्यतृतीयभागः । सतुत्रिंशद्दण्डदिनमानेविंशतिदण्डात्परंदशदण्डयावत् । पञ्चधाविभक्तस्यदिनस्यचतुर्थभागः । सचाष्टादशदण्डात्परंषट्दण्डंयावदितिश्रुतिस्मृतिप्रसिद्धाः ॥ अह्नअपरमपराह्णः । पूर्वापरेत्येकदेशिसमासः । टच् । अह्नोह्नएतेभ्यइत्यह्नादेशः । अह्नोदन्तादितिणत्वम् ॥

अपराह्णतनः । त्रि । अपराह्णे भवेवस्तुनि । आपराह्णिके ॥ अपराह्णः सोढोऽस्य । विभाषापूर्वाह्णापराह्णाभ्यामितिट्युट्युलौतुट्च ॥

अपराह्णेतन. । त्रि । अपराह्णेभवेवस्तुनि । आपराह्णिके ॥ अपराह्णेभवः । ट्युट्युलौतुट्च । घकालतनेष्विति सप्तम्याअलुक् ॥

अपरिकलित. । त्रि । अज्ञाते ॥ अदृष्टे ॥ नपरिकलितः ॥

अपरिग्रहः । पुं । असङ्ग्रहे ॥ अस्वीकारे ॥ नपरिग्रहः ॥ परिव्राजि ॥ नविद्यतेकन्थाकौपीनाच्छादनवस्त्रादिव्यतिरिक्तःपरिग्रहोयस्य ॥ त्रि । परिग्रहहीने ॥

अपरिच्छदः । त्रि । दरिद्रे ॥ नविद्यते परिच्छदोयस्यसः ॥

अपरिच्छिन्नम् । त्रि । परिच्छेदरहिते । असीमनि ॥

अपरिज्ञानम् । न । तत्त्वाविवेके । मूढतायाम् ॥

अपरिम्लानः । पुं । रक्ताम्लानवृक्षे । त्रि । म्लानिरहिते ।

अपरिसङ्ख्यानम् । न । आनन्त्ये । नपरिसंख्यानम् ॥

अपरिहार्य्यः । त्रि । परिहर्त्तुमशक्ये । अत्याज्ये ॥

अपरेद्युः । I । अपरदिने । अपरे अहनि । सद्यः पर्वदित्यपरशब्दादेद्युस् ॥

अपरोक्षम् । त्रि । प्रत्यक्षे । असंभावनादिनिरासेतु विचारविपाकात्तेनैव प्रमाणेन जनितं ज्ञानं प्रतिबन्धाभावात् फलं जनयदपरोक्षमित्युच्यते । अक्ष्णामिंद्रियाणां परोऽतीतोनभवतीत्यपरोक्षम् । नपरोक्षंवा ।

अपर्णा । स्त्री । पार्वत्याम् । नपर्णान्यस्याः । तपसिपर्णानामप्यनशनात् । त्रि । पर्णशून्ये ॥

अपर्य्यनीकः । त्रि । निस्तेजसि ।

अपर्याप्तम् । त्रि । असमर्थे । पर्याप्तिशून्ये ।

अपर्वदण्डः । पुं । रामशरतृणे । इति राजनिर्घण्टः ॥

अपलम् । न । कीलके । त्रि । मांसहीने ॥

अपलापः । पुं । प्रेम्णि । अपह्नवे । सतोप्यसत्त्वेनकथने । धार्यमाणेन नधारयामीत्याद्युक्तौ । अपलपनम् । घञ् ।

अपलाषिका । स्त्री । तृष्णायाम् ॥ इतिहेमचन्द्रः ॥

अपवरकः । पुं । वासौकसि । गर्भगृहे । अपव्रियते वृणोतिवा । वृञ्० । कृञादिभ्यः संज्ञायावुन् । फन्सूस खा लटैन इति प्रसिद्धे । आवरके । यथा । दीपोऽपवरकस्यान्तर्वर्त्तते तत्प्रभावहिरितिध्यानदीपे विद्यारण्यगुरवः ।

अपवर्गः । पुं । त्यागे । मोक्षे । कार्यावसानसाफल्ये । फलप्राप्तिपूर्विकायां क्रियापरिसमाप्तौ । कर्मफले । तदत्यन्तविमोक्षोपवर्गः । न्या० १ । २२ । तस्यदुःखस्य अत्यन्तविमोक्षः स्वसमानाधिकरणदुःखासमानकालीनो ध्वंसः । तस्य च जन्मापायादेव सम्भव इत्याशयेनदुःखेन जन्मनात्यन्तं-विमुक्तिरपवर्गइति भाष्यम् । दुःखे-नदुःखानुषङ्गेणेत्यर्थः । अपवर्जनमपवर्गः । वृजीवर्जने । भावेघञ् । दुःखाभावे । नाशे । पूर्णतायामितिधरणिः ।

अपवर्गगुरुः । पुं । सदाशिवे । हरौ । मोक्षमार्गप्रदर्शके ।

अपवर्जनम् । न । दाने । निर्वाणे । मोक्षे । परित्यागे ॥ वृजीवर्जने अपपूर्वः । भावेल्युट् ॥

अपवर्जितः । त्रि । परिहृते । त्यक्ते ।

अपवर्त्तनम् । न । परिवर्त्ते । वक्रीभावे ॥

अपवर्त्तितः । त्रि । सञ्चलिते ॥

अपवादः । पुं । निन्दायाम् ॥ आज्ञायाम ॥ विस्रम्भे । प्रणये । बाधके ॥ अपवादो नाम रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्त्तस्यावस्तुनो ऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वमिति । कार्यस्य कारणमात्र सत्तावशेषणम् कारणस्वरूपव्यतिरेकेण कार्यस्यासत्तावधारणं वाऽपवाद इत्यर्थः ॥ अपवदनम् । वद अभिवादने इत्यस्याः । भावे घञ् ॥ अपोद्यते । वदत्यनार्थवाचि । घञ्वा ॥

अपवारणम् । न । अन्तर्द्धौ ॥ वृञ् आच्छादने । चुरादिण्यन्तादस्माद्भावेल्युट् ॥

अपवारितम् । त्रि । अन्तर्हिते । आवृते ॥

अपवित्रः । त्रि । अशुद्धे ॥ नपवित्रः ॥

अपविद्धम् । त्रि । प्रतिक्षिप्ते । प्रत्याख्याते ॥ ध्वस्ते ॥ त्यक्ते ॥ पुं । पुत्रविशेषे यथा । मातापितृभ्यामुत्सृष्टं तयोरन्यतरेणवा । यंपुत्रंपरिगृह्णीयादपविद्धःसउच्यतेइतिमनुः ॥

अपविषा । स्त्री । निर्विषीतृणे । राजनिर्घण्टः ॥

अपवृत्तिः । स्त्री । अपवारणे ॥

अपवृत्त । त्रि । पराङ्मुखीभूते

अपशब्दः । पुं । असंस्कृतशब्दे । ... शे ॥ अपभ्रष्ट. शब्दोपशब्दः ॥ येनापशब्दो नवक्तव्यः । यथा वान्भाष्यकारः । तेऽसुराहेलयहेलयइतिकुर्वन्तःपराबभूवु स्तस्माद्ब्राह्मणेन नम्लेच्छितवैनापभाषितवैम्लेच्छोहवाएषयदपशब्द. म्लेच्छामाभूमेत्यध्येयं व्याकरणमिति ॥ म्लेच्छितवाइत्यस्यपर्यायोनापभाषितवैकृत्यार्थइतितवै प्रत्ययइतिकैय्यटः एवंहिशब्दज्ञानेधर्म एवमपशब्दज्ञानेप्यधर्म । इतिमहाभाष्ये एवञ्च अपशब्दज्ञानमधर्मसाधनं धर्महेतुशब्दज्ञानविरोधित्वात यद्विरोधि ततद्विरोधिफलकं यथाश्लेष्मिकद्रव्यसेवाश्लेष्मवतः इत्यनुमानम् ॥ श्लेष्मिकद्रव्यसेवयाश्लेष्मव्याधिसम्भवस्तद्विपरीतसेवया ... ण्यमित्यर्थः ॥

अपशुक् । पुं । आत्मनि ॥ अपगत ... यस्मात् ॥

अपशोकः । पुं । अशोकपादपे ॥

अपष्टम् । न । अङ्कुशाग्रे । इतिहेम ...

अपष्ठु । । । निरवद्ये ॥ शोभनार्थे । वि परीते ॥

अपष्ठुः । पुं । काले । त्रि । वामे । प्रति कूले । विरुद्धार्थे । अपतिष्ठति । ष्ठागतिनिवृत्तौ । अपदुःसुषुभ्यःस्थ इति कुः सुषामादिः ।

अपष्ठुतम् । त्रि । निन्दिते । विपरीते ।

अपस । न । यज्ञकार्ये । अपनशब्दार्थे ॥ आप्नोति । आप्लृ० । आपःकर्माख्यायांह्रस्वोनुट्चवेत्यसुन् पाक्षिकोनुडभावः ।

अपसदः । पुं । अधमे । नीचे । अपकृष्टमपकृष्टेवासीदति । षद्लृविशरणादौ । पचाद्यच् ।

अपसरः । पुं । अपसरणे । सर्त्तेरप् ॥

अपसरणम् । न । स्थानात्स्थानान्तरगमने ।

अपसर्जनम् । न । परिवर्जने । दाने । आम्राते । अपसृज्यते । सृज० ल्युट् । मोक्षे । मारणे ।

अपसर्पः । त्रि । चरे । अपसर्पति । सृप्लृ गतौ । पचाद्यच ॥ पुं । अहिभेदे ॥ अपक्रमे ।

अपसर्पणम् । न । पृष्ठतोगमने ।

अपसव्यवि । त्रि । पितृतीर्थे । प्रदेशिन्य ङ्गुष्ठयोर्मध्ये । यथा । प्रदेशिन्यङ्गुष्ठयो रन्तरा अपसव्यवि अपसव्यंवा तेनपि,

दृभ्योनिदधाति इतिश्राद्धतत्त्वे भट्टभाष्यधृतगृह्यम् ॥

अपसव्यम् । त्रि । शरीरदक्षिणे । शरीरस्यदक्षिणभागे । प्रतिकूले । विरुद्धार्थे । न । पितृतीर्थे । अपसव्यवि अपगतम् अपक्रान्तंवा सव्यात ॥

अपसारणम् । न । अपनयने ।

अपसारित. । त्रि । उत्सारिते ॥

अपसिद्धान्तः । पुं । स्वीकृतसिद्धान्तात् प्रच्यवे । तल्लक्षणमाह । सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गो ऽपसिद्धान्तः । ५ । ६६ सिद्धान्तं स्वशास्त्रकाराभ्युपगतमर्थं स्वीकृत्याऽनियमात्तन्नियमप्रच्यवात् कथाप्रसङ्गइति । तथाच कथायां स्वीकृतसिद्धान्तप्रच्यवोऽपसिद्धान्तः।तथाचसांख्यमतेनाहं वदिष्यामीत्यभ्युपेत्यारब्धायांकथायाम् आविर्भावस्याविर्भावाभ्युपगमेऽनवस्थेति दूषणोद्धारायाविर्भावस्यासतउत्पत्तिंयद्यभ्युपेतितद ऽपसिद्धान्तः। यस्त्वेकदेशिमतेनकथामारभते तस्यशास्त्रकाराभ्युपगमविरोधेनाऽपसिद्धान्तइतिविबोधयितुमभ्युपेत्येत्युक्तम् । सौगतास्त्वपसिद्धान्तंदूषणं नमन्यन्ते इत्यन्यदेतत् ॥ अपकृष्टः सिद्धान्तः ॥

अपसोपानः । पुं । [illegible] ॥

अपस्कर । पुं । रथाङ्गे । चक्रभिन्नेरथा रम्भके ॥ अपकीर्यतेऽस्मि स्वस्वस्थाने चिप्यते । कृविक्षेपे । ऋदोरप् अपस्करोरथाङ्गमितिसाधु. ॥

अपस्नात. । त्रि । मृतस्नाते । मृतमुद्दिश्यस्नातेजने ॥ अपकृष्टंस्नात । प्रादयोगताद्यर्थइतिसमास. ॥ संस्कारार्थंस्नापितेमृते ॥ इतिस्वामी ॥

अपस्नानम् । न । मरणनिमित्तस्नाने । मृतस्नाने ॥ अपकृष्टंस्नानम् ॥

अपस्मार. । पु । रोगभेदे । भूतविक्रिया याम् । मिरगीतिख्याते ॥ तस्यसामान्यरूपम् । तमःप्रवेशःसंरम्भोदोषोद्रेकहतस्मृतिः । अपस्मार इतिज्ञेयो गदोघोरतरोऽस्ति. ॥ अस्यौषधंयथा । य स्वादेत्क्षीरभक्ताशीमाक्षिकेण वचारजः । अपस्मारंमहाघोरं चिरोत्थंसनयेद्ध्रुवमिति ॥ वचाद्युरवच । अपिच । देवकीटमेषोविधिवद्दानीयरविवासरे । कण्ठेभुजेवासन्धार्य्यं जयेदुग्रामपस्मृतिमिति ॥ अयंकीटो नदीतीरेसिकतामध्येतिष्ठति । इति भावप्रकाशः ॥

अपस्मारी । त्रि । अपस्माररोगिणि ॥ तल्लक्षणम् । क्रुद्धैर्धातुभिराहतेऽयमनसिप्राणीमन'सन्दशनदन्तान्खादतिफेनमुद्गिरतिदोः पादौक्षिपन्भूढधो. । पश्यन्रूपमसत् क्षितौनिपततिव्यर्था करोतिक्रियां विभ्यत्सत्वयकेवशाम्यतिगतेवेगेऽस्यपस्माररुक् ॥ इति ॥

अपहत. । त्रि । अपनीते ॥ नष्टे ॥ अपहन्यतेस्म । हन० । क्तः ॥

अपहतपाप्मा । पुं । वेदान्तवेद्यआत्मनि ॥ अपहत पाप्माधर्माऽधर्माख्योयस्यसः ॥

अपहतिः । स्त्री । विनाशे । उच्छेदे ॥

अपहन्ता । त्रि । विनाशयितरि ॥

अपहर्ता । त्रि । अपहारिणि ॥ यथा। आपदामपहर्तारं दातारं सर्वसम्पदाम् । लोकाभिरामं श्रीरामंभूयोभूयोनमाम्यहमिति ॥

अपहसितः । त्रि । निरस्ते ॥

अपहार । पु । अपचये । हानौ ॥ अपहरणे । चौर्ये ॥ सङ्गोपने ॥ धनस्वाम्यनुपयोगिव्यये ॥ इतिदायभाग. ॥ अपहरणम् । हृञ्हरणे । घञ् ॥

अपहारकः । त्रि । अपहारिणि । अपहरणकर्त्तरि ॥ अपहरति । हृञो ण्वुल् ॥

अपहारी । त्रि । अपहरणशीले । अपहर्त्तरि ॥

अपहास. । पुं । अकारणहास्ये ॥

अपहृत । त्रि । अपनीते ॥

अपह्नवः । पुं । स्नेहे । अपलापे । इति मेदिनीहेमचन्द्रौ । अपह्नवनम् । ह्नु ङ् अपनयने । ह्नुदोरम् ।

अपह्नुतिः । स्त्री । अपलापे । अर्थालंकारे ॥ प्रकृतंयन्निषिध्यान्यत् साध्यतेसात्वपह्नुतिः । उपमेयमसत्यंकृत्वोपमानंसत्यतयायत्स्थाप्यतेसात्वपह्नुतिः । उदाहरणम् । अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये कलङ्कोनैवायंविलसति शशाङ्कस्यवपुषि । अमुष्येयंमन्येविगलदमृतस्यन्दिशिशिरे रतिश्रान्ता शेते रजनिरमणीगाढमुरसि ॥ इत्थंवा । वतसखिकियदेतत् पश्यवैरं स्मरस्य प्रियविरहकृशेऽस्मिन् रागिलोकेतथाहि । उपवनसहकारोद्भासिभृङ्गच्छलेनप्रतिविशिखमनेनोट्टङ्कितंकालकूटम् । अत्रहि न सभृङ्गाणिसहकाराणि अपितु सकालकूटाः शरा इति प्रतीतिः ॥ एवंवा । अमुष्मिंल्लावण्यामृतसरसिनूनंमृगदृशः स्मरः शर्वप्लुष्टःपृथुजघनभागेनिपतित । यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे शिखाधूमस्येयंपरिणमतिरोमावलिवपुः । अत्ररोमावलिर्धूमशिखेयमिति प्रतिपत्तिः ॥ एवमियंभङ्ग्यन्तरैरप्यूह्या । अपह्नवनम् । ह्नुङ्

क्तिन् ॥

अपांनाथः । पुं । समुद्रे । अकूपारे । इति राजनिर्घण्टः ॥

अपाकः । पुं । अजीर्णतायाम ॥ त्रि । पाकाभावविशिष्टे ॥

अपाकरणम् । न । निराकरणे । अपाङ्पूर्वात् कृञोल्युट् ।

अपाकशाकम । न । आर्द्रके । इतिराजनिर्घण्टः ॥

अपाकृतम् । त्रि । अपोहिते । त्यक्ते ॥ अपाकारि । डुकृञ॰ । क्तः ॥

अपाकृतिः । स्त्री । विकारे । अपाकरणे ॥

अपाचम् । त्रि । प्रत्यचे । इतित्रिकाण्डशेषः ॥

अपाङ्क्तयः । त्रि । पङ्क्तिभोजनानर्हे सङ्क्ति:सहैकपंक्त्यांभोजनायोग्ये ॥ तेच । येस्तेनपतितक्लीबायेचनास्तिकवृत्तयः इत्यादिवचनैर्मनुनोक्ताबोध्याः ।

अपाङ्गः । पुं । नेत्रान्ते । तिलके । त्रि । अङ्गहीने । अपगतोऽङ्गात् । निरादय इतिसमासः ॥ अपकृष्टोङ्गाद्वा । अपकृष्टान्यङ्गान्यस्माद्वा । अपाङ्गति । अगिगतौ । पचाद्यच्वा ।

अपाङ्गक । पुं । अपामार्गे । नेत्रान्ते ॥ त्रि । अंगहीने ।

अपाङ्गदर्शनम् । न । कटाक्षे । अपांगेन नेत्रान्तेन दर्शनम् । इतिहेमचन्द्रः ।

अपाग । त्रि । दक्षिणदिग्भववस्तुनि । अपाचीने ॥

अपाची । स्त्री । दक्षिणदिशि ॥ अङ्को मध्ये अंचतिसूर्यम् । अपेत्यव्ययंम ध्यार्थे अपदिशमितिवत् । अंचुगति पूजनयोः । ऋत्विगादिनाक्विन् । उगितश्चेतिङीप् ॥

अपाचीनम् ॥ त्रि । विपर्यस्ते ॥ अपाग र्थे । दक्षिणदिग्भववस्तुनि ॥ अपागे व । विभाषाञ्चेरदिक् स्त्रियामिति खः । तस्य ईनादेशः ॥

अपाच्यम् । त्रि । दक्षिणदिग्भवे ॥ पा कानर्हे ॥ द्युप्रागपागित्यादिनाशैषि कोयत् । न पाच्यम् ॥

अपाटवम् । न । रोगे ॥ अपटुत्वे ॥ न विद्यते पाटवं यस्मिन् ॥

अपात्रम् । न । योग्यताहीने । निन्दिते । विद्यातपोहीने । नटविटादौ । कुपात्रे ॥ नपात्रम् ॥ अपात्रे पातयेद्द त्तं सुवर्णं नरकार्णवे ॥ इतिमलमासतत्त्वम् ॥

अपात्रीकरणम् । न । नवविधपापमध्ये पापविशेषे ॥ तच्चतुर्विधंभवति यथा । निन्दितधनादानम १ । वाणिज्यम् २ । शूद्रसेवनम् ३ । असत्यभाषणञ्च ४ । इति ॥ यथाहमनुः । निन्दितेभ्योधनादानंवाणिज्यंशूद्रसेवनम् । अपात्रीकरणं ज्ञेयमसत्यस्यचभाषणमिति ॥

अपादानम् । न । विश्लेषेऽवधिभूते । पंचमीकारके । यस्माद्वस्तुनोवस्त्वन्तरस्यचलनंभवतितस्मिन् । विश्लेषहेतुक्रियानाश्रयत्वेसतिविश्लेषाश्रय इत्यर्थः ॥ तत्र काद्यार्थेपंचमीस्यात् । यथा । यतोऽपायः । यथावृक्षात्पर्णं पतति १ ॥ यतो भीः । यथाव्याघ्राद्बिभेति २ ॥ यतोजुगुप्सा । यथा पापात् जुगुप्सते धीरः ३ ॥ यतःपराजयः । यथा सिंहात् पराजयते हस्ती ४ ॥ यतःप्रमादः । यथा धर्मात् प्रमाद्यतिनीचः ५ ॥ यत आदानम् । यथा भूपात् धनमादत्तेविप्रः ६ ॥ यतो भूः । यथा पितुः पुत्रोजायते ७ ॥ यतस्त्राणम् । यथा व्याघ्रात गां रक्षतिगोपः ८ ॥ यतो विरामः ॥ यथा पापाद्विरमतिविप्रः ९ ॥ यतोऽन्तर्द्धिः । यथा गुरोरन्तर्द्धत्तेशिष्यः १० ॥ यतो वारणम् । यथायवेभ्योगां वारयति ११ ॥ इतिमुग्धबोधटीका ॥

अपानः । पुं । गुदस्थवायौ । नाभेरधस्ताद्गमनवति मलापनयनव्यापारे गुपाद्यादिस्थानवर्त्तिनिवायौ ॥ यथा । अधोनयत्यपानस्तु आहारञ्च क्रमाशमधः । मूत्रशुक्रवहोवायुरपान

क्लेसक्तोस्तित: । कृकाटिकापृष्ठपार्श्व पायूपस्थस्थस्ति वायु: ॥ न । गुदे । अपसरणेनानित्यनेन । इत्यश्वेति शुक ।

अपान्तरतमा: । पुं । वेदाचार्यपुरा णर्षिविशेषे ॥ य:कश्चिद्द्वापरयो: स न्धौ विष्णुनियोगात् कृष्णद्वैपायन: सम्बभूवेतिस्मृतैा प्रसिद्धम् ॥

अपान्नपात् । पुं । एतन्नामधेयेदेवे ॥

अपाप: । त्रि । पापशून्ये । निष्पापे ॥

अपापविद्ध: । त्रि । धर्माधर्मवर्जिते ॥ न पापविद्ध: ॥

अपामार्ग: । पुं । प्रत्यक्पर्ण्याम् ॥ अप मार्ज्यत्यनेन अपमृज्यते ऽनेनव्या ध्यादिरितिवा । मृजूष० । हलश्चे तिघञ् । निष्ठायामनिट्त्वात्कुत्व म् उपसर्गस्य घञीतिदीघ. ॥ अप कृष्टस्तमन्तान्मार्गोऽस्येतिवा ॥ अ पामार्ग:सरस्तीक्ष्णोदीपनस्तिक्तक: कटु: । पाचनोनावनच्छर्दिकफमे दोमिवापह: । निहन्तिहृद्रुसिध्मार्श: कंडूशूलोदरापची: । अपामार्गोऽरु णोवातविष्टंभीकफकृद्धिम: । रूक्ष: पूर्वगुणैर्न्यून: कथितोगुणवेदिभि: । अपामार्गफलंस्वादुरसे पाकेचदुर्ज रम् । विष्टंभिवातलंरूक्षंरक्तपित्त प्रसादन मितिभावप्रकाश: ॥

अपाम्पति: । पुं । समुद्रे । वरुणे ॥ अ पापति: । तत्पुरुषे कृतिबहुलमि त्यलुक ॥

अपाम्पित्तम् । न । अग्नौ ॥ अपांपित्त मिवदाहकत्वात् । अलुक् ॥

अपाय: । पुं । विश्लेषे ॥ अप्यये ॥ ना शे । अपगमे ॥

अपार: । त्रि । उत्तरावधिवर्जिते ॥ अ पार: संसाराकूपार: । अनन्तमहि मनि ॥ नविद्यते पार उत्तरावधिर्य स्य ॥ न । अवारे । नद्यादेरर्वाचि पारे ॥

अपार्थं । त्रि । अर्थशून्ये ।

अपार्थकम् । न । इमंलक्षयतिगोतम: । पैार्वापर्यायोगादप्रतिसम्बद्धार्थ मपा र्थकम् ॥ ५ । ५२ । पौर्वापर्यंकार्यका रणभावस्तस्यायोगादसम्भवात्शाब्द बोधजनकाकाङ्क्षाज्ञानाद्यभावादि- ति फलितार्थ: । अप्रतिसंबद्धो ऽसम्ब द्धोर्थ: प्रयोजनंशाब्दबोधरूपं यत्र । यथापि दशदाडिमानि षडपूपा: कुण्डमजाजिनमित्यादाववान्तरवा क्यादर्थबोधसत्वाद्व्याप्तिरतिव्याप्ति स्तनिरर्थके । तथाप्यभिमतवाक्या र्थबोधानुकूलाकांक्षादिशून्यबोधजन कत्वं तत्। अविज्ञातार्थे तुस्वस्य बोधोभवत्येवेति नातिव्याप्ति: । उदा

हृत्यन्तु । अयोग्यानासन्नानाकांक्ष वाक्यम् ॥ ५३ ॥ अनर्थके ॥ व्यर्थे ॥

अपावृत । त्रि । पिहिते ॥ अप्रतिबद्धे । स्वतन्त्रे ॥ उद्घाटिते ॥ अपगतमा वृतमावरणमस्य ॥

अपावृत्तम् । त्रि । लुठिते । परावृत्ते ॥

अपाश्रयः । पुं । चन्द्रातपे । प्रांगनावरणे ॥ त्रि । आश्रयशून्ये ॥ अधीने ॥

अपासनम् । न । मारणे ॥ असुक्षेपे । भावेल्युट ॥

अपास्तः । त्रि । निरस्ते ॥ अवधीरिते ॥

अपि । ा । सम्भावनायाम् ॥ प्रश्ने ॥ शङ्कायाम ॥ गर्हायाम् ॥ समुच्चये ॥ युक्तपदार्थे ॥ क्रियाकारक्रियायाम । कामकारक्रियासु ॥ अनुज्ञायाम् ॥ अवधारणे ॥ पुनरर्थे ॥ नपिबति । पिगतौ । क्विप् । आगमशास्त्रस्यानित्यत्वात्तुक ॥

अपिगीर्णम् । त्रि । ईलिते । स्तुते । वर्णिते । गीर्णे ॥ अपिगीर्यतेस्म । गनिगरणे । क्तः । निष्ठातस्यनः ॥

अपितु । ा । किन्त्वर्थे । यद्यर्थे । यद्यपि ॥

अपिधानम् । न । आच्छादने ॥ अपिपूर्वकाड्डुधाञोल्युट् ॥ त्रि । पिधानरहिते ॥

अपिनद्धः । त्रि । परिहिते वस्त्रादौ । पिनद्धे ॥ अपिनह्यतेस्म । णहबन्धने । क्तः ॥

अपिहित । त्रि । छादिते ॥ अपिधीयतेस्म । डुधाञ् । क्तः । दधातेर्हिः ॥

अपीच्यम् । त्रि । अतिसुन्दरे ॥

अपीतिः । स्त्री । प्रलये ॥ अप्यये । एकीभावे ॥

अपीनसम् । न । पीनसरोगे ॥ इतिरभसः ॥ त्रि । तद्रहिते ॥

अपुच्छा । स्त्री । शिंशपावृक्षे ॥ त्रि । पुच्छहीने ॥

अपुनरावृत्तिः । स्त्री । मुक्तौ । कैवल्ये ॥

अपुनर्भव. । पुं । मुक्तौ ॥ त्रि । मुक्ते ॥ पुनर्जन्माभावे ॥ यथाहचरकः । हेतौलिङ्गे प्रशमनेरोगाणामपुनर्भवे । ज्ञानंचतुर्विधंयस्यसराजार्होभिषक्तमइति ॥ नपुनर्भवोयस्यसः ॥

अपुष्पफलदः । पुं । पनसोदुम्बरादिवनस्पतौ ॥

अपूप । पुं । पिष्टके ॥ गोधूमे ॥ नपूयते । पूयीविशरणे । बाहुलकात्पः । वलिलोप. ॥ यद्वा । पवनं पूः । पूञ् पवने । संपदादिक्विप् । अपुवंपाति पिबतिवा ॥ पा० । आतोनुपेतिक ॥

अपूपीयम् । त्रि । अपूपार्थकपिष्टादौ ॥ अपूपेभ्योहितम् । विभाषाहविरपूपादिभ्यइतिछः ॥

अपूप्यम् । त्रि । अपूपीये । गोधूमचूर्णे ॥

अपूपेभ्योहितम् । यत् ॥

अपूरणी । स्त्री । शाल्मलितरौ ॥

अपूर्वः । त्रि । अदृष्टपूर्वे ॥ अविदिते ॥ आश्चर्ये ॥ यथा । अपूर्वेयंहरेर्माया त्रिगुणारज्जुरूपिणी । ययामुक्तोनच खलितवद्धोधावतिधावति ॥ पुं । पूर्वभाविकारणसंस्पर्शशून्ये अकार्ये परमात्मनि ॥ नविद्यते पूर्वंकारणं यस्यसः ॥ न । यागाद्यान्तरव्यापारे ॥ धात्वर्थातिरिक्तेकालान्तरभाविकस्यफलस्यसाधने ॥ अत्रपक्षद्वयंमीमांसकानाम् । तदानीमेवक्लृप्तत्वेनोत्पन्नंफलमेवाऽपूर्वम् । कालान्तरफलोत्पादिकाकर्मशक्तिर्वेति ॥ तदुक्तम् । यागादेव फलंतद्धिशक्तिद्वारेण सिध्यति । सूक्ष्मंशक्त्यात्मकंवापिफलमेवोपजायते ॥ इति ॥

अपूर्वता । स्त्री । अपूर्वत्वे ॥ भावेतल् ॥

अपूर्वत्वम् । न । अपूर्वतायाम् ॥ षड्विधलिंगेषुतृतीयेलिङ्गे ॥ प्रकरणप्रतिपाद्यस्य प्रमाणान्तरेणाविषयत्वमपूर्वत्वम् । यथाछान्दोग्येषष्ठप्रपाठकेअद्वितीयवस्तुनोमानान्तरेणाविषयीकरणम् ॥ भावेत्वः ॥

अपूर्वप्रवेशः । पुं । प्रथमप्रवेशे । नवंगृहं निर्मायतत्रप्रथमप्रवेशे ॥

अपूर्वविधिः । पुं । प्रमाणान्तरेणाऽप्राप्तस्य प्रापके विधौ ॥ यथा यजेतस्वर्गकामइत्यादिः । स्वर्गार्थकयागस्य प्रमाणान्तरेणाप्राप्तस्यानेन विधानात् ॥ अपूर्वस्यासौविधिश्च ॥

अपेक्षणीयः । त्रि । अपेक्षायोग्ये । अपेक्षितव्ये ॥

अपेक्षा । स्त्री । आकांक्षायाम् ॥ कार्यनिमित्तयोरन्योन्याभिसम्बन्धे ॥ अपेक्षणम् । ईक्ष० । गुरोश्चहलइत्यः । टाप् ॥

अपेक्षाबुद्धिः । स्त्री । अनेकैकत्वविषयकबुद्धौ । नानैकत्वावगाहिबुद्धौ । अयमेकःअयमेक इत्याकारबुद्धौ ॥ इति कारिकावली ॥

अपेक्षितः । त्रि । ईप्सिते ॥

अपेतः । त्रि । रहिते ॥ अपहृते ॥ अपसृतः ॥

अपेतकृत्यः । त्रि । कृत्यशून्ये । कृतकृत्ये ॥

अपेतराक्षसी । स्त्री । तुलस्याम् । वृन्दाहृत्ये ॥ इतिराजनिर्घण्टः ॥

अपेताखिलचापलः । त्रि । नियतेन्द्रिये ॥

अपोगण्डः । त्रि । वलिभे ॥ अतिभीरौ ॥ विकलाङ्गे ॥ शिशौ ॥ पवते पुनातिवा । पूङ्ः पूञोवा विच् । पोगण्ड एकदेशोऽस्य । नपोगण्डः ॥

अपोढः । त्रि । निरस्ते ॥ बाधिते ॥ यथा । नातुर्येयः परोह्यात्मासोविश्वा

कल्पितः स्मृतः । अपोढेविद्ययात स्मिन् रज्वांसर्पइवादयः । इत्युपदेश साहस्र्यां १४ प्रकरणे १७ पद्यम् ॥

अपोढकर्म्मा । त्रि । त्यक्तव्यापारे ॥

अपोदका । स्त्री । उपोदिकायाम् । शाकान्तरे ॥ अपगतमुदकमस्याः ॥

अपोनपात् । पुं । एतन्नामधेयेदेवता विशेषे ॥

अपोहः । पुं । तर्कनिराकरणे । वितर्का भावे । शुश्रूषाद्यष्टधाधीगुणान्तर्गत षष्ठगुणे । त्यागे । अतद्व्यावृत्तौ ॥ अपगतऊहः ॥ अपोहनम् । ऊह० । घञ् ॥

अपोहनम् । न । कामक्रोधशोकादिव्या कुलचेतसां स्मृतिज्ञानयोरपाये ॥ अपोह्य ॥

अपौंस्नतम् । त्रि । अप्राकृते ॥

अप्न४ । न । यज्ञकार्ये ॥

अप्नुः । पुं । शरीरे । अभिलषितार्थे ॥ अंगे । आप्नोति । आप्लृव्याप्तौ । आ प्नोतेर्ह्रस्वश्चेतिनुः ॥

अप्न४ । न । अम्बुनि । आप्नोति । आप्लृ० । आपःकर्माख्यायांह्रस्वोनुट् चवेत्य सुन् । वैदिकोयमितिकश्चित् ॥

अप्पतिः । पुं । वरुणे । अम्बुधौ । अपां पतिः ॥

अप्पित्तम् । न । अग्नौ । चित्रकौषधौ ॥ अपांपित्तमिवदाहकत्वात् ॥

अप्ययः । पुं । परब्रह्मणि । अपियन्ति लीयन्तेजगन्त्यस्मिन् । अपपूर्वादि णो ऽधिकरणे ऽच्प्रत्ययः ॥ अपाये । अपीतौ । लये । अप्येत्यस्मिन् । इण् । इणगतौवा । एरच् ॥

अप्रकाण्डः । पुं । झिण्टिकादौ । स्तम्बे । गुल्मे । नप्रकाण्डोऽस्य ॥

अप्रकाशः । पुं । सत्यप्युपदेशादौबो धकारणेसर्वथाबोधायोग्ये । प्रकाशा भावे । जनान्तिके । गोपने ॥ ३ प्र काशाभाववति ॥ नप्रकाश ॥

अप्रखरः । त्रि । अतीक्ष्णे । प्राखर्यरहि ते ॥

अप्रगुणम् । त्रि । व्याकुले । अप्रकृष्टगुणे ॥ भिन्नःप्रगुणात् ॥

अप्रणयः । पुं । अप्रीतौ । प्रणयनम प्रण यः । नप्रणयः ॥

अप्रतर्क्यः । त्रि । मनोऽगोचरे । अनु मानाविषयेश्रुत्यैकसमधिगम्ये पर मेश्वरे ॥

अप्रतिकरः । त्रि । विश्वस्ते । विश्वास पात्रे ॥ इतिजटाधरः ॥

अप्रतिघः । त्रि । अप्रतिबद्धे ॥ नप्रतिघः ॥

अप्रतिपक्ष । त्रि । अप्रतियोगिनि ॥ वि पक्षशून्ये ॥ नास्तिप्रतिपक्षोयस्यसः ॥

अप्रतिपत्तिः । स्त्री । प्रकृताज्ञाने ॥

अप्रतिबद्ध. । त्रि । उद्दामे ॥ नप्रतिबद्धः ॥

अप्रतिभः । त्रि । अधृष्टे । लज्जिते । अप्रत्युत्पन्नमतौ । अप्रगल्भे ॥ नास्ति प्रतिभा नवनवोन्मेषशालिनी प्रज्ञा यस्य सः ॥

अप्रतिभा । स्त्री । निग्रहस्थानविशेषे ॥ यथा । उत्तरस्याप्रतिपत्तिरप्रतिभेतिगोतमः । ५ । ६१ । उत्तरार्हे परोक्तं बुद्ध्वापियदोत्तरसमये उत्तरंन प्रतिपद्यते तदाऽप्रतिभानिग्रहस्थानम् ॥

अप्रतिमः । त्रि । असदृशे ॥ नविद्यते प्रतिमाउपमायस्य सः ॥

अप्रतिरथम् । न । यात्रायाम् ॥ मङ्गले ॥ सामवेदे ॥ इतित्रिकाण्डशेषो भूरिप्रयोगश्चेति शब्दकल्पद्रुमेराधाकान्तः ॥ पुं । भटे ॥ हरौ ॥ नविद्यते प्रतिरथः प्रतिपक्षोऽस्य ॥ तुल्ययोद्धृरहिते इतिपुराणम् ॥

अप्रतिरूपकथा । स्त्री । अप्रतिवचनायांवाचि । सङ्कीर्णिकायाम् ॥ इतित्रिकाण्डशेष. ॥

अप्रतिष्ठः । त्रि । अप्रतिष्ठिते । प्रतिष्ठारहिते ॥ नास्तिप्रतिष्ठायस्य सः ॥

अप्रतिष्ठानम् । न । अस्थैर्ये ॥

अप्रतिष्ठितः । त्रि । अप्रतिष्ठे । प्रतिष्ठारहिते ॥ नप्रतिष्ठितः ॥

अप्रतिसम्बद्धः । त्रि । असम्बद्धे ॥

अप्रतिहतः । त्रि । विघ्नैरनभिभूते ॥

अप्रत्यक्षम् । न । प्रत्यक्षभिन्ने । प्रत्यक्षाभावे ॥ त्रि । प्रत्यक्षशून्ये । अतीन्द्रिये ॥ भिन्नंप्रत्यक्षात् ॥

अप्रत्ययः । पुं । अविधीयमाने ॥ अविश्वासे ॥ प्रतीयते विधीयते इतिप्रत्ययः । न प्रत्ययः ॥ नास्तिप्रत्ययोयस्यवा ॥

अप्रधानम् । न । अप्राधान्ये । अंगभूते । गौणे ॥ प्रधानादन्यत् ॥ वाच्यलिङ्गोप्ययम ॥

अप्रधृष्यः । त्रि । अबाल्ये ॥ नप्रधृष्यः ॥

अप्रमत्तः । त्रि । प्रमादवर्जिते । सावधाने ॥ नप्रमत्तः । नप्रमाद्यतिवा । मद्दी० । क्तः ॥

अप्रमेयः । त्रि । अचिंत्यप्रभावे ॥ इदमित्थमितिपरिच्छेत्तुमशक्ये । स्वप्रकाशचैतन्यरूपे । फलाव्याप्ये । अनवगम्यमानप्रमेये ॥ तथाहि । परमेश्वरोहि शब्दादिरहितत्वा अप्रत्यक्षः । नाप्यनुमानविषयो व्याप्तिलिंगाद्यभावात् । नाप्युपमानसिद्धो निर्विभागत्वेनसादृश्याभावात् । नाप्यर्थापत्तिग्राह्यः तद्विनानुपपद्यमानस्य सम्भवात । नाप्यभावगोचरो भावरूपत्वाद्भावसाक्षिकत्वाच्च । नापिशास्त्रप्र

माणवेद्य: प्रमाणजन्यातिशयाभावात्। यद्येवंशास्त्रयोनित्वंकथ मुच्यते। प्रमाणादिसाक्षित्वेन प्रकाशस्वरूपस्य प्रमाणाविषयत्वे अध्यस्तात द्रूपनिवर्त्तकत्वेन शास्त्रप्रमाणकत्वम् इत्यमप्रमेयोभवतीश्वर'॥ प्रमातुंयोग्य: प्रमेय:। न प्रमेय:अप्रमेय:॥

अप्रलम्बम्। न। अविलम्बे। शीघ्रे॥ त्रि। तद्वति॥

अप्रशस्तम्। त्रि। अश्रेष्ठे। अविहिते॥ यथा। अप्रशस्तंनिशिस्नानं राहोरन्यत्रदर्शनादितिपराशर:॥

अप्रसङ्ग:। पुं। अव्यतिकरे॥

अप्रसन्नम्। त्रि। अनच्छे॥ अतुष्टे॥

अप्रस्तुत'। त्रि। अनुपस्थिते। प्रकरणाप्राप्ते॥ नप्रस्तुत:॥

अप्रस्तुतप्रशंसा। स्त्री। अर्थालंकारविशेषे। अप्राकरणिकस्यार्थस्याभिधानेन प्राकरणिकस्याचेपे॥ यथा। अप्रस्तुतप्रशंसा सायाचैव प्रस्तुताश्रया। साच। कार्येनिमित्ते सामान्ये विशेषे प्रस्तुतेसति। तदन्यस्यवचस्तुल्ये तुल्यस्येतिचपञ्चधा॥ तदन्यस्यकारणादे:। क्रमेणोदाहरणम॥ याता: किन्नमिलन्ति सुंदरिपुन श्चिन्तात्वया मत्कृते नोकार्यानितरां कृशासि कथयत्येवं सवाष्पेमयि। लज्जाम

न्थरतारकेण निपतत्पीताश्रुणा चक्षुषा दृष्ट्वामां हसितेनभाविमरणोत्साहस्तयासूचित:॥ अत्रप्रस्थानात् किमिति निवृत्तोसोतिकार्येपृष्टेकारणमभिहितम्॥ १॥ राजन् राजसुता नपाठयतिमां देव्योपितूष्णींस्थिता:। कुब्जेभोजयमां कुमारसचिवैर्नाद्यापि किंभुज्यते। इत्थंनाथशुकस्तवारिभवनेमुक्तो ध्वगै:पञ्जराच्चित्रस्थानवलोक्य शून्यवलभावेकैक माभाषते॥ अत्रप्रस्थानोद्यतंभवन्तं ज्ञात्वा सहसैवत्वदरय: पलाय्य गताइतिकारणेप्रस्तुतेकार्य्यमुक्तम्॥ २॥ एतत्तस्य मुखात् कियत्कमलिनीपत्रेकणंवारिणो यन्मुक्तामणि रित्यमंस्तसजड:शृण्वन् यदस्मादपि। अङ्गुल्यग्रलघुक्रिया प्रविलयि न्यादीयमानेशनै: कुत्रोड्डीय गतो ममेत्यनुदिनं निद्रातिनान्त:शुचा॥ अत्राख्याने जडानांममत्व संभावनाभवतीति सामान्ये प्रस्तुतेविशेष कथित:॥ ३॥ सुहृद्वधूवाष्प जलप्रमार्जनं करोतिवैरप्रतियातनेनय:। स एवपूज्य:सपुमान् सनीतिमान् सुजीवनं तस्य सभाजनं श्रिय.॥ अत्र कृष्णंनिहन्त्य नरकासुरवधूनां यदि दु:खंप्रशमयसि तत्त्वमेवश्लाघ्यइति-

विशेषे प्रकृते सामान्यमुदितम् । ४
। तुल्ये प्रस्तुते तुल्याभिधानेत्रयः प्र
काराः । श्लेषः समासोक्तिः सादृश्य
मात्रं वा । तुल्यात्तुल्यस्याक्षेपे श्ले
षः । क्रमेणोदाहरणम् । पुंस्त्वाद-
पिप्रविचलेद्यदि यद्यधोपि यायाद्य
दिप्रणयनेन महानपि स्यात् । अभ्यु
द्धरेत्तदपिविश्वमितीदृशीयं केनापि
दिक्प्रकटिता पुरुषोत्तमेन । येना
स्यभ्युदितेन चन्द्रगमितःक्लान्तिंरवौ
तत्रतेयुज्येत प्रतिकर्त्तुमेवनपुनस्तस्यै
व पादग्रहः । क्षीणो नैतदनुष्ठितंयदि
ततः किंलज्जसेनोमनागस्त्वेवंजडधा
मतातु भवतोयद्योम्नि विस्फूर्ज्जसे ।
आदायवारि परितःसरितांमुखेभ्यः
किन्तावदर्जितमनेन दुरर्णवेन ।
क्षारीकृतच वडवादहनेहुतञ्चपा-
तालकुक्षिकुहरेविनिवेशितञ्च ॥ इ
यञ्च काचिद्वाच्ये प्रतीयमानार्थान-
ध्यारोपेणैव भवति । यथा । अब्धे
रन्तः स्थगितभुवनाभोगपातालकुक्षेः
क्षेः पोतोपाया इहहिवहवोलंघने
पिक्षमन्ते । आहोरिक्तःकथमपि भ
वेदेषदैवात्तदानीं कोनामस्यादव
टकुहरालोकने प्यस्यकल्पः । काचि
दध्यारोपेणैव यथा । कस्त्वंभोःकथ
यामिदैवहतकंमांविद्धि शाखोटकं-

वैराग्यादिववक्षि साधुविदितंकस्मा
दिदं कथ्यते । वामेनात्रवटस्तमध्वग
जनःसर्वात्मनासेवते नच्छायापि प
रोपकारकरणी मार्गस्थितस्यापिमे
। कश्चिद्विशेषाध्यारोपेण । यथा । सो
पूर्वोरसनाविपर्ययविधिस्तत्कर्णयो-
श्चापलं दृष्टिःसा मदविस्मृतस्वपर
दिक्किंभूयसोक्तेनवा । सर्वंविस्मृतवा
नसिभ्रमरहेयद्वारणोप्यसावन्तः
शून्यकरो निषेव्यत इतिभ्रातः कए
षग्रहः । अत्ररसनाविपर्यासः शून्यक
रत्वञ्चभ्रमरस्यासेवने नहेतुःकर्ण-
चापलन्तुहेतुः । मदःप्रच्युतसेवनेनि
मित्तम् । इतिकाव्यप्रकाशः ।
अप्रहतम् । त्रि । अनाहते । हलाद्यऽ
कृष्टभूमौ । खिले । नप्रहन्यतेस्म ।
हनहिंसागत्योः । कर्मणिक्तः ।
अप्राकृतः । त्रि । अलौकिके । सामान्ये ॥
अप्राग्र्यम् । त्रि । अप्रधाने । प्राग्र्याङ्गि
त्वम् ॥
अप्राचीनम् । त्रि । नव्ये ॥ प्राचीतरदि
ग्भवे ॥ नप्राचीनम् ।
अप्राप्तः । त्रि । अलब्धे । नप्राप्तः ।
अप्राप्तकालम् । न । सभाक्षोभव्यामो
हादिनाव्यत्यस्ताऽभिधाने । यथा-
हगोतमः । अवयवविपर्यासवचनम
प्राप्तकालमिति । ५ । ५४ । अवय

अप्राप्त

यस्य वर्थैकदेशस्य विर्पर्यासोवैपरी

त्यम् । तथाच समयवन्धविषयीभूत

कथाक्रमविपरीतक्रमेणाभिधानं प

र्य्यवसन्नम् । तत्रायंक्रमः । वादिना

साधनमुक्त्वा सामान्यतो हेत्वाभासा

उद्धरणीया इत्येकः पादः । प्रतिवा

दिनश्च तथोपालम्भो द्वितीयः पादः

। प्रतिवादिनः स्वपक्षसाधनं तत्रहे

त्वाभासोद्धरणञ्चेतितृतीयः पादः।

जयपराजयव्यवस्थाचतुर्थः पादः । ए

वमतिज्ञाहेत्वादीनांक्रमः । तत्रस

भाषोभय्यामोक्षादिनाव्यस्य स्ताभि

धानमप्राप्तकालमिति । त्रि । अन

वसमये । अप्राप्तःकालोयस्य ॥

अप्राप्तव्यवहारः । त्रि । व्यवहारानभि

ज्ञे । अप्राप्तवयस्के । यथा । अप्राप्त

व्यवहाराणां धनं व्ययविवर्जितम् ।

न्यसेयुर्बन्धुमित्रेषु प्रोषितानांतथैव-

च ॥ इतिदायतत्त्वे कात्यायन । कि

ञ्च । गर्भस्थैःसदृशोज्ञेयअष्टमात् व

त्सराच्छिशुः । वालआषोडशाद्वर्षा

त्पौगण्डोपिनिगद्यते । परतो व्य

वहारज्ञः स्वतन्त्रः पितराबृते । इति

व्यवहारतत्त्वेनारदः ॥

अप्राप्तिः । स्त्री । अलाभे । द्वादशभ

वने ॥

अप्रामाणिकः । त्रि । प्रमाणानभिज्ञे ॥

अप्सर

प्रमाण सिद्धे ॥

अप्रामाण्यम् । न । प्रमाण्याभावे ॥

अप्रियम् । त्रि । अहिते ॥ अनिष्टवस्तु

नि ॥ नप्रियम् ॥

अप्रिया । स्त्री । मद्गुरसमेमत्स्ये । शृङ्गी

मत्स्ये ॥

अप्रीतिः । स्त्री । दुःखे ॥

अप्रीत्यात्मकः । पुं । रजोगुणे ॥

अप्सरा८ । स्त्री । उर्वश्यादिस्वर्वेश्या

याम् । अद्भ्यः सरति । सरतेरप्पूर्वा

त् अप्सराइत्यसिः । स्त्रियांवहुष्व

प्सरसःस्यादेकत्वेऽप्सराअपीति श-

ब्दार्णवः । एकाप्सरःप्रार्थितयोर्विवा

द इतिरघुः ॥

अप्सरसः । स्त्री । भूम्नि । उर्वश्यादि

स्वर्वेश्यायाम् ॥ यथा । उर्वशीमेन

कारंभाघृताची पुञ्जिकस्थली । सु

केशीमञ्जुघोषाचमहारङ्गवतीति-

तादृति ॥ अद्भ्यःसरन्ति । सृगतौ । सर

तेरप्पूर्वादप्सरा इत्यसिः । भूम्नीति

प्रायोवादः । अनचिचेतिह्र्वे अप्स

रा इतिभाष्यप्रयोगात् ॥ वह्निपुरा

णेगणभेदनामाध्यायेद्वादशाप्सरसः

प्रोक्ताःयथा । उर्वशीमेनकारम्भामि

श्रकेशीह्यलम्बुषा । विश्वाचीचघृता

चीचपञ्चचूडातिलोत्तमा । भानुम

त्यथलावर्णाद्वादशाप्सरसः शुभा-

इति ॥

अफलः। पुं। झावुके ॥ इतिशब्दचन्द्रिका ॥ त्रि। अवकेशिनि ॥ निष्फले ॥ नफलान्यस्य ॥

अफलप्रेप्सुः। त्रि। फलाभिलाषरहिते॥

अफला। स्त्री। घृतकुमार्याम् ॥ भूम्यामलक्याम् ॥ इतिशब्दचन्द्रिका ॥

अफेनम्। न। अहिफेने ॥ तच्चतुर्विधम्। एकं श्वेतवर्णम् अन्नजीर्णताकारकत्वान्नाम जारणम्। द्वितीयं कृष्णवर्णम् मृत्युकारकत्वान्नाममारणम्। तृतीयम पीतवर्णम् वयःस्तम्भनकारकत्वान्नामधारणम्। चतुर्थं कर्बुरवर्णम् मलसारकत्वान्नाम सारणम् ॥ इतिराजनिर्घण्टः ॥

अवद्धम। त्रि। समुदायार्थशून्यवाक्ये ॥ यथा। जरद्गवः कम्बलपादुकाभ्यां द्वारिस्थितोगायतिमंगलानि। तं ब्राह्मणीपृच्छतिपुत्रकामाराजन् कुमायांलशुनस्यकोर्घः इत्याद्यस्यविषयः ॥ अवन्धने ॥ नवध्यतेस्म। वन्ध बन्धने। क्तः ॥

अवद्धमुखः। त्रि। अप्रियवादिनि। मुखरे ॥ न वद्धंनियंत्रितं मुखमस्य ॥

अवद्धम्। त्रि। अवधार्थे ॥ अनर्थकवचसि ॥ इतिमेदिनीहेमचन्द्रौ ॥

अवन्ध्यः। त्रि। फलेग्रहौ। सफले ॥ व-न्ध्येमाधुः। तत्रसाधुरितियः। नवन्ध्यः ॥

अवल। पुं। वरुणाद्रौ ॥ त्रि। वलशून्ये। दुर्वले ॥ नास्तिवलं यस्य ॥

अवला। स्त्री। वनितायाम् ॥ यथा। हृदये वहसि गिरीन्द्रौत्रिभुवनजयिनीकटाक्षेण। अवलात्त्वंयदि मन्येकेवलवन्तोवयंनजानीम इति॥ अल्पंवलमस्याः। अल्पार्थेनञ् ॥ पराशक्तौ ॥ नविद्यते वलंयस्याःसकाशादन्यत्र ॥

अवलिमा। पुं। अवलभावे। देह, रोगादिनिमित्ते जरादिनिमित्तेवाकृशीभावे ॥

अवाधः। त्रि। निरर्गले। अनिवारिते॥ नवाधा अस्य ॥

अवाध्यः। त्रि। सत्ये ॥ ज्ञानान्तरेण वाधायोग्ये ॥

अविन्धनः। पुं। वाडवाग्नौ ॥ विद्युति ॥ आपइन्धनंदाह्यमस्य ॥

अवोधः। पुं। अज्ञाने ॥ त्रि। वोधशून्ये॥

अवोधविप्लवः। त्रि। अज्ञानोपहते ॥ अवोधेनविप्लव.

अजः। पुं। न। शङ्खे ॥ पुं। निचुले ॥ धन्वंतरौ ॥ हिमकिरणे ॥ न। पद्मे ॥ संख्यान्तरे। दशार्बुदे। शतकोटिसंख्यायाम् ॥ १०००००००००॥ न०। कान्तरे। अब्जोजातः। पञ्चम्यामजा

तावितिडः ॥ अप्सुजायते । जनीप्रा दुर्भावे । सप्तम्यामितिडोवा ॥
अब्जकर्णिका । स्त्री । संवर्त्तिकायाम् ॥
अब्जजः । पुं । ब्रह्मणि ॥ योगान्तरे ॥ यथा । स्वराशौस्वांशगे सौम्ये लग्न स्थेवाभृगो.सुते । जीवेवाऽब्जयो गोयं यातुःशत्रुविनाशकृदिति ॥
अब्जभोगः । पुं । वराटके । पद्मकन्दे ॥
अब्जयोनिः । पुं । धातरि । ब्रह्मणि ॥ अब्जंयोनिरुत्पत्तिस्थानमस्य। विष्णो र्नाभिकमलजत्वात् ॥
अब्जवाहनः । पुं । शिवे ॥ इतित्रिका ण्डशेषः ॥ स्त्री । लक्ष्म्याम् ॥
अब्जः । न । रूपे ॥ आप्नोति । आप्लृ० । रूपेजुट्चेत्यसुन् ह्रस्वत्वंचधातोः प्र त्ययस्यजुट्च । अब्जसी अब्जांसि ॥
अब्जहस्तः । पुं । दिवाकरे ॥
अब्जिनी । स्त्री । नलिन्याम ॥ पद्मसमू हे ॥ पद्मलतायाम् ॥ अब्जानिसन्त्य स्याम् । पुष्करादिभ्योदेशइतीनि. ॥
अब्जिनीपतिः । पुं । सूर्ये ॥
अब्दः । पुं । संवत्सरे ॥ सचसावनःसौरश्चा न्द्रोनाक्षत्रोबार्हस्पत्यश्चेतिपञ्चविध ॥ वारिवाहे ॥ मुस्तके ॥ शैलभेदे ॥ आप्यते । आप्लृव्याप्तौ । अब्दादयश्चे तिदन् ह्रस्वत्वञ्च ॥ अवतिवा । अव० । पूर्ववत्साधुः ॥ अपोददातिः । डुदा ञ० । आतोनुपेतिकोवा ॥
अब्दपर्यय. । पुं । समासे वर्षे द्वितीय वर्षस्यप्रवृत्तौ ॥
अब्दसारः । पुं । कर्पूरप्रभेदे ॥
अब्दुर्गम् । न । जलदुर्गे । अगाधोद केनसर्वतः परिवृतेराज्ञोवासपुरे ॥
अब्धिः । पुं । समुद्रे ॥ आपोधीयन्ते ऽ च । कर्मण्यधिकरणे चेति धाञः किः ॥ चतुर्थाङ्के ॥ सरसि ॥
अब्धिकफः । पुं । सिन्धुफेने । डिण्डी रे ॥ इत्यमरः ॥ अब्धेः कफइव ॥
अब्धिजः । पुं । विधौ ॥ अब्धेर्जातः । ज नी० । ड ॥
अब्धिद्वीपा । स्त्री । पृथिव्याम् ॥ इतित्रि काण्डशेषः ॥
अब्धिनगरी । स्त्री । कृष्णपुरि । द्वारा वत्याम् ॥ अब्धौ नगरी ॥
अब्धिनवनीतम् । न । शशिनि ॥ अब्धे र्नवनीतमिव ॥
अब्धिफेनः । पुं । समुद्रफेने ॥
अब्धिमण्डूकी । स्त्री । शुक्तौ । मुक्ता स्फोटे । सीपी इतिभाषा ॥ इतिहे मचन्द्रः ॥
अब्धिशयनः । पुं ॥ नारायणे ॥ अब्धिः शयन मस्य ॥
अभ्यग्निः । पुं । वाडवानले ॥ इतिहेम चन्द्रः ॥

अभ्युत्थम् । त्रि । समुद्रभवे ॥

अभ्रचः । पुं । सर्पे ॥ इतित्रिकाण्डशेषः ॥ त्रि । जलाहारिणि ॥

अभ्रमातङ्गः । पुं । ऐरावते । अभ्रमातङ्गे ॥

अभ्रिः । स्त्री । तीक्ष्णाग्रेलोहदण्डे । अभ्रिकाष्ठायसोदृत्वात् सर्वत्रक्ष्वा द्विजोत्तम इतिमनुः । अभ्रति । अभ्रगच्छाम् । इन् ॥

अब्रह्मचर्यकम् । न । मैथुने ॥ इतित्रिकाण्डशेषः ॥

अब्रह्मण्यम् । न । नाध्योतया अवध्योक्तौ । वधंनाहतीतिवचसि । ब्रह्मणिसाधुः । तत्रसाधुरितियत् । ततोनञ्समासः ॥ ब्रह्मण्याभावे ॥ त्रि । तद्वति ॥

अब्राह्मणः । पुं । अब्राह्मणपदवाच्येषुषट्सु ॥ तेचोक्ताः शातातपेन यथा । अब्राह्मणास्तुषट्प्रोक्ता ऋषिणातत्त्ववेदिना । आद्योराजभृतस्तेषांद्वितीयः क्रयविक्रयी ॥ तृतीयो बहुयाज्यःस्याच्चतुर्थोग्रामयाजकः । पञ्चमस्तु भृतस्तेषांग्रामस्यनगरस्यच । अनादित्यांतुयः पूर्वां सादित्यांचैवपश्चिमाम् । नोपासीतद्विजःसंध्यांसषष्ठो ऽब्राह्मणःस्मृतः इति ॥

अभक्ष्यः । त्रि । भक्षणायोग्येग्राम्यकुक्कुटादौ । यथा । अभक्ष्योग्राम्यकुक्कुटः अभक्ष्योग्राम्य शूकरइतिमहाभाष्यम् । एवञ्चग्राम्यकुक्कुटादौ विशेषनिषेधस्येतराभ्यनुज्ञाफलकतया आरण्यादिभक्षणे दोषाभावइति विवरणम् ॥

अभद्रः । त्रि । दुःखरूपे ॥

अभयम् । न । वीरणाघ्रौ । उशीरे ॥ गर्भवासादि दुःखाभावे । मोक्षे ॥ अशेषभयनिवृत्तिसाधने आत्मदर्शने । त्रि । भयशून्ये । सर्वपरिग्रहशून्ये एकाकिनि । शास्त्रोपदिष्टेऽर्थेसन्देहंविनाऽनुष्ठाननिष्ठे । पुं । यात्रायोगान्तरे । यथा । उत्तमूलत्रिकोणेषु वर्त्ततेगुरुभार्गवौ । अभयाभिधयोगोयंभयंकरविनाशनइति । अन्यच्च । यत्रैकादशगश्चन्द्रो भानुर्वाप्रबलःशुभः । अभयोनामयोगोयमरिभूतविनाशकृदिति । नभयमस्मात् । आत्मनि ॥ आत्मातिरिक्तस्यकस्यचिदभावात् ।

अभयडिण्डिमः । पुं । युद्धवाद्यविशेषे । रणतूर्य्ये । सङ्ग्रामपटहे ।

अभया । स्त्री । हरीतक्याम् । पञ्चरेखा भयाप्रोक्तेतिलक्षणलक्षितायाम् ॥ नेत्ररोगेप्रशस्तेयम् । नभयमस्याः ॥

अभवः । पुं । मोक्षे ॥

अभव्यः । त्रि । अविनीते ॥ निर्भाग्ये ॥

नभव्य. ॥

अभावः । पुं । मरणे ॥ असत्त्वे ॥ द्रव्यादिषट्कभिन्ने ॥ स चतुर्विधोयथा । प्रागभावः प्रध्वंसाभावः अत्यन्ताभाव अन्योन्याभावश्चेतितर्कसङ्ग्रहः । स सर्गाभावोऽन्योन्या भावश्चेतिद्विविधोऽभाव इतिर्भाषापरिच्छेदः ॥ नाशे ॥ त्रि । प्रेमशून्ये ॥ भावहीने ॥ भाव स्थायिभावादिरित्त्यालङ्कारिका. ॥

अभाव्यसम्पत्ति. । स्त्री । चाहृत्त्येययोर्मिथ्यात्त्ववृद्धौ ॥

अभाषणम् । न । मौने ॥ नभाषणम् । भाषव्यक्तायांवाचि । भावेल्युट् ॥

अभि । । । इत्थंभूतकथने ॥ आभिमुख्ये ॥ अभिलाषे ॥ वीप्सायाम् ॥ लक्षणे ॥

अभिक । त्रि । कामुके ॥ अभिकामयते । अनुकाभिकेत्ति साधु. ॥

अभिक्रम. । पुं । अभीतयोधादे र्युद्धेश त्रुसम्मुखगमने ॥ आरोहण॰॥ इति हेमचन्द्रः ॥ अभिक्रमणम् । क्रमु॰ । घञ् । नोदात्तेतिवृद्ध्यभावः ॥ अभिक्रम्यतेकर्मणाप्रारभ्यतेइतिव्युत्पत्त्या कर्मारब्धफले । प्रारंभे ॥

अभिक्लृप्तः । त्रि । अभिसमर्थिते । अभिप्रकाशिते ॥

अभिख्या । स्त्री । अभिधाने ॥ शोभायाम् ॥ यशसि ॥ अभिख्यानम् । ख्याप्र कथने चक्षिङादेशोवा । आतश्चोपसर्ग इत्यङ् ॥

अभिगत. । त्रि । सेविते ॥

अभिगन्तव्य । त्रि । अभित समासाद्ये ॥ यथाहरामंप्रतिवसिष्ठ ॥ सन्त सदाभिगन्तव्यायद्यप्युपदिशन्तिन । याहिस्वैरकथास्तेषामुपदेशाभवन्तिता. इति ॥

अभिगीतम् । न । शोभनगीते ॥

अभिगृहीतपाणि । त्रि । संयोजितहस्ते ॥

अभिग्रहः । पुं । अभिग्रहणे ॥ अभियोगे । आभिमुख्येनोद्यमे ॥ गौरवे ॥ अभिग्रहणम् । ग्रहउपादाने । ग्रहवृद्रित्यप् ॥

अभिग्रहणम् । न । चौर्ये ॥ अभिहारे । आभिमुख्येनग्रहणे ॥ अभिग्रहेल्युट् ॥

अभिघातः । पुं । प्रहारे ॥ अभिहननम् । हन॰ । घञ् । हनस्तोचिण्णलोः । हो हन्तेरितिकुत्त्वम् ॥ क्रियाविशिष्टद्रव्यस्य द्रव्यान्तरेण संयोगविशेषो भिघातः । यथोद्यमितनिपतितमुसलस्योलूखलेन संयोग इतिव्याख्यातारः ॥ सम्बन्धे ॥

अभिघातिः । पुं । शत्रौ ॥ अभिघातेः क्तिच् बाहुलकात्त्विर्वा ॥

अभिघाती । पुं । रिपौ ॥ अभिहन्तुंशी

ख: । सुपीतिखनि: ॥

अभिघार: । पुं । अभित: सेचने । घृते ॥ इतिराजनिर्घण्ट: ॥

अभिचर: । पुं । दासे । इतिहेमचन्द्र: ॥

अभिचार: । पुं । हिंसाकर्मणि । अथर्ववेदोक्तमन्त्रयन्त्रादिनिष्पादितेमारणोच्चाटनादिहिंसात्मकेकर्मणि इतिभरत: । मारणादिफलकेतान्त्रिकप्रयोगविशेषे। सषडविध: । मारणमोहनस्तंभनविद्वेषणोच्चाटनवशीकरणभेदादितितन्त्रशास्त्रम् । उपपातकविशेषोयम् । नाशोऽभिचारतोमास्तिधर्म्मिष्ठानां नसंशय: । अतश्च । ब्राह्मणंधार्मिकंभूपवनितामास्तिकंनरम् । वदान्यंसदयंनित्यमभिचारे न योजयेत् । अभिचरणम् । चरेर्घञ् ॥

अभिजन: । पुं । कुले । ख्यातौ । जन्मभूम्याम् । कुलध्वजे । अभिजायतेऽस्मिन् । जनीप्रादुर्भावे । हलश्चेति घञ् । जनिवध्योश्चेति वृद्धिर्न । णिलोपस्यस्थानिवत्त्वाद्वा । अभिजन्यते । कर्मणिघञ् वा । अभितोऽभिमुखोवाजनोजन्मात्र । अभिजनोनाम यत्र पूर्वैरुषितमिति भाष्यम् ।

अभिजनवान् । त्रि । कुलीने । अभिजनोऽस्यास्ति । मतुप् । वत्त्वम ।

अभिजात: । त्रि । कुलीने । न्याय्ये । पण्डिते । यथा । नम्लेच्छितव्यंयज्ञादौ स्त्रीषुनाप्रकृतंवदेत् । सङ्कीर्णं नाभिजातेषुनाप्रबुद्धेषुसंस्कृत मिति । अभिजायतेस्म । जनीप्रादुर्भावे । गत्यर्थेतिक्त: ॥

अभिजातकोविद: । पुं । जातककर्मकोविदे । जातकज्ञे ।

अभिजित् । न । नक्षत्रविशेषे । उत्तराषाढायाश्चतुर्थांशस्य श्रवणादिघटुदंडस्यचसंज्ञा ऽभिजिदिति । अत्र जातस्यफलं यथा । अतिसुललितकान्ति: सम्मत:सज्जनानांननु भवतिविनीतश्चारुकीर्त्ति:सुवेश: । द्विजवरसुरभक्तो व्यक्तवाङ्मानव:स्यादभिजितियदिसूतिर्भूपति: स्ववंशे । इतिकोष्ठीप्रदीप: । यात्रामुहूर्त्तांतरे । यथा । मध्यंव्योमप्रयातेस्फुरदनलनिभेकेशरे चार्कविम्बे छायासाध्वीचकान्ता प्रचलतिपुरुषे यत्नतत्पादलग्ना । तावत्तौरेनंष्टष्टि:कुजकृतमशुभं नैवऋक्षंनयोग: सन्मानारोग्यसम्पत् क्षितिमथयुवतींतत्रगन्तालभेत । अभिमुखीभूयजयतिप्रतिपक्षानने न । जि० । क्विप् । कुतपकालइतिप्रसिद्धेदिवसस्याष्टमेमुहूर्त्ते । यथा । अपराह्णेतु सम्प्राप्तेअभिजिद्रौहिणोदये । यदत्रदीयतेजन्तो

स्तदृचयमुदाहृतमितिमत्स्यपुराण-
म् ॥

अभिज्ञः । त्रि । निपुणे ॥ अभिजानाति ।
ज्ञा० । आतश्चोपसर्ग इतिकः ॥

अभिज्ञा । स्त्री । आद्येज्ञाने ॥ स्मृतौ ॥
अभिज्ञायते । ज्ञा० । आतश्चोपसर्ग
इत्यङ् ॥ टाप् ॥

अभिज्ञानम । न । चिह्ने ॥ ज्ञानभेदे ॥
अभिज्ञायतेऽनेनेतितथा । ज्ञा० ।
ल्युट् ॥

अभिज्ञापकः । त्रि । बोधके ॥

अभिडीनम् । न । पक्षिणा आभिमुख्ये
नपुन पुन पतने ॥

अभितप्तः । त्रि । पीडिते ॥ अभितस्त
प्तः ॥

अभितः । अ । शीघ्रे ॥ साकल्ये ॥ सम्मु
खे ॥ उभयत ॥ अन्तिके ॥ सर्वत. ॥
पर्यऽभिभ्यां चेत्यभिशब्दात्तसिल् ॥

अभिद्रवणम् । न । वेगेनगमने ॥

अभिद्रोहः । पुं । आक्रोशे ॥

अभिधर्षणम् । न । रक्षःपिशाचभूतादे
रभिसङ्गे ॥ सर्वतोभावेनधर्षणे ॥

अभिधा । स्त्री । भट्टमतभावनायाम् ॥
आह्वये । वाचके ॥ न्यायमतेनशब्द
शक्तौ ॥ मीमांसकमतेन विधिसमवे
तविधिव्यापारीभूतपदार्थे ॥ अभिधा
नम् । डुधाञ्० । आतश्चेत्यङ् ॥

अभिधानम् । न । संज्ञायाम् ॥ कथने ॥
अभिधीयते अनेनवा । डुधाञ् धारण
पोषणयोः । कर्मणि करणे वा ल्युट् ॥
शब्दकोषे ॥ यथा । कृत्तद्धितसमा
साना मभिधानंनियामकम् ॥ इति
वोपदेवः ॥

अभिधायक. । त्रि । वाचके ॥

अभिधेयम् । न । संज्ञायाम् ॥ त्रि । वा
च्ये । शब्दप्रतिपाद्ये ॥ अभिधातुंशक्य
म । डुधाञ्० । अचोयत् । ईद्यति ।
गुण. ॥

अभिध्या । स्त्री । ग्रहणेच्छायाम् ॥ पर
स्वविषये स्पृहायाम् ॥ परस्वेविषये
चौर्यादिनालिप्सायामितिमुकुट ॥
परस्वविषयविषयिणीयायामिच्छा-
यामितिरामाश्रम. ॥ विषयप्रार्थना
ऽभिध्येतिस्वामी ॥ जिघृक्षामात्रम
भिध्येतिकश्चित् ॥ स्वस्यबहुत्वसंक
ल्पे ॥ अभिध्यानम् । ध्यैआध्याने । आ
तश्चोपसर्गइत्यङ् । टाप् ॥

अभिनद्ध । त्रि । बद्धे । बंधा इति भाषा ॥
अभितोनद्धः ॥

अभिनन्दः । पुं । सुखलवे ॥ अन्नस्यहि
सुखहेतुर्यः स्वकलत्रादिः तद्गुणोवि
षयः तद्गुणकथनादिप्रवर्त्तिकाधीवृ-
त्तिर्भ्रान्तिरूपाअभिनंद सचतामसः
॥ अभितोनन्दः आनंदः ॥

अभिनन्दनः । पुं । बुद्धभेदे । चतुर्थस्तीर्थंकरजिनोयम् ॥ न । स्तवने ॥ त्रि । सर्वतो भावेनानन्दजनके ॥ अभितो नन्दनः ॥

अभिनयः । पुं । विवक्षितार्थप्रतिपत्त्यर्थ मसाधारणशारीरव्यापारे । व्यञ्जके । अन्तर्गतभावस्यव्यञ्जके ऽङ्गचेष्टाविशेषे ॥ अभिनयश्चतुर्द्धा । वाचिकाङ्गिकाऽऽहार्यसात्त्विकभेदात् । विशेषो दृश्यरूपकादि ष्वनुसंधेयः ॥ अभिनयत्यर्थम् । पचाद्यच् ॥

अभिनवः । पुं । स्तोत्रे ॥ त्रि । नूतने ॥ अभिनूयते । णुस्तुतौ । ऋदोरप् ॥

अभिनवतामरसम् । न । तामरसाख्ये जगतीछन्दोभेदे । अभिनवतामरसं नजजाय इति लक्षणलक्षिते ॥

अभिनवोद्भिद् । पु । अङ्कुरे ॥ उद्भिनत्तिभुवम् । भिदिर विदारणे । सत्सूद्विषेतिक्विप् । अभिनवश्चासावुद्भिच्च ॥

अभिनहनम् । न । वन्धने । मुसक इति भाषा ॥

अभिनिर्मुक्तः । पुं । सूर्यास्तकाले निद्राक्रान्ते ब्राह्मणादौ ॥ अभिसर्वतःसायंतनेनकर्मणा निश्चयेनमुक्तः ॥ अभिसर्वसायन्तनकर्मनिश्चयेनमुक्तयेनवा ॥

अभिनिर्याणम् । न । विजिगीषोः प्रस्थितौ । गमने ॥ अभिनिरपर्वात या तेर्ल्युट् ॥

अभिनिविष्ट । त्रि । अभिनिवेशविशिष्टे । दुराग्रहग्रस्ते ॥

अभिनिवेश. । पु । अन्धतामिस्रे । पञ्चक्लेशे ॥ सचआयुरभावेप्येतैःशरीरेन्द्रियादिभि रनित्यै रपिवियोगोमाभूदित्याविद्वदङ्गनावालस्वाभाविकसर्वप्राणिसाधारणोमरणत्रासरूपो-विपर्ययविशेष ॥ मनोयोगे ॥ आग्रहे ॥ अभितोनिवेशः ॥

अभिनिष्टानः । पुं । अक्षरमात्रे ॥ विसर्जनीये । विसर्गे ॥ अभिनिस्तननम् । स्तन० । भावे घञ् । अभिनिसःस्तनःशब्दसंज्ञायामितिमूर्द्धन्यः ॥

अभिनिष्पत्तिः । स्त्री । सिद्धौ । उत्पत्तौ ॥

अभिनिस्तानः । पुं । अभिनिष्टाने ॥ पक्षेमूर्द्धन्याभावः ॥

अभिनीतः । त्रि । न्याय्ये ॥ क्रोधने । अमर्षिणि ॥ संस्कृते ॥ अभिनीयतेस्म । णीञ् प्रापणे । क्तः ॥

अभिनीतिः । स्त्री । अभिनये ॥

अभिनेता । त्रि । नाटकप्रसिद्धे अभिनयकर्त्तरि । स्वांगी स्वांगवाला इति भाषा प्रसिद्धे ॥

अभिपन्नः । त्रि । अपराद्धे ॥ अभिग्रस्ते ॥ आपन्नते ॥ स्वीकृते । आभिमुख्येन प्राप्ते ॥ अभिद्रुते ॥ अभिपद्यतेस्म ।

पद्गतौ । गत्यर्थेतिक्तः । कर्मणि वा॰॥

अभिमतारी । पुं । वेदप्रसिद्धे चर्षिव विशेषे । काक्षसेनौ ॥

अभिमाय । पुं । आशये । मानससम्मतौ । अभिमयणम् । प्रीञ् तर्पणे । घञ् ॥

अभिप्रेतः । त्रि । सम्मते ॥ अभिप्रायविषयीभूते । अभीष्टे ॥ अभितः प्रेतिस्मतिम् । इण्॰ । क्त ॥

अभिभवः । पुं । अनादरे । जये । गर्वनाशे ॥ भावे घञ् ॥

अभिभूतः । त्रि । गर्वासे । पराभूते । आत्तगर्वे ॥ इतिकर्त्तव्यतामूढे । व्यानरहिते । व्याकुले ॥ अभिभूयतेस्म । अकर्मकत्वात्कर्त्तरिक्तः ॥

अभिभूतिः । स्त्री । निकारे । अवज्ञायाम् ॥

अभिमतः । त्रि । सम्मते । आदृते ॥ अभीष्टे ॥

अभिमन्त्रणम । न । निमन्त्रणे ॥ आह्वाने । आकारणे ॥ आङ् मन्त्रि॰ ल्युट् ॥

अभिमन्थ. । पुं । अक्षिरोगे । अधिमन्थे ॥ सचतुर्विध । यथा । इन्यादृष्टिश्लैष्मिकः सप्तरात्राद्धिमन्थोरक्तजः पञ्चरात्रात् । षड्रात्राद्वैवातिकः संनिइन्यान्मिथ्याचारात् पैत्तिकः सद्य एवेतिमाधवः ॥

अभिमन्युः । पुं । अर्जुनात्सुभद्रायामुत्पन्ने ।

अभिमन्युसुतः । पुं । परीक्षिते । औत्तरेये ॥

अभिमरः । पुं । युद्धे । वधे ॥ स्वबलसाधने ॥ इतिमेदिनीकरः ॥ संकेतस्थलनिर्गमे । स्वबलसाध्वसे ॥ इति हेमचन्द्रः ॥ प्राणनिरपेक्षोयोद्रव्यहेतोर्यांऽहस्तिनंवा बोधयति सोऽभिमरइत्येके ॥

अभिमर्द । पुं । मद्ये । युद्धे ॥ मद्ययुद्धयोरिति हेमचन्द्रः ॥ पीडने ॥ अभिमर्दनम् । मृदक्षोदे । घञ् ॥

अभिमर्शः । पुं । घाते ॥

अभिमर्शितः । त्रि । स्पृष्टे ॥

अभिमानः । पुं । अहङ्कारवृत्तौ । धनस्वजनादिनिमित्ते महदवधारणहेतौ गर्वविशेषे ॥ आत्मन्यत्यन्तपूज्यत्वातिशयाध्यारोपे । अर्थादिदर्पे ॥ आदिना कुलरूपगुणादिग्रहः ॥ ज्ञाने ॥ प्रणये ॥ हिंसायाम् ॥ अभिसर्वतोमानः ॥ अभिमननम् । मनज्ञाने । घञ् ॥ मीञ् हिंसायांवा । मीनातीत्यात्वम् ॥

अभिमानितम् । न । सुरते ॥ त्रि । अभि

मानयुक्ते । अभिमानः सञ्जातोऽस्य । तारकादित्वादितच् ।

अभिमानी । त्रि । मानिनि । सर्वतो मानास्पदे । अभिमानोऽस्यास्ति । इनिः । अभितोमानीवा ।

अभिमुखः । त्रि । सम्मुखे । अभिगतो मुखम् । अत्यादयःक्रान्ताद्यर्थेद्वितीययेतिसमासः ।

अभिहृष्टः । त्रि । संहृष्टे ॥

अभियातः । त्रि । स्वयंप्राप्ते ।

अभियुक्तः । त्रि । परैरुद्धे ॥ तत्परे । प्रानिनि । अभियोगविषयीभूते । आसामीतिख्याते । प्रतिवादिनि । यथा । अभियुक्तोऽभियोगस्ययदिकुर्यादपह्नवम् । मिथ्यातत्तुविजानीयादुत्तरंव्यवहारत इतिनारदः । अभितोयुक्तः ॥

अभियोक्ता । पु । अर्थिनि । विवादस्य कर्त्तरि । फरियादीति इतरजनेषु ख्याते । यथा । अभियोक्ताऽप्रगल्भ्यात्वक्तुंनोत्सहतेयदि । तदाकाङ्क्षःप्रदातव्यः कार्यप्रत्यनुरूपतः । इति नारदः ॥

अभियोगः । पुं । अन्यकृतस्यस्वधर्मबाधस्य राज्ञेवेदने । अन्येनविरोधे स्वार्थसम्बन्धितयाराजसमीपे कथने । नालिश इतिइतरजनेषुख्याते । सचद्विविधः । यथाहनारदः । अभियोगस्तुविज्ञेयः शङ्कातत्त्वाभियोगतः । शङ्काऽसतांतु संसर्गात् तत्त्वंह्रोढाभिदर्शनादिति । अभिग्रहे । आग्रहे । अभिगम्याक्रमणे । शपथे । आहवे ।

अभियोजनम् । युजिर्योगे । घञ् । उद्योगे ॥

अभिरक्षा । स्त्री । सर्वतस्त्राणे ।

अभिरतः । त्रि । रते ।

अभिराद्धः । त्रि । आराधिते ।

अभिरामः । त्रि । सुन्दरे । मनोज्ञे । प्रिये । अभिरमन्तेऽस्मिन् । रम० । अधिकरणे घञ् ॥

अभिरामकथा । स्त्री । आख्यायिका ।

अभिरूपः । पुं । हरे । विष्णौ । इन्दौ । कामे ॥ त्रि । बुधे । पण्डिते ॥ मञ्जुले । सुन्दरे । मनोहरे ॥ अभिलक्ष्यं रूपमस्य ॥ सदृशे ॥ प्रमाणमेवाभिरूप इतिलक्षणम् ॥

अभिलषित. । त्रि । अभीप्सिते ।

अभिलापः । पुं । सङ्कल्पाङ्गवाक्ये । यथा । काम्याभिलापसहितः कुरुते लक्षणत्यागरूपः सङ्कल्पःशास्त्रार्थइतिप्रक्रमाधिकरणम । अभिलप्यतेऽनेनेतिव्युत्पत्त्यावाककरणेअभिपूर्वाल्लपेर्घञ् । शब्दे । इतित्रिकाण्डशेषः ।

अभिलावः। पुं। छेदने। लवने॥ अभिलवनम्। लूञ् छेदने। निरभ्योः पूल्वोरिति घञ्॥

अभिलाषः। पुं। लोभे। मनोरथे॥ अभिलषनम्। लषकान्तौ। घञ्॥ भोग्यवस्तुनि॥ अभिलष्यते। कर्मणि घञ्॥ सङ्गमेच्छायाम्॥

अभिलाषी। त्रि। इच्छावति। अभिलाषयुक्ते॥

अभिलाषुकः। त्रि। लुब्धे॥ अभिलष्यति। लषकान्तौ। लषपतपदेत्युकञ्॥

अभिलासः। पुं। अभिलाषार्थे॥ अभिलसनम्। लसश्लेषणक्रीडनयोः। घञ्॥

अभिवादः। पुं। प्रणामे॥ अभिवदनम्। वदेर्घञ्॥

अभिवादकः। त्रि। प्रणामयुते। वन्दारौ। वन्दनशीले॥ अभिवादयति। वदिअभिवादनस्तुत्योः। ण्वुल्॥

अभिवादनम्। न। पादग्रहणे। नामोच्चारणपूर्वकसंस्कृतप्रयोगेण नमस्कृतौ। वाचानतौ॥ अभिमुखीकरणार्थं वादनंवदनम्। वदवाक्संदेशयोः चुरादिः। ल्युट्॥ अभिमुखेनवाद्यते आशी'कार्यतेऽनेनवा। णिजन्तादेः करणे ल्युट्॥ अभिवादनविधिमाहमनुः। अभिवादात् परंविप्रोज्यायांसमभिवादयन्। असौनामाहमस्मीतिस्वंनामपरिकीर्त्तयेत्॥ नामधेयस्ययेकेचिदभिवादंनजानते। तान् प्राज्ञोहमितिब्रूयात्स्त्रियःसर्वास्तथैवच॥ भोःशब्दंकीर्त्तयेदन्ते स्वस्यनाम्नोभिवादने। नाम्नां स्वरूपभावोहिभोभावऋषिभिः स्मृतइति॥ तथाच अभिवादये शुभशर्माहमस्मिभोः इत्यभिवादनवाक्यम्॥ तन्निषेधोयथा। समिदार्युदकुशपुष्पान्नहस्तोनाभिवादयेद्यच्चाप्येवंयुक्तमितिबौधायनः॥ जपयज्ञजलस्थञ्चसमित्पुष्पकुशानलान्। दन्तकाष्ठञ्चभक्ष्यञ्चवहन्तंनाभिवादयेदिति लघुहारीत.॥ अन्यत्रापि। समित् पुष्पकुशाग्न्यम्बुमृदन्नाक्षतपाणिकः। जपंहोमञ्चकुर्वाणोनाभिवाद्योद्विजोभवेदिति॥

अभिवाद्यः। त्रि। अभिवादनार्हे॥

अभिविधिः। पुं। तेनसहेत्यर्थे॥ व्याप्तौ॥

अभिविनीतः। त्रि। सर्वतःशिक्षिते॥

अभिविमानम्। न। आभिमुख्येनविश्वं मिमीते जानातीतियोगादीश्वरात्मनि॥

अभिव्यक्तः। त्रि। सर्वतःप्रत्यक्षे॥

अभिव्यक्तिः। स्त्री। प्रत्यक्षे॥ उद्भूते॥ अभितोव्यक्तिः॥

अभिव्याप्तिः । स्त्री । साकल्येन योगे । सम्मूर्छने । सर्वतोव्याप्तौ ॥ अभिव्यापनम । आप्तृव्याप्तौ । क्तिन्नाबादिभ्य इति क्तिन् ॥

अभिशसनम् । न । अभिकथने ॥

अभिशपनम् । न । अभिशापे ॥

अभिशस्तः । त्रि । शापग्रस्ते । मासाभिशापे ॥

अभिशस्तः । पुं । नृपे ॥ अभितःशस्तः प्रशस्तः ॥ त्रि । मृषापवादग्रस्ते । भर स्त्रियां परपुरुषेण मैथुनं प्रतिमिथ्या दूषिते । शापग्रस्ते । आचारिते ॥ अनिर्णीतेपितस्मिन्महापातकादौ जाताभिशापे ॥ अभिशस्यतेस्म । श सुहिंसायाम् । क्तः । यस्यविभाषेति नेट् । धृषिशसीइतिवा ॥

अभिशस्तिः । स्त्री । लोकापवादे ॥ प्रार्थनायाम् । याच्ञायाम् ॥ अभिशंसनम् । शंसुस्तुतौ याचनेच । स्त्रियां क्तिन ॥

अभिशापः । पुं । मिथ्याभिशंसने । स्वर्गस्तेयंत्वया कृतमित्यादिमिथ्यादूषणाभिधायकेवाक्ये । ब्राह्मणगुरु दुसिद्धानामनिष्टाभिशंसने ॥ अभिशपनम । शपआक्रोशे । घञ् ।

अभिषङ्गः । पुं । पराभवे ॥ आक्रोशे ॥ शपथे । सर्वतोभावेनसङ्गे । भूतावेशे ॥ अभिषञ्जनम् । षञ्जसङ्गे । घञ् । उपसर्गादितिषः ॥

अभिषवः । पुं । अवभृथस्नाने ॥ यज्ञे । स्नपने । पीडने । मद्यसन्धाने । सुराकरणे । सुरोत्पादनप्रकारे । सवने । सुत्यायाम् ॥ अभिषूयते अभिषवणंवा । षुञ् अभिषवे । ऋदोरप् । उपसर्गादितिषः । न । काञ्जिके ॥ इतिहलायुधः ॥

अभिषवणम् । न । स्नाने । षुञ्० । ल्युट् ।

अभिषह्य । । प्रसह्यार्थे ॥ अभिषोढ्वा । षहमर्षणे । क्त्वा । ल्यप् ॥

अभिषिक्तः । त्रि । अभिषेचिते ।

अभिषिषेणयिषुः । त्रि । सेनयाऽभियातुमिच्छति ॥ सत्यापपाशेत्यादिना णेनाशब्दाच्चिच सनि सनाशंसेच्छुः । स्थादिष्वितिधात्वभ्याससकारयोः षत्वम् ॥

अभिषुतम् । न । काञ्जिके ॥ अभिषूयतेस्म । षुञ् अभिषवे । क्तः । उपसर्गादितिषत्वम् ॥

अभिषेकः । पुं । शान्तिस्नाने । स्नाने । रुद्राभिषेकादौ । पूर्णाभिषेकशाक्ताभिषेके राजाभिषेकादिपदवाच्ये अधिकारप्राप्त्यर्थस्नाने ॥ मार्जने । अभिषेचनम् । षिच्० । घञ् । जले । अभिषिच्यतेऽनेन घञ् ।

अभिषेचनम ।न। अभिषेके। षिच०। ल्युट्।

अभिषेणनम् । न । राज्ञोऽरिसम्मुखगतौ । युद्धयात्रायाम्। यत्सेनयाभिगमनमरौ तदभिषेणनम्। सेन याऽभियामम । सत्यापेतिसेनाशब्दाच्चि च। ल्युट्। उपसर्गात्सुनोतीतिषत्वम।

अभिष्टतम।त्रि। स्तुते । वर्णिते । ईडिते । अभिष्टूयतेस्म। ष्टुञ् स्तुतौ । क्त।

अभिष्यन्दः । पुं । अतिवृद्धौ । आस्रावे । अक्षिगदविशेषे । अभिष्यंदनम्। स्यंदू० घञ्।

अभिष्यन्दिरमणम् । न । शाखानगरे । प्रधाननगरसन्निहितनगरे । इतिजटाधरः ।

अभिष्वङ्गः । पुं । उत्कटरागे । अन्यस्मिन्नस्वंवुद्धौ । अभिष्वञ्जनम्। ष्वञ्ज०। घञ्।

अभिसंरब्धः । त्रि । कुपिते ।

अभिसवृत्तिः । स्त्री । व्यवहारे ।

अभिसन्तापः । पुं । युद्धे । अभिशापे । अभितः सन्तापोऽत्र ।

अभिसन्धः । पुं । सत्यत्वाभिमाने ।

अभिसन्धानम् । न । वञ्चने । प्रतारणे।

अभिसन्धिः । पुं । अभिसन्धाने। उद्देशे।

अभिसम्पातः । पुं । युद्धे । अभिसम्पतनमि । पतॢगतौ । घञ् ॥

अभिसरः । त्रि । अनुचरे । सहाये । अभितः । सरति । सृगतौ । पचाद्यच् ।

अभिसर्जनम् । न । दाने । वधे॥ अभिपूर्वात् सृजेर्भावे ल्युट् ॥

अभिसारः । पुं । बले । युद्धे । सहाये । साधने । स्त्रीपुंसयोरन्यतरस्याऽन्यतरार्थं सङ्केतस्थानगमने। अभिसरणम् । सृ० । घञ् ।

अभिसारिका । स्त्री । नायिकाविशेषे । सङ्केत स्थलेस्वयङ्गमनकर्त्र्याम्। एवं प्रियगमनकारयित्र्याम । कान्तार्थिनीतुयायातिसङ्केतंसाभिसारिका त्यमरः । भरतश्च । हित्वालज्जाभये श्लिष्टामदनेमदनेनच । अभिसारयतेकान्तंसाभवेदभिसारिकेति। अभिसरति । सृगतौ । ण्वुल् ।

अभिसारिणी । स्त्री। अभसारिकायाम्।

अभिसृष्टः। त्रि। दत्ते ।

अभिहतः । त्रि । विद्धे । ताडिते।

अभिहारः । पु । अभियोगे । अभिमुख्याक्रमणे। अभिग्रहणे। आभिमुख्येन ग्रहणे। चौर्ये। कवचादिधारणे। सन्नहने। मिश्रणे। अभिहरणम्। हृञ् हरणे। घञ्।

अभिहितम् । त्रि । कथिते । प्रोक्ते । अ

भिधीयतेस्म । डुधाञ् धारणपोषणयोः । क्तः । दधातेर्हिः ॥

अभीकः । त्रि । कामुके ॥ क्रूरे ॥ निर्भये ॥ पुं । कवौ ॥ अभिकामयते । अनुकाभिके तिसाधुः ॥ स्वामिनि ॥

अभीक्ष्णम् । । । नित्ये । शश्वदर्थे ॥ भृशे । पौनःपुन्ये ॥ अभिक्ष्णौति । क्ष्णु तेजने । बाहुलकादमुः । अन्येषामपीतिदीर्घः ॥ यद्वा । अभिक्ष्णवनम् । क्ष्णु तेजने । डम् । पृषोदरादित्वाद भेर्दीर्घः ॥ शीघ्रे ॥ प्रकर्षे ॥

अभीक्ष्णम् । न । भृशे । पौनः पुन्ये ॥ नित्ये । सर्वदार्थे ॥ त्रि । भृशयुक्तक्रियायाम् ॥ नित्ययुक्तक्रियायाम् ॥

अभीतः । त्रि । अभिव्याप्ते अभि पूर्वात् इणः क्तः ॥ अभितइतोवा ॥ निर्भये । नभीतः ॥

अभीप्सितम् । त्रि । वाञ्छिते । अभीष्टे ॥ अभ्याप्तुमिष्यतेस्म । आपृव्याप्तौ सनन्तः । आप्ज्ञप्यृधामीत् । क्तः ।

अभीरः । पुं । आभीरे । गोपे ॥ अभि ईरयति । ईरगतौकम्पनेच । पचाद्यच् ॥

अभीरुः । त्रि । निर्भये ॥ स्त्री । शतमूल्याम् ॥ नभीरुः । स्थिरपत्रत्वात् ।

अभीरुपत्री । स्त्री । शतमूल्याम् ॥ अभीरूणि पत्राणियस्याः । पाककर्णेति ङीष् ।

अभीशुः । पुं । प्रग्रहे । किरणे । रश्मौ ।

अभीषङ्गः । पुं । आक्रोशने । शापे । पञ्जसङ्गे । घञ् । उपसर्गस्यघञीति दीर्घः ॥

अभीषुः । पुं । किरणे । अश्वादिरज्जौ । प्रग्रहे ॥ कामे ॥ अनुरागे ॥ त्रि । इच्छति ॥ ईषतेहिनस्ति ईष्यतेवा । ईषगतिहिंसादर्शनेषु । ईषेः किच्च्युः । आदेरिकारादेशश्च । अभितईषुः । प्रादयोगतेति समासः

अभीष्टः । त्रि । ईप्सिते । प्रिये ॥ अभितइष्यतेस्म । इषुइच्छायाम् । क्तः ॥

अभीष्टा । स्त्री । रेणुकाभिधगन्धवस्तुनि ॥

अभुक्तः । त्रि । उपवासिनि ॥ यथा अभुक्तश्चदिवानिद्रापाषाणमपिजीर्यतीति । अकृतभोजनेवस्तुनि ।

अभुक्तमूलः । पुं । न । ज्येष्ठान्त्यघटीचतुष्टयसहितमूलाद्यघटीचतुष्टये ॥ ज्येष्ठान्त्यैकघटीसाहित मूलाद्यघटिकाद्वये ॥ ज्येष्ठान्त्यघटिकार्द्धसहित मूलादिघटिकार्द्धे ॥ ज्येष्ठान्त्यपञ्चघटिकासहितमूलाद्यत्रमुनाडिकासु ॥

अभूतः । त्रि । अविद्यमाने ॥

अभूताभिनिवेशः । पुं । असतिअस्तित्त्वनिश्चये ॥

अभेदः। पुं। ऐक्ये। अवियोगे। नभेदः। यथा। रलयोर्डलयोस्तद्वज्जययोर्बवयोरपि। शसयोर्मनयोश्चान्ते सविसर्गाविसर्गयोः। सविन्दुकाविन्दुकयोःस्यादभेदेन कल्पनमिति। यथा वा। गुणगुणिनोः क्रियाक्रियावतोश्चाभेदः॥

अभेद्यम। न। हीरके। त्रि। अभेद्यमौर्ये।

अभोगः। त्रि। भोगशून्ये। भोगानर्हे। नास्तिभोगोयस्य॥

अभोजनम। न। भोजनाभावे। उपवासे। यथा। अजीर्णे भोजनं येषांजीर्णे येषामभोजनम्। रात्रौविभोजनं केषांतेषामायुर्न्तिधातवः इतिवैद्यकम। अपिच। वेदोदितानां नित्यानां कर्मणां समतिक्रमे। स्नातकव्रतलोपेच प्रायश्चित्तमभोजनमितिमनुस्मृतम्॥

अभ्यक्तः। त्रि। कृततैलाभ्यंगे। अभितोऽक्तः।

अभ्यग्रम। त्रि। आसन्ने। समीपे। अभिमुखमग्रमस्य।

अभ्यङ्गः। पुं। तैलमर्द्दने। स्नेहने। यथा। तैलमभ्यंगदङ्गेषु नस्यादङ्गुतर्पणम्। सामार्हिः पृथगभ्यंगोमस्तकादौ प्रकीर्त्तितः। अभ्यङ्गमाचरेन्नित्यं सजराश्रमवातहा। शिरःश्रवणपादेषु तं विशेषेण शीलयेदित्यायुर्वेदः। पादगते शिरे चक्षुषि सम्बद्धेस्तः अतश्चक्षुर्हितार्थिनापादाभ्यङ्गः करणीयः। कफग्रस्तकृतसंशोधनाजीर्णिभिर्नाभ्यङ्ग करणीयः। अपिच। मूर्द्धिदत्तं यदातैलं भवेत्सर्वाङ्गसङ्गतम। स्रोतोभिस्तर्पयेदाहू अभ्यङ्गस्तन्नचेरित इति। तैलादिना शिरःप्रभृतिदेहमर्द्दने॥

अभ्यञ्जनम्। न। तैले। अभ्यङ्गे। मस्तकपदस्नाने। अभितःअञ्जनम्।

अभ्यधिकः। त्रि। सर्वोत्कृष्टे।

अभ्यनुज्ञा। स्त्री। अनुमतौ। अभितःअनुज्ञा।

अभ्यनुज्ञातः। त्रि। आभिमुख्येनज्ञाते।

अभ्यन्तरम्। त्रि। प्रकाशिते।

अभ्यन्तरम। न। अन्तराले। मध्यमाये। अभिगतमन्तरम्।

अभ्यमितः। त्रि। रोगिणि। अभ्यमर्यतेस्म। अमरोगे। क्तः। चुरादीनां णिचोवैकल्पिकत्वात् णिअभावे इट्। अभ्यमतिस्मवा। अमगत्यादौ। गत्यर्थेतिक्तः। वष्यमत्वरेतिवेट॥

अभ्यमिणीयः। त्रि। अभ्यमित्र्यः। अभ्यमित्रमलंगामी। अभ्यमित्र्योच्छचेतिखः।

अभ्यमित्रीयः । त्रि । अभ्यमित्र्ये । अभ्यमित्रमलंगामी । अभ्यमित्राच्छ चेतिछः । अमित्राभिमुखंसुष्ठुगच्छतीत्यर्थः ॥

अभ्यमित्र्यः । त्रि । स्वशक्तित शत्रोरभिमुखगच्छद्वीरे । अभ्यमित्रीणे । अभिमत्राभिमुखम् । लक्षणेनाभिमती इत्यव्ययीभावः । अभ्यमित्रमलं गामी । अभ्यमित्राच्छ्चेतियत् ॥

अभ्यर्णम् । त्रि । समीपे ॥ अभ्यर्दतेस्म अभ्यर्दतिस्मेतिवा । अर्दगतौ । कर्मणिकर्तरिवाक्तः । अभेश्चाविदूर्यइतीड़भावः । रदाभ्यामितिनत्वस्यणत्वम् ॥

अभ्यर्हितः । त्रि । पीडिते ॥ अभिपूर्वादर्देः क्तः । इट् ॥

अभ्यर्हणीयः । त्रि । पूज्ये ॥

अभ्यर्हितः । त्रि । उचिते ॥ श्रेष्ठे ॥

अभ्यवकर्षणम् । न । शल्यादेः समुत्पाटने । निहारे । शल्यादेर्बहिर्निः सारणे । अभ्यवकृषेर्ल्युट् ॥

अभ्यवस्कन्दः । पुं । रिपोराक्रमणे । निःशत्रीकरणाय शत्रुभिर्दीयमानेप्रहारे । अभ्यासादने । प्रघाते ॥

अभ्यवस्कन्दनम् । न । रिपोराक्रमणे । अभ्यासादने । प्रहारादिना शत्रोर्निःशत्रीकरणे । बलादाक्रमणे इतिस्वामी । शत्रोः सम्मुखगमने । स्कन्दू गतिशोषणयोः । ल्युट् ॥

अभ्यवहारः । पुं । भक्षणे । स च भक्ष्यभोज्यलेह्यपेयचोष्यभेदेन पञ्चविधः ॥

अभ्यवहृतम् । त्रि । भुक्ते ॥ अभ्यवह्रियतेस्म । क्तः ॥

अभ्यसनम् । न । अभ्यासे । पौनः पुन्येनचिन्तने करणेच ॥

अभ्यसूयकः । त्रि । गुर्वादीनां वैदिकमार्गस्थानां कारुण्यादिगुणेषु प्रतारणादिदोषारोपके । अभितोऽसूयकः ॥

अभ्यसूया । स्त्री । गुणेषु दोषारोपे ॥ अभ्यसूयनम् । असूञ् असूयायाम् । कण्ड्वादित्वाद्यकि अप्रत्ययादित्यः ॥

अभ्याकाङ्क्षितम् । न । अलीकाभियोगे । मिथ्यादावा इतिख्याते । अभ्याख्याने ॥ त्रि । ईप्सिते । अभितः आकाङ्क्षितम् ॥

अभ्याख्यानम् । न । मिथ्याभियोगे । शतंमे धारयसीत्यादिमिथ्योद्भावने । मिथ्यावादे । अभ्याङ्पूर्वात्ख्यि-ञोभावेल्युट् ॥

अभ्यागतः । पुं । अतिथौ । दृष्टपूर्वेंगृहागते ॥ त्रि । सम्मुखागते ॥ अभितआगतः । आभिमुख्येन आगतोवा ॥

अभ्यागमः। पुं। विरोधे। समरे। अन्तिके। अभिघाते। अभ्युद्गमने। भोगे। स्वीकारे। फलसम्बन्धे। अभ्यागमनम्। गम्लृ गतौ। ग्रहवृद्रिच्चप्॥

अभ्यागारिकः। त्रि। कुटुम्बव्यापृते। पुत्रदारादिपोषणव्यग्रे। अभ्यागारेनियुक्तः। अगारान्ताट्ठन्। अभिअधिक आगारिकोवा॥

अभ्याघातः। पुं। चौर्याद्यनर्थोपदेशे॥

अभ्याशः। त्रि। अभिव्याप्ते। व्याप्यर्थस्यातर्तेः कर्त्तरि कर्मणिवा निष्ठा॥

अभ्यादानम्। न। आरम्भे। आभिमुख्येनादानम्॥

अभ्यान्तः। त्रि। रोगिणि अभ्यम्यते स्म। अमरोगे। क्तः। चुरादीनांणिचोवैकल्पिकत्वात् णिजभावपक्षे॥ अमतिक्षमवा। अमगत्यादौ। गत्यर्थेतिक्तः। यस्यमत्वरेतिवेट्। इडभावे अनुनासिकस्येतिदीर्घः॥

अभ्यामर्दः। पुं। रणे। समरे। अभ्यामर्दनम्। मृदक्षोदे। घञ्॥

अभ्याशः। पुं। अवश्यमेव। अन्तिके। अभ्यश्यते। अशूव्याप्तौ। घञ्॥

अभ्यासः। पुं। अभ्यसने। आवृत्तौ। आकर्णनं विचारोजपः शिष्येभ्योदानमावृत्तिश्चेति पञ्चविधोऽभ्यासोभवति॥ खुरल्याम्। शराभ्यासे। मुनःप्रयोगे। संस्कारबाहुल्ये। दृढतरसंस्कारे। षड्विधलिङ्गेषु द्वितीये लिङ्गे। यथाहु। प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनःपुन्येनप्रतिपादनमभ्यासः। यथाछान्दोग्येषष्ठेप्रपाठके अद्वितीयस्यवस्तुनोमध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनमिति॥ विजातीयप्रत्ययानन्तरिते सजातीयप्रत्ययवाहे। अतिपरिचये। त्रि। अन्तिके। अभ्यासीदति। अन्येभ्योपीतिडः॥

अभ्यासयोगः। पुं। एकस्मिन् प्रतिमाद्यालम्बने सर्वतः समाहृत्य चेतसः पुनः पुनः स्थापनमभ्यासस्तत्पूर्वकेसमाधौ।

अभ्यासादनम्। न। रिपोरभ्यागमे निःशङ्कीकरणे। अभ्यवस्कन्दने। श्वोःसमुखगमने। षद्लृविशरणादौ। चुरादिः। ल्युट्॥

अभ्याहारः। पुं। अभिग्रहणे। चौर्ये॥ आभिमुख्येनाहरणम्। हृञ्हरणे घञ्॥

अभ्याहितः। त्रि। उपचिते। अग्न्यनेकपचितेग्नौ पुं॥

अभ्युक्तः। त्रि। प्रकाशिते

अभ्युत्थानम्। न। गौरवोत्थमन्युद्गमने। गौरवंदृष्ट्वाआसनादेरुत्थाने॥

उद्यमे । उद्भवे ॥ आभिमुख्येनउत्था नम् ॥

अभ्युत्पतनम् । न । आभिमुख्येनोत्प- तने ॥

अभ्युदय । पुं । पराक्रमे ॥ वृद्धिश्राद्धे ॥ अभीष्टानांकार्याणामाभिमुख्येनोद् यः प्रादुर्भावोयेनेतिविग्रहः ॥ सर्वतो भावेनधनजनादीनांवृद्धौ ॥ यथा । राजन्नभ्युदयोस्तु वल्लनकवे हस्तेकि मास्तेतव श्लोकः कस्यकवेरमुष्य कृ तिनस्तत्पथ्यतांपश्यते । किन्त्वासा मरविन्दसुन्दरदृशां द्राक्चामरान्दो लनादुद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः क्षणंवार्यताम् ॥ अस्यपूर्वार्द्धंवल्लन कविकर्णाटराजयोर्वाक्यं शेषार्द्धंका लिदासस्य ॥

अभ्युदितः । त्रि । सूर्योदयकालेनिद्रा कृते । सुप्तेयस्मिन्सूर्यउदितस्तस्मिन् ॥ अभिसर्वतः उदितिशयेन इतं गतं प्रातस्तनंकर्मास्यैति । उदिते । प्र काशिते ॥

अभ्युक्षतम् । त्रि । अयाचितोपनीते ऽ न्नादौ ॥ आभिमुख्येन स्थापिते ॥

अभ्युपगतः । त्रि । स्वीकृते ॥ अभ्युपग म्यतेस्म । गम्लृ गतौ । क्तः ॥ अभ्युदिते ॥

अभ्युपगमः । पुं । स्वीकारे । अङ्गीकारे ॥ समीपागमने । अन्तिकसमागमे ॥

अभ्युपेत्युपसर्गद्वयपूर्वाद्गमे र्ग्रहवृद्द- निश्चिगमश्चेत्यप् ॥

अभ्युपगमसिद्धान्तः । पुं । न्यायाश्रयसि द्धान्तविशेषे ॥ यथा । अपरीक्षिता भ्युपगमात्तद्विशेषपरीक्षणमभ्युपग- मसिद्धान्तः । १५ । ३१ । अपरीक्षि तस्य साक्षादसूत्रितस्य विशेषपरी क्षणं विशेषधर्मकथनम् । अभ्युपगमा दिति ज्ञापकत्वे पञ्चमी अभ्युपगम ज्ञापकमित्यर्थः ॥ विशेषपरीक्षणान्म नते सूत्रकृतोऽभ्युपगतमिदमिति ॥ तथाच साक्षादसूत्रिताभ्युपगमो ऽ भ्युपगमसिद्धान्तः । यथा मनसइन्द्रि यत्वमिति ॥

अभ्युपपत्ति । स्त्री । अनुग्रहे । हितप्र म्पादनाहितनिवारणप्रवृत्तौ ॥ अ भ्युपपदनम् । पद्लृ गतौ । क्तिन् ॥

अभ्युपायः । पुं । स्वीकारे ॥ इतिहेमच न्द्रः ॥ उपाये ॥ यथा । तत्स्वीकृतव्य तिकरे कइहाभ्युपायइतिकाव्यप्रका शः ॥

अभ्युपायनम् । न । उपढौकनद्रव्ये । उ पायने ॥ यथा । ता वानय समं गोपै र्नन्दाद्यैः साभ्युपायनै रितिविष्णुभा गवतम् ॥

अभ्युपेत । पुं । उपगते । स्वीकृते ॥

अभ्युषः । पुं । ईषत्पक्वे । भर्जिते ह

इत्त्यिवादा । पासा । अभ्योषति । उपदाहे । इगुपधेतिकः । अभ्यूष्यतेवा । घञ् ।

अभ्यूषः । पुं । आपके । अभ्युषे । अभ्यूषति अभ्यूष्यतेवा । अवचायाम् । इगुपधेतिकोघञ्वा ।

अभ्यूहितः । त्रि । ज्ञाते । अभितः ऊहितः ।

अभ्योषः । पुं । अभ्यूषे । पासा । अभ्योषति । उपदाहे । पचाद्यच् । गुणः ।

अभ्रम् । न । मेघे । आपोविभर्त्ति । डुभृञ् । मूलविभुजादित्वात्कः । यद्वा । नभ्रंश्यन्त्यापोऽस्मात् । भ्रंशुअधःपतने । अन्येभ्योपीतिडः । अभ्रकधातौ । काञ्चने । गगने । नविभर्त्ति किञ्चित् । मूलविभुजादित्वात्कः । यद्वा । आपोभ्रंश्यन्त्यस्मात् । अन्येभ्योपीतिडः । यद्वा । अभ्रतिस्थैर्य्यंगच्छति । अभ्रवभ्रमभ्रचरगत्यर्थाः । अच् । यद्वा नभ्राजते । भ्राजृदीप्तौ । अन्येभ्योपीतिडः ।

अभ्रंलिहः । पुं । वायौ । त्रि । मेघस्पर्शिनि । उन्नतरे । अभ्रंलेढि । लिह आस्वादने । वहाभ्रेलिह इत्यभ्रोपपदाल्लिहेः कर्त्तरिखश् प्रत्ययः । अरुर्द्विषदितिमुमागमः ।

अभ्रकम् । न । धातुभेदे । अभ्रेगिरि

सानुभवे । अस्योत्पत्त्यादिकं यथा । पुरावधायवृत्रस्य वज्रिणा वज्रमुद्धृतम् । विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः । तेनिपेतुर्घनध्वाना च्छिखरेषु महीभृताम् । तेभ्य एव समुत्पन्नंतत्तद्गिरिषुचाऽभ्रकम् । तद्वज्रजातत्वादभ्रमभ्ररवोद्भवात् । गगनात् स्खलितंयस्माद्गगनंच्चततोमतम् । विप्रक्षत्रियविट्शूद्रभेदात्तत्स्याच्चतुर्विधम् । क्रमेणैवसितंरक्तंपीतंकृष्णंचवर्णतः । प्रशस्यतेसितंतारेरक्तन्तुरसायने । पीतंहेमनिकृष्णन्तु गदेषुद्रुतयेपिच । पिनाकंदर्दुरंनागं वज्रंचेतिचतुर्विधम् । मुंचत्यग्नौविनिःक्षिप्तं पिनाकं दलसञ्चयम् । अज्ञानाद्भक्षणात्तस्य महाकुष्ठप्रदायकम् । दर्दुरं त्वग्निनिःक्षिप्तङ्कुरुते दर्दुरध्वनिम् । गोलकान्बहुशःकृत्वासस्यान्मृत्युप्रदायकः । नागन्तु नागवद्वह्नौफूत्कारंपरिमुंचति । तद्भक्षितमवश्यन्तु विदधातिभगन्दरम् । वज्रन्तुवज्रवत्तिष्ठे त्तन्नाग्नौ विकृतिं व्रजेत् । सर्वाभ्रेषुवरवज्रं व्याधिवार्द्धक्यमृत्युहृत् । अभ्रमुत्तरशैलोत्थं बहुसत्त्वंगुणाधिकम् । दक्षिणाद्रिभवंस्वल्पसत्त्वमल्पगुणप्रदम् । अथमारिताभ्रस्यगुणाः । अभ्रंक

षायंमधुरं सुशीतमायुष्करंधातुविव र्द्धनंच। हन्यात्त्रिदोषंव्रणमेहकुष्ठप्लीहोदरग्रंथिविषकृमींश्च ॥ रोगान् हन्तिदृढयतिवपुर्वीर्यवृद्धिविधत्ते तारुण्याढ्यंरमयतिशतंयोषितांनित्य- मेव। दीर्घायुष्कान्जनयति सुतान् विक्रमैः सिंहतुल्यान् मृत्योर्भीतिंह रतिसततंसेव्यमानंमृताभ्रमिति ॥ अथाशोधिताभ्रस्यदोषाः । पीडांविधत्ते विविधांनराणां कुष्ठंक्षयंपाण्डुगदंचशोथम्। हृत्पार्श्वपीडांचकरोत्यसह्यामशुद्धमभ्रं गुरुवह्निहृत्स्यात् ॥ अस्यशोधनविधिर्यथा । कृष्णाभ्रकंधमेदह्नौ ततः क्षीरेविनिःक्षिपेत्। भिन्नपत्रंतुतत्कृत्वातण्डुलीयाम्लयोर्द्रवैः। भावयेदष्टयामंतदेवमभ्रं विशुध्यति ॥ मारणन्तु। कृत्वाधान्याभ्रकंतच्छोधयित्वाथमर्दयेत्। अर्कक्षीरैर्दिनंखल्लेचक्राकारंचकारयेत्। वेष्टयेदर्कपत्रैश्चसम्यग्गजपुटेपचेत्। पुनर्मर्द्यंपुनः पाच्यंसप्तवारान् पुनः पुनः ॥ ततोवटजटाक्वाथैस्तद्वद्देयंपुटत्रयम्। म्रियतेनात्रसन्देहः प्रयोज्यंसर्वकर्मसु। तुल्यंघृतंमृताभ्रेणलोहपात्रेविपाचयेत। घृतेजीर्णेतदभ्रन्तु सर्वयोगेषुयोजयेदिति भावप्रकाश ॥ अभ्राति अभ्रयतेवा। अभ्र०। कुन ॥

अभ्रस्याकृतिर्वा। इवेप्रतिकृताविति कन् ॥

अभ्रङ्कषः। पुं। समीरणे ॥ अभ्रंकषति छिनत्तीतिविग्रहे सर्वकूलाभ्रेत्यादिनाकषेः खच्प्रत्ययः। मुमागमः ॥

अभ्रपिशाचः । पुं। राहौ ॥ इतित्रिकाण्डशेषः ॥

अभ्रपुष्पम्। न। जले ॥ अभ्रस्यपुष्पमिव ॥ पुं। वेतसे ॥ अभ्रमिव अभ्रसजयेवा पुष्पमस्य ॥

अभ्रमांसी। स्त्री। आकाशमांसीलतायाम् ॥ इतिराजनिर्घण्टः ॥

अभ्रमातङ्गः। पुं। ऐरावणे ॥ अभ्रंमेघस्तदात्मकोमातङ्गः। शाकपार्थिवादिः ॥ अभ्रे आकाशे मेघेवा विद्यमानोमातङ्ग इतिवा ॥

अभ्रमुः। स्त्री। ऐरावतपत्न्याम्। अभ्रेखेमाति मन्थरगामिनीत्वात्। बाहुलकात् । अभ्रे आकाशएवमाति। माप्माने। मितद्र्वादित्वाड्डुर्वा। न भ्राम्यति। मृतूचरीत्यु। मन्थरगामिनीत्वर्थं इतिवा ॥

अभ्रमुप्रियः। पुं। अभ्रमातङ्गे ॥ अभ्रमोः प्रियः ॥

अभ्रमुवल्लभः। पुं। ऐरावणे ॥ अभ्रमोर्वल्लभः ॥

अभ्ररोहम् । न। वैदूर्यमणौ ॥ इति

राजनिर्घण्टुः ।

अभ्रलिप्ती । स्त्री । अल्पैरभ्रैर्लिप्तायांदिवि ॥ अल्पैरभ्रैर्लिप्ता का इत्याख्यायामितिङीष् ॥

अभ्रवाटिकः । पुं । आम्रातके ॥ इतिराजनिर्घण्टः ॥

अभ्रावकाशिकः । पुं । तापसान्तरे । योवातातपवर्षेषु केवलमाकाशे असंवृतप्रदेशे तपश्चरतिसोभ्रावकाशिकः ॥

अभ्रिः । स्त्री । काष्ठकुद्दाले । नौमलोत्सारके । पोतादेर्मलापनयनार्थं काष्ठघटितकुद्दाले । अभ्रति । अभ्रगतौ । सर्वधातुभ्यइन्निति इन ।

अभ्रियम् । त्रि । मेघभवे । अभ्रेभवम् । समुद्राभ्राद्घः । छांदसत्वं प्रायिकम ॥ स्त्रियामभ्रिया ॥

अभ्री । स्त्री । काष्ठकुद्दाले ॥ अभ्रति । अभ्रगतौ । सर्वधातुभ्यइतिइन् । कृदिकारादितिङीष ।

अभ्रेषः । पुं । न्याय्ये । उचिते । भ्रेषणम् भ्रेषः । भ्रेषृचलने । घञ् । भ्रेषादन्यः ॥

अभ्रोत्थम् । न । कुलिशे ॥ त्रि । अभ्रभवे ॥

अमङ्क्षु । अव्य । शीघ्रतायाम । इतिव्याडिः ॥

अमः । पुं । रोगे ॥ त्रि । अपक्वफलादौ ॥

अमङ्गलः । पुं । एरण्डवृक्षे ॥ त्रि । मङ्गलहीने । अशुभसूचके ॥

अमण्डः । त्रि । मण्डहीने ।

अमत. । पु । मृत्यौ ॥ काले । रोगे ॥ त्रि । असंमते । अविज्ञाते ॥ अतर्किते ॥ अमति । अमगत्यादिषु । भृमृदृशियजीत्यादिनाऽतच् ।

अमतिः । पुं । काले ॥ दण्डे । चन्द्रे ॥ त्रि । दुष्टे ॥ अमति । अमगत्यादिषु । अमेरतिः ॥

अमत्रम् । न । भाजने । भाण्डे ॥ अमति अन्नमत्र । अमगत्यादिषु । अभिनक्षियजिवधिपतिभ्योऽत्रन् ।

अमदनः । पुं । शिवे ।

अमनाः । त्रि । स्नेहशून्ये ।

अमनस्कः । त्रि । अप्रगृहीतमनस्के ॥ पुं । योगग्रन्थविशेषे ॥

अमनिः । स्त्री । वर्त्मनि । गतौ ॥ अमति । अमगत्यादिषु । अर्त्तिसृधृ इत्यादिनाऽनिः ॥

अमन्दः । त्रि । धृष्टे ॥ मन्दभिन्ने ॥

अममः । पुं । भाविजिनविशेषे ॥ त्रि । ममताहीने ॥

अमरः । पुं । सुरे ॥ अष्टशाब्दिकान्तर्गतवैयाकरणविशेषे । येननामलिङ्गानुशासनंकृतम् ॥ विक्रमादित्यसभास्थनवरत्नान्तर्गतरत्ने ॥ अयंश्रौद्ध इतिकश्चित् ॥ स्नुहीवृक्षे । पारदे ॥

अस्थिसंहारे । त्रि । मरणवर्जिते ॥ नम्रियते इतिअमरः । मृङ्प्राणत्यागे तुदादि । पचाद्यच् ।

अमरजः । पुं । खदिरवृक्षभेदे । कालस्कन्धे । पत्रतरौ ।

अमरदारुः । पुं । देवदारुवृक्षे ।

अमरद्विजः । पुं । देवले । देवाजीवे । पुजारीति प्रसिद्धे । अमराणांद्विजः ।

अमरपुष्पकः । पुं । काशे । इक्षुगन्धायाम् । इतिरत्नमाला ।

अमरपुष्पी । स्त्री । अवाक्पुष्प्याम् । अधःपुष्प्याम् ।

अमरप्रभुः । पुं । विष्णौ । अमराणां प्रभुः ।

अमररत्नम् । पुं । स्फटिके ॥ इतिराजनिर्घण्टः ।

अमरवल्लरी । स्त्री । आकाशवल्ल्याम् ॥

अमरा । स्त्री । गुडूच्याम् । अमरावत्याम् ॥ दूर्वायाम् । स्थूणायाम् ॥ जरायौ ॥ इन्द्रवारुण्याम् ॥ वटीवृक्षे ॥ मदानीत्याम् । घृतकुमार्याम् ॥ नाभिनालायाम् । नम्रियते । मृङ्प्राणत्यागे । पचाद्यच् । टाप् ।

अमराद्रिः । पुं । सुमेरौ । अमराणामद्रिः ।

अमरालयः । पुं । स्वर्गे । अमराणामालयः ।

अमरावती । स्त्री । इन्द्रपुर्याम् । यथा । नानारत्नप्रभाजालमण्डलालङ्कृताङ्गरे । सिद्धसाध्यमरुज्जुष्टाख्याभूरमरावतीति । अमराः सन्त्यस्याम् । मतुप् । मतौबह्वचोनजिरादीनामितिदीर्घः ।

अमरेशः । पुं । अमरकण्टकतीर्थस्थदेवे । अमरेशोऽमरकण्टकइत्यागमोक्तेः । अपिच । अमरेशमहापीठे कुम्भतुङ्गारसंज्ञकः । तत्रदुर्गाद्वयंनाम चण्डिकाचमहेश्वरीति ।

अमर्त्यः । पुं । त्रिदशे । नम्रियते । अमर्त्यः । नमर्त्यःइतिनञ्समासोवा ।

अमर्त्यनदी । स्त्री । गङ्गायाम् । अमर्त्यानांनदी ॥

अमर्त्यभुवनम् । न । स्वर्गे । अमर्त्यानां भुवनम् ।

अमर्षः । पुं । कोपे । क्रुधि ॥ परोत्कर्षासहनरूपेचित्तवृत्तिविशेषे । कृतापराधे ऽसमर्थस्यद्वेषे । मर्षणम् । मृषतितिक्षायाम् । भावेघञ् । नञ्समासः ।

अमर्षणः । त्रि । क्रोधने । नमर्षणंयस्य । युच् । असहने ।

अमलम् । न । अभ्रके । त्रि । निर्मले । रजस्तमोमलरहिते । अमति । अमतौ । वृषादित्वात्कलच् । नञ्

नमस्येतिवा ॥

अमला । स्त्री । लक्ष्म्याम ॥ भूम्यामल-क्याम् ॥ सातलावृक्षे ॥ नाभिनाला याम्॥ टाप् ॥

अमलात्मा । पुं । निवृत्तरागादिमले ॥

अमसः । पुं । काले॥ निर्बोधे ॥ रोगे ॥

अमहात्मा । पुं । क्षुद्रहृदये ॥ नमहात्मा ॥

अमा । ऽ । सहार्थे ॥ निकटे॥ नमाति मा माने । क्विप ॥

अमा । स्त्री । दर्शे । अमावास्यायाम् ॥ नाम्नैकदेशेनामग्रहणात्॥ चंद्रलोकस्थसूर्यदीधितौ ॥

अमांसः । त्रि । दुर्बले ॥ अल्पमांसयुक्ते ॥ मासरहिते ॥ नमांसमस्य । अल्पार्थेनञ् ॥

अमांसाशी । त्रि । निरामिषाशिनि ॥ यथा । नभक्षयेत् वृथामांसममांसाशी भवत्यपीतिशान्तौ मोक्षधर्मे भीष्मः ॥

अमात्यः । पुं । मन्त्रिणि ॥ यथा ॥ शान्तो विनीतःकुशलः सत्कुलीनःशुभान्वितः।शास्त्रार्थतत्त्वगोऽमात्योभवेद्भूमिभुजामिहेतियुक्तिकल्पतरुः॥ त्रि। सहभवे ॥ अमासह समीपेवाभवः । अव्ययात्त्यप् ॥

अमानः । त्रि । कार्यकारणभावशून्येतु-रीश्वेपरमात्मनि ॥ माचापरिच्छि-त्तिः सानविद्यतेयस्यस ॥ निर्धने ॥

अमाननम् । न । अनादरे ॥ नमाननम् ॥

अमानस्यम् । न । पीडायाम्॥ त्रि । पीडायुक्ते ॥ मानसाय हितम मानसे-साधुवा । उगवादित्वात तक्षसाध्वि ति वायत । नमानस्यममानस्यम् ॥

अमामसी । स्त्री । दर्शे । कृष्णपक्षान्ततिथौ ॥

अमामासी । स्त्री । अमावास्याम् ॥

अमावसी । स्त्री । अमामस्याम् ॥

अमावस्या । स्त्री । अमायाम् ॥ अमास हवसतोऽस्याम् चन्द्रार्काविस्यमोपपदाद्वसे रमावस्यदन्यतरस्यामित्यधिकरणे ण्यत पाक्षिकोह्रस्वश्चनिपात-सिद्धः ॥ सूर्याचन्द्रमसोर्यः परःसन्निकर्षः सामावस्येतिगोभिलः । परःभन्निकर्षश्चउपर्यधोभावा पन्नसमसूत्रन्यायेनैकरावच्छ्यवच्छेदेन सहावस्थानरूपोवोध्य. ॥

अमावासी । स्त्री । दर्शे ॥ इतिशब्दरत्नावली ॥

अमावास्या । स्त्री । दर्शे ॥ अमासहवसतोऽस्यांचन्द्रार्कौ। अमावस्यदन्यतरस्यामितिण्यत् । णित्वाद्वृद्धिः ॥

अमितः । त्रि । अपरिच्छिन्ने ॥ अपरि

च्छेदे ॥
अमितौजा. । त्रि । अतिवीर्यशालिनि ॥ अमितमपरिच्छेद्यमोजः सामर्थ्यं यस्य ॥
अमित्रः । पुं । रिपौ ॥ अमति गच्छति । अमगतौ रोगेवा । अमेर्द्विषतिचिदिति इत्रः ॥
अमी । त्रि । रोगिणि ॥ अमोरोगस्तद्वान् । इनिः ॥
अमीवम् । न । कौर्ये ॥ पापे ॥ दुःखे ॥ अमीवहन्निति लक्ष्यम् ॥
अमुक्तम् । न । छुरिकाविशेषे । हायक्षुरीति यस्यभाषा ॥ त्रि । मुक्तिरहिते ॥ अव्यक्ते ॥
अमुतः । । अमुष्मादित्यर्थे । तसिल् ॥
अमुत्र । । भवान्तरे । परलोके ॥ अमुष्मिन् । अदसः सप्तम्यास्त्रल् ॥
अमुर्हि । । अमुष्मिन्काले ॥
अमुष्यपुत्रः । पुं । स्त्री । प्रख्यातवंशजे । कुलीने ॥
अमूढः । त्रि । वेदान्तप्रमाणसञ्जातसम्यक्ज्ञाननिवारितात्माज्ञाने ॥
अमूदृशः । त्रि । एवं प्रकारे । एतद्रूपे ॥
अमूर्त्तः । त्रि । निरवयवे ॥ वाय्वन्तरीक्षयोः ॥ यथा । सन्निवेशोनेत्रदृश्यो यस्य तन्मूर्त्तमुच्यते । चित्त्यस्त्वन्नित्ययं मूर्त्तममूर्त्तं त्वितरद्वयमिति वे-
द्वविदः ॥ न्यायमतेनाकाशकालदिगात्मसु ॥ एषां सामान्यगुणाः । सङ्ख्यापरिमितिपृथक्त्वसंयोगविभागाः । तत्राकाशस्य विशेषगुणः शब्दः । कालदिशोर्विशेषगुणो नास्ति । आत्मनो विशेषगुणास्तु । बुद्धिसुखदुःखेच्छाद्वेषयत्नभावनाख्यसंस्काराधर्मधर्मौ चेति ॥
अमूर्त्तविद् । त्रि । शून्यवादिनि ॥ अमूर्त्तःसर्वाकारशून्यो निस्स्वभावः परमार्थः इति शून्यवादिनां कल्पनैव । यतः परमार्थो निस्स्वभावश्चेति व्याघातः ॥
अमूलः । त्रि । मूलहीने ॥
अमूलकम् । त्रि । मूलरहिते ॥ प्रमाणशून्ये ॥ नास्तिमूलं यस्य । कप् ॥
अमूला । स्त्री । अग्निशिखा इक्षे ॥ ओषधिविशेषजातौ मूलान्मपरति- टाप् ॥
अमृणालम् । न । नलदे । वीरणमूले ॥ मृणालमिव । सादृश्येऽव्ययन ॥
अमृतम् । न । यज्ञशेषे । होमावशिष्टाज्यपुरोडाशादौ ॥ अमृतमिवअमृतसाधनत्वात् ॥ पीयूषे ॥ सलिले ॥ घृते ॥ अयाचितागतवस्तुनि ॥ अमृतं स्यादयाचितमिति मनुः ॥ मोक्षे ॥ अविद्यमानं मृतं मरणमत्र ॥ अन्ने ॥ नम्रियंतेऽनेन । तनिमृङ्भ्यां

क्लिन्नेतितन् ॥ राजनिर्घण्टे त्वमृत शब्देनविषसामान्यं वत्सनाभः पार दश्चोक्तः ॥ काञ्चने ॥ स्वादुनि ॥ आ नन्दे ॥ रसायने ॥ स्वर्गिन् ॥ हृद्ये ॥ गोरसे ॥ देवानां सर्वप्राणिनाञ्च जी वने ॥ पदेपदे स्वादुनि ॥ सुरायाम् । आभूतसम्प्लवस्थाने । योगविशेषे ॥ मयथो । बुधमन्दगतानन्दाकुजेभद्रा जयागुरौ । भृगौरिक्तामृतमोक्तं पूर्णा चरविचंद्रयोरिति ॥ पञ्चमानिकस्य द्वितीयपर्याये । पुं । धन्वन्तरौ । देवे ॥ मरणादिदेहेन्द्रियमनोधर्मवर्जिते आत्मनि । वाराहीकन्दे । वनमुद्गे । त्रि । अविनाशिनि । अमरणधर्मि णि । देवतात्मभावे ॥

अमृतगतिः । स्त्री । छन्दोविशेषे । यथा । यदिदशमंगुरुविहितं विशिखमित सुकविहितम् । अमृतगतिः फणिक थिता दलयतिकाव्यपविहितेति ॥

अमृतजटा । स्त्री । जटामांस्याम् ॥

अमृततरङ्गिणी । स्त्री । ज्योत्स्नायाम् ॥

अमृततिलका । स्त्री । वर्णवृत्ते । यथा । नगणपयोधरशचिरा कुसुमविरा जितसुकरा । वसुलघुदीर्घयुगलका भवतिसखेऽमृततिलकेति । खरि- तगतिश्चनजनगैः ॥

अमृतत्वम् । न । अमरणभावे । स्वात्म न्यवस्थाने । मोक्षे ॥

अमृतदीधिति. । पुं । इन्दौ ॥

अमृतनालिका । स्त्री । कर्पूरनालिक प्रभेदेपक्वान्नविशेषे ॥

अमृतफलम् । न । नासपातीति यवने षुप्रसिद्धे वृक्षफले ॥ यथा । अमृत फलंलघुहृद्यंसुस्वादुचीनचरेद्दोषान् । देशेषु मुद्गलानां बहुलंतल्लभ्यतेलो कैरिति ॥ पारे वतद्रौ ॥ पटोले ॥

अमृतफला । स्त्री । द्राक्षायाम् ॥ आम लक्याम् ॥

अमृतयोग. । पुं । पञ्चाङ्गते योगविशे षे ॥ अपिच । हस्तमूलोत्तरापुष्या रोहिणीरेवतीरवौ । सोमेभद्राश्वि नीहस्ताफलगुनीविधिविष्णुयुक् । कु जेश्विभ्रपुष्याग्निसार्पपौष्णसमीर- णाः । बुधेमतभिषामैत्रकृत्तिकारो हिणी तथा ॥ गुरौपुष्यानुराधाच स्वातीचैवपुनर्वसु. । भृगौभगाजयु ङ मित्रतुरङ्गश्रवणानिच ॥ शनौस्वा तीरोहिणीचामृतयोगंविदुर्बुधाइति । पुनश्च । आदित्यभौमयोर्नन्दा- भद्राशुक्रशशाङ्कयो' । जयासौम्याहु रौरिक्तापूर्णार्कि चामृताशुभाइति ॥ अपरञ्च । रवौमूला । सोमेश्रवणा । भौमेउत्तराभाद्रपदा । बुधेकृत्तिका । गुरौपुनर्वसू । शुक्रेपूर्वाफाल्गुनी ।

शनौस्वातिनक्षत्रश्चेत्तदाऽमृतयोगो भवतीति ॥

अमृतरसा । स्त्री । अंदरसाइतिभाषाप्रसिद्धे पक्वान्नभेदे । यथा । तृतीयभागखण्डेनमिश्रितंषष्टिपिष्टकम् । शुभ्रमीषद्दधियुतंमर्दयेद्दृढपाणिना । एवंसमुदितंकृत्वास्थापयेद्रजनीमिलम्। ततोऽन्यस्मिन्नहनितच्चिचितंनिस्त्वचैस्तिलैः ॥ विधायपूपकंतेन तन्त्रिकायांघृतेपचेत् । ततोऽमृतरसाजातावातघ्नीबलवर्द्धिनी । अरोचकहराहृद्यासुशीतापित्तकृद्धिमेति ॥ कपिलद्राक्षायाम् ॥

अमृतवल्ली । स्त्री । गुडूच्याम् ॥

अमृतसंयावः । पुं । पक्वान्नविशेषे ॥ स यथा । समितांमधुदुग्धेनमर्दयित्वा प्रयत्नेनम । पचेद्घृतेत्तमेतस्मिन्यसेत्पाकंनवेघटे । ततोमरिचचूर्णेनखण्डचूर्णेनचूर्णितम् । कुर्यात्कर्पूरसंयुक्तंसंयावममृतोपमम् ॥ संयावममृतंस्वादुपित्तघ्नंमधुरंस्मृतम् । कृष्णंकफहरंहृद्यविपाकेगुरुभाषितमिति ॥

अमृतसम्भवा । स्त्री । गुडूच्याम् ॥

अमृतसारजः । पुं । गुडे ॥ तवराजीखण्डे ॥

अमृतसिद्धियोग. । पुं । योगविशेषे ॥ यथा । हस्तामृगशिराश्वाजीमैत्रपुष्येचरेवती । रोहिण्यर्कादिषु त्वेयाऽमृतसिद्धिर्यथाक्रममिति ॥

अमृतसूः । पुं । विधौ ॥ स्त्री । अदितौ ॥ अमृतानांदेवानांसूः प्रसूतिः ॥

अमृतसोदरः । पुं । घोटके ॥ इतिराजनिर्घण्टः ॥

अमृतस्रवा । स्त्री । रुदन्त्याम् ॥ उपवल्लिकायाम । घनवल्ल्याम् ॥

अमृता । स्त्री । मागध्याम ॥ पथ्यायाम् ॥ कथितामांसलाऽमृ तेतिलक्षणाम् । विरेचनेप्रशस्तेयम् ॥ गुडूच्याम् ॥ नमृतमस्याः ॥ आमलक्याम् ॥ नम्रियंतेऽनया । तनिमृङ्भ्यांकिश्चेतितन् ॥ मदिरायाम् ॥ इन्द्रवारुण्याम् ॥ ज्योतिष्मत्याम् ॥ गोरक्षदुग्धायाम् ॥ अतिविषायाम् ॥ रक्तत्रिवृति ॥ दूर्वायाम् ॥ तुलस्याम् ॥

अमृतान्धाः । पुं । देवे ॥ अमृतमन्धोन्नंयस्यसः ॥

अमृताफलः । पुं । पटोले ॥ इतिद्रव्याभिधानम् ॥

अमृतायमानः । त्रि । अमृतरसभरिते ॥ आनन्दसुधारसपुष्टे ॥

अमृताशः । पुं । विष्णौ ॥ आत्मामृतरसमश्नाति इति तथा ॥ अमृतवदमृतस्वरूपानन्दरसमश्नात्यनुभवति । अश्न० । अमंगण्णवा ॥

अमृताशन· पुं । देवे ॥ अमृतमशनमस्य ॥

अमृतासङ्गम् । न । कर्पूरिकातुल्ये ॥

अमृताहरण । पुं । गरुडे ॥ अमृतमाहरणं यस्यसः ॥

अमृताह्वम् । न । लघुविल्वफलाकृतिखुरासानदेशजेफलविशेषे । अमृतफले । नाशपातीतीतरजनभाषाप्रसिद्धे ॥

अमृतोत्पन्नम । न । खर्परीतुल्ये ॥

अमृतोत्पन्ना । स्त्री । मक्षिकायाम् ॥ इतिराजनिर्घण्टः ॥

अमृतोद्भवम् । न । खर्परीतुल्ये । तुल्ये ॥

अमृतोपमः । त्रि । प्रीत्यतिशयास्पदे । अमृत मुपमायस्य ॥

अमृष्यमाणः । त्रि । असहमाने ॥

अमेधाः । त्रि । मूढे ॥

अमेध्यम् । न । पुरीषे । अयज्ञार्हे । अशुचिमांसादौ ॥ त्रि । अपवित्रे । नमेध्यमितिविग्रहः ॥

अमेयः । त्रि । अपरिच्छेद्ये । इयानितिमातुमशक्ये ॥ नमेयः ॥

अमोघः । पुं । नदविशेषे ॥ त्रि । सफले । अव्यर्थे । परमेश्वरे ॥ सद्भिपूजितःस्तुतःसंस्मृतःसर्वंफलंददातिनवृथाकरोतीत्यमोघः ॥ नमोघः ॥

अमोघदृक । त्रि । यथार्थवीर्ये ॥

अमोघा । स्त्री । हरीतक्याम् ॥ विडङ्गे ॥ पाटलावृक्षे ॥

अम्नर् । T । } शीघ्रे ॥ साम्प्रतिके ॥
अम्नस् । T । }

अम्बकम् । न । लोचने ॥ ताम्रे ॥ अम्बक पितेतित्र्यम्बकेरामाश्रमः ॥

अम्बरम् । न । पतत्रिमेघसञ्चारप्रदेशाद्युपरिसिद्धविद्याधरसञ्चारप्रदेशे । आकाशे ॥ स्वनामख्यातसुगन्धिद्रव्ये ॥ वस्त्रे ॥ कार्पासे ॥ अभ्रधातौ ॥ लग्ना द्दशमे ॥ अम्बते शब्दायते । अविशब्दे । भावेघञ् । अम्बः शब्दः । तंराति । रातेःकः । अम्बरम् ॥ अम्बते अभ्यतेवा । अविशब्दे । बाहुलकादरोवा ॥

अम्बरलेखि । न । अभ्रङ्कषे ॥

अम्बरीषः । पुं । मान्धातुस्तनये ॥ सूर्यवंशीयनाभागात्मजेपरमभागवते ॥ नरकभेदे ॥ किशोरे ॥ भास्करे ॥ विष्णौ ॥ खण्डपरशौ ॥ आम्रातके ॥ अनुतापे ॥ न । रणे ॥ भ्राष्ट्रे । भर्जने ॥ पचन्तितस्मिन्नम्बरीषम् । निपातनात्साधु ॥ अभ्यतेऽनेनवा । अविशब्दे । अम्बरीषइतिसाधुः । मण्डकपाकभाजने ॥

अम्बष्ठः । पुं । देशभेदे ॥ विप्राद्विवाहितवैश्यासुते ॥ ब्राह्मणाद्वैश्यकन्या

यामम्बष्ठोनामजायते । अयंचिकित्सावृत्तिर्वैद्यइतिख्यात. ॥ हस्तिपके ॥ कायस्थजातिविशेषे ॥ अम्बेतिष्ठति । प्रागतिनिवृत्तौ । सुपीतिकः । अम्बाम्बेतिषत्वम् ॥

अम्बष्ठकी । स्त्री । पाठायाम् । पटाडू इतिहिमगिरि प्रसिद्धलतायाम ॥

अम्बष्ठा । स्त्री । अम्ललोणयाम् । चाङ्गेर्याम् ॥ यष्ठाम्बायाम् ॥ पाठायाम ॥ यूथिकायाम । जूहीतिख्यातपुष्पे ॥ ब्राह्मणाद्वैश्यायामुत्पन्नायाम् ॥ अम्बेव मातेवतिष्ठति । सुपिस्थइतिकः । अम्बाम्बेतिषत्वम् । ङ्यापोरितिह्रस्व ॥

अम्बष्ठिका । स्त्री । अम्बष्ठायाम् । पाठायाम् । ब्राह्मणयाम् । वह्मनेटो इतिभाषा प्रसिद्धायाम् ॥

अम्बष्ठी । स्त्री । अम्बष्ठायाम ।

अम्बा । स्त्री । मातरि ॥ दुर्गायाम् ॥ नाट्योक्त्यापिमातरि ॥ पाण्डुराज्ञो-मातुः स्वसायाम् ॥ अम्बष्ठायाम् । शठाम्बायाम् ॥

अम्ब्यते शब्द्यते । अविशब्दे । गुरोश्चहलइत्यः ॥

अम्बामख. । पुं । नवरात्रोत्सवे ॥

अम्बालिका । स्त्री । अम्बार्थे ॥ काशि-

राजस्यसुतायाम् । पाण्डुराज्ञो मातरि ॥

अम्बासुतः । पुं । गणेशे ॥

अम्बिका । स्त्री । पार्वत्याम् ॥ अम्बैवाम्बिका । जगन्मातृत्त्वात् ॥ मातरि ॥ धृतराष्ट्रजनन्याम् । काशिराजतनयायाम् ॥ जैनदेव्यन्तरे ॥ कटुक्याम् ॥ अम्बष्ठायाम् ॥

अम्बु । न । जले ॥ चतुर्थभवने ॥ ह्रीवेरे ॥ अम्बते । अविशब्दे । वा हुलकादुः ॥

अम्बुकण्टकः । पुं । कुम्भीरे ॥ शृङ्गाटके ॥

अम्बुकिरातः । पुं । कुम्भीरे ॥ इतिचिकाण्डशेष. ॥

अम्बुकीश. । पुं । स्रसइतिप्रसिद्धे जलजन्तुविशेषे । शिशुमारे ॥ इतिहेमचन्द्र. ॥

अम्बुकूर्मः पुं । शिशुमारे ॥ इतिहेमचन्द्रः

अम्बुकेशरः । पुं । छोलङ्गवृक्षे ॥ इतिरत्नमाला ॥

अम्बुचामरम् । न । शैवले ॥ इतिजटाधरः ॥

अम्बुजः । पुं । हिज्जले । निचुले ॥ न । कमले ॥ वज्रे ॥ शङ्खे ॥ अम्बुनिजात. । जनीप्रादुर्भावे । सप्तम्यां जनेर्डः ॥

अम्बुजन्म । न । पद्मे ॥ इतिराजनिर्घण्टः ॥ चि । जलोद्भवे ॥

अम्बुतालः । पुं । शैवाले ॥ इतित्रिकाण्डशेषः ॥

अम्बुदः । पुं । मेघे ॥ मुस्तायाम् ॥ अम्बुददाति । डुदा । क ॥

अम्बुधरः । पुं । मुस्तके ॥ मेघे ॥

अम्बुधिः । पु । पारावारे ॥ अम्बूनिधीयन्तेऽत्र । डुधाञ् । कर्मण्यधिकरणे चेतिकिः ॥

अम्बुधिस्रवा । स्त्री । गृहकन्यायाम् ॥

अम्बुप । पुं । चक्रमर्दे ॥ वरुणे ॥ शतभिषाख्येनक्षत्रे ॥

अम्बुपतिः । पुं । वरुणे ॥

अम्बुपत्रा । स्त्री । उच्चटायाम् ॥

अम्बुपर्णी । स्त्री । पृश्न्याम् ॥

अम्बुप्रसादः । पुं । कतकवृक्षे ॥

अम्बुप्रसादनम् । न । कतके । निर्मली इतिख्याते फले ॥

अम्बुमायम् । न । अनूपे ॥ अम्बु मायंयत्र ॥

अम्बुभृत् । पुं । समुद्रे ॥ मेघे ॥ मुस्तके ॥ अम्बुविभर्त्ति । डुभृञ् धारणपोषणयोः । क्विप्तुकौ ॥

अम्बुमान् । पु । कच्छे ॥

अम्बुमाचजः । पुं । शम्बूके ॥ अम्बुमाचे जायते जनी० । डः ॥

अम्बुरः । पुं । द्वाराधःकाष्ठे । गोवराट इतिगौडभाषा प्रसिद्धे ॥ इतिहेमचन्द्र. ॥

अम्बुरुहम् । न । कमले ॥ अम्बुनि रोहति । रुहे'कः ॥

अम्बुरुहा । स्त्री । स्थलपद्मिन्याम् ॥

अम्बुरुहिणी । स्त्री । नलिन्याम् ॥

अम्बुवाची । स्त्री । रजस्वलायाभूमौ ॥ यथा । यद्वारे यत्काले मिथुनसङ्क्रमणं भूतं तद्वाराभ्यन्तरे तावत्कालावधिविशत्यादि दण्डाधिकदिनत्रयमम्बुवाची । साचार्द्रानक्षत्राद्यपादावच्छेदेनतिष्ठति । तस्यदिनस्यनिषिद्धत्वमुक्तं ज्योतिःशास्त्रे । यथा । मृगशिरसिनिवृत्तेरौद्रपादेम्बुवाचीऋतुमतीखलुपृथ्वीवर्ज्जयेत् त्रीण्यहानि । यदिवपतिकृषाणः चेत्रमासाद्यवीजं न भवतिफलभागी शस्यचाण्डालपाकः॥ नस्वाध्यायोवषट्कारोनदेवपितृपूजनम् । नापिपाठोवीजवापोनवाभूखननादिकमित्यादि । विशेष. परिशिष्टे ॥ तत्रसर्पभयोपशमनाय दुग्धंपेयम् । यथोक्तं ज्योतिषे । रजोयुक्त्वात्मम्बुवाचीचरौद्राद्यपादगेरवौ । नास्यांपाठोवीजवापोनाद्विभीर्दुग्धपानतइति ॥ रजोयुक्त्वा ऋतुमतीपृथ्वीत्यर्थः ॥

अम्बुवासिनी। स्त्री। पाटलौ॥

अम्बुवासी। स्त्री। पाटलावृक्षे॥

अम्बुवाहः। पुं। अम्बुदे॥ अम्बुवहति। वह०। कर्मख्यण्॥ मुस्तके॥

अम्बुवेतसः। पुं। जलवेतसे॥ अम्बुनिजातो वेतसः। शाकपार्थिवादिः।

अम्बुशिरीषिका। स्त्री। शिरीषिकायाम्। जलशिरीषे॥

अम्बुसंरोधः। पुं। जलधौ॥ अम्बुसंरुध्यतेऽनेन॥

अम्बुसर्पिणी। स्त्री। जलौकायाम्॥

अम्बूकृतम्। त्रि। सनिष्ठेवे। श्लेष्मकणानिर्गमसहितवचसि॥ अम्बुशब्द उपचारात्तद्वति। अनम्बु अम्बुअकारि। च्विः। च्वौचेतिदीर्घः। क्तः॥

अम्लः। पुं। अम्लरसे॥ इत्युणादिकोषः। अम्बते। अविशब्दे। मूशक्यम्बिभ्यः क्लः॥

अम्भः। न। जले॥ आप्नोति आप्यते वा। आप्लृव्याप्तौ। उदकेनुम् भौचेतिह्रस्वोभान्तादेशो नुमागमश्च॥ अम्भतेवा। अभिशब्दे। असुन्॥ देवे॥ मनुष्ये॥ पितरि॥ असुरे॥ तानि ह्वा एतानि चत्वार्यम्भांसि देवा मनुष्याःपितरोऽसुरा इतिश्रुतेः॥ वाले। ह्रीवेरे॥ लग्नाच्चतुर्थराशौ॥ नवविधतुष्टिषु प्रकृत्याख्यातुष्टि राध्यात्मिका अम्भउच्यते। यथा कस्यचिदुपदेशः विवेकसाक्षात्कारोहि प्रकृति परिणामभेदः तञ्चप्रकृतिरेवकरोति इतिकृतं तेध्यानाभ्यासेन तस्मादेवमेवास्तु वत्सेतियेयमुपदिष्टस्य।शिष्यस्यप्रकृतौतुष्टिःसाप्रकृत्याख्याअम्भउच्यते॥

अम्भःसारम्। न।
अम्भस्सारम्। न। } मुक्तायाम्॥ इतिशब्दनिर्घण्टः॥

अम्भःसूः। पुं।
अम्भस्सूः। पुं। } धूमे॥ इतिहेमचन्द्रः॥

अम्भोजम्। न। अम्बुजे॥ पु। चन्द्रमसि॥ त्रि। जलोद्भवे॥ अम्भसिजः। जनी०। सप्तम्याजनेर्डः॥

अम्भोजखण्डम्। न। अम्भोजानां समूहे॥ कमलादिभ्यःखण्डः॥

अम्भोजन्म। न। कमले॥

अम्भोजयोनिः। पुं। वेधसि॥ अम्भोजं योनिः प्रादुर्भावस्थानमस्य। नारायणनाभिकमलजत्वात्॥

अम्भोजिनी। स्त्री। पद्मसमूहे। नलिन्याम्॥ पद्मवतिदेशे॥ अम्भोजान्यस्यत्र। पुष्करादिभ्यादिनिः॥

अम्भोदः। पुं। जलदे॥ मुस्तके॥ अम्भो ददाति। दा०। कः॥

अम्भोधरः। पुं। अम्बुधौ। मेघे॥ मुस्तके॥ धरति॥ धृञ्धारणे। अच्। अ

अम्भसांधरः ॥

अम्भोधिः । पुं । सिन्धौ । समुद्रे ॥ अम्भांसिधीयंतेऽत्र । धाञः कर्मण्यधिकरणेचेति किः ॥ जलाशये ॥

अम्भोधिवल्लभः । पुं । प्रवाले ॥ इतिराजनिर्घण्टः ॥

अम्भोनिधिः । पुं । अब्धौ । समुद्रे ॥ अंभांसि निधीयंतेऽस्मिन् । कर्मण्यधिकरणेचेति धाञः किः ॥ अम्भसांनिधिर्वा ॥ हरौ ॥ अम्भांसि देवादयो निधीयन्ते ऽस्मिन्निति । देवमनुष्य पितृसुरादेवादयः ॥

अम्भोरुहम् । न । अम्बुजे ॥ अम्भसिरोहति । रुहप्रादुर्भावे । इगुपधेतिकः ॥

अम्भयम् । त्रि । अम्बुमये । आप्ये । जलविकारे फेनादौ ॥ अपांविकारः । एकाचोनित्यमिति मयट् । स्त्रियामम्मयी ॥

अम्रः । पुं । आम्रवृक्षे ॥ न । आम्रफले ॥ इतिशब्दरत्नावली ॥

अम्रातः । पुं । आम्रातके ॥

अम्रातकः । पुं । आम्रातके । अम्बाडा इति ख्याते ॥ अमजमतति । अतसातत्यगमने कृञादिभ्योवुन् । रलयोरैक्यम् ॥

अम्लः । पुं । रसान्तरे । खट्टा इतिभाषा ॥ तोयाग्निगुणबाहुल्यादम्लइतिश्रुतः ॥ अस्यगुणायथा । अम्लोग्न्यन्तो वह्निःशीतोरुच्यःपित्तकफास्रदः । विबन्धानाहदृष्टिघ्नो दन्ताक्षिभूनिकोचनइति ॥ अम्लवेतसे ॥ इतिराजनिर्घण्टः ॥ न । तक्रे ॥ अम्यतेशबध्यते भोक्तृभिः । अमगत्यादिषु । भूशक्यम्बिभ्य. क्त इतिबाहुलकाद्मे.क्तः ॥ त्रि । अम्लरसवति ॥ अर्शआद्यच् ॥

अम्लक' । पुं । लकुचवृक्षे ॥ इतिशब्दरत्नावली ॥

अम्लकाण्डम् । न । लवणतृणे ॥

अम्लकेशर' । पु । मातुलुङ्गे ॥ अम्ला. केशरा' अस्य ॥

अम्लचूड. । पुं । अम्लद्रव्यविशेषे । शाकाम्ले । चिञ्चासारे ॥ इतिराजनिर्घण्ट. ॥

अम्लजम्बीरः । पुं । अम्लनिम्बूके ॥

अम्लद्रवः । पुं । वीजपूरादिरसे ॥

अम्लनायकः । पुं । अम्लवेतसे ॥

अम्लनिशा । स्त्री । शट्याम् ॥

अम्लपञ्चफलम् । न । अम्लरसयुक्तपञ्चप्रकारफले ॥ तद्यथा । कोलम् १। दाडिमम् २। वृक्षाम्लम् ३। चुक्रिका ४। अम्लवेतसमिति ५॥ मतान्तरेतु । जम्बीरम् १ नारङ्गम् २ अम्लवेतसम् ३ तिन्तिडीकम् ४ वीजपूरमिति ५ राजनिर्घण्टः

अम्लपत्रः । पु । अश्मन्तकवृक्षे ॥

अम्लपत्री । स्त्री । क्षुद्राम्लिकायाम् ॥ पलाशीलतायाम् ॥

अम्लपनसः । पुं । लिकुचे ॥ अम्लश्चासौ पनसश्च ॥

अम्लपूरम् । न । वृक्षाम्ले ॥

अम्लफलम् । न । अम्लो इ०म० वृक्षाम्ले ॥ पुं । आम्रवृक्षे ॥

अम्लभेदनः । पुं । अम्लवेतसे ॥

अम्ललता । स्त्री । मालवदेशजनागवल्ली प्रभेदे ॥

अम्ललोणिका । स्त्री । चाङ्गेर्याम् ॥

अम्लवती । स्त्री । क्षुद्राम्लिकायाम् । चाङ्गेर्याम् ॥

अम्लवर्गः । पुं । आम्रादिगणे ॥ यथा । आम्रआम्रातकोधात्री लकुचं चकपित्थकम् । नागरङ्गं द्विविधाजम्बूः करमर्दं पियारकम् ॥ दाडिमं पारावतीद्राक्षा दिवधःदरं तूदकम् । बीजपूरं च जम्बीरं निम्बूकञ्चैकाम्लवेतसम् ॥ वृक्षाम्लचरिमन्थं च चाङ्गेरीत्यम्लवर्गकः ॥ निम्बूकं दाडिमं धात्रीफलमम्लं प्रकाशते । प्रदद्यादम्लसात्म्याय काञ्जिकं वा पुरातनमिति ॥ ज्वराधिकारस्थोऽयं श्लोकः ॥

अम्लवल्ली । स्त्री । त्रिपर्णिकानामकन्दविशेषे ॥

अम्लवाटिका । स्त्री । नागवल्लीभेदे ॥

अम्लवातकः । पुं । आम्रातके ॥

अम्लवास्तूकम् । न । चुक्रे । चूका इति प्रसिद्धशाके ॥

अम्लवीजम् । न । वृक्षाम्ले ॥

अम्लवृक्षम् । न । वृक्षाम्ले । इमलीति प्रसिद्धवृक्षे ॥

अम्लवेतसः । पुं । स्वनामख्यातवृक्षे । सहस्रवेधिनि । चुक्रे । गुणा यथा । अम्लवेतसमत्यम्लं भेदनं लघुदीपनम् । हृद्रोगशूलगुल्मघ्नमपित्तलोहितदूषणम् । रूक्षं विण्मूत्रदोषघ्नं प्लीहोदावर्तनाशनम् । हिक्कानाहारुचिश्वासकासाजीर्णवमिप्रणुत् । कफवातामयध्वंसिच्छागमांसद्रवत्वकृत् । चणकाम्लगुणं प्रोक्तं लोहसूचीद्रवत्वकृदिति ॥ अम्लश्चासौ वेतसश्च न प्रत्वात् ॥

अम्लशाकः । पुं । अम्लचूडे ॥ न । चुक्रे ॥ वृक्षाम्ले ॥

अम्लसारः । पुं । अम्लवेतसे ॥ निम्बूके ॥ हिन्ताले ॥ न । काञ्जिके ॥

अम्लहरिद्रा । स्त्री । शठ्याम् ॥ इति राजनिर्घण्टः ॥

अम्ला । स्त्री । चिञ्चायाम् ॥

अम्लाङ्कुशः । पुं । अम्लवेतसे ॥

अम्लातकः । पुं । अम्लादने ॥

अम्लादनः । पुं । कुरण्टके । अम्लाने ॥ पीयावांसा इतिप्रसिद्धे । वाणपुष्प इतिगौडेषु विख्याते ॥ गुणा यथा । अम्लादनः कषायोष्णः स्निग्धः स्वादुस्तिक्तकइति ॥

अम्लानः । पुं । महासहायाम् । कठसर्य्याइतिख्याते ॥ त्रि । निर्मले ॥ न म्लायतिस्म । म्लै० । गत्यर्थाकर्मकेतिक्तः । संयोगा देरातोधातोर्यण्वत इतिनिष्ठानत्वम् ॥

अम्लानिनी । स्त्री । पद्मिन्याम् । पद्मसमूहे ॥

अम्लिका । स्त्री । चिञ्चायाम् ॥ अस्या गुणास्तु ॥ अम्लिकामा गुरुर्वातहरी पित्तकफास्रकृत । पक्वातु दीपनी रूक्षासरोष्णाकफवातनुत् ॥ अम्लिकायाः फलंपक्वं मर्द्दितं वारिणाहढम् । शर्करामरिचोन्मिश्रंलवङ्गेन्दुसुवासितम् ॥ अम्लिकाफलसम्भूतंपानकंवातनाशनम । पित्तश्लेष्मकरंकिंचित्सुरुच्यंवह्निबोधकमिति॥अम्लोद्गारे । चाङ्गेरिकायाम् ॥ पलाशीलतायाम् ॥ श्वेताम्लिकायाम् ॥ अम्लोरसोऽस्याअस्ति । अतइनिठनाविति ठन् ॥

अम्लिकावटकः । पुं । फोरीवराइति लोके ॥ विधिर्यथा । अम्लिकास्वेदयित्वातुजलेनसम्यमर्द्दयेत् । तन्नीरे कृतसंस्कारे वटकान्मज्जयेज्जनः ॥ अम्लिकावटकास्ते तुरुच्यावह्निप्रदीपनाः । वटकस्यगुणैः पूर्वैरेतेपिचसमन्विताः इतिभावप्रकाशः ॥

अम्ली । स्त्री । चाङ्गेय्याम् ।

अम्लीका । स्त्री । तिन्तिड्याम् ॥

अम्लोटकः । पुं । अम्लकुचाइ इति गौडदेशभाषाप्रसिद्धे अश्मन्तकवृक्षे ॥ इतिरत्नमाला ॥

अयः । पुं । शुभावहविधौ । प्राक्तनशुभकर्मणि । कल्याणप्रापकेदैवे । एत्यनेनसुखम् । इण्गतौ । पुंसि संज्ञायामितिघः ॥ पाशकस्यगमने । कस्मिंश्चिद्भागे । द्यूतकृतां प्रदक्षिणगमने । अयतेः कर्त्तरि पचाद्यच् ॥

अयः पानम् । न । नरकविशेषे ।

अयः प्रतिमा । स्त्री । सूर्म्याम् । अयसः प्रतिमा ।

अयः शूलम् । न ।तीक्ष्णउपाये ।

अयक्ष्मः । पुं । दैवादियक्ष्मभिन्ने । त्रि । यक्ष्मरहिते ।

अयज्ञियः । त्रि । यज्ञानर्हे । पुं । माषे ।

अयत्न' । त्रि । चेष्टाशून्ये ।

अयथा । । । उचितस्यान्यथात्वे । मिथ्यार्थे ।

अयथार्थानुभवः । पुं । तदभाववतित

त्प्रकारकानुभवे ॥ सचसंशयविपर्ययतर्कभेदात्त्रिविध. ॥ अयथार्थश्चासावनुभवश्च ॥ नयथार्थानुभवोवा ॥

अयथार्थास्मृतिः । स्त्री । अप्रमाजन्यायांस्मृतौ ॥ अयथार्थाचासौस्मृतिश्च ॥

अयनम् । न । पथि ॥ अयन्ते ईयन्तेवाऽनेन । करणेति ल्युट् युजवा ॥ भानोरुदग्दक्षिणतोगतौ ॥ यथा । मृगकर्कटसङ्क्रान्ती । द्वे उदग्दक्षिणायनेइति॥ अपिच । द्युमणिसङ्क्रमतोमृगकर्किणोरयनकेभवतइति ॥ अयतेऽस्मिन्ऽनेन । अयगतौ । ल्युटि च्च तुरथे ॥ यथा । सौरर्त्तुवितयं प्रदिष्टमयनमिति ॥ अयते यात्यनेन त्तुरयेणसूर्योदक्षिणामुत्तरांवेति ॥ समरसमारंभकाले योधानांयुथा प्रधानं युद्धभूमौपूर्वा परादिक्षिग्विभागेनावस्थिति स्थानानि यानि नियम्यन्ते तेषु।मोरचाइतीतरभाषाप्रसिद्धेषु ॥ व्यूहप्रवेशमार्गे॥ गतौ ॥ आश्रये ॥ स्थाने ॥ गेहे ॥ शास्त्रे ॥ यथा । ज्योतिषामयनंनेत्रमिति ॥

अयनांशः । पुं । सूर्यगतिविशेषस्य भागे ॥ यथाहकालिदासः । शाक. शराम्भोधियुगोनितोहृतोमानंखतर्कैरयनांशकाः स्मृताइति ॥

अयन्त्रित' । त्रि । अनर्गले ॥ नयन्त्रित. ॥

अयवान् । त्रि । भाग्यवति ॥ मतुप् ॥

अयशः । न । अधर्मनिमित्तायां लोकनिन्दायां प्रसिद्धौ । अकीर्त्तौ ॥ नयशः ॥

अयः । न । लोहे ॥ एति अयत्विा । इण्गतौ । असुन् ॥

अयस्कान्त' । पुं । चुम्बकाश्मनि ॥ अयः कान्तोऽस्य ॥ कान्तीसार इतिख्याते- कान्तलोहे ॥ सचतुर्विधः । भ्रामकचुम्बकरोमकस्वेङ्कभेदात् ॥ एते रसायने उत्तरोत्तरंगुणिनः । क्रमेण दार्ढ्याङ्गकान्तिकार्श्यनोरोगदायिन इतिराजनिर्घण्टः ॥

अयस्कारः । पुं । लोहकारे ॥ अयः करोति । डुकृञ् करणे । कर्मण्यण् ॥

अयाचितम् । न । अमृतहत्तौ ॥ यथा । ऋतमुञ्छशिलंप्रोक्तममृतस्यादयाचितमितिमनुः ॥ त्रि । याच्ञांविनालब्धेवस्तुनि । अनर्थिते ॥ पुं । मुनिभेदे । उपवर्षे ॥ व्रतविशेषे ॥ नयाचितम् ॥

अयाज्यः । त्रि । व्रात्ये ॥ नयाज्यः ॥

अयानम् । न । स्वभावे ॥ इतिहाराविली ॥ अगमने ॥

अयानयम् । न । द्यूतिनांस्थलविशेषे॥ तेषांगतिविशेषे ॥ अयसव्यिऽनतं-

नय. ॥

अयानयीनः । पुं । शारे । अक्षोपकरणे ॥ अयानयंस्थलविशेषंनेतव्यः । अनुपदसर्वान्नायानयमित्यादिनाख ॥ अत्रेयंद्यूतशास्त्रस्यमर्यादा । चतस्रोवीथय, प्रत्येकंद्वादशकोष्ठोपेता' । शारास्तुत्रिंशत् । तेच एकैकेनकितवेनपंचदशस्ववामपार्श्वस्थ प्रथमकोष्ठपर्यंतंप्रदक्षिण प्रसव्यगतिभ्यांनेयाः । सर्वेष्वायानयीनाः । ससहायस्यशारस्यपरैर्नाक्रम्यते पदम् । असहायस्तु शारेण परकीयेणवाध्यते इत्यादि तच्छास्त्राद्बोध्यम् ॥

अयाऽ । पुं । वह्नौ ॥ एति । इण्° । आसि. ॥

अयि । ा । प्रश्ने ॥ अनुनये ॥ सम्बोधने ॥ अनुरागे ॥ ईयते अय्यतेवा । इः इन्वा ॥

अयुक्छदः । पुं । सप्तपर्णवृक्षे ॥

अयुक्त । त्रि । अजितचित्ते । सर्वदाविषयापहृतचित्तत्वेन कर्त्तव्येष्वनवहिते ॥ अस्थिते ॥ अमिश्रिते ॥ न युक्तः ॥

अयुक्तम् । ा । अनर्हे ॥

अयुग्मः । पुं । विषमे ॥

अयुग्मच्छदः । पुं । सप्तपर्णवृक्षे ॥ अयुग्माः छदायस्य ॥

अयुतः । त्रि । असंयुक्ते । अयुक्ते ॥ न । दशसहस्रे १०००० ॥ नयुतम् ॥

अयुतसिद्धौ । पुं । ययोर्द्वयोर्मध्ये एकमपराश्रितमेवतिष्ठते तावयुतसिद्धौ ॥ यथा । अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्येचेति ॥

अये । ा । क्रोधे ॥ विषादे ॥ सम्भ्रमे ॥ स्मरणे ॥ सम्बुद्धौ ॥

अयेयः । त्रि । अयातव्ये । यान 'विनैव साध्ये ॥ यातुंयोग्य । या° । अचोयत् । ईद्यति । गुणः । नयेयः ॥

अयोगः । पुं । विधुरे ॥ कूटे ॥ विश्लेषे ॥ कठिनोद्यमे ॥ वमनविरेचनादीनां प्रतिलोमप्रवृत्तौ अल्पप्रवृत्तौच ॥ तदुक्तं वैद्यके । योग.सम्यक्प्रवृत्तिःस्या इतियोगोतिवर्त्तनम् । अयोगः प्रातिलोम्येननचाल्पंवाप्रवर्त्तनमिति ॥ नयोगः ॥

अयोगव । पुं ।आयोगवे । शूद्राद्वैश्यकन्यायामुत्पन्ने ॥ इतिजटाधरः ॥

अयोगुडः । पुं । लौहगुलिकायाम् । गोली इतिभाषा प्रसिद्धायाम् ॥

अयोग्रम । न । मुसले ॥ अयोऽग्रेऽस्य ॥

अयोग्रकम् । न । मुसले ॥

अयोघनः । पुं । लौहपुञ्जे । हथौडा इत्यादि भाषाप्रसिद्धे लौहमुद्गरे ॥ अ

योऽन्यतेऽनेन । हन० । करणेऽयो विद्रुघ्निन्यप् घनादेशश्च ॥

अयोध्या । स्त्री । सरयूतीरेवादशयोजनायतायां साकेतपुर्य्याम् । उत्तरकोशलायाम् ॥ त्रि । युद्धानर्हे ॥

अयोनिजः । पुं । हरौ ॥ योनौयोनिपदलक्षितायां जनन्यांनजायते । जनोप्रादुर्भावे । सप्तम्यांजनेर्डः ॥ स्त्री । सीतायाम् । जानक्याम् ॥

अयोमलम् । न । मण्डूरे । लौहकिट्टे ॥

अयोमुखः । पुं । असुरविशेषे ॥

अरम् । न । शीघ्रे ॥ चक्राङ्गे । चक्रस्य नाभिनेम्योर्न्तरालस्थकाष्ठे ॥ ऋच्छति अयर्त्तिर्वा । ऋच्छगत्यादौ । ऋगतौवा । पचाद्यच् ॥ शीघ्रार्थेक्रिया विशेषणत्वादसत्वे वर्त्तमानोयंक्लीबः द्रव्यगामीतु त्रिलिङ्गः ॥ ब्रह्मलोकस्थेसमुद्रोपमे सरसि । जिनानां कालचक्रस्य द्वादशांशे । सतु अवसर्पिण्याः जिनभागः ॥ जिनानामष्टादशे जिने ॥ त्रि । शीघ्रगे ॥

अरकः । पुं । शैवले ॥ पर्पटे ॥

अरघ्वधः पुं । राजवृक्षे ॥ इत्यमरटीकायांभरतः ॥

अरघट्टः । पुं । महाकूपे ॥

अरघट्टकः । पुं । घटीयन्त्रे । पादावर्त्ते । महाकूपे ॥

अरजम् । त्रि । निर्मले ॥ नविद्यतेरजोरेणुर्यस्मिन् । रजोगुणरहिते ॥

अरजाः । स्त्री । नग्निकायाम् । अनागतार्त्तवायाम् । कुमार्य्याम् । त्रि । रजोगुणरहिते ॥

अरणम् । न । शरणे ॥

अरणिः । पुं । वह्निमन्थे । गणिकारिकावृक्षे । सूर्ये । इतिकाशीखण्डम् ॥ पुं । स्त्री । निर्मन्थ्यदारुणि ॥ ऋच्छति । ऋगतिप्रापणयोः । अर्त्तिसृधृधमीत्यनिः ॥

अरणिकः । पुं । श्योपर्णे । अग्निमन्थे ॥

अरणी । स्त्री । अरण्याम् ॥

अरणीकेतुः । पुं । अग्निमन्थवृक्षे ॥

अरणीसुतः । पुं । अग्नौ ॥

अरण्यम् । न । वने ॥ स्त्रीजनासङ्कीर्णाश्रमे ॥ दण्डकारण्यादिनवसु ॥ यथा । दण्डकंसैन्धवारण्यंजम्बूमार्गञ्च पुष्करम् । उत्पलावर्त्तकारण्यं नैमिषंकुरुजाङ्गलम् । हिमवानर्बुदश्चैवनवारण्यंविमुक्तिदमितिवराहपुराणम् ॥ अर्य्यते मृगैः । ऋगतौ । अर्त्तेर्निच्चेत्यन्यः ॥ पुं । कट्फलवृक्षे इति शब्दचन्द्रिका ॥

अरण्यकदली । स्त्री । गिरिकदल्याम् ॥

अरण्यकार्पासी । स्त्री । वनकार्पास्याम् । भारद्वाज्याम् ॥ इयंहिमाद्रुण्वा

व्रणशत्रुश्चेतनाग्निनीति राजनिर्घ-
ण्टः ॥
अरण्यकुलत्थिका । स्त्री । कुलत्थायाम् ।
वनकुलथी इतिभाषा ।
अरण्यकुसुम्भः । पुं । वनकुसुम्भे । अग्निस
म्भवे । कौसुम्भे ॥ पाके कटु, श्लेष्मनाशी
जठराग्निविवृद्धिकृदित्यस्य गुणाः ।
अरण्यघोली । स्त्री । पत्रशाकविशेषे ।
वनघोल्याम् ।
अरण्यचटकः । पुं । धूसरे । वनचटके ॥
अरण्यजार्द्रका । स्त्री । वनार्द्रकायाम् ।
ऐन्द्रे । वन अद्रक इतिभाषा ।
अरण्यजीरः । पुं । वनजीरे ।
अरण्यधान्यम् । न । नीवारे ।
अरण्यमक्षिका । स्त्री । दंशे । अरण्य
स्यमक्षिका ।
अरण्यमुद्गः । पुं । मकुष्ठे ।
अरण्यवायसः । पुं । द्रोणकाके ।
अरण्यवासिनी । स्त्री । अत्यम्लपर्णील
तायाम् ॥
अरण्यवास्तूकः । पुं । कुणञ्जरे ॥
अरण्यशालिः । पुं । नीवारे । वनधान्ये ॥
अरण्यशूरणः । पुं । वनशूरणे ॥
अरण्यश्वा । पुं । वृके ॥
अरण्यषष्ठी । स्त्री । ज्येष्ठशुक्लषष्ठ्याम्
। यथा । ज्येष्ठमासि सिते पक्षे षष्ठी
चारण्यसंज्ञिता । व्यजनैककरास्त

स्यामटन्तिविपिने स्त्रियः । तां विन्ध्यवा
सिनीं स्कन्दषष्ठीमाराधयन्ति च । क
न्दमूलफलाहारा लभन्ते सन्ततिं शुभा
म् ॥ कन्दं शूरणादि । तद्भिन्नं मूलम्
। इतिराजमार्त्तण्डः ॥
अरण्यानी । स्त्री । महावने । महदरण्य
मित्यस्मिन्नर्थे इन्द्रवरुणेतिसूत्रस्थेन
हिमारण्ययोर्महत्त्वइतिवार्त्तिकेना
ऽरण्यशब्दस्यानुगागमस्ततो ङीष् ।
अरण्यायनम् । न । अरण्यवासे ॥
अरतत्रपः । पुं । शुनि । वक्रपुच्छे ॥
अरतिः । पुं । क्षुधि ॥ स्त्री । अनवस्थि
त चित्तत्वे । क्रोधाभावे । रतिविर
हे । उद्वेगे । इष्टवियोगान्मनस्त्वाकु
लीभावे । यथा । स्वाभीष्टवस्त्वलाभे
न चेतसो याऽनवस्थितिः । अरतिः
सेति । त्रि । रतिहीने । ऋच्छति
। ऋ० । वहिवस्यर्तिभ्यश्चिदित्यतिः
। अर्त्तेश्चेत्यतिर्वा ।
अरत्निः । पुं । सप्रकोष्ठततांगुलिकरे ।
विस्तृतकनिष्ठबद्धमुष्टिहस्तपरिमा -
णे । कफोणौ ॥ रत्निभिन्नः । नञ्स
मासः । यद्वा । ऋतन्यञ्जीत्यत्र .
कत्निच् । बद्धमुष्टिकरोऽरत्निः सोऽर
त्निः प्रसृताङ्गुलिः । सहस्तइत्यर्थः ।
अरन्धनम् । न । वसौडा इतिप्रसिद्धे
पाकाभावे । यथा । कर्कान्नमथात

सिंहाह्वे सिंहाख्यं सिंहकन्ययोरि-
त्याचारमार्त्तण्ड. ॥

अरन्ध्रः । त्रि । निविडे ॥

अरपाः । त्रि । अपापे ॥ नविद्यते रपः
पापंयस्य ॥

अरम् । अ । असमर्थे ॥ अलमित्यव्ययस्य
बाहुलमूलेत्यादिना पचेरेफः ॥ अ-
ल्पे ॥

अररम् । त्रि । छदे ॥ कपाटे ॥ इयर्त्ति ।
अर्त्तिकमीत्यरच् ॥ अपिधाने ॥

अररिः । पुं । न । कपाटे ॥ ऋच्छति
। क्विप् । अरं ऋच्छति । सर्वधातुभ्यइ
तीनिः ॥

अररी । स्त्री । कपाट्याम् ॥ इयर्त्ति ।
ऋगतौ । अर्त्तिकमीत्यरन् । गौ
रादिङीष् ॥

अररुः । पुं । असङ्गारे ॥ शत्रौ ॥ ऋच्छ
ति अर्यतेवा । ऋगतिप्रापणयोः ।
अर्त्तेररुः ॥

अररे । अ । आशुसंवुद्धौ । त्वरान्वितस
म्बोधने ॥ इतिशब्दरत्नावली ॥

अरलुः । पुं । श्योनाकवृक्षे ॥ इयर्त्ति ।
ऋगतौ । अर्त्तेररुः । कपिलकादिः ॥

अरविन्दम् । न । पद्मे ॥ अराकाराणि
दलानितत्त्वात्तइत्याहुरराः तान्विन्दति
लभतइत्यर्थे गवादिषुविन्देः संज्ञाया
मिति कर्मण्युपो बाधकःशः । शेमु
चादीनामितिनुम् । अरंशीघ्रंलिप्सा
विन्दतिवा । सारसपक्षिणि ॥ नीलो
त्पले ॥ रक्तकमले ॥ ताम्रे ॥ इतिराज
निर्घण्टः ॥

अरविन्दिनी । स्त्री । नलिन्याम् ॥ पद्म
खण्डे ॥ तडागे ॥ अरविन्दानि सन्त्य
त्र । पुष्करादिस्वादिनिः । ङीप् ॥

अरसिकः । त्रि । अरसज्ञे । अविदग्धे ॥
यथा । अरसिकेषु रसस्यनिवेदनं
शिरसि मालिख मालिख मालिखे
त्युद्भटः ॥

अराजकः । त्रि । राजशून्यदेशादौ ॥
यथा । चौरप्रायं जनपदं हीनसत्त्व
मराजकमितिश्रीभागवतम् ॥ अरा
जकेहिलोकेस्मिन् सर्वतोविद्रुते-
यात् । रक्षार्थमस्यसर्वस्यराजानम
सृजत् प्रभुरितिमनुः ॥

अरातिः । पुं । अरौ ॥ नरातिसुखम् ।
रादाने । क्तिच् तिर्वा ॥

अरालः । पुं । सर्ज्जरसे ॥ समदद्न्तिनि
। त्रि । कुटिले ॥ ऋच्छति । ऋगतौ
। विच् अर् । अरमालाति । मूलवि
भुजादित्वात्कः ॥ अराः आला
तिवा ॥ नरातिदुःखम् । बाहुलका
त्सञ्ज्ञा ॥

अराला । स्त्री । वेश्यायाम् ॥

अरिः । पुं । शत्रौ । स्वकृतापकारमन-

पेक्ष्य स्वभावात् क्रौर्यंणामकर्त्तरि ॥ अरेर्गुणा यथा । मार्त्तंकुलीनंशूर च्छ्रदत्तंदातारमेवच । कृतघ्नधृतिम न्तंचकष्टमाहुररिं बुधा इति ॥ षष्ठग्र हे । षट्सु ॥ रथाङ्गे । चक्रे ॥ खदिर प्रभेदे । खदिरपत्रिकायाम् ॥ इयर्त्ति विरोधम् । ऋगतौ । अच इः ।

अरित्रम् । न । कर्णे । केनिपातके ॥ ऋच्छत्यनेन । ऋगतौ । अर्त्ति लूधू इतीत्रः ।

अरिन्दमः । पुं । पराभिभावके ॥ अरिं दाम्यतीति विग्रहे संज्ञायां भृतृवृजि धारिसहितपिदम इत्यनेनदाम्यतेः खचि पूर्वपदस्याअन्तश्चणोमुमाग- मः ॥ अरीन्कामादीन् दमयतीति वा ॥

अरिमर्दः । पुं । कासमर्दे ॥

अरिमेदः । पुं । इरिमेदे । विट्खदिरे ॥ अरिरिवमेदः स्नेहोऽस्य ॥ अयंक षायउष्णस्तिक्तोभूतविनाशनः शोथा तिसारकासविषवैसर्पनाशीचेतिरा जनिर्घण्टे नरसिंहकोशः ॥

अरित्रा । स्त्री । मात्राष्टकभेदे ॥ यथा । छन्दसिषोडशकलेविशाखिनि प्र- तिपदमन्त्ययमकविलासिनि । अरि त्रानामपयोधरधारिणि शेषेनियत लघुद्वयधारिणि ॥ यथा । किंकीना

शपाशधरगर्जसिमाशुघनगर्भहासभ- रमर्जसि । हरिचरणांभरणं नहिप श्यसियन्नामस्मरणादिपिनश्यसीति॥

अरिष. । पुं । अपानमांसजेरोगे । धा राप्रवर्षे ॥

अरिषड्धृकम् । न । विवाहाद्युपयोगि नि गणनाविशेसे ॥ यथा । मकरःक रिकुलरिपुणा कन्यामेषेणसह भ षस्तुलया । कर्किघटौ वृषधनुषी वृश्चिकमिथुनौषड्धृविधाविति ॥

अरिषड्वर्ग. । पुं । कामक्रोधलोभमोह मदमात्सर्येषु ॥ षण्णांवर्ग. षड्वर्गः । अरीणामन्तःशत्रूणांषड्वर्गः ॥ यथा । दयामावसरंकिंचित्कालादीनाम- नाग पि । आसुसेराम्रतेःकार्यंनवेद दान्तचिन्तयेत्युपदेशः ॥

अरिष्टः । पुं । लशुने । निम्बे ॥ लङ्का निकटवर्त्तिनि पर्वतविशेषे ॥ काके ॥ नरिष्टमस्य ॥ कङ्के । फेनिलद्रो । रीठाइतिख्याते ॥ अस्यगुणास्तु । अरि ष्टकश्छिदोषघ्नोग्रहजिद्गर्भपातन इ- ति ॥ वृषभासुरे । न । अशुभे । तक्रे । सूतिकागारे ॥ उत्पाते ॥ आ सवे ॥ यथा । पक्वौषधाम्बुसिद्धंयन् म द्यंतत्स्यादरिष्टकम् ॥ अरिष्टं मरणाभि तिलोके । यथा । द्राक्षारिष्टम् दश मूलारिष्टम् । बब्बूलारिष्टमिति । अ

रिष्टं लघुपाकेन सर्वतश्चगुणाधिकम् । अरिष्टस्यगुणा ज्ञेयावीजद्रव्यगुणैःसमाः ॥ मद्येपुंल्लिङ्गोऽपीतिसुश्रुतटीका। शुभे। नास्तिरिष्टमत्र नरिष्यतेत्यर्थिंभ्रैरितिवा। रिषहिंसायाम्। क्तः। नरिष्टमशुभमस्मादा। अनेकमिति समासः। मरणचिह्ने। यथा। रोगिणोमरणंयस्मा दवश्यभाविलक्ष्यते। तल्लक्षणमरिष्टंस्याद्रिष्टमप्यभिधीयत इति। नरिष्टम्। त्रि। अविनाशिनि।

अरिष्टकः। पुं। निम्बे। फेनिले। रीठाइतिख्याते।

अरिष्टतातिः। त्रि। क्षेमङ्करे। शुभङ्करे।

अरिष्टदुष्टधीः। त्रि। विवशे। आसन्नमरणदूषितमनोनदूषितबुद्धौ। अरिष्टेन दुष्टाधीरस्य॥

अरिष्टनेमिः। पुं। बुद्धगणान्तरे। मुनिविशेषे। जिनानां चतुर्विंशत्यन्तर्गतद्वाविंशतितीर्थङ्करे॥

अरिष्टसूदनः। पुं। विष्णौ। अरिष्टसूदके। अरिष्टसंज्ञकमसुरंसूदितवान् सूदयतिवा। सूद। नन्द्यादित्वाल्ल्युः।

अरिष्टा। स्त्री। कटुकायाम्।

अरिष्टिः। स्त्री। दैन्ये। सकलाधिव्याध्यभावे।

अरिष्टुः। त्रि। नाशने। अरिरिवतिष्ठति। ष्ठा०। कः।

अरुचिः। पुं। अन्नानभिलाषरूपे रोगप्रभेदे। अरोचके। रुच सत्यभिलाषेऽभ्यवहारासामर्थ्यरूपोबोध्यः। रुच्यभावे।

अरुजः। पुं। आरग्वधे।

अरुणः। पुं। अर्के। अर्कसारथौ। अव्यक्तरागे। कृष्णलोहिते। कृष्णमिश्रितरक्ते। सन्ध्यारागे। निःशब्दे। कपिले। दानवान्तरे। कुष्ठभेदे। पुन्नागपादपे। गुडे। न। कुङ्कुमे। सिन्दूरे। त्रि। गुणिनि। ऋच्छति। ऋगतौ। अर्त्तेश्चेत्युनन्। अरुणोवर्णोऽस्यास्ति। अर्शआद्यच्।

अरुणकमलम्। न। रक्तोत्पले।

अरुणलोचनः। पुं। पारावते।

अरुणसारथिः। पुं। सूर्ये। अरुणःसूरसूतःसारथिर्यस्य।

अरुणा। स्त्री। अतिविषायाम्। श्यामायाम्। मञ्जिष्ठायाम्। त्रिवृतायाम्। प्रचदीपकनदयन्तरे। इन्द्रवारुण्याम्। गुञ्जायाम्। मुण्डितिकायाम्। कदम्बपुष्पायाम्। ऋच्छति। ऋगतौ। अर्त्तेश्चेत्युनन्। टाप्। अरुणोवर्णोस्त्यस्याः। अर्शआद्यच्। टाप्।

अरुणात्मजः । पुं । जटायुनामविहगे । अरुणस्यानूरोरात्मजः ।

अरुणावरज । पुं गरुडे ।

अरुणोदकम् । न । सरोविशेषे । मेरो. प्राच्यांदिशियो विष्कम्भशैलस्तस्य मूले सरोऽरुणोदकंनाम तच्चहेमाब्जमण्डितम ।

अरुणोदय. । पुं । ब्राह्ममुहूर्त्ते । सूर्योदयात पूर्वंमुहूर्त्तद्वये । यथा । रजनीशेषयामस्यशेषार्द्धमरुणोदय इति । अपिच । चतस्रोघटिका प्रातररुणोदयउच्यते । यतीनांस्नानकालोयंगङ्गाम्भ सदृश स्मृतःइति । सप्तपञ्चारुणोदयइतिदेवी भागवतम् । अथसप्तपञ्चाशत् घटिकोत्तरमरुणोदयइतितदर्थः । अरुणस्योदयोयस्मिन्सः ।

अरुणोदयसप्तमी । स्त्री । माकर्याम् । भविष्योक्तविवरणायांतपः शुक्लसप्तम्याम ।

अरुणोदा । स्त्री । मन्दरगिरिशिखरात्पतन्त्यांसरिति । अरुणोयआम्रफलरसः सएवउदकं यस्या ।

अरुणोपलः पुं । पद्मरागे । चुन्नीतिलोके । अरुणोऽरुणवर्णश्चासावुपलः पाषाणश्च ।

अरुन्तुदः । त्रि । मर्मस्पृशि । मर्मपीडके । अरुंषि मर्माणितुदति । तुद व्यथने । विध्वरुषोस्तुदइतिखश् । अरुर्द्विषदितिमुमिकृतेसंयोगान्तस्येत्यरुषःसकारस्यलोप. ।

अरुन्धती । स्त्री । वशिष्ठपत्न्याम् । अक्षमालायाम् । कर्दममुने कन्यायाम् ।

अरुन्धतीजानि । पुं । वशिष्ठे । अरुन्धती जायायस्यसः । जायायानिङ् ।

अरुन्धतीनाथः । पुं । वशिष्ठे । अरुन्धत्यानाथः स्वामी ।

अरुष्कः । पुं । भल्लातके । इतिशब्दरत्नावली ।

अरुष्करः । पु । भल्लातकवृक्षे । न । भल्लातकफले । त्रि । व्रणकृति । अरुर्व्रणं करोति । दिवाविभेतिटः । नित्यंसमासेतूत्तरपदस्येतिषः ।

अरुः । न । मर्मणि । पुं । रक्तखदिरे । अर्के । पुं । न । व्रणे । क्षते । ऋगतौ । अर्त्तिं पृवपियजी त्युसि ।

अरुषा । स्त्री । भूधात्र्याम् । भूमि आंवला इतिख्यातायाम् ।

अरूपः । त्रि । रूपशून्ये । कुत्सितरूपे ।

अरूषः । पुं । रवौ । सर्पविशेषे । ऋच्छति अर्थंतेवा । ऋगतिप्रापणयोः

। ऋहनिभ्यामूषन् ।

अरे । ।। नीचसम्बोधने । यथा । अरे यमभटाः शठाःकपटविग्रहेषूद्भटानि वेद्यतवेवचस्तवनचाधिकारोमयि । अहन्तु शिवसुन्दरीचरणचारुपङ्केरुहस्खलन्मधुसुधासवंसमपिबंनजानीतरेइति । रुषाह्वाने । असूयायाम् ॥

अरेरे । ।। नीचसम्बोधने ॥ रुषाह्वाने। सक्रोधाह्वाने ॥

अरोक । त्रि । निष्प्रभे । छिद्रवर्जिते ॥ रोचनम् रोकः । रुचदीप्तौ । घञ् । नरोकोऽस्य ॥

अरोगः । त्रि । व्याधिरहिते ॥ पुं । दोषसाम्ये । रोगाभावः । नरोगोऽस्यवा ।

अरोचक । पुं । रोगविशेषे । अरुचिरोग इतिभाषा ।

अर्कः । पुं । रक्तार्के । अर्कपर्णे ॥ अस्यगुणायथा । अर्कद्वयं सरंवातकुष्ठकण्डूविषव्रणान् । निहन्तिप्लीहगुल्मार्शःश्लेष्मोदरयकृत् क्रिमीन् । अर्कद्वयं रक्तार्क.श्वेतार्कश्च । मुक्तार्ककुसुमंवृष्यंलघुदीपनपाचनम् । अरोचकप्रसेकार्शकासश्वासनिवा्रणम् । रक्तार्कपुष्पंमधुरंसतिक्तं कुष्ठक्रिमिघ्नंकफनाशनञ्च । अर्शोविषंहन्तिचरक्तपित्तंसङ्ग्राहिगुल्मेश्वयथौहितंतत् । क्षीरमर्कस्यतिक्तोष्णंस्निग्धंसलवणं लघु । कुष्ठगुल्मोदरहरं श्रेष्ठमेतद्विरेचनमितिभावप्रकाशः । स्फटिके । रवौ । लघ्वशयारविवारे । ताम्रे । दिवस्पतौ । विडौजसि । श्रीहरौ । ब्रह्मादिभिः पूज्यतमैरर्चनीयत्वात् । द्वादशांके । इस्तर्क्षे । सर्वदर्शिनि । अर्च्यते । अर्चपूजायाम कर्मणिघञ् । चजोःकुघिण्यतोरितिकुत्वम् । यद्वा । कृदाधारार्चिकलिभ्यःक इतिकः । अर्कं तेवा । अर्कस्तवने । घञ् । अरकइतिप्रसिद्धे क्वाथविशेषे । यथा । द्रव्यकल्पःपञ्चधास्वात्कल्कंचूर्णंरसस्तथा । तैलमर्कःक्रमाज्ज्ञेयंयथोत्तरगुणान्वि ये इतिरावणः ।

अर्ककान्ता । स्त्री । आदित्यभक्तायाम् ।

अर्कचन्दनम् । न । रक्तचन्दने ॥

अर्कजः । पुं । यमे । शनैश्चरे ॥

अर्कजौ । पुं । अश्विनीकुमारयोः ॥ निरुक्तिर्वचमाणोयम् ॥

अर्कतनयः । पुं । कर्णे । राधेये । वैवस्वतमनौ । सावर्णिमनौ । शनौ ॥ यमे ।

अर्कतनया । स्त्री । यमुनायाम् । तपत्याम् ।

अर्कनन्दनः । पुं । अर्कतनये । सुग्रीवे ॥

अर्कस्य नन्दनः ॥

अर्कनामा । पुं । रक्तार्के ॥

अर्कपत्रः । पुं । आदित्यपत्रवृक्षे ॥

अर्कपत्रा । स्त्री । सुनन्दायाम् । अर्कमूलायाम् ॥

अर्कपर्णः । पुं । अर्काह्वे । मन्दारे ॥ अर्कीभानि तीक्ष्णानि पर्णान्यस्य ॥

अर्कपादपः । पुं । निम्बे ॥ इतित्रिकाण्डशेषः ॥

अर्कपुष्पिका । स्त्री । सूर्यवल्ल्याम् ॥

अर्कपुष्पी । स्त्री । कुटुम्बिनीवृक्षे ॥ अर्कपुष्पीकृमिश्लेष्ममेहपित्तविकारजिदितिभावप्रकाशः ॥

अर्कप्रिया । स्त्री । जवायाम् ॥

अर्कबन्धुः । पुं । गौतमे । बुद्धे ॥ सचइक्ष्वाकुकुलोद्भवशाक्यवंशीयोबोद्धव्यः ॥ अर्कस्यबन्धुः सूर्यवंशजत्वात् ॥ अम्बुजे ॥ अर्कोबन्धुर्यस्यसः ॥

अर्कबान्धवः । पुं । अम्बुजे ॥ अर्कोबांधवोयस्यसः ॥ बुद्धे ॥ बुद्धभिदि ॥ अर्कस्यबान्धवः ॥

अर्कभम् । न । सूर्याक्रान्तनक्षत्रे ॥

अर्कभक्ता । स्त्री । आदित्यभक्तायाम् । हुलहुल् इति प्रसिद्धे शाके ॥

अर्कमूला । स्त्री । अर्कपत्रायाम् । ईश्वरमूलेतिगौडेषुप्रसिद्धायाम् ॥

अर्करेताजः । पुं । सूर्यात्मजविशेषे । रेवन्ते ॥ इतिहेमचन्द्रः ॥

अर्कवल्लभः । पुं । बन्धूकवृक्षे ॥

अर्कवेधम् । न । तालीशपत्रे ॥

अर्कव्रतम् । न । राज्ञोव्रतविशेषे ॥ यथा । अष्टौमासान् यथादित्यस्तोयं हरतिरश्मिभिः । तथाहरेत्करंराष्ट्रान्नित्यमर्कव्रतंहितदितिमनुः ॥ आरोग्यसप्तम्यादिसूर्यव्रते ॥

अर्कसूनुः । पुं । शनौ ॥ यमे ॥ सुग्रीवे ॥ कर्णे ॥ अर्कस्यसूनुः ॥ द्विवचनान्तः आश्विनेययोः ॥

अर्कसोदरः । पुं । ऐरावते ॥ इतिहेमचन्द्रः ॥

अर्कहिता । स्त्री । अर्कभक्तायाम् ॥

अर्काश्मा । पुं । अरुणोपले ॥ अर्कस्य अश्मा ॥ सूर्यकान्तमणौ ॥

अर्काह्व. । पुं । रक्तार्के । अर्कपर्णे ॥ अर्कआह्वायस्य ॥

अर्की । पुं । अर्कवति । अर्चस्तूपमन्त्रवति होतरि ॥

अर्कोपलः । पुं । सूर्यकान्तमणौ ॥

अर्गलम् । न । कपाटद्वयमध्यस्थदण्डे ॥ दुर्गापाठादौपाठ्यदेवीस्तोत्रविशेषे ॥ यथा । मार्कण्डेयउवाच । ब्रह्मन् केनप्रकारेणदुर्गामाहात्म्यमुत्तमम् । श्रीमंसिद्ध्यतितत् सर्वंकथयस्वमहाप्रभो ॥ ब्रह्मोवाच । अर्गलंकीलक-

ब्यादीपठिस्वाकवचं पठेत् । अथेत् सप्तशतींपश्चात् क्रमएषशिवोदित- इति । त्रि । कल्लोले ॥ अर्घ्यते । अ र्ज अर्जने । ष्यादित्वात्कलच् । न्य ङ्क्वादिः ।

अर्गला । स्त्री । आगल इतिभाषाप्रसि द्धे कपाटबन्धककाष्ठविशेषे । कपाटा न्तरविष्कम्भदण्डे । त्रि । कल्लोले । टाप् ।

अर्गलिका । स्त्री । अर्गले । आगलीइ तिभाषाप्रसिद्धायाक्षुद्रार्गलायाम् ।

अर्गली । स्त्री । कपाटरोधनार्थं तन्मध्य स्थे क्षुद्रदण्डे । गौरादित्वान्ङीष् ।

अर्ग्वधः । पुं । राजवृक्षे ।

अर्घ । पुं । मूल्ये । पूजाविधौ । पूजोप चारभेदे । अर्घ्यतेऽनेन । अर्हपूजा याम् । हलश्चेति घञ् । न्यङ्क्वादिः । अर्घिधौत्वन्तरंवा । अर्घशब्दः साम गानां सर्वत्राभिलापेसयकारोनपुंस कलिङ्गेनैवप्रयोज्यः । अन्यवेदिनां निर्यकारः पुल्लिंगेन प्रयोज्यः । इति आह्निकतत्वेरघुनन्दनः ।

अर्घीशः । पुं । ईश्वरे । शिवे । इतिश ब्दरत्नावली ।

अर्घ्यम् । न । जरत्कारुमुनेस्तपोवनत मृङ्गूतमधुनि । उपचारभेदे । मस्त के दीयमाने अर्घजले । अर्घायेद

म । पादार्घाभ्याञ्चेतियत् । त्रि । पूजार्हे । अर्घस्ययोग्ये । अर्घमर्हति । दण्डादिभ्यइतियत् । पुं । मूल्ये । पूजाविधौ ।

अर्चकः । त्रि । पूजके । यथा । अर्चक स्यतपोयोगादर्चनस्यातिशायनात् आभिरूप्याच्चबिम्बानांदेवः सान्निध्य मृच्छतीतितिथ्यादितत्त्वम् । अर्चति । अर्च० । ण्वुल् ।

अर्चनम् । न । पूजायाम् । यथा । धन धान्यकरं नित्यं गुरुदेवद्विजार्चनमि- ति । अर्चपूजायामस्माच्चौरादिका ल्युट्सम्ध्योयुच् । त्रि । पूजाद्रव्ये ।

अर्चना । स्त्री । पूजायाम् । टाप् ।

अर्चा । स्त्री । प्रतिमायाम् । यथाहरूपे कृष्णोव्यासादीन् प्रति । किंस्वल्पत पसांनॄणामर्चायांदेवचक्षुषाम् । दर्श नस्पर्शनमप्रश्नप्रह्वपादार्चनादिकमि- ति दशमस्कन्धे ८४ अध्यायः । पूजा याम् । अर्चनम् अर्च्यतेवा । अर्चपूजा यामस्माञ्चौरादिकाद्गुरोश्चहलइत्य प्रत्ययः । टाप् ।

अर्चिः । स्त्री । ज्वालायाम् । इसन्तः । अ र्च० । शिजन्तादचरत्वं ।

अर्चितम् । त्रि । पूजिते । अर्च्यतेस्म० । अर्चपूजायाम् । क्तः ।

अर्चिरादिमार्गः । पुं । उत्तरमार्गे ।

अर्चिरादुपलक्षिते देवयानपथि ।

अर्चिष्मान् । पुं । वह्नौ । भास्करे । दीप्ते । अर्चिर्विद्यतेऽस्याभिगन्वा । मतुप् ।

अर्चिः । न । स्त्री । मयूखे । वह्निशिखायाम् । दीप्तौ । अर्च्यते । अर्चपूजायाम् । अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः । अर्चिः सान्तः ।

अर्च्यः । त्रि । पूज्ये । अर्च्यते । अर्चस्तुतौ । यत् । यजयाचरुचप्रवचर्चश्चेतिकुत्वनिषेधः ।

अर्जकः । पुं । बाबुई इतिभाषाप्रसिद्धे श्वेतपर्णासे । अस्यगुणाः । कटुरुष्णाःकफवातामयनेत्ररोगनाशी रुचिकारी सुखप्रसवकारकश्चेतिराजनिर्घण्टः । अर्जयति । अर्जसर्जअर्जने । ऋगतिस्थानार्जनेो पार्जनेषुवा । ण्वुलन्तः । ण्वुल् । त्रि । उपार्जनस्य कर्त्तरि ।

अर्जनम् । न । अर्जयितृव्यापारे । स्वामित्वहेतुभूतव्यापारे । सङ्ग्रहे ।। सम्पादने ।। अर्ज० । ल्युट् ।।

अर्जुनः । पुं । ककुभद्रुमे । कौहइति ख्याते । अस्यगुणा दश । क्षतभग्नरक्तस्तम्भनमूत्रकृच्छ्रागे पथ्यत्वमितिराजवल्लभः । कषायत्वमुष्णत्वं व्रणशोधनत्वम् कफपित्तश्रमतृष्णाशिनाशित्वं वायुरोगप्रकोपकारित्वमिति राजनिर्घण्टः । सर्वसम्प्लिपबपराक्रमे तृतीयेपाण्डुतनये । कार्त्तवीर्ये । मयूरे । मातुरेकसुते । धवले । करवीरे । न । तृणे । नेत्ररोगे । यथा । एकोयः शशवधिरोपमस्तु बिन्दुः शुक्लस्थोभवतितदर्जुनंवदन्ति । त्रि । धवलवर्णवति ।। अर्ज्यते । अर्ज अर्जने । अर्जेर्णिलुक्चेत्युनन् । तृणाख्यायांचिदितियिवेमन् ।

अर्जुनधनुः । न । गाण्डीवे । अर्जुनस्य धनुः ।

अर्जुनध्वजः । पुं । वायुपुत्रे । हनूमति ।

अर्जुननामा । पुं । ककुभद्रुमे ।

अर्जुनी । स्त्री । गवि । अर्जुनवर्णयोगात् । अन्यतोङीष् ।। उषायाम् ।। बाहुदानद्याम् ।। कुट्टन्याम् ।।

अर्जुनोपमः । पुं । शाकद्रौ । महापत्रे । शेगमइति गौड देश ख्याते ।। अर्जुनउपमायस्य ।

अर्णः । पुं । अक्षरे । शाकद्रुमे ।। अर्णः क्तः ।।

अर्णवः । पुं । अम्बुनिधौ ॥ अर्णांस्यत्र सन्ति । अर्णसोलोपश्चेतिवः सलोपश्च ।

अर्णवजः । पुं । न । समुद्रफेने ।

अर्णवमन्दिरः । पुं । वरुणे । अर्णवेम

अर्थः | अर्थम

न्द्रिरमस्य ॥

अर्णवोद्भवः । पुं । अग्निजारद्रव्ये ॥

अर्णः । न । जले ॥ ऋच्छति । ऋगतौ । उदकेनुट्चेत्यर्त्तेरसुन् तस्य चनुट ॥

अर्णोदः । पुं । मुस्तके ॥ मेघे ॥

अर्णोभवः । पुं । शङ्खे ॥ इतिराजनिर्घण्टः ॥

अर्त्तगलः । पुं । नीलझिण्टग्राम् ॥

अर्त्तनम् । न । जुगुप्सायाम् । घृणीयायाम् ॥ ऋतिः सौत्रोधातुः । ल्युडभावेल्युट् ॥

अर्त्तिः । स्त्री । पीडायाम् ॥ धनुष्कोटौ ॥ अर्दनम् । अर्द हिंसायाम् । क्तिम्वादिभ्यः । तितुचेतिनेट् ॥

अर्थः । पुं । विषये ॥ अर्थनायाम् ॥ अर्यते गम्यते ऋच्छतिवा । ऋगतौ । उषिकुषिगार्त्तिभ्यस्थन्निति थन् ॥ यद्वा । अर्थ्यते प्रार्थ्यते सुखरूपत्वात्सर्वैः । अर्थ उपयाच्ञायाम् । अकर्त्तरीति घञ् ॥ कारणे । वस्तुनि ॥ वाच्ये । शब्दानामभिधेये ॥ यथा । अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधामतः । वाच्योर्थोऽभिधया बोध्यो लक्ष्यो लक्षणयामतः । व्यङ्ग्यो व्यञ्जनयाताः स्तु तिस्रः शब्दस्य शक्तय इति साहित्यदर्पणः ॥ अर्थिनोऽनुकूले । निवृत्तौ ॥ प्रयोजने ॥ अर्थ्यते । कर्मणि घञ् ॥ फले ॥ धने ॥ प्रकारे ॥ द्वितीयभवने ॥ अभिलाषे ॥ अर्थनमर्थः । भावेघञ् ॥

अर्थक्रमः । पुं । क्रमनिर्णये ॥ यथा । यत्प्रयोजनवशेन क्रमनिर्णयः स अर्थक्रमः । यथा ऽग्निहोत्रं जुहोति यवागूं पचतीत्यग्निहोत्रहोमयवागूपाकयोः । अत्र हि यवाग्वा होमार्थत्वेन तत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते । सचायं पाठक्रमाद्बलवान् । यथा पाठं ह्यनुष्ठाने क्रमप्रयोजनबाधे ऽदृष्टार्थत्वं स्यात् । नहि होमानन्तरं क्रियमाणस्य पाकस्य किञ्चिद् दृष्टं प्रयोजनमस्ति ॥

अर्थदूषणम् । न । क्रोधजव्यसनेषु षष्ठे ॥ अर्थानामपहरणे ॥ देयानामदाने ॥

अर्थना । स्त्री । याच्ञायाम् ॥ अर्थ याच्ञायाम् । चुरादिः । ण्यासश्रन्थोयुच् ॥

अर्थपतिः । पुं । राज्ञि ॥ कुबेरे ॥ अर्थानांपतिः ॥

अर्थप्रयोगः । पुं । कुसीदे ॥ अर्थस्यप्रयोगः ॥

अर्थभावना । स्त्री । आर्थीभावनायाम् । स्वर्गं यागेन प्रयाजादिभिरुपकृत्य साधयेदिति पुरुषप्रवृत्तिरर्थभावनोच्यते ॥

अर्थमर्यादा । स्त्री । सङ्ख्याकारणसाम

प्र्यांकार्योत्पादे ॥

अर्थवान्। त्रि। अर्थिनि। अर्थःसन्निहि नोऽस्त्यस्य। मतुप्। असन्निहितेतु अर्थीत्येव। प्रयोजनवति ॥ पुं। पुरुषे इतिराजनिर्घण्टः।

अर्थवाद। पुं। विधिशेषे। स्तुतौ। काल्पनिकफलश्रुतौ। अङ्गफलश्रुतौ। तल्लक्षणं यथा ॥ अभिधेयया गौण्या वा वृत्त्या भूतमर्थंवदन् स्वाध्यायविध्यापादित प्रयोजनवत्त्वलाभाय विधिसाकांक्ष इति। एष षड्विधलिङ्गेषु पञ्चमम्। यथा। प्रकरणप्रतिपाद्यस्य तत्तत्र प्रशंसनमर्थवादः। यथाछान्दोग्ये षष्ठप्रपाठके उततमादेशमप्राक्ष्यो येनाश्रुतंश्रुतं भवति अमतंमत मविज्ञातं विज्ञातमित्य ऽद्वितीयवस्तुप्रशंसनमिति। अर्थस्य प्रयोजनस्य वदनं विध्यर्थप्रशंसापरंवचनम्। अर्थवादोहि स्तुत्यादिद्वारा विध्यर्थंशीघ्रंप्रवृत्तये प्रशंसतीति॥ स्तुतिर्निन्दापरकृतिःपुराकल्पइत्यर्थवाद इति न्याय सूत्रम्॥ स्तुतिःप्रशंसा विध्यर्थस्य प्रशंसार्थकं वाक्यम्। यथा। सर्वजिता वैदेवाः सर्वमजयन् सर्वस्य प्राप्त्यै सर्वस्य जित्यै सर्वमेवैते नाप्नोति सर्वंजयतीत्यादि ॥ अनिष्टबोधनद्वारा विध्यर्थप्रवर्त्तकं निन्दा। यथा। एषवाव प्रथमोयज्ञानां यज्ज्योतिष्टोमो यएतेनानिष्ट्वा अन्येन यजते स गर्त्ते पतत्ययमेवैतज्जीर्यते प्रवामीयत इत्यादि ॥ पुरुषविशेषनिष्ठमिथो विरुद्धकथनं परकृतिः। यथा। हुत्वावपामेवाग्रेऽभिघारयन्ति अथ पृषदाज्यं तदुह चरकाध्वर्यवःपृषदाज्यमेवाग्रेभिघार यन्त्यग्नेः प्राणाः पृषदाज्यमित्यभिदधतीत्यादि ॥ ऐतिह्यसमाचरिततयाकीर्त्तनं पुराकल्पः। यथा। तस्माद्वाएते पुराब्राह्मणा बहिष्पवमानसामस्तोम मस्तौषन् यज्ञं प्रतनवामह इत्यादीत्यर्थः ॥ प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादइतिलौगाक्षिभास्करः। यथा। विरोधे गुणवादःस्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधामतइति। अस्यार्थः। विरोधेविशेष्यविशेषणयोः सामानाधिकरण्येनान्वयविरोधे गुणवाद अङ्गकथनरूपत्वात्। यथा यजमानः प्रस्तर इति। अत्रप्रस्तरः कुशमुष्टिः तस्य यजमानेऽभेदान्वयबाधात यजमानस्य कुशमुष्टिधारणरूपार्थवादरूपत्वात् गुणवादः॥ अवधारिते प्रमाणान्तरसिद्धेर्थे यो वादः। यथा नान्तरीक्षेऽग्नि

श्चेतव्यः अग्निर्हिमस्य भेषजमित्या-
दि च । अन्तरीक्षेऽग्निचयनस्यासम्भ-
वेन तदभावस्य अग्नेर्हिमनाशकत्व-
स्य च लौकिकप्रमाणसिद्धत्वादनुवा-
दः । तद्धानौ तयोर्विरोधावधारणा-
योरभावे भूतार्थवादः । यथा इन्द्रो
वृत्रं हन्तीत्यादि । सोऽपि द्विविधः । स्तु-
त्यर्थवादो निन्दार्थवादश्च । यथा ।
सन्ध्यामुपासते ये चेत्यादिस्तुत्य-
र्थवादः । स्त्रीतैलमांससम्भोगी पर्व-
स्वेतेषु वै पुमान् । विण्मूत्रभोजनं
नाम प्रयाति नरकं मृत इत्यादिनि-
न्दार्थवाद इति ॥ तत्त्वसम्बोधनी
मते तु सप्तविधः । यथा । स्तुत्यर्थ-
वादः १ फलार्थवादः २ सिद्धार्थवा-
दः ३ निन्दार्थवादः ४ परकृतिः ५
पुराकल्पः ६ मन्त्रः ७ । एषामुदाहर-
णानि श्रौतानि ग्रन्थगौरवभिया न-
लिखितानि ॥

अर्थविज्ञानम् । न । शुश्रूषाद्यष्टधीगु-
णान्तर्गतगुणविशेषे । शब्दार्थज्ञाने ।

अर्थविप्रकर्षः । पुं । पूर्वपूर्वमपेक्ष्योत्त-
रोत्तरस्य विलम्बेनार्थोपपादकत्वे ॥

अर्थव्यपाश्रयः । पुं । प्रयोजनसम्बन्धे ॥

अर्थव्ययज्ञः । त्रि । धनव्ययप्रकारविदि ।
सुबुद्धे ॥ अर्थव्ययौ जानाति । ज्ञा
कः ॥

अर्थशास्त्रम् । न । अथर्ववेदस्योपवेदे
चतुष्षष्टिकलासङ्ग्राहके औशनसा
दिशास्त्रभेदे । दण्डनीत्याम् । यथा
। बृहस्पतिप्रभृतिभिः प्रणीतत्वादर्थ
शास्त्रकम् । तथैव दण्डनीतिः स्यादन्व
योर्नयानयाविति । अर्थ्यते गम्यते
। ऋ गतौ । उषिकुषिगार्तिभ्यस्थ
न्निति थन् । अर्थस्य भूमिधनादेः शा-
स्त्रम् ।

अर्थसमाहर्त्ता । त्रि । सम्यग्धनार्जन-
शीले ॥

अर्थसिद्धकः । पुं । सिन्दुवारवृक्षे ।

अर्थागमः । पुं । आये ।

अर्थान्तरम् । न । प्रकृतानाकाङ्क्षिता
र्थे । यथाह गौतमः । प्रकृतादर्थाद
सम्बद्धार्थमर्थान्तरम् । ५ । ५ । प्रकृता
त् कृतोपयुक्तात् । ल्यब्लोपे पञ्चमी । ते
न प्रकृतोपयुक्तमर्थमुपेक्ष्य असम्बद्धा
र्थाभिधानमर्थान्तरम् । प्रकृताना-
काङ्क्षिताभिधानमिति फलितार्थः
यथा । शब्दोऽनित्यः कृतकत्वादित्यु-
क्ते शब्दो गुणः स चाकाशस्येत्यादि ॥

अर्थान्तरन्यासः । पुं । अर्थालङ्कारभेदे ।
यथा । सामान्यो वा विशेषो वा तदन्ये
न समर्थ्यते । यत्र सोऽर्थान्तरन्यासः
साधर्म्येणेतरेण वा ॥ साधर्म्येण वैध-
र्म्येण वा कासामान्यं विशेषेण यत्समर्थ्य

अर्थाप | अर्हित

शेविशेषोवासामान्येनसोऽर्थान्तरन्यासः। क्रमेणोदाहरणम्। निजदोषावृतमनसा अतिसुन्दरमेवभाति विपरीतम्। पश्यतिपीतोपहतःशुभ्रं शंखमपिपीतम्। सुसितवसनालङ्कारायां कदाचन कौमुदीमहसि सुदृभिस्वैरंयान्त्यांगतोऽस्तममूद्यु:। तदनु भवतःकीर्त्तिः केनाप्यगीयत येनसा प्रियगृहमगान्मुक्ताशङ्काक्वनासिशुभमदः। गुणानामेवदौरात्म्याद्धुरिधुर्य्यो नियुज्यते। असञ्जातकिणस्कन्धः सुखंस्वपितिगौर्गलिः॥ अहोहिमेबह्वपराद्धमायुषा यदप्रियंवाच्यमिदंमयेदृशम्। तएवधन्याः सुहृदः पराभवंजगत्यदृष्ट्वैवहियेचयंगताः इति॥

अर्थापत्ति:। स्त्री। प्रमाणविशेषे। जीवतश्चैत्रस्यगृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनायाम्॥ अनुपपद्यमानेनार्थेनोपपादककल्पने॥ यथा दृष्टयामेघमानं वृष्ट्यासच मेघस्य वैयुधिकरणयाख्यातिरिति नानुपपन्नेऽस्तभावः। उक्तेनानुक्तमाचिपति यासा अर्थापत्तिः॥ अलङ्कारान्तरे। एकस्यवस्तुने भावाद्यत्रवस्त्वन्यदापतेत्। कैमुत्यन्यायतः साक्षादर्थापत्तिरलङ्क्रिया॥ दण्डापूपिकया र्थान्तरस्यापतनमर्थापत्तिरितिस्मृतम्॥

अर्थार्थी। त्रि। इच्छामुनवा यज्ञोगोपकरणंतदभीप्सौ। अर्थस्य अर्थी॥

अर्थिक:। पुं। वैतालिके। निद्रायास्य राजादेः सुत्यादिना प्रातर्जागरयितरि॥

अर्थित:। त्रि। याचिते। अर्थ्यतेस्म। अर्थ०। क्त॥

अर्थी। त्रि। याचके। सेवके। विवादिनि। धनिनि। सहाये। अर्थोऽस्यास्ति। अर्थाद्वासन्निहिते इतिइनिः। अर्थयतेवा। अर्थ याचने। ग्रह्यादित्वाणिनि। स्त्रियामर्थिनी॥

अर्थ्य:। त्रि। पण्डिते। सम्प्रार्थ्ये। न्याय्ये। अर्थशालिनि। न। शिलाजतुनि। अर्थसाधुः। तत्रसाधुरितियत्॥ अर्थादनपेतः। धर्मपथ्यर्थेतियत्॥ अर्थ्यते। अर्थ उपयाञ्चायाम्। यत्। अर्चोयत्॥

अर्हनम्। न। गमने। पीडने। याचने॥ हनने। अर्ह भावेल्युट्॥

अर्हना। स्त्री। याञ्चायाम्। अर्हगतौयाचनेच। स्वार्थ णिजन्तः। युजासेतियुच्। टाप्॥

अर्हितम्। त्रि। याचिते। हिंसिते।

रोगिणि । गते ॥ न । वातव्याधिविशेषे ॥ तस्य लक्षणम् । वक्रीभवति वक्त्रार्द्धं ग्रीवाचाप्यपवर्त्तते । शिरश्चलति वाक्संगो नेत्रादीनाञ्च वैकृतम् ॥ ग्रीवाचिवुकदन्तानां तस्मिन् पार्श्वे च वेदना । तमर्द्दितमिति प्राहुर्व्याधिं व्याधिविशारदा इति ॥ यस्मिन् पार्श्वे चार्द्दितं तच्छिन्नपार्श्वे ग्रीवादीनां वेदनेत्यर्थः । अस्यौषधं यथा । रसोनकल्कं तिलतैलमिश्रं योऽश्नाति नित्यार्द्दितरोगयुक्तः । तस्यार्द्दितं नाशमुपैति शीघ्रं वृन्दं घनानामिव वायुयोगादिति ॥ विषमज्वरेप्येतद्देयम् ॥ अर्द्धतेजस ॥ अर्द्धं गतो याचनेच । क्तः ॥

अर्द्धः । पुं । शिल्ले । खण्डे । न । समांशे । आधा इति भाषा ॥ स्थाने । रूपकार्द्धे ॥ ऋध्नोत्यनेन । ऋधुवृद्धौ । हलश्चेति घञ् ॥ अत्रायं विवेकः । अर्द्धशब्दः खण्डमात्रविवक्षायां पुल्लिङ्ग एव । असि अर्द्धे अर्द्धाः । समखण्डविवक्षायां क्लीव एव । यदा त्वर्द्धशब्दो धर्मिपरस्तदा त्रिलिङ्ग एवेति ॥

अर्द्धगङ्गा । स्त्री । कावेर्याम् ॥ अर्द्धं गङ्गायाः । अर्द्धं नपुंसकमिति समासः ॥

अर्द्धगुच्छः । पुं । चतुर्विंशतिलतिकहारे ॥ गुच्छार्द्धे ॥ अर्द्धं गुच्छस्य ॥

अर्द्धचन्द्रः । पुं । मयूरपत्रे । गलहस्ते ॥ बाणभेदे । चन्द्रार्द्धे । अर्द्धचन्द्राकारे स्त्रीणां ललाटाभरणविशेषे ॥

अर्द्धचन्द्रा । स्त्री । कृष्णत्रिवृति ॥ अर्द्धश्चन्द्रो यस्याः । एतद्दलस्यार्द्धचन्द्राकारत्वात् ॥

अर्द्धचन्द्रिका । स्त्री । कर्णस्फोटालतायाम् । चित्रपर्ण्याम् ॥

अर्द्धचोलकः । पुं । कूर्पासे । काँचुली इति प्रसिद्धवस्त्रे । कुर्त्ती इति च प्रसिद्धे ॥ इति शब्दरत्नावली ॥

अर्द्धजाह्नवी । स्त्री । कावेर्याम् ॥

अर्द्धतिक्तः । पुं । नेपालनिम्बे ॥

अर्द्धनारीश्वरः । पुं । शिवे । उमामहेश्वरे ॥ अस्य ध्यानं यथा । नीलप्रवालरुचिरं विलसत् त्रिनेत्रं पाशारुणोत्पलकपालकशूलहस्तम् । अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं बालेन्दुबद्धमुकुटं प्रणमामि रूपमिति ॥

अर्द्धनावम् । न । नावोर्द्धे । नावोऽर्द्धम् । अर्द्धं नपुंसकमिति तत्पुरुषः । अर्द्धाच्चेति नावष्टच् ॥

अर्द्धपारावतः । पुं । चित्रकण्ठे । तित्तिरिपक्षिणि ॥

अर्द्धपुलायितम् । न । अश्वस्य मण्डलगतिविशेषे ॥ यथा । शताद्दोर्द्धक्रमादूर्मिमण्डलायितवल्गितैः । उन्मुखस्याश्वमुखस्य गतिरर्द्धपुलायितमिति ॥

अर्द्धयमकः । पुं । काव्यबन्धप्रभेदे ॥

अर्द्धमाणवकः । पुं । द्वादशयष्टिकेहारे ॥

अर्द्धमात्रा । स्त्री । बिन्दुचन्द्ररूपिण्यां म ब्रह्मरूपिण्याम् ॥ अर्द्धमात्रापरं अदम् ॥ यथा । अकारोभगवान्ब्रह्मा उकारोविष्णुरुच्यते । मकारोभगवान्रुद्रोप्यर्द्धमात्रामहेश्वरी ॥ उत्तरोत्तरभावेनाप्युत्तमत्वंस्मृतंबुधैः । अतःसर्वेषुशास्त्रेषुदेवीसर्वोत्तमास्मृता अर्द्धमात्राश्रितानित्यायानुच्चार्याविशेषतइति ॥

अर्द्धयाम. । पु । वारवेलायाम् ॥ यामार्द्धे ॥ कालवेलायाम् ॥ कुलिकवेलायाम् ॥

अर्द्धरथः । पुं । रथान्यूने ॥

अर्द्धरात्रः । पु । निशीथे । रात्र्यर्द्धभागे ॥ अर्द्धं रात्रेः । अर्द्धं नपुंसकमिति समासः । अहः सर्वैकेत्यच् ॥

अर्द्धर्चः । पुं । न । ऋगर्द्धे ॥

अर्द्धलक्ष्मीहरिः । पुं । विष्णौ ॥ तद्ध्यानं यथा । उद्यत् प्रद्योतनशतरुचिंतप्त हेमावदातं पार्श्वद्वन्द्वेजलधिसुतया विश्वधात्र्याचजुष्टम् । नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं विष्णुंवन्देदरकमलकौमोदकीचक्रपाणिमिति ॥

अर्द्धवीक्षणम् । न । कटाक्षे । अपाङ्ग

दर्शने ॥

अर्द्धवैनाशिकः । पुं । वैशेषिके ॥ वैशेषिकस्तावत् परिणामभेदेन देहादेराशुतरविनाशित्वाङ्गीकारादात्मनःस्थायित्वाङ्गीकाराच्चार्द्धवैनाशिकत्वेनमसिद्धएव ॥

अर्द्धशनम् । न । अर्द्धभुक्तौ । अर्द्धाशने ॥

अर्द्धशफर' । पु । क्षुद्रमत्स्यविशेषे । दण्डपाले । डाँडिकामाच इतिगौडानां भाषयाख्याते ॥

अर्द्धहार' । पुं । चौंसठलडाहार इतिलोकभाषा प्रसिद्धे चतुष्षष्टियष्टिकहारे ॥

अर्द्धाशनम् । न । अर्द्धभोजने ॥

अर्द्धासनम् । न । स्नेहदाने ॥ अनिन्दने ॥ इतिधरणि. ॥

अर्द्धेन्दुः । पुं । अर्द्धचन्द्रे । चन्द्रार्द्धभागे ॥ गलहस्ते ॥ नखाङ्के ॥ अतिप्रौढस्त्रीयोन्यङ्गुलियोजने ॥ अर्द्धचन्द्रवाणे ॥ अर्द्धम् इन्दोरितिविग्रह. ॥

अर्द्धोदयः । पु । पर्वविशेषे ॥ सर्वोक्त' कामधेनुतंत्रे । यथा । माघेमासि अमावास्या यदिश्रर्कयुताभवेत् । नक्षत्रश्रवणेदेवि व्यतीपातो भवेद्यदा । अर्द्धोदयःसविज्ञेयः सूर्यपर्वशतै' समइति ॥ दिवैवयोगः शस्तोऽयंनचरात्रौकदाचन ॥ अर्द्धोदयेतुसम्प्राप्तेस

वंगङ्गासमंजलम्। शुद्धात्मानोद्विजाः सर्वेभवेयुर्ब्रह्मसन्निभाः। यत्किञ्चित्क्रियतेदानं तद्दानंमेरुसन्निभमितिस्कान्दपुराणम्।

अर्द्धोरुकम्। न। चण्डातके। ऊर्वोरर्द्धाच्छादनांशुके। उत्तमस्त्रीणामर्द्धोरुपर्यंते चोलकाकारे परिधेयवस्त्रे। ऊरोरर्द्धम्। अर्द्धंनपुंसकमितिसमासः। अर्द्धोरौ काशते। का शृदीप्तौ। अन्येभ्योपीतिडः।

अर्द्ध्यम्। त्रि। अर्द्धभवे। अर्द्धभवः। अर्द्धाद्यत्।

अर्पणम्। न। समर्पणे। अर्प्यतेऽनेनेतिव्युत्पत्त्या जुह्वादौ। मन्त्रादौ। अर्प्यतेऽस्मैइतिव्युत्पत्त्या देवतादिरूपे सम्प्रदाने। अर्प्यतेऽस्मिन्निति व्युत्पत्त्याअधिकरणे देशकालादौ। हविरादौ। अर्प्यतेयत्तत् कर्मणि ल्युट्।

अर्पितः। त्रि। सम्प्रवेशिते। न्यासे।

अर्पिसः। पुं। हृदये। अग्रमांसे। ऋच्छति। ऋगतौ। ऋतन्यञ्जीत्या-दिना अर्पयतेरिसन्।

अर्बुदः। पुं। न। मांसकीले। रसौलीतिख्याते रोगविशेषे। दशकोटिसंख्यायाम्। १०००००००० पुं। आबूइति प्रसिद्धे महीधरविशेषे। न।

वर्त्तुलफलाद्रौ।

अर्भः। पुं। बाले। उत्तानशये। ऋच्छति। इयर्त्तिवा। ऋ०। अर्त्तिगृभ्यां भन्।

अर्भकः। पुं। बाले। मूर्खे। कृशे। सदृशे। अल्पे। अर्य्यते हर्षं प्राप्यते। ऋगतौ प्रापणेच। अर्भकपृथुकपाकायुवसीतिसाधुः। यद्वा। इयर्त्ति च्छतिहर्षं गच्छतिवा। अर्त्तिगृभ्यांभन्। स्वार्थेकः। यद्वा। ऋध्नोति। ऋधुवृद्धौ। अर्भकपृथुकेतिबुन्भकारान्तादेशः।

अर्म्मः। पुं। न। नेत्ररोगभेदे। स च पञ्चविधम्। प्रस्ताय्यर्म्मशुक्लार्म्मरक्तार्म्माधिमांसार्म्मस्नाय्वर्म्मभेदात्। नेत्रस्य शुक्लभागेजाते मांसवृद्ध्यादि रोगे। ऋच्छति। ऋगतिप्रापणयोः। अर्त्तिस्तु स्विति मन्।

अर्म्मणः। पुं। द्रोणपरिमाणे। इ. अर्म्मणकपरिभाषा।

अर्य्यः। पुं। स्वामिनि। वैश्ये। त्रि। श्रेष्ठे। अर्य्यते। ऋगतौ। अर्य्यःस्वामिवैश्ययोरितिसाधुः।

अर्य्यमा। पुं। सूर्य्ये। अर्कवृक्षे। पितृणांराशि। उत्तरफल्गुन्याम्। इयर्त्ति अर्य्यः। ऋगतौ। श्वन्नुक्षन्पूषन्प्लिहन्क्लिद्यादिनाअर्य्यपूर्वान् माङःकनि-

न निपातितः ॥

अर्य्या । स्त्री । वैश्यजातीयायाम् ॥ स्वामिन्याम् । अर्यक्षत्रियाभ्यांवास्वार्थ इति आनुगागमाभावेटाप् ॥

अर्य्याणी । स्त्री । वैश्यजातीयायाम् । स्वामिन्याम् । अर्यक्षत्रियाभ्यांवास्वार्थ इतिपक्षे आनुगागमोङीष्च ॥

अर्य्यी । स्त्री । वैश्यप्रियायाम् ॥ अर्य्यस्य स्त्री । पुंयोगलक्षणोङीष् ॥

अर्वती । स्त्री । कुम्भदास्याम् ॥ वडवायाम् । घोटक्याम् । तुरग्याम् ॥

अर्वा । पुं । तुरङ्गमे ॥ ऋच्छति । ऋगतौ । अन्येभ्योपीति स्नामदीत्यादि आ मावावनिप् । यद्वा । अर्वतिवा । अर्व गतौ । वाहुलकात् कनिप ॥ मघेन्द्रे ॥ वृषकर्णपरिमाणे ॥ त्रि । अधमे ॥ ऋच्छते. अवद्यावमाधमार्वरेफा कुत्सितद्दतिवमन्तो निपात. ॥

अर्वाकतनः । त्रि । निर्मूले । अवेदमूले । स्वेच्छाकृते ॥ अर्वाकभवः । सायंचिरमित्यादिनाट्यु ॥

अर्वाक । I । अवरे । पूर्वकालतःपश्चादर्थे ॥ अवरे अञ्चति । अस्ताति. । अञ्चेर्लुक् । पृषोदरादि ॥ अर्वन्तम ञ्चति वा ॥ विपर्यस्ते ॥ इतिधरणिः ॥

अर्वाचीन । त्रि । अर्वाचि । पश्चाज्जाते ॥ अर्वागेव । विभाषाञ्चेरदिक्

स्त्रियामितिखः ॥

अर्शम् । न । गुदव्याधौ ॥ इतिशब्दरत्नावली ॥

अर्शः । न । अर्शं । गुदव्याधिभेदे । दुर्नामके । गुदकीले ॥ अस्यसामान्यलक्षणं यथा । दोषास्त्वङ्मांसमेदांसिसन्दूष्यविविधा कृतीन् । मांसाङ्कुरानपानादौकुर्वन्त्यर्शांसितान जगुरिति ॥ अथास्यसामान्यतोनिदानंयथा । पृथग्दोषैःसमस्तैश्चशोणितात् सहजानिच । अर्शांसिषटप्रकाराणि विद्याद्गुदवलित्रये ॥ सामान्यतोऽर्शसश्चिकित्सायथा । यद्वायोरानुलोम्याय यदग्निवलवृद्धये । अन्नपानौषधंसर्वंतत्सेव्यंनित्यमर्शसैरिति ॥ ऋच्छति । ऋगतौ । व्याधौ शुट् चेत्यर्त्तेरसुन् ॥

अर्शस. । त्रि । गुदव्याधियुक्ते । अर्शोरोगयुते ॥ अर्शांस्यस्यविद्यन्ते ॥ अर्श आदिभ्योऽच ॥

अर्शसानः । पुं । अग्नौ ॥ ऋच्छति । ऋ० । अर्त्तेर्गुणः शुट्चेत्यसानच् ॥ अर्शसानाय शपर्याहिंसिच इतिवेदभाष्यम ॥

अर्शी । त्रि । गुदव्याधियुक्ते ॥ इतिशब्दरत्नावली ॥

अर्शोघ्नः । पुं । सूरणे ॥ भल्लातके ॥ अ

शांसि हन्ति । अमनुष्यकर्तृकेषुचे तिहन्तेष्टक् ॥

अर्शोघ्नी । स्त्री । तालमूल्याम् ॥ भल्लातक्याम् ॥ टित्वान्ङीप् ॥

अर्शोरोगयुतः । त्रि । अर्शसे । मूलव्याधिर्युते ॥ अर्शोरोगेणयुत ॥

अर्शोऽहितः । पुं । अर्शोघ्ने ॥ अर्शसोऽहितः ॥

अर्हन्तः । पुं । क्षपणे ॥ बुद्धे ॥ त्रि । मान्ये ॥ इतिमेदिनीमुद्राङ्किता ॥

अर्हः । पुं । पूजाप्रशंसास्तुतिनमस्कारादिभिः पूजनीये परमेश्वरे ॥ अर्हते पूज्यतेषोडशभिरुपचारै रित्यर्हः । अर्हःकर्मणिघञ् ॥ शक्रे ॥ त्रि । योग्ये अर्हति । अर्हपूजायाम् । पचाद्यच् ॥

अर्हणा । पुं । जिने ॥ न । पूजने ॥ उपायने । पुष्पादौ ॥

अर्हणा । स्त्री । अर्हायाम् । योग्याया पूजायाम् ॥ अर्हपूजायां चुरादिः । ण्यासश्रन्थोयुच् । टाप् ॥

अर्हणीयः । त्रि । पूज्ये ॥

अर्हन । पुं । जिने ॥ जिनभेदे । अनादिसिद्धजीवास्तिकाये ॥ क्षपणे ॥ बुद्धे ॥ कोङ्कवेङ्कटकुटकानांराजनिऋषभदेवे ॥ त्रि । पूज्ये ॥ अर्हति । अर्ह० । अर्हे प्रशंसायामिति शतृप्रत्यय. ॥

अर्हत्तमः । त्रि । श्रुताचाराभिजनादिभि. पूज्यतमे ॥

अर्हन्त. । पुं । सुगते ॥ क्षपणे ॥ अर्हति । अर्ह० । बाहुलकाज्झच् ॥

अर्हा । स्त्री । पूजायाम् ॥ अर्ह० । गुरोश्चहलइत्यकारप्रत्यय. । टाप् ॥

अर्हितम् । त्रि । अर्चिते ॥ अर्ह्यतेस्म । अर्हपूजायाम क्तः ॥

अलम् । न । वृश्चिकपुच्छकण्टके ॥ हरिताले ॥

अलकः । पुं । न । चूर्णकुन्तले ॥ अलति भूषयति मुखम् अल्यतेवा । अलभूषादौ । कृञादिभ्यउन् ॥

अलकनन्दा । स्त्री । कन्यायाम् ॥ गङ्गायाम् ॥ यथा । तथैवालकनन्दापिदक्षिणेनैतिभारतम । प्रयातिसागरं भित्वासप्तभेदामहामुने इति ॥ तथ. सीताचत् ॥

अलकप्रभा । स्त्री । यक्षेशपुर्याम् ॥

अलकप्रियः । पुं । पीतसालके । विजयसारइतिख्याततरौ ॥

अलका । स्त्री । कुबेरपुर्याम् ॥ अष्टवर्षावधिदशवर्षपर्यन्तवयस्कायांकन्यायाम ॥ अलति भूषयति । अलभूषणादिषु । कुनशिल्पिसंज्ञयोरपूर्वस्यापि । क्षिपकादित्वान्नेत्वम् ॥

अलकाधिपः । पुं । धनपतौ ॥ अलकायाअधिपः ॥

अलक्तः । पुं । लाचारसे । अस्यगुणाः । तिक्तत्वम् उष्णत्वम् कफवातरोगव्रणदोषनाशित्वम् कण्ठरोगशमनत्वम् विषविकारित्वञ्चेतिराजनिर्घण्टः ॥ लाचायाम् । नलक्ष्यतेऽस्मा । ओलजीओलस्जीव्रीडे । बाहुलकात्तन् ॥ यद्वा । नलक्ष्यतेऽस्मा । अभक्ष्यत्वात् । क्तः । यद्वा । नरक्तोऽस्मात् । कपिलकादित्वाल्लत्वम् ॥

अलक्तकः । पुं । लाचारसे । निर्भर्त्सने । लाचायाम् । यथा । कदाकालेमातःकथयकलितालक्तकरसंपिवेयंविद्याथींतवचरणनिर्णेजनजलमिति । अलक्तमेवालक्तकम् ॥

लक्षणः । त्रि । परेतत्वे । अननुमेये । नविद्यतेलक्षणंयस्मिन् । न । दुर्लक्षणे । त्रि । तद्वति ॥

अलक्षितः । त्रि । अज्ञाते ॥

अलक्ष्मीः । स्त्री । निर्ऋतौ । नरकदेवतेतिकश्चित् । अशोभायाम् । लक्ष्म्याः विरुद्धा ॥

अलगर्द्दः । पुं । जलव्याले । नागादपकृष्टसर्पजातौ । लगति । लगेसङ्गे । क्विप् । अर्द्दयति । अच् । लक्चासावर्द्दश्च । यद्वा । सन् पीडकश्चापिनिर्विषत्वात्तन्नोऽलगर्द्दः । यद्वा । अलति । अलगच्छादौ गर्द्दशब्दे । अच् । अलश्चासौगर्द्दश्चेति ॥

अलगर्द्दः । पुं । जलव्याले । अलंगृध्यति । गृधु अभिकाङ्क्षायाम् । पचाद्यच् । पृषोदरादिः ॥

अलङ्करणम् । न । भूषायाम् ॥ कृञ् । ल्युट् ॥

अलङ्करिष्णुः । त्रि । भूषके । भूषणे । अलङ्करोति तच्छीलः । अलंकृञिति इष्णुच् ॥

अलङ्कर्त्ता । त्रि । अलङ्करिष्णौ । अलङ्करणशीले । अलङ्करोति । तृन् ।

अलङ्कर्म्मीणः । त्रि । कार्यक्षमे । कर्मक्षमे । क्रियाकरणसमर्थे ॥ कर्मणे क्रियायै अलंसमर्थः । अषडक्षेतिखः । प्राप्तापन्नालपूर्वेतिपरवल्लिङ्गनिषेधाल्लज्ञापकात् समासः । पर्याप्तिवचनेष्वलमर्थ इतिवा ॥

अलङ्कारः । पुं । हारादौ । कङ्कणाद्याभरणे । अथालङ्कारधारणविधिरुच्यते । रेवन्त्यश्विधनिष्ठासुहस्तादिपञ्चसु । गुरुशुक्रबुधस्याह्निस्त्वलङ्कारधारणम् ॥ अनिष्टेऽप्यह्निनिर्दिष्टंस्वालङ्कारधारणम् । उद्वाहेराजसम्माने ब्राह्मणानाञ्चसम्मते । शिरस्संमुकुटंहारः कुण्डलञ्चाङ्गदंतथा । कङ्कणंवालकञ्चैवमेखलाष्टाविति क्रमात् । प्रधानभूषणान्येषु यथासंख्या

नि निश्चयः। पद्मरागश्च वज्रश्च विजयो गोविदास्तथा । मुक्तावैदूर्यनीलानितथामरकतंक्रमात् । आदित्यादिग्रहाणां सर्वसम्पत्तिदाः मताः । सुवर्णे नापिघटनासर्वेषामुपयुज्यते । प्रधानभूषणेष्वेवमप्रधाने न निश्चयः । प्रधानभूषणंप्राय' शिरसोह्यभिधीयते । तस्यप्रधानभूषत्वादित्याह भृगुनन्दन' ॥ सुखदामणयः शुद्धादु'खदादोषशालिनः । अतोमणीनांवक्ष्यामिलक्षणानि यथाक्रममितियुक्तिकल्पतरुः ॥ मणिविशेषलक्षणानितत्तच्छब्दे द्रष्टव्यानि । काव्यालङ्कारे । उपमादैा ॥ सद्विविध' । शब्दालङ्कारोऽर्थालङ्कारश्च । तल्लक्षणोदाहरणान्युपमादितत्तच्छब्दे अवलोकनीयानि । चतुष्कलेशेषगुरोः । ऽसंज्ञायाम् । अलंक्रियतेऽनेन । कृञ० । घञ् ॥

अलङ्कृतः । त्रि । भूषिते । अलंक्रियते-स्म० । क्तः ।

अलङ्क्रिया । स्त्री । भूषायाम् अलङ्कारसाध्यशोभायाम् । अलङ्करणम् । कृञः शच । टाप् ।

अलन्धूमः । पुं । धूमसंहतैा ॥

अलब्धः । त्रि । अप्राप्ते ।

अलब्धभूमिकत्वम् । न । कृतन्धिषिमि-त्तात् समाधिभूमेरलाभे ॥

अलम् । । । भूषणे । पर्याप्तौ । वारणे । निषेधे ॥ निरर्थके । शक्तौ । अत्यर्थे ॥ अवधारणे । अलति अलनं वा । अलभूषणादैा । बाहुलकादम ॥

अलम्पुरुषीणः । त्रि । प्रतिमल्लादैा । अलंपुरुषायेत्यर्थे अपरुचेतिखः ।

अलम्बुष' । पुं । प्रहस्ते । छर्दे । राक्षसान्तरे ॥

अलम्बुषा । स्त्री । मुण्डीर्याम् । स्वर्वेश्याभेदे । लज्जालुप्रभेदे । गन्धायाम् ॥ अलम्बुषालघुःस्वादुः क्रिमिपित्तकफापहेष्टयस्यागुणाः ॥ नः

अलम्बुसाः । पुं भूम्नि । देशविशेषेषु

अलर्कः । पुं । प्रतापसे । धवलार्के । या । अलर्ककुसुमं रुच्यं लघुदीपनपाचनम । अरोचकप्रसेकार्शः कासश्वासनिवारणमिति ॥ उन्मत्तकुक्कुरे । विषिसकुक्कुरे । नृपान्तरे । अलति । अलभूषणादैा । क्विप् । अल् चासावर्कश्च । यद्वा । अलमर्क्यते अर्च्यते वा । अर्कस्तवने अर्चपूजायां वा । घञ् । प्रकन्ध्वादिः । अनुविशेषे ।

अलर्कक: । पुं । अलर्कार्थे ।

अलले । । । पिशाचभाषयासंबोधने ॥

अलवालम् । न । आलवाले । अवमा

अलतः | अलिङ्ग.

खाति । खाआदाने । मूलविभुजादि खात्क । नञ्समास. ॥

अलस' । त्रि । अवश्यकर्त्तव्येष्वप्रवृत्ति शीले । क्रियामन्दे । क्रियाजडे । शीतके ॥ यथा । स्त्रीभिःशठश्चशूरैभिरलस परिभूयते । इतिकामंदके । श्रियंहिसततोत्साहोदुर्बलोपि समश्नुते इतिच ॥ पुं । पादरोगभेदे । यथा । क्लिन्नाङ्गुल्यंतरौपादौकण्डूदाहरुजान्वितौ । दुष्टकर्दमसंस्पर्शादलसंतंविभावयेदिति ॥ द्रुमभेदे ॥ नलसति । लसश्लेषणे । पचाद्यच् ॥

अलसक । पुं ॥ उदररोगविशेषे ॥ अस्यस्वरूपन्तु । कुक्षिरानह्यते ऽत्यर्थंप्रताम्येत् परिकूजति । निरुद्धोमारुतश्चैवकुक्षावुपरिधावति ॥ वातवर्चोनिरोधश्चयस्यात्यर्थंभवेदपि । तस्यालसकमाचष्टेतृष्णोद्गारौचयस्यतु ॥ इति ॥

अलसा । स्त्री । हंसपद्याम् । टाप् ।

अलसीका । स्त्री । शरीरजोदकविशेषे ॥ उक्तंच चरकेण । आमगंधियत्पुरा सत्वगन्तरे व्रणगतमुदकंतदलसीका शब्दंलभते इति ।

अलसेचका । स्त्री । स्त्रीविशेषे । अलसे ईचक्षेयस्याः ।

अलातः । पुं । न । अङ्गारे । उल्मुके । अर्द्धदग्धकाष्ठे ॥ लानम् । लाआदाने । क्त । नलातमस्य ॥

अलाबु । स्त्री । तुम्ब्याम् ।

अलाबूः । स्त्री । तुम्ब्याम ॥ नलम्बते । लविअवस्रंसने । नञिलम्बेर्नलोपश्चेत्यूर्णित ॥ अलाबूः कथितातुम्बीद्विधादीर्घाचवर्तुला । मिष्टतुम्बीफलंहृद्यं पित्तश्लेष्मापहंगुरु । वृष्यंरुचिकरंप्रोक्तंधातुपुष्टिविवर्द्धनम् ॥ अलाबुका फलंदीर्घंघृतेपक्वं सजीरकम् । दुग्धसैन्धवचूर्णैर्मसंसिक्तंत्वनुशोषितम् ॥

अलाबूकटम् । न । तुम्बीरजसि ॥ अलाबूनांरजः । अलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानमितिकटच् ॥

अलारम् । न । कपाटे ॥

अलिः । पुं । स्त्री । सुरायाम् ॥ पुष्पलिहि । कोकिले । काके । वृश्चिके ॥ अलति हंसेसमर्थो भवति । अलभूषणादौ । सर्वधातुभ्यइन् ॥

अलिकम् । न । ललाटे ॥ अलति अस्यतेवा । अल० । वाहुलकादिकन् ॥

अलिकुलसङ्कुल. । पुं । कुब्जकवृक्षे ॥

अलिङ्गः । त्रि । सर्वसंसारधर्मवर्जिते परमात्मनि ॥ लिङ्गंबुद्ध्याद्यविद्यमानमस्येति । सन्निहितमपिनलिंग्यतइतिवा ॥ धर्मध्वजित्वरहिते ॥ अव्यक्त

लिङ्गे ।

अलिजिह्वा । स्त्री । अल्परसने । जिह्वो परिक्षुद्रजिह्वायाम् ।

अलिञ्जरः । पुं । मणिके । माँट इति ख्याते । अलनम् । अलभूषणादौ । इकृष्यादिभ्यः । इन्धा । अलिंसाम र्थ्यं जरयति जृणातिवा । जषवयोहा नौ जृवयोहानौवा । अण् अच्वा । पृषोदरादिः ॥

अलिदूर्वा । स्त्री । मालादूर्वायाम् ।

अली । पुं । वृश्चिके ॥ भ्रमरे । अलकर्थौ ऽस्यास्ति । ब्रीह्यादित्वादिनिः । अ व्ययानां भमात्रेटिलोपः । यद्वा । अ लोऽस्त्यस्य लाङ्गूलम् । तद्विवाऽस्यास्य । अतइनिः ।

अलिन्दः । पुं । प्रघाणे । बहिर्द्वारप्रको ष्ठे । द्वारप्रकोष्ठा बहिर्द्वाराग्रवर्त्तिच तुष्के ॥ द्वारबहिर्भागे । अल्यतेभूष्य ते । अलभूषणादौ । बाहुलकात् किन्दच् ॥

अलिपकः । पुं । पिके ॥ भृङ्गे । कुक्कुरे ॥

अलिपत्रिका । स्त्री । वृश्चिकासञ्ज्ञके क्षुपे ।

अलिपर्णी । स्त्री । वृश्चिकाल्याम् ।

अलिप्रियम् । न । कोकनदे । रक्तोत्प ले ॥ अलीनांप्रियम् ।

अलिप्रिया । स्त्री । पाटलावृक्षे ।

अलिमकः । पुं । भेके । पिके ॥ अलौ । भ्रमरे । पद्मकेशरे । मधूके । इति मेदिनिकरः ॥

अलिमोदा । स्त्री । गणिकारीवृक्षे ।

अलिम्पकः । पुं । पिके । अलौ । पद्मके केशरे । मधूके । भेके । इतिहेम चन्द्रः ॥

अलिल् । पुं । सततगगनचारिणि शा स्त्रप्रसिद्धे पक्षिविशेषे । तथाचोदा हरन्तिवेदान्तेषु वार्त्तिककाराः । अ लिलः पक्षिणःपुत्रोगगनाख्याति भूत लम् । स्ववोधाभावतः स्वस्यवोधे । त्यक्त्वरंपुनरिति ॥ से

अलिवल्लभा । स्त्री । पाटला । फलेक ह याम् ।

अलिवाहिनी । स्त्री । केवेरइतिकोकन देशप्रसिद्धे केविकापुष्पे ।

अलीकम् । न । अप्रिये । दिवि । भाले । अलति अल्यतेवा । अलभूषणादौ । अलीकादयश्चेतिसाधुः । असत्ये ॥ अलन्त्यनेना ऽभोगलिम् । अत० अलीकादिः ।

अलीकमत्स्यः । पुं । रिकवछइतिख्याते ॥ यथा । माषपिष्टिकयालिप्तं नागव ल्लीदलंमहत् । तत्तुसंस्वेदयेत्सम्यक् स्थाल्यामास्तारकोपरि ॥ ततोनि ष्काश्यतं खण्डं तलस्तैलेन भर्जयेत् ।

अलीकमत्स्य उक्तोयंप्रकारः पाकपतेः । तं दत्वा काकभटिचेस वास्तूकेन चभक्षयेत् । अलीकमत्स्यकोवच्यो दृष्योवल्योऽतिपुष्टिदः । वातश्लेष्मात्ददःप्रोक्तःकिञ्चित्पित्तं प्रकोपयेदिति ॥

अलुब्धः । त्रि । निर्लोभे । लोभहीने ॥

अले । ? । पिशाचोक्त्यासम्बुद्धौ ॥

अलेपकम् । न । निरवद्ये ॥

अलेले । ? । पिशाचोक्त्यासम्बुद्धौ ॥

अलोकः । पुं । अतलादिसप्तसु ॥ नलोक्यते अस्माभिः । लोकृ० । घञ् ॥

लोकाकाशास्तिकायः । पुं । लोकानां बहिर्भूताकाशे ॥

अलोभः । पुं । लोभाभावे ॥ त्रि । तद्वति ॥ यथा । अलोभीस्यात प्रजाविभोगृह्णीयात सञ्चितंकरम् । इत्यङ्गीकृतंधर्मं पुत्रवत्पालयेत् प्रजा इतिकाचोर्थः ॥

अलोभी । त्रि । लोभरहिते ॥ अलोभोस्यास्तीतिइनि ॥

अलोलुपं । त्रि । इन्द्रियाणां विषयसन्निधानेप्यविक्रियपुरुषे ॥

अलौकिकः । त्रि । लोकातीते ॥ लौकिकप्रत्यक्षाविषये ॥ अमानुषिके ॥ नलौकिकः ॥

अल्पम् । त्रि । किञ्चिदर्थे । ईषत् । सनाक् । स्तोके ॥ अल्प्यतेवार्यते । अल भूषणादौ । बाहुलकात्पः ॥ सूक्ष्मे । स्वल्पे । मच्यें ॥

अल्पकम् । त्रि । अल्पार्थे ॥ कृपणे ॥ पुं । यवासे ॥ अल्पमेवस्वार्थेकः ॥

अल्पकेशी । स्त्री । भूतकेश्याम् ॥

अल्पगन्धम् । न । रक्तकैरवे ॥

अल्पतनु । त्रि । स्वल्पदेहवति । पृश्नौ ॥ खर्वे ॥ दुर्बले ॥ अल्पास्थियुक्ते ॥ अल्पंतनुःशरीरमस्य ॥

अल्पप्रश्न । त्रि । अल्पमेधसि ॥ अल्पा प्रज्ञायस्यसः ॥

अल्पप्रमाणकः । पुं । चेलाने । चेलो । चेलातरभूज इतिगौडभाषाप्रसिद्धे फललताविशेषे ॥ त्रि । अल्पमाने ॥ अल्पंप्रमाणमस्य ॥

अल्पबुद्धिः । त्रि । मन्दे ॥ अल्पाबुद्धिरस्य ॥

अल्पमारिषः । पुं । तण्डुलीये । चंउराई इतिप्रसिद्धशाके ॥ अल्पश्चासौमारिषश्च ॥

अल्पमेधाः । पुं । मन्दप्रज्ञत्वेनवस्तुविवेकासमर्थे । अल्पप्रज्ञे । अल्पामेधा यस्य । नित्यमसिच् प्रजामेधयोः ॥

अल्पशमी । स्त्री । शमीरे ॥

अल्पसरः । न । वेशन्ते ॥ अल्पंचतत्सरश्च ॥

अल्पायुः । पुं । छागे ॥ त्रि । मितायुषि

॥ अल्पम् आयुर्यस्य ॥

अल्पिका । स्त्री । मुद्गपर्ण्याम् ॥ अल्प मात्रायाम् ॥

अल्पिष्ठः । त्रि । स्वल्पे । अत्यल्पे ॥ अयमेषामतिशयेनाल्प.। अजादीगुणवचनादेवेतीष्ठन् ॥

अल्पीयान् । त्रि । स्वल्पे । अणीयसि ॥ अयमनयोरतिशयेनाल्पः। अजादी गुणवचनादेवेतीयसुन् ॥

अल्ला । स्त्री । मातरि ॥ अम्बायाम् । अथर्वणाह्लत्तोक्तायांपरदेवतायाम् ॥

अव ।। । व्याप्तौ ॥ निश्चये ॥ अनादरे ॥ असाकल्ये ॥

अवकटः । त्रि । अवाचीने । अवकुटारे ॥ अवाचीनः। अवात कुटारश्चेति चात्कटच् ॥ न । वैरूप्ये ॥

अवकम्पितः । त्रि । कम्पिते ॥ पुं । वृत्तान्तरे ॥

अवकरः । पुं । सम्मार्जन्यादिक्षिप्त धूल्यादौ । सङ्करे ॥ अवकीर्यते । कृ विक्षेपेहिंसायां वा । ऋदोरप् ॥

अवकर्षः । पुं । अनुकर्षे अवकृष्यते । कृष्° । घञ् ॥

अवकलितम् । त्रि । दृष्टे ॥ इतिधरणिः ॥

अवकल्कनम् । न । मिश्रीकरणे । चिन्तने ॥

अवकाशः । पुं । अन्तरे ॥ कर्मरहित काले ॥ प्रव्यक्ते ॥ यथा । अवकाशेषु चोक्षेषु नदी तीरेषु चैवहीतिम नुः ॥ अवपूर्वात् काशतेर्घञ् ॥

अवकीर्णः । त्रि । अवध्वस्ते । विक्षिप्ते ॥ अव कृ° । क्तः ॥

अवकीर्णी । त्रि । क्षतब्रह्मचर्यादिनियमे । क्षतव्रते । स्त्रीसंपर्कात् विप्लुत ब्रह्मचर्ये प्रथमाश्रमिणि यतौच ॥ ब्रह्मचार्य्यवकीर्णीस्यात् कामतश्च-स्त्रियंव्रजन्निव्युक्तः । अवकरणम् । कृविक्षेपे हिंसायांवा । भावेक्तः । अवकीर्णं विक्षिप्तंव्रतं हिंसनं वा अनेन । इष्टादिभ्यश्चेतीनिः ॥

अवकुटारः । त्रि । अवकटे ॥ अवाचीनः । अवात् कुटारश्च ॥

अवकृष्टः । त्रि । वहिष्कृते । निष्कासिते ॥ अवकृष्यतेस्म । कृषविलेखने । क्तः ॥

अवकेशी । त्रि । कालानुत्पन्नफलवृक्षे । वन्ध्ये । अफलेवृक्षे ॥ अवसन्नाः केशायस्यसोवकेशी निष्केशः । सोस्तिदृष्टान्तत्वेन अस्य । अतइनिः । सयथानिष्केशः एवमयं निष्फलः ॥ अवकंशून्यमीष्टेतच्छीलः । सुप्यजातावितणिनिर्वा ॥

अवक्रः । त्रि । अकुटिले ॥

अवक्रचेताः । पुं । परमात्मनि ॥ अवक्रमा

दिन्त्यप्रकाशवन्निन्त्यमेव अवस्थित मेकरूपंचेतो विज्ञानमस्येति ॥ त्रि । अकुटिलचित्ते ॥ अवकसरलंचेतो यस्य ॥

अवक्रय. । पुं । मूल्ये । वस्ने ॥ राजग्राह्योद्रव्ये । वणिग्भि शुल्कस्थानेम्रतिभाण्डमधिपतयेदेये ॥ एतावत् कालमुपयोगार्थं भाण्डवस्त्राश्वादि मेशादीयते मह्यंच युष्माभिरेताव द्धनंदेय मिन्त्येवंविधेभाटके।भाडा इति प्रसिद्धे ॥ अवक्रीयते ऽनेन । डुक्रीञ्द्रव्यविनिमये । पुंसीतिघः । एरजित्यच्तुन ल्युटावाधात् ॥

अव.क्लेदनम् । न । किञ्चिदार्द्रत्वे ॥

अव.चुतम् । न । उपरिकृतच्युते ॥

अवक्षेप' । पुं । निन्दायाम् ॥

अवक्षेपणम् । न । भर्त्सने ॥

अवक्षेपणी । स्त्री । वल्गायामितिहेम चन्द्रः ॥

अवगणितम् । त्रि । तिरस्कृते । परिभूते ॥ अवगण्यतेस्म । गणसंख्याने । क्तः ॥

अवगण्ड: । पु । गण्डस्थव्रणे । वरण्डे ॥ अवगच्छति । गम्लृ गतौ । समन्ताड्डु' ॥

अवगत' । त्रि । मते । ज्ञाते । विदिते ॥ अवगम्यतेस्म । गम्लृ गतौ । क्तः ॥

अवगतिः । स्त्री । ज्ञानमात्रे । ज्ञानसामान्ये ॥ अवगम्यतेऽनया । गम्लृ । क्तिन् ॥

अवगथ. । त्रि । प्रातःस्नाते ॥ अवगीयते । इङ॰ । निशीथगोपीथा वगथा इ तिथक् गाङोह्रस्वश्च निपातनात् ॥

अवगम' । पु । माने ॥ अवगम्यतेऽनेन । फले ॥ अवगम्यते प्राप्यते । गम॰ । अप् ॥

अवगाढः । त्रि । निविडे ॥ अन्तः प्रविष्टे ॥ निमग्ने ॥ अवपूर्वाद्गाहेः कर्त्तरि क्त. ॥

अवगादः । पुं । जलद्रोण्याम् । नौका जलसेचनकाष्ठपात्रे॥ इतिहलायुध.॥

अवगाहः । पुं । स्नाने ॥ स्नानगृहे ॥

अवगाहनम् । न । अवलोडने ॥ निमज्जने । अवगाहे । गोतामारके न हाना इतिभाषा ॥

अवगीतः । त्रि । निर्वादे । जनापवादे ॥ मुहुर्दृष्टे ॥ दुष्टे । गर्हिते । ख्यात गर्हणे ॥ अवगीयतेस्म । गैशब्दे । क्तः । घुमास्थेतीत्वम् ॥ मुहुर्गीते ॥

अवगीर्णः । त्रि । वर्णिते ॥ अवगीर्यते स्म । गशब्दे । क्तः ॥ अपानान्निर्गते द्रव्ये ॥

अवगुण. । पुं । दोषे ॥

अवगुण्ठनम् । न । योषाच्छिरः प्रावरण क्रियायाम् । घूंघट कर्ना इतिभाषा ॥

योषाननावरकसरन्ध्रवस्त्रे । स्त्रीमुखाच्छादनवस्त्रे । आच्छादनंसमुद्दिष्टमवगुण्ठनमीश्वरि । धूल्यादिमग्नत्वे ॥ वेष्टने । मुद्राविशेषे ।

अवगुण्ठिका । स्त्री । योषाप्रावरणाश्रियायाम् । अवगुण्ठने । जवनिकायाम् ।

अवगुण्डितम् । त्रि । चूर्णिते ।

अवगृह्यम् । न । प्रातिशाख्यादिषु पदविशेषे । यस्यपदस्यावग्रहः क्रियते तत्त्वर्थः ॥ अवगृह्यते ग्रहउपादाने । विच्छेदोग्रहेरर्थः । पदास्वैरिबाह्यापक्ष्येषुचेतिक्यप् । ग्रहिज्येति सम्प्रसारणम् । कुगतीतिसमासः ।

अवगोरणम् । न । ताडनार्थं यष्ट्यादीनामुद्यमे । मारणेकूं लट्ठउठावना इतिभाषा ॥

अवग्रहः । पुं । वृष्टिरोधे । ज्ञानभेदे ॥ प्रतिबन्धे । गजालिके । हस्तिललाटे । अवगृह्यतेऽनेन । ग्रहेरप ॥ विच्छेदे । अन्तरपदसंज्ञां व्यवयितुं पदपाठकाले किञ्चित्कालमवसाने ॥ अवग्रहणमवग्रहः । ग्रहउपादाने । अवपूर्वात्ग्रहेर्घञोभावे ग्रहवृद्दनिश्चिगमश्चेत्यप् । स्वभावे

अवग्रहणम् । न । प्रतिरोधे । तिरस्कृतौ । अनादरे ।

अवग्राहः । पुं । वृष्टिरोधे ॥ अवग्रहणमवग्राहः । अवेग्रहोवर्षप्रतिबन्धे इति अवपूर्वात् ग्रहेर्वाघञ् ॥ शापे । आक्रोशेऽवन्योर्ग्रहइतिघञ् । अवग्राहस्ते भूयात् अभिभवइत्यर्थः ।

अवघट्टः । पुं । गर्त्ते । भूरन्ध्रे ।

अवघातः । पुं । अवहनने । तण्डुलादिकण्डने । अवहननम् । हनहिंसागत्योः । घञ् । हनस्तोचिण्णलोः । हो हन्तेरितिकुत्वम् ।

अवचयः । पुं । पुष्पफलादीनांछेदने ॥

अवचूडः । पुं । अवचूले ॥ अधोलम्बिकलापे ।

अवचूर्णितम् । त्रि । पेषिते । अवध्वस्तचिसुधादिचूर्णस्यलेखादौ ॥ अवचूर्णैराचिते । अवचूर्णयतेस्म तत्त्यापेतिण्यन्तात् क्तः । यद्वा । चूर्णमेपेचुरादिः

अवचूलः । पुं । अवाग्ध्वजकञ्चुके । ध्वजाग्रवद्धाधो मुखवस्त्रे । झण्डेका पटका इतिभाषाप्रसिद्धे ।

अवचूलकम् । न । चामरे ।

अवच्छिन्नः । त्रि । सङ्कुचिते ॥ अवच्छेदकतानिरूपके । विशिष्टअवच्छेदाश्रये ॥ अवच्छिद्यतेस्म । छिदिर् । क्तः ।

अवच्छुरितम् । न । अट्टहासे । अवच्छु

रणम् । छुरच्छ दने । भावेक्तः ॥

अवच्छेद' । पुं । विरामे ॥ सङ्कोचे ॥ विशेषणत्वे ॥ एकदेशे । परिच्छेदे ॥

अवच्छेदकम् । त्रि । न्यायमतेन अव्याप्य वृत्त्यधिकरणसम्बन्धैकदेशे ॥ इतरव्यावर्त्तके । विशेषणे ॥

अवच्छेदकावच्छेद' । पुं । व्यापकत्वे ॥

अवच्छेद्यम् । त्रि । अवच्छेदाऽवच्छेदकोभयनिरूपणीये ।

अवज्ञा । स्त्री । अनादरे ॥ अवज्ञानम् । आतश्चोपसर्ग इत्यङ् । टाप् ॥

वज्ञातम् । त्रि । अवमानिते ॥ अवज्ञायतेस्म । ज्ञा अवबोधने । क्त. ॥

ानम् । न । तिरस्कारे ।

अव. : । पुं । खिले । गर्त्ते । यथा । रक्षांगेतमस्थानामेषधर्मः सनातनः । अवटेयेनिधीयन्ते तेषांलोकाः सनातना इतिरामायणम् । कूपे । कुहकजीविनि ॥ अवन्त्यस्मात् अवरक्षणादौ । अकादिभ्योऽटन् ।

अवटनिरोधनः । पुं । नरकविशेषे ॥

अवटिः । स्त्री । गर्त्ते ॥ इतिहलायुधः ॥

अवटीटः । त्रि । नतनासिके । अवनाटे । अवनमनं नासिकायाः । नते नासिकायाःसञ्ज्ञायां टीटच् नाटच् भ्रटचः । अवटीटश्चनासिकायानतमस्या

स्याः । अर्शआद्यच् । अवटीटानासिका सा अस्त्यस्यपुरुषस्य । अर्शआद्यच ॥

अवटुः । पुं । वृक्षभेदे । गर्त्ते ॥ कूपे ॥ पुं । स्त्री । घाटायाम् । ग्रीवापश्चाङ्गे । ग्रीवायामुन्नतभागे । अवटलति । टलवैक्लव्ये । अवटीकतेवा । टीकृगतौ । मितद्र्वादित्वात् डु. ॥ यद्वा । नवटति । वटवेष्टने वटभाषणेवा । बाहुलकादुः ॥

अवटोदा । स्त्री । भारतवर्षस्थनद्यन्तरे ।

अवडीनम् । न । पक्षिणामवरोहणे । पक्षिणामधोगमने ॥

अवतंसः । पुं । न । कर्णपूरे ॥ शेखरे । शिरोभूषाभेदे । उत्तंसे । अवतंसयति अवतंस्यतेऽनेनवा । तसिः सौचोभूषार्थः । पचाद्यच् हलश्चेतिघञ्वा ।

अवतमसम् । न । क्षीणान्धकारे । अवक्षीनं तमः । अवसमन्धेभ्यस्तमस इत्यच् ।

अवतरणम् । न । अवतारे ॥

अवतारः । पुं । अवतरणे । अवरोहे । पुष्करिण्यादौ । देवानांविशेषतोविष्णोर्मूर्त्यन्तरेण पूर्णांशावेशरूपेणपृथिव्यां प्रादुर्भावे । अवताराश्चसङ्ख्यातास्तेष्वेते विशेषतःप्रसिद्धाः

। मत्स्यः कूर्मोवराहश्चनरसिंहोऽथवामनः।रामोरामश्चरामश्चबुद्धःकल्कीचतेदश ॥ अपिच। प्रकृतिर्विष्णुरूपाचपुंरूपश्चमहेश्वरः। एवंप्रकृतिभेदेनभेदास्तुप्रकृतेर्दश ॥ कृष्णरूपस्कालिकास्याद्रामरूपाचतारिणी-। वगलाकूर्ममूर्त्तिःस्यान्मीनोधूमावतीभवेत् ॥ छिन्नमस्तानृसिंहःस्याद्वराहश्चैवभैरवी। सुन्दरीजामदग्न्य.स्याद्वामनोभुवनेश्वरी। कमलाबौद्धरूपास्यान्मातङ्गीकल्किरूपिणी। स्वयंभगवतीकालीकृष्णस्तुभगवान्स्वयम। स्वयञ्चभगवान्कृष्ण.कालीरूपोभवेद्गुणी। इतिमुण्डमाला। विशेषोललितोपाख्यानेद्रष्टव्य'। पुनश्चश्रीभागवते १ स्कन्धे ३ ऽध्याये सएवप्रथमंदेवः कौमारंसर्गमाश्रितइत्यादिनाद्रष्टव्यः। तीर्थे। नद्यादितीर्थे ॥ अवतरन्त्यनेनास्मिन्वा। तॄप्लवनसन्तरणयो'। अवेतॄस्त्रो र्घञ्।

अवतारणम्। न। भूतादिग्रहे। वस्त्राञ्चले। अर्चने। अवरोहणे ॥

अवतीर्णः। त्रि। अवतरणविशिष्टे। प्रादुर्भूते। जलादौकृतावरोहे। प्रविष्टे।

अवतोका। स्त्री। स्रवद्गर्भायाम्। पतितगर्भागवि। अवगलितं तोकम-पत्यं यस्याः ॥

अवदंशः। पुं। दंशने। भर्जितद्रव्यचर्वणे। मद्यपानरुचिजनकभक्ष्यद्रव्ये। अवदंश्यते पानरुच्यर्थम्। दंशदशने। कर्मणिघञ्भावेवा।

अवदातः। पुं। सिते। गौरे। त्रि। विशुद्धे। शुक्लगुणविशिष्टे। पीतवर्णवति ॥ मनोज्ञे। अवदायतेस्म। दैप् शोधने। क्तः।

अवदानम्। न। खण्डने। पराक्रमे ॥ अतिवृत्ते। शुद्धकर्मणि। यथा। विपञ्चगायन्तीविविधमवदानंपुररिपोरिति। उशीरे ॥ दोअवखण्डने दैप्शोधनेवा। भावेल्युट्।

अवदारकः। पुं। खनित्रे। त्रि।\ रणकर्त्तरि।

अवदारणम्। न। खनित्रे ॥ अवदार्यते ऽनेन। दृविदारणे। णयन्तः। ल्युट्।

अवदाहः। पुं। अवदहने। न। वीरणमूले। अवनीयते दाहोऽस्मात्।

अवदीर्णम्। त्रि। खण्डिते। द्रुते। द्रवीभूते घृतादौ। अवदीर्यतेस्म। दविदारणे क्तः।

अवदोहः। पुं। दुग्धे ॥ अवदुह्यते। दुह०। कर्मणि घञ्।

अवद्यम्। त्रि। अधमे। पापे। निन्द्ये। नवदति परंगुणम् नउद्यते नउच्यते

वा। अवद्यावमाधमार्वरेफाः कुत्सि तेइतिवदेर्नञिकर्त्तरियत्। अवद्यप द्योतितु कर्मणियत्॥

अवद्योतनम्। न। प्रकाशे। त्रि। त इति।

अवद्रङ्गः। पुं। हट्टे॥

अवधानम्। न। मनोयोगे॥ अवडुधा ञोल्युट्॥

अवधारणम्। न। निश्चये। अवधृतौ। इयत्तादिपरिच्छेदे। परिमाणनि- श्चये।

अवधारितः। त्रि। निश्चिते। कृतावधा रणे॥

अवधार्य्यः। त्रि। अवधारणीये। निर्धा र्य्ये।

अवधिः। पुं। अवधाने। सीम्नि। परस्यां काष्ठायाम्। काले। बिले। अवधान म्। डुधाञ्०। उपसर्गे घोः किः।

अवधीरितः। त्रि। अवज्ञाते।

अवधूतः। त्रि। अभिभूते। निवर्त्तिते। यथा। अवधूतभयं। वायौ। अव धुनोति धूञ्०। क्तः॥ अनादृते। योगेश्वरे। सन्न्यासाश्रमिणि॥ तन्नि रुक्तिर्यथा। अक्षरत्वाद्वरेण्यत्वाद्धूत संसारसङ्कटात्। तत्त्वमस्यर्थसिद्ध त्वादवधूतोभिधीयत इति। अपि च। योविलङ्घ्याश्रमान् वर्णान् आ त्मन्येवस्थितः पुमान्। अतिवर्णाश्र मीयोगी अवधूतःसकथ्यतइति। य था रविःसर्वरसान् प्रभुङ्क्ते हुताशन श्चापिहि सर्वभक्षकः। तथैवयोगी विषयान प्रभुङ्क्ते नलिप्यते पुण्यपा पैश्चशुद्धइत्यपि। अनयोविशेषो हंसेद्रष्टव्यः।

अवधूननम्। न। तिरस्कारणे।

अवधूलनम्। न। अवचूर्णने।

अवधृतः। त्रि। आकर्णिते। निश्चिते।

अवधृतिः। पुं। अवधारणे॥

अवध्यः। त्रि। मारणायोग्ये। यथा। अवध्याःस्त्रियः प्राहुस्तिर्यग्योनिगता स्वपीति। अपिच गान श्रुत लोके अवध्याः सुयोषितइति। अव ध्यवधे पापमुक्तंमनुना। यावानवध्य स्यवधेतावान् वध्यस्य मोक्षणे। अ धर्मान्नृपतेर्दृष्टोधर्मस्तुविनियच्छत इ ति। ९ ऽध्याये २४९ श्लोकः।

अवध्वंसः। पुं। परित्यागे। निन्दने। अवचूर्णने।

अवध्वस्तः। त्रि। परित्यक्ते। निन्दिते। अवचूर्णिते॥ अवध्वस्यतेस्म। ध्वं सुगतौच। क्तः॥

अवनम्। न। प्रीतौ। रक्षणे। प्रीण ने। अवरक्षणादौ। ल्युट्।

अवनतम्। त्रि। अवाग्भूते। आनते।

अवनमतिस्म । अमप्रह्वत्वे । गत्य र्थे तिक्तः । अनुदात्तोपदेशेत्यनुना सिकलोपः ॥

अवनतिः । स्त्री । विनये । अनौद्धत्ये ॥

अवनद्धः । त्रि । मण्डते ॥

अवनाटः । त्रि । नतनासिके । नासि कायाःनतम । नतेनासिकाया इति नाटच् । तद्योगान्नासिकाऽवनाटा । सास्त्यस्य । अर्श्रआद्यच् ॥

अवनामः । पुं । प्रणामे । अवनमनम् । अवणामेघञ् ॥

अवनायः । पुं । अधोनयने । निपातने । अवनयनम । णीञ् प्रापणे । अवो दोर्नि अ ॥

अवनिः । स्त्री । भुवि । अवति अव्यते वा । अवरक्षणादौ । अर्त्तिसृधृधर्म्य श्यनिः ॥

अवनिक्तः । त्रि । क्षालिते ॥

अवनी । स्त्री । सिरायाम् । भूमौ । ना सावायाम् ॥ कृदिकाराद्क्तिवा ङीष् ॥

अवनीपतिः । पुं । राजनि । अवन्याः पतिः ॥ अवनीं पातिवा । पारक्षणे पातेर्डतिः ॥

अवनेजनम् । न । प्रक्षालने । हस्तसंस्का रे । अव णिजिर॰ । ल्युट् । पिण्ड प्रदानार्थभास्तृतकुशोपरिजलसे-चने ॥

अवन्तयः । पुं । देशभेदे । मालवेषु ॥ अवति । अवरक्षणादौ । बाहुलका ज्झिच ॥

अवन्तिका । स्त्री । उज्जयिन्याम् ॥

अवन्तिसोमम् । न । काञ्जिके । अवन्ति षु अभिषुतं सोमम् । शाकपार्थि वादिः ॥

अवन्ती । स्त्री । देशभेदे ॥ यथा । साम्र पर्णा "समासाद्यमेखार्द्ध्रशिखरोज्ज्वल" । अवन्तीसंज्ञकोदेश. कालिकातत्रनि ष्ठतीति ॥

अवपातः । पु । बिले । निपाते । अ धः पतने । अवपतनम् । पत्लृ॰ । २ गजग्रहणागर्त्ते । अवपातस्तु हस्त गर्त्तेच्छन्नेतृणादिनेतियादवः । खौ ची इतिभाषा ॥

अवपाचितः । त्रि । भिन्नोदकीकृते अ पपाचिते ॥

अवपाशितः । त्रि । बद्धे ॥

अवप्लुतः । त्रि । अवतीर्णे । सद्यसैवाव तीर्णे ॥

अववुद्धः । त्रि । अनुभूते ॥

अवबोधकः । पुं । परिदीपके ॥ अवबो धयति । बुध । ण्वुल् ॥

अवभर्जितः । त्रि । दग्धे ॥

अवभासः । पुं । साक्षात्कारे ॥

अवभासक: । त्रि । प्रकाशके ॥

अवभृथ: । पुं । दीक्षान्तयज्ञे । मुख्ययज्ञशेषयज्ञविशेषे । प्रधानकर्म्मसमाप्तौ क्रियमाणेष्टिविशेषे ॥ यज्ञाङ्गभूतस्नानविशेषे ॥ अवभ्रियतेऽनेन । डुभृञ्धारणपोषणयो: भृञ्भरणेवा । अवेभृञइतिकथन् ॥

अवभ्रट: । त्रि । नतनासिके ॥ अवनतं नासिकाया: । नतेनासिकाया: संज्ञायामितिभ्रटच् । अवभ्रटंच नासिकायानतमस्यास्या: । अर्शआद्यच् । अवभ्रटानासिकास्यास्य पुरुषस्य । अर्शआद्यच् ॥

अव: । त्रि । कुत्सिते ॥ अवस्यस्माद्दानम् । अवरक्षणादौ । अवद्येति सूत्रेणावतेरम: प्रत्ययोनिपातित: ॥ अवोभवोवा । अवोधसोर्लोपश्चेतिम: ॥ न । अवमदिने ॥

अवमत: । त्रि । अवमानिते ॥ अवमन्यतेस्म । मनज्ञाने । क्त: ॥

अवमतिथि: । स्त्री । युतिः स्त्रित्र... वारे एकस्मिंअवमातिथि रिति ख्यातितिथौ ॥

अवमदिनम् । न । अवमे ॥ यथा । तिथ्यन्तद्वयमेकोदिनवार:स्पृश तिथयत द्वयन्तयमवमदिनम् । अस्यार्थ: । इनेता वद्वारद्वयंभवति वारप्रवृत्तिकालात् पूर्वमेकोवारस्ततपरंचान्य: । तन्नदिनस्याहोरात्रस्य एकोवारस्तिथ्यन्तद्वयं तिथित्रयंवायनदिनेस्पृशति तदवमदिनम् । वारप्रवृत्तिकालात् परंपरदिनसूर्योदयावध्येकवारेण तिथ्यन्तद्वयस्पर्शे तिथित्रयस्पर्शेवा अवमदिनंस्यादित्यर्थ: ॥

अवमन्ता । त्रि । अवमानस्यकर्त्तरि ॥ अवमन्यते । अवपूर्वान्मनेस्तृच् ॥

अवमर्द्द: । पुं । पीडने ॥ अवमर्द्दनम् । मृद्क्षोदे । घञ् ॥

अवमर्श: । पुं । नाटकसन्ध्यन्तरे ॥

अवमानना । स्त्री । अवज्ञायाम् ॥ अवमाननम् । मनेर्ण्यन्ताद्युच् ॥

अवमानितम् । त्रि । अवज्ञाते ॥ अवमान्यतेस्म । मानपूजायाम् । क्त: ॥

अवमूर्द्धशय: । त्रि । अधोमुखशायिनि ॥ अवनतो मूर्द्धायस्यस: । अवमूर्द्धशेते शीङ्स्वप्ने । पार्श्वादिषूपसंख्यानादच् ॥

अवमोटनम् । न । परिवर्त्तने ॥

अवमोटनी । स्त्री । परिवर्त्तनशीलायाम् ॥

अवयव: । पुं । अङ्गे । प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यनुमानावयवा: ॥ अवयौति । युमिश्रणे । पचाद्यच् ॥

अवर: । त्रि । चरमे । पश्चाद्भवे ॥ अधमे ॥

कार्ये । न । गत्रान्यजखादिदेशे ।

अवराति । रादाने । आतश्चोपसर्ग इतिकः । यथा । महद्योतिस्त्रियतेवा । इअवरश्चे । अथ ग्रहदृश्यिवा ।

अवरजः । पुं । कनिष्ठभ्रातरि । यवीयसि । शूद्रे । अवरस्मिन् काले जातः । सप्तम्यांजनेर्डः ॥

अवरजा । स्त्री । कनिष्ठायांभगिन्याम् ।

अवरतः । ा । पश्चादर्थे । अवरस्मात् । तसिल् । अवरस्तादर्थे । विभाषापरावराभ्यामित्यतसुच् । अवरतोवसत्यागतोरमणीयंवा ॥

अवरतिः । स्त्री । विरतौ । उपरामे ॥ अवरमणम् । रमक्रियायाम् । क्तिन् ।

अवरमोक्तः । त्रि । माकृतवुद्धिनोक्ते । नीचमतिनामोक्ते । अवरेणप्रोक्तः ।

अवरवर्णः । पुं । स्त्री । शूद्रे । वृषले । अवरोऽधमोवर्णोऽस्य । अवरश्चासौ वर्णश्चेतिवा ।

अवरवर्णकः । पुं । स्त्री । शूद्रे । अवरवर्णएव ।

अवरव्रतः । पुं । अर्के ॥ त्रि । हीनव्रते ।

अवरस्तात् । ा । अवरे । अवस्तादर्थे । अवरस्मिन् अवरस्याम् अवरस्मात् अवरस्याः अवरोऽवरावावसत्यागतोरमणीयंवा । दिक्छब्देभ्यस्सप्तमीपञ्चमीत्यस्तातिः तस्मिन्योगेनविभाषावरस्येति

अवरस्यपक्षेऽवादेशाभाव ।

अवरा । स्त्री । भवान्याम् । पार्वत्याम् ।

अवरार्ध्यम् । त्रि । अवरार्धभवे । अवरार्धभवम् । परावराधमोत्तमपूर्वाच्चेतियत् ।

अवरीणम् । त्रि । धिकृते । अवरीयते स्म । रीङ्स्रवणे । क्तः ।

अवरुग्णः । त्रि । भग्ने ।

अवरुद्धः । त्रि । स्थगिते । आच्छादिते ।

अवरुद्धा । स्त्री । अन्तःपुरचारिण्यांभोग्यायांकर्मकर्याम् ।

अवरूढः । त्रि । अवतीर्णे ।

अवरोधः । पुं । तिरोधाने । राजदारेषु । शुद्धान्ते । राजस्त्रीगृहे ॥ अवरुध्यतेऽत्र । रुधिर्आवरणे । घञ् ।

अवरोधकः । त्रि । रोधकारके । अवरोधकर्त्तरि । अवरोधयति । अवपूर्वात् रुधेर्ण्वुल् ।

अवरोधनम् । न । राज्ञामन्तःपुरे । अवरुध्यतेऽत्र । रुधिर् आवरणे । ल्युट् । अवरोधकरणे रोकना इति भाषा । यथा । कराावरोधनमिति ।

अवरोधायनम् । न । अन्तः पुरे ।

अवरोधिकः । पुं । अन्तःपुराध्यक्षे । शुद्धान्ते नियुक्तः । तत्रनियुक्तइतिठक् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । अवरोधेस्थापितोवा । ठन् ।

अवरोपितः । त्रि । उद्वासिते ।

अवरोप्यमाणः । त्रि । अवतार्यमाणे । वृक्षेभ्यस्तालफलमवरोप्यमाणः आनय । वृक्षः पोन्यतरस्यामितिपः ॥

अवरोहः । पुं । अवतारे । अवतरणे ॥ आरोहे । तरुमूलात्प्रभृतिशाखाग्रपर्यन्तं गतायां गुडूच्यादिलतायाम् । लतोद्गमे ॥ अधोगतौ । स्वर्गे । अवरोहतिजन्यते । वृक्षबीजजन्मनि । पाणावच ॥

अवरोहशाखी । पुं । प्लक्षवृक्षे ।

अवरोहिका । स्त्री । अश्वगन्धालतायाम् ॥

[illegible]रोही । पुं । वटद्रुमे ।

[illegible]र्णः । पुं । निन्दायाम् । परिवादे ॥ प्रशंसते । वर्ण वर्णने । घञ । वर्ण प्रशंसा । तद्विरुद्धोऽवर्णः ।

अवलग्नः । पुं । न । देहमध्ये ॥ त्रि । लग्नमात्रे । सक्ते । लग्यतेस्म । लग गेसंगे । क्षुब्धस्वान्तेतिसाधुः । यद्वा । लज्जतेस्म । ओलस्जी व्रीडने । गत्यर्थेतिक्तः । स्वोरिति सलोपः । ओदितश्चेतिनत्वम् । स्वीदितइतिनेट् । अवकृष्टमवसन्नं वा लग्नम् । प्रादयो गतेतिसमासः ।

अवलम्बः । पुं । आधारे । अवलम्बने ।

अवलम्बनम् । न । आश्रये । यथा । प्रतिकूलतामुपगतेहि विधौविफलत्वमेतिबहुसाधनता । अवलम्बनायदिनभर्तुरभून्न पतिष्यतःकरसहस्रमपीतिमाघे ९ सर्गः । पुं । हृदयस्थकफे ।

अवलम्बितम् । त्रि । अविलम्बिते । आश्रये । संश्रिते । आश्रिते । वस्त्रादिनारूढे ॥ अधोलम्बायमाने । अवलम्बतेऽस्म । लबि० । क्तोधिकरणे चेतिक्तः ।

अवलिप्त । त्रि । गर्वेणविवेकहीने ।

अवलिप्तता । स्त्री । अहङ्कारे ।

अवलिमा । पुं । अबलभावे । देहस्यरोगादिनिमित्ते जरादिनिमित्तेवाकृशीभावे ।

अवलीढ. । त्रि । भक्षिते । कृतावलेहे ।

अवलीला । स्त्री । अवज्ञायाम् । अनायासे ।

अवलुञ्चनम् । न । लुञ्चने । लोटनाइति भाषा ।

अवलेपः । पुं । गर्वे । लेपने । दूषणे ॥ सङ्गे । अवलेपनम् । लिपउपदेहे । घञ् ।

अवलेपनम् । न । म्रक्षणे । विलेपने । मखना । इतिभाषा ।

अवलेहः । पुं । लेह्यौषधे । अवलिह्यते । लिहेर्घञ् । तल्लक्षणं पर्यायाश्च

यथा। क्वाथादेर्यं पाकात् घनत्वं सारसक्रिया। सोऽवलेहश्चलेहस्याप्राश इत्युच्यते बुधैरिति वैद्यकपरिभाषा ॥

अवलेहनम् । न । लेहने । जिह्वयाऽऽस्वादने । चाटना इतिभाषा ॥

अवलोकनम् । न । आलोके । दर्शने ॥ अनुसन्धाने ॥ लोकृदर्शने । ल्युट् ॥

अवलोकितम् । त्रि । निरीक्षिते । देखा इतिभाषा ॥ पुं । लोकनाथे । बुद्धविशेषे ॥ नपुंसके भावेक्तः ॥ न । प्रेक्षणक्रियायाम् ॥

अवल्गुजः । पु । सोमराज्याम् ॥ त्रि । असाधुजे ॥ अवल्गोरशोभनाज्जातः ॥ कृष्णावर्णा सोमराज्याम् । बाकुच इतिगौडभाषा ॥

अववादः । पुं । निन्दायाम् ॥ आज्ञायाम ॥ विस्रम्भे ॥ अवाऽऽलम्बने । कार्यं अवलम्ब्यवदनमत्र । वदेर्घञ् ॥

अवश. । त्रि । निःश्रेयससाधनायाऽप्रयतमाने । परतन्त्रे । अस्वाधीनशरीरे ॥ अविद्याकामकर्मादिपरवशे ॥ प्रतिकूले ॥ नविद्यतेवश मायत्तत्वंयस्य: ॥

अवशिष्टः । त्रि । उर्वरिते । परिशिष्टे ॥

अवश्यम् । । । निश्चये ॥ अशक्यनिवारणे । निश्चे ॥ प्रयत्ने ॥ अवश्यायते श्यैङ्गतौ । डमप्रत्ययः ॥ लुम्पेदवश्यमःकृत्ये । यथा । अवश्यपाच्यम् । अवशब्दआवश्यके इतिकृत्वंन ॥ त्रि । अनायत्ते ॥

अवश्या । स्त्री । कुज्झटिकायाम् ॥ त्रि । अनायत्ते ॥

अवश्यायः । पुं । नीहारे ॥ अभिमाने । दर्पे ॥ अवश्यायते शैत्यमापद्यते । श्यैङ्गतौ । श्याद्व्यधेतिणः । आतोयुगितियुक् ॥

अवश्रयणम् । न । चुल्ल्यादितोऽवतार्यस्थापने ॥

अवष्टब्धः । त्रि । अविदूरे । आसन्ने ॥ आक्रान्ते ॥ अवलम्बिते ॥ अवष्टम्भस्य । ष्टभिस्तम्भे स्तम्भुरोधनेवा । । । स्तम्भः अवाच्चेतिषः । अवाच्चालम्बनेतिसूत्रेण आविदूर्येस्तम्भःषत्वविधानादवष्टब्धशब्द आसन्नपर इति-अश्मीनावष्टब्धे इत्यत्रमनोरमायांस्थितम् ॥

अवष्टम्भः । पुं । स्वर्णे ॥ स्तम्भे ॥ प्रारम्भे ॥ सौष्ठवे ॥ अवष्टम्भनम् । ष्टम्भुरोधे । घञ् ॥

अवष्वाणम् । न । भक्षणे ॥

अवऽ । ा । बाह्ये । बहिरर्थे ॥ अवोगच्छति ॥ अवस्तादर्थे ॥ अवरस्मिन् अवरस्याम् अवरस्मात् अवरस्याः अव

रो ऽवरावा वसन्त्यागतोरमणीयंवा । पूर्वाधरावराणा मिच्यसिस्तत्सन्नि योगेनावरस्यावादेशश्च ॥

अवसः । पुं । अर्के । भूपे । अवति । अवरक्षणादौ । अत्यविचमीत्यादिनाऽसच् ॥

अवसक्तः । त्रि । लग्ने ।

अवसक्थिका । स्त्री । पर्य्यङ्कबन्धे । पर्यङ्के ॥

अवसण्डीनम् । न । पक्षिणोऽधःपतने शोभनवस्तायाम् ।

अवसन्नः । त्रि । प्राप्तावसादे । विषण्णे । अवासदत् । षद्‌॰ । गत्यर्थेति क्तः ।

अवसन्नता । स्त्री । खेदे । भावे तल ।

अवसरः । पुं । प्रस्तावे ॥ शिष्यजिज्ञासानिवृत्तावश्यवक्तव्यत्वरूपे सङ्गतिविशेषे । अनन्तरवक्तव्यत्वमवसरः । यथोपमानेऽवसरसङ्गतिरितिजगदीशतर्कालङ्कारः । वत्सरे । मन्त्रभेदे । वर्षणे । अवसरणम् । सृगतौ । बाहुलकादप् ॥ अधिकरणेपुंसिसंज्ञायामितिघोवा । योग्यकाले ।

अवसरालयः । पुं । अर्द्दराचे ।

अवसर्गः । पुं । निरवग्रहे । स्वतन्त्रे ॥ अवसर्जनम् अवसृज्यतेवा । सृज्‌॰ । घञ् ॥

अवसर्पः । पुं । चारे ॥ अवसर्पति । सृप्‌ गतौ । पचाद्यच् ॥

अवसर्पिणी । स्त्री । वौद्धकल्पे । सतुदशकोटिकोटिसागरवर्षैरसमाप्यते ।

अवसादः । पुं । अवसन्नत्वे । विषादे । अवसदनम् । षद्‌॰ । भावे घञ ।

अवसादनम् । न । नाशे । शैथिल्यापादने ।

अवसानम् । न । समापने । विरामे । पर्य्यन्ते । मृत्यौ । सोमायाम् । षोन्तकर्मणि । ल्युट् ॥

अवसाय. । पुं । शेषे । समाप्तौ । निश्चये ॥

अवसायकः । पुं । अवसानकरे । स्यते र्ण्यन्तात् ण्वुल् ।

अवसितम् । त्रि । ऋद्धे । परिपक्वमर्द्दित धान्ये । ज्ञाते । गतौ । अवसाने । अवसानगते । समाप्ते । सम्बद्धे । षिञ् बन्धने इत्येतस्यावपूर्वस्यनिष्ठायांरूपम् । अवस्यतिस्म अवसीयतेस्मवा । षोअन्तकर्मणि । क्तः । द्यतिस्यतीतीत्वम् ।

अवसृष्टम् । त्रि । निःसृते ।

अवसेकिम. । पुं । वटके । वडाइतिख्याते । इति हेमचन्द्र. ।

अवस्कन्द॰ । पुं । शिविरे । विजिगीषूणां निवेशस्थाने । अवस्कन्दति । स्कन्दि-

अवस्था

र० । पचाद्यच् । अ   ने ॥

अवस्कन्दनम् । न । अ   रणे । अवगाहने ।

अवस्करः । पुं । विष्ठायाम् । अपाने । गुह्ये । उपस्थे ॥ गोप्ये ॥ अवकीर्यते क्षिप्यते । हविक्षेपे । ऋदोरप् । कस्कादिः । वर्चस्कोऽवस्कर इतिवासाधुः ।

अवस्तात् । ।। अधरे । अवोर्ध्वे । अवरस्मिन् अवरस्याम् अवरस्मात् अवरस्याः अवरो ऽवरावा वसस्यागतोरमणीयंवा । दिक्छब्देभ्य इत्यस्तातिः । विभाषावरस्येतिपक्षेऽवादेशः ।

अवस्तारः । पुं । जवनिकायाम् । कनात इति चिक इति प्रसिद्धायाम् । आस्तरणे ॥ अवस्तृणात्यऽनेनाक्षिम्वा । स्तृञ् आच्छादने । अवेस्तृोर्घञ् ॥

अवस्तु । न । असामादिसकलजडसमुदायस्वरूपे महाप्रपञ्चे । वस्तुनोऽन्यस्मिन् । असद्वस्तुनि ॥

अवस्था । स्त्री । दशायाम् । कालकृतविशेषे । कालकृतोधर्मोवपुषोवोवनादिविशेषस्तस्मिन् ॥ यथाहुः । कौमारं पञ्चमाब्दान्तंपौगण्डदशमावधि । कैशोरमापञ्चदशाद्यौवनंतु ततः परमिति । अपिच । आषोडशाद्भवेद्बालस्तरुणस्तत उच्यते । वृ

अवस्था

द्धस्तुसप्ततेरूर्ध्वं वर्षीयान् नवतेःपर इति । अवस्थाने ॥ अवतिष्ठति । अवपूर्वात् स्थाधातोरवस्थायामितिप्रकात साधुः ॥ अवतिष्ठतेऽनयावा । आतश्चोपसर्गइत्यङ् । टाप् ॥

अवस्थाचतुष्टयम् । न । वैद्यकमतेकालकृतचतुर्विधदशायाम् । यथा । आपञ्चदशवर्षंबाल्यम् । आविंशद्वर्षं कौमारम् । आपञ्चाशद्वर्षं यौवनम् । पञ्चाशतऊर्ध्वं वृद्धत्वमिति ॥

अवस्थानम् । न । स्थितौ । वासे । प्रतिष्ठायाम् । अवपूर्वात्तिष्ठतेर्ल्युट् ॥

अवस्थितः । त्रि । प्रतिफलिते ॥ आ   ने । कृतावस्थाने । स्थिते । अवपूर्वात् ष्ठागतिनिवृत्तौ । क्तः । वतिस्थतेस्तीत्वम् ।

अवस्थितिः । स्त्री । अवस्थाने ॥

अवस्यन्दनम् । न । नाश्ये ।

अवस्रंसनम् । न । अध   पतने ॥

अवस्रंसितः । त्रि । लम्बिते ।

अवहः । पुं । वायोस्तृतीयेस्कन्धे ॥ यथा । तत्रसप्तोर्ध्वभुवोधर्मविधर्मोचविधारणाः । चरणश्चतुर्तीयोयस्माद्भूरादयोगताः ३ इति ॥

अवहननम् । न । अवघाते ।

अवहस्तः । पुं । हस्तपृष्ठे ।

अवहारः । पुं । चौरे ॥ ग्राहयुद्धादिवि

अग्रे । निमन्त्रणोपनेतव्यद्रव्ये । ग्राहाख्ययादसि । अवहरति । अवपूर्वात् हृञः स्यादृधेतिण. । यद्वा । अवह्रियन्तेऽस्मिन् । हृञ० । अवहाराधारेतिघञ् । धर्मान्तरे ।

अवहारकः । पुं । अवहारार्थे । हांगर इतिख्यातेजलजन्तुविशेषे । नक्राजे । अवहारएव । स्वार्थेकः ।

अवहार्य्यः । त्रि । समर्पणीये । दण्डनीये ।

अवहालिका । स्त्री । प्राचीरे । इति हारावली ॥

अवहासः । पुं । परिहासे । अवहसनं । हसे० । घञ् ।

अवहितम् । त्रि । सावधाने । विख्याते । प्रवेशिते । निहिते । अवधीयतेस्म । डुधाञ् धारण पोषणयोः । क्तः । दधातेर्हिः ।

अवहित्थम् । न । स्त्री । आकारगुप्तौ । अवहिः स्थितम् । सुप्रिस्थइत्यत्र स्थइतियोगविभागात्कः । पृषोदरादिः । अवहित्थमयोग्नेति भरतोक्तःक्लीवम् ।

अवहित्था । स्त्री । आकारगोपने । अवहिःस्थितिः अवहित्था । सुपिस्थ इत्यत्र स्थ इतियोगविभागात्कः । पृषोदरादिः । टाप् ।

अवहेलम् । न । स्त्री । अनादरे । अवज्ञायाम् । अवहेलनम् । हेड्ड अनादरे । घञर्थेकः । डलयोरेकत्वस्मरणात्लः ।

अवहेलनम् । न । अनादरे । तिरस्कारे ।

अवहेला । स्त्री । अनादरे ॥

अवहेलितम् । त्रि । कृतावहेले ।

अवाक्पुष्पी । स्त्री । मधुरिकायाम् । शतपुष्पायाम् । सौंफ इतिख्यातायाम । अवाञ्चिपुष्पाण्यस्याः । गौरादिः । अधःपुष्प्याम् । मङ्गल्यायाम् । हेठाहुलीति गौडप्रसिद्धे तृणे ।

अवाक्शाखः । पुं । स्वर्गनरकतिर्य्यक्प्रेतादिशाखाभि शाखिनिसंसारवृक्षे । अर्वाञ्चोनिकृष्टाः कार्य्योपाधयोहिरण्यगर्भादयो महदहङ्कारतन्मात्रादयोवा शाखा इव शाखायस्यसः ।

अवाक्शिराः । पुं । अधोमुखे । अवाक्शिरोऽस्य ।

अवाच्यः । त्रि । परित्यक्ते ।

अवाग्र. । त्रि । नम्रे । अवनते । अवनतमग्रमस्य ।

अवाङ्मनसगोचरम् । त्रि । वाङ्मनसयोरविषये । वाङ्मनसयोर्गोचरम् नवाङ्मनसगोचरम् ॥

अवाङ्मुखः । वि । अधोमुखे ॥ अवाङ्मुखंयस्य सः ॥

अवाक् । । । अधोदेशे । अवाचिदेशे अवाचोदेशात् अवाङ्देशो वा । दिक्छब्देभ्य. सप्तमी पञ्चमी प्रथमाभ्य इत्यस्तातिः । अञ्चेर्लुक् ।

अवाङ् । वि । अधोमुखे । नम्रे ॥ अवाञ्चत्यधोमुखीभवति । ऋत्विगितिक्विन् ।

अवाक् । वि । मूके । नवागस्य ।

अवाची । स्त्री । दक्षिणदिशि । अधोदिशि । अधोमुख्याम् । अवोभध्यार्थः । अक्रोमध्येच्चतिसूर्यम् । ऋत्विगादिनाक्विन् । उगितश्चेति ङीप्-इतिस्वामी ॥ वस्तुतस्तु दक्षिणदिशि असाधुरेवायम् । अवपूर्वस्याञ्चतेरधोमुखीभावेवृत्तेः ।

अवाचीनम् । वि । दक्षिणदिग्भवे । अधोमुखे । अवागेव । विभाषाञ्चे रितिखः ॥

अवाच्यम् । न । दुर्वचने । अनक्षरे ॥ नवचनार्हम् । यत । वचोऽशब्दसंज्ञायामितिनकुत्वम् ॥ त्रि । अनिन्दिते ॥ अवक्तव्ये ॥ यथा । नैवपश्चेक्षमृणुयादवाच्यंजातुकस्यचित् । ब्राह्मणानां विशेषेणनैवब्रूयात् कथञ्चन । यद्ब्राह्मणस्य कुशलंतदेवसततंवदेत् । तूष्णीमासीत निन्दायां कुर्वन्भेषज्यमात्मन इतिमहाभारतम् ।

अवाच्यदेशः । पुं । योनौ । भगे ॥ अवाच्यश्चासौदेशश्च ।

अवाच्यवचनम् । न । दोषविशेषे । यदेवावाच्यवचनम वाच्यवचनंस्थितत ।

अवान्तरः । वि । प्रधानान्तःपातिनि ॥ इयंफलश्रुतिर्नश्रेयःपरमपुरुषार्थ-साधनपरा भवति । किन्तुबहिर्मुखानां मोक्षविवक्षयाऽवान्तरकर्मफलैः कर्मस्वरुच्युत्पादनमात्रम् । यथा । पिबनिम्बंप्रदास्यामिखलुते खण्डलड्डुकान् । पित्रैवमुक्तः पिबति नि... म ष्यतिवालकइति ॥

अवाप्तः । त्रि । प्राप्ते ।

अवाप्तिः । स्त्री । प्राप्तौ ।

अवाप्य । वि । लब्ध्वे ।

अवारम् । न । नद्यादेःपूर्वतीरे । अर्वाक्तटे । अर्वाकतीरमवारम् । अवव्रियते । ऋगतौ । कर्मणि घञ् ॥ न-वारमस्त्यत्रेतिवा । अर्शआद्यच् ।

अवारपारः । पुं । समुद्रे ।

अवारपारीणः । त्रि । पारगे । अवारपारंगच्छति अवारपारयोर्भवोवा तत आगतोवा । राष्ट्रावारपाराद्घखाविति खः । अवारपारंगामिनि ॥ अवारपारात्यन्तानुकामंगामीतिखः ।

अवारिका । स्त्री । धन्याके ॥ अवरिका पिपाठ इतिराजनिर्घण्टः ।

अवारितः । त्रि । अकृतवारणे ।

अवारीण । त्रि । अवारगामिनि । अवारंगच्छतीत्याद्यर्थेषु । अवारपाराद्विगृहीतादपि विपरीताच्चेतिखः । अवारंगामीवा । अवारपारात्यन्तानुकामंगामीतिखः ।

अवावटः । पुं । द्वितीयेनपित्रासवर्णायामुत्पादिते । यथा । द्वितीयेनतु यःपित्रासवर्णायां प्रजायते । अवावट इतिख्यातः शूद्रधर्मःसजातित इति स्मृतिः ।

...सा: । त्रि । नग्ने । नवासोऽस्य ।

...ह्य: । त्रि । आभ्यन्तरे । प्रतीचि । ...नीचोऽन्यस्यबाह्यस्याभावात् । न विद्यते बाह्यमन्यदस्य ।

अविः । पुं । नाथे ॥ रवौ । मेषे । शैले ॥ मूषिककम्बले । अवति अव्यतेवा । अवरत्वयादौ । इन् । स्त्री । स्त्रीधर्मिण्याम । अवतिलज्जाया. । सर्वधातुभ्य इन् ।

अविकः । पुं । अविशब्दार्थे । अविरेव । अवेः कइतिकः ।

अविकटः । पुं । मेषसमूहे । अवीनांसङ्घातः । सङ्घातेकटच् ।

अविकम्प्य । त्रि । अप्रचले । नास्तिविप्रिष्टः कम्पोवेपथुर्यस्यसः ॥

अविकम्पितः । त्रि । अचलिते । नविकम्पितः ।

अविकल्पः । त्रि । एकरूपे । नविकल्पोऽस्मिन् ।

अविकारी । त्रि । विक्रियाशून्ये कूटस्थे परमात्मनि ।

अविकृतिः । स्त्री । मूलप्रकृतौ । नास्ति विकृतिर्यस्याः ।

अविगन्धिका । स्त्री । अजगन्धावृक्षे ।

अविगीतम् । त्रि । अनिन्दिते ।

अविघ्नः । पुं । करमर्द्दके । विजयतेस्म । ओविजीभयचलनयोः । गत्यर्थेति-क्तः । ओदितश्चेतिनत्वम् । नविघ्नः ॥

अविचारः । पुं । अन्याये । विवेकाभावे । यथा । अविचारसिद्धेयंवेशविलासिनीवमाया असतोपिभावानुपदर्शयन्तीपरपुरुषंवञ्चयतीति । त्रि । विचाररहिते ।

अविचारकः । त्रि । मूढे ।

अविचारितम् । त्रि । अकृतविचारे । अविवेचिते ।

अविचाली । त्रि । देशान्तरप्राप्तिरहिते ॥

अविच्युतः । त्रि । नित्ये ।

अविज्ञः । त्रि । अनभिज्ञे । अप्रवीणे ।

अविज्ञातः । त्रि । अर्थापरिज्ञानाद-

निश्चिते। यथा। यदधीतमविज्ञातं निगदेनैवशब्द्यते। अनग्नाविवशुष्कैधोनतज्ज्वलतिकर्हिचिदिति। न तज्ज्वलतीति। निष्फलंभवतीत्यर्थः। ईश्वरे। यन्नविज्ञायते पुम्भिर्नामभिर्वाक्रियागुणैरितिनिरुक्तः।

अविज्ञातार्थम्। पुं। परिषत्प्रतिवादिभ्यांत्रिरभिहितमप्यविज्ञातमविज्ञातार्थम्॥ ५।५२। त्रिरभिहितंवादिनेतिशेषः।

अविज्ञानवान्। पुं। अनिपुणे। अविवेकिनि। अविज्ञानमस्ति अस्यास्मिन्वा। मतुप्।

अविज्ञेयम्। न। प्रमाणान्तरानवगाह्ये। औपनिषदे ब्रह्मणि। तद्धिरूपत्वरूपादिहीनत्वात् इदमेवमितिविस्पष्टज्ञानार्हंनभवति। नविज्ञेयम्। त्रि। प्रमाणानवगाह्ये। दुर्ज्ञेये।

अड्डीनम्। न। पक्षिणामाभिमुख्याभिगमने॥

अवितथ। त्रि। रचिते। अव्यतेक्त। अवरत्वणादौ। क्त।

अवितथम्। न। सत्ये। तत्त्वे। नवितथम्। त्रि। तद्विशिष्टे।

अवितर्क्यम्। त्रि। अनूहनीये। औतार्ये।

अविता। त्रि। पालयितरि।

अविन्ध्यजः। पुं। न। पारदे। हिङ्गुले। अनिर्धार्यः॥

अविदग्धः। त्रि। असभ्ये। निर्गन्धे। अचतुरे॥

अविदासी। त्रि। उपक्षयशून्ये।

अविदितः। त्रि। विदितविपरीते। अव्याकृते। अज्ञाते। विज्ञानाभावे। अविदितविज्ञाना यच्छिखोक्रमशस्ते।

अविदूसम। न। मेषदुग्धे। अवेर्दुग्धम्। अवेर्दुग्धेसोढदूसमरीसचः॥

अविदुकर्णी। स्त्री। पाठायाम्। अविद्धकर्णा यथा। पाककर्णीतिकोषः। अविद्धोऽच्छिद्रः पर्णरूपः कर्णोऽस्याः।

अविद्धः। त्रि। विद्धरहिते।

अविद्यमाना। स्त्री। मायायाम्। अभावे। अवर्त्तमाने॥

अविद्या। स्त्री। अज्ञाने। अज्ञाने। यथाहुः। अविद्याया अविद्यात्वमिदमेवतुलक्षणम्। यत्प्रमाणासहिष्णुत्वमन्यथावस्तुसाभवेदिति। अत्रापि। सेयंभ्रान्तिर्निरालम्बासर्वन्यायविरोधिनी। सहतेनविचारंसा तमोयद्दिवाकरमिति। पुनश्च। दुर्घटत्वमविद्याया भूषणंनतुदूषणम्। कथञ्चिद्घटमानत्वेऽविद्यात्वंदुर्घटंभवेदिति। अनित्याशुचिदुःखानात्मसुनित्यशुचिसुखात्मख्यातिः। अव्यक्त

महदहङ्कारपञ्चतन्मात्रेष्व नात्मस्वात्मबुद्धौ । अतस्मिंस्तद्बुद्धौ। विपर्यये । मिथ्याज्ञाने । अनात्मन्यात्मख्यातौ।यथाशरीरे मनुष्योऽहमित्यादि । इयञ्चसर्वक्लेशमूलभूतातमइत्युच्यते । अनादिभावरूपाज्ञाने । अग्निहोत्रादिलक्षणेकर्मणि। मलिनसत्त्वप्रधानायाम् । संहृतौ ॥ परमानन्दस्वरूपात्माज्ञाने। वेदनंविद्या । विदज्ञाने । संज्ञायां समजनिषदनिपतेति क्यप् । विद्याविरुद्धा अविद्या ॥

अविद्वान । त्रि । कम्बे । अविद्वान् ।

विधिः । पुं । शास्त्राविहिते । अविधारे । यथा । वसेत्सनरके घोरेदिनानिपशुरोमभिः । अमितानिदुरात्मायोऽहन्त्यविधिना पशूनित्याह्निकतत्त्वेयाज्ञवल्क्य ॥

अविनः । पुं । राज्ञि । अध्वर्य्यौ । अवति । अवरक्षणादौ । ध्यात्वाहुञ्ज विध्यइनच् । त्रि । यष्टरि ॥

अविनत. । त्रि । उन्नते ॥

अविनय. । पुं । विनयाभावे । त्रि । अविनीते ।

अविनाभाव । पुं । व्याप्तौ । व्याप्यनिष्ठव्यापकनिरूपितधर्मे । यथा । वह्निमान् धूमादित्यादौ धूमनिष्ठा वह्निनिरूपिताव्याप्तिरिति न्यायमीमांसयोर्मतम् ॥ तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावे । यथा । केयमाकाङ्क्षा न तावदविनाभावः । नीलंसरोजमित्यादौ तदभावात् । विमलंजलंनद्याः कच्छेमहिषइत्यत्रजलान्वितनद्या अविनाभावात् कच्छेसाकाङ्क्षतापत्तेश्च । इत्याकाङ्क्षा चिन्तामणिः । अविनाभावइति । तत्पदार्थेन विनायोभाव स त्त्वंतदभावइत्यर्थं । तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावस्तत्पदार्थेतत्पदार्थाकाङ्क्षा इतिभाव इति-तट्टीकामाधुरी ।

अविनाशी । त्रि । अन्त्यविकारवर्जिते । नित्ये । सत्ये । अबाध्येसर्वप्रकारपरिच्छेदशून्ये। अविक्रियआत्मनि । विनष्टुं शीलमस्येति विनाशी। नविनाशी ॥

अविनीत । त्रि । वियाते ।समुद्धते । नव्यनायि। णीञ० । क्त ॥

अविनीता । स्त्री । कुलटायाम ॥ नञ्नायि । णीञप्रापणे । क्त । नविनीताया ॥

अविन्ध्य. । पुं । राक्षसान्तरे ॥

अविपटः । पुं । मेषविस्तारे । अवीनां विस्तार. । विस्तारे पटच् ॥ कम्बलादौ ॥

स्रगादाधरीटीका । अनुमितिवि-
चारे ।

अविवेकि । न । व्यक्ते । प्रधाने ॥ मह
दादौ ॥ यथा प्रधानं स्वतोनविवि
च्यते एवंमहदादयोपि न प्रधाद्वि
विच्यन्ते ॥ वाच्यवि । मूर्खे । गुरुशा
स्त्रार्थ्युपदेशरहिते । नविवेकी ।

अविशिष्टम् । त्रि । समाने । नविशिष्ट
म् ।

अविशेषः । पुं । तन्मात्रेषु । तानि भस्मा
दादिभिःपरस्परव्यावृत्तानि नानुभू
यन्ते सूक्ष्मविशेषाः सूक्ष्माश्चोच्यन्ते ।
निष्प्रपञ्चे । विशेषाभावे । त्रि । वि
शेषरहिते । तुल्ये ।

अश्रान्तम् । न । अनवरते ॥ त्रि । वि
श्रामहीने ॥

अविश्वस्तः । त्रि । प्रत्ययायोग्ये । विश्वा
साना ॥ यथा । नविश्वसेदविश्वस्ते वि
श्वस्तेनातिविश्वसेत । विश्वासाद्भयमु
त्पन्नंमूलान्यपिनिकृन्ततीति ॥

अविश्वासा । स्त्री । चिरप्रसूतायांगवि ।

अविषः । पुं । अब्धौ । राजनि । अव
ति । अवरक्षणादौ । अविमह्योष्टि
षच् । त्रि । निर्विषे ।

अविषा । स्त्री । निर्विषाख्ये ।

अविषी । स्त्री । नद्याम् । टिष्वान्ङीप् ॥

अविसोढव्य । न । अविसरीषे । अवे
र्दुग्धम् । अवेर्दुग्धेसोढदूसमरीस
चोवक्तव्याः ॥

अविस्पष्टम् । न । क्लिष्टे । अप्रकटवच
ने । नविस्पष्टयतेस्म । स्पशवाधनस्प
र्शनयोः । कर्मणिक्तः । अविस्पष्टेति
निर्देशादिडभावः ।

अवीः । स्त्री । ऋतुमत्याम् ॥ अवति
लज्जायाः । अवरक्षणादौ । अविदृ
सृतन्त्रिभ्यईः ।

अवीचिः । पुं । नरकभेदे । तरङ्गे ॥ ना
स्तिवीचिःसुखमत्र । त्रि । तरङ्गशू
न्ये ।

अवीचिमयः । पुं । नरकभेदे । यःसा
क्ष्यादावनृतंवदति सनिरवलम्बे ऽवी
चिमये ऽधश्शिरानिपात्यते ॥ इति
श्रीभागवतम् ॥

अवीजा । स्त्री । ईषद्वीजायांद्राक्षाया
म् । किसमिस् इतिलोके ।

अवीतम् । न । अनुमानप्रभेदे । व्यति
रेकमुखेन प्रवर्त्तमाने निषेधके । त
द्यावीतंशेषवत् । विशेषेणस्पष्टमितो
वीतः सनभवतीत्यवीतः ॥

अवीरः । त्रि । निःसत्त्वे । निर्वीर्ये ।

अवीरा । स्त्री । निष्पतिसुतायाम् । वी
रयति । वीरविक्रान्तौ । अच् । पति
पुत्रवतीनारी वीराप्रोक्तामनीषि-
भिः । नवीरा ॥ अजातापत्यविधवा

ऽवीरेतिस्मृतिः ॥

अवृजिनः । त्रि । यथोक्तकारित्वयानि-
ध्याये ॥

अवेक्षणम् । न । दर्शने ॥ ईषद्दर्शने ।
ल्युट् ।

अवेक्षा । स्त्री । अवेक्षणे । प्रतिजागरे ॥
अवधाने ॥ अवेक्षणम । ईषद्दर्शने ।
गुरोश्चहलः । अः । टाप् ॥

अवेक्षिता । न । अवेक्षके । अध्यक्षे ।
आयव्ययादिनिरीक्षके ॥ अवेक्षते ।
ईक्ष० । तृच् ॥

अवेशः । पुं । गोवत्से ॥ त्रि । अज्ञेये ।

अवेलः । पुं । अपलापे ॥ त्रि । वेला
शून्ये ।

अवेला । स्त्री । पूगचर्विते । चवाई
सुपारी इतिभाषा ॥

अवैधर्मं । त्रि । विधिविवर्जिते । विध्य
विषये । यथा । अवैधंपश्चमं कुर्वन
राज्ञोदण्डेनशुध्यतीति ॥

अवोद्रम । त्रि । अवक्लेदने । उन्दीक्लेद
ने अवपूर्व । भावेघञ् । अवोदैधौ
द्मेतिनिपातनान्नलोपः ।

अव्यक्तः । पुं । हरौ । स्मरहरे । सर्वका
रणे । रूपादिहीनतया चक्षुराद्य
गोचरे योगाभ्यासावसेये भावे ।
कल्पितेषुसर्वकार्येषुसद्रूपेणानुगते ।
हिरण्यगर्भे । सूक्ष्मशरीरे । स्वापा

वस्थायाम् । निर्विकारे । शब्दप्रवृ
त्तिनिमित्तजातिगुणक्रियासम्बन्ध
रहिते । व्यक्तःस्पष्टोनेत्यव्यक्तः ॥ यत्र
ध्वनावकारादयोवर्णा विशेषरूपेण
नव्यज्यन्तेसध्वनिरव्यक्तः । मूर्खे ।

कन्दर्पे ॥ न । प्रकृतौ । तच्चाहि ।
यत् सर्वस्यजगतो बीजभूत मव्याकृ
तनामरूपसतत्वम् सर्वकार्यकारण
शक्तिसमाहाररूपम् अव्यक्ताव्याकृता
काशादिनामवाच्यंपरमात्मन्योतप्रो
तभावेनसमाश्रितम् वटकणिकाया
मिव वटवृक्षशक्तिः । सत्त्वादिरूपेण
निरूप्यमाणो व्यक्तिरस्यनास्तीत्यव्य
क्तम् । तदुक्तम् । हेतुमदनित्य
व्यापिसक्रियमनेकमाश्रितंलिङ्गम् ।
सावयवपरतन्त्रं व्यक्तं विपरीतमव्यक्त
मिति । साङ्ख्योक्तमहदादौ । आ
त्मनि । परमात्मनि । मायोपाधिके
ब्रह्मणि ॥ त्रि । अवयवरहिते । अ
व्यक्तमितिविज्ञेयंलिङ्गग्राह्यमतीन्द्रि-
यम् । सूक्ष्मे । अविशेषे । अस्फुटे ॥
नव्यज्यते । अञ्जूव्यक्त्यादौ । क्तः ।

अव्याकृतकार्यभूतसूक्ष्मे ॥ भूतसू
क्ष्मतयाधिकरणे । नव्यक्तम इतिवा ।

अव्यक्तमूलप्रभवः । पुं । संसारवृक्षे ।

अव्यक्तरागः । पुं । अरुणवर्णे । किञ्चि
ल्लोहिते । अव्यक्तोरागोवस्य ।

अव्यक्तलिङ्गः । त्रि । अदर्शनेनश्रुतिस्मृ
त्युक्तप्रकारेण अनवति । न व्यक्तंदर्श
नगृहीतंलिङ्गमाश्रमित्वमनेन ।

अव्यग्रः । त्रि । अनाकुले । नव्यग्रः ॥

अव्यङ्गः । त्रि । अविकले । परिपूर्णे ।
अविकलाङ्गे । नव्यङ्गः ।

अव्यङ्गा । स्त्री । शूकशिम्ब्याम् ॥

अव्यञ्जन । पुं । शृङ्गहीनपशौ । त्रि ।
अव्यक्ते । अस्फुटे । अविद्यमानंव्यञ्ज
नंयस्यअस्मिन्वा ।

अव्यण्डा । स्त्री । शूकशिम्ब्याम् । कौंच
इतिख्यातायाम् ॥ नविगतमण्ड
स्याः ॥

[illegible]सिकरः । पु । अप्रसङ्गे ।

[illegible]थः । पुं । सर्पे । त्रि । निर्भये । न
[illegible]थायस्य । नव्यथते । व्यथभयसञ्च
लनयोः । पचाद्यच् ।

अव्यथा । स्त्री । पथ्यायाम् । चारव्या-
म् ॥ ओषधीभेदे । मुण्ड्याम् ॥ नव्य
थायस्याः । नव्यथते । व्यथ । पचाद्य
च् । टाप् ॥

अव्यथी । पुं । अश्वे । नव्यथते तच्छी
लः । व्यथ० । जिदृक्षिविश्रीण्वमा
व्यथाभ्यमपरिभूप्रसूभ्यश्चेतोनिः ॥

अव्यथिषः । पुं । अर्णवे । सूर्ये । नव्य
थते । व्यथ० । अविव्यथिभ्यांटिषच् ॥

अव्यथिषी । स्त्री । धरायाम् । रात्रौ ॥

टित्त्वान्ङीप् ॥

अव्यभिचारी । त्रि । केनापिप्रतिकूले
न हेतुनानिवारयितुमशक्ये ॥

अव्ययः । पुं । न । स्वरादिशब्दे । पुं ।
विष्णौ । शिवे ॥ अनाद्यनन्तेदेहादि
सन्तानाश्रये आत्मज्ञानमन्तरेणानु
च्छेद्येमायामयेसंसारवृक्षे । त्रि ।
उत्पत्तिविनाशादिसर्वक्रियाशून्ये ।
नित्ये । अविनाशिनि । अपरिच्छि
न्ने । यथा । सदृशंत्रिषुलिङ्गेषु सर्वा
सुचविभक्तिषु । वचनेषुचसर्वेषु यन्न
व्येति तदव्ययमिति ॥ नविद्यतेव्ययोऽ
वयवापचयोगुणापचयोविनाशोवा
यस्य । यद्वा । नव्येति विकारं नभजत
इत्यव्ययम् । विपूर्वादिण. पचाद्यच् ।
नव्यय. ।

अव्ययात्मा । पुं । अनश्वरस्वभावे ।

अव्ययीभावः । पु । प्रायः पूर्वपदार्थप्रधा
नेसमासविशेषे ।

अव्यलीकः । पुं । सत्ये ॥

अव्यवसायकृत् । त्रि । शिक्षौ । व्यवसा
यरहिते । इतिचिकाण्डशेषः ।

अव्यवस्था । स्त्री । शास्त्रविरुद्धव्यवस्थाया
म् । अपसिद्धान्ते । अविधौ ।

अव्यवस्थितः । त्रि । नीतिशास्त्रादिव्य
वस्थानभिज्ञे ॥ सिद्धान्तरहिते ।

अव्यवहार्यः । त्रि । अभिधानाभिधेयक

अव्यक्तः

ऽधीरेतिस्मृतिः ॥

अवृजिनः । त्रि । यथोक्तकारित्वयानि-
ध्याये ॥

अवेक्षणम् । न । दर्शने ॥ ईषद्दर्शने ।
ल्युट् ॥

अवेक्षा । स्त्री । अवेक्षणे । प्रतिजागरे ।
अवधाने । अवेक्षणम । ईषद्दर्शने ।
गुरोश्चहलइत्यः । टाप् ॥

अवेक्षिता । न । अवेक्षके । अध्यक्षे ।
आयव्ययादिनिरीक्षके । अवेक्षते ।
ईक्ष० । तृच् ॥

अवेद्यः । पुं । गोवत्से । त्रि । अज्ञेये ।

अवेलः । पुं । अपलापे ॥ त्रि । वेला
शून्ये ॥

अवेला । स्त्री । पूगचर्विते । चवाई
सुपारी इतिभाषा ॥

अवैधर्म । त्रि । विधिविवर्जिते । विध्य
विषये । यथा । अवैधपश्वर्म कुर्वन
राज्ञोदण्डेनशुध्यतीति ॥

अवोदम । त्रि । अवक्लेदने । उन्दीक्लेद
ने अवपूर्वे । भावेघञ् । अवोदैधौ
द्मेतिनिपातनान्नलोपः ॥

अव्यक्तः । पुं । हरौ । स्मरहरे । सर्वका
रणे । रूपादिहीनतया, चक्षुराद्य
गोचरे योगाभ्यासावसेये भावे ।
कल्पितेषुसर्वकार्येषुसद्रूपेणानुगते ।
हिरण्यगर्भे । सूक्ष्मशरीरे । स्वापा

अव्यक्त

वस्थायाम ॥ निर्विकारे । अव्यप्रवृ
त्तिनिमित्तेजातिगुणक्रियासम्बन्धे
रहिते । व्यक्तःस्पष्टोनेत्यव्यक्तः ॥ यत्र
ध्वनावकारादयोवर्णा विशेषरूपेण
नव्यज्यन्तेसध्वनिरव्यक्तः ॥ मूर्खे ॥
कन्दर्पे ॥ न । प्रकृतौ ॥ तथाहि ।
यत् सर्वस्यजगतो बीजभूत मव्याकृ
तनामरूपसतत्त्वम सर्वकार्यकारण
शक्तिसमाहाररूपम् अव्यक्ताव्याकृता
काशादिनामवाच्यंपरमात्मन्योतप्रो
तभावेनसमाश्रितम् वटकणिकाया
मिव वटवृक्षशक्तिः । तत्त्वादिरूपेण
निरूप्यमाणे व्यक्तिरस्यनास्तीत्य
क्तम् । तदुक्तम् । हेतुमदनित्य
व्यापिसक्रियमनेकमाश्रितंलिङ्गम्
सावयवपरतन्त्रं व्यक्तं विपरीतमव्यक्त
मिति ॥ साङ्ख्योक्तमहदादौ ॥ आ
त्मनि । परमात्मनि । मायोपाधिके
ब्रह्मणि ॥ त्रि । अवयवरहिते ॥ अ
व्यक्तमितिविषयंलिङ्गग्राह्यमतीन्द्रि-
यम् ॥ सूक्ष्मे ॥ अविज्ञेये । अस्फुटे ॥
नव्यज्यतेस्म । अभूव्यक्त्यादौ । क्तः ।
अव्याकृतकार्यभूतसूक्ष्मे ॥ भूतसू
क्ष्मतयाधिकरणे ॥ नव्यक्तम इतिवा ।

अव्यक्तमूलप्रभवः । पुं । संसारवृक्षे ।

अव्यक्तरागः । पुं । अरुणवर्णे । किञ्चि
ल्लोहिते ॥ अव्यक्तोरागोयस्य ॥

अव्यक्तलिङ्गः । त्रि । अदर्शनश्रुतिस्मृत्युक्तप्रकारेण अभवति। नव्यक्तंदर्शनगृहीतंलिङ्गमाश्रमित्वमनेन ।

अव्यग्रः । त्रि । अनाकुले । नव्यग्रः ॥

अव्यङ्गः । त्रि । अविकले । परिपूर्णे । अविकलाङ्गे । नव्यङ्गः ।

अव्यङ्गा । स्त्री । शूकशिम्व्याम् ॥

अव्यञ्जनः । पुं । शृङ्गहीनपशौ । त्रि । अव्यक्ते । अस्फुटे । अविद्यमानंव्यञ्जनंयस्ययस्मिन्वा ।

अव्यण्डा । स्त्री । शूकशिम्व्याम् । कौञ्चइतिख्यातायाम् ॥ नविगतमण्डम्याः ।

[illegible]तिकरः । पुं । अप्रसङ्गे ।

[illegible]थः । पुं । सर्पे । त्रि । निर्व्यथे । न[illegible]थायस्य । नव्यथते । व्यथभयसञ्चलनयोः । पचाद्यच् ।

अव्यथा । स्त्री । पथ्यायाम् । चारव्याम् ॥ ओषधीभेदे । मुण्ड्याम् ॥ नव्यथायस्याः । नव्यथते । व्यथ । पचाद्यच् । टाप् ॥

अव्यथी । पुं । अश्वे । नव्यथते तच्छीलः । व्यथ० । जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्चेतोनिः ॥

अव्यथिषः । पुं । अर्णवे । सूर्ये । नव्यथते । व्यथ० । अव्यिथ्यथेरिति टिषच् ।

अव्यथिषी । स्त्री । धरायाम् । रात्रौ ॥ टिड्ढानञ्डीप् ॥

अव्यभिचारी । त्रि । केनापिप्रतिकूलेन हेतुनानिवारयितुमशक्ये ॥

अव्ययः । पुं । न । स्वरादिशब्दे । पुं । विष्णौ । शिवे ॥ अनाद्यनन्तेदेहादिसन्तानाश्रये आत्मज्ञानमन्तरेणानुच्छेदेमायामयेसंसारवृत्ते । त्रि । उत्पत्तिविनाशादिसर्वक्रियाशून्ये । नित्ये । अविनाशिनि । अपरिच्छिन्ने । यथा । सदृशंत्रिषुलिङ्गेषु सर्वासुचविभक्तिषु । वचनेषुचसर्वेषु यन्नव्येति तदव्ययमिति । नविद्यतेव्ययोऽवयवापचयोगुणापचयोविनाशोवा यस्य । यद्वा । नव्येति विकारं नभजत इत्यव्ययम् । विपूर्वादिणः पचाद्यच् । नव्यय. ।

अव्ययात्मा । पुं । अनश्वरस्वभावे ।

अव्ययीभावः । पुं । प्रायः पूर्वपदार्थप्रधानेसमासविशेषे ।

अव्यलीक । पुं । सत्ये ।

अव्यवसायवान् । त्रि । शिक्षौ । व्यवसायरहिते । इतिशिकाण्डशेषः ।

अव्यवस्था । स्त्री । शास्त्रविरुद्धव्यवस्थायाम् । अपसिद्धान्ते । अविधौ ।

अव्यवस्थित । त्रि । नीतिशास्त्रादिव्यवस्थानभिज्ञे । सिद्धान्तरहिते ।

अव्यवहार्यः । त्रि । अभिधानाभिधेयक

पयोर्वाङ्मनसयोरविषये ॥ अवस्था रायोग्ये । नव्यवहार्यः ॥

अव्यवहितम । त्रि । व्यवधानशून्ये । संसक्ते । अपदान्तरे ॥ नव्यवधीयतेस्म । क्त । दधातेर्हिः ॥

अव्याकृतः । पुं । बीजरूपे । अविवेके । अव्यक्ते । प्रकृतौ । असम्भूतौ । साभासाज्ञाने । अनिर्वाच्ये ॥ नव्याकृतः ॥

अव्याकृताकाशः । पुं । अव्यक्ते ॥

अव्याजः । पुं । छलाभावे । शीघ्रे ॥

अव्यापकम् । त्रि । परिच्छिन्ने ॥ नव्यापकम् ॥

अव्यापि । न । व्यक्ते ॥

अव्याप्यम् । त्रि । व्याप्तिरहिते । अव्यापनीये । अनधीने ॥

अव्याप्यवृत्तिः । त्रि । किञ्चिदवच्छिन्नवृत्तौ । स्वसमानाधिकरणाभावप्रतियोगिनि ॥ दैशिककालिकभेदेन सद्विविधः । तत्पर्याय. । प्रादेशिक. ॥ आत्मनोविशेषगुणाः । बुद्धिसुखदु.खेच्छाद्वेषयत्नधर्माधर्मभावनाख्यसंस्कारा. ९ । आकाशस्यविशेषगुणः शब्द १० । सामान्यगुणौ संयोगविभागौ १२ । एतेसर्वे अव्याप्यवृत्तय स्युरितिन्यायभाषा ॥

अव्युत्पन्न. । त्रि । अनभिज्ञे ॥

अशनम् । त्रि । अश्नुते ॥

अशकुम्भी । स्त्री । पानीयपृष्ठजे । काईइतियस्याः प्रसिद्धिः ॥

अशक्तः । त्रि । असमर्थे । सामर्थ्यहीने ॥ यथा । उपवासेष्वशक्तानांनक्तंभोजनमिष्यतइति ॥ नशक्तिरस्य । न ञ् दुःसुभ्योहलिसक्थ्योरितिपाठात्पक्षेअच् ॥

अशक्तिः । स्त्री । करणवैकल्यहेतुके बुद्धिधर्मे ॥ साचाष्टाविंशतिभेदभिन्ना ॥ यथा । एकादशेन्द्रियवधाःसहबुद्धिवधैरशक्तिरुद्दिष्टा । सप्तदशधाचबुद्धेर्विपर्ययात्तुष्टिसिद्धीनामिति ॥ । दशेन्द्रियवधास्तु । वाधिर्यंकुष्ठ स्त्वंजडताजिघ्रतातथा । मूकता पङ्गुत्वक्लैव्योदावर्त्तमत्तताः ॥ श्रोत्रादीनामिन्द्रियाणांवधाः । एतद्धेतुकाबुद्धेरशक्तिः स्वव्यापारेभवति । तथाचैकादशहेतुत्वादेकादशधाबुद्धेरशक्तिरुच्यते । हेतुहेतुमतोरभेदविवक्षया सामानाधिकरण्यम् । तदेवमिन्द्रियवधद्वारेण बुद्धेरशक्तिमुक्त्वास्वरूपतोऽशक्तिमाह । सहबुद्धिवधैरिति । कतिबुद्धेःस्वरूपतोवधाउच्यतआह । सप्तदशधाचबुद्धेः । कुतः । विपर्ययात्तुष्टिसिद्धीनाम् । तुष्टयोनवेतितद्विपर्ययास्तन्निरूप

यान्नबभवंति । एवंसिद्धयोऽष्टाविति तद्विपर्ययास्तद्विरूपत्वादष्टौभवन्ति । इतिसांख्या. । अपिच । अशक्ति. कारकापायेसदर्थाप्रभविष्णुता कारकाणामन्त.करणबहिष्करणाना मपायेविनाशेसति विद्यमानेप्यर्थे अप्रभवनशीलत्वमशक्तिः । अन्धव धिरादेरितिरूपशब्दादाविति ।

अशक्यः । त्रि । असाध्ये । अशकनीये ।

अशशुः । पुं । चन्द्रे । त्रि । शत्रुरहिते । मित्रे ।

अशनम् । न । ओदने । भक्षणे । अ श० । ल्युट । ज्वरवान्ज्वरोज्झितो शवाल्लघुकुर्यादशनदिनात्यये ।

[अश]नाया । स्त्री । बुभुक्षायाम् । क्षुधा याम् । अशितुमिच्छा अशनस्येच्छा वा अशनायतिवा । सुपइतिक्यच् । अशनायेति ईत्वाभाव. । अप्रत्यया दित्यः ।

अशनायितम् । त्रि । क्षुधिते । अशन स्येच्छा । अशन येतिसाधुः । अश नायाजातास्य । तारकादि ।

अशनिः । स्त्री । पुं । चञ्चलायाम् । वि द्युति । पवौ । वृक्षादिविनाशकेमे घोत्पन्नज्योतिषि । अश्नाति सङ्घा तं करोति । अश्यतेऽनेनेतिवा । अर्त्तिसृधृधमीत्यादिना अनिः ।

अशमवर्षणे । उल्काविशेषे ।

अशनिस्त्विट । स्त्री । विद्युति । अशनेः त्विट् ।

अशब्दः । पुं॰ न । अवेदमूलके ।

अशम. । पुं । इदंकृत्वेदंकरिष्यामीति सङ्कल्पप्रवाहानुपरमे ।

अशय्य । पुं । तापसान्तरे । थ'कादा पिनशेते ।

अशरीरः । पुं । स्वेनरूपेणाकाशकल्पे परमात्मनि । त्रि । शरीररहिते । य था । प्रत्यग् ज्ञानशिखिध्वस्तेमिथ्या ज्ञानेसहेतुके । नेतिनेतिस्वरूपत्वा दशरीरोभवत्ययमिति ।

अशर्म । न । दुःखे । त्रि । पीडायुक्ते । शर्मसुखम तद्विरुद्धम् । नञ्तत्पुरु षसमासः ।

अशाखा । स्त्री । शूलीतृणे ।

अशान्तः । त्रि । इन्द्रियलौल्यादनुपरते । आत्मसाक्षात्कारशून्ये । नशान्तः ।

अशाश्वत. । त्रि । अस्थिरे । दृष्टनष्टप्रा ये । नशाश्वतः ।

अशास्त्रम् । न । वेदादिविरुद्धे । नशा स्त्रमस्मिन् ।

अशास्त्रविहितम् । त्रि । वेदेनग्रन्थचा दिनावा अविहिते । बुद्धाद्यागमबो धिते । शास्त्रेणविहितम । नशास्त्र विहितम् ।

अशिक्षितः । त्रि । अनिपुणे । शिक्षा रहिते ।

अशितम् । त्रि । भुक्ते । तृप्ते । अश्यते स्म । अशभोजने । क्तः ।

अशित्रम् । त्रि । चौरे । पुं । चरौ । अश्नितेन । अशभोजने । अशित्रादि भ्यइत्रोत्राविति इत्रप्रत्ययः ।

अशिरः । पुं । वीतिहोत्रे । राक्षसे ॥ भास्करे । वायौ । न । हीरके ।

अशिरा । स्त्री । अशिरराक्षसनार्य्याम् ।

अशिश्विका । स्त्री । पुत्ररहितायाम् । नशिशुर्यस्याः । सख्यशिश्वीतिसाधु. । स्वार्थेकन् ।

अशिश्वी । स्त्री । अशिश्विकायाम् । नास्ति शिशुरस्त्री स्त्यर्थे सख्यशिश्वीति भाषायामिति निपातनात् ङीष् ।

अशीतिः । स्त्री । सङ्ख्याविशेषे ८० । सङ्ख्येये । अष्टदशतः परिमाणमस्य । पङ्क्तिविंशति त्रिंशच्चत्वा रिंशत्पञ्चा शत्षष्टिसप्तत्यशीतीत्यादिनानिपा तनात्प्रकृतेरशीभावस्तिप्रत्ययश्च ।

अशीर्षिक. । त्रि । अशीर्षवति ॥ व्रीह्या दिषुशीर्षाभावइतिपाठाट्ठक् ।

अशील, । त्रि । दुःशीले ।

अशुचिः । पुं । विण्मूत्रश्लेष्मादौ । त्रि । शास्त्रोक्तशौचहीने । यथा । व्रताना मुपवासानाञ्श्राद्धादीनाञ्चसङ्क्रमे । करोतियः क्षौरकर्मसोऽशुचि'सर्वक र्मस्विति ॥ नशुचिः ॥

अशुद्धः । त्रि । अज्ञानतत्त्वार्थमलयुक्ते । अपवित्रे । अकृतशोधने । नशुद्धः ।

अशुभम् । न । पापे । अनिष्टफले । यथा । स्वेन्द्रियाणाञ्चसामर्थ्यंस्वकर्मा णिकृतानिच । मुहुर्मुहुश्चविभ्रंश द्विरमे दशुभान्मनइति । अमङ्गले । त्रि । तद्युक्ते । नशुभम् ।

अशून्यशयनव्रतम् । न । श्रावणकृष्णद्वि तीयायांकर्त्तव्येमत्स्यपुराणोक्तेव्रतवि शेषे ।

अशृतम् । त्रि । अपक्वे । नशृतम् ।

अशेष. । त्रि । निश्शेषे । सम्पूर्णे । शेषोऽस्य ॥

अशोकः । पुं । कङ्केल्लिपादपे । यथा । अशोकश्चरणाघाताज्जायते पुष्पव त्तरइति । अस्यगुणाःयथा । अशोकः शीतलस्तिक्तो ग्राहीवर्ण्यः कषायकः । दोषापचीतृषादाहकृमिशोषवि षास्रजिदिति । नशोकोऽस्मात् । वकुलद्रुमे ॥ न । पारदे । पुष्पे । अशोकस्य पुष्पम् । पुष्पमूलेषु बहुल मित्यणो विकारावयवार्थस्यलुक् । त्रि । सन्तापवर्जिते । निश्शोके ।

अशोकरोहिणी । स्त्री । कटुक्याम् । कटुरोहिण्याम् । अशोकइवरोहति । क

संश्रुपमाने इतिश्विनिः ॥

अशोकषष्ठी । स्त्री । चैत्रशुक्लषष्ठ्याम् ।

अशोका । स्त्री । कटुरोहिण्याम् ॥ बुद्धस्यशासनदेवीविशेषे। नशोकोऽस्याः॥

अशोकारिः । पुं । कदम्बद्रौ ।

अशोकाष्टमी । स्त्री । चैत्रशुक्लाष्टम्याम् ॥

अशोचः । पुं । अनहङ्कृतौ ।

अशोच्य । त्रि । शोचितुमयोग्ये । निरपराधे ॥

अशौचम् । न । आशौचे । वैदिककर्मानर्हत्वप्रयोजके संस्कारविशेषे । विहितकर्मविरोध्यदृष्टविशेषे। शुचित्वाभावे। यथा। क्रियाहीनस्यमूर्खस्य महारोगिणएवच । यथेष्टाचरणस्या मरणान्तमशौचकमिति । क्रियाहीनस्यनित्यनैमित्तिकक्रियाननुष्ठायिनः। मूर्खस्य गायत्रीरहितस्यसार्थगायत्री रहितस्येतिगदाधरः। महारोगिणः उन्मादादिपापरोगाष्टकान्यतमरोगवतः। यथेष्टाचरणस्यपतनेच्छयाचासक्तस्येत्यर्थः । नशौचम् ।

अश्मकदली । स्त्री । काष्ठकदल्याम् ।

अश्मकीटः। पुं । नारकीटे ।

अश्मकुट्ट. । न । तपोविशेषाल्लब्धसंज्ञेतापसान्तरे । भक्षणार्थं प्रियङ्ग्वादीनश्मन्येवकुट्टयति। कुट्ट० अच्॥

अश्मकेतुः। पुं । क्षुद्रपाषाणभेदाख्ये ।

अश्मगर्भः । पुं। हरिन्मणौ । मरकते ॥ अश्मनोगर्भ. ।

अश्मगर्भजम् । पुं । पन्नाइतिप्रसिद्धे मरकतमणौ ।

अश्मघ्नः । पु । पाषाणभेदनक्षुपे । दाथाजोडीति भाषा ॥

अश्मजम् । त्रि । शिलाजाते ॥ न । शिलाजतुनि । अश्मनोजातम् । जनीप्रादुर्भावे । पञ्चम्यामजाताविति डः । लोहे ।

अश्मजतुकम् । न । शिलाजतुनि ॥

अश्मजातिः । स्त्री । मरकतादिरत्ने । अश्मनोजातिः ।

अश्मदारणः । पुं । टाँकी इति प्रसिद्धे । टङ्के । दारयति । दृ० ण्यन्ताल्ल्युः । अश्मनोदारणः । दार्यते ऽनेनवा । ण्यन्ताल्ल्युट् ।

अश्मा । पुं । पाषाणे । अश्नुते । अशू व्याप्तौसङ्घातेच । अन्येभ्योऽपीतिमनिन् ॥ अश्विशकिभ्याञ्छन्दसीतिमनिन्वा । भाषायामपीष्यते छन्दसीतितुशकिनैवान्वेतिव्याख्यानात् ।

अश्मन्तम् । न । अशुभे । चुल्ल्याम् । मरणे । अनवधौ । क्षेत्रे । अश्मनोप्यन्तो ऽत्र । शकन्ध्वादिः ।

अश्मन्तकः। पुं । न । उद्दाने । चुल्ल्याम् । मल्लिकाच्छदने । दीपाधारा च्छादने ।

। पुं । तृणविशेषे । अस्फोटके ॥ वृक्षान्तरे । आवुडेति प्रसिद्धे । इन्दुकेकुराख्याम् । अल्पपत्रे । कोविदारस्य वृक्षे ।

अश्मपुष्पम् । न । शैलेये । कालानुसार्ये । शिलाजतुनि । अश्मनःपुष्पमिव ॥

अश्मभाण्डम् । न । लौहभाण्डे । हमामदस्तेतिख्याते ॥

अश्मभित् । पुं । अश्मभेदे । पाषाणभेदे । त्रि । पाषाणभेदके । अश्मानं भिनत्ति । भिदिर० क्विप् तुक् ॥

अश्मभेदः । पुं । पाषाणभेदे । गुणास्तु अश्मभेदोहिमस्तिक्तः कषायोवस्तिशोधनः । भेदनोहन्तिदोषार्शोगुल्मकृच्छ्राश्महृद्रुजः । योनिरोगान् प्रमेहांश्चप्लीहशूलव्रणानिचेति ॥

अश्मरः । पुं । पाषाणजाते । प्रस्तरसम्बन्धिनि ॥

अश्मरी । स्त्री । मूत्रकृच्छ्रे ॥ अश्मानंराति । रादाने । आतोनुपेतिकः । गौरादिः ॥

अश्मरीघ्नः । पुं । वरुणद्रौ ॥ अश्मरीं हन्ति । हन० । हन्तेरऽमनुष्यकर्तृके चेतिटक् ॥

अश्मरीहरः । पुं । तैलधान्ये ॥

अश्मसारः । पुं न । लौहे ॥ अश्मनः सारः ॥

अश्मीरः । पुं । न । अश्मरीरोगे ॥

अश्मोत्थम् । न । शिलाजतुनि ॥

अश्यमानः । त्रि । भुज्यमाने ॥

अश्रम । न । नेत्राम्बुनि ॥ अश्नुते कण्ठम् अशूव्याप्तौ । अन्यत्रापीतिरक् ॥

अश्रद्दधानः । त्रि । अश्रद्धीने ॥ पापकारिणि । असुरसम्पदमारूढे । गुरुवेदान्तवाक्यार्थे इदमेवंनभवत्येवेतिविपर्ययरूपानास्तिक्यबुद्धि रश्रद्धा तद्वति ॥

अश्रान्तम् । न । सन्तते । त्रि । अश्रमे ॥ श्रमुतपसिखेदेच । भावेक्तः । अनुनासिकस्येतिदीर्घः । अविद्यमानंश्रान्तम् यत्र । क्रियाविशेषणत्वेक्लीवत्वम् द्रव्यविशेषणे तुत्रिलिङ्गम् ॥

अश्रिः । स्त्री । कोट्याम् । खड्गाद्यग्रभागे ॥ गृहादेःकोणे ॥ अश्नातिअश्नुतेवा । अशभोजने अशूव्याप्तौवा । वङ्क्र्यादिः ॥ आश्रीयतेप्रहारार्थम् । आङि श्रिहनिभ्यांह्रस्वश्चेतीण् सचडित् । डित्वाट्टिलोपश्चाङोह्रस्वश्च ॥

अश्रु । न । नेत्रजले ॥ अश्नुते कण्ठम् । अशूव्याप्तौ । अश्रादयश्चेति रुन्प्रत्ययान्तंसाधु । नञ्पूर्वात्श्रूयतउं वा । नश्रूयते इतिविग्रहः ॥

अश्रुत । त्रि । मूर्खे । अकृतश्रवणे । अनाकर्णिते ॥

अश्लीकम् । न । अश्रीके । श्रीघ्ने । रेफस्य लकारः ॥

अश्लीलम् । न । ग्राम्यवाचि । भण्डादिवचने ॥ श्रियं राति । आतोनुपेति कः । तद्भिन्नम् । कपिलकादीनामुपसङ्ख्यानमिति लत्वम् । श्रीशोभा तस्या सिध्मादित्वाल्लच् । अश्लीलं तदमङ्गल्यजुगुप्साव्रीडधीकरम् ॥

अश्लेषा । स्त्री । नवमनक्षत्रे । तत्रजातस्य फलं यथा । वृथाटनः स्यादतिदुष्टचेताः कष्टप्रदश्चापि हि याजनानाम् । सर्वे सदर्पो हि शठार्पितार्थः कन्दर्पसन्तप्तमना मनुष्य इति । त्रि । श्लेषशून्ये ॥

अश्लेषाभवः । पुं । केतुग्रहे । अश्लेषायाः पर्यायस्य ॥

अश्लेषाभूः । पुं । केतुग्रहे ॥

अश्वः । पुं । तुरगे । अस्य मांसगुणा यथा । अश्वमांसं तु लवणं वह्निकृत्कफपित्तलम् । वातहृद्बृंहणं बल्यं चक्षुष्यं मधुरं लघु ॥ इति । उगणैर्मध्यगुरुः ऽ । संज्ञायाम् । पुं । नराश्वैः पुंजातिभेदे । यथा । कार्शतुन्दवपुर्धूर्तो मिथ्याचारश्च निर्भयः । द्वादशाङ्गुलमेढ्रश्च दरिद्रस्तु हयोमतः नरस्य लक्षणम् ॥ अश्नुते । अश् व्याप्तौ संघाते च । अशूमुषिलटि तिकन् ॥

अश्ववल्लिका । स्त्री । अश्वगन्धायाम् ॥

अश्वकर्णः । पुं । सालवृक्षे । सखुआ इति ख्याते ॥ अश्वकर्ण इव पत्रमस्य । अश्वकर्णः कषायः स्याद् व्रणस्वेदकफकृमीन् । वृध्नविद्रधिबाधिर्ययोनिकर्णगदान् हरेत् ॥

अश्वकर्णक । पुं । शालवृक्षे । जरद्द्रुमे ॥

अश्वकिनी । स्त्री । अश्विनीनक्षत्रे ॥

अश्वखरज. । पुं । वेसरे । खच्चर इति भाषाप्रसिद्धे ॥

अश्वखुरः । पुं । नखीतिख्याते गन्धद्रव्ये ।

अश्वखुरा । स्त्री । अपराजितायाम् ।

अश्वगन्धा । स्त्री । वराहकर्ण्याम् । असगन्ध इति ख्यातौषधौ ॥ अश्वगन्धानिलश्लेष्मश्वित्रशोथक्षयापहा । बल्या रसायनी तिक्ता कषायोष्णातिशुक्रला ॥

अश्वगन्धिका स्त्री । । अश्वगन्धायाम् । अश्वगन्धैव । स्वार्थे कः ॥

अश्वगोयुगम् । न । अश्वयुग्मे ॥ द्वावश्वौ । द्विगोयुगच् ॥

अश्वगोष्ठम् । न । मन्दुरायाम् ॥ अश्वानां स्थानम् । गोष्ठजादयः स्थानादिषु पशुनामभ्य इति गोष्ठच् प्रत्ययः ॥

अश्वग्रीव । पुं । विष्णुद्वेष्यसुरविशेषे ॥

अश्वघ्नः । पुं । करवीरे ॥ अश्वं हन्ति । हनः अमनुष्यकर्तृके चेति टक् । गमहनेत्युपधालोपः । कुत्वम् ॥ पि

अश्वनाथ । पुं । अश्वपाले । अश्वान् नाथति । कर्मण्यण् ॥

अश्वपति । पुं । रामायणप्रसिद्धे न्वपतौ । कैकेये ॥

अश्वपालः । पुं । घोटकरक्षके ॥

अश्वपुच्छी । स्त्री । माषपर्ण्याम् ॥

अश्ववालः । पुं । काशे । अश्वस्यवाले ।

अश्वमहिषिका । स्त्री । अश्वमहिषयोः स्वाभाविकेवैरे । अश्वमहिषयोर्वैरम् । द्वन्द्वाद् वुन्वैरमैथुनिकयोः ॥

अश्वमारः । पुं । करवीरे ॥

अश्वमारकः । पुं । करवीरे ॥ अश्वानां मारकः ॥

[अश्व]मुखः । पुं । किन्नरे । अश्वस्येवमुखमस्य ॥

अ[श्व]मुखी । स्त्री । किम्पुरुषयोषिति । अश्वस्येवमुखंयस्याः ॥

अश्वमेधः । पुं । यागभेदे । क्रतुराजि ॥

अश्वमेधीयः । पुं । यथौ । अश्वमेधाय । अश्वमेधायहितः । अश्वमेधाश्वः ॥ अस्यलक्षणंयथा । गोक्षीरसवर्णश्चकुन्देन्दुहिमसन्निभम् । पीतपुच्छंश्यामकर्णं सर्वतोगतिमत्तमम् । श्यामंवापिमहीपालयच्चेश्विंतुरगंविदुरिति ॥

अश्वयुग् । पुं । आश्विने । स्त्री । अश्विनीनक्षत्रे । अश्वंयुनक्तिरूपेणानुकरोति । युजिर् योगे । सत्सूद्विषेतिक्विप् ॥

[अश्व]युज् । स्त्री । अश्वयुग्जाते । जातार्थप्रत्ययस्यलुक् । पक्षे आश्वयुजः ॥

अश्वयुजः । पुं । आश्विने । अश्वयुजायुक्तापौर्णमासीयस्मिन्नस्ति । संज्ञापूर्वकत्वाद्वृद्ध्यभावः ॥

अश्वरोधक । पुं । करवीरवृक्षे ॥

अश्वलः । पुं । वेदप्रसिद्धे ऋषिभेदे ॥

अश्वलक्षणम् । न । घोटकलक्षणे ॥

अश्वलोमा । स्त्री । सर्पविशेषे । हलाहले ॥ अश्वलालेत्यपिपाठः । इति त्रिकाण्डशेषः ॥

अश्ववक्त्रः । पुं । किन्नरे । अश्वस्येववक्त्रमस्य ॥

अश्ववारः । पुं । सादिनि । असवारइतिख्याते । अश्वंवारयति । इत्यण् । अण ॥

अश्ववारणः । पुं । गवये । गोसदृशे ॥ इतिहेमचन्द्रः ॥

अश्ववाह । पुं । सादिनि ॥

अश्ववित् । पुं । नले । दमयन्तीपतौ ॥ त्रि । अश्वविद्यान्विते ॥

अश्ववैद्यः । पुं । घोटकचिकित्सके । शालिहोत्रादि । सालोतरीतिख्याते ॥

अश्वशाला । स्त्री । मन्दुरायाम् ॥

अश्वशृगालिका । स्त्री । अश्वशृगालवैरे । अश्वशृगालयोर्वैरम् । द्वन्द्वाद्वुन्वै-

रमैथुनिकयोरितिवुन् ।

अश्वषड्गवम् । न । अश्वानांषट्के । अ
श्वानांषट्त्वम् । षट्त्वे षड्गवच् ।

अश्वसेननृपनन्दन' । पुं । सनत्कुमारे ।
इतिहेमचन्द्रः ॥

अश्वस्तन. । पुं । हस्तिविशेषे ॥

अश्वस्तनिकः । पुं । एकदिननिर्वाहोचि
ताने । श्वोभवंश्वस्तनंभक्ततदस्यास्ती
ति मत्वर्थीयष्ठन् । नञ् समासः ।

अश्वा । स्त्री । वडवायाम् ॥ अजादिषु
पाठाट्टाप् ॥

अश्वाद्यः । पुं । देवसर्षपे ॥

अश्वाभिधानी । स्त्री । अश्वबन्धनरज्ज्वा
म् ।

अश्वारिः । पुं । महिषे ॥ अश्वस्यअरिः ।

अश्वारूढः । पुं । अश्वारोहे ।

अश्वारूढा । स्त्री । देवीविशेषे ।

अश्वारोह' । पुं । अश्ववारके । सादिनि
। त्रि । अश्ववाहके ॥ अश्वमारोहति
। स्ववीजजन्मनि प्रादुर्भावेच । क-
र्मण्यण् ॥

अश्वारोहा । स्त्री । अश्वगन्धायाम् ।

अश्वावरोहकः । पुं । अश्वगन्धायाम् ॥

अश्विजौ । पुं । द्विवचनान्त । अश्विनी-
कुमारयोः ॥

अश्विनौ । पुं । स्वर्वैद्ययोः । अश्विनीकु
मारयोः । तौचावियुक्तस्वभवौ । प्र
शस्ता. अश्वाःसन्तियययोः । इनिः । य
द्वा । अश्विन्यांजातौ सन्धिवेले श्रवणो
नक्षत्रेभ्यो बहुलमितिलुक्ति लुकत
द्धितलुकीतिङीपोलुक् । विशिष्टा
श्वयोः । यथा । कपोलयोस्तथावक्त्रे
विद्येते वाजिनोर्यदि । तावश्विनावि
तिप्रोक्तौ राज्यवृद्धिकरौपराविति ॥

अश्विनी । स्त्री । अश्वयुजि । प्रथमनक्ष
त्रे । अस्यांजातस्यफलं यथा । स्दै
वदेवाभ्युदितो विनीतः सत्यान्वितः
प्राप्तसमस्तसम्पत । योषाविभूषात्म
जभूषितोयःस्यादश्विनीजन्मनिमान
वस्येतिकोष्ठीप्रदीपः । अश्वः अश्व
प्रमस्त्यस्या' । इनिः । ङाङ्के ॥

अश्विनीकुमारौ । पुं । अश्विनीसुतः
अश्वीभूतसंज्ञानामसूर्यपत्न्याः
जपुत्रौ तौचदेवचिकित्सकौ । नित्य
द्विवचनान्तोयम् ।

आश्विनीपुत्रौ । पुं । स्वर्वैद्ययोः ।

अश्विनीसुतौ । पुं । नासत्ययोः । स्व
र्वैद्ययोः । वडवारूपिणी संज्ञाऽश्वरू
पयोगादश्विनी । अश्विन्याःसुतौ ।

अश्वीयम् । न । आश्वे । वाजिसङ्घे । त्रि ।
अश्वहिते । अश्वानांसमूहः । केशा
श्वाभ्यांयञ्छावन्यतरस्यामितिछः । अ
श्वेभ्योहितंवा । अपूपादिभ्याच्छः ।

अश्वेङ्गितम् । न । घोटकेङ्गिते ।

अश्वेरसम् । न । मुख्याश्वे ॥ अश्वाना-मुरइव । अग्राख्यायामुरसइतिटच् ॥

अश्वत्रम । त्रि । अश्वीये ॥ अश्वेभ्योहितम् । पचोयत् ॥

अषडक्षीणः । त्रि । तृतीयावेद्यमंत्रे । द्वाभ्यामेवकृतेमंत्रे ॥ अविद्यमानानि षडक्षीण्यत्र । अषडक्षाशितङ्ग्वलङ्कर्मैतिख स्वार्थे । अक्षिशब्दोपत्रोपे-न्द्रियेवर्त्तते । बहुव्रीहौसक्थ्यक्ष्णो रितिषच् ॥

अषाढः । पुं । मासभेदे ॥ पालाशदण्डे ॥ त्रि । अषाढायांजाते ॥ अविष्ठाफल्गुनीत्ययोलुक् । लुकतद्धितलुकि स्त्रियाम् फल्गुन्यषाढाभ्यामित्यन् टाप् । अषाढा ॥

अषाढकः । पु । अषाढार्थे ॥

अषाढा । स्त्री । पूर्वाषाढायाम् ॥ उत्तराषाढायाम् ॥ अषाढायामुत्पन्नायाम् ॥

अष्टकम् । न । पाणिनेःसूत्रपाठे ॥ अष्टावध्यायाः परिमाणमस्य । सङ्ख्यायाअतिशदन्तायाः कन् । त्रि । अष्टसङ्ख्यायाम् ॥ अष्टसङ्ख्यकाध्यायादिपरिमितेग्रन्थे ॥ अष्टसङ्ख्याविशिष्टे ॥ यथा गङ्गाष्टकंनामाष्टकमिति ॥

अष्टकर्णः । पुं । ब्रह्मणि ॥ अष्टौकर्णा-अस्य ॥

अष्टकर्मा । पुं । अष्टगतिकेनृपे ॥ अष्टौकर्माण्यस्य । तानिचोक्तान्युशनसा यथा । आदानेचविसर्गेचतथाप्रैषनिषेधयोः । पञ्चमेचार्थवचनेव्यवहारस्यचेक्षणे ॥ दण्डशुद्ध्योः सदायुक्तस्तेनाष्टगतिकोनृप. । अष्टकर्मादिवंयातिराजाशक्राभिपूजितइतिमनुः ॥ तत्रादानंकरादीनाम् । विसर्गोभृत्यादिभ्योधनदानम् । प्रैषोऽमात्यादीनांदृष्टादृष्टानुष्ठानेषु । निषेधोदृष्टादृष्टविरुद्धक्रियासु । अर्थवचनं कार्यसन्देहेराजाज्ञयैव तन्नियमात् । व्यवहारेक्षणं प्रजानामृणादिविप्रतिपत्तौ । दण्डःपराजितानांशास्त्रोक्तधनग्रहणम् । शुद्धिःपापेकर्मणि जाते तत्प्रायश्चित्तसम्पादनमितिकुल्लूकभट्टाः ॥ मेधातिथिस्तु । अकृतारम्भः । कृतानुष्ठानम् । अनुष्ठित विशेषणम् । कर्मफलसङ्ग्रहः । तथासामदानभेददण्डाः । एतदष्टविधंकर्मत्याह ॥ अथवावणिक्पथः । उदकसेतुबन्धनम् । दुर्गकरणम् । कृतस्यसंस्कारनिर्णयः । हस्तिबन्धनम् । खनिखननम् । सैन्यनिवेशनम् । दारुवनच्छेदनञ्चेत्यप्याह ॥

अष्टका । स्त्री । सप्तम्यादिदिनत्रये ॥ यथा । अष्टकातुसमाख्यातासप्तम्यादि

दिनचयम् । श्राद्धंतत्रमाधीयीतव्रत वर्ज्यविवर्जयेदितिब्रह्माण्डपुराणम् ॥ श्राद्धभेदे । पौषादिमासत्रयाणांकृष्णाष्टम्याम् ॥ यथा । तिस्रोष्टकाभवन्ति पूपाष्टका मांसाष्टका शाकाष्टका-चेति । तत्रापूपस्यानुरूपतया तस्यैव तृप्तिचमतयामुख्यत्वम् । मांसशाकयोस्तूपकरणत्वेनान्वयो यथासङ्ख्यमष्टकाद्दये मुख्यद्रव्यमोदनादिकमेव । अश्नन्तिपितरोऽस्याम् । अश भोजने । इष्यशिभ्यांतकन् । अष्टका पितृदेवत्ये ॥

अष्टकाङ्गम् । न । नयपीठ्याम् । पाशारफलक इतिगौडभाषा प्रसिद्धे । इतित्रिकाण्डशेषः ॥

अष्टौ । त्रि । सङ्ख्याविशेषे ८ । सङ्ख्येये । अश्नुते । अशूव्याप्तौ सङ्घाते च । सप्यशूभ्यांतुट्चेतिकनिन् ॥

अष्टपात् । पुं । शरभे । लूतायाम् ॥

अष्टपाद् । पुं । किम्नतौ । ऊर्णनाभविशेषे । शरभे ॥

अष्टपादिका । स्त्री । छापरमाली इति गौडभाषाप्रसिद्धे लताविशेषे ॥

अष्टम । त्रि । अष्टानाम् पूरणे । तस्यपूरणेडट् । नान्तादसङ्ख्यादेर्मट् । पञ्चमङ्गस्यभागे । मानपञ्चङ्गयोः कन्लुकौचेतिभस्य अन्नोवालुक् ॥

अष्टमङ्गल । पुं । श्वेतोर. खुरपुच्छास्यपृष्ठकेशतुरङ्गमे । न । द्रव्यान्तरे ॥ तथा । मृगराजोवृषोनाग कलशो व्यञ्जनंतथा । वैजयन्तीतथाभेरी दीप इत्यष्टमङ्गलमिति ॥ अन्यच्च । लोकेस्मिन्मङ्गलान्यष्टौ ब्राह्मणोगौर्हुताशन' । हिरण्यंसर्पिरादित्यआपोराजातथाष्टम इतिस्मृति. ॥ अष्टौमङ्गलानियस्य ॥ अष्टानांमङ्गलानांसमाहार ॥ अष्टौषधयुक्तपक्वघृते ॥ यथा शुभावमिश्र । वचाकुष्ठंतथाब्राह्मीसिद्धार्थकमथापिच । सारिवासैन्धवञ्चैवपिप्पलीघृतमष्टमम् ॥ सिद्धं ..... मिदंमेध्यपिवेत् प्रातर्दिनेदिने । स्मृति. कुमाराणांपिवतामष्टमङ्गमिति ॥

अष्टमानम् । न । कुडवपरिमाणे । शराबार्द्धे ॥

अष्टमिका । स्त्री । शुक्तिपरिमाणे स्नोलके । इतिवैद्यकपरिभाषा ॥

अष्टमी । स्त्री । चीरकाकोल्याम् ॥ तिथिविशेषे ॥ अष्टानांपूरणी । ङीप् ॥ अत्रजातस्यफलन्तु । भूपालत: प्रासधन. कृशाङ्ग' सुखीकृपालुर्युवतिप्रियश्च । चतुष्पदाश्चोघनधान्ययुक्त' स्यादष्टमीजोमनुजः सुधीर इति ॥

अष्टमूर्त्तिः । पुं । शिवे । अष्टौमूर्त्त

योयस्य । यथा । पृथिवीसलिलंतेजो वायुराकाशमेवच । सूर्याचन्द्रमसैा याजिगष्टौयष्टूरमूर्त्तयइतियादवः ॥ चितिमूर्त्ति. सर्वः १। जलमूर्त्तिर्भव २। अग्निमूर्त्तीरुद्र. ३। वायुमूर्त्तिरु ग्रः ४। आकाशमूर्त्तिर्भीम. ५। य जमानमूर्त्तिः पशुपतिः ६। चन्द्रमूर्त्तिर्महादेवः ७। सूर्यमूर्त्तिरीशा नः ८ । एता.शरभमूर्त्तिशिवस्याष्टु यादा ।

अष्टुन । पुं । मेघनादे ।

अष्टलोहकम । न । अष्टुसङ्ख्यकधातु शेषे । यथा । सुवर्णम् । रजतम् । ताम्रम् । वङ्गः । सीसम् । कान्तले हम । मुण्डलोहम् । तीक्ष्णलोहमि ति ॥

अष्टुवर्ग । पुं । आदिकादिवर्गेषु ॥ जीवकादैा । यथा । जीवकर्षभकैामेदे काकोल्याद्दिवृद्धिके । अष्टुवर्गाऽष्टुभि र्द्रव्यै. कथितश्चरकादिभिः । अष्टुवर्गो हिमः स्वादुर्वृंहणः शुक्रलोगुरु. । भ ग्नसन्धानकृतस्तन्यवलासवलवर्द्धनः । वातपित्तास्रतृट्दाहज्वरमेहक्षयप्र णुत । राज्ञामप्यष्टुवर्गस्तु यतोयमति दुर्लभ. । तस्मादस्यप्रतिनिधिंग्टह्णीया त्तद्गुणंभिषक् । मेदाजीवककाको- ली ऋद्धिद्वन्द्वेपिचासति । वरीविदा-यश्वगन्धावाराहीश्चक्रमात्क्षिपेत । मेदामहामेदास्थाने शतावरीमूल- म् । जीवकर्षभयो. स्थानेविदारीमूलम् । काकोलीक्षीरकाकोल्योः स्थाने अश्वगन्धामूलम् । ऋद्धिवृद्ध्योः स्थानेवाराहीकन्दंक्षिपेत ॥ नीतिवेदि नांवर्गान्तरे । कृषिर्वणिकपथोदुर्ग- सेतुकुञ्जरवन्धनम् । खन्याकरवला- दानंसैन्यानांचनिवेशनम् । अष्टुवर्ग मिमंसाधु सम्यद्दृष्टोपिवर्द्धयेदिति ॥ अष्टानावर्ग ।

अष्टश्रवा. । पुं । ब्रह्मणि । द्रुहिणे ॥

अष्टाकपाल । पुं । हविर्भेदे ॥ यत्राष्ट सुकपालेषु पुरोडाश. यज्ञाहूयते- तस्मिन्यज्ञे ॥ अष्टसुकपालेषुसंस्कृ तः । संस्कृतंभक्ष्यादृत्यणोद्विगोर्लुग- नपत्यइतिलुक् । अष्टन कपालेह विषीत्यात्वम् ॥

अष्टाङ्गः । पुं । योगभेदे ॥ अष्टअङ्गान्य स्य । तानियथा । यमंनियममासन प्राणायामैाततःपरम् । प्रत्याहारं धारणांचध्यानंसार्द्धंसमाधिना । अ ष्टाङ्गान्याहुरेतानियोगिनांयोगसा धने इति । पाशके ॥ प्रणतिविशेषे । यथा । जानुभ्यान्तथा पद्भ्यांपाणि भ्यामुरसाधिया । शिरसावचसादृष्ट्याप्रणामोऽष्टाङ्गईरित इति ॥

अष्टाङ्गार्घ्यः । पु । अष्टद्रव्यघटितपूजोपकरणविशेषे । यथा । आपःक्षीरंकुशाग्राणिदधिसर्पिः सतण्डुलाः । यवाःसिद्धार्थकाश्चैवअष्टाङ्गार्घ्यः प्रकीर्त्तितइतितन्त्रशास्त्रम् । अपिच । आपःक्षीरं कुशाग्राणि घृतंमधु तथादधि । रक्तानिकरवीराणितथारक्तंचचन्दनम् । अष्टाङ्गएष अर्घ्योवैभानवेपरिकीर्त्तित ॥ इतिकाशीखण्डम् ॥

अष्टादश' । त्रि । अष्टादशानां पूरणे । डट् ।

अष्टादश । त्रि । साष्टदशसङ्ख्यायाम् । साष्टदशसङ्ख्येये । अष्टौचदशच अष्टाधिकादशेतिवा । द्व्यष्टनःसङ्ख्यायामित्यात्वम् । अथाष्टादशवाचकाः शब्दाः ॥ द्वीप' । विद्या । पुराणम् । स्मृति । धान्यमिति ।

अष्टादशाङ्ग । पु । अष्टादशद्रव्यात्मके पाचने ।

अष्टापद । पु । न । कनके । शारीणां खेलनाधारपट्टे । शारीणांफलके । पु । शरभे । मर्कटे । मकडी इति भाषाप्रसिद्धे । कृमौ । कैलाशे । कीलके । पक्षौ पंक्तौ अष्टौ पदान्यस्य । अष्टौधातव पदान्यस्य । अष्टसुधातुषुपदं प्रतिष्ठाअस्येतिवा । अष्टनः संज्ञायामितिदीर्घ । यद्वा । अष्टानामष्टपदम् ।

अष्टापदी । स्त्री । चन्द्रमल्ल्याम् । लूतायाम । अष्टौपादाःअस्याः । सङ्ख्यासुपूर्वस्येति पादस्यान्तलोपे पादोन्यतरस्यामिति ङीपिपाद्'पत् ।

अष्टापाद्यम् । न । अष्टभिर्गुणिते । अष्टभिरापाद्यते गुण्यते इतितत ।

अष्टारचक्रवान् । पुं । मञ्जुघोषे । जिनविशेषे । अष्टारचक्रमस्त्यस्यमतुप् ।

अष्ठि' । स्त्री । वीजे । अस्यते भूमौक्षिप्यते । असु० । कर्मणिक्तिन । पृषोदरादि । षोडशाचरायांवृत्तौ । षोडशाङ्के ।

अष्टिदिनान्तराल: । त्रि । षोडशसाम्यन्तरे ।

अष्ठीला । स्त्री । नाभेरधोभागेण'धाणपिण्डिकावद्वातव्याधिविशेषे । यथा । आध्मापयन्वस्तिगुदंरुध्वावातश्चलोन्नताम् । कुर्यात्तीव्रार्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीमिति । वर्त्तुलेपाषाणखण्डे ।

अष्ठीवत् । न । पुं । जानुनि । ऊरुपर्वणि । अतिशयितमस्थियस्मिन् । मतुप् । आसन्दीवदष्ठीवदितिनिपातनादस्थिशब्दस्याष्ठीभावः । जानूर्वोः सन्धौ ।

अस । पुं । अन्यस्मिन् । सनभवति । न

असमासः ॥

असंवीतः । त्रि । नग्ने ।

असंस्कृतः । त्रि । गर्भाधानादिसंस्कारविधुरे ॥ अनुपनीते ॥ नसंस्कृतः ॥ सुसंस्कृतःसुतः श्रेष्ठोनापरोवेदपारगः ॥

असंस्तुतः । त्रि । अपरिचिते ॥ नसंस्तुतः ॥

असंहतः । पुं । सेनानांपृथगवृत्तिमति व्यूहे ॥ असंलग्ने ॥

असकृत् । १ । पौनःपुन्ये ॥ अनेकशः ॥ नसकृत् ॥

असक्तः । त्रि । सर्वसम्बन्धशून्ये ॥ फलाभिलाषरहिते कर्तृत्वाभिमानहीने यथाविधिकर्मकर्त्तरि ॥ नसक्तः ॥

असक्तबुद्धिः । त्रि । अहमेषां ममैतेइत्यभिष्वङ्गरहितबुद्धौ॥ असक्तावुद्धिर्यस्य॥

असक्तात्मा । त्रि । अनासक्तचित्ते । तृष्णाशून्यतयाविरक्ते ॥ असक्त.आत्मा अन्तःकरणंयस्य ॥

असक्तिः । स्त्री । सङ्गाभावे । ममेदमित्येतावन्मात्रेणप्रीतिः सक्तिस्तदभावे ॥ नसक्तिः ॥

असङ्कसुक. । त्रि । स्थिरमतौ ॥ नसङ्कसुकः ॥

असङ्कुलः । पुं । गजाद्यध्वनि। विस्तृतेपथि ॥ नसङ्कुलः ॥

असङ्क्रान्तमासः । पुं । मलमासे । मलिम्लुचे ॥

असङ्ख्यः । त्रि । युद्धवर्जिते ॥ परार्द्धातीतसंख्यायाम् ॥ सामान्यतोगणनारहिते ॥

असङ्ख्यातः । त्रि । अकृतसङ्ख्ये । अनगिने इतिभाषा ॥

असङ्ख्येयः । पुं । परमात्मनि ॥ हरौ ॥ यस्मिन्संख्यानामरूप भेदादिनविद्यते ॥ २। सङ्ख्यातुमयोग्ये ॥

असङ्गः । पुं । सङ्गविरोधिनि । पुत्रवित्तलोकैषणात्यागरूपे वैराग्ये ॥ निर्विषये चिदात्मनि॥ यथा । आत्मस्सामर्थ्यविद्यांतामसङ्गोनस्पृशत्यसौ । दृष्टान्तपौवियद्विष्णुावस्पृश्यौ वियता यथा ॥ नदृष्टाक्लिद्यते व्योमनातपेनापिशुष्यति । अविद्यया विद्यया तानात्मन्येतिशयस्तथेति ॥ त्रि । रागाभाववति ॥ आशायातु निराशत्वमभावयातुभावना । अमनस्त्वमनोयातुतवासङ्गे नजीवतः॥ नास्तिसङ्गो यस्य ॥

असङ्गतः । त्रि । अनुचिते ॥ नसङ्गतः ॥ सङ्गतिरहिते ॥ नासङ्गतंप्रयुञ्जीत ॥

असङ्गतिः । स्त्री । अर्थालङ्कारभेदे ॥ यथा । भिन्नदेशतयात्यन्तंकार्यकारणभूतयोः । युगपद्धर्मयोर्यत्रख्यातिः

साध्यादसङ्गतिः । इहयद्धेयंकार्यंत द्धेयमेवकार्यमत्यग्रमानंदष्टम् । यथा धूमादि । यत्र हेतुफलरूपयोरपि धर्मयोः केनाप्यतिशयेन नानादेशतयायुगपदवभासनंसातयोःस्वभावोत्यन्न परस्परसङ्गतित्यागादसङ्गतिः। उदाहरणम् । जस्से अ वणो तस्से अ वेअणा भण इ तं जणोअलिअम् । दन्तक्खअं कवोले वहुए वेअणासवत्तीणम । अस्यसंस्कृतं यथा । यस्यै वव्रणस्तस्यैववेदनाभणतितज्जनो ऽलीकम् । दन्तक्षतंकपोलेवध्वावेदनासपत्नीनामिति ।

असत् । पुं । इन्द्रे । इतित्रिकाण्डशेषः ॥ त्रि । निरुपाख्ये। प्रागभावप्रतियोगिनि । नि:स्वरूपे । यत्सम्बन्धितयायन्नविद्यते तत्तत्रासदित्युच्यते । निषेधमुखेन प्रतीयमाने अभावत्वाश्रये । अश्रद्धयाहुतंदत्तं तपस्तप्तं कृतंचयत् । असदित्युच्यतेपार्थ नचतत्प्रेत्यनो इह । यत्कालतो देशतो वस्तुतोवा परिच्छिन्नं तदसत् । अविद्यमाने । प्रत्यक्षागोचरत्वादसत्स्वभावमिववर्त्तमाने कारणात्मनि ॥ असज्जने । दुराचारा दुर्विचेष्टा दुष्प्रज्ञाः प्रियसाहसाः । असन्तस्त्विति विख्याताः सन्तश्चाचारलक्षणाः ॥ सदत्यंताभावोऽसदितिबौद्धाः ।

असती । स्त्री । व्यभिचारिण्याम । कुलटायाम् । सत्याभिन्ना ।

असतीसुतः । पुं । स्त्री । कौलटेरे । असत्याःसुतः ।

असत्कृतः । त्रि । परिभूते । प्रियभाषणपादप्रक्षालनपूजादिसत्कारशून्ये । नसत्कृतः ।

असत्पथः । पुं । मन्दमार्गे । कुपथे । न सत्पथः ।

असत्यम् । त्रि । मिथ्यायाम् । सत्यंनास्तियत्रतस्मिन् ॥

असदध्येता । त्रि । कुपाठिनि । अजअसदध्ययनशालिनि ॥ नसदध्ये

असद्ग्रहः । पुं । दुष्टग्रहे । नसद्ग्रहः । खट्टौ । बालकोकाङ्क्ष इतिभाष ।

असद्योनिः । स्त्री । पश्वादियोनौ । तस्यांस्थितामसमनिष्टंफलंभुज्यते । नसद्योनि । ।

असद्रूपः । त्रि । देशादिप्रपञ्चे । असद्धाध्यमन्यतंरूपं स्वरूपंयस्य ।

असनम् । न । क्षेपणे । पुं । जीवकद्रुमे । प्रियसालके । विजयसाराख्ये । अजकर्णे । महासर्ज्जद्रुमे । अस्यते । अ सुक्षेपणे । ल्युः ।

असनपर्णी । स्त्री । वातकघ्ने । शीतलवातके ।

असम्बद्ध । त्रि । समुद्भूते । पण्डितम्मन्ये । दृप्ते । इतिजटाधरः । अकृतसम्बन्धे ॥ नसम्बद्धः ॥

असपत्न । त्रि । शत्रुवर्जिते ॥ नविद्यते ऽस्पत्नोयस्य ॥

असभ्यः । त्रि । सभायामनर्हे स्त्रीवर्णनादौ । सभायामनुपयुक्ते ॥ खले ॥

असमः । पुं । बुद्धे ॥ त्रि । विषमे । अतुल्ये । नविद्यते समोयस्य ॥

असमञ्जसम् । त्रि । अयुक्ते ॥ नसमञ्जसम् ॥ पुं । केशिन्यामुत्पन्नेसगरात्मजे ॥

असमर्थ । त्रि । सापेक्षे । अशक्ते । दुर्बले ॥ नसमर्थः ।

असमवायिकारणम् । न । कार्यकारणभावसहिकश्चिन्नर्थेसमवेतत्वेसति कारणे ॥ यथातन्तुसंयोगःपटस्य तन्तुरूपंपटरूपस्य । यथावा । परमाणुद्वयसंयोगोद्व्यणुकस्य कपालरूपंच घटरूपस्य । असमवायिकारणन्तु सर्वत्रद्रव्येगुणः गुणेगुणः कर्मच ॥ असमवायिच तत्कारणञ्च ॥

असमानयानकर्मा । पुं । सन्धेः प्रभेदे । यत्र त्वमन्नयाहि अहमन्नयास्यामीति साम्प्रतिकोत्तरकालीनफलार्थितयै वक्रियते सोऽसमानयानकर्मासन्धिर्बोध्यः ॥

असमाहितः । त्रि । अनेकाग्रमनसि । विक्षिप्तचित्ते ॥ नसमाहितः ॥

असमीक्ष्यकारी । त्रि । जाल्मे । अविचार्यकर्त्तरि ॥ असमीक्ष्याविचार्यकर्तुंशीलमस्य । सुपीतिणिनिः ॥

असमेषुः । पुं । अनङ्गे ॥ असमाः इषवोयस्य ॥

असम्पृक्त । त्रि । असम्बद्धे ॥ नसंपृक्तः ॥

असम्प्रज्ञातसमाधिः । पु । निर्विकल्पकसमाधौ ॥ निवृत्तचेतोव्यापारे यत्र परमानन्दसाक्षात्कारः सौषुप्तानन्दसाक्षात्कारवत् सोऽसम्प्रज्ञातसमाधिः ॥

असम्बद्धम् । त्रि । अबद्धे । अनर्थकवाक्ये ॥ नसम्बद्धम् ॥

असम्बद्धप्रलापः । पुं । सत्यस्यापिराजदेशपौरवार्त्तादेर्निष्प्रयोजनवर्णने ॥ त्रि । तद्वति ॥

असम्बाध । त्रि । अन्योन्यपीडारहिते ॥

असम्भूतिः । स्त्री । प्रकृतौ । चित्तस्वार्थंमायायां परमेश्वरस्योपाधौ । सम्भवनंसम्भूतिःकार्यम् । तस्याःअन्या ॥

असम्भेदः । पु । अविदारणे । अविनाशे ॥ सम्भेदनम् । भिदिर्विदारणे । घञ् । नसम्भेदः ।

असम्मतम् । त्रि । अप्रमाण्ये । अनभिप्रेते ॥ नसम्मतम ॥

असम्मूढः । त्रि । स्थितप्रज्ञे । सम्मोहवर्जिते । भ्रान्तिरहिते ॥ नसम्मूढः ॥

असम्मोहः । पु । प्रत्युत्पन्नेषुवोद्धव्येषु कर्त्तव्येषुवा अव्याकुलतयाविवेकेन प्रवृत्तौ ॥ नसम्मोहः ॥ त्रि । तद्वति ॥

असम्यग्व्ययः । पुं । आयतुरीयांशादधिकव्यये ॥ व्यसनविषयव्यये ॥

असवः । पुं । कुकरौंधा इतिविश्रुते क्षुपे ॥

असलम । न । लौहे ॥ अस्त्रमन्त्रविशेषे ॥

असहनः । पुं । स्त्री । शत्रौ ॥ अमर्षणे ॥

असाधारणम् । त्रि । तन्मात्रसम्बन्धिनि ॥ साधारणाद्भिन्ने । विशेषे ॥ न्यायमते साध्यव्यापकीभूताभावप्रतियोगिनिहेतौ ॥ यथा । वह्निमान् जलत्वादित्यादि ॥

असाधारणत्वम् । न । तदितरावृत्तित्वेसतिसकलतद्वृत्तित्वे ॥

असाधारणानैकान्तिकः । पुं । हेत्वाभासविशेषे । सर्वसपक्षव्यावृत्ते ॥ यथा शब्दोनित्यःशब्दत्वादिति । शब्दत्वं सर्वेभ्योनित्येभ्योव्यावृत्तं शब्दमात्रवृत्ति ॥

असाधुः । त्रि । खले ॥ सज्जनाद्भिन्ने ॥ दुर्नये परदे ॥ यथा दिव्यचक्षुः । स्वगुणोच्चगिरो मुनिव्रताः परवर्णग्रहणेष्वसाधवः ॥

असाध्यः । त्रि । याप्ये । अप्रतिक्रिये । असाधनीये ॥ बुद्धिमदसाध्यंनकिञ्चिदितिवात्स्यायनः ॥ नसाध्यः ॥

असान्द्रम् । त्रि । विरले ॥ नसान्द्रम् ॥

असाम्प्रतम् । ा । अयुक्ते ॥ यथा । ?त्तिसर्वमर्यादानान्वयाद्यप्यपेक्षते । अस्यदग्धोदरस्यार्थे कोमकुर्यादसाम्प्रतमिति ॥ नसाम्प्रतम् ॥

असारः । पुं । एरण्डवृक्षे ॥ न । अगुरुणि ॥ त्रि । फल्गौ । निस्सारे ॥ नसारोऽत्र ॥

असि । ा । त्वमित्यर्थे ॥ यथा वेत्थ - ॥ वाक्यालङ्कारे ॥

असिः । पुं । निस्त्रिंशे । खड्गे ॥ स्त्री । नदीभेदे ॥ अस्यते असुक्षेपणे । असतिवा असदीप्तौ । सर्वधातुभ्यइन् ॥ खनिकष्यज्यसिवसीत्यादिनाङ्गी ॥

असिकम् । न । अधरचिबुकयोर्मध्यभागे ॥ इतिहेमचन्द्रः ॥

असिकारः । पुं । खड्गकारिणि ॥ असिंकरोति । कृञ् । कर्मण्यण् ॥

असिक्निका । स्त्री । असिक्न्याम् । इस्याम् ॥ यथा । गतागणस्तूर्णमसिक्निकानामिति ॥

असिक्नी । स्त्री । अन्तःपुरचारिण्यां प्रेष्यायाम् ॥ नदीभेदे ॥ सिनोति

। षिञ्बन्धने। अञ्जिघृषिभ्यःक्तः। यद्वा। सोयतेस्म। क्तः। सिता शुक्लके शातङ्गिन्या। छन्दसिक्नमेकइतितस्य क्न। नान्तत्वान्ङीप्। वीरिण्याम्।

असिगण्डः। पुं। क्षुद्रोपधाने॥ छोटा सिरहाना इति भाषा।

असितः। पुं। श्यामवर्णे। व्यासशिष्ये ऋषिविशेषे। शनौ॥ कृष्णपक्षे। न। कासीसे। त्रि ० कृष्णवर्णवति। श्यामले॥ सितविरुद्धोऽसितः।

असिदन्तकः। पुं। मधुनालिकेरे॥

असिता। स्त्री। खङ्गतायाम्। नील्याम्। असितपलितयोः प्रतिषेधात् वादनुदात्तादितिङीष् तकारस्यनकारादेशश्चन।

असिताश्मशेखर। पुं। बुद्धभेदे।

असितार्चिः। पुं। अनले। असिताअर्चिर्ज्वालाअस्य।

असितालुः। पुं। नीलालौ।

असितोत्पलम्। न। नीलोत्पले।

असिदंष्ट्रः। पुं। मकराख्ययादसि।

असिद्धः। पुं। हेत्वाभासविशेषे। सच त्रिविधः। आश्रयासिद्धः स्वरूपासिद्धः व्याप्यत्वासिद्धश्चेति। त्रि। अपक्के। असिद्धे। सिद्धिरहिते।

असिद्धि। स्त्री। अनिष्पत्तौ। न्यायमतेसात्रिविधा। पक्षासिद्धिः १ यथा काञ्चनमयपर्वतो वह्निमानित्यादि। स्वरूपासिद्धि. २ यथापर्वत काञ्चनमयवह्निमानित्यादि। व्याप्यत्वासिद्धि ३ यथा पर्वतोवह्निमान् ज्वलत्वात् इत्यादि।

असिधाराव्रतम्। न। असिधाराचङ्क्रमणतुल्ये व्रतविशेषे। यथा। युवायुवत्यासार्द्धं यन्मुग्धाभर्तृवदाचरेत। अन्तर्निवृत्तसङ्गःस्यादसिधाराव्रतंहि तदितियादय।

असिधाव। पुं। शस्त्राणांमार्जके। असिंधावति। धावु०। कर्मण्यण्।

असिधावकः। पुं। शस्त्रमार्जके। असिंधावति। धावुगतिशुद्ध्योः। कर्मण्यण्। स्वार्थेकन्। कुन्वा।

असिधेनु। स्त्री। छुरिकायाम्। असेर्धेनुरिव। स्वल्पखड्गे।

असिधेनुका। स्त्री। छुरिकायाम्। असेर्धेनुकेव।

असिपत्र। पुं। इक्षौ। नरकान्तरे॥ खड्गकोषे। गुण्डनामकतृणे। यस्यकन्दः कशेरुः। खड्गाकारदलेवृक्षविशेषे। आसन्नघातुके।

असिपत्रकः। पुं। इक्षौ।

असिपत्रवनम्। न। नरकविशेषे। यथा। यस्त्विहवै निजवेदपथादनापद्यपगतः पाखण्डञ्चोपगतस्तमसिप-

त्रवनं प्रवेश्य कशयाप्रहरन्ति तत्रासा वितस्ततोधावमान उभयतोधारैस्ता लवनासिपत्रैश्छि द्यमानसर्वाङ्गोहाह तोस्मीति परमयावेदनया मूर्च्छि त' पदेपदेनिपततिस्वधर्मत्यागीपा खण्डानुगतंफलंभुङ्क्ते। इति॥

असिपत्रव्रतम्। न। अश्वमेधेक्रियमा णे व्रतविशेषे॥

असिपुच्छः। पुं। शिशुमारे॥

असिपुत्रिका। स्त्री। छुरिकायाम्॥ असेः पुत्रीव। स्वार्थेकन॥

असिपुत्री। स्त्री। छुरिकायाम्। असेः पुत्रीव॥

असिमेदः। पुं। विट्खदिरे॥

असिहेतिः। त्रि। खड्गयोद्धरि। नैस्त्रिं शिके॥ असिर्हेतिर्यस्य॥

असु। न। चित्ते। तापे॥ असवः पुं भूम्नि प्राणादिपञ्चवायुषु। असन्ते अस्यन्तिवा। असुक्षेपणे। अस्यन्तेभि रितिवा। असदीप्तौ। भूम्नि ईत्यादिनाउ'। भूम्निप्रायुः प्राणा दिपञ्चवाच्यआध्यात्मिकएकएव। प्रा णापानावास्तुपञ्चतयस्त्वयः। एवं चैकस्मिन्नपितत्र भेदविवक्षयाद्वाद शत्यादिवदकुम्बवनसेवप्रयोगत्वम्। प्रा णेनामवायुरित्यादौतुवृत्त्यर्थ. प्राणा शब्द इतिनैकमकर्नविरुध्यते॥

असुखम्। न। दुःखे॥

असुतरः। त्रि। दुस्तरे। सुतरोनभव तीत्यसुतरः॥

असुधारणम्। न। जीवने॥ असूनां धारणम्॥

असुरः। पु। दैतेये। विरोचनादौ। सुरत्यजि॥ राहुग्रहे॥ सूर्ये॥ अ स्यतिक्षिपतिदेवान् असुर.। असेरु रन्नित्युरन्॥ वा। नसुरः असुरः। नञीतितत्पुरुषः॥ अविद्यमानासु रायस्येतिवा॥ असुषुरमतेवा। अ न्येभ्योमोतिडः। सुरेभ्योऽन्यो- ॥

असुररिपुः। पुं। विष्णौ। कृष्णे॥ सुराणांरिपुः॥

असुरा। स्त्री। रात्रौ॥ राशौ॥

असुराह्वम्। न। कांस्येइतिहेमचन्द्रः॥

असुर्यः। त्रि। असुरेभ्योहिते॥ गवा दित्वाद्यत्॥ असुराणांस्वभूतेनो

असुहः'। पुं। वायौ। असून्सुखति। भूमेरबो। स्वसू हिपेच्छाद्विवाक्विप्॥

असूयकः। त्रि। असूयाशीले॥ अ सूयति। तच्छीलादिः। असुउपता मे। निन्दहिंसेतिवुञ्॥

असूया। स्त्री। परगुणेषुदोषावि ष्कारे। अर्थदानादिगुणेषुदाम्भिक त्वादिरूपदोषारोपणे॥ असूयनम्। असूञ् असूयायाम्। कण्ड्वादि

स्वाद्यकिअप्रत्ययादित्य. ॥ रोषे॥ वधूरसृक्कपाटत्ररंदर्शति रघु'॥

असूयु । पुं । समत्सरे॥ असूयति। असूञ् उपतापे । मृगव्यादित्वात् साधु॥

असूर्चयम् । न । अनादरे ॥ सूर्चा आदरे सरेफः । तस्माल्ल्युट् । नञ्समासः॥

असूर्यम्पश्य. । त्रि । सूर्यादर्शिनि ॥ गुप्तिपरेप्रयोगोयम । यदपरिहार्यदर्शनं सूर्यमपिनपश्यतीति सत्यपिसूर्यदर्शने प्रयोगोभवति ॥ यदातुसूर्यदर्शनाभावमात्रम् सूर्यंतरस्य चन्द्रादर्शनं वाविवक्षित तदाखश्ननभव.न अनभिधानात्॥ सूर्यंनपश्यति । दृशिर्प्रेक्षणे । पाघ्राध्मेतिपश्यादेशः॥

असृक्करः । पुं । शरीरस्थरसधातौ॥

असृक्पः । पुं । स्त्री । राक्षसे॥ असृक् पिवति । प्रा०। क.॥

असृग्दर । पुं । प्रदरे । फलितयोनेरक्तादिधातुक्षरणे॥

असृग्धरा । स्त्री । त्वचि॥ असृजोरक्तस्यधरा॥

असृक् । न । रक्ते॥ ताम्बूलरसादिवन्मध्येनसृज्यते सृजत्वात् । नसृजति वा । सृजविसर्गे । क्विप् । क्विन् प्रत्ययस्येतिकुत्वम् । क्विनप्रत्ययोयस्मादिति बहुव्रीहि. । ऋत्विगित्यादिनाहिसृजेः क्विनविहितः॥ यद्वा । अस्यते । असुक्षेपणे । वाहुलकात् ऋज ॥ कुङ्कुमे॥ षोडशयोगे॥ तत्रजातस्यफल यथा । धनीकुरूप' कुमति 'दुरात्माविदेशगामीरुधिरप्रकोप'। महाप्रलोभी पुरुषोवलीयानसृक् प्रसूतौकिलयस्यजन्तोरिति॥

असृष्टान्नम् । त्रि । अन्नदानहीने॥ असृष्टमन्नंयेनसः॥

असेचनकम् । त्रि । अत्यन्तप्रियदर्शने। यस्यदर्शनान्नतृप्यति किन्तुपुन. पुनर्दिदृक्षतएवतस्मिन्॥ तदसेचनकं तृप्तेर्नास्त्यन्तो यस्यदर्शनात्।नसिच्यतेमनोऽत्र । षिचक्षरणे । करणेति ल्युट् । सञ्ज्ञायांकन॥

असौम्यस्वरः । त्रि । मन्दस्वरे । अस्वरे॥ असौम्योरूक्ष.स्वरोयस्यस॥

अस्खलितः । त्रि । अप्रतिहते॥

अस्त । पु । चरमाचले । पश्चिमाचले॥ लग्नात्सप्तमे॥ त्रि । क्षिप्ते॥ अवसिते । अवसानप्राप्ते । निम्लोचने॥ अस्यतेस्म । असुक्षेपणे । क्तः॥ यद्वा । असतिस्म । असदीप्तौ । गत्यर्थेतिक्तः॥ न । मृत्यौ । कालधर्मे॥

अस्तक. । पुं । निर्वाणे । मोक्षे॥

अस्ततन्द्रि. । त्रि । अनलसे । अस्तात न्द्रिरालस्यं यस्य ॥

अस्तम् । । । विनाशे । अदर्शने ॥ अस नम् । असुक्षेपणे । तम प्रत्ययः ॥

अस्तमनम् । न । सूर्यादर्शने । यथा । तिरोधानस्वयंचैतितदेवास्तमनंरवे । नैवास्तमनमर्कस्य नोदय' सर्वदा-सत' । इति ॥

अस्तमयः । पुं । प्रलये ॥ ग्रहाणांसूर्य प्रत्यासत्तौ । यथा । रविणास्तम योयोगोवियोगस्तूदयोभवेदिति ॥

अस्तमित' । त्रि । दरिद्रे ॥

अस्तसन्ध्या । स्त्री । अर्द्धार्कास्तमना न् घटिकात्रयसम्मितेकाले ॥

अस्ताचल. । पुं । चरमाद्रौ । पश्चिम पर्वते ॥ अस्तश्चासावचलश्च ॥

अस्ताद्रि । पुं । चरमाचले ।

अस्ति । । । विद्यमाने । सत्त्वे । यथा । अतिथिर्बालकश्चैव राजाभार्यातथै वच । अस्तिनास्तिनजानन्ति देहि देहिपुनःपुनरिति । असनम् । अ सद्दीप्तौ । क्तिचतिर्वा ॥

अस्तिमान् । त्रि । धनिनि ॥

अस्तु । । । अभ्यनुज्ञाने । अङ्गीकारे । असूयायाम् ॥ पीडायाम् । प्रतिक्षे पे ॥ प्रशंसायाम् । प्रकर्षे ॥ सत्त्वगे ॥ असम्यगर्थे ॥ असूयापूर्वकाङ्गीकारे । असति अस्यतिवा । तुन् ॥

अस्तुङ्कारः । पुं । अभ्युपगमे । अस्तुकरो ति । कर्मण्यण् । अस्तुइतितिङन्त प्रतिरूपकमव्ययम् । अस्तोश्चेतिवक्त व्यमितिमुम् ॥

अस्तेयम् । न । अदत्तादानरूपपरस्वह रणादिराहित्ये ॥

अस्थानम् । न । निन्दायाम् । भर्त्सने ॥

अस्त्रम् । न । क्षेप्यशरादौ । प्रहरणे ॥ चापे । करवाले । अस्यते । असुक्षेप णे । असतिवा । असदीप्तौ । सर्वधा तुभ्यष्ट्रन् ।

अस्त्रकण्टकः । पुं । बाणे ॥

अस्त्रगृहम् । न । आयुधागारे ॥

अस्त्रचिकित्सकः । पुं । शस्त्रवैद्ये

अस्त्रजित् । पु । कपाटवक्षे । कपोतव क्षस्थे ।

अस्त्रमार्जः । पुं । अस्त्रसंस्कारिणि । श स्त्रमार्जे । शाणाजीवे । असिधावे ।

अस्त्रसायकः । पुं । नाराचास्त्रे । समुद्र यलौहमयवाणे ।

अस्त्रागार' । पुं । अस्त्ररक्षणगृहे ।

अस्त्री । त्रि । धन्विनि । अस्त्रंधनुरस्या स्ति । अतइनि. ।

अस्थागम् । त्रि । अतलस्पृशि । अगाधे ।

अस्थाघम । त्रि । अगाधे ।

अस्थानम् । त्रि । अतलस्पर्शे । न । म

न्दस्थले । अनधिकारिणि । अस्थाने स्थाप्यमानेचवाचामितिवच्यम

अस्थायम । त्रि । अगाधे ।

अस्थायी । त्रि। नश्वरे । स्थितिरहिते ॥

अस्थारम् । न । गभीरे ।

अस्थावरम । त्रि । स्थावरेतरद्रव्ये । जङ्गमवस्तुनि ।

अस्थि । न । कीकसे । बीजे । अस्यते । असुत्क्षेपणे । असिसञ्जिभ्यांक्थिन् । अस्थीनि तरुण नलककपालरुचकव लयभेदात् पञ्चविधानिभवन्तीतिवैद्या: ॥

[अस्थि]कम् । न । अस्थिनि । स्वार्थे यावात्कन् ।

[अस्थि]कृत् । पुं । शरीरस्थमेदोधातौ ।

अस्थिज: । पुं । मज्जनि ।

अस्थितुण्ड: । पुं । स्त्री । पक्षिणि ।

अस्थिधन्वा । पुं । शम्भौ ।

अस्थिपञ्जर: । पुं । शरीरास्थिसमूहे । करङ्के ।

अस्थिभक्ष: । पुं । स्त्री । पक्षिभेदे । कुक्कुरे ।

अस्थिभुक । पुं । स्त्री । कुक्कुरे । शुनि ।

अस्थिमाली । पुं । रुद्रे । अस्थ्नांमालाऽस्ति अस्य । ब्रीह्यादित्वादिनि: ॥

अस्थिर: । त्रि । चञ्चले । सङ्कसुके । न स्थिर: ॥

अस्थ्यावग्रह. । पुं । भृङ्गरीटे । भृङ्गिनमकशिवद्वारपाले ॥

अस्थिशृङ्खला । स्त्री । ग्रन्थिमति । अस्थिसंहारे ।

अस्थिसंहार: । पुं । हस्तिशुण्डाम । ग्रन्थिमति । यथा । अस्थिसंहारक:प्रोक्तोवातश्लेष्महरोऽस्थियुक् । उष्ण:सर: कृमिघ्नश्चदुर्नामघ्नोऽक्षिरोगजित् ॥ रूक्ष. स्वादुर्लघुर्वृष्य: पाचन:पित्तल:स्मृत:। काण्डत्वकविरहितमस्थिशृङ्खलायामा षाड्ढं द्विदलमकञ्चुकत दर्डम । सम्पिष्टसुतनुततस्तिलस्य तैलेसम्पक्ववटकमतीववातहारि ।

अस्थिसंहारिका । स्त्री । ग्रन्थिमति । हाडजोडा इतिख्यातौषधौ ।

अस्थिसंहारी । पुं । अस्थिसंहारके ग्रन्थिमति ।

अस्थिसार: । पुं । मज्जायाम् ।

अस्थिस्नेहसम्बक. । मज्जनि । मज्जायाम ।

अस्नाविरम् । त्रि । शिरावर्जिते । स्थूलशरीरवर्जिते । अविद्यमाना:स्नावा: शिरा यस्मिन ।

अस्निग्धदारु । न । देवदारुप्रभेदे । देवकाष्ठे ।

अस्पर्श: । त्रि । स्पर्शाभाववति । सम्बन्धशून्ये ।

अस्पर्शयोगः । पुं । ब्रह्मस्वभावे ॥ स्पर्श नंस्पर्श सम्बन्धोनविद्यतेयस्ययोग-स्य केनचितकदाचिदपिस. ॥ यथा हुः । अस्पर्शयोगोवैनामसर्वसत्त्व-सुखोहितः । अविवादोऽविरुद्धश्चदे-शितस्तंनमाम्यहमिति ॥ अद्वैतानु भवोऽस्पर्शः । सएवयोगो जीवस्य ब्र ह्मभावेनयोजनात् । सर्व सम्बन्धाख्य स्पर्शवर्जितत्वात् अस्पर्श योगः ॥

अस्पष्टम् । त्रि । अव्यक्ते ॥ नस्पष्टम् ॥

अस्फुटम् । त्रि । अस्पष्टे ॥ नस्फुटम् ॥ सर्व शब्दोवर्णात्मकएव व्यञ्जकविशे-षाभावादस्फुट. ॥

अस्फुटवाक् । त्रि । अव्यक्तवाचि । लोह ले ॥ नस्फुटावागस्य ॥

अहम् । त्रि । अस्मच्छब्दस्यप्रथमैकव चने । देहत्रयविशिष्टत्वेनाशुद्धेजीवे । कर्त्तासुखीत्यादिष्वव्ह्रियमाणे ॥ अहंशब्दमत्त्ययालम्बने । अहंप्रत्यय वेद्ये । अहंशब्दप्रत्ययालम्बनत्वेनप्र त्यक्षे । सर्वदोपलब्धिस्वरूपे प्रत्य गात्मनि ॥ अस्ति । असभुवि । युष्म स्मिर्धामदिक् ॥

अस्मि । । । अहमित्यर्थे ॥ यथा । दा सेकृतागसिभवत्युचितः प्रभूणां पा दप्रहार इतिसुन्दरिनास्मदूये इति ॥ अस्मीत्यस्मदर्थानुवादेहमर्थेपी तिगद्याख्यानम् ॥

अस्मिता । स्त्री । दृग्दर्शनशक्त्योरे त्मतायाम् ॥ बुद्धिपुरुषयोरभेदा-भिमाने ॥ मोहे ॥ सचाष्टविधः । दे वाहिअष्टविधमैश्वर्यमासाद्या ऽमृता-भिमानिनोऽणिमादिकमात्मीयंशा श्वतमभिमन्यन्त इति । सोय मस्मि तामोहोऽष्टविधैश्वर्यविषयत्वादष्टवि धः ॥

अस्रः । पुं । कोणे ॥ कचे ॥ न । अश्रु-णि ॥ शोणिते ॥ अस्रते । असुक्षेप णे । वाहुलाकाद्रः ॥

अस्रकण्ठः । पुं । शरे ॥ अस्रःकण्ठेऽ

अस्रखदिरः । पुं । रक्तखदिरवृक्षे

अस्रजम् । न । मांसे ॥

अस्रपः । पु । राक्षसे ॥ अस्रं रक्तंपिब ति । पा०। आतोनुपेतिकः । ॥ मूलर्क्षे ॥

अस्रपत्रकः । पुं । भिण्डायाम । भिण्डी तिप्रसिद्धशाके ॥

अस्रपा । स्त्री । जलौकायाम ॥ अस्रं पिवति । पा०। कः । टाप ॥

अस्रफला । स्त्री । सल्लकीवृक्षे ॥

अस्रबिन्दुच्छदा । स्त्री । लक्ष्मणानाम कन्दे ॥

अस्रमातृका । स्त्री । शरीररसे ॥

अस्ररोधिनी । स्त्री । लज्जालुलता-

याम ॥

अस्वप्नक: । पुं । श्वेततुलस्याम् ॥

अस्वोऽपि । अस्वपति । अस्वोऽस्य । सुखादित्वादिनिः ॥

अस्रु । न । नेत्रजले ॥ अस्यति । अस्रु क्षेपणे । अश्वादिषु दन्त्यमध्यस्यापि पाठात साधु ॥

अस्वच्छन्द. । त्रि । अतन्त्रे । अधीने ॥ नस्व. छन्दोऽस्य ॥

अस्वस्थ । न । अशुभे ॥ चुल्याम् ॥ मरणे ॥ अनवधौ ॥ क्षेपे ॥ अस्थनामन्तोऽत्र ॥

...नार: । त्रि । अत्यन्तदुरन्ते ॥

...: । पुं । देवतायाम् ॥ त्रि । अनि... ॥ अविद्यमान: स्वप्नोनिद्राअस्येति विग्रह: ॥

अस्वर. । त्रि । असौम्यस्वरे । काकादिवद्रूक्षस्वरे ॥ अप्रशस्त: स्वरोयस्य ॥

अस्वर्ग्यम् । त्रि । स्वर्गहेतुधर्मविरोधिनि ॥ अस्वर्ग्यं लोकविद्विष्टंधर्ममप्याचरेन्नतु ॥ स्वर्गायहितंनभवतीति ॥

अस्वादुकण्टक: । पु । गोक्षुरके ॥ अस्वादुः कण्टकोयस्य स: ॥

अस्वाध्याय: । पुं । विधिपूर्वकवेदाध्ययनवर्जिते ॥ निराकृतौ ॥ नस्वाध्यायो वेदाध्ययनमस्य ॥

अस्वामिकम । त्रि । स्वामिरहितेवस्तुनि ॥ यथा । एतच्चाग्रदानंस्वभूमावस्वामिकायाञ्चनदद्यात । अस्वामिकान्यरण्यम: । अटव्य:पर्वता:पुण्या नद्यस्तीर्थानियानिच । सर्वाण्यस्वामिकान्याहुर्नहितेषुपरिग्रह: ॥ पुण्याइतिविशेषणात अटव्योनैमिषाद्या. । पर्वताहिमालयादय: । नद्यो गङ्गाद्या: । तीर्थानिपुरुषोत्तमादिक्षेत्राणि । वाराणस्याद्यायतनानिच । स्वाम्यभावेहेतुमाह नहितेष्विति । इतिश्राद्धतत्त्वम् ॥

अस्वैरी । पुं । परतन्त्रे ॥ नस्वैरी ॥

अह । । प्रशंसायाम् ॥ क्षेपणे ॥ नियोगे ॥ विनिग्रहे ॥ आचारातिक्रमे ॥ पूजायाम् ॥

अहंयु: । त्रि । अहङ्कारिणि ॥ अहमस्यास्ति । अहमितिमान्तमव्ययम् । अहंशुभमोर्युस् ॥

अहङ्कार. । पुं । अहमितिकरणे ॥ गर्वे ॥ अहङ्कारस्ससर्वेषां पापबीजममङ्गलम् । ब्रह्माण्डेषुचसर्वेषां गर्वपर्यन्तमुन्नति: ॥ सचद्विविध: । विशेषरूप:सामान्यरूपश्चेति । तथाय महमेतस्य पुत्रइत्येवंव्यक्तमभिमन्यमानोविशेषरूपोव्यष्ट्यहङ्कार. । अस्मीत्येतावन्मात्रमभिमन्यमान: सामान्यरूप: समष्ट्यहङ्कार: । सचहि...

रण्यगर्भो महान् आत्मेति च सर्वानु स्यूतत्वादुच्यते । अयमेव पराहन्ता रूपो बृहदारण्यके योवेदाहं ब्रह्मास्मीति वृत्तिरूप उक्तः ॥ अहमभिमानरूपो योऽहङ्कारः स सर्वसाधारणः ॥ आरोपितैर्गुणैरात्मनो महत्त्वाऽभिमाने ॥ अहमेव श्रेष्ठ इति दुरभिमाने ॥ महाकुलप्रसूतोऽहं महतांशिष्यो ऽतिविरक्तोऽस्मि नास्ति द्वितीयो मत्सम इत्यभिमाने ॥ आत्मश्लाघनाभावेऽपि मनसि प्रादुर्भूते हं सर्वोत्कृष्ट इति गर्वे ॥ महाभूतकारणभूतेऽभिमानलक्षणे ॥ अभिमानात्मिकायां मम करणहन्तौ ॥ कोनाम मानवो लोके देवो वा दानवोऽपि वा । अहङ्कारजयं कृत्वा सर्वदा सुखभाग्भवेत् ॥ अहङ्कारस्य मनस्यन्तर्भावः । तस्य सङ्कल्पात्मकत्वाविशेषात् । तथाहि मनसो बाह्य आभ्यन्तरश्च यथायोगं सर्वो विषयः । अहङ्कारस्य तु अनात्मो परक्त आत्मैवेति अतो विषयभेदेऽपि स्वरूपाभेदाद्युक्तोऽन्तर्भावः ॥ पुराणमते सात्त्विकराजसतामसभेदात् स त्रिविधः । तत्र सात्त्विकाहङ्कारात् इन्द्रियाधिष्ठातारो देवा मनश्च जातम् । राजसाद्दशेन्द्रियाणि जातानि । तामसात् सूक्ष्मपञ्चभूतानि जातानीति ॥

यथोक्तं विष्णुपुराणे । वैकारिकस्तैजसश्च भूतादिश्चैव तामसः । त्रिविधोयमहङ्कारो महत्तत्त्वादजायते-ति ॥ वैकारिकः सात्त्विकाहङ्कारः । तैजसो राजस इन्द्रियादिश्च । भूतादिस्तामसः ॥

अहङ्कारवान । त्रि । अहंयौ ॥ अहङ्कारोऽस्यास्ति । मतुप् ॥

अहङ्कारी । त्रि । अहङ्कारयुक्ते । अभिमानिनि ॥

अहङ्कृतः त्रि । अहङ्कारवति ॥

अहङ्कृतिः । स्त्री । गर्वे ॥ स्वरूपे ॥

अहतम् । न । नूतनांशुके ॥ यथा

षड्गीतं नवश्वेतं सदशं यन्न धारि
अहतं तं विजानीयात् पावनं सर्वक

स्विति ॥ त्रि । अनाहते । अनुपहते ॥

अहः । न । दिवसे ॥ नजहाति । ओहाक् त्यागे । नञि जहातेरिति कनिन् । रोसुपीति रः ॥

अहन्ता । स्त्री । अहम्भावे ॥

अहन्धीः । पुं । देहादावनात्मन्यात्मबुद्धौ ॥

अहम् । अ । अहङ्कारार्थे । विभक्तिप्रतिरूपकमव्ययम् ॥

अहमहमिका । स्त्री । परस्पराहङ्कारे ॥ अहमहं शब्दोऽस्त्यत्र । वीप्सायां द्वित्वम् । व्रीह्यादित्वाट्ठन् । अनित्यत्वा

दृव्ययानामिति नटिलोपः ॥

अहमुत्तर । पुं । अभिमानाधिक्ययुक्ते॥ अहमहंभावः अहंकार अभिमानउत्तरोऽधिकोयस्य ॥

अहम्पूर्विका । स्त्री । अभिमानविशेषे । अहम्पूर्वमहम्पूर्वमितियोधानांधावनक्रियायाम् ॥ अहम्पूर्व महम्पूर्वमित्यहम्पूर्विकास्त्रीयामित्युक्तेः ॥ अहम्पूर्वम् । सुप्सुपेतिसमासः । स्वार्थेकन् ॥ अहम्पूर्वमिन्यस्तियस्याम् । ठन्वा ॥

अहमति: । स्त्री । अज्ञाने । अविद्याम् ॥ अहमितिविभक्तिप्रतिरूपकमव्ययमहङ्कारार्थकम् । अहम्मस्वप्नामतिः ॥

[illegible]ः । पुं । मासे । अह्नां गणः ॥ [illegible]त्वार्थों मध्यादिज्ञानार्थं श्वेतवराहकल्पावधिहृष्ट्यवधि ब्रह्मसिद्धान्तोक्तकल्पावधिकल्याद्यब्दावधिवा इष्टकालपर्यन्तं परिगणिते दिनसमूहे। दिनपिण्डे । खुदन्दे ।

अहर्ज्जरः।पुं । संवत्सरे। वत्सरोहि अहोभिःपरिवर्त्तमानो लोकान् जरयतीति अहानिवाऽस्मिन् जीर्यन्त्यन्तर्भवन्तीतिभाष्यकृतांव्याख्यानात् । औपनिषदोय प्रयोगः ॥

अहर्दिवम् । न । अहन्यहनि ॥ अहनिचदिवाच। अचतुरेत्यादिनावीप्सा

याद्वन्द्वोऽच्प्रत्ययश्च ॥

अहर्पतिः । पुं । सूर्ये ॥ अहःपतिः । अहरादीनांपत्यादिषुवारेफः ॥ पक्षे अहःपतिः ॥

अहर्बान्धवः । पुं । दिवाकरे ॥

अहर्मणिः । पुं । भास्करे ॥ अह्नोमणिरिव॥ अर्कवृक्षे ॥

अहर्मुखम् । न। प्रत्यूषे । अह्नोमुखम् । रोऽसुपीतिरः ॥

अहल्यम् । त्रि । हलानाकृष्टक्षेत्रे । देशभेदे ॥

अहल्या । स्त्री । गौतमर्षिपत्न्याम् ॥ इयम्पञ्चकन्यास्वेका ॥ अप्सरोभेदे ॥

अहस्कर: । पुं । भास्करे। अहःकरोति। दिवाविभेतिटः । कस्कादित्वात्सः ॥

अहस्पतिः । पुं । यदाचयमासोभवति तदाचयमासस्यपूर्वोत्तरावधिमासौ भवतः तयोः परस्मिन्नधिमासे ॥

अहह । ा । अद्भुते । खेदे । परिक्लेशे । प्रकर्षे ॥ सम्बोधने ॥ अहंजहातिजिहीतेवा । ओहाकृत्यागेओहाङ् गतौ । अन्येभ्योपीतिडः । पृषोदरादित्वान्मलोपः ॥ भावेवाप्रत्ययः ॥

अहहा । ा । अहहेत्यस्यार्थे पु । अहंजहातिजिहीतेवा । ओहाकृत्यागेओहाङ् गतौ । क्विप् । पृषोदरादित्वान्मलोपः ॥ भावेवाप्रत्ययः ॥

अहार्य्य'। पुं। पर्वते ॥ त्रि। हर्त्तुमशक्ये ॥ ह्रियते। हृञ् हरणे। ऋहलोर्ण्य त। नहार्य्यः॥ अभेद्ये॥

अहि। पुं। वृत्रासुरे॥ सर्पे॥ सूर्य्ये॥ सीसके॥ राहौ॥ पथिके॥ खले॥ यथा॥ विषधरतोप्यतिविषमः खलइतिनमृषावदन्तिविद्वांस'। यदहिर्नकुलद्वेषीस्वकुलद्वेषीपुन पिशुन इति॥ वप्रे॥ अश्लेषानक्षत्रे॥ अष्टमे॥ षण्मात्रिकस्यषष्ठे ।ऽऽ। प्रभेदे॥ आहन्ति। हनहिंसागत्योः। आङिश्रिहनिभ्यांह्रस्वश्चेतीण्। सचडित। डित्वाट्टिलोप.। आङोह्रस्वश्च॥

अहिंसा। स्त्री। वाङ्मनःकायैः परपीडावर्ज्जने। प्राणिनांपीडायानिवृत्तौ। अशास्त्रीयप्राणिपीडनाभावे॥ यथाहमनु'। यावेदविहिताहिंसानियतास्मिंश्चराचरे। अहिंसामेवतांविद्या देदाद्धर्मो हिनिर्बभाविति॥ हिंसनम् हिंसा। नहिंसा॥

अहिंस्रा। स्त्री। ओषधिभेदे। कुलेखाडा इतिगौडभाषा। कुलिकद्रुमे॥ हिंस्राख्यौषधिप्रभेदे॥

अहिकः। पुं। भुवर्चे॥

अहिका। स्त्री। शाल्मलिद्रुमे॥

अहिकान्तः। पु। समीरे॥ अहेः कान्त.॥

अहिगणः। पुं। पञ्चमात्रिकगणस्य प्रथम ऽ।। प्रभेदे॥ सर्पाणांसमूहे॥

अहिच्छत्रः। पुं। देशविशेषे। प्रत्यग्रथे॥ मेषशृङ्गीवृक्षे॥

अहिच्छत्रा। स्त्री। उदेशमसिद्ध पुरीविशेषे ति प्रसिद्धाया शर्करायाम्

अहिजित्। पु ...। शक्रे॥ अहिंसर्पमिन्द्रंवाऽजैषीत्। जिजये। क्विप॥

अहिजिह्वा। स्त्री। नागजिह्वाख्यलतायाम्॥

अहित'। त्रि। शत्रौ॥ अपथ्ये॥ नहितमस्मात्॥

अहितुण्डिक'। पुं। व्यालग्राहिणि। भिक्षार्थसर्पखेलके। सर्पेला तम। ख्याते॥ अहेस्तुण्डंमुखम् तेन। तीतिठक्। संज्ञापूर्वकत्वाद्वृद्ध्या ग।व॥

अहिद्विट्। पु। गरुडे॥ शक्रे॥ मयूरे॥ नकुले॥ हरौ॥ अहिंद्वेष्टि। द्विष०। क्विप्॥

अहिनकुलिका। स्त्री। अहिनकुलयोर्वैरे॥ अहिनकुलयोर्वैरम्। द्वन्द्वाद्वुन वैरमैथुनिकयोरितिवुन्॥

अहिनिर्ल्वयनी। स्त्री। सर्पनिर्मोके। सर्पत्वचि॥ अहिर्निलीयतेऽस्यां सा अहिनिर्ल्वयनीति व्याख्यातार'॥

अहिपतिः। पुं। वासुकिनागे॥ शेषना

गे । अहीनांपतिः

अहिपुत्रक । पुं । तरालौ । नौकाज लोत्सारके ।

अहिपूतनः । पुं । क्षुद्ररोगविशेषे ॥

अहिफेनम् । न । आफूके । अफीमइति विश्रुते ॥ इतिराजनिर्घण्टः ।

अहिब्रध्नः । पुं । रुद्रविशेषे । शिवे ॥

अहिब्रध्नदेवता । स्त्री । उत्तरभाद्रपदायाम् । अहिब्रध्नोदेवताअस्याः ॥

अहिभयम् । न । राज्ञांस्वपक्षप्रभवेभये ॥ अहिरिवगूढस्थत्वात् आहताकारत्वाच्च स्वस्यपक्षएवाहिः । अहेर्भयम् । निजोयमित्रञ्चसमाश्रितश्च-वन्धतः कार्यसमुद्भवश्च । भृत्याहोलेविविधोपचारैः पक्षंबुधा.स्वविधंवदन्ति । सर्पभये ।

अहिभयदा । स्त्री । भूम्यामलक्याम् ॥

अहिभुक् । पुं । गरुडे ॥ बर्हिणि ॥ नाकुल्याम् । गन्धनाकुल्याम ॥ अहिंभुङ्क्ते । भुजअभ्यवहारे । क्विप् ।

अहिमः । त्रि । शीतस्पर्शशून्ये ॥

अहिमर्द्दनी । स्त्री । गन्धनाकुलीनामकन्दे ॥

अहिमारः । पुं । } अरिमेदकरक्षे ।
अहिमेदक । पुं । }

अहिलता । स्त्री । नागवल्ल्याम् । अहिलोकस्यपातालस्यलता । शाकपार्थिवादिः । गन्धनाकुल्याम् ।

अहीनः । पुं । अहर्गणसाध्यसुत्याकक्रतौ । अह्नांसमूहः । अह्न ख क्रतौ । अहीनयजनमशुचिकरमितिश्रुतिः । अहिस्वामिनि ।

अहीरणिः । पुं । द्विवक्त्राहौ । द्विमुखसर्पे । इति त्रिकाण्डशेषः ।

अहुतः । पुं । ब्रह्मयज्ञाख्येजपे ॥

अहे । ा । क्षेपे । वियोगे ।

अहेरु । स्त्री । शतमूल्याम् । नहिनोति । हिगतौ । बाहुलकाद्रुः ।

अहैतुकः । त्रि । फलाभिसन्धानरहिते ।

अहो । ा । धिगर्थे । शोके । करुणार्थे । विषादे । सम्बोधने । प्रशंसायाम् । विस्मये । पादपूरणे । असूयायाम् । वितर्के । अह्वानम् । ओहाङ्गतौ । डोप्रत्ययः ।

अहोरात्रः । पुं । दिनरात्रिमात्रात्मके काले । सूर्योदयद्वयपरिच्छिन्ने त्रिंशन्मुहूर्त्तात्मकेकाले । सच (मानुषाहोरात्रः) षष्टिघटिकाभिर्भवति । यथा । अहोरात्रेविभजतेसूर्योमानुषदैविके । रात्रिः स्वप्नायभूतानां चेष्टायैकर्मणामह इति ॥ मतान्तरे तुचतुर्विंशतिह्होराभिर्मानुषाहोरात्रोभवति । यथोक्तवह्निपुराणेगणभेदनामाध्याये । चतुर्विंशतिवेलाभि

रहोराचंप्रचक्षते । पश्चिमादहरा न्नाह्निहोरात्रांविद्यतेक्रमइति ॥ (पैत्राहोरात्र:) पैत्र्येरात्र्यहनीमासःप्रविभागस्तुपक्षयोः । कर्मचेष्टास्वहः कृष्णःशुक्लः स्वप्नायशर्वरी ॥ (दैवाहोरात्र.) दैवेरात्र्यहनीवर्षंप्रविभागस्तयोःपुन. । अहस्तत्रोदगयनंरात्रिःस्याद्दक्षिणायनम् ॥ (प्राजापत्याहोरात्रः) युगसहस्राभ्यांप्राजापत्यमेकमहोरात्रम् ॥ अहश्चरात्रिश्चतयो. समाहार' । रात्राह्नाहाः पुंसि । अह' सर्वैकदेशेत्यच् समासान्तः ॥

अहोवत । । । अनुकम्पायाम् ॥ खेदे ॥ सम्बोधने ॥ अहोच वतच ॥

अहोह्री । । । चित्रे ॥ अहोच ह्रीच ॥

अह्नाय । । । द्रुते ॥ ह्नवनम् । ह्नुङ्अपनयने । बाहुलकाह्नावे घञ् । वृद्धिः । पृषोदरादित्वाद्वत्ययः । ततोनञ् समासः ॥

अह्नीकः । पुं । क्षपणके ॥

अह्नला । स्त्री । भल्लातकवृक्षे ॥

—॥॥—

आ

आ॰ स्मृतौ ॥ स्मृतिद्धवचने यथा । आ एवं किलतत् ॥ वाक्ये ॥ वाक्यस्यान्यथात्वेद्योत्ये यथा । आएवंमन्यसे । पूर्वंमैवंमंस्था इदानींत्वेवंमन्यसइत्यर्थः ॥ अनुकम्पायाम् ॥ आदेवदत्तो दरिद्रः ॥ समुच्चये ॥ देवेभ्यश्चपितृभ्यश्च आ ॥ आप्नोति । आप्लृव्याप्तौ । क्विप् । पृषोदरादित्वात् पलोपः ॥ स्वीकारे ॥ अयंप्रगृह्यसंज्ञकत्वात्प्रुतप्रगृह्याअचीतिसन्धिंनयाति ॥

आः । पुं । महेश्वरे । पितामहे ॥

आकम्पितः । त्रि । कम्पविशिष्टे । प्रेरिते ॥ आकंप्यतेस्म । कपिचलने । गत्यर्थेतिक्त' ॥

आकरः । पुं । निवहे ॥ धातुरत्नोत्पत्तिस्थाने । खनौ । श्रेष्ठे ॥ आगत्यतत्रकुर्वन्तिव्यवहारमस्मिन्त्वा । डुकृञ्करणे । आकीर्यन्तेधातवोऽत्र वा । कृविक्षेपे । पुंसिसंज्ञायामिति घः ॥

आकरिकः । त्रि । आकरेनियुक्ते ॥ तत्रनियुक्त इतिठक् ॥

आकर्णनम् । न । श्रोत्रकर्मणि । श्रवणे ॥

आकर्णितः । त्रि । अवधृते ॥ श्रुते ॥

आकर्षः । पुं । द्यूते ॥ इन्द्रिये ॥ पाशके ॥ शारिफलके ॥ धन्वाभ्यासाङ्गे । कोदण्डाभ्यासवस्तुनि ॥ आकर्षणे ॥ निकषोपले ॥ आकर्षत्याकृष्यते आ

कर्षन्त्यग्निप्रर्न्वा । कृषविलेखने । घञ् ॥ काष्ठविशेषे ॥ आकृष्यतेऽनेन खलादिगतं धान्यमित्याकर्षः ॥

आकर्षकः । पुं । अयस्कान्ते ॥ चुम्बके ॥ त्रि । कर्षके । आकर्षणकर्त्तरि ॥ आकर्षकुशले । आकर्षकुशलः । आकर्षादिभ्यःकन् ॥

आकर्षणम् । न । आकर्षे । बलादानयने ॥

आकर्षणी । स्त्री । फलपुष्पाद्याकर्षकयष्टिकाविशेषे । आँकडाइतिभाषा ॥

आकर्षिकः । पुं । वणिग्विशेषे ॥ आकर्षेणाचरति । आकर्षात् ष्ठल् ॥ स्त्री त्वाकर्षिकी । ङीष् ॥

आकलनम् । न । आकाङ्क्षायाम् ॥ परिसंख्याने ॥ बन्धने ॥ कलशब्दसंख्यानयोः । आङ्पूर्वादस्माल्ल्युट् ॥

आकलितः । त्रि । अनुष्ठिते ॥ धृते ॥

आकल्पः । पुं । कल्पने ॥ वेषे । मण्डने ॥ आभरणे ॥ त्रि । कल्पान्तावधिके ॥ आकल्पनम । कृपूसामर्थ्ये । घञ् । कृपोरोलः ॥ आकल्पतेवा । आकल्पयतिवा स्वार्थणन्तः ॥

आकल्पकः । पुं । तमोमोहग्रन्थौ ॥ उत्कलिकायाम् ॥ मुदि ॥

आकषः । पुं । निकषोपले । कसौटीतिख्याते कषपाषाणे ॥ आङ्पूर्वात् कषेश्च ॥

आकषकः । त्रि । आकषेकुशले ॥ आकषादिभ्यःकन् ॥

आकस्मिकम् । त्रि । अकस्माद्भवे ॥

आकाङ्क्षा । स्त्री । अभिलाषे ॥ वाक्यार्थज्ञानहेतौ पदस्यपदान्तरव्यतिरेकप्रयुक्तान्वयाभावे ॥ आकाङ्क्षारहितं वाक्यं नप्रमाणम् । यथागौरश्वःपुरुषोहस्तीतिनप्रमाणमाकाङ्क्षाविरहात् ॥ न्यायमते यत् पदस्तेयत्पदान्वयबोधो नभवतितत्पदेतत्पदवत्तेति ॥ प्रतीतपर्य्यवसानविरहइत्यालङ्कारिकाः ॥

आकायः । पुं । निवासे ॥

आकारः । पुं । इङ्गिते । अभिप्रायानुरूपचेष्टाविष्करणे ॥ आकृतौ । मुखप्रसादवैवर्ण्यादिरूपेप्रीत्यप्रीतिसूचकेदेहधर्मे ॥ मूर्त्तौ ॥ आकरणम् । घञ् ॥ आकारश्छाद्यमानोपि नशक्योविनिगूहितुम् । बलाद्धिविवृणोत्येवभावमन्तर्गतंनृणाम् ॥

आकारकरभः । पुं । अकर्कराइतिप्रसिद्धे ॥

आकारगुप्तिः । स्त्री । रत्याद्युत्थरागादिगोपने । अवहित्थायाम् ॥ आकारस्यशोकादिजनितमुखग्लान्यादेर्गोपनम् । क्तिन् ॥ रत्यादिसूचकेमु-

खरागादिराकार: अङ्गवैकृतमिति यावत्। गुप्तिर्गोपनम। आकारस्यभयलज्जादिनागुप्तिराकारगुप्ति ॥

आकारगोपनम । न । आकारगुप्तौ ॥

आकारणम् । न । आह्वाने ॥ आकरणम्। आङ्पूर्वात् कृञोण्यन्ताल्ल्युट्॥

आकारणा । स्त्री । आकारणार्थे । हूतौ॥ आकारणम् । कृञोण्यन्ताद्युच् । टाप् ॥

आकारमौनम् । न । अवचनमात्रे ॥

आकालिकम् । त्रि । क्षणध्वंसिनि । आशुविनाशिनि ॥ पूर्वदिवसे मध्याह्नादावुत्पद्यदिनान्तरेतत्रैवनश्वरे ॥ समानकालावाद्यन्तौयस्य । आकालिकडाद्यन्तवचनइति समानकालस्याकालादेश: इकटप्रत्ययश्चनिपातनात् ॥ स्तनयित्नौ ॥ अकालोत्पन्नवस्तुनि ॥ कालंमर्यादीकृत्येत्याकालम् । अकालेभवम् । ठञ् ॥

आकालिक—लय. । पुं । कपिलशास्त्रेन कालेक्ष[illegible]प्रा[illegible]नरूपेमलयविशेषे॥

आकालिका । स्त्री । विद्युति ॥ आकालाट्ठंश्चेतिठन् ॥

आकालिकी । स्त्री । सौदामिन्याम् ॥ आकालाट्ठंश्चेति चकाराट्ठञ् । ङीप् ॥

आकाश: । पुं । न । शब्दतन्मात्रादुत्पन्ने । वियति ॥ आकाशगुणास्तु । शब्द: श्रोत्रेन्द्रियव्यापिच्छिद्राणिचविविक्तता । वियत: कथिताएतेगुणागुणविचारिभिरिति ॥ आसमन्तात्काशते इतियोगाद्ब्रह्मणि । असङ्गस्वभावे ॥ यथाहु: । आसमन्तात्काशतेयमित्याकाशस्त्वमात्मन: । जगत्कारणतातस्यसर्ववेदान्तसम्मतेति ॥ आसमन्तातकाशन्ते सूर्यादयोऽत्र । काशृदीप्तौ । हलश्चेतिघञ ॥ [illegible]ऽनतिरिक्तमेवाकाशमित्याहु: ॥

आकाशकल्प: । त्रि । आकाशादीषदूनत्वमात्रांशेनन्यूनेपरमात्मनि ॥ यथोक्तम् । निरंशत्वादिभिस्तौरेथाऽनश्वरभावत: । ब्रह्मव्योम्नो[illegible]स्तिचैतन्यंब्रह्मणोधिकमिति ॥

आकाशजननी । स्त्री । प्रगण्डि[illegible]मध्यस्थितजनानांबाह्यार्थदर्शनार्थेषुच्चुद्रच्छिद्रेषु ॥ यद्वारा ऽऽ स्रेयास्त्रगुका प्रक्षिप्यन्ते इतिराजधर्म: ॥

आकाशनिलय । पुं । तापसविशेषे ॥ योह्याकाशएव वायुधारणावलेन निलीयते न भूमौ स: ॥

आकाशप्रदीप: । पुं । तुलाया दीयमाने राधादामोदरसम्प्रदानके आकाशदीपे ॥

आकाशमांसी । स्त्री । निरालम्बायाम । सूक्ष्मजटामास्याम् ॥ केदारे

त्पत्तिरस्याः ॥ ॥

आकाशमूली । स्त्री । पाना इतिगौड भषाप्रसिद्ध कुम्भिकायाम् ॥ जलव ल्कले ॥

आकाशरक्षी । पुं । प्रगण्डस्थितप्रणि धौ । दुर्गबहिः प्राचीरोपरिस्थिते चरे ॥ इतिराजधर्मः । मत्वर्थीय- इन् ॥

आकाशवल्ली । स्त्री । अमरवेल आको अश्रवेल इतिख्याते लताविशेषे । खव ल्याम् ॥

आकाशवाणी । स्त्री । अशरीरिण्यांवा । दैववाण्याम् ॥

आकाशसलिलम् । न । दिव्योदके ॥

आकाशास्तिकायः । पु । अजीवपदार्थे ॥ स च लोकाकाशास्तिकायो ऽलो- काकाशास्तिकायश्चेति द्विरूपः ॥

आकिञ्चन्यम् । न । अकिञ्चनिमनि । अकिञ्चनतायाम् ॥ भावे ष्यञ् ॥

आकीर्णम् । त्रि । व्याप्ते । सङ्कीर्णे । ना नाजातीयसम्मिलिते ॥ आकीर्य्यते- स्म । कृविक्षेपे । क्तः ॥

आकुञ्चनम् । न । न्यायमते पञ्चप्रका रकर्म्मान्तर्गतकर्म्मविशेषे । सङ्कोचे ॥

आकुञ्चितः । त्रि । आभुग्ने ॥

आकुलम । त्रि । व्यस्ते । व्याकुले ॥ सु भिते । लोले ॥ आकोलति । कुल संख्याने । इगुपधेतिकः ॥

आकुलाकुलम । त्रि । आकुलप्रकारे ॥ प्रकारेगुणवचनस्येति द्विर्भावः ॥

आकुलितम् । त्रि । क्षोभिते । आकुली कृते । सञ्चालिते ॥

आकूतम् । न । अभिप्राये । आशये ॥ इतिहेमचन्द्रः ॥

आकूतिः । स्त्री । स्वायम्भुवमनोः कन्या याम् । क्रियायाम् ॥

आकृतिः । स्त्री । रूपे । वपुषि । जातौ ॥ अवयवसंस्थानविशेषे ॥ आकृतिर्जा तिलिङ्गाख्या । न्यायसूत्रम् । जाति लिङ्गमित्याख्या यस्याः जातेर्गोत्वा देर्हि सास्नादिसंस्थानविशेषो लिङ्ग म् । तस्यच परम्परया द्रव्यवृत्तित्वम् । जातिर्द्रव्यासमवायिकारणतावच्छे दिकालिङ्गं धर्मोयस्याः सेत्यर्थइति कश्चित् ॥ द्वाविंशत्यक्षरायांछन्दो ॥ आकरणम् । कृञ् । क्तिन् ॥ आक्रि यतेऽयंगौरयमश्व इतिव्यज्यतेऽनेने- ति आकृतिःसंस्थानम् ॥

आकृतिच्छत्रा । स्त्री । घोषातक्याम् ॥

आकृष्टम् । त्रि । आकर्षिते । कृताक र्षणे । आकृष्यतेस्म । कृषविलेख ने क्तः ॥

आकेकरा । स्त्री । दृष्टिविशेषे ॥ यथा । दृष्टिराकेकराकिञ्चित्स्फुटापाङ्गे प्र

सारिता । मोक्षितार्द्धीपुरालोकेता राध्यावर्त्तनोऽन्तरेति नृत्यविलासा-क्तः ॥

आकोकेरः । पुं । मकरराशौ॥

'अकौशलम् । न । अकौशले ॥

आक्रन्दः । पुं । क्रन्दने॥ आह्वाने॥ मित्रे॥ दारुणयुद्धे ॥ भ्रातरि ॥ शब्दे ॥ पार्ष्णिग्राहात् परस्मिन्राज्ञि ॥ देशाक्रमणाद्याचरतः पार्ष्णिग्राहस्ययो नियामकस्तस्याऽनन्तरोन्द्रपतिरित्यर्थः ॥ न । दुःखिनांरोदनस्थाने ॥ सारावदृदिते ॥ आक्रन्दनम् आक्रन्दते आक्रन्द्यतेऽस्मिन् आक्रन्दयतिवा । क्रदिआह्वानेरोदनेच । आङः क्रन्दसातत्ये । घञ् ॥ पचाद्यच्वा ॥

आक्रन्दिकः । त्रि । दुःखिनांरोदनस्थाने गमनकर्त्तरि ॥ आक्रन्दंधावति । आक्रन्दाच्चेतिठञ् ॥ स्त्री । ङीप् ॥

आक्रमः । पुं । अधिक्रमे ॥ आक्रमणम् । आङ् पूर्वात्क्रमेर्भावेघञ् ॥

आक्रमणम् । न । आक्रमकरणे । व्यापने ॥ आङःक्रमेर्भावेल्युट् ॥

आक्रान्त. । त्रि । कृताक्रमणे । व्याप्ते ॥ अभिभूते ॥ आक्रामतिस्म । क्रमु पादविक्षेपे । क्तः ॥

आक्रीडः । पु । उद्याने । राज्ञःक्रीडासाधनेसाधारणेवने ॥ लीलास्थाने ॥ आक्रीडन्त्यत्र । क्रीडृविहारे । हलश्चेतिघञ् ॥

आक्रुष्टः । त्रि । निन्दिते ॥ क्रोशतेः कर्मणिक्तः । व्रश्चेतिषत्त्वेष्टुत्वम् ॥

आक्रोशः । पुं । अभिशापे ॥ शापे ॥ विरुद्धानुध्याने ॥ आक्रोशनम् । क्रुश आह्वाने । भावे घञ् ॥

आक्रोशनम् । न । अभीषङ्गे ॥ आक्रोशे ॥ आङ्पूर्वात्क्रुशेर्ल्युट् ॥

आक्षद्यूतिकम् । न । अक्षद्यूतेन वित्तवैरे ॥ निर्वृत्तेक्षद्यूतादिभ्यश्चेतिठक् ॥

आक्षपाटिकः । पुं । अक्षदर्शके । ध्यक्षे ॥

आक्षपादः । पुं । नैयायिके ॥ न । न्यायशास्त्रे ॥

आक्षारः । पुं । आक्षारणायाम ॥

आक्षारणम् । न । मैथुनार्थाक्रोशे ॥ क्षरसञ्चलने । प्रयोजकण्यन्ताल्ल्युट् ॥

आक्षारणा । स्त्री । मैथुनंप्रत्याक्रोशे । परस्त्रीनिमित्तंपुंसः परपुरुषनिमित्तंस्त्रियावा दूषणे ॥ यथा कृताऽगम्यागमनस्त्वं स्थानान्तरंगच्छेति ॥ आक्षारणम् । क्षरेःप्रयोजकण्यन्तात युच ॥

आक्षारित' । त्रि । अभिशस्ते । मिथ्यापवाददूषिते ॥ परस्त्रियां परपुरुषे वा

मैथुनं प्रति मिथ्या दूषिते ॥ आक्षा-
र्यते स्म । क्षरेर्ण्यन्तात् क्तः ॥ आक्षा-
र सञ्जातो ऽस्येति तारकादित्वादि-
तच्वा ॥

आक्षिकः । पुं । आचेरगाछ इति गौड
भाषा प्रसिद्धे आछुकवृक्षे । रत्नमाला
॥ त्रि । अक्षैर्देविनि ॥ अक्षैर्दीव्यति
अदेवीत् देविष्यति वा जयति
वा । तेन दीव्यतीति ठक् ॥ अक्षै-
र्जिते ॥

आक्षिप्तः । त्रि । क्षिप्ते ॥ आक्षिप्यते-
स्म । क्षिपे. क्तः ॥

आक्षीवः । पुं । शोभाञ्जने । अक्षीवे ॥
मत्ते ॥ आक्षीवति आक्षीवय-
वा । क्षीवृ मदे । पचाद्यच् ॥

आक्षेत्रज्ञम् । न । अक्षेत्रज्ञे ॥

आक्षेपः । पुं । अपवादे । भर्त्सने ॥
आकृष्टौ ॥ धनादिन्यासकरणे ॥ का-
व्यार्थालङ्कृतिप्रभेदे । यथा । निषे-
धो वक्तु मिष्टस्य यो विशेषाभिधित्स-
या । वक्ष्यमाणोक्तविषयः स आक्षेपो
द्विधामतः ॥ विवक्षितस्य प्राकरणि-
कत्वा दनुपसर्जनीकार्य्यस्याशक्यवक्त-
व्यत्व मतिप्रसिद्धत्वं वा विशेषं वक्तु-
निषेधो निषेध इव यः स वक्ष्यमाण-
विषय उक्तविषयश्चेति द्विधा आक्षे-
पः । क्रमेणोदाहरणम् । एएहि किं

पि कीए अविकरुणिक्किब भणामि अ-
लमहवा । अविआरिअकज्जार म्भ-
आरिणी मरउणा भणिस्सम् ॥ अस्य सं
स्कृतं यथा । एएहि किमपि कस्या-
अपिकृते निष्कृप भणामि अलमथ-
वा । अविचारितकार्य्यारम्भकारिणी
म्रियतां न भणिष्ये ॥ एहीत्यव्ययं सा-
मुनयसम्बोधने एहिआगच्छ । एहिं
वीतिपाठे इदानीमपीत्यर्थः । अथ
वेतिपूर्वाक्षेपे । अलं न भणिष्यामी-
त्यर्थः । खेदातिशयात् पुनरुक्तिः ।
अलंव्यर्थमिति । अविचारितेतिस्व-
भावमनालोच्य अनुरागवर्द्धनपरे-
त्यर्थः । अत्र विरहदुर्दशातिशयो व-
क्ष्यमाणोवक्तु मशक्य तयानिषिद्ध इ-
त्याक्षेपालङ्कारः ॥ ज्योत्स्नामौक्तिक
दामचन्दनरसः शीतांशुकान्तद्रवः
कर्पूरं कदलीमृणालवलयान्यम्भोजि
नी पल्लवाः । अन्तर्मानसमास्त्वया-
प्रभवतातस्याः स्फुलिङ्गोत्करव्यापारा
यभवन्ति हन्तकिमनेनोक्तेन न ब्रूमहे
इति ॥ आक्षेपणम् । क्षिपप्रेरणे ।
घञ् ॥

आक्षेपक । पुं । निन्दाकरे ॥ व्याधे ॥
अनिलव्याधिविशेषे ॥ तस्य कारणल-
क्षणे यथा । यदातु धमनीः सर्वाः कु-
पितोऽभ्येति मारुतः । तदाक्षिपत्या-

मुमुहुर्मुहुर्देहंमुहुश्चरः ॥ मुहुर्मुहुस्तदाक्षेपादाक्षेपकइतिस्मृतइति ॥ आक्षिपति । खुल् ॥

आचोटः । पुं । शैलपीलौ ॥ अक्षोट एव । स्वार्थे अण् ॥

आक्षोडः । पुं । अक्षोटवृक्षे ॥

आखः । पुं । खनित्रे ॥ आखनत्यनेन । खनु अवदारणे । खनेर्डः ॥

आखण्डलः । पुं । सहस्राक्षे ॥ आखण्डयति । खडि भेदने । वृषादिभ्यःकलच् ॥

आखन । पुं । खनित्रे ॥ आखनत्यनेन । खनु० । खनो घचेति घः ॥

आखनिकः । पुं । चौरे ॥ शूकरे ॥ मूषिके ॥ देवताडवृक्षे । त्रि । खनितरि ॥ आखनति । खनु० । आङि-पर्णिपनिपति खनिभ्यइति इकन् ॥ पुं । खनित्रे ॥ आखनत्यनेन । खने डेडरइकइकवकावा च्याइतिइकप्रत्ययः ॥

आखनिकवक । पु । खनित्रे ॥ आखनत्यनेम । खनु० । इकवकप्रत्ययः ॥

आखरः । पुं । खनित्रे ॥ आखनत्यनेन । खनु० । खनेर्डडर इतिडर प्रत्ययः । डित्त्वसामर्थ्याद्भस्यापिटेर्लोपः ॥

आखानः । पुं । आखने । आखनत्यनेन । खनु० । खनोघचेतिचकाराद्घञ् ॥

आखुः । पुं । मूषिके ॥ शूकरे ॥ चौरे ॥ कृपणे ॥ यथा । विभवेसतिनैवात्ति नददातिजुहोतिन । तमाहुराखुंतस्मान्नंभुक्ताकृच्छ्रेणमुह्यतीति ॥ देवताडवृक्षे ॥ आखनति । खनु० । आङ्परयोःखनिशृभ्यांडिच्चेतिकुः ॥

आखुकर्णपर्णिका । स्त्री । आखुपर्णीम् ॥

आखुकर्णी । स्त्री । मूसाकानीइतिभाषाप्रसिद्धायां भूमिचर्य्याम् । मूषकर्णीम् । पाककर्णेतिङीष् ॥

आखुगः । पुं । गजानने । गणेशे ॥

आखुघातः । पुं । शूद्राद्यधमे । अन्ति । हन० । बाहुलकादण्

आखुपर्णिका । स्त्री । लताविशेषपत्तिन्नायाम् । वृषायाम् ॥ स्वार्थे कः ॥

आखुपर्णी । स्त्री । उंदुरकन्नी इतिप्रसिद्धायांमूषकपर्ण्याम् । वृषायाम् ॥ आखुः पर्णमस्याः । तत्कर्णाकारपत्त्वात् । पाककर्णेति ङीष् ॥ आखुपर्णी कटुस्तिक्ता कषाया शीतला लघु । विपाके कटुकामूत्रकफामयकृमिप्रणुत् ॥

आखुपाषाणः । पुं । पाषाणप्रभेदे ॥ आखुपाषाणनामायं लोह संकरकारकः । इतिराजनिर्घण्टः ॥

आखुभुक् । पुं । बिडाले ॥ आखून् भुङ्क्ते । भुजपालनाभ्यवहारयो. । क्विप् ॥

आखुरथः । पुं । गणेशे। आखूरथेऽस्य ॥

आखुविषघ्ना । पुं । देवताडवृक्षे ॥ देवदाली लतायाम् ॥

आखेटः । पुं । मृगयायाम् ॥ आखिद्यन्ते प्राणिनोऽत्र। खिटत्रासे । हलश्चेति घञ् ।

आखेटकः । पुं । मृगयायाम् ॥ स्वार्थे-कन् ।

आ॰ ग्शीर्षकम् । न । शुडङ्ग इति गौडाप्रसिद्धे कुट्टिमान्तरे । यथा । शीर्षं द्रुमशीर्षं तथाचाखेटशीर्षम् । इतिकुट्टिमभेदाःस्युःशाब्दिकैः समुदाहृता इति ।

आखेटिकः । पुं । विम्बकद्रौ । मृगयाकुशलकुक्कुरे ॥

आखोटः । पुं । अक्षोटे । पार्वतीये ॥

आख्या । स्त्री । नाम्नि । संज्ञायाम् । उक्तौ ॥ आख्यानम् । ख्याप्रकथने । आतश्चोपसर्गइत्यङ् ॥

आख्यातम् । त्रि । कथिते ॥ व्याख्याते ॥ न । तिङि ॥ क्रियाप्रधानमाख्यातमिति वैयाकरणा । भावप्रधानमाख्यातमितिनैगमाः ॥ आख्यायतेस्म । ख्या॰ । चक्षिङ आदेशोवा । क्त ॥

आख्याता । त्रि । प्रतिपादयितरि ॥ वक्तरि तृच् ॥

आख्यानम् । न । सौपर्णमैत्रावरुणाद्युपाख्याने ॥ आङ्पूर्वात्ख्यातेर्ल्युट् ॥

आख्यानकी । स्त्री । आख्यानकीतौजगुरुगश्चोजे जतावनेजेजगुरुगुरुश्चेदिति लक्षणलक्षितेवृत्ते ॥

आख्यायिका । स्त्री । उपलब्धार्थकथायाम् ॥ यथा । प्रवन्धकल्पनांस्तोकसत्यांप्राज्ञाःकथांविदुः । परम्पराश्रयायास्यात्सामताख्यायिका क्वचिदिति ॥ गद्यपद्यप्रबन्धे ॥ त्रि । कथके ॥ आचष्टे । चक्षिङःख्याञ् । ण्वुल् ॥

आगतम् । त्रि । आयाते । उपस्थिते ॥ प्राप्ते ॥ गम॰ । क्त ॥

आगतिः । स्त्री । आगमने ॥ क्तिन्नन्त ॥

आगन्तुः । त्रि । अतिथौ ॥ आगमनशीले ॥ अनियते ॥ आगन्तूनामन्ते संनिवेशः ॥ आगच्छति । गम्लृगतौ । सितनिगमीतितुन् ॥

आगन्तुकः । त्रि । अतिथौ ॥ आहार्ये । अनित्यस्थायिनि ॥ स्वार्थेकन् ॥

आगमम् । न । तन्त्रशास्त्रे ॥ अस्यार्थः । आगतंशिववक्त्रेभ्योगतञ्चगिरिजामुखे । मतंश्रीवासुदेवस्यतस्मादागमम्-च्यतेइति ॥ तस्यलक्षणं यथा । सृष्टिश्चप्रलयश्चैवदेवतानांतथार्चनम् ।

साधनञ्चैव सर्वेषांपुरश्चरणमेवच । षटकर्मसाधनंचैवध्यानयोगस्तु-र्विधः । सप्तभिर्लक्षणैर्युक्तमागमंतद्विदुर्बुधा. इति ॥ अपिच । पु । सिद्धंसिद्धैः प्रमाणैस्तुहितं चात्रपरत्रच । आगमःशास्त्रमाप्तानामाप्तास्तत्त्वार्थवेदिनइति । शास्त्रमात्रे । उपदेशपरम्परायाम् । आगतै । साक्षिपत्रादौ । वेदे । प्रकृतिमत्ययानुपघातिनि कार्ये । एकादशभवने ॥ आगमनम् । गम्लृ॰ । ग्रहवृदृनिश्चिगमश्चेत्त्यप् ॥

आगमनम् । न । आगतै । आवना इतिभाषा ॥

आगमवेदी । पुं । गौडपादाचार्ये । शङ्कराचार्यस्य परमगुरौ ।

आगमापायी । त्रि । उत्पत्तिविनाशवति । आगमापायौ विद्येतेअस्य । इनि. ।

आगमार्थः । पुं । अद्वैतदर्शने ।

आगमावर्त्ता । स्त्री । विछाटी इति गौडभाषा प्रसिद्धे क्षुपविशेषे । वृश्चिकाल्याम् ॥

आगमितम् । त्रि । अधीते । पठिते ।

आगरा । स्त्री । सुम्नपुरे । यथा । कालपीमन्दिरे, वालपीनस्तनी जारपीता सर्वांगोलपीतिप्रियम् । नागराजी मदाढ्योदमेदस्विनी मागराभागतः साहजहानाबदीतियवनाधिकारप्रसिद्धोयंशब्दः ॥

आगवीनः । त्रि । गोःप्रत्यर्पणपर्यन्तं कर्मकर्त्तरि ॥ आङ्मर्यादाभिविध्योरित्यव्ययीभावेउपसर्जनह्रस्वे चकृते आगवीन इतिखः । गुणावादेशौ ॥

आगः । न । अपराधे । पापे । एति । इण्गतौ । इण आग अपराधे चेत्यसुन् आगादेशश्च ॥

आगस्कृत् । त्रि । अपराधिनि ।

आगस्त्यः । पुं । अगस्त्यतनये । अगस्त्यस्यापत्यम् । ऋष्यण् । वहुत्वे अगस्तय. ॥ न । अगस्तिकुसुमा

आगाधम् । न । अगाधे । अतिग

आगामी । त्रि । आगन्तुके । प्रवा. ॥ भविष्यत्काले । आगमिष्यति । गम्लृ॰ । आङिणिदितिगमेरिनि ॥

आगारम् । न । मन्दिरे । गृहे ॥ अग्यते । अगकुटिलायांगतौ । कर्मणिभावेवाघञ । आगम्यच्छति । ऋगतौ । कर्मण्यण् ॥

आगू । स्त्री । प्रतिज्ञाने । आगमनम् । आगमे क्विपि गमः क्वावित्यन्तलोपे ऊचगमादीनामित्यूकारादेशः । ओःसुपीतियणि अमि शसिच । आग्वम्आग्वः । शेषंवधूवत् ॥

आग्निमारुतम् । न । हविर्विशेषे । अ

ग्निमरुतौदेवते अस्य । सास्यदेवते त्यण् । देवताद्वन्द्वेचेत्युभयपदवृद्धि. ॥
आग्निष्टोमिकः । पुं । अग्निष्टोमविदि ॥ अग्निष्टोममधीतेवेदवा । क्रतूक्थादीतिठक् । ग्रन्थे ॥ अग्निष्टोमस्य व्याख्यानस्तत्रभवोवा । क्रतुयज्ञेभ्यश्चेति ठञ् ॥
आग्नीध्रः । पुं । प्रियव्रतपुत्रेन्द्वपतिविशेषे आग्नीध्रोनामन्द्वपतिर्जम्बूनाधीम ोः कुले । तज्जातन्वपसंज्ञाभिः कथ्य भारतादय. ॥ न । होतुर्गृहे ॥ अ मन्धे । अिन्धोदीसौ क्विप् । पः । अग्नीधः स्थानम् । अग्नी शरणम्भ । तात्स्थ्यात्तृत्त्वि प्याग्नीध्रउच्यते । आग्नीध्रमाधार । इन्द्रस्यजितुङीपिआग्नीध्रीति वोध्यम् ॥
आग्नेयम् । न । स्वर्णे । रक्ते । महापुराणे । यथा । अग्निनोक्तं पुराणंयदाग्नेयं वेदसम्मितम् । भुक्तिमुक्तिप्रद पुण्यं पठतांशृण्वतांन्नृणामिति ॥ दे वविशेषे ॥ कृत्तिकायां ॥ अग्निदेवताके । स्थालीपाके ॥ अग्निर्देवता अस्य अग्नायीदेवता अस्यवा । अग्नेर्ढगितिढक् । भस्याढइतिपुंवद्भाव. ।
आग्नेयास्त्रम् । न । अग्निदेवताके अस्त्र विशेषे ॥

आग्नेयी । स्त्री । अग्निकोणे ॥ अग्नियोषिति । स्वाहायाम् ॥ अग्निदेवताकायामृचि ॥ ङीप् ॥
आग्रयणम् । न । नवसस्येष्टयाम् ॥
आग्रहः । पुं । अनुग्रहे ॥ आसङ्गे ॥ आक्रमे ॥ ग्रहणे ॥ आग्रहणम् । ग्रहणादाने । ग्रहदृढ्रिस्थप ॥ आवेशे
आग्रहायणः । पुं । मार्गशीर्षे ॥ आग्रहायण्या युक्तापौर्णमासी यस्मिन् । ज्योत्स्नादित्वादण् ॥
आग्रहायणिकः । पुं । मार्गशीर्षे ॥ आग्रहायण्या मृगशिरसा युक्तापौर्णमासी अस्मिन् । आग्रहायण्यश्वत्थाट्ठक् मतान्तरे वत्सरायमासोयम् ॥
आग्रहायणी । स्त्री । मार्गपूर्णिमायाम् मृगशिरोनक्षत्रे ॥ अग्रेहायनमस्याः मतभेदे मार्गशीर्षमारभ्यवर्षमवृत्तेः । प्रज्ञादण् । पूर्वपदादितिणत्वम् । गौरादित्वान्ङीष् । आग्रहायणीपौर्णमासी तद्योगान्नक्षत्रमपितथा ॥
आग्रहारिकः । पुं । अग्रदानिनि ॥
आघट्टकः । पुं । रक्तापामार्गे ॥
आघाटः । पुं । सीमायाम ॥ अपामार्गे ॥
आघातः । पुं । वधस्थाने ॥ आग्रहणे याम् । हनने । चोट इतिभाषा । आहन्यते अनआहननंवा । हन०

घञ ॥

आघातनम् । न । वधस्थले । हनने ॥

आघारः । पुं । घृते । वैदिकानांकर्म-विशेषे । ऋग्वेदिनांस्रुवेणचतुराज्यं स्रुचिन्त्वा प्रजापतिंमनसाध्यात्वा-तूष्णीं मन्त्रेर्वायव्यकोणादारभ्याग्ने-यीं यावदविच्छिन्नाघृतधारा दीय-ते पुनश्च स्रुवेण चतुराज्यं स्रुचि-हत्त्वाइन्द्रं ध्यात्वा अग्नेर्नैर्ऋतींदिश-मारभ्य ऐशानीं दिशमवधीकृत्य सन्तत्या घृतं धार्यते तस्मिन् कर्म-णि ॥ यजुर्वेदिनांतु स्रुवेणमन्त्रोच्चा-रणपूर्वकं पूर्वोक्तक्रमेणघृतधारादाने ॥ इतिपशुपतिः ॥ आघरणम् । घृच रणदीप्त्योः । घञ् । सेके ।

आघारणम् । न । सेचने ।

आघूर्णितः । त्रि । आहते । घूर्णिते । भ्रामिते । घूर्णितनेत्रादौ ।

आघोष्टा । त्रि । ध्वन्यात्मकशब्दवक्त-रि ।

आघ्राणम् । न । तृप्तिसामान्ये । गन्ध-ग्रहणे ॥ आघ्रायतेऽस्म । घ्रागन्धोपा-दाने । क्तः । नुदविदेतिवा नत्वम् ।

आघ्रातम् । त्रि । शिङ्घिते । घ्राणवि-षयीकृते ॥ आक्रान्ते । हृष्टे । आ-घ्रायतेऽस्म । घ्रा० । क्तः । नुदविदो-न्दत्राघ्राह्रीभ्योऽन्यतरस्यामितिपाक्षि-को नत्वाभावः ॥

आङ् । अ । सीमायाम् । मर्यादायाम् । तेन विनेत्यर्थे । यथा । आसमुद्रक्षि-तीशानाम् ॥ अभिव्याप्तौ । तेनसहे-त्यर्थे । यथा । आकुमारं यशः । क्रि-यायोगे । धातुनायोगे सतियोर्थो-जायते तत्र । यथा । आरोहति । ई-षदर्थे । यथा । आपिङ्गलः । अतति । अतसातत्यगमने । बाहुल[illegible]त् डाङ्प्रत्ययः ।

आङ्गम् । न । कोमलाङ्गे । त्रि । अ[illegible] धि-कारीये । अङ्गसम्बन्धिनि । [illegible]स्ये-दम् । अण् ।

आङ्गारम् । न । अङ्गारवृन्दे ॥ [illegible]णां समूहः । भिक्षादिभ्योऽण् ॥

आङ्गिकः । त्रि । मार्दङ्गिके ॥ अङ्गेन[illegible] न्नभावव्यञ्जकभ्रूक्षेपादौ ॥ अङ्गजा-ते ॥ अङ्गेनहस्तादिना निर्वृत्तम् । निर्वृत्तेऽक्षद्यूतादिभ्यइति ठक् ।

आङ्गिरस । पुं । वाचस्पतौ । जीवे । अ-ङ्गिरसोऽपत्यम् । ऋष्यन्धकेत्यण् । बहुत्वे अत्रिभृगित्यणो लुक् । आ-ङ्गिरसः आङ्गिरसौ अङ्गिरसः ।

आचण्डाः । त्रि । क्रुद्धाः ।

आचमः । पुं । आचमने । जलप्राशने॥

आचमनम् । न । उपस्पर्शे ॥ वैधकर्मा-रम्भात पूर्वं वारत्रयजलपानानन्तरं-

यथा क्रमाष्टाङ्गस्पर्शरूपशुद्धिजनकक्रियायामित्यर्थः । अत्र प्रमाणम् । प्रक्षाल्यपाणीपादौचत्रिः पिवेदम्बुवीक्षितम् । सम्वृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात् ततोमुखम् ॥ संहत्यतिसृभिः पूर्वमास्यमेव मुपस्पृशेत् । अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् ॥ अङ्गुष्ठानामिकाभ्याञ्चचक्षुःश्रोत्रे पुनःपुनः। तृभिंकनिष्ठाङ्गुष्ठेनहृदयन्तु तलेनवै । सर्वाभिश्शिरःपश्चात् वा हूचाग्रेणसंस्पृशेत् । इतिदक्षः । अन्तं पर्वणांकृत्वागोकर्णाकृतिवत् करम् । सच्तताङ्गुलिनातोयंगृहीत्वा पाणिनाद्विजः । मुक्ताङ्गुष्ठकनिष्ठाभ्यां शेषाच्चमनंचरेत् । माषमज्जनमात्रं स्तुसंगृह्यत्रिःपिवेदपः । इतिभारद्वाजः ॥ वृश्चिणोनोदकंपीत्वावामेन सस्पृशेद्बुधः । तावन्नशुध्यतेतोयंयावद्वामेन नस्पृशेद्वितिदेवीभागवतम् । अद्भिस्तुप्रकृतिस्थाभिर्हीनाभिः फेनवुद्बुदैः । हृत्कण्ठतालुगाभिस्तुयथा संख्यंद्विजातयः ॥ शुध्येरन् स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरन्ततः । इतियाज्ञवल्क्यः । स्त्रियास्तेदशिकंतीर्थं शूद्रजातेस्तथैवच । सकृदाचमनाच्छुद्धिरेतयोरेवचोभयोरिति । चमुअदने । भावे ल्युट् । अदनंचात्र जल

स्यैवेतिव्याख्यातारः । आचम्यते अनेन । अधिकरणे वाल्युट् ।

आचमनकः । पुं । निष्ठीवनपात्रे । पतद्ग्रहे । प्रोणे ।

आचमनीयम् । न । मुखप्रक्षालनार्थं जले । यथा । उदकंदीयतेयत्तुप्रसन्नंफेनवर्जितम् । आचमनायदेवेभ्यस्तदाचमनमुच्यतइति ॥ कालिकापुराणम् ।

आचरणम् । न । आचारे । व्यवहारे । आङ्पूर्वाच्चरतेर्भावे ल्युट् । रथादौ ॥ आचरतिगच्छत्यनेनेतिकरणे ल्युट् ।

आचरितम् । त्रि । कृताचरणे । व्यवहृते ॥ पारिभाषिकन्तद्यथा । दारपुत्रपशून् हत्वाकृत्वाद्वारोपवेशनम् । यार्थी दाप्यतेऽर्थंस्वंतदाचरितमुच्यते । इति ।

आचर्यः । पुं । गन्तव्येदेशे । चरेरा चागुराविति यत् ।

आचान्तः । त्रि । कृताचमने ।

आचामः । पुं । आचमने । भक्तमण्डे । भासरे । आचम्यते । चमु० । भक्षणे । अनुरीतिघञ् । वृद्धिः । भावेवाघञ् ।

आचारः । पुं । मन्वाद्युक्तेशास्त्रवचनादिव्यवहारे । चरित्रे । शीले । सर्वशास्त्रप्राधान्यं यथा । सर्वागमानामा

चारःप्रथमं परिकल्पते। आचारप्रभ
वोधर्मोधर्मस्यप्रभुरच्युत इतिमहाभा
तम्। आचार. परमोधर्मःश्रुत्युक्तः
स्मार्त्तएवचेतिमनु.। अपिच। आ-
चाराद्विच्युतोविप्रोनवेदफलमश्नुते
। आचारेणतुसयुक्तः सम्पूर्णफलभा
ग्भवेत्। एवमाचारतोदृष्ट्वाधर्मस्य
मुनयोगतिम्। सर्वस्यतपसोमूल
माचारंजगृहुःपरमितिच ॥ आच
र्यते। चर०। घञ्॥

आचारवर्जितः। त्रि। आचारवहिर्भू
ते। आचरेणवर्जितः। आचार
हीने। लोकवाह्यव्यवहर्त्तरि॥

आचारहीनः। त्रि। गुर्वतिथिप्रत्यु
त्थानाद्याचारवर्जिते। आचारेणआ
चाराद्वाहीनः। आचारहीनंनपुन
न्तिवेदायद्यप्यधीताःसहषड्भिरङ्गैः॥

आचारी। त्रि। आचारवति। श्रुति
स्मृत्युक्ताचारयुक्ते। म० इनिः॥

आचारी। स्त्री। हिलमोचिकायाम्॥

आचार्य्यः। पुं। मन्त्रव्याख्याकृति। सा
ङ्गकृत्स्नवेदाध्यापयितरि। यथाहम-
नुः। उपनीयतु य.शिष्यं वेदमध्या
पयेद्द्विजः। सकल्पसरहस्यञ्चतमा-
चार्यं प्रचक्षते। इति। मोक्षसाधन
स्योपदेष्टरि श्रीगुरौ॥ सचोक्तःकु
लार्णवे। स्वयमाचरतेशिष्यानाचा
रेस्थापयत्यपि। आचिनोतिहि-
शास्त्रार्थमाचार्य्यस्तेनकथ्यते॥ आ
म्नायतत्त्वविज्ञानाच्चराचरसमानतः
। यमादियोगसिद्धत्वादाचार्यइतिक
थ्यते। इति। श्रीशङ्कराचार्ये॥ द्रो
णाचार्य्ये॥ आचर्यते। चरेर्ण्यत॥

आचार्य्यकम्। न। आचार्यकर्मणि॥
योपधाद्गुरूपोत्तमाद्वुञ्॥

आचार्य्यमिश्रः। पुं। गौरवान्विते॥

आचार्य्या। स्त्री। स्वयंमन्त्रव्याख्यान
कारिण्याम्॥ पुंयोगाभावान्नानुगा
गमोङीष्च। टाप्॥

आचार्य्यानी। स्त्री। आचार्ययोषिति॥
आचार्यस्य स्त्रीत्यर्थे इन्द्रवरुणभव
शर्वेत्यादिना आचार्यशब्दस्या०
गमोङीष्च। आचार्यादणत्वंचे
ति णत्वाभावः॥

आचिख्यासा। स्त्री। आख्यातुमिच्छा
याम्॥

आचित.। पुं। शकटोन्मेये। शाकटे
भारे। छकडेकाभार इतिभाषा॥
द्व्ययुतपले॥ न। दशभारपरिमा
णे। २५ मण इतिभाषा॥ त्रि। स
ङ्गृहीते॥ छन्ने॥ व्याप्ते॥ आचीयते
स्म। चिञ् चयने। क्तः॥ ग्रथिते।
गुम्फिते॥

आच्छन्नम्। त्रि। आच्छादिते। आवृ

ते ।

आच्छादः । पु । वस्त्रे । इतिहेमचन्द्रः ।

आच्छादनम् । न । पिधाने । वस्त्रे । अपहृतिमात्रे । छादयति । छदअपवारणे आङ्पूर्वः । णयन्ताल्ल्युट् । आच्छाद्यते ऽनेनवा ।

आच्छादितः । त्रि । आवृते । कृताच्छादने ।

आच्छिन्नः । त्रि । वलाद्धृते ।

आच्छुकः । पुं । आचगाछ इतिगौड भाषा प्रसिद्धे वृक्षविशेषे । पक्षी के । रत्नद्रौ ।

आच्छुरितम । न । सशब्दहासे ॥ नखवाद्ये । नखाघातविशेषे । आच्छुरणम् । छुरच्छेदने । क्तः ।

आच्छुरितकम् । न । सशब्दहासे ॥ परस्यामर्षजनकेहास्ये । नखाघातविशेषे । आच्छुरणमपरच्छेदनम् । आःछुरेर्भावेक्तः । स्वार्थेकः ।

आच्छोदनम् । न । मृगयायाम् । आच्छिद्यन्तेऽत्र । छिदिर्° । ल्युट् । पृषोदरादिः ।

आजम् । न । घृते । त्रि । अजस्यमांसादौ । यथा । तिलजतैलसुपाकसुपाचितंकासमर्दसुरसेविमर्दितम् । हूपभूपभवधूपधूपितं वह्निमान्द्यजरणंरुजापहम् । यादृशाधातवोनृणाम जानामपितादृशा. । अतोधातुविवृद्ध्यर्थमाजंमांसंप्रशस्यते । इति । अजस्येद मित्यर्थे अण् ।

आजकम् । न । छागवृन्दे । अजानांसमूहः । गोत्रोक्षोष्ट्रेतिवुञ् ।

आजकारः । पुं । भरोवृष । शिवस्यवृषे ।

आजगवम् । न । शिवस्यधनुषि । अजगवे । प्रज्ञाद्यण् ।

आजन्मसुरभिपत्रः । पुं । मरुवके ॥

आजमीढ । पुं । युधिष्ठिरपाण्डवे । स्वार्थेऽण् ।

आजानम् । न । देवलोके । स्वभावे ।

आजानदेवः । पुं । देवताविशेषे । यथा । सृष्टेराजननादादौ देवत्वंयेप्रपेदिरे । आजानदेवास्तेज्ञेयुः पूर्वैभ्य' सूक्ष्ममूर्त्तयःइति । पूर्वैभ्य. पूर्वंपूर्वैभ्य. । अपिच । कल्पादावेवदेवत्वंगता आजानदेवता इति ।

आजानुबाहुः । त्रि । जानुपर्यन्तदीर्घबाहुविशिष्टे । यथा । आजानुबाहु. सुशिराः सुललाटः सुविक्रम इति रामायणम् ।

आजानेयः । पुं । स्त्री । कुलीनाश्वे । शोभनाश्वे । यथा । शक्तिभिर्भिन्नहृदया. स्खलन्तस्पदेपदे । आजानन्ति यतः संज्ञामाजानेयास्तत स्मृताः ।

इत्यस्ययाभावम्। अजनम्। अज गति क्षेपणयोः। घञ्। आजेन क्षेपेण आनेयः प्रापणीयः आयत्तो वा।

आजिः। स्त्री। समभूमौ। सङ्ग्रामे। आक्षेपे। क्षणे। मर्यादायाम्। यथा। आजेः मरणाम्। अजन्त्यस्याम्। अज॰। अज्यतिभ्याञ्चेतीण्। अजनम्। इणजादिभ्य इतीण् विधानसामर्थ्यादजेर्नवी। अन्यथा। व्यादिभ्य इत्येवावक्ष्यत। वहुलंतणीति वा।

आजीवः। पुं। जीविकायाम्। आजीव्यते अनेन। जीवप्राणधारणे। हलश्चेति घञ्।

आजीवी। पुं। एकंदण्डिनि।

आजीव्यम्। न। उपजीव्ये।

आजु। स्त्री। वेतनंविनाकर्मकर्त्तरि। रेफान्त.।

आजू। स्त्री। वेतनंविनाकर्मकर्त्तरि। विष्टराम्॥ वेठी देहु इ॰ हिमश्रेण्यांप्रसिद्धम् बेगारीत्यन्यत्र॥ आजवति। जुगतौ। क्विब्विभच्छ्रौतिक्विप् दीर्घौ। षष्ठादभृतिकः क्लेशोविष्टिराजूश्चकीर्त्त्यते।

आज्ञप्तः। त्रि। आदेशिते। प्रमाणे।

आज्ञा। स्त्री। निदेशे। शासने। लताद्युपसंख्याने। आज्ञानम्। ज्ञा-अववोधने। आतश्चोपसर्गइत्यङ्। टाप्॥

आज्ञाकारी। त्रि। आज्ञानुवर्त्तिनि। आज्ञयाकर्मकारिणि।

आज्ञाचक्रम्। न। भ्रुवोर्मध्ये। षट्चक्रान्तर्गतषष्ठचक्रे। आज्ञासंज्ञकंचक्रम्। यथा। आज्ञाचक्रंतदूर्ध्वेतु आत्मनाधिष्ठितंपरम्। आज्ञासङ्क्रमणंतत्रतेनाज्ञेति प्रकीर्त्तितम्। तत्र निहितचित्तस्यपुरुषस्यसर्वपदार्थस्याज्ञाकारेण एवं भूतमेवंवर्त्तते एवंभविष्यतीतिज्ञानेन आज्ञायाइतः परं त्वयैवंकर्त्तव्यमिति परमेश्वराज्ञायाः सङ्क्रमणंभवति तेनहेतुनातदाज्ञाचक्रमितिकीर्त्तित मित्यर्थः।

आज्ञापकः। त्रि। आज्ञाकर्त्तरि।

आज्ञापत्रम्। न। आदेशलिपौ। निदेशलिखने। हुकमनामा इतिपारस्यभाषा।

आज्ञापनम्। न। विज्ञापने। जनावना इति भाषा।

आज्ञातः। त्रि। आज्ञाभिविशिष्टे। व्याप्ते।

आज्यम्। न। घृते। आअज्यतेऽनेन। अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु। आङ्पूर्वादञ्जेःसंज्ञायामितिक्यप्। आअनक्त्यनेनवा। श्रीवासे।

आज्यपाः। पुं। पुलस्त्यस्यतनयेषु वैश्या

नापिहषु । आज्यंपिभ्‌त । पापाने । क्विप् ।

आज्यभागः । पुं । वैदिकानामाहुतिविशेषे । तत्र । ऋग्वेदिनामग्नेरुत्तरभागे स्रुवेणाग्निसम्प्रदानक घृताहुति. । तद्दक्षिणभागे सोमसम्प्रदानकाहुतिश्च । यजुर्वेदिनान्तुअग्नेरुत्तरदक्षिणयो पश्चिमादिप्राच्यन्तघृत-धारेति पशुपतिः ।

आज्यस्तोत्रम् । न । सामगानां प्रातःसवनेगायत्रसाम्नागीयमानेष चतुर्षुस्तोत्रेषु ।

आञ्जनेयः । पुं । हनूमति । यथा । उल्लङ्घ्यसिन्धोः सलिलंसलीलंयः शोकाग्निंजनकात्मजायाः । आदायतेनैव ददाहलङ्कांनमामितंप्राञ्जलिराञ्जनेयमिति । अञ्जनाया अपत्यम् । स्त्रीभ्योढक् ।

आञ्जिनेयः । पुं । अञ्जनहारी इतिभाषाप्रसिद्धे जन्तुविशेषे । इतिशब्दमाला ।

आटरूषः । पुं । वृषे । वासके । अटरूषएव । स्वार्थेऽण् ॥

आटिः । पुं । शरारिपक्षिणि । आअटति । अटगतौ । इन् ।

आटिकी । स्त्री । अनुपजातपयोधरादिस्त्रीव्यञ्जनायाम् । गृहान्तरादटनाद्वाऽऽटिकी ।

आटिक्यः । त्रि । अटना प्रवृत्ते ॥

आटीकनम् । न । वत्सानांगमने । आ ईषत् । टीकृगतौ । ल्युट् ।

आटीकरः । पुं । वृषे ॥

आटीकलम् । न । वत्सानांक्रीडास्थानम् ॥

आटोपः । पुं । दर्पे । संरम्भे । आनाहे । उदरेवायुजन्यगुडगुडाशब्दे ।

आडम्बरः । पुं । तूर्यस्वने । पक्ष्मणि । संरम्भे । कोपे । गजगर्जिते । युद्धपटहे । हर्षे । आरम्भे । दर्पे । यथा । असारस्यपदार्थस्यप्रायेणाडम्बरोमहान् । नहितादृक् ध्वनिः स्वर्णेयादृक्कांस्येप्रजायते इति । आडम्ब्यते । डविक्षेपे । चु० । घञ् । भावेवा । आडम्बंराति रायतिवा । आतोनुपेतिकः । मूलविभुजेतिवाकः । आडम्बयतिवा । बाहुलकादरन् ॥

आडिः । स्त्री । शरालिखगे । स्वनाम्नाख्याते मत्स्यविशेषे । इति गौडाः । आअडति । अडउद्यमने । इन ॥

आडिका । स्त्री । शरारिविहगे ।

आडी । स्त्री । शरालिपक्षिणि । कृदिकारादितिङीष् ।

आडूः । पुं । उडुपे । भेले । जलप्लवद्रव्ये । डोंगा डोंगी इतिभाषाप्रसिद्धे ।

अयाति। अयशब्दे। अणोडश्चेत्युः॥

आढकः। पुं। न। धान्यमानभेदे। सर्वतोदशाङ्गुलमाने। प्रस्थचतुष्टये॥ चतुःप्रस्थमथाढकमित्युक्तेः॥ चतुष्कलमितेधान्यमानपात्रे॥ पुष्कलानितु चत्वारिआढकः परिकीर्त्तितः-इतिवचनात॥ द्रोणचतुर्थोभागइति लीलावती॥ अष्टमुष्टिर्भवेत्कुञ्चिरित्यादिवचनात् षटपञ्चाशदधिकद्विशतमुष्टिर्भवति। व्यवहारे षोडशसेरोविंशतिसेरोवा। वैद्यकमते ...उशरावपरिमाणम्। तत्पर्यायः। पात्र... कंतम भाजनमितिपरिभाषा॥ अपचयविवक्षायामाढकिकेष्वपिस्यादितिसारसुन्दरी॥

आढकिकः। त्रि। आढकपरिमितव्रीह्यादिवापयोग्येक्षेत्रे। आढकस्यवापः। तस्यवापइतिठञ्। आढकंपचति। सम्भवत्यवहरतिपचतीतिठञ्। टिड्ढेतिङीप् आढकिकी।

आढकी। स्त्री। शमीधान्यविशेषे। तुवरीम। अ...र इतिभाषा। अस्यागुणा यथा। आढकीतुवराक्षाग्रमधुराशीतलालघु'। ग्राहिणी वातजननीवर्ण्यापित्तकफास्रजिदिति। परिमाणान्तरे। आसमन्तात्ढौकते ढौक्यतेवा। ढौकृगतौ। अच्घञ्वा। पृषोदरादिः। आढकमस्त्यस्याःपरिच्छेदकत्वेन। अर्शआद्यच्वा। गौरादित्वान्ङीष॥

आढकीनः। त्रि। आढकिके॥ आढकं सम्भवति अवहरति पचतिवा। आढकाचितपात्रात् खोन्यतरस्यामितिखः॥

आढ्यः। त्रि। युक्ते। विशिष्टे॥ यथा गुणाढ्यो धनाढ्यइति॥ सम्पन्ने। ...हुधने॥ आध्यायति। ध्यै०। आतइतिकः। पृषोदरादिः। यद्वा। आढौकते अनायम्। ढौकृगतौ। बाहुलकात् य्यः। शरीरं मानुष्यंगुणाढ्यो ह्याढ्यउच्यते।

आढ्यचरः। त्रि। पूर्वमाढ्ये। आ...भूतपूर्वं। भूतपूर्वेचरट्। ङीं। आढ्यचरी।

आणकः। त्रि। अधमे। अणकएव। स्वार्थेऽण्।

आणवम्। न। अणिमनि। अणुत्वे। अणोर्भावः। इगन्ताच्चेत्यण्।

आणवीनम्। त्रि। अणव्ये। अणुधान्योद्भवे क्षेत्रे॥ अणूनां भवनं क्षेत्रम्। विभाषातिलमाषोमाभङ्गाणुभ्यइतिखञ्।

आणिः। पुं। स्त्री। अक्षाग्रकीले। रथचक्राग्रस्थितकीले। अश्र्याम। को।

टौ। सीमनि॥

आण्डम्। त्रि। अण्डसम्भवे॥

आण्डजः। त्रि। अण्डजे॥ स्वार्थे अण्॥

आण्डीरः। त्रि। आण्डवति। आण्डो स्यास्य। काण्डाण्डादीरन्नीरचाविति रच्॥

आतः। ा। इतोपीत्यर्थे॥

आतङ्कः। पुं। रोगे॥ सन्तापे॥ शङ्कायाम्॥ मुरजध्वनौ॥ भये। ज्वरे॥ आतङ्कनम्। तकिकृच्छ्रजीवने। घञ्। हलश्चेतिकरणेवा॥

आतञ्चनम्। न। प्रतीवापे। गलितस्य स्वर्णादेर्द्रव्यान्तरेणाव चूर्णने। इति स्वामी। निःचेपणमिति सुभूतिः। उपद्रव इति रायमुकुटः। द्रवद्रव्यप्रक्षेपणोचित चूर्णमिति सारसुन्दरी॥ दुग्धादेर्दध्यादिभावार्थं तक्रादि प्रक्षेपे॥ जवने। वेगे॥ प्रापणे। आप्यायने॥ तञ्चुगतौ। ल्युट्॥

आततः। त्रि। विस्तृते॥ व्याप्ते॥ आसमन्तात्ततम्। आतन्यतेवा। तनु विस्तारे। तनिमृङ्भ्यांकिच्चेतितन्। आतन्यतेस्मवा। क्तः। अनुदात्तोपदेशेतिनलोपः॥

आततायी। त्रि। वधोद्यते॥ तद्यथा। अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी चषडेते ह्याततायिनः॥ आततायिनमायान्तं हन्यादेवाविचारयन्। नाततायिवधे दोषोहन्तुर्भवतिकश्चनेति॥ द्रोहकारिणि॥ आततंयथा तथा अयितुशीलमस्य॥

आतपः। पुं। प्रकाशे। द्योते। सूर्यालोके॥ अस्यगुणा यथा। आतपः कटुकोरूक्षःस्वेदमूर्च्छातृषावहः। दाहवैवर्ण्यजननो नेत्ररोग प्रकोपणः। इति॥ आतपति। तपसन्तापे। अच्॥

आतपत्रम्। न। छत्रे॥ आतपात् त्रायते। त्रैङ्पालने। आतोनुपेतिकः। सुपीतियोगविभागादाकः॥

आतपवारणम्। न। छत्रे॥ आतपस्य वारणम्॥

आतपाभावः। पुं। छायायाम्॥

आतपोदकम्। न। मृगतृष्णाजले॥ आतपेनोष्णोदके॥ आतपस्यउदकम्॥

आतरः। पुं। तरपण्ये। नद्यास्तरणार्थेदेयकपर्दकादौ॥ यथा॥ आतरणा घवहेतोर्मुररिपुतरणौ तत्रावलम्बस्व। अपणं पणमिहकुरुषे नाविकपुरुषे न विश्वासइति॥ आतरन्त्यनेन। पुंसिसंज्ञायामितिघ.॥

आतर्पणम्। न। प्रीणने। तृप्तौ। मङ्गलालेपने॥ आङ्पूर्वात्तृपेर्भावेल्युट्॥

आतापी । पुं । असुरविशेषे ॥
आतायी । पुं । चिल्ले । चील इति प्र० ख्यगे । आतायते तच्छील. । तायृ सन्तानपालनयो. । सुप्यजाताविति णिनि. । यद्यप्यत्रवृत्तिकारादिभिरनुपसर्गे इत्युक्तम् तथापि भाष्ये उपसर्गे णिनिः स्वीकृतः ।
आतार. । पुं । तरपण्ये । आतरे ॥
आति. । स्त्री । शरारिविहगे । आअति । अत० । अज्यतिभ्यांचेतीण ॥ यद्वा । अतनम् । इणजादिभ्यतीण् ॥
आतिथेयम् । न । अतिथ्यर्थे । अतिथिभोजनादौ । त्रि । अतिथौ साधौ । अतिथिसेवके । तत्रसाधुरित्यधिकारे । पथ्यतिथिवसतिस्वपतेर्ढञ् । स्त्री । ङीप् ॥
आतिथ्य । पुं । अतिथौ । त्रि । अतिथ्यर्थवस्तुनिभक्ष्यभोज्यादौ । अतिथिसेवायाम् ॥ अतिथयेइदम् । अतिथेर्ञ्य. ।
आतिवाहिकः । पुं । अर्चिरादिमार्गे ॥ न । शरीरान्तरे । देवतायेनशरीरेण विशिष्टंजीवं परलोकं नयतितदातिवाहिकं शरीरान्तरमितिव्याख्यानात् ॥
आतुः । पुं । उडुपे । भेलके । डैंगा डैंगी इतिभाषा ।
आ[illegible] त्रि । आमयाविनि । रोगिणि । कातरे । आतुतोर्त्ति । तुरत्वरणे । छान्दसाअपिक्वचिद्भाषायां प्रयुज्यन्ते । इगुपधेतिकः ॥
आतृप्यम् । न । आता इतिगौड़भाषाप्रसिद्धे फलविशेषे । सरीफा इति भाषाप्रसिद्धे ॥ अस्यगुणास्तु । तृप्तिजनकत्वरक्तवर्द्धकत्वस्वादुत्वशीतत्वबलमांसकारित्वहृद्यत्वदाहरक्तपित्तवायुनाशित्वानीतिद्रव्यगुणाः ।
आतोद्यम् । न । वीणावंश्यादिवाद्ये ॥ तच्चतुर्विधं भवति यथा । ततवीणादिकंवाद्य मानद्धं मुरजादिकम् । वंश्यादिकन्तुशुषिरं कांस्यतालादिकंघनमिति ॥ आसमन्तात् तुद्यते । तुदव्यथने । ण्यत् ।
आत्त । त्रि । गृहीते । ग्रस्ते ॥
आत्तगन्धः । त्रि । दूरीभूताहङ्कारे । अभिभूते । आत्तः अरिणागृहीतः गन्धोगर्वोयस्यसः । गृहीतगन्धे ।
आत्तगर्व । त्रि । भग्नाहङ्कारे । आत्तगन्धे । आत्तः वैरिणा गृहीतोगर्वोयस्य ।
आत्मगुणः । पुं । तार्किकसमयप्रसिद्धेषु बुद्ध्यादिचतुर्दशसु ॥ तेचोक्ताः । बुद्ध्यादिषट्कं सङ्ख्यादि पञ्चकं भावना तथा । धर्माधर्मौ गुणाएते

आत्मनःस्युश्चतुर्दश।तेषुनवासाधारणगुणाः।पञ्चसाधारणगुणाः॥इति॥अत्राहुः। काणादजैमिनीयैर्श्चिच्छ।।आत्मनोगुणाः। उक्ताब्रह्मात्मनोनैतेकिन्तु लिङ्गात्मनोहिते-इति॥

आत्मगुप्ता। स्त्री। कौंचइति प्र० लताविशेषे। मर्कट्याम्। शूकशिम्ब्याम्॥आत्मनागुप्ता दुस्पर्शत्वात्। कर्त्तृकरणे इतिसमासः॥त्रि। स्वरक्षिते॥

आत्मग्राही। त्रि। कुक्षिम्भरौ। स्वोदरपूरके। स्वार्थिनि॥

आत्मघाती। त्रि। आत्महन्तरि॥ अवैधबुद्धिपूर्वकात्महनने॥ यथा। व्यापादयेत् वृथात्मानस्वयंयोऽग्न्युदकादिभिः। विहितंतस्यनाशौचंनाग्निर्नाप्युदकादिकमिति कूर्मपुराणम्॥

आत्मघोष.। पुं। काके॥ कुक्कुटे। काकाइतिशब्दात् आत्मानं घोषयति। घुषिर्विशब्दे। अण्॥

आत्मचैतन्यम्। न। नित्यज्ञानस्वरूपे॥

आत्मजः। पु। तनये। पुत्रे। आत्मनोदेहाज्जातः। पञ्चम्यामजाताविति जनेर्डः॥

आत्मजन्मा। पुं। पुत्रे। सुते। आत्मनोजन्मास्य॥

आत्मजा। स्त्री। कन्यायाम्। दुहितरि॥ बुद्धौ॥ आत्मनोजाता। डः। टाप्॥

आत्मतत्त्वम्। न। तत्तद्भासकेनित्यशुद्धबुद्धमुक्तसत्यस्वभावेप्रत्यक्चैतन्ये॥

आत्मदः। पुं। अविद्यानिरासेनजीवस्वरूपाभिव्यञ्जकेश्रीगुरौ॥ हरौ॥ आत्मानंददाति। डुदाञ्दाने। आतइतिकः॥

आत्मदर्शः। पु। दर्पणे॥ आत्मास्वरूपं दृश्यतेऽनेन अथवा। पुंसीतघ॥

आत्मध्यानम्। न। आत्मनश्चिन्तने॥ ब्रह्मैवास्मीतिसद्वृत्त्यानिरालम्बतयास्थितिः। ध्यानशब्देनविख्यातापरमानन्ददायिनी त्याचार्योक्तेः॥

आत्मा। पुं। स्वभावे। यथा। पुण्यात्मा॥ प्रयत्ने। यथा। महात्मा॥ शरीरे। यथा। कृष्णात्मा॥ परव्यावर्त्तने। यथा। मैत्रेणात्मनाकृतम्॥ मनसि॥ धृतौ॥ मनीषायाम्॥ अर्के॥ हुताशने॥ वायौ॥ जीवे। क्षेत्रज्ञे। त्वंपदार्थे। नित्योपलब्धिस्वभावे। प्रत्यगात्मनि॥ यथा। प्रत्यग्रूपः परागरूपाद्व्यावृत्तोनुभवात्मकः। प्रथतेयःसआत्मेति प्राहुरात्मविदोबुधाइति॥ अवस्थात्रयभावाभावसाक्षित्वेन सत्यज्ञानादिस्व

रूपे। निष्प्रपञ्चरितस्वरूपे। ज्ञान सृष्त्योराश्रये।सर्वजन्तूनां प्रत्यक्चे तन्ने स्वसंवेद्ये प्रसिद्धे। मुख्यगौणमिथ्येति त्रिविधेषु साक्षिपुत्रादिदेहादिलक्षणेषु। भूतात्माचेन्द्रियात्माच प्रधानात्मातथा भवान्। आत्माच परमात्माचत्वमेकः पञ्चधास्थितः॥ त्यज्यमानेपिनत्यक्तः प्राप्यमाणेपि नाप्यते। आगमापायसाक्षीयःसआत्मानुभवात्मकः॥ विशुद्धचिद्रूपे त्वम्पदलक्ष्ये तुरीये। अहंप्रत्ययवेद्ये॥ इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनोलिङ्गम्। न्यायसूत्रम्। १।१०॥ यच्चाप्नोतियदादत्ते यच्चात्तिविषयानिह। यच्चास्यसन्ततोभावस्तस्मादात्मेतिकीर्त्तितः॥ अततिसन्ततभावेनजाग्रदादिसर्वावस्थास्वनुवर्त्तते। अतसातत्यगमने। सातिभ्यां मनिन्मनिणाविति मनिण्। भावे॥ ब्रह्मणि॥ यथा। आत्मैवेदंसर्वम्॥ हार्दाकाशे॥

आत्मनीनः। पुं। सुते॥ श्याले॥ माणधारे॥ विदूषके॥ त्रि। आत्मने हिते। यथा। अद्यापि नैवात्मनीनं कृतं कर्म्मयातंजनुः कापिलब्धंनवै भर्म। किंदारदेहात्मजस्वर्गवृन्देनचेतोरतिंविन्दसेचेन् मुकुन्देनेति॥ पथ्ये॥ आत्मनेहितम्। आत्मन्विश्वजनभोगोत्तरपदात् खः॥

आत्मपरिज्ञानम्। न। ब्रह्मात्मैक्यसाक्षात् कारे॥ आत्मनः परिज्ञानम्॥

आत्मप्रकाशः। पुं। आत्मनः प्रकाशे॥ आत्मनस्ततप्रकाशस्वंयत पदार्थावभासनम्। नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यान्ध्यंयतोनिशि॥

आत्मबन्धुः। पुं। पितृष्वसुः पुत्रे॥ मातुलपुत्रे॥ मातृष्वसुः पुत्रे॥ आत्मनोबन्धुः॥

आत्मवीरः। पुं। प्राणवति॥ श्यालके॥ विदूषके॥

आत्मभवः। पुं। सुरज्येष्ठे। चिरब्रह्मगर्भे॥ विष्णौ॥

आत्मभावः। पुं। मनोवृत्तौ॥

आत्मभूः। पुं। ब्रह्मणि। पितामहे। चतुराननो॥ कामदेवे॥ विष्णौ॥ शिवे॥ आत्मनोविष्णोः सकाशात् आत्मनास्वयमेववाभवति। भू०। भुवःसंज्ञान्तरयोरितिक्विप्॥

आत्ममूली। पुं। दुरालभायाम्॥

आत्मम्भरिः। त्रि। स्वोदरपूरके। आत्मोदरमात्रस्य भरणकर्त्तरि। आत्मानंविभर्त्तीतिविग्रहे फलेग्रहिरात्मम्भरिश्चेतिआत्मनोमुमागमोभृञः इन्प्रत्ययश्चनिपात्यते॥

आत्मयाजी। त्रि। सर्वत्रपरमात्मभावना। पुरस्सरं नित्यं विहितकर्मणोनुष्ठातरि। आत्मशुद्ध्यर्थं मेवस्वर्गाद्यासङ्गंहित्वायोदेवान्यजतेसतत्त्वयथं॥

आत्मयापनम्। न। कालक्षेपे। शरीररक्षणे। आत्मनः स्वस्ययापनम्।

आत्मयोनिः। पुं। कामदेवे। परमेष्ठिनि॥ शिवे। विष्णौ। आत्मैव योनिः उपादानकारणमस्य।

आत्मरक्षा। स्त्री। महेन्द्रवारुणीलते। आत्मनोरक्षणे।

आत्मलाभः। पुं। ज्ञाने। आत्मनो ह्यलाभोऽज्ञानमेव तस्मात् ज्ञानमेवात्मनोलाभः। नञ्‌ज्ञानमात्ममवद्‌प्राप्तिलक्षणआत्मलाभः स्वरू[पल]क्षणयोभेदाभावात्। आत्मलाभात्परोलाभोनास्तीति मुनयो विदुः।

आत्मलोकः। पुं। स्वस्वरूपे॥ आत्मैवलोकः॥

आत्मलोम। न। श्मश्रुणि। स्वलोममात्रे।

आत्मवान। त्रि। अप्रमत्ते। अप्रमादिनि। सर्वदासावधाने। ज्ञानिनि। स्वेमहिम्निसदाप्रतिष्ठिते॥ धृतिमति। मनस्विनि। अस्त्यर्थेमतुप्। आत्मवान्स्वस्वमानुक्तपृच्युतस्वबाला।

आत्मवश्यः। त्रि। मनोधीने। स्वाधीने॥ आत्मनोवश्यः। आत्मार्थ्येय स्यवा।

आत्मवित्। त्रि। मुक्त। आत्मानिस्वंश ब्दादिविषयबुद्धिप्रत्ययसाक्षिणं यो वेदसतथा। कर्मिणि। आत्मानंशरीरेन्द्रियाद्यतिरिक्तनित्याद्यकरणं परलोकेदुःखभागिनवेत्ति विजानातीति तथा॥

आत्मशल्या। स्त्री। शतावर्य्याम्॥

आत्मशुद्धिः। स्त्री। चित्तशुद्धौ। आत्मन शुद्धिः।

आत्मसम्भावितः। त्रि। सर्वगुणविशिष्टोहमित्यात्मनैव पूज्यताप्रापितो नकैश्चित् साधुभिस्तथ। आत्मनासम्भावितः।

आत्मसाक्षी। त्रि। बुद्धिवृत्तिषु।

आत्मस्थः।। त्रि। हृदिस्थे।

आत्महत्या। स्त्री। आत्मघाते। स्ववधे।

आत्महा। पुं। देवाजीवे। देवले। त्रि। आत्मघातिनि। उदरभेदिनि। अनात्मन्यात्माभिमानिनि। अविदुषि। आत्मघातस्य प्रायश्चित्तविधानाद र्शनात् संसरणमेवफलं निश्चितम्॥ आत्मानंहन्तिक्विप्। आत्माज्ञानंसर्वपापस्यमूलम। अविद्यादोषेणविद

मानस्यात्मनस्तिरस्करणात् विद्यया
नन्यात्मनो यत्तात्पर्यं फलमजरामर-
त्वादिसंवेदनादिलक्षणं तद्गतस्ये-
वतिरोभूत भवतीति प्राकृतोऽवि
द्यानात्महेत्युच्यते। येयथासन्तमा
त्मानमकर्त्तारं स्वयप्रभुम्। कर्त्ता
भोक्तेतिमन्यन्तेतएवात्महनोजनाः।
यथाहुराचार्याः। लब्ध्वाकथञ्चि-
न्नरजन्मदुर्लभं तत्रापिपुंस्त्वंश्रुतिपा
रदर्शनम्। यस्त्वात्ममुक्त्यै नयतेतम्
दधी. सह्यात्महास्वं विनिहन्त्यसद्
ग्रहादिति। नृदेहमाद्यंसुलभं सु
दुर्लभं प्लवसुकल्पगुरुकर्णधारम्। म
यानुकूलेन नभस्वतेरितं पुमान् भ
वाब्धिं नतरेत् सआत्महेति श्री-
भागवतम्।

आत्माधीन। पुं। सुते। पुत्रे। प्राण
धारे॥ त्र्य.ले। विदूषके। इतिहे
मचन्द्र.। त्रि। स्वायत्ते। आत्मनो
ऽधीन.।

आत्माशी। पुं। मत्स्ये। इतित्रिकाण्ड
शेष॥

आत्माश्रय। पुं। दोषविशेषे। स्वापे
क्षत्व मात्माश्रयः। स्वस्यस्व.पेक्षत्वे
ऽनिष्टप्रसङ्गमात्माश्रयः। सचोत्पत्ति
स्थितिज्ञप्तिद्वारात्रेधा। यथा। यद्य
यंघटं एतद्घटजन्यः स्यात् तदा एतद्

घटानाधिकरणक्षणोत्तरवर्त्ती भस्या
त्। यद्ययंघटएतद्घटवृत्ति' स्यात् ए
तद्घटव्याप्योनस्यात्। यद्ययंघट एत
द्घटज्ञानाभिन्नःस्यात् ज्ञानसामग्री
जन्य' स्यात्। एतद्घटभिन्नःस्यादि
तिवासर्वत्रापाद्यम्॥

आत्मीयः। त्रि। अन्तरङ्गे। स्वकीये।

आत्मोद्भवः। पुं। आत्मजे। पुत्रे।

आत्मोद्भवा। स्त्री। दुहितरि। पुत्र्या
म्। माषपर्ण्याम्।

आत्मोपजीवी। पुं। भारिकादौ। दे
हक्लेशोपजीविनि। आत्मनादेहे
नउपजीवितुं शीलमस्य। सुप्यजाता
विति णिनिः।

आत्यन्तिकम्। त्रि। अतिशयेन॥

आत्ययिकः। त्रि। अत्ययः प्रयोजनम
स्येत्यर्थे। अत्ययार्थे। विनयादि-
त्वात् स्वार्थे ठक्॥

आत्रेयः। पुं। अत्रिमुनेः पुत्रेषु। तेच
त्रयः। दत्तोदुर्वासाश्चन्द्रश्चेति। अत्रे
रपत्यम्। इतश्चानिञ इतिढक्॥ श
रीरस्थरसधातौ। इतिहेमचन्द्रः।

आत्रेयिका। स्त्री। ऋतुमत्याम्। इति
हलायुध.।

आत्रेयी। स्त्री। ऋतुमत्याम्। पुष्पव
त्याम्। नदीविशेषे। आत्रेयीवाऽ
गम्यत्वात्। अपत्ये ढक्। ङीप्॥

आथर्वण । पुं । अथर्ववेदज्ञब्राह्मणे । पुरोहिते । आथर्वणिकस्यायं धर्मआम्नायोवा । आथर्वणिकस्येकलोपश्चेच्यण् इकोलोपश्च । न । अथर्वणास महे ॥ भिक्षादिभ्योण् । शान्तिगृहे ।

आथर्वणिक । पुं । अथर्वाध्ययनपरे । अथर्वाणमधीते । वसन्तादिभ्यष्ठक् । नाण्डिनायनेतिनिपातनाट्टिलोपो न भवति ।

आददानः । त्रि । उपादानंकुर्वति ।

आदमः । पुं । मुनिविशेषे ॥ अयञ्च रसलप्रवर्त्तकोद्वापरान्तेबभूव ।

आदरः । पुं । आरम्भे । सन्माने । सम्भ्रमादरे । दृ विदारणे । आङ्पूर्व ऋदोरप् ।

आदर्शः । पुं । टीकायाम् । दर्पणे । प्रतिपुस्तके । आदृश्यते रूपमत्र । दृशिर्प्रेक्षणे । हलश्चेति घञ् ।

आदह । ? । उपक्रमे । कुत्सने । हिंसायाम् ।

आदाता । त्रि । ग्रहीतरि ।

आदानम् । न । ग्रहणे । स्वीकारे । वाजिनामलङ्कारे । रोगलक्षणे । आङ्पूर्वाद्दाञो ल्युट् ।

आदानी । स्त्री । ननुवाँ इति प्रसिद्धे फलशाके । हस्तिघोषायाम् ।

आदास्यमानः । त्रि । गृहीष्यमाणे ।

आदि । पुं । प्रथमे । प्रागसत्त्वस्य याम । नियतपूर्ववृत्तिकारणे । उन्द सौ हेतौ ॥ आदिशब्द पदान्तेतु गणस्य सूचकोमतः । यथा गर्गादि ॥ सामीप्येथव्यवस्थायां प्रकारेऽवयवेतथा ॥ आदिशब्दन्तुमेधावीचतुर्ष्वर्थेषु लक्षयेत् । आमूथर्मदीयतेगृह्यते । डुदाञ् । उपसर्गेघोः किः । यद्वा । अदनम् । अद । इणजादिभ्यइतीण् । पूर्वकालवृत्तित्वमादित्वम् ॥

आदिकर । पुं । प्रथमकर्त्तरि । आदेः कर्त्तरि ॥ आदिंकरोति । दिवाविभेतिट ।

आदिकविः । पुं । ब्रह्मणि । वाल्मीकिमुनौ । प्राचेतसे । आदौकविः ॥ कर्मधारयोवा ॥

आदिकारणम् । न । पूर्वनिर्दिष्टे । मूलहेतौ । निदाने । आदौ कारणम् । आदि मुख्यंकारणम् ॥

आदिगदाधर । पुं । गयास्थदेवताविशेषे ।

आदिजिन । पुं । ऋषभदेवे ।

आदितः । ? । आदावित्यर्थे । आद्यादिभ्यउपसंख्यानात् तसिः

आदितालः । पुं । तालविशेषे ॥ यथा एकएवलघुर्यत्रआदितालः सकथ्यते ॥

आदित्य | आदित्यी

।गुरुस्तत पुरतोवाच्य'प्रायेणैतन्निद शनमितिसङ्गीतदामोदर: ॥

आदितेय. । पुं । देवे । अदित्या. अपत्यम् । कृदिकारादक्तिन इतिङीषन्तात् स्त्रीभ्योढक । तस्य एयादेश ।

आदित्य: । पुं । सवितरि । सूर्ये ॥ देवे ॥ आदित्याद्वादशप्रोक्ताइतिवचनात् गणेबहुवचनान्त. । यथा । तत्रचद्वादशादित्याश्चैत्रादिषु तपन्ति ये । विष्णुयमविवस्वन्तोंशुमान् पर्जन्य इत्यपि। वरुणेन्द्रधातृमित्रा पूषा त्वष्टाभग.परइति । विष्णौ । आदित्यमण्डलान्तस्थे हिरण्मयेपुरुषे । अर्कवृक्षे । अदिते रादित्यस्यवाअपत्यमित्यर्थे दित्यदित्येतिण्य: ॥ अदितेरखण्डितायामह्या: अयंपतिरित्यर्थेवा मण्य. । पुनर्वसुनक्षत्रे द्विवचनान्त: । न । उपपुराणविशेषे ॥

आदित्यपत्र' । पुं । क्षुपविशेषे । अर्कपत्रे ॥

आदित्यपुष्पिका ।स्त्री। लोहितार्के ।

आदित्यभक्ता । स्त्री । सुवर्चलायाम् । हुलहुल इति प्रसिद्ध शाके ।

आदित्यभवनम् । न । उदयाद्रौ । आदित्योऽस्मिन्भवति प्रादुर्भवति ।

आदित्यवर्ण' । त्रि । सर्वजगतोऽवभासके स्वभानेऽन्यप्रकाशानपेक्षे । आदित्य:वर्णोऽस्य ।

आदित्यसूनु: । पुं । सुग्रीववानरे यमे । कर्णे । शनौ ॥ सावर्णिमनौ ॥ वैवस्वतमनौ । आदित्यस्यसूनु:॥

आदिदेव: । पुं । देवदेवे । महादेवे । नारायणे । विष्णौ । जगदुपादानादिगुणवति वासुदेवे । विधातरि । आदि:कारणम् सचदेवश्च ।

आदिपुरुष' । पु । ब्रह्मणि । चतुर्मुखे ।

आदिवराह: । पु । विष्णौ । हरौ ॥

''दिमम् । त्रि । आद्ये । प्रथमभववस्तुनि । आदौ भवम् । मध्यान्मइत्यआदेश्चेतिवचनात् म: । यद्वा । आआदिमश्चाड्डिमच् ।

आदिमत । त्रि । कार्य्ये । सकारणे ॥ आदिर्विद्यतेऽस्य । मतुप् ॥

आदिराज: । पुं । पृथुसंज्ञके नृपे । आदौराजा । टच् ।

आदिशक्ति' । स्त्री ।,परमात्मशक्तौ ।

आदिष्टम् । त्रि । आदेशिते । उपदिष्टे । न । आज्ञप्ते ॥ उच्छिष्टे । आदिश्यते । दिश: क्त: । आदिष्टमादेशितेचिषु । आज्ञप्तोच्छिष्टयो: क्लीवमिति मेदिनी ।

आदिष्टी । त्रि । आदेशकर्त्तरि । आदिष्टमनेन । इष्टादिभ्यश्चेति इनि:

। पु । ब्रह्मचारिणि । अलादेशनम आद्य । त्रि । प्रथमे । आदिमे ।

आदिष्टंतदस्यास्ति । इति ।

आदीनव । पु । दोषे । परिक्लिष्टे । दु रन्ते । आदानम । दीङ क्षये । भावे क्त । स्वादयश्चादित । ओदितश्चे- तिनत्वम् । आदीनस्यवानम् । घञ र्थेकइति वाहुलकाद्दाते क ।

आदीपनम । न । आलिम्पने । सन्दी पने ।

आदृत । त्रि । कृतादरे । सादरे । अर्चिते । पूजिते । आद्रियतेस्म । दृङ्आदरे । क्त ।

आदेश । पुं । आम्नायाम् । शासने । उपदेशे । शास्त्राचार्य्योपदेशगम्ये । कर्मसञ्चारे । ज्योतिश्शास्त्रफले । वर्णस्थाने वर्णान्तरोत्पत्तौ । प्रकृतिप्रत्ययोपघातिकार्ये । आदेशनम् । आदिश्यते येनवा । दिश० । घञ् ।

आदेशी । पुं । दैवज्ञे । गणके । त्रि । आदेशवति । म० इनि । उपदेशके । आदिशतितच्छील । ।

आदेष्टा । पुं । आदेशकर्त्तरि । ऋत्विजि । यजमाने । यागविषये समेष्ट सम्पादनाय यज्ञार्थं कर्मकुर्विति ऋत्विजांप्रेरके । आदिशति ऋत्विजादीन् यागादिस्वेष्टसम्पादनाय प्रेरयति । दिशअतिसर्जने । तृच् ।

दनीये । न । धान्ये । ऊ दे स्व दिगादिर्म्यायत ।

आद्यकवि । पुं । धातरि । वाल्मीके ।

आद्यमाषक । पु । माषकपरिमाणे । पञ्चगुञ्जासु । सुवर्णपञ्चेसमधते वि ज्ञेयो रौप्यमाषक इत्यपिदर्शनात् । केचित अद्यमस्मिन्कालेरुष्या हु. । पूर्वंतु माषकंसप्तकृष्णलाइति । मष्यते । मषहिंसायाम् । हलश्चेति घञ । क । आद्योमुख्यश्चासौ माषकश्च ।

आद्यबीजम । न । आदिकारणे । निमित्ते । आद्यंमुख्यंबीजम् ।

आद्या । स्त्री । उमायाम् । दुर्गायाम् । काल्याम् । तारायाम । त्रिपुरसुन्दर्याम् । भुवनेश्वर्याम् । प्रकृतौ । यथा । सत्येतुसुन्दरी आद्या त्रेतायांभुवनेश्वरी । द्वापरेतारिणी आद्याकलौ काली प्रकीर्त्तितेतिमुण्डमालातन्त्रम । आदौभवा । दिगादित्वाद्यत् । टाप् ।

आद्याकाली । स्त्री । पराय । प्रकृतौ । यथा । कालसङ्ग्रसनात्कालीसर्वेषामादिरूपिणी । कालत्वादादिभतत्वादाद्याकालीति गीयतइति श्रीमहानिर्वाणतन्त्रम् ।

आधून । त्रि । आदिहीने । औदरिके । विजिगीषाविवर्जिते ॥ विजिगीषा व्यवसायःकश्चित् प्रकर्षो वा आलस्यात् तेनविहीनोऽथ' केवलमुदराधीन इतिभरतः ॥ आदेवीत् । आङ् पूर्वाद्दीव्यतेरकर्मकत्वात् क्तः । दिवो विजिगीषायामितिनिष्ठातस्यनत्वम् । यस्यविभाषेतिनेट् । च्छ्वोरित्यूठ् ॥

आद्योपान्तम् । न । पूर्वापरमित्यर्थे ॥

आधमनम् । न । बन्धके । इतिस्मृतिः ॥

आधर्म्मिक' । त्रि । अधर्मशीले । अधर्मं चरति । अधर्माच्चेतिवार्त्तिकात् ठञ् । चरतिरिहासेवायाम् । नत्वनुष्ठानमात्रे । तेन दैववशात् अधर्मे प्रवृत्तो पिसुवृत्त. आधर्मिक इतिनोच्यते ॥

आधर्षित' । त्रि । अवमानिते ॥

आधानम् । न । अग्न्याधाने । गर्भाधाने । बीजप्रक्षेपकाले । आधीयते । डुधाञ् । ल्युट् । बन्धके । स्थापितद्रव्ये ॥

आधानिकम् । न । गर्भाधानसंस्कारे ॥ आधानम् प्रयोजनमस्य । प्रयोजनमिति ठक् ॥

आधारः । पुं । अधिकरणे । आश्रये । औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा । यथा । कटे आस्ते स्थाल्यां पचतीत्यौपश्लेषिकस्योदाहरणम् । मोक्षेइच्छास्तीतिवैषयिकस्य । सर्वस्मिन्नात्मास्तीत्यभिव्यापकस्योदाहरणम् ॥ अम्बुधारणे । जलादिसेकार्थं सेतुना वहुनालं जलं निरुध्ययत्स्थाप्यते स आधारोवढुकन्दरादिः वाधबन्धइतिख्यात टीका इतिचेतिभरतः । यस्यार्थं जलवन्धनमाधारइति वैकुण्ठः ॥ जलादिसेकार्थं जलाधारस्थान माधार इति मधु. ॥ आलवाले । आध्रियन्ते अस्मिन्निति आधारः । अध्यायन्यायेतिसूत्रे अवहाराधारे त्यु पसंख्यानाद्धिकरणेघञ् ॥

आधारशक्तिः । स्त्री । सर्वाधारशक्तिरूपायां परदेवतायाम् ॥

आधार्मिकः । त्रि । अधार्मिके ॥ इति त्रिकाण्डशेषः । नाधार्मिको वसेद् ग्रामे नव्याधिबहुलेभृशम् ॥

आधिः । पुं । मनःपीडायाम् । मनस्तापायाम् ॥ अधिष्ठाने ॥ बन्धके । यथा । आधिर्विनश्येद्द्विगुणेधनेयदिनमोक्ष्यतेइति ॥ व्यसने । यथा । आधिप्रशान्तो येनमुच्येत सघोरः । आधीयतेदुःखमनेन आधानंवा । डुधाञ् धारणपोषणयोः । उपसर्गेघोःकिः ॥

आधिक्यम् । न । अतिशयतायाम् । अधिकत्वे । अधिकस्यभावः । ष्यञ् ।

आधिज्ञः । त्रि । वक्रे ॥ व्यथिते ॥ इत्य जयपाल ॥

आधिदैविकम् । त्रि । दाहशीताद्युत्थे दुःखे । अतिवातातिदृष्ट्यादिहेतुकेदुःखे । देवान् अग्निवाय्वादीन् अधिकृत्यमवृत्तम । अधिदेवंवाभवम् । अध्यात्मादेठ्ञिष्यते । अनुशनिकादीनाञ्चेत्युभयपदवृद्धि ॥ यच्च ...राक्षसविनायकग्रहाद्यावेशनिवन्धनमाधिदैविकदुःखमितिसाङ्ख्याः ॥

आधिपत्यम् । न । अधपतित्वे । प्रभुत्वे । स्वामित्वे ॥ अधिपतेःकर्मभावो वा । ब्राह्मणादित्वात् ष्यञ् ॥

आधिभोगः । पुं । वन्धकद्रव्यस्यभोगे ॥

आधिभौतिकम् । त्रि । व्याघ्रसर्पादिप्रयुक्तदुःखादै ॥ भूतानिप्राणिनोधिकृत्यप्रवृत्तमधिभूतंवाभवम् । अध्यात्मादेठ्ञ् । अनु० उ० ॥

आधिमन्यवः । पुं । ज्वराग्नौ ॥

आधिवेदनिकम् । न । स्त्रीधनविशेषे ॥ पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम् । आधिवेदनिकञ्चैवस्त्रीधनंपरिकीर्त्तितमित्यत्राधिवेदनिकस्य पृथक्त्वेनोक्तत्वात् तत्स्वरूपमाह । द्वितीयस्त्रीविवाहार्थिना पूर्वस्त्रियैपारितोषिकं धनंयद्दत्तंतदाधिवेदनिकमुच्यते । यथा । अधिविन्नस्त्रियैदेयमाधिवेदनिकं समम् । नदत्तंस्त्रीधनंयस्यैदत्तेत्वर्द्धं प्रकीर्त्तितम् ॥ इति याज्ञवल्क्य' ॥

आधिस्तेन. । पुं । वन्धकचोरे ॥ यथा । नभोक्तव्योवलादाधिभुञ्जानोवृद्धिमुत्सृजेत् । मूल्येनतोषयेच्चैनमाधिस्तेनोन्यथाभवेदितिमनु. ॥

आधुत. । त्रि । आधूते । आधुयतेस्म । धुञ् कम्पने । क्तः ॥

आधुनिक. । त्रि । इदानीन्तने । नव्ये । अधुनाजाते ॥ ठञ् ॥

आधूतः । त्रि । ईषत् कम्पिते ॥ आधूयतेस्म । धूञ् कम्पने । क्तः । यस्य विभाषेतिनेट् ॥

आधेयम । त्रि । आधारस्थि । आधारस्थितवस्तुनि ॥ आधातुंयोग्यम् । अचोयत् । ईद्यति ॥ उत्पाद्ये ॥ यथा पक्वमन्मयपात्रे रक्ततागुणः सवह्निसंयोगादिनानिष्पाद्यते ॥

आधोरणः । पुं । निषादिनि । हस्तिपके ॥ आधोरयति । धोर्ऋ गति चातुर्य्ये । ल्यु ॥

आध्मात. । पुं । शब्दिते ॥ दग्धे ॥ त्रि । वातरोगविशेषविशिष्टे ॥ यथा । साटोपमत्युग्ररुजमाध्मातमुदरं भृशम् । जानीयादित्यन्वयः ॥

आध्मानः । पुं । वातव्याधिविशेषे ॥ त

स्वरूपम्। साटोपमत्युग्ररुजमाध्मातमुदरमृशम्। आध्मानमिति-जानीयाद्घोरं वातनिरोधजमिति निदानम्॥ आनाहे॥

आघ्राता। स्त्री। नासिकानामगन्धद्रव्ये॥

आध्या [illegible]। [illegible]।

आध्यात्मिकम्। न। शरीरादौ। भो कर्म [illegible]गादिनिमित्तदुःखादौ॥ दुःखविशेषे॥ आत्मानंस्वसङ्घातमधिकृत्य प्रवृत्तम्। अध्यात्मभवं वा अध्यात्मादिभ्यष्ठञ्॥ तद्द्विविधम्। शारीरकमानसञ्च। तत्र शारीरं व्याध्यादिजम् मानसं कामादिजम्।

आध्यानम्। न। चिन्तने। उत्कण्ठा-पूर्वकस्मरणे। ध्यै चिन्तायाम् ल्युट्॥

आध्यापकः। पुं। अध्यापके। स्वार्थेऽण्॥

आध्वर्यवम्। न। यजुर्वेदविहिते अध्वर्युसम्बन्धिनि॥ अध्वर्योरिदम् पक्षाध्वर्युपरिषदश्चेत्यण्। अध्वर्योः कर्मभावो वा। उद्गात्रादित्वादञ्॥

आनः। पुं। अन्तर्मुखश्वासे। उच्छ्वासे॥

आनकः। पुं। पटहे। भेर्य्याम्। गर्जद्[illegible]मेघे। ध्वनद्म्बुदे। सशब्दमेघे। आनयति प्राणयति [illegible] तिरोधाने। आङ् पूर्वकात् अन [illegible] आनयत्यस्मात् ण्वुल्॥

आनकदुन्दुभिः। पुं। कृष्णजनके। वसुदेवे। आनकैर्दुन्दुभिश्चोपलक्षितः। वसुदेवजन्मनि देवैरानकदुन्दुभिवादनात्। पुं। स्त्री। वृहड्ढक्कायाम्॥

आनतः। त्रि। नते। अग्रे। [illegible] खे। विनयनम्रे। आनमतिस्म। आङ् नमप्रह्वत्वे। गत्यर्थेति क्त॥

आनतिः। स्त्री। नम्रतायाम्॥

आनद्धम्। न। चर्मवद्धमुखवाद्यमात्रे मुरजपटहादौ। वेशभूषादिकल्पमात्र॥ त्रि। सन्दिते। ग्रथिते। बद्धे। व्याप्ते॥ यथा। आनद्धाः [illegible]तैर्दोषैरिति॥ आनह्यते [illegible] णाबध्यते। णहबन्धने। [illegible] [illegible]ध॥

आननम्। न। मुखे॥ आ अनन्त्यनेन। अनप्राणने। ल्युट्॥

आनन्तर्य्यम्। न। अनन्तरे। चतुर्वर्णादित्वात् स्वार्थेष्यञ्॥

आनन्त्यम्। न। अनन्तमित्यर्थे॥ देशकालवस्तुपरिच्छेदशून्ये॥ अनन्तमेव। अनन्तावसथेतिह भेषजाञ्ञ्य॥

आनन्दः। पुं। सम्मदे। हर्षे। सुखे।

। मद्ये । छन्दोभेदे । द्वगणेऽ। आदि गुरुत्रिकले । प्राक्पश्चिमोत्तरद्वार गृहे । आत्मनि । बुद्ध्यादिप्रतिबिम्बतया ऽवस्थितस्य प्रियादिशब्दवाच्यस्य आनन्दमयस्य कारणभूते । ब्रह्मणि । आनन्दनम् । टुणदि समृद्धौ । घञ् । ४८ वत्सरे । निष्पत्तिः सर्वसस्यानां सर्वशस्यसमार्घता । इतंतै १. समंयाति आनन्देनन्दतिप्रजाइति ततफलम् । त्रि । आनन्दविशिष्टे । सुखिनि । हर्षयुक्ते । आनन्द, स्वरूपमस्य । आनन्दोस्ति अस्य अस्मिन् वा । अर्शआदिभ्योऽच् ।

आनन्दथुः । पुं । सुखे । आनन्दे ॥ चि । खनि । टुणदि° । द्वितोऽथुच् ।

आनन्दकृत । पुं । मेहने ।

आनन्दन । न । गमनागमनसमये सु[illegible]शिङ्गनारोग्यस्वागतादि प्रश्ना[illegible] आनन्दोत्पादने । सभाजने । [illegible]प्रश्न । टुणदि° । ल्युट् ।

आनन्दपट । पुं । न । नवोढावस्त्रे ।

आनन्दप्रभव । न । रेतसि । वीर्य्ये । आनन्दात् प्रभवोऽस्य ।

आनन्दभुक् । पुं । प्राज्ञे । यथा लोके निरायाससुखितःसुखी आनन्दभुगुच्यते तथा सुषुप्तोपि आनन्दभुक् । अत्यन्तानायासरूपाह्मीयं सुषुप्तिरूपा स्थितिरनेन प्राज्ञेनानुभूयते तस्मादानन्दभुक् प्राज्ञ ॥

आनन्दमय । पुं । जीवे । आनन्दप्रचुरे । प्राज्ञे । मनसोविषयविषय्याकारस्पन्दनायासदुःखाभावादानन्दमय आनन्दप्राय' प्राज्ञउच्यते । कारणशरीरे सर्वोपरमत्वात् सुषुप्तौ स्थूलसूक्ष्मप्रपञ्चलयस्थाने । पञ्चमकोषे । काचिदन्तर्मुखाद्वृत्तिरानन्दप्रतिबिम्बभाक् । पुण्यभोगे भोगशान्तौ निद्रारूपेणवर्त्तते । कादाचित्कत्वतो नात्मा स्या दानन्दमयो प्ययम् । प्राचुर्य्येमयट् । त्रि । आनन्दप्रधाने । न । ब्रह्मणि ॥

आनन्दसम्प्लव: । पुं । परमानन्दे । आनन्दसम्प्लवे लोनोनापश्यमभयंमुने ॥

आनन्दा । स्त्री । विजयायाम् ॥ आरामशीतलायाम् ।

आनन्दार्णव: । पुं । परमेश्वरे । यात्रा योगान्तरे । यथा । स्वोच्चमूलत्रिकोणस्थ:सौम्य:पापविवर्जित' । आनन्दार्णवयोगोऽयं धर्मार्थैवजयावहः इति ॥

आनन्दि । पुं । कौतुके । हर्षे ।

आनन्दित । त्रि । आनन्दयुक्ते । आह्लादिते । हृष्टे । आनन्द' सञ्जातोऽस्य । तारकादित्वादितच् ॥

आनन्दी । त्रि । सुखिनि । हृष्टे । आ

आनुकूल्यम् । न । अनुकूलतायाम । साहाय्ये ॥ भावे कर्मणि वा ष्यञ ॥

आनुपदिकः । त्रि । अनुपदं धावमाने ॥ अनुपदं धावति । मायोत्तरपदप दव्यनुपदं धावतीति । ठक् ॥ अनुप दमधीते । उ० ठक् ॥

आनुपूर्व्यम । न । अनुक्रमे ॥ पूर्वं पूर्वं पूर्वानुक्रमेणवा । वीप्सायां योग्यता यां वा ऽव्ययीभावः । अनुपूर्वस्य भावः वर्णदृढादिभ्यःष्यञ् चेतिष्यञ् । ङीष् । हलस्तद्धितस्येतियलोपः । स्त्रियां वेतिपक्षेक्लीवता ॥

आनुपूर्वी । स्त्री । परिपाट्याम् । मूला वधिक्रमे ॥ अनुपूर्वं भावः । वर्ण दृढा .भ्यः ष्यञ्चेति ष्यञ् । षित्त्वान् ङीष् , यलोपः ॥

आनुमानिकम् । न । प्रकृतौ । प्रधाने ॥ त्रि । युक्तिसिद्धे । लैङ्गज्ञाने ॥ अनु मानविषयीभूते ॥ अनुमानसम्ब- न्धीये ॥

आनुरक्तिः । स्त्री । अनुरागे ॥

आनुलोमिकः । त्रि । अनुलोमे ॥ अनु लोमं वर्त्तते । तत्प्रत्यनुपूर्वमित्या दिना ठक् ॥

आनुश्रविकः । पुं । स्वर्गादिसाधनेकर्म कलापे ॥ शब्दप्रतिपन्ने स्वर्गभोगादौ । ॥ गुरुपाठादनुश्रूयते इत्यनुश्रवो वे- दः । तत्र भवइत्यर्थे ठक् प्रत्ययः ॥

आनुषक् । अ । आनुपूर्व्ये ॥

आनूपम् । न । भौमपानीयप्रभेदे ॥ यथा । बहूम्बुर्बहुवृक्षश्चवातश्लेष्माम यान्वितः । देशो ऽनूपइतिख्यात आ नूपं तज्जलंजलम् । आनूपंवार्य्यभिष्य न्दि स्वादुस्निग्ध घनंगुरु । वह्निहृत् कफकृन्निन्द्यं विकारानकुरुतेबहून् इति ॥ पुं । अनूपदेशस्यजन्तुमात्रे ॥

आन्वत । त्रि । अन्वतस्वभावे ॥ अन्वत शीलमस्य । छत्रादिभ्योऽण् ॥

आन्वशंस्यम् । न । अनुकम्पायाम् । अ निष्ठुरतायाम् ॥ भावेष्यञ ॥

आनेयः । पुं । भ्राष्ट्रादैश्यकुलाद्वा आ नीते दक्षिणाग्नौ ॥ त्रि । आनेतुंश क्येघटादौ ॥ आनीयते । णीञ् ० । अचोयत् ॥

आन्तरः । त्रि । अभ्यन्तरे ॥

आन्तरप्रपञ्चः । पुं । आभ्यन्तरेद्वैतवि स्तारे ॥ सचान्नमयादिपञ्चकोषशरी रादिनयास्तीत्यादिषड्भावविकार त्वङ्मांसादिषाट्कौशिकाशनापि- पासादिषडूर्म्मिश्रोत्रादिज्ञानेन्द्रिय- पञ्चकवागादिकर्मेन्द्रियपञ्चकप्राणा दिवायुपञ्चकमनआद्यन्तःकरणचतु ष्टयसङ्कल्पाद्यन्तःकरणवृत्त्यवस्थात्र यतद्व्यापारतदभिमानिविश्वतैजस-

प्राणसमाधिमूर्च्छाकरणक्रदकाम - क्रोधाद्यरिषड्वर्गसाधनचतुष्टयसा - त्त्विकादिगुणत्रयसुखदु. खज्ञानाज्ञा नपञ्चक्लेशमैत्र्यादिचतुष्टययमाद्य- ष्टाङ्गप्रत्ययचादि प्रमाणचतुष्टयरो गारोग्यादिसमुदायो यथायोग्य- विविधनामरूपगुणधर्मशक्त्याश्रयो - बोध्यः ।

आन्तरालः । पुं । आत्मनोऽणुत्ववादि नि ॥ अणुवदन्त्यान्तराला 'सूच्मना डीप्रचारत' । रोमणः सहस्रभागेन तुल्यासु प्रचरत्ययम् ।

आन्तरीक्षम् । न । अन्तरीक्षे । गगने । त्रि । अन्तरीक्षभववस्तुनि ।

आन्तिका । स्त्री । अन्तिकायाम् ।

आन्त्रम । न । अन्त्रे । अमतिअनेनवा । अमगतौ । अमिचिमीतिक्तः । अनु- नासिकस्यक्विझलोरितिदीर्घः । त्रि अन्त्रसम्बन्धिनि ॥

आन्दोलनम् । न । पुनःपुनरालोचना याम् । कम्पने । चलने ।

आन्दोलितम त्रि । कृतान्दोलने । क म्पिते । चलिते ।

आन्धसिक' । त्रि । पाचके । सूपकारे । अन्धोभक्तंशिल्पमस्य । शिल्पमिति- ठक ।

आन्नः । त्रि । अन्नंलब्धरि । अन्नंलब्धा । अन्नाद्यः ।

आन्यभाव्यम् । न । अन्यभावे । अन्यस्य भावोन्यभावः । ततोब्राह्मणादित्त्वा त् स्वार्थे ष्यञ । अथवा अन्योभावो ऽन्यद्वस्तु तस्यभावइति भावेष्यञ ।

आन्वयिकः । त्रि । प्रशस्तकुलजे । सत् कुलोद्भवे । कौले । दिव्यभावरतेकु लाचाररिणि साधके । श्रीर्द्धस्रोतसि कःशैवःकौल आन्वयिकःस्मृत इति त्रिकाण्डशेषः । अन्वयेकुलेभवः । ठक् ।

आन्वाह्निकम । त्रि । प्रतिदिनसम्पाद्ये पाकादौ ।

आन्वीक्षिकी । स्त्री । तर्कविद्यायाम । गौतमादिप्रणीते न्यायशास्त्रे आ त्मविद्यायाम् । अनुश्रवणोक्त मी- क्षणांपरीक्षणमन्वीक्षा । सा प्रयोज न मस्या. । प्रयोजनमिति ठञ ।

आन्वीपिकः । त्रि । अनुकूले । अन्वीपं वर्त्तते । ततप्रत्यनुपूर्वमीपलोमकू लमिति ठक् ।

आपः । पुं । अष्टवसुमध्ये वसुविशेषे । न । अपांसमूहे । तस्यसमूहइत्य णः ।

आपक्कम । न । अभ्यूषे । भर्जितेषदित यवादौ । ईषत् पक्कम् । आङीषद र्थे इति समासः ।

आपगा । स्त्री । नदीमात्रे । अपांसमूहः आपम । तेनगच्छति । गम्लृ० । अन्येभ्योपीतिडः ।

आपण । पुं । हट्टी हाट इतिभाषाप्रसिद्धायां क्रयविक्रयशालायाम् । निषद्यायाम् । आसमन्तात्पण्यन्तेऽत्र । पण० । गोचरसञ्चरेतिघान्तःसाधुः ।

आपणिकः । पुं । वणिजि । पण्याजीवे । आपणो व्यवहारोऽस्यास्ति । अत इति ठन् । आपणेन व्यवहरति इत्यर्थेवाठक् । यद्वा । आपणायते । पणव्यवहारे । आडिपनिपतिखनिभ्यइति इकन् । आपणस्यधर्म्यं । तस्यधर्म्यमितिठक् । आपणस्यावक्रये । व्यवक्रय इति ठक् ।

आपतिक । पुं । श्येने । वाज इतिभाषाप्रसिद्धखगे । त्रि । दैवायत्ते । आपतति । पत्लृगतौ । आडिपणीति इकन् ।

आपत्तिः । स्त्री । आपदि । प्रापणे । दोषे । आपदनम् अनयावा । पद गतौ । स्त्रियांक्तिन् ।

आपत्प्राप्तः । त्रि । आपन्ने । विपद्ग्रस्ते । आपदंप्राप्तः ।

आपद् । स्त्री । विपत्तौ । विपदि । क्लेशे । मनस्तापं नकुर्वीतआपदंप्राप्यपार्थिवः । समबुद्धिः प्रसन्नात्मासुखदुःखसमोभवेदित्युपदेशः । आपदाम् पहर्तारं दातारं सर्वसम्पदाम् । लोकाभिरामंश्रीरामं भूयोभूयोनमाम्यहम् । आपदनमनयावा । पदे सम्पदादित्वात् क्विप् । आपत्कालेनास्तिमर्यादा ।

आपदा । स्त्री । विपत्तौ । भागुरिमते हलन्तादपि टाप् ।

आपनम् । न । मरिचे । प्रापणे ।

आपनिक । पुं । इन्द्रनीलमणौ । किराते । आपनायते । पनव्यवहारे । आडिपणिपनीति इकन् ।

आपनेय । त्रि । प्रापणीये । हन्तव्ये ।

आपन्नः । त्रि । विपद्ग्रस्ते । आपत् प्राप्ते । प्राप्ते । यथा । आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् । ततः सद्योविमुच्येतयद्बिभेतिस्वयं भयमिति भागवतम् । आपद्यतेस्म । पदगतौ । क्तः । आगते ।

आपन्नसत्त्वा । स्त्री । गर्भवत्याम् । आपन्नः सत्त्वोजन्तुरनया सावा ।

आपमित्यकम् । न । विनिमयात् प्राप्ते । परिवर्त्तनेनाप्ते । बदले करके लीजो वस्तु इति भाषा । अपमानम् । मेङ्प्रणिदाने । उदीचां माङो व्यतीहारे इतिक्त्वा । कुगतीतिसमासः । समासेऽनञिति ल्यबादेशः । म

थतेरिदन्यतरस्यामितीत्वम् । अप-मित्य निर्वृत्तम । अपमित्ययाचिताभ्यां कक्कना विति कक् ॥

आपराह्णिकम् । त्रि । अपराह्णतने ॥ अपराह्णेभवम् । कालाट्ठञ् ॥

आपव. । पुं । वशिष्ठमुनौ ॥

आपः । न । जले ॥ आपोभिर्मार्जनं कृत्वेतिस्मृतिः । आप्नोतेरसुनिसान्तं क्लीबम । आप.कर्माख्यायांह्रस्वोनुट्चवेत्यत्र बाहुलकात आप. आपसो इत्युक्तं कौमुद्याम् । तत्रबाहुलका दित्युपलक्षणम् ह्रस्वनुटौ वास्त इति व्याख्यानात । तथाच ब्रुवते कतमेपि नपुंसकमाप इतिकोशमुदाहृत्य सर्वमापोमयं जगदिति मयोगो दुर्घटवृत्तौ समर्थित इति ॥

आपस्तम्बः । पुं । कल्पसूत्रकारे ॥ शाखान्तरे ॥

आपस्तम्बिनी । स्त्री । त्रिक्रियांखतायाम् ॥

आपाकः । पुं । आवा इतिप्रसिद्ध कुम्भकारस्यमृत्पात्रदहनस्थाने । पवने ॥

आपात. । पुं । पतने ॥ तत्काले । तदात्वे ॥ पातने ॥ मार्गे ॥ आपतन्ति सञ्चरन्ति अस्मिन् । घञ् ॥

आपाततः । । अवधारणंविनेत्यर्थे । अकस्मादर्थे ॥

आपानम् । न । पानगोष्ठ्याम् । सुरापानायसम्भूयोपवेशने । मद्यपानार्थसभायाम् ॥ आसम्भूय पिबन्त्यत्र । पापाने । ल्युट् ॥

आपानभूमिः । स्त्री । मधुपानस्थाने ॥

आपिञ्जरम् । न । स्वर्णे ॥

आपीडः । पुं । शेखरे । शिखामाल्ये । शिरोभूषणे ॥ वह्निर्निःसृतदारुशिखः । आपीडयति पीडअवगाहने । पचाद्यच् ॥

आपीडितः । त्रि । आकृष्टे ॥ समन्तात्पीडिते ॥

आपीतम् । न । माक्षिकधातौ ॥

आपीनम् । न । ऊधसि ॥ आप्यायते स्म । ओप्यायीवृद्धौ । गत्यर्थे ; प्यायःपी निष्ठायाम् । सोरङ्गस्युन । आङ्पूर्वस्यान्धूधसोःस्यादेवेति पीभावः । ओदितश्चेतिनिष्ठानत्वम् । पुं । अन्धौ । कूपे । इतिवोपदेव. ॥ त्रि । अतिस्थूले । ईषत्स्थूले ॥

आपूपिकम् । न । पिष्टकसमूहे । अपूपानांसमूहः । अचित्तहस्तिधेनोष्ठक् । त्रि । पिष्टकाजीवे । कान्दविके । भक्ष्यकारे ॥ अपूपाःपण्यमस्य । तदस्यपण्यमितिठक् । यद्वा अपूपभक्षणं शीलमस्य शीलमिति अपूपभक्षणंहितमस्मै । हितंभक्षा इ

तिवाठक्। अपूपेसाधुर्वा। गुडादि
भ्यष्ठञ्॥
आपूप्य.। पुं। सक्तुषु॥ अपूपार्थकपिष्टा
दौ। चूर्णके॥
आपूरितः। त्रि। अभिव्याप्ते॥ परिपू
र्णे॥ यथा। आपूरितं महापात्र
मिति॥
आपूर्त्ति.। स्त्री। ईषत्पूरणे॥ सम्यक्
पूरणे॥
आपूषम्। न। रङ्गे। राँग इतिभाषा॥
आपृच्छा। स्त्री। आलापे। आभाषणे
॥ आपृच्छनम्। पृच्छ०। गुरोश्चहल
इत्यः॥
आपृष्टः। त्रि। अनुज्ञाते॥
आ॰ 'क्लिमम्। न। लग्नात्तृतीयषष्ठ
नवमद्वादशभवनेषु॥
आप्त'। त्रि। प्रत्ययिते। विश्वासाधारे॥
प्राप्ते। लब्धे॥ सत्ये॥ रागद्वेषादिव
र्जितेयथार्थवक्तरि॥ हितोपदेष्टरि-
॥ युक्ते। भ्रमादिशून्ये। तत्त्वार्थवेदि
नि॥ पुं। भ्रमप्रमादविप्रलिप्साक
रणापाटवरूपदोषचतुष्टयरहितेऋ
ष्यादौ॥ आप्यतेस्म। आप्लृव्याप्तौ
। क्तः॥ स्वस्मिन्॥ जिने॥
आप्तकामः। त्रि। प्राप्तस्वरूपानन्द
तृप्ते॥ आप्तः कामोयेन॥
आप्तगर्वः। त्रि। प्राप्ताहङ्कारे॥

आप्तजन। पुं। हिते। हितोपदेष्टरि
॥ आप्तश्चासौजनश्च॥
आप्तवचनम्। न। आप्तश्रुतौ॥ शब्दे
॥ आप्तस्यवचनम्। कर्मधारयोवा॥
आप्तवाक्यम्। न। आगमे॥
आप्तवाक्। स्त्री। वेदे॥ कर्मधारय.॥
बहुव्रीहिस्त्वाप्तमुनौ॥ पुं॥
आप्तश्रुति। स्त्री। आप्तवचने॥ वेदे
॥ आप्ताचासौश्रुतिश्च॥
आप्ता। स्त्री। जटायाम्॥ इतिशब्दा-
वली॥
आप्तिः। स्त्री। सम्बन्धे। योगे॥ लाभे
। समाप्तौ॥ व्याप्तौ॥ आप्यते। आ
प्लृ०। स्त्रियांक्तिन्नाबादिभ्य'॥
आप्तोक्तिः। स्त्री। शब्दे। सिद्धान्तवाक्ये॥
आप्यम्। न। कुष्ठौषधौ॥ त्रि। अम्म
ये। जलविकारे फेनादौ॥ कर्मणि
प्रभूते मन्त्रादौ॥ प्राप्तव्ये॥ अपां
विकारः। तस्यविकारइत्यणन्ताच्च-
तुर्वर्णादित्वात्स्वार्थेष्यञ्॥ स्त्री।
आप्या॥
आप्यायक। पुं। पुष्टिकरे॥
आप्यायनम्। न। तर्पणे। तृप्तौ। प्री
णने॥ परिपूरके॥
आप्यायित.। त्रि। तृप्ते। प्रीते॥ पू
रिते॥
आप्रच्छनम। न। आनन्दने॥ पृच्छ

त्तीप्सायाम् । आङ्पूर्वोयमानन्दनार्थ. । ल्युट् ॥

आप्रदानम् । न । आदाने ॥

आप्रपदम् । न । पादाग्रपर्य्यन्ते ॥

आप्रपदीनम् । त्रि । पादाग्रपर्य्यन्तलम्बमाने वस्त्रादौ ॥ पादस्याग्र प्रपदम् । तन्मर्यादीकृत्य आप्रपदम् । आप्रपदंप्राप्नोतीत्यर्थे अनेन खः ॥

आप्रवणम् । न । उत्प्लवने ॥ उद्धरणे ॥ त्रि । ईषदवनते ॥

आप्लव. । पुं । स्नाने ॥ आप्लवनम् । प्लुङ् गतौ । घञभावपचे ऋदोरप् ॥

आप्लवव्रती । पु । स्नातके । समाप्तवेदाध्ययनकृतस्नाने ॥ आप्लवते । प्लुङ्० । अच् । आप्लवश्चासौव्रतीच ॥ आप्लवः स्नानम् । तद्व्रतीनित्यस्नायीतिमुकुटः ॥

आप्लावः । पुं । स्नाने ॥ आप्लवनम् । प्लुङ्० । विभाषाङिरुप्लुवोरितिवा घञ् ॥

आप्लाव्यम् । न । आप्लवे ॥ आप्लवते । प्लुङ्० । भव्यगेयेतिसाधु ॥

आप्लुतः । त्रि । स्नाते । कृतस्नाने ॥ पुं । स्नातके ॥ आप्लवनम् । प्लुङ्० । क्तः ॥

आप्लुतव्रती । पुं । श्रुतेः पाठात् स्नाते । स्नातके । आश्रमान्तरमगते समाप्तवेदव्रते ॥ आप्लवते । प्लुङ्० । गत्यर्थाकर्मकेतिक्तः । सचासौव्रतीच ॥ मुकुटस्तु आप्लुतं स्नानं तद्व्रती नित्यस्नायीत्याह ॥

आप्वा । पुं । वायौ ॥ आप्नोतिसर्वम् । आप्लृ० । श्वेवयक्लीतिवन्नन्तः ॥

आफूकम् । न । अहिफेने ॥ आफूकशोषणंग्राहिश्लेष्मवातपित्तलम् । तथा खसफलेङ्कूतवल्कलप्रायमित्यपि ॥

आबद्ध' । पु । दृढबन्धे ॥ प्रेम्णि ॥ अलङ्कारे ॥ भूषणे ॥ पु । योक्त्रे ॥ त्रि । आप्ते ॥ आबध्यतेस्म । बध० । क्तः ॥

आबन्धः । पुं । बन्धने ॥ प्रेम्णि ॥ योक्त्रे ॥ आबध्यतेऽनेन । बन्धबन्धने । हलश्चेति घञ् ॥

आबाधा । स्त्री । पीडायाम । दुःखे ॥ भूखण्डे । चिकोणचेचमध्यरज्जु . . . मेण यत्खण्डद्वय जायते तत्स्मृतम् ॥ बाधृलोडने । आङ्पूर्व गुरोश्चेत्यः ॥

आविलः । त्रि । अनच्छे । अप्रसन्ने । कलुषे ॥ आविलति । बिलभेदने । इगुपधेतिकः ॥

आविलकन्दः । पुं । मालाकन्दे ॥

आवुत्तः । पुं । नाट्योक्त्या भगिनीपतौ ॥ आपनम् आप् । सम्पदादित्वात् क्विप् । आपमुत्तनोति । अन्येभ्योपीतिडः ॥

आभण्डनम् । न । निरूपणे ॥

आभरणम् । न । अलङ्कारे । भूषणे ॥

आभ्रियतेऽनेन। भृञ्भरणे। ल्युट्॥

आभा। स्त्री। उपमायाम्॥ कान्त्याम्। शोभायाम्॥ दीप्तौ॥ बबूले॥ आभा वल्कलपर्याय' कथित कैश्चिदैरि‍ष्टे ऽि भावप्रकाशे वातव्याधौ त्रिकशू लचि कत्ता॥

आभाति। स्त्री। छायायाम्॥

आभाषणम्। न। आलापे। कथने॥ भाषव्यक्तायावाचि। आङ्पूर्व। ल्युट्॥

आभाषितः। त्रि। अभिमुखीकृते॥

आभासः। पुं। प्रतिबिम्बे॥ दीप्तौ॥ सदृशे॥ आभिमुख्येनभासते। भास्॰। पचाद्यच्॥ ईषद्भासनवा॥

आभास्वरः। पुं। चतुष्षष्टिसङ्ख्यकग णदेवताविशेषे॥ आभास्वराश्चतुष् षष्टिरित्युक्तं॥ द्वादशसङ्ख्यकेगण देवताविशेषे॥ आत्माज्ञातादमोदा न्त शान्तिर्ज्ञानंशमस्तप.। कामः क्रो धोमदोमोहोद्वादशाऽऽभास्वराइमे॥ आसमन्ताद्भासनशीलः। भास्दी प्तौ। स्थेशभासपिसकसोवरजितिव रच्॥

आभिजात्यम्। न। कौलीन्ये॥ पाण्डि त्ये॥ अभिजातस्यभाव.। ष्यञ्॥

आभिमन्यव.। पुं। परीक्षिति नृपे॥ अभिमन्योरपत्यम्। अण्॥

आभिर.। पुं। गोपे॥ आसमन्तात भि यं राति। रा दाने। आत इतिक॥

आभिरूप्यम्। न। अभिरूपत्वे॥

आभीक्ष्णम्। न। भृशे। अत्यन्ते। अतिशये॥ निश्चये॥ त्रि। तद्युक्त क्रियायाम्॥

आभीक्ष्ण्यम्। न। पौनः पुन्ये॥ भृशा र्थे॥ भावेष्यञ्॥

आभोर। पुं। अहीर इतिप्रसिद्धेगोपे। ब्राह्मणादम्बष्ठायामुत्पन्ने॥ वैश्यभे दएव आभीरोगवाद्युपजीवीतिस्वा मी॥ देशविशेषे॥ यथा। श्रीकोङ्क णादधोभागेतापीत. पश्चिमेपरे। आभीरदेशो देवेशिविन्ध्यशैलेव्यव स्थितइतिशक्तिसङ्गमतन्त्रम्॥ न। मात्रावृत्तप्रभेदे। यथा। एकादश कलधारि कविकुलमानसहारि। इदमाभीरमवेहिजगणमन्तमभे- ष्टि॥ यथा। तरलनयनवलितेन म दमन्थरचलितेन। सुमुखिहृदय म भिलाषि सपदिनकस्यकरोषीति॥ आअभिईरयति। ईरगतौकम्पनेच। पचाद्यच्॥

आभीरपल्लि.। स्त्री। गोपग्रामे॥ गो पगृहपङ्क्तौ॥ आभीराणांपल्लि॥

आभीरपल्ली। स्त्री। गोपग्रामे। घो षे। अहीरवासा इति भाषा॥ आ

भीराणांपल्ली ॥

आभीरी । स्त्री । महाशूद्रग्राम। अहीरनी इति भाषा ॥ आभीरस्त्रीजातौ या वा। पुंयोगादितिजातेरिति च ङीष ॥

आभीलम । न । कृच्छ्रे । दुःखे ॥ त्रि । कष्टयुक्त ॥ भयानके ॥ आसमन्तात् भियंलाति । ला° । क. ॥

आभुग्नः । त्रि । ईषद्वक्रे । आकुञ्चिते ॥

आभेरी । स्त्री । रागिणीविशेषे ॥

आभोग. । पु । वरुणस्यच्छत्रे ॥ परिपूर्णतायाम ॥ यत्ने ॥ आभोजनम् । भुज°। भावे अधिकरणे वा घञ् ॥ कविनामयुक्त गानसमापककाव्ये ॥ यथा । यत्रैवकविनामस्यात्सआभोग-इतीरितइतिसङ्गीतदामोदरः ॥

आभ्यन्तर' । त्रि । अभ्यन्तरभवे ॥ तत्रभव इत्यण् ॥

आभ्युदयिकः । त्रि । अभ्युदयनिमित्ते श्राद्धादिकर्मणि ॥

आभ्रिः । पु । काष्ठकुद्दालेन खननकर्त्त्रि । अभ्रयाखनति । तेनदीव्यती ''श्चादिनाठक् ॥

आम् । न । अङ्गीकारे । ज्ञाने । निश्चयस्मृतौ । प्रतिवचने । आमयति । अमगत्यादिषुण्यन्तः क्विप् ॥

आम'' । पुं । रोगमात्रे । रोगविशेषे । मलवैषम्यरोगे ॥ न । षट्प्रकारा जीर्णरोगमध्ये रोगविशेषे ॥ आहारस्यरसःसारो योनपक्वोऽग्निलाघवात् । आमसंज्ञां सलभते बहुव्याधिसमाश्रयः ॥ आममन्नरसंके ''त केचित्तुमलसञ्चयम् । प्रथ''दोषदुष्टिंवा केचिदामप्रचक्षते ॥ आंमच । अविपक्व मसंसक्तं दुर्गन्धिबहुपिच्छिलम् । सादनंसर्वगात्राणामाऽऽमि त्यभिशब्दितम् ॥ तेनामेन सहायुक्ता दोषाद्दूष्याश्चताहशाः । तदुद्भवा आमयाश्चसामाइतिबुधैः स्मृताः ॥ त्रि । अपक्वे । असिद्धे । पाकरहिते ॥

आमगन्धि । न । शवादुष्टगन्धयुक्ते । विस्रे । अपक्वमांसादिगन्ध''' ॥

आमखण्डः । पुं । शर्करखण्डे ॥

आमनस्यम् । न । पीडायाम् । व्यथायाम् ॥ अमनसो भावः । ब्राह्मणादित्वात् ष्यञ् ॥

आमन्त्रणम् । न । सम्बोधने ॥ आनन्दने ॥ निमन्त्रणे । कामचारानुज्ञायाम् । यस्याकरणे प्रत्यवायोनस्यात् । यथा । इह शयीत भावन् ॥ मन्त्रिगुप्तभाषणे । आङ् पूर्वः । ल्युट् ॥

आमन्त्रणा । स्त्री । पृच्छायाम् ॥

आमन्त्रितम् । न । सम्बोधनप्रथमायाम् ॥ त्रि । निमन्त्रिते ॥

आमन्दः । पुं । वासुदेवे ॥

आमन्दा । स्त्री । खड्गभेदे ॥

आमयः । पुं । रोगे । अमरोगे । भावे घञ् । आमयात्यनेन । याप्राप्णो । अन्येभ्योपीतिड । यद्वा । आमयनमनेनवा । मीङ्हिंसायाम् । एरच् । घोवा । न । कुष्ठौषधौ ॥

आमयावी । त्रि । रोगिणि । मन्दानलयुक्ते । विकृते । आमयो स्यास्ति । आमयस्योपसंख्यानंदीर्घश्चेति-विनि ॥

आमर्शनम् । न । स्पर्शे ॥

आमर्षः । पुं । कोपे । मर्षणम् । मृष तितिक्षायाम् घञ् । नञ् समासः । अन्येषामपीतिदीर्घः । निरुध्यो ३ निरामर्षं निर्वीर्यमरिनन्दनमि-तिप्रयोग ॥

आमलकः । पुं । वासकवृक्षे । न । धात्रीफले । क्षुद्रामलके । आमलते । मल । कुनशिल्पिसंज्ञयोः । आमलक्या फलम् । फलेलुगितिविकारावयवप्रत्ययस्यलुक् । त्रि । धात्री द्रुमे । तिष्यफलायाम ॥

आमलकी । स्त्री । अमृतायाम् । तिष्यफलाद्रुमे । आमलते । मलधारणे । कुन् । जातेरितिङीष् ॥

आमवातः । पु । स्वनामख्यातेरोगविशेषे । तल्लक्षणं यथा । युगपत् कुपितावेतौ त्रिकसन्धिप्रवेशकौ । स्तब्धञ्चकुरुतो गात्रमामवातःसउच्यते ॥ एतौवातकफौ । त्रिकसन्धिप्रवेशकौ वेदनयेतिवोद्धव्यौ ॥

आमश्राद्धम । न । आमान्नविहितश्राद्धे । आपद्यनग्नौतीर्थेच चन्द्रसूर्यग्रहेतथा । आमश्राद्धंद्विजैः कार्यंशूद्रेणतुसदैवहि । अपत्नीक प्रवासीच भार्यायस्यरजस्वला । आमश्राद्धंद्विजैः कार्यंशूद्रेणतुसदैवहीतिच ॥

आमातीसारः । पु । षट्प्रकारातीसारमध्येरोगविशेषे ॥

आमात्यः । पुं । अमात्ये ॥

आमानस्यम् । न । पीडायाम् ॥

आमान्नम । न । अपक्वतण्डुलाद्यन्ने ॥

आमाशयः । पुं । नाभिस्तनयोर्मध्यभागे अपक्वस्थाने ॥

आमिक्षा । स्त्री । वैश्वदेव्याम । तप्ते पक्वेपयसि दधियोगेन जातायांदुग्धविकृतौ । तद्घनीभूतःपिण्डआमिक्षा जलंवाजिनम् ॥ आमिष्यते । मिषुसेचने । बाहुलकात्सक् । यद्वा । आमक्षति । मक्षरोषे सङ्घातेच । अच् । पृषोदरादिः ॥

आमिक्षीयम् । न । आमिक्ष्ये । दधिनि । आमिक्षायैहितम । विभाषाह

विरूपादिभ्यइति छ ॥

आमिच्यम्। न। आमिक्षीये। आमिक्षायैहितम्। यत्॥

आमिषम्। न। पुं। भोग्यवस्तुनि॥ सम्भोगे॥ उत्कोचे॥ पलले। मांसे॥ सुन्दराकाररूपादौ। लोभसञ्चये। लाभे। कामगुणे। रूपे। भोजने। लोभ्यवस्तुनि। विषये। आमिषति। मिषस्पर्द्धायाम्। मेषतिवा। मिषुसेचने। इगुपधेतिक'। यद्वा। अमति। अमगत्यादिषु। अमेर्दीर्घश्चेतिटिषच्॥ यद्वा। आमिष्यते भुज्यते। मिषश्लेषणे। घञ्। संज्ञापूर्वकत्वान्नगुणः। घञर्थेक' इतितुपरिगणनादयुक्तम्॥

आमिषप्रिय। त्रि। मांसाभिलाषिणि॥ पुं। कङ्कपक्षिणि॥

आमिषाशी। त्रि। मत्स्यमांसभोजनशीले। शौष्कले॥ आमिषमश्नाति। अशभोजने। सुपीतिणिनि॥

आमीक्षा। स्त्री। आमिक्षायाम्। आङ्पूर्वान्मिहेर्दीर्घश्चेतिस'॥

आमुक्त। त्रि। पिनद्धे। परिहितवस्त्रादौ। परिहितकवचेजने। आमुच्यतेस्म। मुच्लृमोचने। क्त॥

आमुष'। पुं। कण्टकयुक्तवंशविशेषे॥

आमुष्मिक। त्रि। स्वर्गसुखाद्यनुभवे। अमुष्मिन् परलोकेभवं'। ठक॥

आमुष्यायण। त्रि। ख्यातवंशोद्भवे। सत्कुलजाते॥ अमुष्यापत्यम्। नडादित्वात्फक्। षष्ठ्या अलुक्॥

आमूलम्। न। मूलपर्यन्ते॥

आमोद'। पुं। अतिदूरगामिनिगन्धे॥ गन्धे॥ हर्षे॥ निश्वासगन्धे॥ सुमहद्गन्धे॥ आमोदनम आमोदयतिवा। मुदहर्षे। आङपूर्व'। भावे घञ्। स्वार्थण्यन्तः। पचाद्यच्वा॥

आमोदनम्। न। आमोदकरणे॥ ल्युट्॥

आमोदितः। त्रि। आनन्दिते। सहर्षे॥ सुगन्धिते॥ आमोद सञ्जातोऽस्य। तारकादित्वादितच्॥

आमोदी। त्रि। मुखवासने। व पूरादिनानाद्रव्यरचितमुखवासार्हद्रव्ये॥ आमोदोऽस्तिअस्य अस्मिन्वा। इनिः॥

आम्नातः। त्रि। अभ्युक्ते। यथा। अनाम्नातेष्वमन्त्रत्वमिति॥

आम्नाय। पुं। आगमे॥ निगमे॥ वेदे॥ सम्प्रदाये। गुरुपरम्परागतसदुपदेशे॥ उपदेशे॥ वंशे॥ कथने॥ कुलक्रमे॥ अभ्यासे॥ यथा। तस्यसन्दिदिहे बुद्धिर्मुहु सीतांनिरीक्ष्यच। अम्नायानामयोगेनविद्यांप्रशिथिलां

भिवेति रामायणम् ॥ आम्नायते अ भ्यस्यते । म्ना अभ्यासे । कर्म्मणिघञ् । ण्याद्यन्तेतिणः । आम्नानंवा । भावे घञ् । आत इति युक् ॥

आम्बिकेय । पु । कार्त्तिकेये । स्कन्दे ॥ धृतराष्ट्रेराजनि ॥ अम्बिकाया अपत्यम ॥ स्त्रीभ्योढक् ॥

आम्भसिक । पुं । मत्स्ये ॥ अम्भसावर्त्तते । ओजसहोम्भसावर्त्ततेइतिठक । ठस्येक ॥

आम्र । पु । चूते । रसाले ॥ अथास्यपुष्पादीनागुणा । आम्रपुष्पमतीसारकफपित्तप्रमेहनुत् । असृक्दुष्टिहरशीतंरुचिकृद् ग्राहिवातलम् ॥ आम्रबालकषायाम्लं रुच्यंमारुतपित्तकृत् । तरुणंतु तदत्यम्लंरूक्षं दोषत्रयास्रकृत् ॥ * ॥ आम्रमामत्वचाहीन मातपेतीवशोषितम् । अम्लंस्वादुकषायंस्याद्भेदनकफवातजित ॥ ॥ पक्कन्तु मधुरंवृष्य स्निग्ध शुक्रबलप्रदम् । गुरुवातहरहृद्यंवर्ण्यंशीतमपित्तलम् ॥ कषायानुरसं वह्निश्लेष्मशुक्रविवर्द्धनम् ॥ * ॥ तदेववृक्षसम्पक्कं गुरुवातहरंपरम् ॥ मधुराम्लसरकिञ्चित् भवेत् पित्तप्रकोपनम् ॥ ॥ आम्रंकृत्रिमपक्कंयततद्भवेत् पित्तनाशनम । रसस्याम्लस्यहाने स्तुमाधुर्याच्च विशेषत. । चूषितंतत परंरुच्यंबलवीर्यकरंलघु । शीतं शीघ्रपाकिस्याद्वातपित्तहरंसरम ॥ ॥ तद्रसोगालितोबल्योगुरुर्वातहरसर: । अहृद्यस्तर्पणो ऽतीवबृंहणः-कफवर्द्धन ॥ ॥ तस्यखण्डंगुरुपररोचनं चिरपाकिच । मधुरंबृंहणंबल्यं शीतलंवातनाशनम् ॥ वातपित्तहरं रुच्यंबृंहणं बलवर्द्धनम् । वृष्यंवर्णकरस्वादुदुग्धाक्तं गुरुशीतलम् ॥ * ॥ मन्दानलत्वं विषमज्वरञ्चरक्तामयबद्धगुदोदरञ्च । आम्रातियोगोनयनामयञ्चकरोति तस्मा दतितानिनाद्यात् ॥ ॥ एतद्वाम्रविषयमधुराम्रपरनतु । मधुरस्य परंनेत्रहितत्वाद्यागुणायत: ॥ * ॥ शुण्ठ्यम्भस्त्वनुपानंस्याद्दाम्राणा मतिभक्षणे । जीरकंवाप्रयोक्तव्यं सहसौवर्चलेनच ॥ * ॥ आम्रवीजं कषायंस्या च्छर्दतीसारनाशनम् । ईषदम्लञ्चमधुरं तथा हृदयदाहनुत् ॥ * ॥ आम्रस्यपल्लवंरुच्यं कफपित्तविनाशनम् । पल्लवमचनवदलम् । अस्य शाकप्रकारस्तु । स्विन्ना निष्पीडिता. कामकोकिलाहाररपल्लवा । घृतसिन्धूत्यसंसिद्धारुच्या, रामठवासिता ॥ सपिष्टखण्डयक्ता स्तेतलिताश्चाम्रपल्लवा । लवङ्गार्द्रक

सयुक्तामारीचैश्चिकारका ॥ ॥ * अस्यपल्लवमुकुलाना प्रकारस्तु । आम्रस्यैवनवताम्ररुचिप्रवाला खण्डीकृतालवणमिश्रितपिण्डिताश्च । वाल्लीकधूपनजुषोघृतदुग्धसिक्ता सन्दीपयन्ति पवनस्यसखङ्गिएते ॥ मुकुल सहकारशाखिन. शृतखण्डीकृतसैन्धवान्वित. । दधिमध्यमरीचसस्कृतस्त्रियातामरुचिछिनत्तिहि ॥ कफपित्तहरौह्ययोमुखवैरस्यनाशनौ । वह्निसन्जननौरुच्यौ चूतजौ पुष्पपल्लवौ ॥ ॥ आम्रमामंजलस्विन्नंमर्द्दितं दृढपाणिना । सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम् ॥ प्रपानकमिदंश्रेष्ठभीमसेनेननिर्मितम् । सद्योरुचिकरबल्यंशीघ्रमिन्द्रियतर्पणमिति ॥ अम्यते । अमगत्यादौ । अमितम्योर्दीर्घश्चेतिरक्दीर्घश्च ॥

आम्रगन्धकः । पुं । समष्ठिलायाम् । शाकविशेषे ॥

आम्रपेषी । स्त्री । शुष्काम्रखण्डे ॥

आम्ररसाकृति. । स्त्री । रसालायाः प्रभेदे । यथा । किञ्चित्कुङ्कुमसंयुक्त विमस्तुदधिगालितम् । सशर्करं भवेत् पीतापक्वाम्ररससन्निभा ॥ पीता शिखरिणीया साबल्यावर्णवर्तोहिता । सुरुच्यामधुरावल्यावातपित्तहरेति ॥

आम्रवणम् । न । चूतवने ॥ प्रनि… प्ररेत्यादिनावननकारस्यणः

आम्रात । पु । आमडा अम्बाडा इ.ति. विश्रुतेफलवृक्षविशेषे । कपीतने । पीतने ॥ आम्रातमम्लवातघ्नंगुरूष्णंरुचिकृतपरम् । पक्वन्तुतुवरं स्वादुरसपाकं हिमस्मृतम् ॥ तर्पणंश्लेष्मलंस्निग्धवृष्यंविष्टम्भिबृंहणम् । गुरुबल्यंमरुत्पित्तक्षतदाहक्षयास्रजित् ॥ अमावट इतिख्याते आम्रातके ॥ राजाम्रे ॥

आम्रातकः । पुं । आम्राते । कपीतनेवृक्षे ॥ अमौट इतिख्याते आम्रावर्त्ते ॥ पक्वस्यसहकारस्यकटे विस्ता… रस । घर्मशुष्कोमुहुर्दत्त आम्रातक इतिस्मृत. ॥ आम्रमतति । अत सातत्यगमने । कुञ्जादित्वाद्वुन ॥

आम्रातकेश्वरः । पुं । सिद्धस्थानविशेषे ॥ आम्रातकेश्वरे सूक्ष्मासूक्ष्माख्यापरमेश्वरीत्यागमः । सूक्ष्माचाम्रातकेश्वरे इति देवीगीताच ॥

आम्रावर्त्त. । पुं । आम्रातके । अमावट अमौट इतिभाषाप्रसिद्धे ॥ आम्रावर्त्तस्तृषाछर्द्दिवातपित्तहरःसरः । रुच्यःबृंह्योगुरुःपाकाल्लघुश्चसहितःकीर्त्तित. ॥

आम्रेडितम । न । द्विस्त्रिरुक्ते ॥ यथा । सर्पःसर्प इति ॥ आम्रेड्यते आधिक्ये ना च्यतेस्म । म्रेडृउन्मादे । क्त. ॥

आम्लवेतस. । पुं । अम्लवेतसवृक्षे ।

आम्ला । स्त्री । अम्लिकायाम् । तिन्ति डीवृक्षे ॥ श्रीवल्ल्याम् ।

आम्लिका । स्त्री । चिञ्चायाम् ॥ अम्लो द्गारे ।

आय । पुं । धनागमे । प्राप्तौ । लाभे ॥ एकादशभवने ॥ वास्तुविषये ध्व जाद्यष्टसु ॥ आयाध्वजोधूमसिंहश्वगोखरेभध्वाङ्क्षकाः इत्युक्ते. ॥ ग्रामादिषुस्वामिग्राह्ये भागे ॥ स्त्र्यगाररक्षके ॥

आ[illegible]शूलिकः । त्रि । तीक्ष्णकर्म्मणि ॥ तीक्ष्णोपायेनयोऽन्विच्छेत्सआ यःशूलिकोजनः । अयः शूलेन अर्था नन्विच्छति । अयः शूलदण्डाजिना भ्यांठक् ठञावितिठक् ॥

आयतः । त्रि । दीर्घे । लम्बा इति भा षा ॥ आयम्यतेस्म । क्तः । आयतते वा । यतीप्रयतने । पचाद्यच् ॥ आकृष्टे ॥ अतिप्रसृते ॥

आयतच्छदा । स्त्री । कदल्याम् ॥ आय ताश्छदाः यस्याः सा ॥

आयतनम् । न । आश्रये । विश्रामस्थाने ॥ यज्ञस्थाने । चैत्ये ॥ देवस्थाने ॥ आयतन्तेऽत्र । यती॰ । अधिकरणे ल्युट् ॥

आयतिः । स्त्री । दैर्घ्ये ॥ प्रभावे । कोषदण्डजे तेजसि ॥ उत्तरकाले । आगामिकाले। फलदानकाले ॥ प्राप्तौ ॥ सङ्गे ॥ संयमे ॥ आयम्यते अनया अनवा आयमनं वा। यमउपरमे । स्त्रियांक्तिन् ॥ आयास्यतिवा । याते र्बाहुलकाडृति. ॥

आयती । स्त्री । भविष्यत्काले ॥ कृदिकारादिति ङीष् ॥

आयत्तः । त्रि । अधीने । वशीभूते ॥ आयततेस्म । यती॰ । अकर्मकत्वात् कर्त्तरि क्तः ॥

आयत्तिः । स्त्री । स्नेहे । वशित्वे । वासरे ॥ बले । स्थाने । सामर्थ्ये ॥ सीमनि ॥ आयतनम् । यती॰ । स्त्रियां॥ क्तिन् ॥

आयमनम् । न । आकर्षणे ॥ यथादृढस्यधनुष आयमनमिति ॥ आकृष्य दीर्घीकरणे ॥

आयल्लकम् । न । उत्कण्ठायाम् ॥ इति हेमचन्द्रः ॥

आयसम् । न । लौहे ॥ त्रि । अयसोविकारे । अयोनिर्मिते ॥ अण् ॥

आयसी । स्त्री । लोहमयकवचे । अङ्गरक्षिण्याम् ।जालिकायाम् ॥ ङीप् ॥

आयस्त. । त्रि । तेजिते । शाणादिना-तीक्ष्णीकृते । क्षिप्ते ॥ क्रुध्यति ॥ कुपिते । हते । उत्सुके । प्रयत्नकुर्वाणे ॥ यसुप्रयत्ने । कर्त्तरिक्तः ॥

आयस्थानम् । न । स्वामिग्राह्योभाग-आय. स यस्मिन्नुत्पद्यते तस्मिन् ॥

आयात. । त्रि । आगते ॥

आयानम । न । स्वभावे ॥ इतिजटाधरः ॥

आयाम. । पुं । दैर्घ्ये ॥ आयम्यते अनेन वा आयमनं वा । घञ् । यद्वा । आयातिः । या० । अर्त्तिस्तुसुइति मन ॥

आयामवान् । त्रि । आयामिनि ॥ आयामोऽस्ति अस्य अस्मिन् वा । वलादिभ्योमतुवन्यतरस्यामिति मतुप् ॥

आयामी । त्रि । आयामवति ॥ पक्षे इनिः ॥

आयासः । पुं । व्यायामे । श्रमे ॥ आयसनम् । यसु० । घञ् ॥

आयी । त्रि । लाभवति ॥ मतुवर्थे इनिः ॥

आयु । पुं । छान्दसः । मनुष्ये । एति । इण० । छन्दसीणउण् । बहुलवचनात् भाषायामपीति व्याख्यानकृत् । जीवितव्याप्यकाले । आयुषि ॥ वायुनाजगदायुनेतिवर्णविवेक । मावधिष्ठाजटायुंमामितिभट्टिः । सम्पाती विन्ध्यस्याद्रेरभजतजटायोः प्रदभिज इत्यादिप्रयोगाश्चानुकूलास्तेषाम् ॥ आप्नोति । या० । मृगय्वादिश्च ॥

आयुक्त. । त्रि । व्यापारिते । ईषद्युक्ते । कर्माध्यक्षे । नियोगिनि ॥

आयुत । त्रि । समन्तात्युक्ते ॥

आयुधम् । न । शस्त्रमात्रे ॥ आयुधानां त्रयोभेद. प्रहरणानि पाणिमुक्तानि यन्त्रमुक्तानि चेति । तत्र । प्रहरणानि खड्गादीनि । पाणिमुक्तानि चक्रादीनि । यन्त्रमुक्तानि अश्मशरादीनि ॥ आयुध्यन्ते ऽनेनेति । युधसम्प्रहारे घञर्थेकविधानम ॥

आयुधधर्मिणी । स्त्री । जयन्तीवृक्षे ॥

आयुधागारम् । न । अस्त्रगृहे ॥ अत्र नियुक्तस्यलक्षणं मुक्तमात्स्ये १८९ अध्याये । स्थापनाजातितत्त्वज्ञः सततं प्रतिजागरः । राज्ञःस्यादायुधागारेदक्ष.कर्म सुचोद्यत इति ॥

आयुधिक. । पुं । अस्त्रजीविनि । शस्त्राजीवे । काण्डपृष्ठे ॥ अयुधेनजीवति । आयुधाच्छचेतिचाट्ठञ् ॥

आयुधीय । पुं । आयुधिके ॥ आयुधेन जीवति । छः ॥

आयुर्द्रव्यम । न । औषधे ॥

आयुर्वेदः । पुं । अष्टादशविद्यान्तर्गतध

न्वन्तरिप्रणीत विद्याविशेषे । चिकित्साशास्त्रे । रोगोपशमपूर्वकानन्दफलके अष्टस्थानसयुते अथर्ववेदस्योपाङ्गे । आयु.शरीरेन्द्रियसत्वात्मसंयोग ।तदस्मिन् विद्यते । अथवा आयुरनेनविन्दतीत्यायुर्वेद. । ऋग्वेदस्योपवेदे । इति शौनकोक्तचरणव्यूह' ॥

आयुर्वेदी । त्रि । आयुर्वेदज्ञे । चिकित्सके । वैद्ये ।

आयुर्योग' । पुं । औषधे ।

आयुष्मान् । त्रि । चिरजीविनि । दीर्घायुषि । अतिशयित मायुरस्य । मतुप् । तसौमत्वर्थे ॥ पुं । तृतीय योगे ॥ तत्रजातस्य फलं यथा । यस्यान्जन्मकालेधनुष्मान् यानेयानंतस्य शेषुकार्य्यम् । कुर्यान्नूनं क्रीडनं पुष्पशाल्यांदासैर्वासैरन्वितोगर्वितश्चेति ।

आयुष्यम् । त्रि । पथ्ये । आयुषोनिमित्ते । आयुषेहिते ॥ यत् ।

आयुः । न । जीवितकाले । परमायुषि । पथ्याशिनांशीलवतांनराणांसद्वृत्तिभाजांविजितेन्द्रियाणाम् । एवंविधानामिदमायुरत्रचिन्त्यंसदाष्टमुनिप्रवादः । इतें । अष्टमभवने । एति । इण्गतौ । एतेर्णिच्चेत्युसि. । णित्वाद्वृद्धौकृतायामायादेशः ।

आयुस्कार: । त्रि । परमायुर्जनके ।

आयोग । पुं । गन्धमाल्योपहारे । व्यापृतौ । व्यापारे । रोधे । आयोजनम् । युजिर्° । घञ ॥

आयोगव. । पुं । शूद्राद्वैश्यायामुत्पन्ने जातिविशेषे । काष्ठतक्षणमस्यकर्म ।

आयोजनम् । न । आहरणे । द्रव्यासादने । यथा । कुत्रचित्तण्डुला.सन्निकृष्टस्थालीकाचेन्धनम् । तेषामायोजनं कुर्वन् मुख्य'कर्त्ताभिधीयत इति ।

आयोधनम । न । युद्धे । वधे । युधसम्प्रहारे । भावे ल्युट् ।

आर: । पुं । मङ्गलग्रहे । शनिग्रहे । पित्तले । रेफल इतिगौडभाषाप्रसिद्धे मधुराम्लफले । वृक्षविशेषे ॥ न । मुण्डलोहे । पित्तले । रीत्याम् ॥ कोणे । प्रान्तभागे । ऋगतौ । भावे घञ् ।

आरकूट. । पुं । न । पित्तले । रीत्याम् । यथा । अकाञ्चनेकाञ्चननायिकाङ्के किमारकूटाभरणेन न श्रियइति ॥ आरंकूटयते । कूटदाहे । पचाद्यच् ।

आरब्धः । पुं । हस्तिकुम्भाध स्थले । गजकुम्भसन्धौ । हस्तिशीर्षमर्मणि । सैन्ये ॥ त्रि । रक्षके ॥ रक्षणीये ।

। स्त्री । रक्षायाम् । आरक्षति । र
क्षपालने । पचाद्यच् ।
आरग्वध. । पुं । धनवहेडा सोनालु गि
रमालव अमलतास इतिभाषाप्रसि
द्धे राजवृक्षे । व्याधिघाते । अस्यगु-
णाः । आरग्वधेगुरुः स्वादुःशीतलः
स्रंसनोत्तम. । ज्वरहृद्रोगपित्ता
स्त्रवातोदावर्त्तशूलनुत् । तत्फलंस्रं
सनंरुच्यंकुष्ठपित्तकफापहम् । ज्वरे-
तुसततं पथ्यंकोष्ठशुद्धिकरंपरमिति-
। आरगलम् । रगेशङ्कायाम् । सम्प
दादित्वात् क्विप् । आरगंरोगशङ्का
मपिहन्ति । कर्मण्यण् । बहुलंतणी
तिहन्तेर्वध: अदन्तः । यद्वा । रुजरा
गे । सम्पदादित्वात् क्विप् । आरजं-
रोगशङ्कामपिहन्ति ।
आरट्टः । पुं । अश्वयोनौ देशविशेषे ।
आरट्टजः । पु । आरट्टदेशोद्भवघोटके
। पारसीके । आरट्टे जात. । जनी°
। डः ।
आरव्वि' । पुं । पयसांभ्रमे । आवर्त्ते ।
कुलशखडके । इतिहारावली ॥
आरण्यः । त्रि । श्वापदिमृगादौ । अ
रण्ये भवः । अरण्याण्. । गोमये ।
वागोमयेषु ।
आरण्यकः । पुं । पथि । अध्याये । न्या
ये । विहारे । मनुष्ये । हस्तिनि ।
गजे । अरण्येभवः । पथ्यध्यायाद्य-
र्थे अरण्यान्मनुष्यइतिवुञ् । गोम-
ये । वा गोमयेषु । न । काण्वानां
माध्यन्दिनानाञ्चब्राह्मणविशेष । अ
रण्येऽनूच्यमानत्वात् तस्य । अर-
ण्येध्ययनादेतदारण्यकमुदाहृतम् ।
आरण्यकुक्कुट. । पुं । वनकृकवाकौ ।
आरण्यकुक्कुट' स्निग्धोबृंहणःश्लेष्मलो
गुरुः । वातपित्तक्षयवमीविषमज्वर
नाशनः ।
आरण्यपशुः । पुं । अरण्यजातपशौ ।
सचसप्तधा । यथा । महिषः । वान
रः । ऋक्षः । सरीसृपः । रु । । पृष-
तः । मृगः । इतितिथ्यादितत्त्वे पैठी
नसिः ॥
आरण्यमुद्गा । स्त्री । मुद्गपर्ण्याम् ।
आरण्यराशिः । पुं । मेषे । वृषे ॥ सिं-
हे । मकरप्रथमार्द्धे ॥
आरति. । स्त्री । उपरमे । निवृत्तौ ।
आरमणम् । रमक्रीडायाम । क्ति-
न् ।
आरथ' । पुं । एकाश्वगन्त्र्याम् ।
आरनालम् । न । काञ्जिके । आरना
लन्तुगोधूमै रामै. स्यान्निस्तुषीकृ-
तै' । पक्वैर्वासन्धितैस्तत्तुसौवीरसदृ
शंगुणैः । आच्छंति । ऋगतौ । अच्
। नलति । नालगन्धे । ज्वलतीतिवा:

। आरो नालोस्य ।

आरनालकम् । न । काञ्जिके । आरो नालोऽस्य । शेषाद्विभाषेतिकप् ।

आरवी । स्त्री । आरबनाम्नोम्लेच्छविशेषदेशस्यभाषायाम । अस्यपठनम् दूर्त्तः पारसीवद्बोध्य ।

आरब्धः । त्रि । कृतारम्भे । न । आरम्भे ॥

आर । पुं । म्लेच्छदेशप्रभेदे ।

आ.र ा । स्त्री । आरवीभाषायाम् ॥

आरभटी । स्त्री । नाट्यवृत्तौ ॥

आरमणम् । न । आरामे ।

आरम्भः । पुं । त्वरायाम् । उद्यमे । स्वार्थंपरोपकारार्थंवाग्रहस्थेचादिस आदनमयत्ने । वधे । दर्पे । प्रस्ता व. णाम् । उपक्रमे । प्रथमकृतौ । प्रारम्भे । आरम्भणम् । रभराभस्ये । घञ् । रभेरशब्लिटोरितिनुम् ।

आरम्भवादः । पुं । तार्किकाणां मीमांसकानाञ्चवादे । सयथा । आत्मा काशाणुमुखतः कारणं पूर्वमिष्यते । कुलालादिव दण्डन्तु घटवज्जन्मना शभाक् । पृथिव्यम्भोग्निवायूनांकर्मसंयोजितावयवः । द्व्यणुकादिक्रमेणा ण्डमारभन्तइदंमहदिति ।

आरम्भवादी । पुं । वैशेषिके । त्रि । तन्मतवादिनि ।

आरम्भसिद्धिः । स्त्री । कार्यसिद्धौ ।

आरम्भी । पुं । आरम्भवादिनि । वैशेषिके । समवाय्यसमवायिनिमित्त कारणेभ्योभिन्नस्यकार्यस्ययेोत्पत्तिस्तां योवक्तितस्मिन्निरूयर्थ । सचवै शेषिक ।

आरव. । पुं । शब्दमात्रे ॥ आरवणम् । रुशब्दे । विभाषाडिरुप्लुवोरितिघ ञोभावेऋदोरप् ॥

आरा । स्त्री । चर्मप्रभेदकास्त्रे । चर्मप्रभेदिकायाम् । आइयर्त्ति ऋच्छ तिवा । ऋगतौ । अच् । आर्यतेवा । भिदादावाराशस्त्र्यामितिपाठात् साधुः । प्रतोदे । अर्यन्तेऽनयाऽश्वा. । आङ्पूर्वात्र्तिः । आङोर्त्तेश्च । उपसर्गादृतीति वृद्धिः ॥

आराग्रम् । न । अर्द्धचन्द्राद्यस्त्रमुखे ॥ अर्द्धचन्द्रक्षुरप्रादिधाराग्रंमुखमुच्यते । आराग्रन्तुमुखन्तेषांपुष्पपत्रादिभेदतः । इतिहलायुधः ॥

आरात् । ा । दूरे । समीपे ॥ आराति । रादाने । बाहुलकादातिप्रत्ययः ।

आराति. । पुं । अरौ । शत्रौ ।

आरातीयः । त्रि । दूरस्थे । निकटस्थे । आरातभवः जातः आगतोवा । वृद्धाच्छः ॥

आरात्रिकम् । न । नीराजनायाम् ॥ नीराजननिमित्तदीपे । नीराजनामन्त्रे । आदौ चतुष्पादतले च विष्णोः द्वौ नाभिदेशे मुखमण्डलैकम् । सर्वेषु चाङ्गेष्वपि सप्तवारानारात्रिकं भक्तजनस्तु कुर्यात् ॥

आराधनम् । न । पचने ॥ साधने ॥ अवाप्तौ ॥ तोषणे ॥ पूजने । असारसंसारविवर्त्तनेषु मायात तोषमसभ ब्रवीमि । सर्वत्र दैत्या. समतामुपेतसमत्वमाराधनमच्युतस्येति प्रह्लादः ॥ असारोयं संसारस्तत्र विवर्त्तनानि देवमनुष्यतिर्यगादिजन्मानि तेषु तत्तदुचितैर्भोगैस्तोषं मायात किन्तु सर्वत्र सर्वेषु भूतेषु समतां समदर्शितामुपेतमामुत । तदेवाच्युतस्याराधनमित्यर्थ. ॥ आराध्यतेऽनेन । राध संसिद्धौ । भावकरणादौ ल्युट ॥

आराधना । स्त्री । साधनायाम् । सेवायाम् । परिचर्यायाम् ॥ टाप् ॥

आराधनीयः । वि । आराधयितुं योग्ये ॥

आराध्यः । वि । उपास्ये । सेव्ये ॥

आरामः । पुं । उपवने । कृत्रिमवने । क्रीडार्थवने ॥ आरमन्त्यत्र । रमक्रीडायाम् । हलश्चेति घञ् ॥

आरामशीतला । स्त्री । सुगन्धिपत्रविशेषे । आनन्द्याम् । गन्धाढ्यायाम् ॥

आरालिकः । त्रि । पाचके । सूपकारे ॥ जिह्मगामिनि ॥ अरालं कुटिलं चरति । चरतीति ठक ॥

आराव । पुं । आरवे । निनादे । निस्वने ॥ आरवणम् । रुशब्दे । विभाषाङिरुप्लुवो रिति घञ् ॥

आरु । पुं । वृक्षविशेषे ॥ कर्कटे ॥ शूकरे ॥

आरुणि । पु । उद्दालके । [illegible] ॥ अरुणस्यापत्यम् । अतइञ् ॥

आरुणेय । पुं । श्वेतकेतुमुनौ ॥ आरुणेरपत्यम । ढक ॥

आरुरुक्षु । त्रि । आरोढुमिच्छौ ॥

आरूः । पुं । तरोर्भेदे ॥ कर्कटे ॥ दंष्ट्रिणि । शूकरे ॥ पिङ्गलवर्णे ॥ वि । लवर्णवति ॥ ऋच्छति । अर्त्ति [illegible]वा । ऋगतिप्रापणयो. । खित्कसिपद्यर्त्तिरिण्यूः ॥

आरूकम् । न । वीरसेनवृक्षे । आडूइति भाषा । हिमाचलप्रसिद्धौषधीविशेषे । आड इति गौडभाषा ॥ तत्पत्रपुष्पादिभेदतस्तु जाति ॥

आरूढः । त्रि । कृतारोहणे ॥ उच्चस्थानगते ॥ आङ्पूर्वाद्रुहेर्गत्यर्थे तिक्त । ढत्वधत्वष्टुत्वढलोपदीर्घाः ॥ आरूढोनैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः । प्रायश्चित्तं न पश्यामि येन शुध्येत स आ

त्मता ।

आरैवतः । पुं । आरग्भे । राजवृक्षे ॥ न । पारेवतवृक्षफले ॥ आरेवय ति निस्सारयतिमलम् सारकत्वात् । रेवृप्लवगतौ । णिच् । विच् । अत क्ति । अत° अच् । आरेवश्चासौ अ-तश्च ॥

आरोग्यम । न । अनामये । लाघवे । ागराहित्ये ॥ अरोगस्य भावः । ब्रा ह्मणादित्वात्ष्यञ् ॥ रोगाभावसा ने ॥

आ ग्यशाला । स्त्री । चिकित्सालये ॥ यथा । धर्मार्थकाममोक्षाणामारो ग्यंसाधनंयत. । अतस्त्वारोग्यदाता रोभवति सर्वदः ॥ आरोग्यशा लांकुर्वीतमहौषधपरिच्छदाम् । वि दग्धवैद्यसंयुक्तांबल्लवरससंयुताम् ॥ वैद्यस्तुशास्त्रवित्प्राज्ञोदृष्टौषधपरा क्रमः । ओषधीमूलतत्त्वज्ञ.समुद्धरण कालवित् ॥ वलवीर्यविपाकज्ञ. शा लिमांसौषधीगणे । त्यागिवद्देहिनां तद्वदनुकूलःप्रियंवदइतिवैद्यकम ॥

आरोपः । पुं । मिथ्यारोपणे ॥ यथार ज्जौसर्पारोपवत् वस्तुन्यवस्त्वारोपः ॥ मिथ्याविष्करण ॥

आरोपणम् । न । न्यासे । संस्थापने ॥

आरोपितः । त्रि । कल्पिते ॥ कृतारो पणे । निहिते । न्यस्ते ॥

आरोहः । पुं । अवरोहे ॥ वरारोहाक टौ । वरस्त्रियाःश्रोणाम ॥ आरोह णे ॥ गजारोहे ॥ दीर्घत्वे ॥ समुच्छ्र ये ॥ परिमाणविशेषे । नितम्बे ॥ आ रुह्यते अनेनवा आरोहणम् आरो हतिवा । रुहेःकरणेभावेवा घञ् । अचवा ॥

आरोहकः । त्रि । आरोहणकर्त्तरि ॥

आरोहणम् । न । सोपाने । पैडी इति भाषा । पाषाणादिनिर्मिते सौधादि परिगमनमार्गे ॥ समारोहे । नीचा दूर्ध्वगमने । चढना इतिभाषा ॥ प्ररोहणे । अङ्कुरादिजन्मने ॥ आरुह्य तेऽनेन । रुहप्रादुर्भावे । करणेल्युट् ॥

आर्किः । पुं । अर्कपुत्रे । शनैश्चरे ।

आर्गवधः । पुं । राजवृक्षे । आरग्वधे ॥

आर्घा । स्त्री । मधुमक्षिका विशेषे । यापीतादीर्घतुण्डा षट्पदसन्निभा भवति ॥

आर्घ्यम् । न । मधुप्रभेदे ॥ मधूकवृक्षा निर्यासंजरत्काष्ठीश्रमोद्भवाः । स्रव न्त्यार्घ्यंतदाख्यातंश्वेतकं सालवेपुन ॥ तीक्ष्णतुण्डास्तु या पीतामक्षिकाः षट्पदोपमाः । आर्घास्तास्तत् कृतं यत्तदार्घ्यमित्यपरेजगु ॥ आर्घ्यम् स्यति चक्षुष्यंकफपित्तहरं परम ।

कषायं कटुकं पाके तिक्तञ्चवल पुष्टि कृत् ।

आर्च्चः । त्रि । अर्च्चावति । अर्चास्ति अस्य अस्मिन्वा । प्रज्ञाअर्चाचोभ्योण इति पाणिनिकोण. ।

आर्च्चिकः । पुं । ऋचांव्याख्याने । त्रि । ऋचिभवे । द्व्यजृद्ब्राह्मणर्कप्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् ।

आर्जवम् । न । अकौटिल्ये । आर्जवंहि कुटिलेषु न नीति'। यथा हृदयवञ्चरणे । परप्रतारणाराहित्ये । परचित्तानुसारित्वे । अद्धानेषुश्रोतृषुस्वज्ञातार्थसङ्गोपने । विहितप्रतिषिद्धयोरेकरूपप्रवृत्तिनिवृत्तिशालित्वं शारीरमार्जवम् । ऋजोर्भावः । इगन्ताच्चलघुपूर्वादित्यण् ।

आर्त्त. । त्रि । पीडिते । असुस्थे । जराव्याध्यादिना ऽवशंप्राप्ते । दुःखाभिभूते । पुत्रवियोगादिदुःखिते ।

आर्त्तगलः । पुं । नीलझिण्ट्याम् । वाणायाम् । आर्त्तःक्षीणोगलति । गलअदने । प० अच् ।

आर्त्तभागः । पुं । ऋषिविशेषे । ऋतभागस्य गोत्रापत्यम् । विदाद्यञ् ।

आर्त्तवम् । न । रजसि । स्त्रीपुष्पे । पुष्पे । त्रि । ऋतुजे । ऋतुसम्बन्धिनि । ऋतु' प्राप्तोऽस्य । ऋतोरण् । ऋतुरेववा । प्रज्ञादिभ्यश्चेत्यण् ।

आर्त्तवी । स्त्री । घोटक्याम् । वाजिन्याम् ।

आर्त्ति' । स्त्री । पीडायाम् । रोगे । आङ्ऋच्छतेः क्तिनिउपसर्गादृतीतिवृद्धिः ।

आर्त्विजीन. । पुं । ब्राह्मणे । यजमाने । ऋत्विक्कर्मार्हति । ऋत्विजवा अर्हति । यज्ञर्त्विग्भ्यांघखञाविति सूत्रेण यज्ञर्त्विग्भ्यांतत्कर्मार्हतीतिचोपसङ्ख्या नमितिवार्त्तिकेन खञ् । विद्वानयजेत विद्वान्याजयेदितिद्वयोरपिविदुषोरधिकारात् । योवाइमांपदशः स्वरशोवर्णशोवाचविदधाति स आर्त्विजीन इति आर्त्विजीना. स्यामेत्यर्थवादेयंव्याकरणमितिभाष्यम् ।

आर्त्विज्यम् । न । ऋत्विक्साध्यकर्मणि । ऋत्विजः कर्म । ष्यञ् ।

आर्थिकः । त्रि । अर्थग्राहके । अर्थादागते । अर्थंगृह्णाति । प्रतिपथठार्थ ललामञ्चेतिठक् ।

आर्थीभावना । स्त्री । भावनाविशेषे । प्रयोजनेच्छाजनितयागादिनि.ये च्छाविषयव्यापार आर्थीभावना । साचाख्यातत्वांशेनोच्यते । आख्यातसामान्यस्य व्यापारवाचित्वात् । सा

चांशत्रयमपेक्षते । साध्यंसाधनमि
तिकर्त्तव्यताञ्च । किम्भावयेत् केन
भावयेत् कथंभावयेदिति । तत्रसा
ध्याकाङ्क्षायां स्वर्गादिफलंसाध्यत्वे
नान्वेति । साधनाकाङ्क्षायांयागा
दि करणत्वेनान्वेति । इतिकर्त्त-
व्यताकाङ्क्षाया प्रयाजाद्यङ्गजात-
मितिकर्त्तव्यतात्वेनान्वेति ॥

आर्द्रकः । पु । कृषके ॥

आर्द्र. । त्रि । सजलवस्तुनि । क्लिन्ने ।
स्तिमिते । भीजा गीला इतिभाषा ।
अर्द्यतेस्म । अर्दगतौ । अर्हेर्दीर्घ
श्चेतिरक ॥ आर्द्रद्रव्यंद्विधाप्रोक्तं सर
संनीरसंतथा । सदुग्धंगुसरसकंद्वि
नीरसमुच्यते । वास्तूकंसार्षपंशा
कंशिगुणञ्चोरण्डमार्षकम् । धत्तूरा-
द्यमिदंसर्वमार्द्रंसरसमुच्यते । वटाश्व
त्थकरीराद्यमार्द्रद्रव्यन्तुनीरसम् ।
सदुग्धन्तुद्विधाप्रोक्तंमृदुतीक्ष्णमिति
क्रमात् । शातलावज्रसीहुण्डसैरि
ण्याद्यास्तुतीक्ष्णकाः । दुग्धिकार्क-
क्षीरिण्याद्यामृदुदुग्धा. प्रकीर्त्तिं-
ताः ॥

आर्द्रकम् । न । मूलविशेषे । अपाकशा
के । शृङ्गबेरे । अदरख इतिभाषा
। आर्द्रिकाभेदिनीगुर्वीतीक्ष्णोष्णा
दीपनीचसा । कटुकामधुरापाके
रूक्षावातकफापहा ॥ येगुणाःकथि
ताःशुण्ठ्यास्तेपिसन्त्यार्द्रकेखिला ।
भोजनाग्रेसदापथ्यंलवणार्द्रक भक्षण
म । अग्निसन्दीपनंरुच्यं जिह्वाकण्ठ
विशोधनम् ॥ कुष्ठेपाण्ड्वामयेकृच्छ्रे
रक्तपित्ते कफज्वरे । दाहेनिदाघेश
रदिनैवपूजितमार्द्रकम् ॥ अपिच ।
चक्षुष्यंरोचनंस्वर्थ्यंविकाशिविशदंस
रम् । स्तम्भाटोपानिलघ्नञ्चलवणार्द्र-
कभक्षणम् ॥ गुडार्द्रकवातहरंचक्षु
ष्यंपित्तनाशनम । ज्वरघ्नंचातितृष्य
ञ्चवर्चोभेदिकफापहम् ॥ मृत्त्वचा
रहितमङ्कुरत.सत्क्षालितंविमलकै
र्बहुतोयैः । मिश्रितंलवणनिम्बुपयो
भिर्वीलमार्द्रकमुपैतिये।ग्यताम् ॥
तैलासुरीरजनिसिन्धुजपङ्कसङ्गिप्र-
स्यन्दमाननवनिम्बुरसप्रसक्तम् । स्वा
दुस्तरांशिशिरवासरभोजनेषु कस्ये-
तिवर्णनपथंखलुशृङ्गवेरम् ॥ हृष्यो
ष्णंदीपनंहृद्यं सक्तेहंलघुपाचनम् ।
रोचनंतर्पणंदल्यंचार्द्रकंपरिकीर्त्ति
तम् । वातपित्तकफेभानांशरीरव
नचारिणाम् । एकएवनिहन्तास्ति-
लवणार्द्रककेशरी । आर्द्रीयाजातम्
। पूर्वाह्णापराह्णार्द्रेति वुन् ॥ आर्द्र
यतिजिह्वायांवा । कुन ॥ आर्द्रसंज्ञ
कंवा संज्ञायामितिकन् । अर्दयतिक

फवा । अर्द्द° । अर्द्दे दीर्घश्चेतिरक् । ईक ॥

आर्द्रकवट: । पुं । मुद्राद्रकवटे ॥

आर्द्रता । स्त्री । पङ्किलत्वे ॥

आर्द्रपटवासा: । पुं । तापसविशेषे ॥ आर्द्रपटंवासआच्छादनंयस्य ॥

आर्द्रमाषा । स्त्री । माषाणीति गौड भाषा प्रसिद्ध माषपर्य्याम् ॥

आर्द्रशाकम् । न । आर्द्रके ॥

आर्द्रा । स्त्री । षष्ठनक्षत्रे ॥ तत्रजात स्यफलंयथा । क्षुधाधिकोरक्कशरी रकान्ति'कलिप्रिय. कोपयुतोऽविनी त: । प्रसूतिकालेचभवेत्किलार्द्रान चार्द्रचेता.शरणागतेपीति ॥ टाप् ॥

आर्द्रालुब्धक' । पुं । केतुग्रहे ॥

आर्भटि: । स्त्री । अत्यादरे । टी । स्त्री ॥

आर्य्य: । पुं । स्वामिनि ॥ वृद्धे ॥ गुरौ ॥ सुहृदि । त्रि । श्रेष्ठकुलोत्पन्ने । सत्कु लोद्भवे ॥ पूज्ये । श्रेष्ठे । सङ्गते । ना य्योऽत्रया मान्ये ॥ उ... न्ते । स्व च्छस्वान्ते ॥ कर्त्तव्यमाचरन् काम मकर्त्तव्यमनाचरन् । तिष्ठतिप्रकृता चारे सतुआर्यइतिस्मृत ॥ अर्त्तेयो ग्य: अर्य्यतेवा । ऋगतौ । ऋहलो र्ण्यत ॥

आर्य्यक' । पुं । पितामहे । मातामहे । न । पिण्डपात्रादिपितृकार्ये । इति त्रिकाण्डशेष' ॥

आर्य्यका । स्त्री । श्रेष्ठायांनार्य्यांम ॥ उदीचामात इति प्रत्येकत्व:भाव: ॥

आर्य्यगृह्य: । त्रि । आर्यपक्षाश्रिते ॥ आ र्य्यैर्गृह्यते । पदास्वैरिवाह्यापक्ष्येषुचे तिग्रहे: पक्षेक्यप् ॥

आर्य्यधर्म्म. । पु । सदाचारे ॥ त्रि । त इति ॥

आर्य्यपुत्र' । पुं । भर्त्तरि ॥ गुरुपुत्रे ॥

आर्य्यमिश्र: । त्रि । गौरवयुक्ते ॥

आर्य्यहलम् । न । बलात्कारे ॥

आर्य्या । स्त्री । उमायाम् । गौर्य्याम् पार्वत्याम् ॥ मात्रावृत्तप्रभेदे ॥ य था । पादेद्वादशविषमे मात्राश्चा ष्टादशद्वितीयेहि। पञ्चदशचे ये कथितागाथा तथैवार्य्या ॥ सान वधा । पथ्या विपुला चपला मुखचप ला जघनचपलाच । गीत्युपगीत्यु द्गीतय आर्यागीतिश्चनवधार्य्याद्दा

आर्य्यावर्त्त: । पुं । देशविशेषे । पुण्यभू मौ । यथा । आसमुद्रात्तुवैपूर्वादा समुद्रात्तु पश्चिमात् । हिमवद्विन्ध्य योर्मध्य मार्यावर्त्तंमनुर्जगौ ॥ आ र्य्या: आसमन्तात् वर्त्तन्ते पुन: पुन रुद्भवन्त्यत्र । वृत° । हलश्चेतिघञ् ।

आर्य्यिका । स्त्री । आर्य्यकायाम् ॥ उदी चामिति प्रत्येकत्वम् ॥

आर्षः । त्रि । ऋषिप्रणीते । वेदोक्ते ॥ पुं । विवाहविशेषे । वरात् गोद्वयं गृहीत्वा तेनैवसह कन्यादाने ॥ यत्र स्थायर्त्विजेदैव आर्ष आदाय गोयुगम् । चतुर्दशप्रथमजः पुनात्युत्तरजश्चषट् । इति याज्ञवल्क्यः । ऋषेरिदायम् । अण् । ऋषिणाप्रोक्तम् । तेनप्रोक्तमित्यण् ॥

०। धर्मः । पुं । मन्वत्रिविष्णुहारीतयाज्ञवल्क्यादिप्रणीतेधर्मे ।

आर्षभिः । पुं । चक्रवर्त्तिनि । भरते । ऋषभस्यापत्यम् । अतइञ् ॥

आर्षभी । स्त्री । कपिकच्छाम् ॥ मध्यमार्गे नक्षत्र विशेषाणांसंज्ञाविशेषे ॥ ।। तथाहेचापिफल्गुन्यौमघाचैवार्षभीमतेति ।

आर्षभ्यः । पुं । षण्ढतायोग्यवृषे । ऋषभस्यप्रकृतिः । ऋषभोपानहो-र्ञ्यः ॥

आर्ष्टिषेणः । पुं । मुनिविशेषे ॥ ऋष्टिषेणस्यगोत्रापत्यम् । विदाद्यञ् । अपत्यसामान्ये शिवाद्यण् ॥

आर्हतः । पुं । सप्तपदार्थवादिनिजिनविशेषे । वादवादिनि ।

आर्हन्ती । स्त्री । योग्यतायाम् ॥ अर्हतोभावः । ब्राह्मणादिषु अर्हतोनुम्चेतिनु मागमः ष्यञ्च । ङीष ।

यलोपः ॥

आर्हन्त्यम् । न । योग्यत्वे । अर्हतोभावः । नुम्ष्यञौ ॥

आलम् । न । हरिताले । त्रि । अनल्पे । आआलयति । अलभूषादौ । अच् । आलातिवा । ला० । आतश्चोपसर्गेकः ॥

आलपितः । त्रि । कथिते ।

आलगर्द्दः । पुं । अलगर्द्दे । स्वार्थेऽण् ।

आलभनम् । न । स्पर्शने ।

आलम्बः । पुं । अवलम्बे । आश्रये । घञ् ।

आलम्बनम् । न । आश्रये । विभावविशेषे । लवि अवस्रंसने । आङ्पूर्वाद्ल्युट् ॥

आलम्बितः । त्रि । धृते ।

आलम्बी । त्रि । आलम्बितुंशीले । लवि० । सुपीतिणिनि ॥

आलम्भः । पुं । वधे । मारणे । स्पर्शे । आलभनम् । डुलभष् प्राप्तौ । घञ् । लभेश्च । उपसर्गात् खलघञोरिति नुम् ॥

आलभ्य । त्रि । वधार्हे ।

आलयः । पुं । गृहे । आलीयतेऽत्र । लीश्लेषणे । पुंसीतिघः ।

आलयम् । । । मोक्षपर्यन्ते । लयंमर्यादीकृत्य ।

आलयविज्ञानम् । न । अहङ्कारास्पदे

पूर्वापरानुसन्धातरि ॥

आलवालम् । न । वृक्षमूलसेकार्थं स्वल्पजलखाते । आवाले ॥ आसमन्ताज्जलस्य लवमालाति । ला आदाने । मूलविभुजादित्वात्कः ॥

आलस. । त्रि । अलसे । क्रियामन्दे ॥ आलसति । लस श्लेषणे । पचाद्यच् ॥

आलस्यम् । न । अलसत्वे । सतिसामर्थ्ये अवश्यकर्त्तव्यकरणानुत्साहलक्षणे । कौसीद्ये ॥ सत्त्वामप्यौदासीन्यप्रच्युतौ कफादिना तमसा च कायचित्तयोर्गुरुत्वे ॥ व्याधित्वेनाप्रसिद्धमपियोगविषये प्रवृत्तिविरोधिनि ॥ प्रवृत्त्यसामर्थ्यं रज' कार्यविरोधि आलस्यम् ॥ त्रि । अलसयुक्ते । तुन्दपरिमृजे । मन्दे ॥ आलसएव । स्वार्थे ष्यञ् ॥ अलसस्य कर्मभावोवा । ब्राह्मणादित्वात् ष्यञ् ॥ आलस्यमस्यास्ति । अ० अच् वा ॥

आलातम् । न । अङ्गारे ॥ स्वार्थेऽण् ॥

आलानम् । न । करिणो वन्धनस्तम्भे ॥ गजवन्धनरज्जौ । वन्धने ॥ आलीयतेऽत्र । लीङ् श्लेषणे । अधिकरणेल्युट् । विभाषालीयतेरित्यात्त्वम् ॥

आलापः । पु । आभाषणे । कथोपकथने । सम्भाषणे ॥ आलपनम् । लपे घञ् ॥

आलाप्यः । त्रि । आलापयोग्ये ॥

आलावर्त्तम् । न । वस्त्रनिर्मितव्यजने ॥

आलाबुः । स्त्री । } अलाबाम् । तुम्ब्याम् ॥
आलाबूः । स्त्री । }

आलास्यः । पुं । कुम्भीरे ॥ इतिहेमचन्द्र' ॥

आलि. । पुं । भ्रमरे ॥ वृश्चिके ॥ स्त्री । वयस्यायाम् । सख्याम् ॥ सेतौ । क्षुद्रसेतौ । आगन्तुजलवारणार्थं धांवृतौ ॥ सस्यार्थजलधारणे ॥ पङ्क्तौ । आरामस्थपुष्पादिगुल्मपङ्क्त्याम् ॥ सन्ततौ ॥ त्रि । विशदाशये । शुद्धान्त'करणे ॥ अनर्थे ॥ अलति दंशेसमर्थो भवति । अलेर्बाहुलकादिण् ॥ आलयति । अलभूषणे । ॰ ॥ आ अलन्त्यस्मः । अलवारणे । सर्वधातुभ्यइन् ॥ अल्यतेऽनयावा । अलभूषादौ । इञजादिभ्यः ॥ आलति । आङिइन् ॥

आलिङ्गनम् । न । प्रीतिपूर्वकमिथोदेहसंश्लेषे । उपगूहने । परिरम्भे ॥ कामशास्त्रे तत्सप्तधा । यथा । आमोदालिङ्गनम् । मुदितालिङ्गनम् । प्रेमालिङ्गनम् । आनन्दालिङ्गनम् । रुच्यालिङ्गनम् । मदनालिङ्गनम् । विनोदालिङ्गनमिति ॥

आलिङ्गितः । त्रि । आश्लिष्टे ॥

आलिङ्गी । पुं । मृदङ्गविशेषे । आलिङ्ग्ये ॥

आलिङ्ग्यः । पुं । यवाकृतिमृदङ्गे । गोपुच्छाकृतिरालिङ्ग्यः ॥ शब्दार्णवे तु । चतुरङ्गुलहीनोऽङ्कात्मुखेचैका ङ्गुलेनय. । यवाकृतिः सआलिङ्ग्य- आलिङ्ग्यसह्निवाद्यते इत्युक्तम् ॥ आलिङ्ग्यते । लिगिगतौ । ऋहलोर्ण्यत ॥

आलिञ्जरः। पुं । माट कुण्डा गोल जालाइत्यादि भाषाप्रसिद्धे मणिके । जलभाण्डे ॥ अलिञ्जरएव । स्वार्थे अण् ॥

आलिन्दः । पुं । अलिन्दे ॥ स्वार्थे प्र० अ ॥

आलिम्पनम् । न । मङ्गलालेपने । आतर्पणे । मण्डोदके ॥ इतित्रिकाण्डशेषः ॥

आली । स्त्री । आलिशब्दार्थे ॥ कृदिकारादितिङीष ॥

आलीढम् । न । धन्विनःपादन्यासप्रभेदे । दक्षपत्सङ्कोचान्यपादप्रसारणे । दक्षिणजङ्घाप्रसारवामपादसङ्कोचरूपावस्थानेच ॥ लक्षणं यथा । नमितापूर्वजङ्घाच पश्चिमाप्रगुणाभवेत् । असमोमध्यकायश्चस्यादालीढस्य लक्षणमिति । त्रि । अशिते । भुक्ते ॥ क्षते ॥ सेनान्यमालीढमिवासुरास्त्रै रितिक्षतेलक्षम् ॥ आलेहनम् । लिह्रेर्नपुंसकेभावे क्तः ॥

आलीढकम् । न । तर्णकानांस्थलीषु क्रीडने ॥

आलीनकम् । न । रङ्गे । राँग इतिभाषा ॥

आलुः । पु । कोकणदेशप्रसिद्धे कन्दविशेषे । कासकन्दे । कासालौ । विशालपत्रे । मेचके ॥ स्त्री । झारी इति भाषाप्रसिद्धे सनालजलपात्रे । कर्कर्याम् ॥ न । कचालू इत्यादिप्रसिद्धेषु मूलविशेषेषु ॥ अथोच्यते । कन्दोवहुविधोलोकेआलुशब्देनभण्यते । कच्चालुचैवघण्टालु पिण्डालु शर्करादिकम्॥इङ्ग्लैण्डैर्यत्समानीतंविलातीपदपूर्वकम् कोषादिषुनदृष्टंततभक्षितश्चाविवेकिभिः॥निघण्टौनास्यपर्यायानगुणा.परिकीर्त्तिताः । स्मार्त्तैर्नैतद्यवहृतमभक्ष्यंतद्धितार्थिभि ॥ सावूदानायथाऽभक्ष्यस्तथैतत्कथितंवुधै । निजधर्ममजानद्भिर्गृहीतवालिशैर्वृथेति ॥ भेलके ॥ आलाति । ला० । मितद्र्वादित्वात् डु ॥ इयर्त्ति अर्यतेवा । ऋ० । चोरश्चेलइत्यत्र चोरितिङिह्स्वाऋधातोरपिम

स्वेषात्तु शितिकेचित् ॥

आलुकः । पु । नागाधिपे । शेषनागे । कासालौ । न । मूलविशेषे । तद्विवरणं यथा । आलुकमप्यालूकं तत्कथितं वीरसेनस्य । काष्ठालुक शङ्खालुकहस्त्यालूकानिकथ्यन्ते । पिण्डालुकमध्वालुकरक्तालूकानिकथितानि । काष्ठालुकंकाठिन्ययुक्तंकठाल । शङ्खालुकं श्वेततायुक्तसाँखालु । हस्त्यालुकं दीर्घतयुक्तं महाशरीरम् । पिण्डालुकंवर्त्तुलं । सुथनी । मध्वालुकं मधुरतायुक्तं रोमाञ्चितदीर्घं सुथनी । रक्तालुकं रताल रतलडा इतिच । एषांगुणाः । आलुकं शीतलसर्वं विष्टम्भिमधुरं गुरु । सृष्टमूत्रमलंरूक्षंदुर्जरंरक्तपित्तनुत् । कफानिलकरं बल्यंवृष्यंस्तन्यविवर्द्धनमितिभावप्रकाशः । एलवालुके ॥

आलुकी । स्त्री । अरुई घुइया इतिख्याते । रक्तालुप्रभेदे । रक्तालुभेदेयादीर्घलन्धीचप्रथितालुकी । आलुकीवल्लकृत् स्निग्धागुर्वीहृत्कफनाशिनी । विष्टम्भकारिणीतैलेतलिता तिरुचिप्रदा ॥

आलूः । स्त्री । आलुशब्दार्थे । आलुनाति । लूञ० । क्विप् ।

आलूकम् । न । आलुके । वीरसेने ॥

आलूकं शीतलंसर्वंविष्टम्भिमधुरंगुरु । सृष्टमूत्रमलंरूक्षंदुर्जरंरक्तपित्तनुत् । कफानिलकरं बल्यं वृष्यंस्तन्यविवर्द्धनम् । एलवालुके ॥

आलूनः । त्रि । छिन्ने ॥

आलेख्यम् । न । चित्रे ॥ नानार्थे ॥

आलेख्यशेषः । त्रि । मृते ॥

आलेपः । पुं । उपलेपे ॥

आलोकः । पुं । द्योते । प्रकाशे । चाँदनाइतिभाषा । दर्शने । देखना इतिभाषा । वन्दिभाषणे । स्तुताविति-यावत् । आलोकनम् । लोकृदर्शने । घञ् ॥

आलोकनम् । न । दर्शने । लोकृ० ल्युट् ॥

आलोकितः । त्रि । दर्शिते ॥

आलोचनम् । न । दर्शने । विवेचने ॥

आलोचित. । त्रि । विवेचिते । कृतालोचने । इतिकर्त्तव्यतयावधारिते ॥

आवनेयः । पुं । भौमग्रहे । त्रि । अवनीसम्भूते ॥

आवन्त्यः । पुं । वाटधानेष ब्रात्याद्वा [illegible]सवर्णायाम्उत्पन्ने ॥

आवपनम् । न । द्रव्यस्थापनपात्रे । भाण्डे । शेराव्याम[?]। येषप्रक्षिप्य धान्यादिनीयते तस्यामित्यर्थ. ॥ ओप्यते निचाप्यते धान्यमत्र । टुवपबी

जतन्तुसन्ताने । ल्युट् ॥ वपने । सम्य क्चुरिकर्मणि ॥

आवरकः । पुं । अपवरके । आच्छादके ॥ आव्रियतेऽनेन । वृञ्० । कृञादिभ्यःसंज्ञायांवुन् ॥

आवरणम् । न । ढाल इतिप्रसिद्धफलके ॥ आच्छादने ॥ अविद्यादिबन्धने । अञ्जने ॥

आवरणच्युतिः । स्त्री । बन्धनाशे ॥

आवरणशक्तिः । स्त्री । अज्ञानशक्तौ ॥ यथा ऽल्पोपिमेघोऽनेकयोजन माय तमादित्यमण्डल मवलोकयितृन यनपथपिधायकतयाच्छादयतीव त था ऽज्ञानंपरिच्छिन्नमपि आत्मा- न परिच्छिन्नम संसारिण मवलो कयितृबुद्धिपिधायकतयाच्छादयती वतादृशं सामर्थ्यम् । अनया आवर णशक्त्या ऽऽवृतस्यात्मन कर्तृत्वभो क्तृत्व सुखित्वदु:खित्वादिसंसारस- म्भावनापि भवति । यथा स्वाज्ञाने नावृतायांरज्जौ सर्पत्वसम्भावना भ वति । अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्र ह्मसर्गयोर्भेदं वा स्वात्मावलोकयितृ बुद्धिमखण्डसच्चिदानन्दस्वरूपंवा आ वृणोति । वृञ्वरणे । कर्तरिल्युट् । तदेवशक्तिः ॥

आवर्जितः । त्रि । आहृते । मज्जिते ॥ यथा । हविरावर्जितंहोतस्त्वयाविधि वदग्निष्विति ॥ आनमिते ॥

आवर्तः । पुं । चक्राकारेवारिभ्रमे ॥ भ्रुवाख्येरोमसंस्थानविशेषे ॥ आव- र्त्तने ॥ चिन्तने ॥ राजावर्त्तना- मोपरत्ने ॥ मेघनायकचतुष्टयान्त र्गतमेघाधिपविशेषे । आवर्तोनि र्जलोमेघः ॥ न । माक्षिकधातौ ॥

आवर्त्तनम् । वृतु० । भावेघञ् ॥

आवर्त्तकी । स्त्री । लताविशेषे । भग तवल्ली इति कोकणप्रसिद्धायाम् । मनोज्ञायाम् । रक्तपुष्प्याम् ॥

आवर्त्तनम् । न । अह्नोमध्यभागे । सूर्य स्यपश्चिमदिगवस्थितच्छायायाः पूर्व- दिग्गमनारम्भसमये ॥ आवर्त्तनात्तु पूर्वाह्णोह्यपराह्णस्ततःपरम ॥ दुग्धा देरालोडने । औटाना इतिभाषा ॥ धातुद्रव्यस्यद्रवीकरणे । गलावना इतिभाषा ॥ पुं । जम्बुद्वीपोपद्वीप्र विशेषे ॥ श्रीहरौ ॥ पुनःपुनर्जनन मरणसृष्टिप्रलयादिरूपसंसारचक्र मावर्त्तयति । वृतु० । बहुलमन्यत्रा पीतियुच् ॥

आवर्त्तनमणिः । पुं । राजावर्त्तनामो परत्ने ॥

आवर्त्तनी । स्त्री । ताम्रादिधातुद्रव्यद्रा वणार्थे मृतपात्रविशेषे । तैजसावर्त्त

न्याम् । मृषायाम् ॥

आवर्त्तितः । त्रि । गुणिते ॥

आवर्त्ती । त्रि । आवर्त्तनशीले ॥ आवर्त्तते वर्त्तति ॥ मर्भसार्याखिनिः ॥

आवर्त्तिनी । स्त्री । अजशृङ्गीवृक्षे ॥

आवर्हः । पुं । उत्पाटने ॥ आवर्हणम् । हस्वउद्यमे । घञ् ॥

आवर्हितः । त्रि । उत्पाटिते । उन्मूलिते ॥

आवलिः । स्त्री । वीथ्याम् । श्रेण्याम् । इत्यादिपङ्क्तौ ॥ आवलति । वल सम्वरणे । आङि इन् । परम्परायाम् ॥

आवलितः । त्रि । चञ्चले ॥

आवली । स्त्री । आवलौ । श्रेण्याम् ॥

आवल्यम् । न । दौर्वल्ये ॥ भावेष्यञ् ॥

आवश्यकम् । न । अवश्यम्भावे ॥ मनोज्ञादित्वाद्वुञ् । अव्ययानां भमात्रे इतिटिलोपः ॥ अवश्यकर्त्तव्ये ॥

आवसथ. । पुं । गृहे । वेश्मनि ॥ आर्यकोषे । आर्याछन्दसि ग्रन्थभेदे ॥ व्रतविशेषे ॥ न । गृहे । गेहे । दवसिते ॥ वसतिस्थाने । विश्रामस्थाने ॥ आवसन्त्यत्र एत्य वसन्तियत्रवा । वसनिवासे । उपसर्गेवसेरित्यथः ॥

आवसथिकः । पुं । गृहस्थे ॥ त्रि । गृहवासिनि ॥ आवसथे वसति । आवसथात्ठञ् । स्त्री । ङीष् ॥

आवसथ्य. । पुं । आवसथसम्बन्धिनिलौकिकेग्नौ ॥ आवसथएव । अनन्तावसथेतिहभेषजाञ्ञ्यः ॥

आवसितम् । त्रि । कृष्टे । निष्पन्नधान्ये ॥ आअवसीयतेस्म । षोन्तकर्मणि । क्तः । रक्षार्थमाच्छादितेधान्ये ॥ आवस्यतेस्म । वसआच्छादने । क्तः ॥ मर्द्दनानन्तरमपनीतदुषे (हे) लीकरणयोग्ये धान्यराशावितिवै यमुकुटः ॥

आवहः । पुं । कामदे ॥ वायोः प्रथमगणे । भूमिवायौ ॥ यथा । दोमुलं ज्योतिरादित्यो नन्दोहरिस्तथास्तथा । चित्रज्योतिः सत्यज्योतिष्मान्खान्धआवहइति॥ अभिमुख्येनवहतीति । अभिमुखमागच्छनवा वायुरावहः ॥ पचाद्यच् ॥

आवहमानः । त्रि । क्रमागते ॥

आवापः । पुं । आलवाले ॥ पानभेदे ॥ प्रक्षेपे ॥ भाण्डपचने । आपाके ॥ वलये ॥ शत्रुचिन्तने । परराष्ट्रचिन्तायाम् ॥ निम्नोन्नभूमौ ॥ प्रधानहोमे ॥ आवपन्तिजलमत्र । टुवपबीजतन्तुसन्ताने । हलश्चेति घञ् ॥

आवापकः । पुं । वलये । प्रकोष्ठाभरणे ॥ आउप्यते । टुवप० । कर्मणिघञ् ॥

' न्दार्थे संज्ञायांवाकन् ॥

आवापनम् । न । सूत्रयन्त्रे । ताँत इति भाषा ॥

आवापस्थानम् । न । आहुतिप्रक्षेपप्रदेशे ॥

आवारि । न । हट्टगालये । हट्टवेश्मनि । हाटघर इतिभाषा ॥ इत्युणादिकोष' ॥

आवारितः । त्रि । छादिते ॥

आवालम् । ा । वालमभिव्याप्येत्यर्थे ॥ आङ्मर्यादाभिविध्योरित्यव्ययीभावः ॥

आवालम् । न । आलवाले । वृक्षमूलकृतजलाधारे ॥ आवलते ऽस्मिनेन असंवरणे । हलश्चेतिघञ् । आ ईषत्वालाहत्वाः अत्रवा ॥

आवास' । पुं । गेहे । वासस्थाने ॥ आवसन्त्यत्र । वसेर्हलश्चेतिघञ् ॥

आवाहनम् । न । आह्वाने ॥ यथा । विनायकं तथादुर्गां वायुमाकाशमेव च । आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकाविति मत्स्यपुराणम् ॥ निमन्त्रणे ॥

आवाहनी । स्त्री । पूजायांमुद्राविशेषे ॥

आविक. । पुं । कम्बले । त्रि । मेषस्यस्त्रिनिर्मांसादौ ॥ भेडीदुग्धे ॥ आविकंलवणं स्वादुस्निग्धोष्णंचाश्मरीप्रणुत् । अहृद्यंतर्पणं केश्यंशुक्रं पित्तकफप्रदम् ॥ गुरुकासेनिलोद्भूते केवलेचानिले वरम् ॥

आविग्न. । पुं । करमर्दे । करौंदा इति भाषा ॥ आविजतेस्म । ओविजीभयचलनयोः । आङ्पूर्व. । गत्यर्थाकर्मकेति क्तः । ओदितश्चेनिस्त्वम् भीते ॥

आविद्धः । त्रि । कुटिले । पराहते । चिंते ॥ मूर्खे ॥ अभिभूते ॥ विद्धे आविद्यतेस्म । व्यधः क्तः । सम्प्रसारणम् ॥

आविद्धकर्णी । स्त्री । पाठायाम्

आविधः । पुं । वेधनास्त्रे । वेधसाधने सूच्यादौ ॥ भ्रमरसूच्यादौ । वर्मा इतिभाषा ॥ आविध्यन्त्यनेन आविध्यते येनवा । व्यध. । घञर्थेकः

आविध्यः । पु । रावणमन्त्रिहन्ते ॥

आवि. । ा । प्राकाश्ये । प्रादुः ॥ अवते । उङ्शब्दे । इर् ॥

आविर्भावः । पुं । प्रकाशे । उद्भवे । देवावतरणे । उत्पत्तौ ॥

आविर्भूतः । त्रि । प्रकाशिते । प्रादुर्भूते । अवतीर्णे ॥

आविष्कारः । पुं । प्रकाशे ॥

आविष्कृतः । त्रि । प्रकटिते । प्रकटीकृते ॥ आविः अकारि । डुकृञ् । क्तः

। आवि: क्रियतेस्मवा ॥

आविष्ट'। त्रि। प्रेतबाधिते। भूतादिग्रस्ते॥ आवेशयुक्ते। निविष्टे॥ व्याप्ते॥

आविः। ।। प्राकाश्ये। स्फुटत्वे। प्रादुः॥ अयंनिपातः प्रकाशवाची॥

आवीतः। पुं। व्यतिरेकन्याये॥ यथा। यत्कृतकं तदनित्यमित्यन्वयादनित्यत्वमवगम्य यन्नानित्यंनतत्कृतकमितिव्यतिरेकइति। विशेषेणाप्टमितोवीतः सनभवतिइत्यवीतः। अवीतएव आवीतः॥

आवीरचूर्णम्। न। फागइति आबीरइतिचभाषाविदिते फल्गुनि॥ यथा। चन्दनागुरुकस्तूरीकुङ्कुमद्रवसंयुतम्। आबीरचूर्णंरुचिरग्रह्यतापरमेश्वरेति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः॥

आवुकः। पुं। नाट्योक्त्याजनके॥ अवति। अव॰। बाहुलकादुण्। णित्त्वादुपधावृद्धिः॥

आवृत्। स्त्री। अनुक्रमे। परिपाट्याम्॥ आवर्त्तनमनया। वृतुवर्त्तने। सम्पदादित्वात् क्विप्॥

आवृतः। त्रि। कृतावरणे। आच्छादिते। वेष्टिते। संवीते॥ आव्रियतेस्म। वृञ्वरणे। क्तः॥ ब्राह्मणादुग्रकन्यायामुत्पन्ने।

आवृतिः। स्त्री। आवरणे॥

आवृत्तः। त्रि। व्यावृत्ते। निवृत्ते॥ यथा। आवृत्तानांगुरुकुलाद्विप्राणां पूजकोभवेदिति॥ कृतावरणे॥ आवर्त्तते स्म। वृतु॰। क्तः॥

आवृत्तचक्षुः। त्रि। कार्यकारणभावादुपरतकरणग्रामे॥ आवृत्तानि विमुखीकृतानिविषयेभ्य श्चक्षूंषि करणानियेन चक्षुर्ग्रहणस्योपलक्षणार्थत्वात॥ निवृत्तचक्षुषि॥

आवृत्ति। स्त्री। अभ्यासे। पुनरुच्चारणे॥ आवर्त्तनम्। वृतु॰। क्तिन्॥ ध्याने॥

आवेगः। पुं। त्वरायाम्। वेगे॥ आवेजनम्। ओविजी॰। घञ्॥

आवेगी। स्त्री। वृद्धदारकवृक्षे॥ गावेगोऽस्याः। अर्शआद्यच्। गौरादिः॥

आवेदनम्। न। निवेदने॥ आङ्पूर्वाद्विदेर्ल्युट्॥

आवेशः। पुं। अहङ्कारविशेषे। आटोपे। संरम्भे॥ अभिनिवेशे। सङ्गे॥ अनुप्रवेशे॥ ग्रहामये। भूतसञ्चारे। भूतादिनारोगे॥ अपस्माररोगे॥ आवेशनम्। विश॰। घञ्॥

आवेशनम्। न। शिल्पशालायाम्। गृहादन्यस्मिनकारूणां कर्मस्थाने॥ भूतावेशे॥ प्रवेशे॥ कोपे॥ परिवेशे।

। सूर्यादिपरिधौ । आविशन्त्यत्र। विशप्रवेशने। करणेति ल्युट युच्चा।

आवेशिक । त्रि । अतिथौ । असाधारणे । स्वीये । आवेशे अगृहे भव। अध्यात्मादित्वाट्ठञ् ।

आवेशितः । त्रि । निवेशिते । स्थापिते । यथा । नमय्यावेशितधियां कामः कामायकल्पते। भर्जिता' क्वथिताधा॰ना' मायोबीजायनेशते इतिश्रीभागवतेश्रीकृष्णोक्ति. । मयि परमात्मनीत्यर्थः ।

आवेष्टकः । पुं । प्राचीरादौ । घेर इतिभाषा ।

आशंसा । स्त्री । इच्छायाम् । स्पृहाया । अप्राप्तप्राप्तीच्छायाम् ॥ आशंस र् । शंसुस्तुतौ । गुरोश्चेत्यः । टाप् ।

आशंसितः । त्रि । वांछिते । आख्याते । उक्ते । नपुंसके भावेक्तः ॥

आशंसिता । त्रि । इच्छावति । आकाङ्क्षाशीले । आशंसते ।आङः शासुइच्छायाम् । तृन् ॥

आशंसुः । त्रि । इच्छौ । इच्छाशीले । इष्टार्थप्राप्तीच्छौ । आशंसितरि । आशंसते । आङःशा॰ । सनाशंसेच्युः ।

आशक्त. । त्रि । सम्यक्शक्तिविशिष्टे ।

आशङ्का । स्त्री । भये । त्रासे । सङ्कोचे ॥ ईषद्वितर्के ।

आशनः । पुं । असनवृक्षे ।

आशयः । पुं । अभिप्राये । पनसे । आधारे ॥ विभवे । अजीर्णे । चेतसि ॥ वासनाख्ये संस्कारे । आफलविपाकाच्चित्तभूमैाशेते इतिव्याख्यानात् । कोष्ठागारे ॥ सन्ताने । आखयविच्छाने । आशेरतेऽस्मिन्कर्मानुभववासना इत्यर्थात् । किम्पचाने ॥ धर्माधर्मे । अदृष्टे ॥ शयने ॥ आशयनम् । शीङ्स्वप्ने । एरच् ॥ हृदेशे ॥ यथा । अहमात्मागुडाकेशसर्वभूताशयस्थितइति ।

आशयाश' । पुं । पावके । वह्नौ । आशेरतेऽत्रेत्याशयः । एरच् । आधारः । तमश्नाति । कर्मण्यण् ।

आशयिता । त्रि । भोजयितरि । अशेर्ण्यन्तात् तृच् ।

आशरः । पुं । अग्नौ । राक्षसे । आशृणाति । शृहिंसायाम् । पचाद्यच् ।

आशा । स्त्री । दीर्घाकाङ्क्षायाम् । अशक्योपायार्थविषयायां तृष्णायाम् । अनवगतोपायार्थविषयायां-वाप्रार्थनायाम् । अप्राप्तवस्त्वाकाङ्क्षायाम् । अनिर्ज्ञातप्राप्तीष्टार्थप्रार्थनायाम् । आयतायांतृष्णायाम् ॥

यथा। पिशाचमोचनंतीर्थंकतिधा-नावगाहितम्। तथाप्याशा पिशाचीनामाशाभिश्चनमुच्यतीति। इ-रिति। दिशि॥ आसमन्तादश्नुते। अशूङ्व्याप्तौ। पचाद्यच्॥

आशापुरसम्भवः। पुं। भूमिजगुग्गुलौ। आसापुरीधूप इतिभाषा॥

आशाबन्धः। पुं। समाश्वासे॥ मर्कटजालके॥ दिग्बन्धे॥ आशयाबन्ध। आशाया: बन्धोवा॥

आशाम्बरः। त्रि। दिगम्बरे॥

आशास्यम्। त्रि। आशंसनीये। आशीःसाध्ये॥

आशितः। त्रि। अशिते। भुक्ते॥ आ-शायतेस्म। शोतनूकरणे। क्तः। शाछोरन्यतरस्यामितीत्वम्॥

आशितङ्गवीनम्। त्रि। पुरागोस्तृप्तिकृतस्थले। पहलेगायजहाँचरी है इतिभाषा॥ त्रिष्वाशितङ्गवीनंतत्र गावोभुक्ताशिताःपुरा॥ आशिताः-भोजिताः गावोयत्र। अषडक्षाशितङ्ग्वलमितिखः। निपातनात्पूर्वस्य मुम्॥

आशितम्भवः। पुं। तृप्तौ। न। अन्नादौ॥ आशितेन भवत्यनेन आशितस्य भवनंवेतिविग्रहे। आशिते भुवःकरणभावयोरित्याशितम्भवोप-पदाद्भुवतेः करणभावयोः खच्प्रत्ययः। मुमागमः पूर्वपदस्य॥ यावताऽन्नेना तिथ्यादिर्भोजितो भवतिस एवमुच्यते। भावे आशितम्भवम्॥

आशिता। त्रि। अह्वरे। बहुभोजनशीले॥

आशिरः। पुं। अग्नौ॥ सूर्ये॥ राक्षसे॥ अश्नुते। अशूव्याप्तौ सङ्घाते च। अश्नातिवा। अशभोजने। अशेर्णिदितिकिरच॥

आशी.। स्त्री। हितस्याशंसने। मह्यं यदमेच्छितं तन्मतितदभिष्टद्विप्रार्थने। आशीर्वादे॥ सर्पतालुगदंष्ट्रे॥ आशीस्तालुगतादंष्ट्रा तया विद्धो नजीवति। इति विषविद्या॥ त्र्याप्यायाम्। अप्राप्तप्रार्थने। इ नाशौ पयौ॥ आशास्ते इतिविग्रहे। आङ्-शासुइच्छायाम्। शासुअनुशिष्टौ। अस्मात् क्विप्चेति क्विप्। आशासः क्वौ उपधायाइत्वम्। यद्वा आशासनमनयावा। सम्पदादिः। आशासःक्वाविसीत्वम्॥

आशीः। स्त्री। सर्पदंष्ट्रायाम्। सर्पविषे॥ हिताशंसने॥ आशीर्भिवकला स्त्रियोरितिराजशेखरोक्त्या ईकारान्तोयम्। आशीराश्यहिदंष्ट्रायामिति द्विरूपकोषाच्च॥

आशीर्वादः । पुं । आशीर्वचने । मङ्गलप्रार्थनायाम् । आशिषोवादः ।

आशीविषः । पुं । विषधरे । सर्पे । आशिषि विषमस्य । पृषोदरादिः ।

आशु । ।। क्षिप्रे ।

आशुः । पुं । न । व्रीहिप्रभेदे । वर्षाभवधान्येषष्टिकादौ । पाटले व्रीहौ । न । द्रुते । शीघ्रे । शीघ्रेक्रियाविशेषणत्वेक्लीवम् । सत्वगामित्वे वाच्यलिङ्गम् । अश्नुते । अशूङ्व्याप्तौ । कृवापाजिमिस्वदिसाध्यशूभ्यउण् इत्युण् ।

आशुगः । पुं । वायौ । वाणे । शरे । अर्के । त्रि । शीघ्रगामिनि । आशुगच्छति । अन्यचापीतिगमेर्डः ।

आशुतोषः । पुं । महादेवे । महेश्वरे । त्रि । शीघ्रंसन्तुष्टे । आशुशीघ्रंतोषस्तुष्टिर्यस्य ।

आशुपत्री । स्त्री । गजभक्ष्यायाम् । शल्लकीलतायाम् ।

आशुव्रीहि. । पुं । आशुधान्ये । पाटले । आशुसंज्ञकोव्रीहिः ।

आशुशुक्षणिः । पुं । अग्नौ । वायौ । आसमन्तात् शोष्टुमिच्छति । आङ्पूर्वाच्छुष्यतेःसन्नन्तात् आङिशुषेःसनश्छन्दसीत्यनिः । छान्दसानामपिक्कचिद्भाषायां प्रयोगः ।

आशेकुटी । पुं । पर्वते । इति शब्दमाला ।

आशौचम् । न । अशुद्धौ । वर्णाश्रमविहितकर्मानुष्ठानसङ्कोचावस्थायाम् । अशौचमेव । स्वार्थे अण् ।

आश्चर्यम् । न । अपूर्वे । अद्भुते । चित्रे । विस्मये । त्रि । अद्भुतवति । आइतिचर्यते अभिनीयते । आश्चर्यमनित्य इति अभूततद्भावेसुट्निपात्यते । यथा । आश्चर्यर्यदिसभुञ्जीत । अद्भुत मित्यर्थ ।

आश्मः । पुं । अश्मनोविकारे । तस्यविकारइत्यण् ।

आश्मनः । पुं । अरुणे । सूर्यसारथौ ।

आश्मरथ्यः । पुं । ऋषिविशेषे । अश्मरथस्य गोत्रापत्यम् । गर्गादिभ्योयञ् ।

आश्यानः । त्रि । शोषिते ।

आश्रम. । पुं । न । ब्रह्मचारिणि । गृहिणि । वानप्रस्थे । भिक्षौ । यथा । ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्तथा । एतेगृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः । सर्वेपिक्रमशस्त्वेते यथाकालंनिषेविताः । यथोक्तकारिणं विप्रंनयन्ति परमाङ्गतिमिति । अत्र कलौविशेषो यथा । ब्रह्मचर्याश्रमोनास्तिवानप्रस्थोपिनप्रिये । गार्ह-

स्थोभैक्षुकश्चैव आश्रमौ द्वौकलौ युगे इति ॥ वने । मठे ॥ मुनीनांवासस्थाने । आश्रमन्त्यत्रानेनवा । आ श्रमुतपसि खेदेच । घञ् । नोदात्तोपदेशस्येतिवृद्धिर्न । यद्वा । आसमन्तात्क्रमो ऽत्र स्वधर्मसाधनक्लेशात् ॥ परमात्मनि । आश्रमवत् सर्वेषांसंसारारण्येभ्रमतांविश्रामस्थान त्वादाश्रमः परमात्मा । अस्यार्थः । आश्रमवदाश्रमः यथारण्येचरतामाश्रमच्छायादीनां दृश्रामस्थानम् एवं संसारारण्ये भ्रमतांमाणिनां सुषुप्तेमोक्षेच विश्रामस्थानं भवति परमेश्वर इति ।

आश्रमधर्म्मः । पुं । आश्रमाणां ब्रह्मचारिप्रभृतीनां शास्त्रविहिते साधने । यथा । ब्रह्मचारिणः स्वाध्यायः । गृहस्थस्य दानंदमश्च यज्ञश्च । बानप्रस्थस्यतपः । परिव्राजकस्य अभयंसत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिरिति । यस्वाश्रमंसमाश्रित्य अधिकारःप्रवर्त्तते । सखल्वाश्रमधर्मस्तु भिक्षादण्डादिको यथा । यतीनान्तुशमो धर्मो नियमोवनवासिनाम् । दानमेवगृहस्थानांशुश्रूषा ब्रह्मचारिणामिति स्मृतिः । महानिर्बाणेतु । पुरैवकथितं तावत्कलिसम्भवचेष्टितम् । तपःस्वाध्यायहीनानां न्नृणामल्पायुषामपि । क्लेशप्रयासाशक्तानां कुतोदेहपरिश्रमः । ब्रह्मचर्याश्रमोनास्तिवानप्रस्थोऽपि न प्रिये । गार्हस्थोभैक्षुकश्चैवआश्रमौद्वौकलौयुगे । गृहस्थस्य क्रियाः सर्वाआगमोक्ता. कलौशिवे । नान्यमार्गैःक्रियासिद्धि कदापिगृहमेधिनाम् ॥ भैक्षुके प्याश्रमेदेवि वेदोक्तं दण्डधारणम् । कलौनास्त्येवतत्त्वज्ञे यतस्तच्छ्रौत संस्कृतिः । शैवसंस्कार विधिनाव धूताश्रमधारणम् । तदेव कथितंभद्रेसंन्यासग्रहणंकलौ । विप्राणामितरेषाञ्चवर्णानां प्रबले कलौ । उभयत्राश्रमेदेविसर्वेषामधिकारिता । सर्वेषामेवसं. ना: कर्माणिशैववर्त्मना । विप्राणामितरेषाञ्चकर्मलिङ्गंपृथक् पृथक् । इत्युक्त रागमोक्त एव आश्रमधर्मः कलावनुष्ठेयः । सचतस्मादेवतन्त्रो ग्गम दनुसन्धेयः ।

आश्रमवित् । पुं । दक्षप्रभृतिषु । लोके आश्रमाः परमार्था इतिसमर्थयन्ते । तदसत् । वेषस्याश्रमशब्दार्थत्वेशूद्रादेरपि प्रसङ्गात् । जातेश्चदुर्विवेचनत्वात् । तन्मूलस्याश्रमस्यदर्शयितुमशक्यत्वात् । संस्कारस्यचदेहसमवायित्वे पारलैाकिकत्वायोगात् । अस

ह्वेचात्मनितदसम्भवात् ॥

आश्रमिकः । त्रि । आश्रमयुक्ते ॥

आश्रमी । पुं । ब्रह्मचर्याद्याश्रमविशिष्टे । अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः ॥

आश्रयः । पुं । व्यपदेशे ॥ सामीप्ये ॥ आधारे । अवलम्बे ॥ यथा । परिजनस्यराजादिः ॥ निकेते । आयतने । गृहे ॥ राज्ञां सन्ध्यादिषड्गुणान्तर्गतगुणविशेषे । अरिणापीड्यमानस्य जिगीषोर्बलवदाश्रयणे ॥ विषये ॥ आश्रयणम । श्रिञ् एरच् ॥

आश्रयाशः । पुं । अग्नौ । पावके ॥ चित्रकवृक्षे ॥ त्रि । आश्रयनाशके । आश्रितिनि ॥ आश्रयमाधारमश्नाति अश्नभोजने । कर्मण्यण् ॥

आश्रयासिद्धः । पुं । हेत्वाभासविशेषे ॥ यथा । गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत् इति । अत्र गगनारविन्दमाश्रयः सचनास्त्येव । आश्रयः असिद्धोयस्यसः ।

आश्रवः । पुं । अङ्गीकृतौ ॥ क्लेशे ॥ त्रि । महत्तिनिदनयोर्विधातुं शक्ये । वचनस्थिते ॥ आशृणोतिवाक्यम् । श्रु श्रवणे । पचाद्यच् । आङ्पूर्वाच्छृणोतेर्न्र्दोरत्वा ॥

आश्रितः । त्रि । आश्रयप्राप्ते । शरणागते । आधेये ॥ उपविष्टे ॥ न्यायमतेपरमाणवाकाशादिनित्यद्रव्यभिन्नसर्वद्रव्याणामाश्रितत्वंसाधर्म्यम् ॥ आश्रयति आश्रीयतेस्म वा । श्रिञ् । गत्यर्थेति कर्मणिवा क्तः ॥

आश्रुतः । त्रि । अङ्गीकृते । स्वीकृते ॥ कृतश्रवणे । आकर्णिते ॥ आश्रूयतेस्म । श्रु श्रवणे । क्तः ॥

आश्लिष्टः । त्रि । आलिङ्गिते ॥ श्लिषआलिङ्गने । गत्यर्थाकर्मकेति क्तः ॥

आश्लेषः । पुं । आलिङ्गने ॥ एकदेशसम्बन्धे ॥ आश्लेषणम् । श्लिष॰ । घञ् ॥

आश्वम् । न । अश्वीये । अश्ववृन्दे ॥ अश्वानांसमूहः । कृत्याभावे अण् ॥ अश्वस्यकर्मभाववोः ॥ प्राणभृज्जातित्वात् अञ् ॥ त्रि । रथादौ ॥ अश्वैरुह्यते । शेषद्दत्य ण् ॥

आश्वतराश्वि । पुं । बुडिलमुनौ ॥ अश्वतराश्वस्यापत्यम् । इञ् ॥

आश्वत्थम् । न । अश्वत्थदृक्षफले ॥ अश्वत्थस्यफलम् । प्लक्षादिभ्योण् विधेर्न लुक् ॥

आश्वयुजः । पुं । आश्विनमासे ॥ आश्वयुजीपौर्णमास्यस्मिन्नस्ति । सास्मिन्पौर्णमासीति अण् ॥

आश्वयुजी । स्त्री । आश्विनपूर्णिमायाम् ॥ अश्वयुजायुक्तापौर्णमासी । नक्ष

षेणयुक्तःकाल इत्यण्। टिड्ढेति-
ङीप्॥
आश्वलायनः। पु। ऋषिविशेषे॥ अ
श्वलस्यगोत्रापत्यम्। नडादिभ्यः
फक्॥
आश्वस्तः। त्रि। जातविश्वासे॥
आश्वासः। पु। निर्वृतौ॥ आख्यायिका
परिच्छेदे॥ आश्रयप्रदाने॥ आश्व
सनम्। श्वसप्राणने। घञ्॥
आश्वासकः। त्रि। आश्वासकारिणि॥
आश्विनः। पुं। शरद्प्रथमेमासे। इषे
॥ तत्रजातस्यफलम्। राज्ञांप्रियः का
व्यकलाविदग्धः स्याद्दर्भगर्भाग्रसुती
क्ष्णबुद्धिः। सुखीवदान्योबहुमान
शाली भक्तो भवेदाश्विनमासजन्मे
ति॥ अश्विन्यायुक्तापौर्णमासी अ
श्विनस्ति। साश्विनपौर्णमासीत्य
ण्॥ रवेःकन्याराशिस्थितिकाले॥
आश्विनेयौ। पुं। अश्विनीकुमारयोः।
स्वर्वैद्ययोः॥ अश्विन्याः अपत्ये। स्त्री
भ्योढक्॥ नित्यद्विवचनान्तः॥
आश्वीनः। त्रि। एकाह्नेनैकाश्वगम्य
मार्गे। अश्वेनैकाह्नेनातिक्रम्यते।
अश्वस्यैकाहगम इति खञ्॥
आषाढः। पुं। ग्रीष्मद्वितीयमासे। शु
चौ॥ आषाढीपौर्णमासी अस्मिन्
। साऽस्मिन् पौर्णमासीत्यण्॥ तत्र
जातस्यफलम्। अनल्पजल्पी प्रमदा
भिलाषी प्रमादशीलो गुरुवत्सलश्च
। बहुव्ययो मन्दहुताशनःस्यादाषा
ढमासप्रभवोमनुष्यइति॥ व्रतिनां
पालाशदण्डे॥ आषाढीपूर्णिमाप्र
योजनमस्य। विशाखाषाढादण् म
न्थदण्डयोरित्यण्॥ मलयाचले॥
रवेर्मिथुनराशिस्थितिकाले॥
आषाढकः। पुं। आषाढमासे॥
आषाढभवः। पुं। भौमग्रहे॥ त्रि।
आषाढजाते॥
आषाढभूः। पुं। कुजे। मङ्गलग्रहे॥
आषाढा। स्त्री। पूर्वाषाढायाम्॥ उ
त्तराषाढायाम्॥
आषाढाभूः। पुं। मङ्गलग्रहे॥
आषाढिः। पुं। रतिदेव्याःस्वामिनि॥
आषाढी। स्त्री। आषाढमासस्यपूर्णि
मायाम्॥ आषाढयायुक्ता पौर्णमा
सी। नक्षत्रेणयुक्तःकालइत्यण्। त
तो ङीप्॥
आषाढीयः। त्रि। आषाढायांजाते॥
श्रविष्ठाषाढाभ्यांछण् वक्तव्यः॥
आष्टम्। न। आकाशे। वियति॥ अ
श्नुते अशूव्याप्तौ सङ्घातेच। अश्ना
तिवा। अशभोजने। भ्रस्जगमिन
मीत्यादिनाष्ट्रन्वृद्धिश्च॥
आऽ। । स्मरणे॥ अपाकरणे॥ वो-

पे॥आ:रक्षस्तिष्ठतिष्ठ॥ सन्तापे । यथा। विद्यामातरं मा: प्रदर्श्यन्त्वपशून भिक्षामहे निखपाइति॥पीडायाम्॥ आ शीतम्॥क्रोधाविष्कारे ॥ साटोपतर्जने॥ आस्ते । आस उपवेशने । क्विप्॥ आङ्पूर्वादसतेर्वा॥

आस ।। । बभूवेत्यर्थे ॥

आसः । पुं । धनुषि॥ असन्त्यशरा अनेन॥ असु० । अकर्त्तरिचकारकेसंज्ञायामिति घञ्॥

आसक्तः । त्रि । आसक्तिविशिष्टे । विषयान्तरपरिहारेण सर्वदानिविष्टे। तत्परे। प्रसिते। अत्यन्तरते। न। नित्ये। अनवरते॥ आसञ्जि । षञ्ज । कर्मणि क्तः॥

आसक्तिः। स्त्री। अनुरागे । प्रीतौ। आनुरक्तौ। आङ्पूर्वात्षञ्जेः क्तिन्॥

आसङ्गम।न। अनवरते। नित्ये॥ पुं। अभिनिवेशे ॥ परिष्वङ्गे॥ प्राप्तस्योपस्थितेऽपि विनाशे संरक्षणाभिलाषे॥ कर्तृत्वाभिमाने । भोगाभिलाषे। त्रि। सयुक्ते॥ स्त्री । तुवर्य्याम्। सौराष्ट्रमृदि ॥ आसञ्जनम । षञ्ज० घञ्॥

आसङ्गिनी। स्त्री। वातभ्रमे । वात्यायाम्॥

आसत्तिः। स्त्री। सङ्गमे ॥ लाभे। सन्निधौ॥ पदसन्निधानकारणे॥ यत्पदार्थस्ययत्पदार्थेनान्वयोपेक्षितस्तयोर् व्यवधानेनोपस्थितिकारणमिति न्यायमुक्तावली॥

आसन । पुं। जीवकद्रुमे॥ अस्यति। असुक्षेपणे । ल्युः । प्रज्ञाद्यण्॥ न। द्विरदस्कन्धदेशे । यत्रमहामात्रो निवसति॥ पीढा चौकी इत्यादिभाषामसिद्धे पीठे। विष्टरे॥ विजिगीषोर्दुर्गादीनवष्टभ्यत स्थितौ॥ यानानिवर्त्तने। अरिविजिगीष्वोः प्रतिबद्धशक्त्यो. कालप्रतीक्षयातूष्णीमवस्थाने॥ यथा।परस्यस्वस्यसैन्यानां साम्यत्वात्विचक्षणः। आसनं स्वामिनेब्रूयान्मन्त्रीस्वामिहितेरतइति॥ अष्टाङ्गयोगस्यतृतीययोगाङ्गे । पद्मप्रकारकरचरणादि संस्थानविशेषे॥ यथा। पद्मासनंस्वस्तिकाख्यं भद्रंवज्रासनं तथा। वीरासनमितिप्रोक्तं क्रमादासनपञ्चकमिति ॥ एषांलक्षणानि यथास्थानेद्रष्टव्यानि॥ अन्यच्च। आसनानिकुलेशानि यावन्तो जीवजन्तवः। चतुर्शीति लक्षाणि चैकैकं समुदाहृतम्॥ आसनेभ्यःसमस्तेभ्यसाम्प्रतंद्वयमुच्यते। एकंसिद्धासनंनाम द्वितीयंकमलासनम ॥ इतिनिरुक्ततन्त्रम्॥ स्थिरसुखमासनमिति

पतञ्जलिः ॥ सुखेनैव भवेद्यस्मिन्नज स्रं ब्रह्मचिन्तनम् । आसनंतद्विजानीयान्नेतरत्सुखनाशनमितिपूज्यपादा. ॥ आस्यतेऽत्र । आसउपवेशने । करणेतिल्युट् ॥ शृङ्गारासनानि बन्धशब्देद्रष्टव्यानि ॥

आसनबन्ध । पु । उपवेशने ॥

आसना । स्त्री । स्थितौ ॥ आस्यतेऽस्याम । आस०। ण्यासश्रन्थोयुच् ॥

आसनी । स्त्री । विपणौ ॥ स्थितौ ॥

आसन्द: । पु । वासुदेवे । श्रीकृष्णे ॥

आसन्दी । स्त्री । क्षुद्रखट्वायाम् । पीठिकायाम् ॥ सभामध्यवेदिकायाम् ॥ आस्यतेऽस्याम् । आस० । शब्दादयश्चोतसाधु ॥

आसन्न: । त्रि । निकटे ॥ उपस्थिते ॥ आसीदतिस्म । गत्यर्थेतिक्तः । आसाद्यतेस्मेतिवा । क्तः ॥

आसन्य: । पु । प्राणे ॥ त्रि । आस्यभवे ॥ आस्येभवः । यत् । पद्दन्नेत्यासन्नादेशः प्रभृतिग्रहणस्यप्रकारार्थत्वात् ॥

आसव: । पुं । मद्यमात्रे ॥ मद्यविशेषे । मैरेये । शीधौ ॥ शीधुरिक्षुरसैःपक्वैरपक्वैरासवो भवेत् । मैरेयंधातकीपुष्पगुडधानाम्लसंहितमितिमाधवेनभेद उक्त. । आर्षेरामायणेतु । मर्करासवमाध्वीकाः पुष्पासवफलासवाः । वासचूर्णेश्वविविधैर्दृष्टास्तैस्तैः पृथक् पृथगित्युक्तम् ॥ कुल्लूकभट्टस्तु । आसूयतेइत्यासवो मद्यानामवस्थाविशेषः सद्यःकृतसंसाधन. सञ्जातमद्यभावइत्याह ॥ यदपक्वौषधाम्बुभ्यां सिद्धंमद्यंसआसव । आसवस्यगुणाज्ञेयाबीजद्रव्यगुणै समा' ॥ आसूयते । षुञ् अभिषवे । ऋदोरप् ॥

आसवद्रु: । पु । तालवृक्षे ॥

आसादनम् । न । सन्निधापने । स्थापने ॥

आसादित. । त्रि । प्राप्ते । लब्धे ॥ आलिवंशीधरे कामकेलीपरे । किंमयासादितं मौनमारोपितम् ॥ आयोजिते । सन्निधापिते ॥ आसाद्यतेस्म । षद्लृ० । ण्यन्त. । क्तः ॥

आसार: । पुं । धारासम्पाते । वेगवृष्टौ । सुहृद्बले । प्रसरणे । सैन्यानांसर्वतोव्याप्तौ । अन्वागच्छद्बले । आसरणम् । आस्त्रियतेनेनवा । सृगतौ । घञ् ।

आसिक: । त्रि । खड्गधारिणि ॥ असि. प्रहरणमस्य । प्रहरणमितिठक् ॥

आसिका । स्त्री । आसने । आसउपवेशने । धात्वर्थनिर्देशेण्वुल् ॥

आसिक्त. । त्रि । ईषत्सिक्ते ॥

आसितम् । न । स्थानविशेषे ॥ आस्यतेऽस्मिन् । आस० । क्तोधिकरणेच्

धिकरणे क्तः ॥

आसीनः । त्रि । उपविष्टे । बैठा इतिभाषा ॥ आसनेोपविष्टे॥ अचले ॥ बुद्धावभिव्यक्तविज्ञानप्रकाशने ॥ आस्ते । आस॰ लटःशानच् । ईदासः ॥

आसीनप्रचलायितम् । न । उपविश्य निद्रावशेनदोलने । ऊँघना इति-भाषा ॥

आसुतिः । पुं । अभिषवे । मद्यसन्धाने । मद्चुवानाइतिभाषा ॥ षुञ्॰ । क्तिन् ॥

आसुतीवलः । पुं । कन्यापाले । शूद्रजातिविशेषे ॥ यज्वनि ॥ शौण्डिके ॥ आसुति रस्यास्ति । रज'कृष्यासुतिपरिषदोवलच् । वले इति दीर्घः ॥

आसुरः । पुं । असुरे ॥ पृज्ञादयण् ॥ ब्राह्माद्यष्टविवाहान्तर्गतविवाहविशेषे । आसुरोद्रविणादानात्इतियाज्ञवल्क्य॰ ॥ ज्ञातिभ्योद्रविणंदत्त्वा कन्यायैचैवशक्तितः । कन्याप्रदानंस्वाच्छन्द्यादासुरोधर्म उच्यते इतिमनुः॥ अस्यमानुषइत्यपिसंज्ञा । शुल्केनमानुषइतिहारीतस्मृतात् ॥ असुराणामिवायम् । अण् ॥ न । विड्लवणे ॥ असुरस्यकर्मभावयोः । त्रि । असुरसम्बन्धिनि ॥ अण् ॥

आसुरनिश्चयः । पु । वेदार्थविरोधिनिनिश्चये ॥ आसुरो विपर्यासरूपोवेदार्थविरोधीनिश्चयोयस्य ॥

आसुरभावः । पुं । हिंसान्नतादिस्वभावे ॥ आसुराणा मसुरप्रकृतीना भावःस्वभावः ॥

आसुरत्वम् । न । अयज्वनांधने । यागादिशून्यानांवित्ते ॥ अयज्वनान्तयद्वित्त मासुरस्वं तदुच्यतेइतिमनोः॥ आसुराणांस्वम् ॥

आसुरिः । पुं । कपिलमुनेःशिष्ये ब्राह्मणे ॥

आसुरी । स्त्री । राजिकायाम ॥ छेदभेदायात्मिकायां चिकित्सायाम् ॥ असुरस्येयम् । तस्येदमित्यण् । अस्यतिवा । असेरुरन । प्रज्ञाद्यण् । टिड्ढेतिङीप् ॥

आसुरीप्रकृतिः । स्त्री । शास्त्रानभ्यनुज्ञातविषयभोगहेतुरागप्रधानायां राजस्यां प्रकृतै । वैदिकनिषेधातिक्रमेण स्वभावसिद्धरागदेषानुसारि सर्वानर्थहेतुप्रवृत्तिहेतुभूतायां राजस्यां प्रकृतै ॥ विषयभोगप्राधान्येन रागप्राबल्यादासुरीत्वम् ॥

आसुरीसम्पत् । स्त्री । असुरत्वप्राप्तिहेतुभूतायां रजस्तमोमय्यां सम्पदि ॥ अशुभवासनासन्ततै॥यथा । दम्भोदर्पोभिमानश्चक्रोधःपारुष्यमेवच । अज्ञानंचाभिजातस्य पार्थसम्पदमासुरी-मिति ॥ शरीरारम्भकालेपापकर्मभि

रभिव्यक्ता मभिलक्ष्यजातस्य क्लुपुरुष स्यदशाया अस्मानान्तादोषात्सभव न्निमन्त्वभयायागुणादृत्यर्थः ॥

आसेकः । पु । आसेचने ॥

आसेक्यः । पुं । नपुंसकविशेषे ॥ तल्ल क्षणंयथा । पित्रोस्तुस्वल्पवीर्यत्वादा सेक्यः पुरुषो भवेत् । स शुक्रंमाश्य लभते ध्वजोन्नतिमसंशयमिति ॥

आसेचनः । त्रि । अतृप्तिकृति । असे चनके ॥ न आसिच्यतेमनोत्र । षि चक्षरणे । करणेतिल्युट् ॥

आसेचनकम् । त्रि । असेचनके । आसे चने ॥ संज्ञायांकन् ॥ तदासेचनकं दृसेर्नास्त्यन्तोयस्यदर्शनात् ॥

आसेदिवान् । त्रि । आसन्ने ॥

आसेधः । पुं । राजाज्ञया ऽवरोधे ॥

आसेवनम् । न । पैानः पुन्ये ॥

आसेवा । स्त्री । स्वारसिक्यां प्रवृत्तौ ॥

आस्कन्दनम । न । तिरस्कारे ॥ रणे । संशोषणे ॥ स्कन्दिर् गतिशोषणयोः भावे ल्युट् ॥

आस्कन्दितम । न । अश्वगतिविशेषे । उत्तेरिताख्येवेगे ॥ स च सम्यग्गति ॥ आस्कन्दने ॥ स्कन्देः स्वार्थण्यन्तात् भावेक्तः । आस्कन्द सञ्जातोऽस्य । तारकादित्वादितच्वा ॥

आस्कन्दितकम् । न । आस्कन्दिते । अ श्वानांपञ्चमगतैा । उत्तेरिते । उप कण्ठे ॥

आस्तः । त्रि । क्षिप्ते ॥

आस्तरः । पुं । करिकम्बले ॥ वस्त्राद्या स्तरणे ॥

आस्तरणम् । न । हस्तिपृष्ठस्थितचित्र कम्बले । प्रवेणयाम् । भूलइतिभा षा ॥ आस्तीर्यते ऽनेनवा । स्तृञ् आ च्छादने । कर्मणि करणेवा ल्युट् ॥

आस्तारकः । पुं । माषवडीप्रभृति खाद्यद्रव्यसिद्ध्यर्थं स्थालीस्थजलोप- रिदीयमाने तृणादैा । थर इति- भाषा ॥

आस्तावः । पुं । यज्ञीयदेशविशेषे ॥ या ज्ञिकानां संवाददेशे ॥ आगत्य स्तु वन्त्यस्मिन् । ष्टुञ् स्तुतैा । घञ् ॥

आस्तिकः । पुं । मुनिविशेषे । स तु जर त्कारुमुनेः पुत्रः । तत्पिता गर्भस्थं तं ज्ञात्वा अस्तीत्युक्त्वा गतइत्यस्मा- दास्तिकः । इतिमहाभारतम ॥ आ स्तीके ॥ त्रि । नास्तिकभिन्ने । वेद प्रमाणवादिनि । श्रद्धालैा ॥ अस्तिप रलोक इत्येवं मतिर्यस्यसः । अस्ति नास्तिदिष्टंमतिरिति अस्तीतिनिपा तात् यद्वा वचनसामर्थ्यात् दस्तीत्या ख्यातात् ठक् ॥

आस्तिकार्यदः । पुं । जनमेजयेराज्ञि ॥

आस्तिक्यम् । न । श्रद्धायाम् ॥ आस्तिकस्यकर्म भावो वा । पुरो° यक् ॥

आस्तीकः । पुं । मनसापुत्रे आस्तिकमुनौ ॥

आस्तीकजननी । स्त्री । मनसादेव्याम् ॥

आस्था । स्त्री । आलम्बनायाम् ॥ स्थाने ॥ यत्ने ॥ अपेक्षायाम् ॥ आस्थान्याम् ॥ आतिष्ठन्त्यस्याम् आस्थानंवा । ष्ठा° । आतश्चोपसर्गेऽङ् । टाप् ॥ तात्पर्येणावर्त्तने ॥

आस्थानम् । न । सभायाम् ॥ निवासस्थाने ॥ आतिष्ठन्त्यस्मिन् । ष्ठा° अधिकरणे ल्युट् ॥ यत्ने ॥

आस्थानिकेतनाजिरम् । न । सभामण्डपाङ्गणे ॥

आस्थानी । स्त्री । सभायाम् ॥ आतिष्ठन्त्यस्याम् । ष्ठा° । अधिकरणे ल्युट् । ङीप ॥

आस्थानीधूर्त्तः । त्रि । सभाधूर्त्ते ॥

आस्थितः । त्रि । आरूढे । प्राप्ते ॥ आङ्पूर्वात्तिष्ठतेर्गत्यर्थेति क्तः । यतिस्यतीति इत्वम् ॥ अङ्गीकृतवति ॥

आस्थिता । स्त्री । आस्थायाम । तात्पर्येणावर्त्तने ॥

आस्पदम् । न । पदे । स्थाने । प्रतिष्ठायाम् ॥ यथा "अनुवाद्यमनुक्तात् न विधेयमुदीरयेत् । नह्यलब्धास्पदं किञ्चित्कुत्रचित् प्रतितिष्ठतीति" ॥ कृत्ये ॥ प्रभुत्वे ॥ दृश्यमगृहे ॥ आपद्यते ऽस्मिन् । आत्मनः पदं स्थानं वा । आस्पदं प्रतिष्ठायामितिनिपातनात् सुट् ॥

आस्पन्दनम् । न । कम्पने । स्पन्दने ॥

आस्फालः । पुं । हस्तिकर्णास्फालने । झलञ्झलायाम् ॥

आस्फालनम् । न । ताडने ॥ आटोपे । प्रागल्भ्ये ॥

आस्फुजित् । पुं । शुक्राचार्ये ॥

आस्फोटः । पुं । अर्कद्रुमे ॥ भूरादौ वाह्वादिशब्दे ॥ आस्फोटयति । स्फुटिर् विकसने । अच् ॥

आस्फोटकः । पुं । खरोट इति भाषाप्रसिद्धे शैलपीलौ ॥

आस्फोटनम् । न । मुद्गरे ॥ विकाशे ॥ वाह्वादिशब्दे ॥ स्फुटने ॥ आ स्फुटे ल्युट् ॥

आस्फोटनी । स्त्री । वेधनिकायाम् । मुक्तादिवेधिन्याम् ॥ आस्फुट्यते ऽनया । स्फुटभेदने चुरादि । करणे ल्युट् ॥

आस्फोटा । स्त्री । नवमल्ल्याम् । वनमल्ल्याम् ॥ आस्फोटयति । स्फुटिर्° । पचाद्यच् ॥

आस्फोटितम् । न । करास्फोटे ॥
आस्फोत: । पुं । अर्कवृक्षे ॥ कोविदारे ॥ भूपलाशवृक्षे ॥ आस्फोटयति । स्फुटिर्० । पचाद्यच् । पृषोदरादि: ॥
आस्फोतक: । पुं । अर्कपर्णे ॥
आस्फोता । स्त्री । अपराजितायाम् ॥ वनमल्लाम् ॥ सारिवायाम् ॥ हापरमालीति गौडभाषाप्रसिद्धवृक्षविशेषे । कुष्ठविषरोगनाशित्व मस्यगुण: ॥ टाप् ॥
आस्माक' । त्रि । अस्मत्सम्बन्धिनि ॥ युष्मदस्मदोरितिपक्षेऽण् । तस्मिन्नणि च युष्माकास्माकौ ॥
आस्यम् । न । मुखे ॥ मुखमध्ये ॥ त्रि । मुखमध्यभवे ॥ आस्यन्दते अन्नादिना प्रस्रवति । आस्यन्द्यतेवा अन्नादिना द्रवीक्रियते । स्यन्दूप्रस्रवणे । अन्येभ्योपीतिड: ॥ यद्वा । अस्यते व र्णोयेन अस्यतेग्रासोऽस्मिन्वा । असुक्षेपणे । कृत्यल्युट इति ण्यत् ॥
आस्यपत्रम् । न । पद्मे ॥ आस्यमिवाच्छादकस्य ॥
आस्यलाङ्गल: । पुं । शूकरे ॥
आस्यलोम । न । श्मश्रुणि ॥
आस्यशुद्धि: । स्त्री । मुखस्यप्रकृतरसत्वे ॥
आस्या । स्त्री । स्थितौ ॥ आसनम् । आसउपवेशने । ऋहलोर्ण्यत् । बाहुलकात् यद्वा ॥
आस्यासव: । पुं । लालायाम् ॥
आस्रप: । पुं । मूलनक्षत्रे ॥
आस्रव: । पुं । क्लेशे ॥ अनेकान्तवादिनां पदार्थान्तरे । चक्षुरादीन्द्रियपथकस्य यथास्वं प्रवृत्तौ ॥ वृत्ति: पश्चविकल्पा ध्रुवोऽध्रुवा चक्षुरादिवर्गस्य । येषास्रवश्च्यजस्रंयतस्त तोसाविद्वास्रव:प्रोक्त इत्याहु: ॥
आस्वाद: । पुं । रसे ॥ रसानुभवे ॥
आस्वादवान् । त्रि । रसवति । स्वादुयुक्ते ॥
आस्वादित: । त्रि । भुक्ते । लीढे ॥
आह । अ । क्षेपे ॥ नियोगे ॥ इदम्भावने ॥ उवाचेत्यर्थे ॥ कालमात्रेनिपातोयम् ॥
आहकज्वर: । पुं । नासाज्वरइतिप्रसिद्ध नासारोगविशेषे ॥ तल्लक्षणं यथा । तनुनारक्तशोथेन युक्तोनासापुटान्तरे । गात्रशूलज्वरकर: श्लेष्मणाह्याहकज्वरइति ॥
आहत' । त्रि । गुणिते ॥ ताडिते ॥ मिथ्योक्ते । मृषार्थके । वन्ध्यासुतोसीत्यादिवचने ॥ ज्ञाते ॥ पुं । आनके । ढक्कायाम् ॥ न । पुरातनेवस्त्रे ॥ नूतनेवस्त्रे ॥ मृषार्थकवाक्ये ॥ आघू

शिते । आहन्यतेस्म । हन° क्त: ॥

आहतलक्षण: । त्रि । कृतलक्षणे । गुणैः प्रसिद्धे । आहतमभ्यस्तं लक्षणं यस्य ॥

आहर: । पुं । उच्छ्वासे । अन्तर्मुखश्वासे ॥

आहरणम् । न । द्रव्याद्यानयने । अ मानीते ॥

आहव' । पुं । युद्धे ॥ यज्ञे ॥ आह्वानम् आहूयते ऽस्मिन्निति वा । ह्वेञ्स्पर्द्धायांशब्देच । आङियुद्ध इत्यप्सम्प्रसारणञ्च ॥

आहवनम् । न । यागे ॥ आसमन्तात् जुहोत्यस्मिन् । ल्युट् ॥

आहवनीय: । पुं । यज्ञाग्निविशेषे । होमार्थे । आहुत्यधिकरणे । गार्हपत्यागेरुद्धृत्यहोमार्थं योग्नि: संस्क्रियते तस्मिन् ॥ आहूयतेप्रीणयते प्रक्षिप्यते वा हविरच । कृत्यल्युट इत्यधिकरणे अनीयर् ॥ यद्वा ॥ आहवनमर्हति । तदर्हतीतिछ: ॥

आहा: । पुं । अभियोक्तरि ॥ आजिहीते । ओहाङ्गतौ । विच् । विश्वपावतप्रक्रिया ॥

आहार, । पुं । द्रव्यगलाध. करणे । जेमने । भोजने । चर्व्यचोष्यलेह्यपेयात्मके दृष्टफले । सात्त्विकराजसतामसभेदात्त्रिविधे ॥ आहरणम् हृञ्° । घञ् । यद्वा । आहरन्ति

रसमस्मात् । अकर्त्तरिचेति घञ् ॥ आह्रियते हृ° ल्यु° अन्ने । हारे ॥ आहरणे ॥

आहारसम्भव: । पुं । शरीरस्थरसधातौ ॥

आहार्य्यम् । त्रि । आगन्तुके ॥ आहरणीये । आरोप्यमाणे ॥ आहर्त्तुं योग्य: । हृञ्° । ऋहलोर्ण्यत् ॥ पुं । नाट्योक्तौ भूषादिना रचिते व्यञ्जक विशेषे ॥

आहार्य्यशोभा । स्त्री । कृत्रिमशोभायाम् । चित्रभूषादिना कृतद्युतौ ॥

आहाव: । पुं । निपाने । कूपसमीपे पश्वादीनां जलपानाय प्रस्तरादिनिर्मिते जलाशये । खेल इतिभाषा ॥ आह्वाने ॥ युद्धे । विग्रहे ॥ आहूयन्तेऽत्र । ह्वेञ् स्पर्द्धायांशब्देच । निपानमाहाव इति ह्वेञ: । सम्प्रसारणमपप्रत्ययश्चनिपाने निपात्यते ॥

आहिक: । पुं । पाणिनिमुनौ ॥ केतुग्रहे ॥

आहिण्डिक: । पुं । निषादेन वैदेह्याजनिते अन्त्यजविशेषे ॥ अस्यच बन्धनस्थानेषु° बाह्यसंरक्षणा दाहिण्डिकानामित्यौशनसेदर्शितत्ता । कारावराहिण्डिकयो: समानमातापित्रकत्वेपि वृत्तिभेदात् संज्ञाभेद: ॥

आहित: । त्रि । अर्पिते । निहिते । न्यस्ते । स्थापिते ॥ संपादिते ॥ कृते ॥

यथा । आहितोजयविपर्ययेपिमे श्लाघ्य एव परमेष्ठिनात्वयेति रघुवंशे रामं प्रतिभार्गववाक्यम् । आधीयतेस्म । डुधाञ्० क्तः । दधातेर्हिः ॥

आहितलक्षणः । त्रि । सौन्दर्य्यादिगुणविशिष्टे । गुणैः प्रतीते । प्रख्यातगुणे ॥ आहितानिलक्षणानि यस्मिन् ॥

आहिताग्निः । पुं । अग्निहोत्रिणि । साग्निके ॥ आहितः अग्निर्येन । वाहिताग्न्यादिः ॥

आहितुण्डिकः । त्रि । व्यालग्राहिणि ॥ अहेस्तुण्डं मुखं तेन दीव्यति । तेन दीव्यतीति ठक् ॥

आहुकः । पुं । उग्रसेने ॥

आहुतम् । न । भूतयज्ञे ॥ पञ्चमहायज्ञान्तर्गतन्वयज्ञे । त्रि । हुतवस्तुनि । समिधादिहविर्भिराभिमुख्येन हुते ॥

आहुतिः । स्त्री । देवयज्ञे । होमे । देवमुद्दिश्यमन्त्रोच्चारणपूर्वकाग्नौ हविर्निक्षेपे ॥ तत्तविशेषो यथा । अल्पे रूक्षेसस्फुलिङ्गेवामावर्त्ते भयानके । आर्द्रकाष्ठैः समुत्पन्ने फुत्कारवति पावके ॥ कृष्णार्चिषि सुदुर्गन्धे तथा लिहतिमेदिनीम् । आहुतिं जुहुयाद्यस्तु तस्यनाशोभवेद्ध्रुवमिति ॥

आहुस्थम् । न । तरवट इ० काश्मीरादिषु प्रसिद्धेक्षुपविशेषे । काञ्चनपुष्पे । शिम्बीफले ॥

आहूतः । त्रि । कृताह्वाने ॥ ह्वयतेः कर्मणिक्ते सम्प्रसारणदीर्घौ ॥

आहूतसम्प्लवः । त्रि । प्रलयकालपर्य्यन्ते ॥ आहूतस्य विश्वस्य सम्प्लवः सलिले सम्यक् प्लवनं यत्र ॥

आहूतिः । स्त्री । आह्वाने ॥ आङ्पूर्वात् ह्वेञः स्त्रियांक्तिन्निति भावेक्तिन् । सम्प्रसारणम् ॥

आहृतः । त्रि । आनीते ॥

आहेयम् । त्रि । अहिसम्बन्धिविषाद्यादौ ॥ अहेर्भवम् । इतिकुक्ष्यादिना ढञ् । स्त्री । आहेयी ॥

आहो । अ । प्रश्ने ॥ विकल्पे ॥ त्रि ॥ आहन्ति । हन्तेर्डो प्रत्यय. ॥

आहोपुरुषिका । स्त्री । दर्पोत्थात्मसम्भावनायाम् । आत्मनि शक्त्याविष्करणे ॥ अहो अहम्पुरुषः । शुशुभेतिसमास. अहोइति अहमित्यर्थे । मयूरव्यंसकादित्वात्समासः । अहोपुरुषस्यभावः मनो० वुञ । आहोपुरुषिकादर्पाद्यास्यात् सम्भावनात्मनीत्यमर ॥

आहोस्वित् । अ । विकल्पे । आहो । आहो चस्वितच ॥

आह्नः । पुं । अह्नां समूहे ॥ खण्डिका

ह्रिस्वा दृश् । अह्नष्टखोरेवेति नियमा
ट्टिलेसग्रेन॥

आह्निक:। दिननिर्वर्त्ये । दिनसाध्ये ॥
दिनसम्बन्धिनि ॥ न । प्रकरणसमू
हे । ग्रन्थभागे ॥ भोजने ॥ नित्यक्रि
यायाम ॥ अह्नानिर्वृत्तम् । तेननि
र्वृत्तमितिठञ् ॥ आह्निकन्त्वपिसन्ध्या-
न्तंभवति ॥

आह्राद:। पुं । मेघशब्दे । स्तनने ॥

आह्लाद: । पुं । आनन्दे । हर्षे ॥

आह्लादित: । त्रि । आनन्दिते । हृष्टे॥

आह्वय: । पुं । नामनि ॥ आह्वयति-
इत्याह्व: । आतोनुपसर्गे इति के
प्राप्ते कविधौ सर्वत्रप्रसारणिभ्योड
तेड:। तैर्यायते माप्यते । या० ।
घञर्थेक: ॥

आह्वा । स्त्री । नाम्नि । संज्ञायाम् ॥
आह्वान माह्वा । आतश्चोपसर्ग
इत्यङ् ॥

आह्वानम् । न । आवाहने । आका
रणे । हूतौ ॥ नामनि ॥ आङ्पूर्वा
त ह्वेञो ल्युट् ॥

इ:

इ । अ । भेदे । कपोक्तौ । अपाकरणे ॥
अनुकम्पायाम् ॥ खेदे ॥ सम्बोधने ॥
जुगुप्सायाम् ॥ विस्मये ॥ प्रत्यक्षस
न्निधावितिकश्चित् ॥

इ: । पुं । कामदेवे । मदने ॥ इकारे ॥

इकट: । पुं । वंशाङ्कुरे ॥

इक्कट: । पुं । तृणविशेषे । बहुमूले ॥

इक्षव: । पुं । इक्षुमाचे ॥ इतिशब्दरत्ना
वली ॥

इक्षाणिका । स्त्री । अनिच्चौ ॥

इक्षु । पुं । ईख इतिस्वनामप्रसिद्धेरसा
ले । मधुतृणे । गुडतृणे । असिपचे । म
त्स्यपुष्पे ॥ अथगुणा: । इक्षवोरक्तपि
त्तघ्नावल्याहृष्या: कफप्रदा: । स्वादु
पाकरसा: स्निग्धागुरवोमूत्रलाहिमा.
॥ अस्यभेदा: । पौण्ड्रकोभीरुकश्चा
पिवंशक: शतपोरक' । कान्तारस्ता
पसेक्षुश्चकाण्डेक्षु सूचिपत्रक. ॥ नै
पालोदीर्घपत्रश्चनीलपोरोथकोश-
कृत् । इत्येताजातयस्तेषांगुणावे
ध्याययास्थलम् ॥ बालइक्षु. कफंकु
र्यान्मेदोमेहकरश्चस. । युवातुवा
तहृत्स्वादुरीषत्तीक्ष्णश्चपित्तनुत
॥ रक्तपित्तहरोवृद्ध चतहृद्बलवीर्य-
कृत् । मूलेतुमधुरोत्यर्थं मध्ये पि-
मधुर:स्मृत' । अग्रेग्रन्थिषुचत्तेयइ
क्षु. पटुरसोजनै. ॥ * ॥ दन्तनिष्पी
डितस्येक्षोरस: पित्तास्रनाशन: ।

शर्करासमवीर्यःस्यादविदाहीकफ-
प्रदः। मूलाग्रजन्तुग्रन्थ्यादिपीडना
न्मलसङ्करात्। किञ्चित्कालं विधृ
त्याच विकृतिं याति यान्त्रिकः॥ त-
स्माद्विदाही विष्टम्भी गुरुः स्याद्यान्त्रि
को रसः। रसः पर्युषितो नेष्टो ह्य-
म्लो वातापहो गुरुः। कफपित्तकरः
शोषी भेदनश्चातिमूत्रलः॥ *॥ प
क्वो रसो गुरुः स्निग्धः सुतीक्ष्णः कफवा
तनुत्। गुल्मानाहप्रशमनः किञ्चित्
पित्तहरः स्मृतः॥ *॥ इक्षोर्विकारा
स्तृड्दाहमूर्च्छापित्तास्रनाशनाः।
गुरवो मधुरा बल्याः स्निग्धा वातहराः
सराः। वृष्या मोहहराः शीता बृंह
णा विषहारिणश्चेति॥ इष्यते। इषइ
च्छायाम्। इषेः क्सुः। षढोः कः सि
। आदेशप्रत्यययोः। कषयोगे क्षः
॥ अस्य विकाराः। रसो काफाणित
गुडखण्डमत्स्यण्डिकासिताः। किञ्च
"लाघवो ज्ञेया. शीतवीर्या यथोत्तर
मिति॥ कोकिलाक्षवृक्षे॥

इक्षुकाण्डः। पुं। मुञ्जे॥ काशतृणे॥

इक्षुकुट्टकः। पुं। गौडिके॥ इक्षून्कुट्ट
यति। कुट्टच्छेदने। कुन्शिल्पिसं
ज्ञयोरपूर्वस्यापि॥

इक्षुगन्धः। पु। काशतृणे॥ क्षुद्रगो
क्षुरे॥

इक्षुगन्धा। स्त्री। कोकिलाक्षे॥ क्रोष्ट्रा
म्। शुक्लविदार्याम्। कृष्णभूमिकू
ष्माण्डे॥ काशे॥ गोक्षुरे॥ इक्षुग
न्धइवगन्धोऽस्याः। वा इक्षोः गन्धो
ऽस्याः। इक्षुशब्दस्तद्गन्धसदृशे गौणः॥

इक्षुगन्धिका। स्त्री। भूमिकूष्माण्डे॥ इ
क्षुगन्धैव॥

इक्षुजः। पुं। फाणितादिषु॥ फाणित
ञ्चैव मत्स्यण्डी गुडः खण्डकमेव च।
सिता सितोपला चैते षड्भेदा इक्षुजा
मताः॥

इक्षुतुल्या। स्त्री। आनाखु इति गौड-
भाषाप्रसिद्धे तृणविशेषे। इक्षुवालि
कायाम्॥

इक्षुदर्भा। स्त्री। तृणविशेषे
त्रिकायाम्। सुदर्भायाम्॥

इक्षुनेत्रम्। न। इक्षुमूले॥

इक्षुपत्रः। पुं। जुन्हरी जुवार इति च
प्रसिद्धे धान्ये। यावनाले॥

इक्षुरः। पुं। शरतृणे॥

इक्षुवालिका। स्त्री। तालमखाना इ-
ति प्रसिद्धे क्षुरके। इक्षवालिकायाम्॥
काशे॥

इक्षुमती। स्त्री। सरिद्विशेषे॥

इक्षुमूलम्। न। मोरटके। वंशनेत्रे वृक्षे॥

इक्षुयन्त्रम्। न। कोल्हू बेलना इति-
च प्रसिद्धे इक्षुनिष्पीडनयन्त्रे॥

इक्षुयोनिः । पुं । पुण्ड्रकेक्षौ ॥

इक्षुर । पुं । गोक्षुरे ॥ तालमखाणा इतिभाषाप्रसिद्धे कोकिलाक्षे । काशे ॥ इक्षुम् इक्षुगन्धं राति । रादाने । आतोनुपेतिकः ॥

इक्षुरक । पुं । कोकिलाक्षवृक्षे ॥ स्थूलशरे ॥ काशतृणे ॥

इक्षुरसः । पुं । काशतृणे ॥

इक्षुरसक्काथः । पुं । गुडे ॥

इक्षुरसोद । पुं । इक्षुसमुद्रे ॥

इक्षुवल्लरी । स्त्री ।
इक्षुवल्ली । स्त्री । } क्षीरकन्दे । क्षीरविदार्याम् । सिराले इतिहिमगिरिभाषा ॥

इक्षुवाटिका । स्त्री ।
इक्षुवाटी । स्त्री । } पुण्ड्रके ।

इक्षुवेष्टन । पुं । भद्रमुञ्जे ॥

इक्षुशर । पुं । काशे ॥

इक्षुशाकटम् । न । इक्षुक्षेत्रे ॥ इक्षूणां भवनं क्षेत्रम् । भवने क्षेत्रेशाकटशाकिनौ ॥

इक्षुशाकिनम् । न । इक्षुशाकटे ॥ शाकिनः ॥

इक्षुसारः । पुं । गुडे ॥

इक्ष्वाकु । पुं । वैवस्वतमनुपुत्रे ॥ सतु सत्ययुगे अयोध्यायांसूर्यवंशीयआदिराजः ॥ स्त्री । कटुतुम्ब्याम् ॥ इक्षुमाकरोति । मितद्वादिभ्यात् डुः ॥ इक्षुइतिशब्दमकति । अकगतौ । वाहुलकादुणवा ॥

इक्ष्वारिः । पुं ।
इक्ष्वालिक । पुं । } काशतृणे ॥

इक्ष्वालिका । स्त्री । इक्षुतुल्यायाम् ॥

इङ्ग । पुं । अद्भुते ॥ ज्ञाने ॥ जङ्गमे इङ्गिते ॥ इङ्गनम् । इगिगतौ । घञ् । इतिवा । पचाद्यच् ॥

इङ्गना । स्त्री । संज्ञायाम् ॥

इङ्गितम् । न । इङ्गतेभावे ॥ चेष्टायाम् ॥ अभिप्रायसूचकेवचनस्वरादौ शरीरव्यापारे । आकारे । अभिप्रायानुरूपचेष्टाविष्करणे ॥ इङ्गनम् । इगि० । क्तः । इङ्गिताकाराभ्याञ्च भाषणानभिज्ञादौतु गोवलीवर्दन्यायेन इङ्गितंचेष्टितम् आकारोमुखरागादिरित्यभियुक्ताः ॥ गमने ।

इङ्गितज्ञः । त्रि । भावज्ञे ॥ इङ्गितंजानाति । ज्ञा० । आतइति कः ॥ नष्टेङ्गितज्ञोऽवसरेऽवसीदति ॥

इङ्गुद । पुं । इङ्गुदीवृक्षे ॥ हिंगुआ हिंगोटा इतिच०प्रसिद्धे तापसतरौ ॥ इङ्गंद्यति । दोअवखण्डने । आतोनुपेतिकः । पृ० । इङ्गुदःकुष्ठभूतादिग्रहव्रणविषक्रिमीन् । हन्त्युष्णःश्वित्रशूलघ्नस्तिक्तकः कटुपाकवान् ॥

इङ्गुदी । स्त्री । तापसतरौ । तनुपत्रे । विषकण्टे । तैलफले । हिंगोटा इतिभाषा ॥ इङ्गुदाज्जातेरिति- ङीष् ॥

इङ्गुलः । पुं । } इङ्गुदस्यार्थे ॥
इङ्गुली । स्त्री । }

इङ्गेजः । पुं । लण्डनजने । लेण्डजे ॥ यथा । पूर्वाम्नाये नवशतंषडशीतिः प्रकीर्त्तिताः । फिरङ्गभाषया मन्त्रा स्तेषांसंसाधनात् कलौ ॥ अधिपाम ण्डलानाञ्च सङ्ग्रामे ष्वपराजिताः । इङ्गेजा नवषट्पञ्चलेण्डजाश्चापिभा विन इतिमेरुतन्त्रे २३ प्रकाशः ॥

इच्छक. । पुं । रुचके । टावानेवू इति गौडभाषायामसिद्धे ॥ त्रि । इच्छायुक्ते ॥

इच्छा । स्त्री । मनोधर्मविशेषे । वाञ्छा याम् । लिप्सायाम् ॥ सुखे तत्साधने चेदंमे भूयादिति स्पृहात्माचित्तिवृ- त्तिःकामइति रागइतिचोच्यते ॥ न्या यमते अस्या कारणम् । निर्दुःखत्वे सुखे चेच्छातज्ज्ञानादेवजायते । इच्छातुतदुपायेस्यादिष्टोपायत्व धीर्यदि॥ चिकीर्षाकृतिसाध्यत्वप्रका रेच्छातुयाभवेत् । तद्धेतु' कृतिसा- ध्येष्टसाधनत्वमतिर्भवेत ॥ अस्याः- प्रतिबन्धः । बलवद्दिष्टहेतुत्वमति. स्यात् प्रतिबन्धिकेति भाषापरिच्छे दः ॥ एषणमिच्छा । इच्छेतिइच्छेः इषेः शप्रत्ययेनिपातितः ॥

इच्छावती । स्त्री । धनादीच्छायुक्तायां स्त्रियाम् । कामुकायाम् ॥ इच्छास्त्य स्याः । मतुप् ॥

इच्छावसुः । पुं । कुवेरे ॥

इच्छितः । त्रि । वाञ्छिते ॥ इच्छासं जाताऽस्य । ता० इतच् ॥

इच्छुः. । त्रि । इच्छाविशिष्टे । आकाङ्क्षा युक्ते ॥ इच्छाशीले ॥ इच्छतितच्छी लः । इषइच्छायाम् । विन्दुरिच्छु- रितिसाधुः ॥

इज्जलः । पुं । हिज्जलवृक्षे । निचुले ॥ एति । इण॰ । क्विप् तुक् । इत् जल मस्य ॥

इज्यः । पुं । सुरगुरौ । बृहस्पतौ ॥ पु ष्यनक्षत्रे ॥ श्रीहरौ ॥ येयजन्तिमखैः. पुण्यैर्देवतादीन् बहूनपि । आत्मान मात्मनानित्यं विष्णुमेवयजन्तिते ॥ इतिहरिवंशः ॥ त्रि । पूज्ये ॥ श्रीगु रौ ॥ इज्याऽस्यास्ति । अर्शआद्यच् ॥

इज्या । स्त्री । दाने ॥ अध्वरे ॥ अर्चायां म् ॥ सङ्गमे ॥ गवि ॥ कुट्टन्याम् ॥ यजनम् । यजदेवपूजासङ्गतिकरण दानेषु । व्रजयज्योर्भावेक्यप् । वचि स्वपीत्यादिनासम्प्रसारणम् । टाप् ॥

इज्याशीलः । पुं । यायजूके । पुनः पुन

र्यन्नकर्त्तरि॥ इज्याशीलमस्य॥ इज्यां शीलति शीलयतिवा। शीलसमाधै। शीलिकाभिभच्याचारिभ्योण इति था.॥

इल्वाकः। पु। इँचला मोचाचिङ्डी इतिगौडभाषा प्रसिद्धे मत्स्यविशेषे॥

इट्चर। पुं। षण्डे। गोपतौ॥ एषण म्। इट्। इष॰ क्विप्। इषाचरति। पचाद्यच्॥

इडविडा। स्त्री। पुलस्त्यभार्यायाम्॥

इडा। स्त्री। इच्वाकोस्तनयायाम्। बुधग्रहस्यभार्यायाम्॥ गवि। सौरभेय्याम्॥ वचने॥ भूमौ। वसुमत्याम्॥ स्वर्गे॥ नाडीविशेषे। वामम्ष्कांध.स्याधनुवंशाधामनासापर्यन्तं-गताया नाडोसेडेत्युच्यते॥

इडाचिका। स्त्री। गन्धोल्याम्। वरट्याम्। ततैया वरडै भिरड चिमडी इत्यादिभाषाप्रसिद्धायाम्॥

इडावत्सरः। पुं। संवत्सरे॥

इडिका। स्त्री। भूमौ॥ इडैव। स्वार्थे कः। इलम्॥

इडिक्कः। पुं। वनच्छगले॥ इतिहेमचन्द्रः॥

इडुत्सरः। पुं। संवत्सरे॥

इत्। अ। इत्थमेव॥

इतः। त्रि। गते॥ स्मृते॥ इण्॰। गत्यर्थे तिक्त.॥ प्राप्ते॥ ज्ञाते। एते:कर्त्तरिक्तः॥

इतरः। त्रि। अन्यस्मिन्॥ पामरे। नीचे॥ तरथंतर.। तृ॰। ऋदोरप्। एःकामस्यतरः। इनाकामेन तीर्यते वातरतिवा। पचाद्यच्। यद्वा। इतंगमनं करोति। तत्करोतीतिणिच्॥ यद्वा। इतेनज्ञानेनचीयते। प्रातिपदिकाद्धात्वर्थ इतिणिच्। बाहुलकादरः॥ यद्वा। इ इत्यव्ययमपकर्षे। द्विवचनेतितरप् द्रव्यप्रकर्षत्वान्नाम्॥

इतरविशेषः। पुं। अन्यप्रभेदे॥

इतरेतरम्। त्रि। अन्योन्यस्मिन्। परस्परे॥

इतरेतरयोग.। पुं। सहत्वप्राधान्ये चार्थविशेषे॥ यथा। प्लक्षश्चन्यग्रोधश्च प्लक्षन्यग्रोधौ। धवश्च खदिरश्च पलाशश्च धवखदिरपलाशा॥

इतरेतराश्रयः। पुं। इतरेतरयोराश्रये॥

इतरेद्युः। अ। अन्यदिने। इतरस्मिन्नहनि॥ सद्यःपरुत् परार्य्यैषमःइत्यादिना इतरशब्दादेद्युस् प्रत्ययः॥

इतश्चेतश्च। अ। अनियतदिग्देशे॥

इतस्ततः। अ। अत्रतत्र॥

इतः। अ। अपादानार्थे। पञ्चम्यर्थे॥ अस्मात्। पञ्चम्यास्तसिल् इदमइश्॥

इति । अ । हेतौ । प्रकाशने । निदर्शने । प्रकारे । परकृतौ । अनुकर्षे । समाप्तौ । प्रकरणे । स्वरूपे । सान्निध्ये । विवक्षानियमे । मते । प्रत्यक्षे । अवधारणे । व्यवस्थायाम् । विवक्ष्यमाणे । परामर्शे । माने । इत्थमर्थे । एवमर्थे । प्रकर्षे । उपक्रमे । एति अयतिवा । इण्° । क्तिच् ।

इतिकथः । त्रि । अपार्थवाचि । अश्रद्धेये । नष्टे । इतिइत्थम्प्रकारेणकथायस्य ।

इतिकर्त्तव्यता । स्त्री । कल्पे । प्रवृत्तौ ।

इतिह । अ । उपदेशपारम्पर्य्ये । ऐतिह्ये । इति एवम् ह किल ।

इतिहा । अ । पारम्पर्य्यप्राप्तोपदेशे ॥

इतिहासः । पुं । पूर्वेषांकथायाम् ॥ पुरावृत्ते । व्यासादिप्रणीते पुरावृत्तप्रकाशिनि भारतादिग्रन्थे । धर्मार्थकाममोक्षाणा मुपदेशसमन्वितम् । पूर्ववृत्तकथायुक्त मितिहासंप्रचक्षते । इतिस्मृतिः । इतिहइतिपारम्पर्य्योपदेशोऽत्रम् । सआस्तेऽस्मिन्स । आस° । इलश्चेति घञ् ।

इतिहासपुराणम् । न । आथर्वणब्राह्मणभागे । प्रसिद्धयोरितिहासपुराणयोः ।

इत्कटः । पुं । ओकडा इति गौडभाषा

इदम्प्रसिद्ध वृक्षविशेषे । बहुमूले । खरच्छदे ।

इत्किला । स्त्री । रोचनायाम् । गन्धद्रव्यविशेषे ।

इत्थम् । अ । एवम्प्रकारे । अनेन एतेनैवा प्रकारेणेत्यर्थे इदमस्थमुप्रत्यय । एतेतौरथोरितिइदादेशः ॥

इत्थम्भूतः । त्रि । एवम्प्रकारसमे । कञ्चित् प्रकारंप्राप्ते । इममेतंवा प्रकारमापन्नः । द्वितीयान्तादपिथमु' । तथाच वैयाकरणव्यवहारः । लक्षणेत्थम्भूताख्यानेत्यादिः । एतेन कथम्भूतो व्याख्यातः ।

इत्था । अ । इत्थमर्थे । अनेन एतेनवा प्रकारेणेत्यर्थे प्रकारवचने थाल् ।

इत्यः । त्रि । गम्ये ॥

इत्या । स्त्री । शिविकायाम् । ईयतेऽनया । इण्° । संज्ञायांसमजेतिक्यप् ।

इत्वरः । त्रि । क्रूरकर्मणि । पथिके । दुर्विधे । नीचे । पुं । षण्ढे । एतितच्छीलः । इण्' । इण्नशजिसर्त्तिभ्यःक्वरप् ।

इत्वरी । स्त्री । अभिसारिकायाम् । असत्याम् । एतितच्छीला । इण् । क्वरप् । टिड्ढेतिङीप् ।

इत्वा । स्त्री । गन्त्र्याम् ।

इदम् । त्रि । पुरोवर्त्तिनि । दृश्येचराच

रात्मके जगति ॥ सन्निकर्षे ॥ सन्निधानादनन्तरीक्तमिदमोविषयः ॥ एति । इणगतौ । इणोदमुगितिदमप्रत्ययः ॥ इन्दति । इदिपरमैश्वर्ये । इन्द्र.कमिर्नलोपश्चेतिदीर्घिते ॥ पुं । प्रथमैकवचने । अयम । तयैतद्धेशकालादौ दृष्टोयमितिकीर्त्यते ॥ स्त्री । प्रथमैकवचने । इयम् ॥

इरुन्नार्या । स्त्री । दुरालभायाम् ॥

इदानीम् । अ । सम्प्रत्यर्थे ॥ वाक्यालङ्कारे ॥ अस्मिन्काले । दानीच्च । इदमइश् ॥

इदानीन्तनः । त्रि । आधुनिके । सम्प्रतिजाते ॥ इदानीभवः । सायञ्चिरं'' त्यादिनाट्युः ॥

इदावत्सरः । पु । संवत्सरादिपञ्चान्तर्गतवत्सरविशेषे ॥

इद्धम् । न । आतपे ॥ दीप्ते ॥ आश्चर्ये ॥ त्रि । निर्मले ॥ वर्द्धिते ॥ञिइन्धीदीप्तौ । ञीतःक्तइतिवर्त्तमानेक्तः ॥

इद्धशासनः । त्रि । अप्रतिहताज्ञे ॥

इद्धा । अ । प्राकाश्ये ॥ समिद्धमिद्धेशमहोददासि ॥

इध्मम् । न । समिधि । अग्निसन्दीपनकाष्ठे ॥ इध्यते अग्निरनेन । ञिइन्धी° । इषियुधीतिमक् । अनिदितामितिनलोपः ॥

इनः । पुं । अर्के । सूर्ये ॥ पत्यौ । प्रभौ ॥ नृपभेदे ॥ एति ईयतेवा । इण्° । इणषिञ्जितिनक् ॥

इनानी । स्त्री । वटपत्रीवृक्षे ॥

इन्दम्बरम् । न । इन्दीवरे । नीलोत्पले ॥

इन्दिन्दिरः । पुं । भ्रमरे । षट्पदे ॥

इन्दिरा । स्त्री । श्रियाम् । लक्ष्म्याम ॥

इन्दिरामन्दिरम् । न । विष्णौ ॥ इति राजवल्लभः ॥

इन्दिरालयम् । न । पद्मे ॥ इन्दिराया आलयः । क्लीवत्वमभिधानात् ॥

इन्दिरावरम् । न । नीलोत्पले ॥ इन्दिरायावरम् प्रियमिष्टमितियावत् ॥

इन्दिवरम् । न । नीलोत्पले ॥ इन्दति । इदिपरमैश्वर्ये । इगुपधात् किदिति इन् । इन्दिः लक्ष्मीः तस्याः वरमिष्टम ॥

इन्दीवरम् । न । कुवलये । नीलाम्भोजे ॥ इन्देरिन्नन्तात् कृदिकारादितिङीष् । इन्दी लक्ष्मीस्तस्याः वरमिष्टम् ॥

इन्दीवरिणी । स्त्री । उत्पलिन्याम् ॥

इन्दीवरी । स्त्री । शतमूल्याम् । शतावर्याम् ॥ इन्दीवरमस्त्यस्याः । अर्श-आद्यच् । गौ° । ङीष् ॥

इन्दुः । पुं । चन्द्रमसि ॥ कर्पूरे ॥ मृगशिरोनक्षत्रे ॥ एकाङ्के ॥ उनत्ति अ-

मृतरसेन सर्वामपिभुवंकिर्वा करो ति । उन्दीक्लेदने । उन्देरिश्चादेश इत्युः ॥

इन्दुकः । पुं । अश्मन्तकवृक्षे ॥

इन्दुकमलम् । न । सितोत्पले ॥

इन्दुकलिका । स्त्री । केतक्याम् ॥

इन्दुकान्तः । पु । चन्द्रकान्तमणौ ॥ इन्दुःकान्तोऽस्य ॥

इन्दुकान्ता । स्त्री । रजन्याम् ॥ इन्दुःकान्तोयस्याः ॥

इन्दुक्षयः । पुं । अमावास्यायाम् ॥

इन्दुजनकः । पुं । समुद्रे ॥ इन्दोः जनकः ॥

इन्दुजा । स्त्री । नर्मदायाम् । सोमोद्भवायाम् ॥

इन्दुपुत्र । पु । बुधग्रहे ॥ इन्दोःपुत्रः ॥

इन्दुपुष्पिका । स्त्री । विषलाङ्गला इति विषलाङ्गलिया इतिच गौडभाषाप्रसिद्धे कलिकारीवृक्षे । स्वर्णपुष्पायाम् ॥

इन्दुभम् । न । मृगशिरोनक्षत्रे ॥

इन्दुभा । स्त्री । कौमुद्याम् । ज्योत्स्नायाम् ॥

इन्दुभृत् । पुं । शिवे ॥ इन्दुंबिभर्ति । डुभृञ्० । क्विप् ॥

इन्दुमती । स्त्री । पूर्णिमायाम् ॥

इन्दुरत्नम् । न । मुक्तायाम् ॥

इन्दुलेखा । स्त्री । अमृतायाम् । गुडूच्याम् । सोमलतायाम् ॥ शशिनः कलायाम् ॥ यमानिकायाम् । इन्दोर्लेखेव ॥

इन्दुलोहकम् । न । रौप्ये ॥

इन्दुवल्ली । स्त्री । सोमलतायाम् ॥ गुडूच्याम् ॥

इन्दुव्रतम् । न । चान्द्रायणे ॥

इन्दूरः । पुं । मूषिके ॥

इन्द्रः । पुं । देवराजे । पुरन्दरे । अ-- ॥ अन्तरात्मनि ॥ परमेश्वरे ॥ इन्द्रोमायाभिःपुरुरूपईयते इतिश्रुतौपरमेश्वरस्य प्रकरणात् ॥ आदित्यविशेषे ॥ कुटजवृक्षे ॥ रात्रौ ॥ भारतवर्षोपद्वीपविशेषे ॥ षण्णान्तस्यचतुर्थेऽ॥ऽप्रभेदे ॥ ज्येष्ठानक्षत्रे ॥ विष्कम्भादिषु षड्विंशेयोगे ॥ तत्रजातस्यफलम् । प्रतापशीलोवलवान्गुणाढ्यः स्वेषाधिकःश्रीकमलाभ्युपेतः । किलेन्द्रयोगो यदिजन्मकालेमहेन्द्रतुल्यःपुरुषः प्रसन्न इति ॥ इन्दति । इदि० । ऋज्रेन्द्रेत्यादिनारन् ॥

इन्द्रकम् । न । सभागृहे ॥ इतिहेमचन्द्रः ॥

इन्द्रकीलः । पुं । हिमवतोदक्षिणेकुलान्तपीठसन्निहितेद्रिविशेषे ॥ मन्दरपर्वते ॥

इन्द्रकुञ्जरः । पु । ऐरावते ॥ इन्द्रस्यकु

ज्जरः ॥

इन्द्रकोषः । पुं । मञ्चके । खट्वायाम् ॥

इन्द्रगोपः । पुं । तीज इति बीरबहुट्टी इति च भाषाप्रसिद्धे वर्षाभवरक्तवर्णकीटे । शक्रगोपे । अग्निके ॥ इन्द्रो गोपोऽस्य ॥

इन्द्रचन्दनम् । न । हरिचन्दने ॥

इन्द्रचिर्भिटी । स्त्री । लताविशेषे । युग्मफलायाम् । दीर्घवृन्तायाम् ॥

इन्द्रच्छदः । न । सहस्रगुच्छहारे ॥

इन्द्रजालम् । न । कुहके । जाले । कुहतौ । मन्त्रौषधादिना यथास्थितस्य वस्तुनोऽन्यथाप्रख्यापने । मायाकर्मणि । भानुमतीकाखेल इतिभाषा ॥ वृद्धास्तु । एतस्मात्किमिवेन्द्रजालमपरं यद्गर्भवासस्थितं रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानाङ्कुरम् । पर्य्यायेण शिशुत्वयौवनजरावेषैरनेकैर्वृतं पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथागच्छतीत्याहुः ॥ इन्द्रेण योगविशेषेण जालम् ॥ क्षुद्रोपायविशेषे ॥

इन्द्रजालिकः । पुं । कुहककारिणि । शौभिके । भानमती इतिभाषा ॥

इन्द्रजित । पुं । रावणात्मजे । मेघनादे ॥ इन्द्रमजैषीत् । जि० । क्विप्तुकौ ॥

इन्द्रजिद्विजयी । पुं । लक्ष्मणे ॥

इन्द्रतूलम् । न । आकाशेउड्डीयमानेतूले । ग्रीष्महासे । वंशकफे ॥

इन्द्रतूलकम् । न । इन्द्रतूले ॥

इन्द्रदारु । न । देवदारुणि ॥

इन्द्रदिक् । स्त्री । पूर्वदिशि ॥

इन्द्रद्युम्नः । पुं । ऋषिविशेषे । भाल्लवेये ॥ नृपतिविशेषे ॥

इन्द्रद्रुः । पुं । अर्जुनवृक्षे ॥ कुटजवृक्षे ॥ इन्द्रस्य द्रुः ॥

इन्द्रधनुः । न । वक्रीभूतेरोहिते । शक्रधनुषि ॥ रविकिरणा बहुवर्णा वातेनविलोडिता नभसि । शक्रायुधसंस्थानादृश्यन्ते तत्तु इन्द्रधनुः ॥

इन्द्रध्वजः । पुं । राज्ञावृष्ट्यर्थं क्रियमाणे उत्सवविशेषे । शक्रध्वजे ॥ यथोक्तंभविष्योत्तरपुराणे । एवंयः कुरुते यात्रामिन्द्रकेतोर्युधिष्ठर । पर्जन्यकामवर्षीस्यात्तस्मिन राज्येनसंशय इति ॥

इन्द्रनील । पुं । पन्ना इतिभाषाप्रसिद्धे मरकतमणौ ॥ क्षीरमध्येक्षिपेन्नीलंक्षीरंचेन्नीलतांव्रजेत् । इन्द्रनीलमितिख्यातमितिपरीक्षा ॥

इन्द्रपुष्पा । स्त्री । लाङ्गलिकीवृक्षे । विषलाङ्गला इतिगौडभाषा प्रसिद्धे ॥

इन्द्रपुष्पिका । स्त्री । विषलाङ्गलाइति

गौड भाषा प्रसिद्धे कलिकारीवृक्षे॥

इन्द्रप्रस्थः। पुं। न। युधिष्ठिरनिर्मितपुरोत्तमे। वज्रराजधान्याम्। पार्थनगरे। दिल्ली इतियवनभाषा॥

इन्द्रप्रहरणम्। न। पवौ। वज्रे॥ इन्द्रस्यप्रहरणम्॥

इन्द्रभम्। न। ज्येष्ठानक्षत्रे॥

इन्द्रभूतिः। पुं। अर्हतांगणाधिपभेदे॥

इन्द्रभेषजम्। न। शुण्ठ्याम्॥

इन्द्रमहकामुकः। पुं। कुक्कुरे॥

इन्द्रयवः। पुं। न। इन्द्रजौ इतिभाषाप्रसिद्धेतिक्तबीजविशेषे। कलिङ्गे। भद्रयवे। कुटजबीजे॥ ऐन्द्रंयवंत्रिदोषघ्नंसङ्ग्राहि कटुशीतलम्। ज्वरातिसाररक्तार्शः कृमिवीसर्पकुष्ठनुत्॥ दीपनगुदकीलास्रवातास्रश्लेष्मशूलजित॥ यवाकारबीजत्वात् यवम्। इन्द्रसंज्ञस्यवृक्षस्य यवम्॥

इन्द्रलुप्तः। पुं। केशनाशकरोगे। केशघ्ने॥ न। मस्तकोद्भवरोगविशेषे। खालित्ये॥ तस्यलक्षणम्॥ रोमकूपानुगंरक्तं पित्तेनसहमूर्च्छितम्। प्रच्यावयति रोमाणिततः श्लेष्मासशोणितः॥ रुणद्धिरोमकूपाँस्तुततोन्येषामसम्भवः। तदिन्द्रलुप्तंखालित्यं रुज्येतिचविभाव्यते॥ खालित्यंरुज्येतितस्यपर्यायकथनम्। तथाचभोजः। तदिन्द्रलुप्तमित्याहुःखलतीरुज्याञ्चकेचनेति। कार्त्तिकस्त्वाह। इन्द्रलुप्तंपुंसांस्त्रीणांभवति खालित्यं शिरोरुहेष्वेव रुज्यासवेदनेति आगमस्तननास्तीति नि [illegible]नटीका॥

इन्द्रलुप्तकम्। न। इन्द्रलुप्तरोगे॥

इन्द्रलुप्तिकः। त्रि। इन्द्रलुप्तरुजान्विते। निष्केशशिरसि॥

इन्द्रवंशा। स्त्री। वर्णवृत्तविशेषे॥ वंशस्थवृत्तेयदिपूर्वमक्षरं दीर्घंप्रयुक्तंकवितावतारकैः। गौडावनीनाथ कुलप्रकाशक स्यादिन्द्रवंशेत्यभिधानतस्तदा॥

इन्द्रवज्रा। स्त्री। वर्णवृत्तविशेषे॥ कर्णध्वजौगण्डमृगेन्द्रहारा राजन्नयस्याश्चरणेसमस्ते। तामिन्द्रवज्रामतिमात्रकान्तां भोगीन्द्रवक्त्राज्जगरन्धराम्॥ यथा। रक्ताम्बुनेदितलम्बमाला शीतांशुचण्डातपकुण्डलाभ्याम्। तारांशुतारावलिहारहारैः स्वीयांश्रियम्भूषयतीवसन्ध्येति॥

इन्द्रवज्राहतपक्षः। पुं पर्वते॥

इन्द्रवारुणिका। स्त्री। इन्द्रवारुण्याम्॥

इन्द्रवारुणी। स्त्री। राखालसशा इति गौडप्रसिद्धलतायाम्। विशालायाम्। पीतपुष्पायाम्। तोसतुंबी

कीजड जोश्वेतवर्ण और अतिकड वीहोती है इन्द्रायणीतिचभाषा ॥

इन्द्रंवारयति। वृञ्०। चु० । कृवृदा रीतिबाहुलकरुयन्तादुनन्॥

इन्द्रवृक्ष. । पुं । देवदारुणि ॥

इन्द्रवृद्वा। स्त्री । व्रणरोगविशेषे। तल्लक्ष णम । पद्मकर्णिकवन्मध्येपिडकांपि डकाचिताम् । इन्द्रवृद्धान्तुतांविद्या- द्वातपित्तोत्थितांभिषगिति ॥

इन्द्रव्रतम्। न। राज्ञोव्रतविशेषे। यथा। वार्षिकांश्चतुरोमासान् यथेन्द्रोऽभि प्रवर्षति।तथाभिवर्षेत्स्वंराष्ट्रंकामै- रिन्द्रव्रतंचरन्निति ॥

इन्द्रशत्रुः। पुं। वृत्रासुरे। इन्द्रस्यशत्रुः शा यिता हन्तेतिषष्ठीसमासेन इन्द्रस्ये न्द्रहन्तृत्वम् । इन्द्रे ॥ इन्द्रःशत्रुर्यस्ये तिबहुव्रीहिर्दैचस्येन्द्रेणवध्यत्वात् ॥

इन्द्रसावर्णिः । पुं । चतुर्दशेमनौ ॥

इन्द्रसुत. । पुं । जयन्ते ॥ वालिनामवा नरराजे । अर्जुनपाण्डवे । अर्जुनवृ क्षे । इन्द्रस्यसुतः ॥

इन्द्रसुरसः । पुं । इन्द्रसुरिसे ॥

इन्द्रसुरिसः । पुं । निर्गुण्ड्याम् । सिन्दु- वारे । स्योंडी इति काशी भाषा । सभालूइतिभाषा । वनर्हा इतिपर्व तभाषा ॥

इन्द्रसूनु. । पुं । इन्द्रसुतस्यार्थे ॥

इन्द्रसेनः । पुं । प्लक्षद्वीपस्थेऽद्रिविशेषे ॥

इन्द्रा । स्त्री । फणिज्झकेवृक्षे ॥

इन्द्राक्षः । पुं । वृषभौषधौ ।

इन्द्राग्निधूमः । पुं । हिमे ।

इन्द्राणिका । स्त्री । इन्द्रसुरिसे । निर्गु ण्ड्याम् । इन्द्रस्यजन्या । इन्द्रवरुणे- तिङीषानुकौ । जन्यजनकस्वत्वयो पिपुंयोगस्तत्रगृह्यते । कन्। ह्रस्व त्वञ्च । यद्वा । इन्द्रमानयति । अने यर्यन्तात् कर्मण्यण् । ङ:प् । कन्। ह्रस्वः ।

इन्द्राणी । स्त्री। इन्द्रपत्न्याम्॥ शच्या म् । इन्द्रस्यस्त्री । इन्द्रवरुणेति ङी षानुकौ । दुर्गायाम् । यथा । ऐश्व र्ये परमंयस्याःवशेचै वसुरासुरा. । इ न्दिव परमैश्वर्ये इन्द्राणीतेनसाभिवे तिदेवी पुराणम् । इन्द्रसुरिसे । स्त्री णांकरणे । नीलसिन्दुवारे । स्थूलै लायाम् । स्थूलैलायाम् । मातृका विशेषे ॥

इन्द्रानुजः । पुं । विष्णौ ॥

इन्द्रायुधम् । न ।इन्द्रधनुषि । शक्रायुधे ॥

इन्द्रारिः । पुं । असुरे । इन्द्रस्यअरिः ॥

इन्द्रावरजः । पुं । विष्णौ । इन्द्रस्यावरं जातः । अन्येष्वपीतिडः ।

इन्द्राशनः । पु । भङ्गायाम् । संविदि ॥

इन्द्रासनम् । न । पञ्चमात्रिकस्यप्रथमे

।ऽऽ प्रभेदे ।

इन्द्रियम् । न । विषयिणि । हृषीके । चक्षुरादिषु । सात्त्विकाहङ्कारोपादानानि इन्द्रियाणि । तानिच बुद्धीन्द्रियकर्मेन्द्रियभेदाद्द्विविधानि । उभयमपि इन्द्रस्यात्मनो विषयोपलब्धिकरणतया लिङ्गत्वादिन्द्रियमुच्यते । तत्र श्रोत्रत्वक्चक्षूरसनाघ्राणाख्यानि ज्ञानेन्द्रियाणि भवन्ति । वाक्पाणिपादपायूपस्थानिच कर्मेन्द्रियाणि भवन्ति । उभयात्मकंमनः । जित्त्वैकादशानीन्द्रियाणि भवन्ति ॥ भूतप्रकृतिकानीन्द्रियाणीति नैयायिकाः । तथाच गौतमप्रणीतं सूत्रम् । घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः । १ । १२ । विषयग्रहणकार्यानुमेयकरणमिन्द्रियम् । इन्द्रस्यात्मनो लिङ्गम् इन्द्रेणदृष्टं ज्ञातं ममचक्षुर्मम श्रोत्रमित्यादिक्रमेण इन्द्रेणदृष्टम् इन्द्रेणजुष्टम् प्रीणितं सेवितंवा इन्द्रेणदत्तं यथायथंविषयेभ्यः । इतिशब्दरूपे प्रकारे तेनइन्द्रेण दुर्जयम् इत्याद्यर्थेषु इन्द्रियमिन्द्रलिङ्गत्त्यादिनपातनादिन्द्रशब्दात्घच् ॥ रेतसि । स्त्री ।

इन्द्रियकर्म । न । वाद्यानांश्रोत्रवागादीना मान्तरयोस्तमनोबुद्ध्योःकर्मसु ॥ तानिचशब्दश्रवणस्पर्शग्रहणरूपदर्शनरसग्रहणगन्धग्रहणानि वचनादानगमनविसर्गानन्दाख्यानि सङ्कल्पाध्यवसायौच यथासङ्ख्यंभवन्ति ॥

इन्द्रियग्रामः । पुं । इन्द्रियसमूहे ॥

इन्द्रियनिग्रहः । पुं । विषयेभ्य श्चक्षुरादिवारणे ॥ चक्षुश्श्रोत्रादिज्ञानेन्द्रियाणां वाक्पाण्यादिकर्मेन्द्रियाणाञ्च तत्तल्लोककोपरोधमात्रेणहठान्निरोधइत्यर्थः ॥ इन्द्रियाणान्तु सर्वेषांयद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरतिप्रज्ञाद्दृतेःपात्रादिवोदकम् ॥

इन्द्रियबधः । पुं । एकादशविधे इन्द्रियाणाम्बधे ॥ यथा । वाधिर्य्यंकुष्ठतान्धत्वं जडताऽजिघ्रता तथा । मूकता कौण्यपङ्गुत्वक्लैब्योदावर्त्तमत्तताः ॥ यथा सङ्ख्यमेकादशाना मेकादशवधाभवन्ति ॥

इन्द्रियवृत्तिः । स्त्री । श्रोत्रादीनांशब्दादिषु । वागादीनां वचनादिषु । मनोबुद्ध्योः सङ्कल्पाध्यवसाययो ॥ यथाहुः साङ्ख्याः । शब्दादिषुपञ्चानामालोचनमात्र मिष्यतेवृत्तिः । वचनादानविहरणोत्सर्गानन्दाश्चपञ्चा

नाम ॥ वु॰ इन्द्रियाणांसम्मुग्धवस्तुमा त्रदर्शनमालोचन मुक्तम् । यथाहुः । सम्मुग्धं वस्तुमात्रन्तु प्रागगृह्णात्य विकल्पितम् । ततसामान्यविशेषा भ्यां कल्पयन्ति मनीषिणइति । त था । अस्तिह्यालोचनंज्ञानं प्रथमंनि र्विकल्पकम् । बालमूकादिविज्ञान सदृशंशुद्धवस्तुजम् ॥ तत.परंपुनर्व स्तुधर्म्मैर्जात्यादिभिर्यया । बुद्ध्यावसी यते सापिप्रत्यक्षत्वेनसम्मतेति ॥

इन्द्रियस्वापः । पुं । प्रलये ॥

इन्द्रियात्मा । पुं । इन्द्रियेषु ॥

इन्द्रियादिः । पु । इन्द्रियाणांकारणे रा जसाहङ्कारे ॥ ॥

इन्द्रियार्थः । पुं । शब्दस्पर्शरूपरसग न्धाख्ये । विषये । गोचरे ॥ गन्धर सरूपस्पर्शशब्दाःपृथिव्या दिगुणास्त दर्थाः । इति न्यायसूत्रम् ।१।१४ ॥ वैशेषिकाणांद्रव्यगुणकर्मसु अर्थ- शब्दाभिधेयत्वम्।अतःपञ्चानांगन्धा दीनामेवकथंतत्वमित्याशङ्कानिरा सायतदर्थाइत्युक्तम् । तेषामिन्द्रि याणामर्थाविषयाउद्दिष्टा अपि तद वेत्याशयः । इत्यश्चतदर्थत्वंलक्षण मितिमन्तव्यम् । तच्छब्देनवहिरि न्द्रियाणिपरामृश्यन्ते । तथाच एकै कवहिरिन्द्रियमात्रग्राह्यविशेषगुण- त्वं वहिरिन्द्रियद्वयाग्राह्यवहिरिन्द्रि यग्राह्यगुणत्वंवातदर्थः । पृथिव्यादि गुणाइतिलक्ष्यनिर्देशः । तेचगुणा इत्याकाङ्क्षायांगन्धेत्यादि । पृथि व्यादीनांगुणाइतिषष्ठीसमासेन भा ष्यसम्मत. तेनगुणगुणिनोरभेदो नेतिसूचितम् ॥ इन्द्रियैरर्थ्यंते ।अ र्थयाञ्चायाम् । कर्मणिघञ् ॥

इन्द्रियायतनम् । न । शरीरे ॥

इन्द्रियार्थसन्निकर्षः । पुं । प्रत्यक्षज्ञान हेतौ ॥ सचषड्विधः । संयोगः । सं युक्तसमवायः । संयुक्तसमवेतसमवा यः । समवायः । समवेतसमवायः । विशेषणविशेष्यभावश्चेति ॥

इन्द्रियेशः । पुं । आत्मनि । जीवे ॥

इन्द्रेज्यः । पुं । वृहस्पतौ ॥ इन्द्रस्येज्यः ॥

इन्धनम् । न । वह्निसन्दीपनार्थतृणका ष्ठयो' । पाकार्हकाष्ठे । एधसि ॥ इ न्धेऽग्निरनेन । ञिइन्धी० । करणेति ल्युट् ॥

इभः । पुं । गजे । हस्तिनि ॥ उत्तरप दस्थः श्रेष्ठे ॥ अष्टमे ॥ एति ईयतेवा । इण्० । इणः किदितिभ' ॥

इभकणा । स्त्री । गजपिप्पल्याम् ॥ इभक णा ॥

इभदन्ता । स्त्री । नागदन्त्याम् । पर्वपु ष्प्याम् । विषौषधौ ॥

इभनिमीलिका । स्त्री । भङ्ग्याम् ॥ छलंमिषञ्चवैदग्धीभङ्गिश्चेभनिमीलिकेतिचिकाण्डशेषः ॥

इभपालकः । पुं । हस्तिपके ॥

इभभरः । पुं । गजसमूहे ॥ इभानांभरः ॥

इभमाचलः । पुं सिंहे ॥

इभया । स्त्री । स्वर्णक्षीरीवृक्षे ॥

इभाख्यः । पुं । नागकेशरवृक्षे ॥

इभोषणा । स्त्री । गजपिप्पल्याम् ॥

इभ्यः । त्रि । आढ्ये । धनवति ॥ पुं । राज्ञि ॥ हस्तिपके ॥ इभमर्हति । दण्डादित्वात्यत् ॥ यद्वा । इःकामात् भ्यसते । भ्यसभये । अन्येभ्योपीतिड ॥

इभ्यग्रामः । पुं । हस्तिपकानांसवसथे ॥

इभ्या । स्त्री । शल्लकीवृक्षे ॥ करेणाम् । टाप् ॥

इभ्यिका । स्त्री । इभ्यायाम् ॥ इभ्यैव । स्वार्थेकन् । उदीचामितीदादेशः । पक्षे इभ्यका ॥

इयत । त्रि । इदम्परिमाणविशिष्टे । एतावति ॥ इदम्परिमाणमस्य । किमिदम्भ्यांवोघइतिवतुप् वस्यघः ॥ इदङ्किमोरीश्की । यस्येतिलोपः । प्रत्ययमात्रमवशिष्यते । पठन्तिचात्रवैयाकरणाःश्रौपनिषदाश्च । उदितवतिपरस्मिन्प्रत्ययेशास्त्रयोनैगतवतिविलयञ्चप्रकृतेपिप्रपञ्चे । सपदिपदमुदीतं केवलःप्रत्ययोयत् तदियदितिमिमीतेकोनुदामखण्डितोपीति ॥ पुं । इयान् । स्त्री । इयती ॥

इयत्ता । स्त्री । सीमायाम् ॥ परिमाणे ॥ संख्यायाम् ॥ इयतोभावः । तल् ॥

इरम्मदः । पुं । मेघज्योतिषि । वज्राग्नौ ॥ इराउदकम् तेनमाद्यतिदीप्यते अविन्धनत्वात् इत्यर्थे उग्रम्पश्येरम्मदेत्यादिनाखश् प्रत्ययोमुमागमश्चनिपातितः ॥ वाडवोपिइरम्मदइतिकेचित् ॥

इरा । स्त्री । भुवि ॥ वाचि । वारुण्याम् ॥ सुरायाम् ॥ इं कामंराति । रादाने । आतोनुपेतिकः ॥ अम्बुनि । जले ॥ इणगतौ । एतिईयतेवा । ऋज्रेन्द्राग्रेतिसाधुः । निपातनाद्गुणाभावः ॥ अन्ने ॥

इराचरम् । न । करकायाम् । वर्षोपले ॥ त्रि । भूचरे ॥ अम्बुचरे ॥ इरायांचरति । चरेष्टः ॥

इराजः । पुं । कन्दर्पे ॥

इरावती । स्त्री । वटपत्रीवृक्षे । पञ्चापभेदीविशेषे ॥ परीक्षिन्नृपतेर्भार्यायाम् ॥

इरिणम । न । ऊषरभूमौ । शून्ये । निराश्रये । ऋच्छति । ऋगतिमापणयोः । अर्त्ते किदिच्चेतिइनन् ।

इरिमेद. । पुं । अरिमेदे । विट्खदिरे । इरिमेद. कषायोष्णोमुखदन्तगदास्रजित् । हन्तिकण्डुविषश्लेष्मकृमिकुष्ठविषग्रहान् ।

इ'रवेल्लिका । स्त्री । मस्तकोद्भवव्रणजन्यपीडाविशेषे । तल्लक्षणम् । पिडकामुत्तमाङ्गस्थांहत्तामुग्ररुजाज्वराम् । सर्वात्मिकांसर्वलिङ्गांजानीयादिरिवेल्लिकामिति ।

इरेशः । पुं । विष्णौ । वरुणे । वागीशे । राज्ञि । इरायाः ईशः ।

इर्वा[?] । स्त्री । कर्कट्याम् ।

इर्वारुशुक्तिका । स्त्री । फूट इतिभाषाप्रसिद्धे इर्वारुविशेषे । निर्भिन्नकर्कट्याम् ।

इलः । त्रि । प्रेरके । इलति प्रेरणांकरोति । इलप्रेरणे । इगुपधलक्षणः कः ।

इलविला । स्त्री । पुलस्त्यभार्यायाम् । हविर्भुवि । कुवेरस्यजनन्याम् ।

इला । स्त्री । सौम्यवाक्ये । बुधयोषिति । धरित्र्याम् । गवि । वाचि । इलति । इलउत्क्षेपे । इगुपधेतिकः ।

इलावृतम् । नं । जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषे । तच्चसुमेरुसंवेष्ट्यास्ते । पश्चान्माल्यवत' प्राच्यांगन्धमादनशैलत' । इलावृतंनीलगिरेर्याम्यतोनिषधादुदक् ।

इलिका । स्त्री । अचलायाम् । भुवि । इलैव । स्वार्थेकः ।

इली । स्त्री । ईल्याम् । करवालिकायाम् । कटारी हाथछुरी इतिभाषा । इलगतौ क्षेपेच । इन् । कृदिकारादितिवाङीष् ।

इलीशः । पुं । इल्लिशे । हिलशे माच इतिगौडभाषाप्रसिद्धे मत्स्यविशेषे ।

इल्लिशः । पुं । इलीशे । इल्लिशोमधुरः स्निग्धोरोचनो वह्निवर्द्धन' । पित्तहृत कफकृत् किञ्चिल्लघुर्ध्योनिलापहः ।

इल्लीशः । पुं । इल्लिशे ।

इल्वकाः । स्त्री । इल्वलासु । नित्त्यंवहुवचनान्तः ।

इल्वलः । पुं । वातापेर्भ्रातरि दैत्यविशेषे । मत्स्यप्रभेदे । पक्षिविशेषे । इलति । इलस्वप्ने क्षेपणेच । सानसिवर्णसि पर्णसीत्यादिनावलच् गुणाभावश्च निपात्यते ।

इल्वलाः । स्त्री । मृगशिरःशिरोदेशस्थतारकासु । मृगशिर शिरःस्थानां पञ्चानांस्वल्पतारकाणां यस्मात् कास्तच्छिरोदेशेनिवसन्ति ताः इल्व

णाः । इणन्ति । इण० । निपातनाद
त्र गुणाभावश्च । निष्ठवत्कृदवचना
न्तोयम् ॥

इव । अ । उपमायाम् । सादृश्ये । साम्ये ।
ईषदर्थे । उत्प्रेक्षायाम् । वाक्याल
ङ्कारे ।

इषः । पुं । आश्विनमासि । इषगतौ । ए
षणाम् इट् यात्रा । भावेक्विप् । साऽस्मि
न्नस्ति जिगीषूणाम् । अर्श आद्यच् ॥

इषिका । स्त्री । गजाक्षिगोलके ॥ ईष्य
ते । ईषउञ्छे । ईषगतिहिंसादर्शने
षु । ईषेः किद्ध्रस्वश्चेतीकन् । धातो
र्ह्रस्वश्च । तूलिकायाम् ॥ इष्यते । इ
षगत्यादौ । क्वुञादिभ्योवुन् ।

इषितः । त्रि । अभिमते ॥ इष्टे ॥

इषिरः । पुं । अग्नौ ॥ इष्यति । इषग
तौ । इच्छतिवा । इषइच्छायाम् ।
इषमदीत्यादिना किरच् ।

इषीका । स्त्री । काशे ॥ मुञ्जामध्यवर्त्ति
तृणे । सींक तुली इतिचभाषा । ई
षति ईषतेवा । ईषउञ्छे । ईषगति
हिंसादर्शनेषु । ईषेःकिद्ध्रस्वश्चेतिई
कन् ॥ दर्भशलाकायाम् ।

इषुः । पुं । स्त्री । बाणे । सायके । प
ञ्चसु ॥ इष्यतेऽनेन । इषगत्यादौ ।
ईषते हिनस्तिवा । ईषेःकिच्चेत्युरा
देरित्वञ्च ।

इषुधिः । पुं । स्त्री । इषूणांस्थाने । तूणी
रे । इषवोधीयन्तेऽत्र । डुधाञ्० । क
र्मण्यधिकरणेचेतिकिः ॥

इषुपुङ्खा । स्त्री । शरपुङ्खायाम् ।

इषुमाला । स्त्री । शरावल्याम् ।

इषूपलयन्त्रम् । न । शरशिलाक्षेपके
यन्त्रविशेषे ॥

इष्टम् । त्रि । आशंसिते । पूजिते ॥ प्रि
ये । इष्यमाणे । इष्यते । इषइच्छाया
म् । मतिबुद्धीतिक्तः । पुं । सप्ततन्तौ
। यज्ञे ॥ एरण्डवृक्षे । न । संस्कारे ।
क्रतुकर्मणि ॥ क्रतुर्यज्ञः कर्मचदाना
दि तयोः समाहारः तदिष्टशब्दवा-
च्यम् । अतएव मनुः । एकाग्निकर्म
हवनं त्रेतायां यच्चहूयते । अन्तर्वेद्यां
च यद्दानमिष्टन्तदभिधीयते इति ॥
अग्निहोत्रंतपः सत्यंवेदानाञ्चार्थ-
पालनम् । आतिथ्यंवैश्वदेवञ्चप्राकृ
रिष्टञ्चनाकदम् । यजनम् । यजदे-
वपूजादौ । नपुंसके भावेक्तः । अनु
कूलवेदनीये देवादिकर्मयागादि
फले । ईश्वराराधनादौ । एषणम् ।
इषेःक्तः । परमानन्दरूपत्वेन सर्वेषां
प्रियत्वादिष्टः परमात्मैव ।

इष्टका । स्त्री । गृहादिनिर्म्माणार्थं दग्ध
मृतखण्डविशेषे । ईंट इतिप्रसिद्धे ।
इष्यते । इष० । इष्यसिभ्यांतकन् ।

इष्टकेषीकामालानामितिनिर्देशात् प्रत्ययस्यादितिनेत्वम् ॥

इष्टकापथम् । न । इष्टकाभिर्निर्मितेपथि । उशीरे । वीरणमूले ॥ इष्टकापथमस्य अधोवायुकरत्वात् ॥ यद्वा । इष्टकेव दृढः पन्थायस्य । इष्टकायामपि पन्थायस्येतिवा ॥

इष्टकामधुक् । त्रि । अभीष्टभोगप्रदे ॥ इष्टानांकामधुक् ॥

इष्टकावत् । त्रि । इष्टकावति ॥ इष्टकाः सन्त्यस्यास्मिन् वा । अन्येभ्योपिदृश्य तद्धितमत्वयः ॥

इष्टगन्धः । त्रि । सुगन्धौ । न । वालुके ॥ इष्टश्चासौ गन्धश्च ॥ इष्टोगन्धोयस्यय सन् वा ॥

इष्टा । स्त्री शमीवृक्षे ॥

इष्टापूर्त्तम् । न । यज्ञखातादिकर्मणि ॥ यथा । अग्निहोत्रंतप. सत्यं वेदानाञ्चानुपालनम् । आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते । वापीकूपतडागादिदेवतायतनानिच । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते ॥ इष्टञ्च पूर्त्तञ्च अनयोः समाहारः ।

इष्टार्थोद्युक्तः । त्रि । उत्सुके । उत्साहयुक्ते ॥ इष्टश्चासावर्थश्च तत्रउद्युक्तः ।

इष्टिः । स्त्री । यागे ॥ दर्शपूर्णमासेष्ट्याम् ॥ अभिलाषे ॥ स्तोकसङ्ग्रहे ॥ एषणम् । इष० । क्तिन् ॥ इज्यतेऽनयेति वा । यज० क्तिन् ॥

इष्टिकापथिकम् । न । लामज्जकतृणे ॥ इतिराजनिर्घण्टुः ॥

इष्टिपचः । पुं । दैत्ये । दनुजे ॥

इष्टिमुट् । पुं । दैत्ये ॥ इष्टिंमुष्णाति । मुषस्तेये । क्विप् ॥

इष्टुः । स्त्री । इच्छाविशेषे ॥

इष्मः । पुं । कामे ॥ वसन्ते ॥ इष्यति । इषगतौ । इच्छतिवा । इषइच्छायाम् । इषियुधीतिमक् ॥

इष्यः । पुं । वसन्ते ॥

इष्वः । त्रि । उपदेष्टरि ॥ इष्यतेऽसौ । इष० । सर्वनिघृष्वरिष्वलष्वशिवपद्मप्रह्वेष्वाअतन्त्रे इति वन् गुणाभावश्चनिपात्यते ॥

इष्वसनः । पुं । चापे ॥ अस्यतेऽनेनेत्यसनः । इषूनामसनः ॥

इष्वासः । पुं । धनुषि ॥ त्रि । इषुक्षेपके । धन्विनि ॥ इषवो वाणा अस्यन्तेऽनेन । असु० । हलश्चेतिघञ् ॥

इह । अ । दुःखभावनायाम् ॥ सन्तापे । कोपे ॥

इह । अ । अस्मिन् । अत्र । अधिकरणे । व्यवहारभूमौ । अस्मिन् । इदमोहः । इदमइश् ।

इहत्यः । त्रि । इहभवे । इहजातादौ ।

ईक्षण — ईदृक्

। अव्ययात्यप् ॥

इहामुत्रार्थफलभोगविरागः । पुं । ऐ हिकपारत्रिकविषयभोगेभ्योनितरांविरतौ । मुक्तेर्द्वितीयसाधने । ऐहिकानांस्रक्चन्दनादिविषयभोगानाङ्कर्मजन्यतया अनित्यत्ववत् आमुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरांविरतौ ॥

इही । अ । त्वङ्गच्छेत्यर्थे । इमन्तप्रतिरूपकम् ॥

ई:

ई । अ । विषादे । दुःखभावने । अनुकम्पायाम् । क्रोधे । प्रत्यक्षे । सन्निधौ । सम्बोधने ॥

ई: । स्त्री । लक्ष्म्याम् । अस्य स्त्री । ङीष् ॥

ईक्षणम् । न । दर्शने । चक्षुषि । दृशि ॥ ईक्षतेऽनेन । ईक्षदृ० । ल्युट् ॥

ईक्षणिकः । पुं । हस्तरेखाद्यवलोकनपूर्वकशुभाशुभफलकथनेनजीविनि ॥ शुभाशुभयोरीक्षणमस्यास्य ठन् ॥

ईक्षणिका । स्त्री । दैवज्ञायाम् । लक्षणादिना जनानांशुभाशुभनिरूपिण्याम् । म० ठन् ॥ ईक्षते । ईक्ष दर्शनाङ्कनयोः । ण्वुल्वा ॥

ईक्षणीयः । त्रि । शोभमाने । ईक्षितुं योग्यः । अनीयर् ॥ अवलोकनीये ॥

ईक्षा । स्त्री । दृष्टौ । ईक्षणम् । ईक्ष० । गुरोश्चेत्यः । टाप् ॥

ईक्षितः । त्रि । अवलोकिते । ईक्ष० नपुंसके भावेक्तः ॥

ईजानः । पुं । यजमाने । कर्मणि । जते । ईज० । शानच् ॥

ईडा । स्त्री । स्तुतौ । ईडनम् । स्तुतौ । गुरोश्चेत्यः । टाप् ॥

ईडितः । त्रि । स्तुते । कृतस्तवे । ईडितेस्म । ईड० । क्तः ॥

ईड्यः । त्रि । स्तुत्ये । वन्द्ये । स्तव्ये । ईडितुंयोग्यः । ण्यत् ॥

ईतिः । स्त्री । डिम्बे । अन्ये । उत्पाते ॥ प्रवासे । कृषे. षट्प्रकारोपद्रवविशेषे । यथा । अतिवृष्टिरनावृष्टिः शलभामूषकाः शुकाः । अत्यासन्नाश्चराजानः षडेता ईतयः स्मृताः इति । ईयतेऽनया । ईङ् गतौ । क्तिन् ॥

ईदृक्षः । त्रि । ईदृशे । दृक्षेचेतिदृक्ष ॥

ईदृक् । त्रि । ईदृशे । इसकेन्याय इसमकार इतिभाषा । अयमिवदृश्यते । इदमिवपश्यतिवा । दृशिरप्रे० । त्यदादिषुदृशइतिक्विन् । इदंकिमो

रीभक्ती ॥

ईदृशः । त्रि । ईदृशि ॥ अयमिव दृश्यते । इदमिव पश्यति वा । दृशेस्त्यदादिष्विति कञ् । इदम ईश् ॥

ईप्सा । स्त्री । आप्तुमिच्छायाम् ॥

ईप्सित । त्रि । अपेक्षिते ॥ अभिप्रेते ॥ इष्टे ॥ आप्तुमिष्टम् । आप्लृव्याप्तौ । सन् । क्त । आप्ज्ञप्यृधामीत । अत्रलोपोऽभ्यासस्येत्यभ्यासलोप ॥

ईप्सु । त्रि । आप्तुमिच्छौ ॥

ईयिवान् । त्रि । उपगते ॥ इण्० । उपेयिवाननाश्वाननूचानश्चेति लिटः क्वसुर्द्वित्वमभ्यासदीर्घत्वं वसोरिट् च निपात्यते । सूत्रे उपइत्यविवक्षितम् ।

ईरणः । पुं । वायौ ॥ ईरति ईरयति वा । ईर० । युच् । ल्युर्वा ॥ न । चलने ॥

ईरितम् । त्रि । प्रोक्ते ॥ प्रेरिते ॥ क्षिप्ते ॥ ईर्यते स्म । ईरगतौ कम्पने च । क्तः ॥

ईरितात्मा । पुं । प्रकटितस्वरूपे ॥

ईर्म्मम् । न । व्रणे ॥ ईरति सुखम् । ईर गतिप्रेरणयोः । बाहुलकान्मक् ॥

ईर्य्या । स्त्री । ध्यानमौनादिकस्य भिक्षुव्रतस्यानुष्ठाने । चर्य्यायाम् ॥ चर्य्यां त्वीर्य्यां विदुर्बुधाः । ईर्य्यते । ईरगतौ । ऋहलोर्ण्यत् ॥

ईर्य्यापथ । पुं । ध्यानाद्युपाये ॥ ईर्य्याया: पन्थाः । ऋक्पूरित्यः ॥

ईर्व्वारु. । पुं । स्त्री । कर्कट्याम् ॥ ईरणम् । ईर० । स० क्विप् । ईरङ्गणोति वारयति वा । वृञ्० । बाहुलकादुण् ॥

ईर्षा । स्त्री । अक्षमायाम् ॥

ईर्षालु । पुं । अक्षमे । ईर्षायुक्ते ॥

ईर्ष्यक । पुं । दृष्टियोन्याख्यक्लीबे ॥ दृष्ट्वान्यव्यवायमन्येषां व्यवायेय प्रवर्त्तते । ईर्ष्यक सतु विज्ञेयोदृष्टियोनिश्च सम्मृतः ॥

ईर्ष्या । स्त्री । अक्षान्तौ । परोत्कर्षासहिष्णुत्वे ॥ परोत्कर्षाऽक्षमेर्ष्यास्यादीर्ज्यान्मन्युतोपि च । ईर्ष्यणम् । ईर्ष्यईर्ष्यायाम् । गुरोश्चेत्यः ॥

ईर्ष्यालुः । त्रि । अक्षान्तिशीले । कुहने । सेर्ष्ये । ईर्ष्यांलाति । ला । मितद्र्वादित्वाड्डुः ॥

ईला । स्त्री । धरित्र्याम् । गवि ॥ वाचि । सौम्यकलत्रे ॥

ईलिः । स्त्री । ह्रस्वगदाकारेहस्तदण्डे । करपालिकायाम् । कटारी कटार इत्यादिभाषा ॥ ईर्त्ते ईर्यते वा । ईर० । इन् । कपिलकादि ॥ ईड्यते वा । ईड० । डलयोरभेद. ॥

ईलितः । त्रि । स्तुते ॥ ईड्यते स्म । ई

ईशान:

उ० । क्त: । डलयोरभेदाल्ल: ॥

ईली । स्त्री । ह्रस्वगदाकारे करवाले । करपालिकायाम् । कृदिकारादिति पाक्षिकोङीष् ॥

ईट् । पुं । परमेश्वरे ॥ ईष्टे । ईश ऐश्वर्ये । क्विप् ॥

ईश: । पुं । महादेवे । सदाशिवे ॥ ईशानकोणाधिपतौ ॥ सर्वेषामीशितरि । विशुद्धसत्त्वप्रधानमायोपाधिके परमेश्वरे । हिरण्यगर्भे । त्रि । प्रभौ । स्वामिनि ॥ एकादशस्तु ॥ ईष्टे । ईश० । इगुपधेतिक: ॥

ईशवलम । न । पाशुपतानां द्वितीये पाशे ॥ ईष्टे स्वातन्त्र्येणइति ईश: । तदीयंवलंरोधशक्तिर्द्वितीय: पाश: । तथाचोक्तम् । तासांमाहेश्वरीशक्ति:सर्वानुग्राहिकाशिवा । धर्मानुवर्त्तनादेवपाशइत्युपचर्य्यतेइति ॥

ईशसखा । पु । कुबेरे ॥ ईश:सखास्य ॥

ईशा । स्त्री । पार्वत्याम् । दुर्गायाम् ॥ ईष्टे । ईश० ॥ कात्ताष्टाप् ॥

ईशान: । पुं । शिवे । महादेवे ॥ एकादशरुद्रान्तर्गतरुद्रविशेषे ॥ शिवाष्टमूर्त्यन्तर्गतसूर्यमूर्त्तौ । शमीवृक्षे ॥ न । ज्योतिषि ॥ त्रि । ईशितरि । नियन्तरि । स्वामिनि ॥ ईष्टे तच्छील । ताच्छील्यवयोवचनशक्तिषु चानश् ॥

ईश्वर:

ईशानी । स्त्री । स्कन्दमातरि । दुर्गायाम् ॥ ईशानस्यस्त्री । पुंयोगलक्षणो ङीष् ॥ शमीवृक्षे ॥

ईशिता । स्त्री । ईशित्वे । अणिमाद्यष्टैश्वर्यान्तर्गतैश्वर्यविशेषे । प्रभुत्वे ॥ येनस्थावराअप्याज्ञाकारिणो भवन्ति ॥ ईशोऽस्यास्ति । अतइनिठनाविति इनि: । ईशिनो भाव: । तस्यभावस्त्वतलाविति तल् ॥

ईशिता । त्रि । ईश्वरे । अधिपतौ । प्रभौ । नियन्तरि । ईष्टे । ईश० । तृन तृच्चा ॥

ईशित्वम् । न । ईशितायाम् । देवानामष्टैश्वर्यान्तर्गतैश्वर्यविशेषे ॥ यभूतभौतिकानां प्रभवव्यूहव्ययानामीशिताभवति । ईशिनोभाव: ।त्व: ॥

ईश्वर: । पु । शिवे । मन्मथे । विशुद्धसत्त्वप्रधानाज्ञानोपहितचैतन्ये । ईशनादिशक्तियुक्ते जगदधिष्ठातरि ॥ हिरण्यगर्भे । विचित्रशक्तित्वात सर्वं समर्थे सर्वनियन्तरि नारायणे ॥ उक्तञ्चदेवीगीतायाम् । तन्नयाप्रकृति:प्रोक्तासाराजन् विविधामता ॥ सत्त्वात्मिकातुमायास्यादविद्यागुणमिश्रिता । स्वाश्रयं यातु संरक्षत सा मायेतिनिगद्यते ॥ तस्यां यत्प्रति

बिम्बस्याद्बिम्बभूतस्यचेशितुः । सई श्वरः समाख्यातः स्वाश्रयज्ञानवान् परः ॥ तस्यां स्वाश्रयाव्यामोहकारिण्यां शुद्धसत्त्वप्रधानायां मायायामीशितुःपरमात्मनोयत् प्रतिबिम्बंपतति तत् प्रतिबिम्बमीश्वरः । सचेश्वरः स्वाश्रयं व्यापकं ब्रह्मतज्ज्ञानवानभवति माययातदाधारब्रह्मणो नावरणात् ॥ सर्वज्ञः सर्वकर्त्ताचसर्वानुग्रहकारकः । इति ॥ देहेन्द्रियसङ्घातस्यस्वामिनिजीवे ॥ ईशनशीले । समर्थे । सर्वान्तर्यामिणि ॥ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषईश्वरः इतिपतञ्जलिः ॥ ईशाद्यमन्त्यर्थंनचमामीशतेपरः । ददामिचसदैश्वर्यमीश्वरस्तेनकीर्त्तितः ॥ प्रभवादिष्वेकादशेऽब्दे ॥ सुभिक्षंक्षेममारोग्यंकार्पासस्यमहार्घता । लवणं मधुगव्यञ्चईश्वरेदुर्लभं प्रिये ॥ त्रि । आढ्ये । स्वामिनि । ईशितुं शीलमस्येति । स्थेशभासपिसकसोवरच् इतिवरच् ॥ ईष्टे । ईश० । वरच् ॥ यद्वा । अश्नुते । अश्नुव्यासौ सङ्घातेच । अश्नोतेराशुकर्मणिवरट्चेतिवरट् । चादुपधाया ईत्त्वम् ॥

ईश्वरप्रणिधानम् । न । शौचादिपञ्चनियमेषु पञ्चमे नियमे । ईश्वरस्यमानसैरुपचारैरभ्यर्चने । सर्वकर्मणां तस्मिन् परमगुरौफलनिरपेक्षतयाऽर्पणे ॥ ईश्वरे प्रणिधानम् ॥

ईश्वरभावः । पुं । प्रजापालनार्थमीशितव्येषु प्रभुशक्तिप्रकटीकरणे ॥

ईश्वररथचरणः । पुं । कालचक्रे ॥ ईश्वररथस्यचरणः ॥

ईश्वरसेतुः । पुं । मर्यादायाम् । वर्णाश्रमादिधर्मे ॥ ईश्वरस्यसेतुरिव ॥

ईश्वरा । स्त्री । उमायाम् ॥ श्रीवाण्यादिशक्तिषु ॥ वरजन्तादीश्वरशब्दात् टाप । पुंयोगविवक्षाभावान् न ङीप् ॥

ईश्वरी । स्त्री । गौर्याम । दुर्गायाम ॥ श्रीवाण्यादिशक्तिषु ॥ अश्नुते विश्वम् । वरजन्तादीश्वरात् ङीप ॥ यद्वा । ईष्टे । ईश० । वनिप् । वनोरचेतिङीब्रौ ॥ लिङ्गिनीवृक्षे ॥ वन्ध्याकर्कोटक्याम् ॥ रुद्रजटालतायाम् ॥ नाकुलीकन्दे ॥

ईषत् । अ । अल्पे । किञ्चित् ॥ ईषणम् । ईषगत्यादौ । अतृमन्त्यय ॥

ईषत्कर । पुं । अत्यल्पे । अनुबन्धे । गन्धे । लेशे । त्रि । ईषत्क्रियमाणे वस्तुनि ॥ ईषत्क्रियते । ईषद्दुःसुष्विति भावे कर्मणिवा अकृच्छ्रार्थेषु ख

ल् प्रत्ययः ॥

ईषत्पाण्डुः । पुं । धूसरवर्णे ॥

ईषदुष्णम् । न । कवोष्णे । मन्दोष्णे ॥ त्रि । तद्वति ॥ ईषच्चतदुष्णञ्च ।

ईषद्धास्यम् । न । मन्दहास्ये । स्मिते ॥ ईषच्चतद्धास्यञ्च ॥ त्रि । तद्वति ॥

ईषद्रक्तः । पुं । अरुणे ॥ त्रि । तद्वति ॥

ईषा । स्त्री । हलयुगयोर्मध्यस्थकाष्ठे । लाङ्गलदण्डे ॥ ईषते । ईषगत्यादौ । इगुपधेतिकः । करणे गुरोश्चेत्यो वा ॥

ईषादन्तः । पुं । दीर्घदन्तगजे । उदग्र दन्ते । ईषेवदन्तावस्य ।

ईषिका । स्त्री । अक्षिकूटे । गजाक्षिगो लके । ईषालाङ्गलकीलिका सेव । इवेप्रतिकृताविति कन् । तूलिकाया म् । अस्त्रविशेषे । यथा । सोभिम न्त्र्यशरेषीका मौषिकास्त्रेणवीर्य- वान् । काकंतमभिसन्धायससर्जपु रुषर्षभः ॥ इतिरामायणम् ॥ ईष्य ते ईषतिवा । ईषगत्यादौ ईषउ- ञ्छेवा । क्वुन् ।

ईषिरः । पुं । अग्नौ । पावके ॥

ईषीका । स्त्री । इषीकायाम् । तूलि- कायाम् । ईषीकास्यादिषीकापी- ति द्विरूपकोषः । पर्फरीकादित्वा त् साधुः ।

ईष्मः । पुं । कामदेवे । वसन्तर्त्तौ । ईष ति ईषतेवा । ईषउञ्छे ईषगतिहिं सादर्शनेषु । इषियुधीन्धित्र ईषीति दीर्घादि पाठस्याप्युक्तत्वात् मक् ॥

ईहा । स्त्री । उद्यमे । चेष्टायाम् ॥ वा ञ्छायाम् ॥ ईहचेष्टायाम् । गुरो- श्चेत्यः । टाप् ॥

ईहामृगः । पुं । कृत्रिममृगे । नाटक रूपकभेदे । कोके । वृके । भेडि या इतिभाषा ॥ ईहा मृगेष्वस्य । ईहां मृगयते वा । मृगअन्वेषणे । क र्मण्यण् ॥ ईहाप्रधानो मृगोवा । शा कपार्थिवादिः ।

ईहितः । त्रि । अपेक्षिते । न । उद्योगे । चरिते ।

उः

***

उ । अ । सम्बोधने । रोषोक्तौ । अनुक म्पायाम् । नियोगे । पदपूरणे ॥ पादपूरणे । विस्मये । अवनम् । उ ङ् शब्दे । क्विप् । तुडन् ।

उः । पुं । शम्भौ । चन्द्रमौलौ । शिवे । उकारे ।

उकनाहः । पुं । पीतरक्तवर्णे तुरङ्गे ॥
उक्तः । त्रि । कथिते । भाषिते । जल्पिते । अभिहिते ॥ न । एकाक्षरायां वृत्तौ । छन्दसि ॥ उच्यतेस्म । ब्रूञ्परिभाषणे । ब्रूञोवचिर्वा । क्तः । सम्प्रसारणम् ॥
उक्तिः । स्त्री । व्याहारे । वचने ॥ वच० । क्तिन् । सम्प्रसारणम् ॥
उक्थः । पुं । यज्ञविशेषे ॥ न । प्राणे ॥ सामभक्तौ ॥ सामवेदे ॥ यज्ञायज्ञीयात्परेण यानिसामानिगीयन्ते तान्युक्थानि ॥ महाव्रताख्येक्रतौ प्रधानभूतंशस्त्रमुक्थशब्दार्थः ॥ उच्यते । वच० । पातृतुदीत्यादिनाथक् ॥
उक्थशाः । पुं । यजमाने ॥ उक्थानिउक्थैर्वा शंसति । शंसुस्तुतौ । मन्त्रेश्वेतवहोक्थशस्पुरोडाशोण्विन्निच्यन श्वेतवहादीनांडस पदस्येतिवक्तव्यम् । यत्रपदत्वंभावि तत्रडस् । उक्थशोभ्याम् । अन्यत्रणिवः । उक्थशासौ उक्थशासइत्यादिबोध्यम् ॥
उक्था । स्त्री । एकाक्षरवृत्ते ॥ साद्विविधा । श्रीः १ सर्वगुरुः । श्रीस्ते सास्ताम् ॥ उः २ सर्वलघुः । उरवतु ॥
उक्लेदः । पुं । वान्तौ ॥
उक्षः । त्रि । सिक्ते । धौते ॥
उक्षणम् । न । सेचने ॥
उक्षतरः । पुं । तृतीयवयःप्राप्तवृषे ॥ तनुत्वा । वत्सोक्षाश्वर्षभेभ्यश्चतनुत्व इतिष्टरच् । षीषि । उक्षतरी ॥
उक्षा । पु । बलीवर्दे । वृषे ॥ उक्षति उक्षसेचने । श्वन्नुक्षन्निति कनिन ॥ ऋषभौषधौ ॥ त्रि । सेक्तरि ॥
उक्षितः । त्रि । सिक्ते ॥ लिप्ते ॥
उखर्वलः । पुं । तृणविशेषे । भूरिपत्रे । सुतृणे ॥
उखलः । पुं । उखर्बले । तृणोत्तमे ॥
उखा । स्त्री । पिठरे । रन्धनस्थाल्याम् । हाँडी भरथिया भाडू इत्यादिभाषा ॥ ओखति । उखगतौ । इगुपधेतिक ॥ उखन्यतेवा । खनुअवदारणे । अन्येभ्योपीतिडः । टाप् ॥
उख्यम् । त्रि । पैठरे । उखायां पक्के मांसादौ ॥ उखायां संस्कृतम् । शूलोखाद्यत् ॥
उग्रः । पुं । महादेवे । रुद्रे ॥ वायुमूर्त्तिरयम् ॥ क्षत्रियाच्छूद्रायामूढायामुत्पन्ने । आगुरि इतिगौडभाषामसिद्धे जातिविशेषे ॥ क्षत्रियाच्छूद्रकन्यायांक्रूराचारविहारवान् । क्षत्रशूद्रवपुर्जन्तुरुग्रोनामप्रजायते ॥ क्षत्रुग्रपुक्सानान्तुविलौकोवधबन्धनमिति - मनुः । करणेनसमाचाराद्वृत्ति भौगवनिर्मिता ॥ शोभाञ्जनद्रुमे । केर

लदेशे ॥ याष्टीके ॥ न । क्रूरसंज्ञक-
नक्षत्रेषु ॥ पूर्वोत्तरद्वारगृहे ॥ वत्स
नामाख्यविषे ॥ त्रि । उत्कटे । दारु-
णकर्म्मकर्त्तरि ॥ उच्यति क्रुधासम्बध्य
ते । उचसमवाये । ऋज्रेन्द्रेत्यादि
नारक् गश्चान्तादेशः ॥

उग्रकर्म्मा । पुं । हिंस्रे ॥ उग्रंकर्मास्य ॥

उग्रकाण्डः । पुं । कारवेल्ले ॥

उग्रगन्धः । पुं । चम्पके ॥ कटफले ॥ अ-
र्जकवृक्षे ॥ लशुने ॥ न । हिङ्गुनि ॥
त्रि । उत्कटगन्धयुक्ते ॥ उग्रोगन्धो-
ऽस्य ॥

उग्रगन्धा । स्त्री । अजमोदायाम् ॥ व-
चायाम् ॥ छिक्किकौषधौ ॥ अजग-
न्धायाम् ॥ यवान्याम् ॥ उग्रोगन्धोऽ
स्याः ॥

उग्रचण्डा । स्त्री । देवीविशेषे ॥

उग्रतारा । स्त्री । देवीविशेषे ॥ उग्राद्
पिभयात् त्राति यस्माद्भक्तान् सदा-
त्विकेनिरुक्तिः ॥

उग्रत्वम् । न । उग्रतायाम् । चण्डता-
याम् ॥ उग्रस्य भावः । त्वः ॥

उग्रधन्वा । पुं । इन्द्रे । प्रचुवधायोद्यत
धनुष्के ॥ उग्रंधनुर्यस्य । धनुषश्चेति
नङ् ॥

उग्रनासिक. । त्रि । दीर्घनासाविशिष्टे ॥

उग्रशेखरा । स्त्री । भीष्ममातरि । ग
ङ्गायाम् ॥

उग्रश्रवा । पुं । रोमहर्षणसुते । सूते ॥

उग्रसेन. । पुं । आहुके । कंसजनके ॥

उग्रसेनसुतः । पुं । कंसे ॥

उग्रा । स्त्री । कनखलाधिष्ठात्र्यामम्बा
याम् ॥ वचायाम् ॥ यवान्याम् ॥ छि
क्किकौषधौ ॥ उग्रजातेर्भार्यायाम् ॥
धन्याके ॥ प्रखरायांनार्याम् ॥ टाप् ॥

उचितम् । त्रि । न्यस्ते ॥ परिमिते ॥ स
मञ्जसे । ग्राह्ये ॥ उच्यते । वचपरि-
भाषणे । वचिवचिकुचिकुटिभ्य.कि
तच् ॥ युक्ते ॥ ज्ञाते । विदिते ॥

उच्चः । त्रि । उन्नते । तुङ्गे । प्रांशौ ॥
उच्चिनोति । चिञ् ० । अन्येष्वपी
तिड. ॥ उच्चैस्त्वम् अस्ति अथवा । अ
र्श आद्यच् । अव्ययानामितिटिलोप'
॥ नारिकेरे ॥

उच्चकैः । अ । अतिशयोच्चे ॥ उच्चैः ।
अव्ययसर्वनाम्नामितिप्रागिवीयेष्वर्थे
षुटेः प्रागकच् ॥

उच्चटा । स्त्री । दम्भे ॥ चर्य्यायाम् ॥ ल
शुनप्रभेदे ॥ गुञ्जायाम् ॥ भूम्याम
लक्याम् ॥ नागरमुस्तायाम् ॥ जटि
लौषधौ । चूडालायाम् । मुस्ताविशेषे
॥ श्वेतागुञ्जोच्चटाप्रोक्तेतिभाव
प्रकाशः ॥ उच्चटति । चटगतौ । अ
न्तर्भावितण्यर्थः । अच् ॥

उच्चण्डः । त्रि । त्वरायुक्ते । अविलम्बिते । प्रचण्डे । उच्चण्डनम् । चण्डिकोपे । घञ् ॥

उच्चतरुः । पुं । नारिकेले ॥

उच्चतालम् । न । पानगोष्ठ्यां नृत्ये ॥ इति हेमचन्द्रः ॥

उच्चदेवः । पुं । श्रीकृष्णे । गोविन्दे ॥

उच्चन्द्रः । पुं । रात्रिशेषे ॥

उच्चय. । पुं । नीव्याम् । परिधानवस्त्रग्रन्थौ ॥ इति हेमचन्द्रः ॥

उच्चलम् । न । मनसि । चञ्चले । पुं । ध्वजस्योर्द्ध्वकूर्चे ॥

उच्चललाटा । स्त्री । उन्नतललाटवन्त्याम् ।

उच्चलितः । त्रि । प्रस्थिते ॥

उच्चाटनम् । न । वैरिणा एकदेशेऽनवस्थाकरणे ॥ उच्चाटनंस्वदेशादेर्भ्रंसनंपरिकीर्त्तितमितिशारदातन्त्रम् ॥

उच्चारः । पुं । उच्चारणे । विष्ठायाम् । उच्चार्यते त्यज्यते । चरगतौ । णिजन्त. । घञ् ॥

उच्चारणम् । न । कथने । शब्दप्रयोगे ।

उच्चारितः । त्रि । उदाहृते ॥ प्रकाशिते ॥

उच्चावचः । त्रि । बहुविधे । नैकभेदे ॥ उत्कृष्टापकृष्टे ॥ उदक्च अवाक्च । मयूरव्यंसकादित्वात्साधुः ॥

उच्चिकमिषा । स्त्री । उत्क्रान्तुमिच्छायाम् । उठवेकी इच्छा इतिभाषा ॥

उच्चिङ्गटः । पुं । तृणगडमत्स्ये । त्रि । कोपनपुरुषे ॥

उच्चूडः । पुं । उच्चूले । अस्योच्चूडाव्यचूडाख्यावूर्द्धाधो मुखचूडकाविति ध्वजाङ्गेषु वायुध. ॥

उच्चूलः । पुं । ध्वजस्योर्द्ध्वकूर्चे । झब्बडे कीपाघ इतिभाषा ॥

उच्चैःश्रवाः । पुं । श्वेतवर्णे समुद्रमन्थनोत्थिते इन्द्रस्यघोटके ॥

उच्चैर्घुष्टम् । न । घोषणायाम् ॥ उच्चैर्घुष्यतेस्म । घुषिर्विशब्दने । क्तः ॥

उच्चैःश्रवा. । पुं । इन्द्रस्याश्वे । अश्वानां मध्येभगवतोविभूतौ । अयंसमुद्रसमुद्भवः । यथोक्तंभागवते । गृहीतोश्वःसमुद्रस्त्वयान्नुपवलात्किलेति । उच्चैर्महानश्रवोयशोयस्य । उच्चैःश्रवसीयस्यवा । यद्वा । उच्चैःशृणोति । श्रुश्रवणे । असुन् । उच्चैःश्रवसस्तत्कुप्रणिपत्त्यसमर्पितांअत्यथतुपूर्णो दूरादित्वादृगागमोनोध्य. । आकाशस्थैर्दिवौकसैरितिधरिणोक्तिवत । त्रि । बधिरे ॥

उच्चैः । अ । अत्यर्थे । महति । उन्नते ॥ उच्चीयते । चिञ् । उदिचेर्डैसिः ॥

उच्छन्नम् । त्रि । नष्टे ॥

उच्छलत् । त्रि । उत्पतति ॥

उच्छशित: । त्रि । उल्लङ्घिते ॥ शशप्लुतगताविच्छस्मात् । क्त ॥

उच्छादनम् । न । उत्सादने । उद्वर्त्तने । गन्धद्रव्यद्वाराशरीरनिर्मलीकरणे ॥

उच्छास्त्रम् । त्रि । शास्त्रमतिषिद्धे ॥ शास्त्रविरुद्धे ॥ उद्गतं शास्त्रात् ॥

उच्छिख: । त्रि । उद्गतज्वाले ॥

उच्छित्ति: । स्त्री । उच्छेदे ॥ उच्छेदनम् । क्तिन् ॥

उच्छिन्न: । त्रि । नष्टे ॥ उच्छेदिते ॥ उच्छिद्यतेस्म । छिदिर्द्वैधीकरणे । क्त: ॥

उच्छिलीन्ध्रम् । न । छत्राके । छत्रिकायाम् ॥

उच्छिष्ट: । त्रि । भुक्तावशेषे । जूंठ जूंठन जूंठा इतिभाषा ॥ त्यक्ते ॥

उच्छिष्टभोजनम् । त्रि । देवनैवेद्यबलिभोजनकर्त्तरि ॥ इति हेमचन्द्र: ॥

उच्छिष्टमोदनम् । न । सिक्थके । मैणा सिल्या इतिभाषा ॥

उच्छीर्षकम् । न । शिर:प्रदेशे ॥ उपधाने । सिराहना इतिभाषा ॥

उच्छून: । त्रि । स्फीते । उन्नते । वर्द्धिते ॥ अनोदाहरन्ति प्राचीना: । कामिन्या:कियदुच्छूनमुर: प्रेयानसमीचते । नवंशालिमिवोत्पन्नमतिदीन:कृषीवलइति ॥ उत्श्वीयतेस्म । टुओश्विगतिवृद्ध्यो: । क्त: । ओदितश्चेतितस्यन: । यजादित्वात्सम्प्रसारणे पूर्वरूपेचहल इतिदीर्घ: ॥

उच्छूनता । स्त्री । जृम्भणे ॥ भावेतल् ॥

उच्छृङ्खल: । त्रि । अबाधे । बन्धनरहिते । अनियन्त्रितवस्तुनि । निरर्गले ॥ उद्गतंशृङ्खलंनिगडंयस्य ॥

उच्छेद: । पुं । विनाशे ॥

उच्छेदी । त्रि । विनाशिनि ॥

उच्छेषणम् । न । उच्छिष्टे ॥

उच्छोषण: । त्रि । सन्तापकरे ॥

उच्छ्रय: । पुं । द्रुमादीनामुन्नतायाम् । उत्सेधे ॥ उच्छ्रयणम् । श्रिञ् सेवायाम् । वाहुलकादेरच् ॥

उच्छ्राय: । पुं । उच्छ्रये ॥ उच्छ्रयणम् । श्रिञ् । उद्श्रयतिवेतीति घञ् ॥ उत्कृष्ट: आयोवा ॥

उच्छ्रित: । त्रि । सञ्जाते ॥ समुन्नद्धे ॥ उन्नते ॥ प्रवृद्धे ॥ उच्छ्रयति उच्छ्रीयतेस्मवा । श्रिञोगत्यर्थेतिकर्मणिवा क्त: ॥

उच्छ्रित्य । अ । सन्तव्येत्यर्थे ॥ निखन्येत्यर्थे ॥

उच्छ्वसित: । त्रि । प्रफुल्ले । विकसिते ॥ जीविते ॥ स्फुरणे । फरकना इति

भाषा। उतश्वसिति। श्वस० क्तः।

उच्छासः। पुं। अन्तर्मुखश्वासे। आश्वरे। प्राणने॥ आख्यायिकापरिच्छेदे। औश्वासे॥ उच्छसनम्। श्वसप्राणने। घञ्॥

उज्जयनी। स्त्री। विशालायांपुरि। अवन्त्याम्॥

उज्जयन्तः। पुं। रैवतपर्वते।

उज्जयिनी। स्त्री। महाकालपुर्य्याम्। अवन्तिकायाम्॥

उज्जासनम्। न। वधे। मारणे॥ जसुहिंसायाम्। स्वार्थण्यन्त। भावे ल्युट्॥

उज्जृम्भः। त्रि। प्रफुल्ले। प्रस्फुटिते॥ इतिहेमचन्द्र॥ उज्जृम्भणम्। जृम्भि०। घञ॥

उज्जृम्भणम्। न। उज्जृम्भे॥

उज्जृम्भितः। त्रि। प्रफुल्ले। न। चेष्टायाम्॥ उज्जृम्भःसञ्जातोऽस्य। तारकादित्वादितच्॥

उज्ज्वलः। पुं। शृङ्गाररसे॥ न। स्वर्णे। त्रि। दीप्ते॥ विशदे॥ विकाशिनि॥ उद्वेज्ज्वलतिप्रकाशते। ज्वलदीप्तौ। अच्। नतुज्वलितीतिणः। तत्राऽनुपसर्गादित्यनुवृत्तेः।

उज्झकः। पुं। त्यागे। विसर्ज्जने।

उज्झितः। त्रि। उत्सृष्टे। त्यक्ते। वर्जिते।

उञ्। अ। सतर्के। सम्बोधने। पूरणे॥

उञ्छः। पुं। उञ्छशिले। ऋते। धान्यकणोच्चये। कणशआदाने॥ अबाधितस्थानेषु पथिवा क्षेत्रेषुवा अप्रतिहताबकाशेषु यत्रयत्रौषधयो विद्यन्ते तत्रतत्राङ्गुलीभ्यामेकैककणं समुद्धयित्वेतिबौधायनस्मृतेर्दर्शनात् एकैकधान्यगुडकोच्चयनमुञ्छ। उञ्छनम्। उञ्छिउञ्छे। घञ्।

उञ्छनम्। न। आपणादिपतितकणोपादाने। ओंछनाइतिभाषा। ल्युट्।

उञ्छशिलम्। न। आत्तशस्यात् क्षेत्रात् कणस्यसञ्चये। ऋतद्वन्द्वे॥ उञ्छश्च शिलञ्चयेकवद्भावः।

उञ्छशील। त्रि। उञ्छजीविनि। उद्धृतशस्यक्षेत्रशेषाहरणकर्त्तरि।

उटः। पुं। तृणपर्णादौ।

उटज। पुं। न। मुनीनांतृणपर्णादिरचितालये। पर्णशालायाम्। उटाज्जायते। जनी०। अन्यत्रापीतिडः।

उडु। न। भे। तारकायाम्। जले। उ रोषोक्तिपूर्वकं डयते। डीङ् वि०। मितद्र्वादित्वात् डु प्रत्ययः।

उडु। स्त्री। नक्षत्रे। ऋक्षे। अवतिइति उः। डयते डुः। डीङो मितद्र्वादित्वात्डुः। उश्चासौडुश्चेतिविग्रहः। उडुः उडू। उडवः इत्यादि

धेनुवत् ॥

उडुपः । पुं । न । प्लवे । कोले । भेले ॥ चर्मावनद्धे यानपात्रे ॥ पुं । चन्द्रे ॥ उडुनोदकेन पाति । पारत्राणे । सुपिस्थ इत्यत्र सुपीति योगविभागात् कः । उडुनि जले पातीति वा ॥

उडुपतिः । पुं । चन्द्रे ॥ उडूनाम्पतिः ॥

उडुपथः । पुं । आकाशे ॥

उडुराट् । पुं । चन्द्रे ॥ उडुषु नक्षत्रेषु राजते । राज्° । क्विप् ॥

उडूपः । पुं । न । उडुपे ॥ पुं । चमन्द्रसि ।

उड्डयनम् । न । नभोगतौ । उडान इतिभाषा ॥

उड्डामरः । त्रि । श्रेष्ठे । उद्भटे ॥ पुं । तन्त्रविशेषे ॥

उड्डीनम् । न । खगानामूर्द्ध्वगतौ ॥ ऊर्द्ध्वडयनम् । डीङ्° । नपुंसके भावे क्तः । स्वादयओदित इत्योदित्वान्निष्ठानत्वम् ॥

उड्डीयमानः । त्रि । उड्डयनविशिष्टे खगे ॥ उडन्त उडता इतिभाषा ॥

उड्डीशः । पुं । आगमशास्त्रविशेषे ॥ चण्डीशे । शिवे ॥

उत् । अ । प्रश्ने ॥ वितर्के ॥ संशये ॥ आश्चर्ये । भृशे । ऊर्द्ध्वे ॥ अप्यर्थे ॥

उत । अ । अप्यर्थे । विकल्पे ॥ समुच्चये । वितर्के ॥ प्रश्ने । पदपूरणे ॥ अप्यर्थे ॥ स्वार्थे ॥ ऊयते स्म । उङ् शब्दे । क्तः ॥

उत । त्रि । स्यूते । बुना इतिभाषा ॥ ऊयते स्म । वेञ्° । क्त । यजादित्वात्सम्प्रसारणम् ॥

उतथ्यः । पुं । गौतमपितरि मुनिविशेषे ॥ अङ्गिरसः श्रद्धायामुत्पन्ने वृहस्पतेर्ज्येष्ठभ्रातरि ॥

उतथ्यतनयः । पुं । गौतममुनौ ॥

उतथ्यानुज. । पुं । देवाचार्ये । वृहस्पतौ ॥

उतथ्यानुजन्मा । पु । वृहस्पतौ । जीवे ॥

उताहो । अ । परिप्रश्ने ॥ विचारे ॥ विकल्पे ॥ उतच आहोच अनयोः समाहारः ॥

उत्क. । त्रि । अन्यमनस्के । उन्मनसि ॥ उद्गतंमनो ऽस्य । उत्क उन्मना इतिउद्गतमनस्कार्थकोत् शब्दात् स्वार्थे कन् ॥

उत्कटः । पुं । मत्तेभे ॥ इक्षौ ॥ शरे ॥ न । त्वक्पत्रे । गुडत्वचि । तजाख्यौषधौ । दारचीनी इतिभाषा ॥ अन्यत उत्कटसुगन्धित्वात्स्वार्थे उच्छब्दात् कटच् ॥ त्रि । तीव्रे ॥ मत्ते । विषमे ॥ उद्गतःकटआवरणम् आवरकोवाऽस्य ॥ यद्वा । उद्गतमदृष्टेत्यच्छब्दात्स्वार्थे सम्प्रोदश्चेतिक-

टके ॥

उत्कटैकासन: । त्रि । विषमासने ॥

उत्कण्ठा । स्त्री । सैंहलीलतायाम् ॥

उत्कण्ठः । पुं । शृङ्गारस्य षोडशबन्धान्तर्गतबन्धविशेषे । आसनइति यस्य प्रसिद्धिः । तल्लक्षणम् । नारीपादौ चहस्तेनधारयेन्नलके पुन. । स्तनार्पितकर:कामी बन्धश्चोत्कण्ठसञ्ज्ञः इति ॥

उत्कण्ठा । स्त्री । उत्कलिकायाम् । इष्टलाभे कालक्षेपासहिष्णुतायाम् ॥ उत्कण्ठनम् । कठिशोके । गुरोश्चह लश्च्यः ॥ आकाङ्क्षायाम् ॥

उत्कण्ठितः । त्रि । उत्सुके । उत्कण्ठायुक्ते ॥ उत्कण्ठासञ्जातास्य । तारकादित्वादितच् ॥

उत्कण्ठिता । स्त्री । स्वीयादिनायिकाभेदे ॥

उत्कता । स्त्री । गजपिप्पल्याम् । उत्कण्ठायाम् ॥

उत्कर: । पु । धान्यादिराशौ । स्तूपे । अवकरे । हस्तपादादिविक्षेपे । उत्कीर्यते । क्वविशेषे । ऋदोरप् ॥

उत्कर्षः । पुं । अतिशये । स्वकालात् परकालकर्त्तव्ये । इतिस्मृतिः । अविद्यमानधर्मारोपे । उत्कर्षणम् । कृषवि० । घञ् । त्रि । अतिशययुक्ते ॥

उत्कल: । पुं । ओड्रदेशे । उडीसाइतिभा० । यथा । जगन्नाथप्रान्तदेशमोत्कलः परिकीर्त्तितइति । व्याधे । त्रि । भारवाहके । मोटिया इति भाषा ॥

उत्कलिका । स्त्री । उत्कण्ठायाम् । इष्टप्राप्तौकालक्षेपासहिष्णुत्वे । कामादिजातस्मृतौ ॥ कलिकायाम् ॥ हेलायाम् । सलिलतरङ्गे ॥ उत्पूर्वात्कले. कृञादिभ्योवुन् । कुन्वा ॥

उत्कलिकाप्रायम् । न । गद्यप्रभेदे । यथा । भवेदुत्कलिकाप्राय समौसाढ्यं दृढाक्षरमिति यथा । प्रणिपातप्रवणसमधानाशेषसुरासुरादिवृन्दसौन्दर्यप्रकटकिरीटकोटिनिविष्टस्पष्टमणिमयूखच्छटाच्छुरितचरणनखचक्रविक्रमोद्दामवामपादाङ्गुष्ठनखशिखरखण्डितब्रह्माण्डविवरनिस्सरच्छरदमृतकरप्रकरभास्वरसुरवाहिनीप्रवाहपवित्रीकृतपिष्टपत्रितयकैटभारे क्रूरतरसंसारसागरनानाप्रकारावर्त्तविवर्त्तमानविग्रहं मामनुगृहाणेति ॥

उत्कलितः । त्रि । उन्मनसि । वृद्धिमति ॥

उत्कषितः । त्रि । उद्दृष्टे ॥

उत्का । स्त्री । उत्कण्ठितायां नायिकायाम् ॥

उत्कारः । पुं । धान्यस्योर्द्धक्षेपणे । निकारे । धान्यस्यराशीकरणे । उत्कर

णम्। क्षविक्षेपे। क्षधान्ये इतिघञ्॥

उत्कारा। स्त्री। प्रतिवर्षमक्षतायाभुवि॥

उत्कासिका। स्त्री। वमनव्याधौ॥

उत्किर। त्रि। निःक्षेपकर्त्तरि। उत्किरतिविक्षिपति। क्ष०। इगुपधेतिक॥

उत्कीर्ण। त्रि। उल्लिखिते। कृतवेधने। उत्कीर्य्यतेस्म। क्ष०। क्तः। नत्वम्॥

उत्कुटम्। न। उत्तानशयने॥

उत्कुणः। पुं। उद्दंशे। मत्कुणे॥

उत्कूट। पुं। छत्रे॥ इतिहारावली॥

उत्कृतिः। स्त्री। षड्विंशत्यक्षरायांछन्दौ॥

उत्कृष्टः। त्रि। प्रशस्ते। उत्तमे। अतिशययुक्ते। उत्कर्षविशिष्टे। उत्कृष्यतेऽयम्। कृषेः कर्मणिक्तः॥

उत्कोचः। पुं। स्त्री। उपदायाम्। ढौकने॥

उत्कोचकः। त्रि। कार्थिभ्योर्थंगृहीत्वा अयुक्तंकार्यंकुर्वाणे॥

उत्क्रमः। पुं। व्यतिक्रमे। व्युत्क्रमे॥

उत्क्रमणम्। न। उत्क्रान्तौ॥

उत्क्रान्तः। त्रि। निर्गते॥

उत्क्रान्तिः। स्त्री। उत्क्रमणे॥

उत्क्रोशः। पुं। स्त्री। पक्षिविशेषे। कुररे॥ उत्क्रोशति। क्रुशआह्वाने। पचाद्यच्॥

उत्क्लेदः। पुं। वमनोपस्थिताविवेच्छार्थे। उकलाइ इति यस्यप्रसिद्धिः॥

उत्क्लेशः। पुं। पीडायाम्। वमनायोपस्थितौ। उकलाइ इतिभाषा। यथा। कफोत्क्लेशः। कफस्य वमनायोपस्थितिः॥ उक्तञ्च। उत्क्लिश्यान्नंन निर्गच्छेत्प्रसेकष्ठीवनेरितम्। हृदयंपीड्यतेचास्यतमुत्क्लेशंविनिर्दिशेदिति॥ उत्क्लेशवृत्त्येकें॥

उत्क्षिप्तः। पुं। धत्तूरफले॥ त्रि। ऊर्द्धक्षिप्ते॥

उत्क्षिप्तिका। स्त्री। कर्णाभरणविशेषे। ललाम्याम्। कर्णान्दौ। कानतडका इतिभाषा॥

उत्क्षेपः। पुं। ऊर्द्धक्षेपणे। उछालना इतिभाषा॥

उत्क्षेपकः। त्रि। उत्क्षेपकर्त्तरि॥

उत्क्षेपणम्। न। व्यजने। धान्यमर्द्दनवस्तुनि। षोडशपणे। उदञ्चने। ऊर्द्धदेशसंयोगहेतौ। ऊर्द्धक्षेपे। अधःस्थितस्यवस्तुनऊर्द्धंनयने। उत् ऊर्द्धंक्षेपणम्॥

उत्खला। स्त्री। मुरानामगन्धद्रव्ये। तां...पर्य्यांम्॥

उत्खात। त्रि। उन्मूलिते। उखाडा इतिभाषा॥

उत्खातकेलिः। स्त्री। वप्रक्रीडायाम्॥

यथा। उत्खातकेलिःशृङ्गाद्यैर्वप्रक्रीडानिघते इतिशब्दार्णवः॥

उत्तः। त्रि। आर्द्रवस्तुनि। क्लिन्ने। भीजा इतिभाषा॥ उनत्तिस्म। उन्दीक्लेदने। अकर्मकत्वात्कर्त्तरिक्त. । नुदविदेति पक्षेनत्वाभावः॥

उत्तंसः। पुं। कर्णपूरे। कर्णाभरणे॥ शेखरे। शिरोभूषणे॥ उत्तंसयति उत्तंस्यतेनेनवा। तसि. अलङ्कारे भूषार्थः। पचाद्यच्। हलश्चेति घञ्वा॥

उत्तप्तः। त्रि। सन्तप्ते॥ परिप्लुते॥ न। शुष्कमांसे॥ उत्ताप्यतेस्म। तप०। क्तः॥ उज्ज्वले॥

उत्तब्धः। त्रि। उत्तम्भिते॥ उत् ऊर्ध्व. ॥

उत्तभितम्। त्रि। उन्नमिते॥

उत्तमः। त्रि॥ उत्कृष्टे। अनुत्तमे। वरेण्ये॥ पुं। प्रियव्रतराज्ञः पुत्रे तृतीयमनौ॥ वैशिकाख्यनायके॥ अतिशयेनउत्कृष्टः। उत्कृष्टार्थवृत्ते रुच्छब्दात्तमप्। द्रव्यप्रकर्षार्थत्वान्नाम्॥ यद्वा। उत्ताम्यति। तमु। अच्॥ उत्तम्यतेवा। घञ्। नोदात्तोपदेशस्येतिनवृद्धिः॥

उत्तमःश्लोकः। त्रि। पुण्ययशसि। श्रीहरौ॥ उद्गच्छतितमोयस्मात्सउत्तमाः। उत्तमाःश्लोकायशोयस्य॥

उत्तमफलिनी। स्त्री। दुग्धिकावृक्षे॥

उत्तमर्णः। पुं। ऋणदे। ऋणस्यदातरि। धनस्वामिनि। महाजन इति भाषा॥ उत्तममृणमस्य। ऋणमाधमर्ण्ये इतिसूत्रे आधमर्ण्यशब्देनव्यवहारविशेषो लक्ष्यते। तेनोत्तमर्णोपिसिध्यति। लक्षणायान्तु धारेरुत्तमर्णइतिनिर्द्देशोलिङ्गम्। देवर्षिपितृणे॥

उत्तमश्लोकः। त्रि। पुण्ययशसि॥

उत्तमसङ्ग्रहः। पुं। सम्यक्सङ्ग्रहणे। निर्जने परभार्ययासह केशाकेशिपरस्परालिङ्गनसहासनादिरूपमिथुनीभावे। इतिमिताक्षरा॥

उत्तमसाहसः। पुं। दण्डविशेषे। साशीतिपणसाहस्रे॥ साशीतिपणसाहस्रो दण्डउत्तमसाहसः। इति याज्ञवल्क्योक्तेः॥ सहस्रपणमिते॥ यथाह मनुः। पणानांद्वेशतेसार्द्धे प्रथमःसाहसःस्मृतः। मध्यमः पञ्चविज्ञेयः सहस्रंत्वेवचोत्तम इति॥

उत्तमा। स्त्री। उत्कृष्टायां नार्य्याम्। वरारोहायाम्॥ दुग्धिकौषधौ॥ स्वीयादिनायिकाप्रभेदे। अहितकारिण्यपिप्रिये हितकारिण्याम्॥ टाप्॥

उत्तमाङ्गम्। न। मस्तके॥ उत्तमञ्च तदङ्गञ्च। सन्महदितिसमासः॥

उत्तमाम्भ । न । नवविधासु तुष्टिषु तुष्टिविशेषे ॥ नानुपहत्य भूतानि विषयोपभोगो भवतीति हिंसादोषदर्शनाद्विषयोपरमे सति या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते ॥

उत्तमारणी । स्त्री । इन्दीवर्य्याम् ॥

उत्तम्भः । पुं । स्वत.फलतो वा तथाऽनर्थानुबन्धित्वशङ्कायाःप्रवृत्तिप्रतिबन्धिकाया विगमे ॥

उत्तम्भनम् । न । वर्द्धने ॥ उत्तम्भनम् । उद् स्थास्तम्भोः पूर्वस्य ॥

उत्तम्भितः । त्रि । विधृते ॥ उत्तम्भित. ।

उत्तरम् । न । प्रतिवाक्ये । बदल इति भाषाप्रसिद्धे प्रश्नस्य भञ्जने ॥ प्रश्नश्चोद्यधियापृच्छा तस्य भञ्जनमुत्तरम ॥ उत्तीर्यते निस्तीर्यते प्रकृताभियोगोऽनेन । तत्स्वरूपम । पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् । अव्याख्यागम्यमित्येवमुत्तर तद्विदो विदुरिति ॥ तस्य भेदाः। मिथ्यासम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा । प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः॥ इति नारदः ॥ कात्यायनेनापि व्यवहारविषये चतुर्विधमुत्तरमुक्तम् । सत्यं मिथ्योत्तरञ्चैव प्रत्यवस्कन्दनं तथा । पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधमिति ॥ सिद्धान्तानुकूलतर्कोपन्यासे ॥ उत्तरणम् । रुद्रे रप् ॥ पुं । सदाशिवे ॥ हरौ ॥ संसारसागरादुत्तारयतीति व्युत्पत्तेः ॥ विराटराजसुते ॥ त्रि । ऊर्द्ध्वे ॥ उदीच्ये ॥ प्रवरे । श्रेष्ठे ॥ अनन्तरे ॥ दिव्ये ॥ वामभागे ॥ उत्तरति । तॄप्लवनतरणयोः । पचाद्यच् ॥ यद्वा । अतिशयेनोद्गतः । तरप् । द्रव्यम ... स्वान्नमुः ॥

उत्तरकालः । पुं । भविष्यत्काले ॥ गौणकाले ॥ यथा । एव मागामिया गीयमुख्यकालादधस्तनः । न्दकालादुत्तरो गौणःकालःपूर्वस्यकर्मणा इति हरिहरपद्धतिः ॥

उत्तरकुरु. । पुं । जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषे ॥ रम्यकस्योत्तरं वर्षं तस्यैवान्तर्हिरण्मयम् । उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥ उत्तरं मेरोः ॥

उत्तरकोशला । स्त्री । अयोध्यायाम । रामपुरि । साकेते । अवधपुरी इतिभाषा ।

उत्तरक्रिया । स्त्री । अन्तिमक्रियायाम् । सांवत्सरिकश्राद्धादिपित्र्यक्रियायाम् ॥ यथा । प्रेतेपितृत्वमापन्ने सपिण्डीकरणादनु । क्रियन्ते या. क्रि

उत्तर

याःपित्र्याःप्रोच्यन्तेताश्चप्रोत्तरा इति विष्णुपुराणम् ॥

उत्तरक्रम । न । द्वारोर्द्धवक्रादारुणि । त्रि । उत्तरतरके ॥

उत्तरच्छदः । पुं । शय्याया उपर्यास्तरणवस्त्रे । निचोले ॥

उत्तरणम् । न । नद्यादिपारगमने । उतरणा इतिभाषा ॥

उत्तरतः । अ । उत्तरादित्यर्थे । दिग्देशेकालेषवाच्ये । इत्यिणोत्तराश्चागतसुच् स्वार्थे । उत्तरतोवसत्यागतोरमणीयंवा ॥

उत्तरपक्षः । पुं । विचारसिद्धान्ते । समाधाने । कृतान्ते । समाधौ । सिद्धान्तानुकूलतर्कोपन्यासे ॥ उत्तरस्यापक्षस्य ॥

उत्तरपादः । पुं । चतुष्पाद्व्यवहारान्तर्गतद्वितीयपादे । उत्तरे ॥

उत्तरपूर्वा । स्त्री । ईशानकोणे । उत्तरस्याः पूर्वस्याश्चदिशोरन्तरालम् । दिङ्नामान्यन्तराल इतिसमास. ।

उत्तरफल्गुनी । स्त्री । द्वादशेनक्षत्रे ॥ अस्याःस्वरूपम् दक्षिणोत्तरमिलिततारकाद्वयम् ॥ पर्यङ्करूपंतारकाद्वयञ्च । अस्यांजातस्यफलम् दाता दयालु स्वजने सुशीलो । विशालकीर्त्तिः सुमतिः प्रधानः । धीरोऽमरो

उत्तर

ऽत्यन्तमृदुस्वभाव श्चेदुत्तराफल्गुनिकाप्रसूतिरिति ॥

उत्तरफाल्गुनी । स्त्री । अर्यमदैवतायाम् । उत्तरफल्गुन्याम् ॥

उत्तरभाद्रपत् । स्त्री । उत्तरभाद्रपदायाम् ॥

उत्तरभाद्रपदा । स्त्री । अहिर्बुध्न्यदेवतायाम् । प्रौष्ठपदायाम् ॥ अस्याःरूपम् । उत्तरेसुमुखि भारमूर्त्तिभृत्युग्मकमिलितेद्वितारके । मीनधामरक्षेन्द्रयुग्मतोलोचनाचलकलाः प्रकाशिताइति कालिदासः । पर्यङ्करूपम् द्वितारात्मकमितिदीपिका ॥ अत्रजातस्यफलम् । धनीकुलीनःकुशलःक्रियावान्भूपालमान्योबलवान्महौजाः । सत्कर्मकर्त्तानिजबन्धुभक्तोयदुत्तराभाद्रपदाप्रसूतः इति ॥

उत्तरमीमांसा । स्त्री । ब्रह्ममीमांसायाम् ॥

उत्तरवादी । त्रि । उत्तरस्यवक्तरि । आसामी इतिभाषा ॥

उत्तरसाक्षी । त्रि । स्वपक्षसम्बन्धिसाक्ष्येपरिभाषतां साक्षिणां यः स्वयंश्रुतोर्त्थिनाऽऽख्यातेषां सङ्गरार्थः । तथाच न रदः । साक्षिणामपिय साक्ष्यंस्वपक्षंपरिभाषताम् । अवणाच्छ्रावणाद्वापिससाक्ष्युत्तरसंज्ञकइति

॥ परसाची इतिगौड भाषा ॥

उत्तरसाधकः । पुं । साधकसहाये । सहकारिणि ॥

उत्तरा । अ । उत्तराहि अर्थे ॥ उत्तराह्वेति पचेप्याच् ॥

उत्तरा । स्त्री । उदीच्यान्दिशि । कौवेर्य्याम् ॥ उत्तरफाल्गुन्याम् ॥ परीचिन्मातरि । वैराट्याम् ॥ उत् ऊर्द्ध तरत्यत्र । तृ० । ऋदोरप् ॥

उत्तरात् । अ । दिशि ॥ देशे ॥ काले ॥ उत्तरात् वसति आगतो रमणीयंवा । उत्तराधरदक्षिणादातिरिति स्वार्थे आतिः ॥

उत्तराधिकारी । त्रि । प्रथमाधिकारिणः पश्चादधिकारिणि । दायादे । अंसी इति भाषा ॥

उत्तरापथजन्मा । पु । जातिविशेषे ॥ यथा । उत्तरापथजन्मान'कीर्त्तयिष्यामितानपि । यौनकाम्बोजगान्धाराः किराताबर्बरैःसह ॥ एतेपापकृतस्तातचरन्तिपृथिवीमिमामिति ॥

उत्तरापोशानम् । न । हस्तावसेचने ॥

उत्तराभासः । पुं । दुष्टोत्तरे ॥ तथाच कात्यायनः । प्रकृतेनत्त्वसम्बन्धमल्पमतिभूरिच । पचैकदेशव्याप्येव तच्चनैवोत्तरं भवेदिति ॥

उत्तरायणम् । न । माघादिषण्मासात्मकेसूर्य्यस्योत्तरदिग्गमनकाले । देवानामहनि ॥ माघादिमासयुग्मैस्तु ऋतवःषट्क्रमादितः । उत्तरायणमाद्यैस्तैस्त्रिभिःस्याद्दक्षिणायनमित्युक्तेः ॥ मकरसङ्क्रान्तौ ॥

उत्तराशापतिः । पुं । कुवेरे ॥

उत्तराषाढा । स्त्री । एकविंशतितमे नक्षत्रे । वैश्वदेवे ॥ अस्यारूपम । शूर्पाकृतिताराचतुष्टयात्मकमिति कालिदासः । गजदन्तवदष्टताराम यमितिदीपिकाटीका ॥ तत्रजातस्यफलम् । दाताद्यावान्विजयी विनीतःसत्कर्मचेताविभवैः समेतः । कान्तासुतावाप्तसुखोनितान्तंवैश्वे सुवेशःपुरुषोमनीषीति ॥

उत्तरासङ्गः । पुं । प्रावारे । उत्तरीयांशुके ॥ उत्तरेऊर्द्ध्वभागे आसज्यते । पञ्जसङ्गे । घञ् ॥

उत्तराहि । अ । उत्तरादर्थे ॥ अस्तातेर्विषये उत्तराच्चेत्याहिप्रत्ययः दूरे चेदवधिमान् । उत्तराहि वसति रमणीयंवा ॥

उत्तरीयम् । न । संव्याने । उत्तरासङ्गे । उपवीतवद्धृतवस्त्रे ॥ उत्तरेऽस्मिन् देहभागे भवम् । गहादित्वाच्छ. ॥ यथायज्ञोपवीतं हिधार्यतेचद्विजोत्तमैः । तथासन्धार्यतेयत्नादुत्तराच्छ

दनंशुभमितिस्मृति:॥ एकश्चेद्वासोभ
वति तस्योत्तरार्द्धेन प्रच्छादयतीति
पारस्कर. ॥ नस्यात्कर्मणिकञ्चुकी ॥
उत्तरेण । अ । उत्तरदिग्देशकालेषु ॥
एनबन्यतरस्यामदूरेऽपञ्चम्या इति
स्वार्थे एनप् अदूरेचेदवधिमानवधे
र्वर्त्तते । उत्तरेण वसति रमणीयंवा॥
उत्तरेद्युः । अ । आगामिदिने ॥ उत्त
रस्मिन्नहनि इत्यर्थेसद्य पदादितिउ
त्तरशब्दादेद्युस् प्रत्ययोनिपाति-
त: ॥
उत्तलित । त्रि । उतक्षिप्ते ॥
उत्तस्थू: । त्रि । उत्थिते ॥
उत्तान: । त्रि । अगभीरे ॥ ऊर्द्धमुखश
ते ॥ उद्गतस्तानोविस्तारोस्मात् ॥
उत्तानक: । पुं । उच्चटायाम् ॥
उत्तानपत्रक. । पुं । रक्तैरण्डे ॥
उत्तानपाद: । पुं । स्वायम्भुवमनो:पुत्रे
न्टपतिविशेषे ॥
उत्तानपादज: । पुं । उत्तानपादस्यपुत्रे ।
ज्योतीरथे । ग्रहाधारे । ध्रुवे ॥
उत्तानशय: । त्रि । अतिशिशौ । डिम्भे
। स्तनपे ॥ उत्तान:शेते । शीङ्स्व
प्ने । पार्श्वादिषूपसंख्यानमित्यच् ॥
उत्तानशया । स्त्री । स्तनन्धय्याम् ॥ टा
प् ॥
उत्ताप: । पुं । उष्णतायाम् । तेजसि ।
सन्तापे ॥ उत्तापयति । तपेर्ण्यन्तात्
पचाद्यच् ॥
उत्तार: । त्रि । बहिर्निर्गतनेत्रे ॥ मह
ति । उद्भटे । उदारे ॥
उत्तारी । त्रि । चपले ॥ इतिभूरिप्रयो
ग: ॥
उत्ताल. । त्रि । उत्कटे ॥ श्रेष्ठे ॥ विकरा
ले ॥ प्लवङ्गमे ॥ त्वरिते ॥ उन्नते ॥
उत्तिष्ठद्धोम: । पुं । वषट्कारप्रयोगा
न्ते॥ याज्यापुरोनुवाक्यान्ते ॥
उत्तिष्ठमान. । त्रि । वर्द्धमाने ॥
उत्तीर्ण । त्रि । मुक्ते । पारगते ॥
उत्तुङ्ग: । त्रि । उच्चे । उन्नते ॥
उत्तुण्डित. । त्रि । अनिर्गतशल्येव्रणे ॥
उत्तुष: । पुं । भृष्टधान्ये । खाजिके । ला
जासु । खील इतिभाषा ॥
उत्तेजना । स्त्री । प्रेरणायाम् । व्यग्रकर
णे ॥
उत्तेजितम । न । अश्वचतुर्थगतौ । रे
चिते ॥ उत्तेजितंमध्यवेगंयोजनंश्च
थवल्गयेत्युक्त: ॥ त्रि । प्रेरिते ॥
उत्तेरितम् । न । अश्वपञ्चमगतौ । आ
स्कन्दिते । उपकण्ठे ॥ उत्तेरितोति
वेगान्धोनशृणोतिनपश्यति ॥
उत्तोलनम् । न । ऊर्द्धनयने । उठावना
इतिभाषा ॥
उत्तोलित: । त्रि । उदस्ते ॥

उत्त्यक्तः । त्रि । ऊर्द्ध्वक्षिप्ते । परित्यक्ते ॥

उत्त्रासः । पुं । भये ॥

उत्थानम् । न । उद्यमे ॥ तन्त्रे ॥ पौरुषे ॥ पुस्तके ॥ रणे ॥ प्राङ्गणे ॥ उद्गमे ॥ हर्षे ॥ मलरोगे । मलोत्सर्गे ॥ वास्तवन्ते ॥ चैत्ये ॥ सन्निविष्टोद्गमे ॥ उत्थीयतेऽत्र । ष्ठागतिनिवृत्तौ । अधिकरणे भावे वा ल्युट् ॥

उत्थानैकादशी । स्त्री । कार्त्तिकशुक्लैकादश्याम् ॥

उत्थापनम् । न । उत्तोलने ॥

उत्थितः । त्रि । उत्पन्ने ॥ प्रोद्यते ॥ वृद्धिमति ॥ उत्तिष्ठतिस्म । ष्ठा० गत्यर्थेति क्त' ॥

उत्थिताङ्गुलि. । पुं । चपेटे । विस्तृताङ्गुलिकरतले । चपेटा थाप इतिभाषा ॥

उत्पत. । पुं । खगे । पक्षिणि ॥

उत्पतनम् । न । उत्पत्तौ ॥ ऊर्द्ध्वगमने ॥ कूर्दने ॥

उत्पतितः । त्रि । उद्गते । उत्पन्ने ॥ उच्छ्रिते ॥

उत्पतिता । त्रि । ऊर्द्ध्वगमनशीले । उत्पतिष्णौ ॥ उत्पतति तच्छील' । पतलृगतौ । तृन् ॥

उत्पतिष्णुः । त्रि सम्भूते । उत्पतिता-रि । ऊर्द्ध्वपतनशीले ॥ उत्पतति । पतलृगतौ । अलङ्कृञितीष्णुच् ।

उत्पत्तिः । स्त्री । देहसम्बन्धे ॥ जन्मनि ॥ आविर्भावे ॥ सत्कार्य्यवादेहि सृत्पिण्डेविद्यमानस्य घटस्याविर्भावएवोत्पत्तिर्यथा तथैवकारणात्मना विद्यमानानां तत्त्वानामाविर्भावएवोत्पत्तिर्विवक्षिता ॥ उत्पद्नम् । पद्गतौ । क्तिन् ॥

उत्पत्तिक्रमः । पुं । उत्पत्तेरनुक्रमे ॥ स यथा । आत्मन आकाशः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नम् अन्नात्सर्वाणि भूतानीति श्रुतिप्रसिद्धः ॥

उत्पत्तिमत् । त्रि । अनित्येवस्तु ॥

उत्पत्तिविधिः । पुं । कर्मस्वरूपमात्रबोधकेविधौ ॥ यथा । आग्नेयोऽष्टाकपालोभवति । यथावा । अग्निहोत्रंजुहोतीति । अत्रचविधौकर्मणः कर्त्तृत्वेनान्वयः । अग्निहोत्रहोमेनेष्टम्भावयेदिति ॥ ननुयागस्यद्वेरूपे द्रव्यं देवताच । तथाच रूपाश्रवणे अग्निहोत्रंजुहोतीतिकथमुत्पत्तिविधि अग्निहोत्रशब्दस्य तत्प्रख्यन्यायेन नामधेयत्वादितिचेन्न । रूपाश्रवणेप्यस्योत्पत्तिविधित्वात् । अन्यथारूपश्रवणादध्नाजुहोतीत्य-

यमेवोत्पत्तिविधिः स्यात् । तथाचा ग्निहोत्रं जुहोतीतिवाक्यमनर्थकं स्यात् ॥

उत्पत्तिव्युत्क्रमः । पुं । उत्पत्तेर्विपर्यस्तक्रमे ॥ अयमर्थः । पृथिवीगन्धतन्मात्रात्मिका रसतन्मात्रात्मिकाप्मात्रम्भवति । आपश्चता रूपतन्मात्रात्मकतेजोमात्रं भवन्ति । तच्च तेजः स्पर्शतन्मात्रात्मकवायुमात्रं भवति । सच वायुः शब्दतन्मात्रात्मकाकाशमात्रं भवति । सचाऽऽकाशस्वकारणभूताऽज्ञानोपहितचैतन्यमात्रं भवतीति ॥

उत्पन्नः । त्रि । प्राप्तजन्मनि । उद्भूते । ...न्ते ॥ उत्पद्यतेस्म । पद० । क्त । ...भ्यामिति नत्वम् ॥

उत्पलम् । न । इन्दीवरे । नीलकमले ॥ कुष्ठौषधौ ॥ जलजपुष्पमात्रे । कुवलये ॥ जलजपुष्पविशेषे । कोंवि इतिभाषा ॥ त्रि । मांसशून्ये ॥ उत्पलति । पलगतौ । पचाद्यच् ॥

उत्पलगन्धिकम् । न । चन्दनविशेषे । कृष्णताम्रे । गोशीर्षे ॥

उत्पलपत्रम् । न । कुवलयदले ॥ स्त्री नखक्षते ॥ तिलके ॥

उत्पलशारिवा । स्त्री । अनन्तायाम् । श्यामालतायाम् ॥ उत्पलमस्त्यस्या.

उत्पलाकारपुष्पत्वात् । अर्शआद्यच् ॥ यद्वा । उद्गतपलमनया । उत्पला चासौशारिवाच ॥

उत्पलाक्षी । स्त्री । सुपर्णाख्यतीर्थदेव्याम् ॥

उत्पलिनी । स्त्री । कैरविण्याम् । छोटीकोञी इतिभाषा ॥ पद्मसमूहे । उत्पलाकरे ॥ उत्पलानि सन्त्यस्याम् । पुष्करादिभ्योदेशे इति इनिः ॥

उत्पली । स्त्री । तुषचर्पव्याम् ॥

उत्पटः । पुं । वृक्षनिर्यासे ॥ वैदिकोयम् ॥

उत्पवनम् । न । कुशखण्डिकायांपवित्रमध्येन जलादेरुत्क्षेपणे ॥

उत्पश्यः । त्रि । उन्मुखे । ऊर्ध्वदृष्टिविशिष्टे ॥

उत्पाटः । पुं । योगविशेषे ॥ यथा । रवौविशाखा सोमे पूर्वाषाढा भौमे धनिष्ठा बुधेरेवती गुरौरोहिणी शुक्रेपुष्या शनावुत्तराफाल्गुनी चेदुत्पाटयोगः ॥

उत्पाटनम् । न । उन्मूलने । उपाडना इति भाषा ॥

उत्पाटिका । स्त्री । वृक्षस्यनीरसायांत्वचि ॥ वैदिकोयम् ॥

उत्पाटितः । त्रि । उन्मूलिते । उपाडा इतिभाषा ॥

उत्पातः । पुं । अजन्ये । उपद्रवे । दि
व्यान्तरीक्ष्यभूमिजोपसर्गे ॥ तत्रदि
व्यो यथा । अपर्वणिचन्द्रादित्यग्रा
सः । आन्तरीक्ष्यो यथा । उल्कापा
तनिर्घातादिः । भौमोयथा भूकम्पा
दि. ॥ आध्यात्मिकाधिदैविकाधि-
भौतिकभेदभिन्ने प्राणिनांशुभाशुभ
सूचके महाभूतविकारे॥*॥अथोत्पा
ताध्यायः ॥ यानथेरुत्पातान् गर्गः
प्रोवाचतानहंवक्ष्ये । तेषांसङ्क्षेपो
यं प्रकृतेरन्यत्त्वमुत्पातः ॥ अपचा
रेणनराणा मुपसर्गः पापसञ्चयाद्भ
वति । संसूचयन्तिदिव्यान्तरिक्षभौ
मास्तमुत्पाताः । मनुजानामपचा
रादपरक्तादेवताःसृजन्त्येतान् । त-
त्प्रतिघातायनृपः शान्तिंराष्ट्रे प्रयु
ञ्जीत ॥ दिव्यंग्रहर्क्षवैकृत मुल्कानि
र्घातपवनपरिवेषा । गन्धर्वपुरपुर-
न्दरचापादियदान्तरिक्ष्यतत् ॥ भौमं
चरस्थिरभवंतच्छान्तिभिराहतंशम
मुपैति । नाभसमुपैतिमृदुतांशाम्य
तिनोदिव्यमित्येके ॥ दिव्यमपिशम
मुपैतिप्रभूतकनकान्नगोमहीदानैः
। रुद्रायतनेभूमौगोदोहात्कोटि-
होमाच्च ॥ आत्मसुतकोशवाहनपु-
रदारपुरोहितेषुलोकेषु । पाकमु
पयातिदैवं परिकल्पितमष्टधानृप-
ते: ॥ अनिमित्तभङ्गचलनस्वेदाश्रु-
निपातजल्पनाद्यानि । लिङ्गार्चाय
तनानांनाशायनरेशदेशानाम् ॥ दै
वतयात्राशकटाक्षचक्रयुगकेतुभङ्ग
पतनानि । सम्पर्य्यासनसादनसङ्गा
श्चनदेशनृपशुभदाः ॥ ऋषिधर्मपितृ
ब्रह्मप्रोद्भूतंवैकृतंद्विजातीनाम् । यद्रु
द्रलोकपालोद्भवंपशूनामनिष्टंतत् ॥
गुरुसितशनैश्चरोत्थंपुरोधसांविष्णुज
ञ्च लोकानाम् । स्कन्दविशाखसमुत्थ
माण्डलिकानांनरेन्द्राणाम् ॥ वेद
व्यासेमन्त्रिणि बिनायकेवैकृतंचमू-
नाथे ॥ विधातरिसबिश्वकर्मणिलो
काभावयनिर्दिष्टम ॥ देवकुमारकु
मारीवनिताप्रेष्येषुवैकृतंयत्स्य ॅ ।
तन्नरपते.कुमारकुमारिकार..॥र
जनानाम् ॥ रक्षःपिशाचगुह्यकना
गानामेव मेवनिर्दिष्टः । मासै-
श्चाप्यष्टाभिःसर्वेषामेवफलपाकः ॥
बुद्धादेवविकारंशुचिःपुरोधात्यहो
षितःस्नात. । स्नानकुसुमानुलेपनव
स्त्रैरभ्यर्चयेतप्रतिमाम् ॥ मधुपर्केण
पुरोधाभक्ष्यैर्वलिभिश्चविधिवदुपति
ष्ठेत् । स्थालीपाकंजुहुयाद्विधिवन्म-
न्त्रैश्चतल्लिङ्गैः॥ इतिविबुधविकारेशा
न्तयस्समराचं द्विजविबुधगणार्चागी-
तनृत्योत्सवाश्च । विधिवदवनिपा

उत्पातः

सौम्योत्रचरः कार्योनिर्वास्योवापशुः शान्त्यै ॥ सद्येचदृष्टाविकृतिंप्रदेयं ततत्त्वेवमेवंप्रथमंद्विजेभ्यः । तस्यैवमध्येचरमप्रभौमंकृत्वानदोषसमुपैतितज्जम् ॥ दुर्भिक्षमनावृष्टावतिवृष्टौचुद्भयपरभयञ्च । रोगोह्यन्तुभवार्यान्नृपतिवधोऽनभ्रजातायाम् ॥ शीतोष्णविपर्यासेनोसम्यगृतुषुसम्प्रवृत्तेषु । षण्मासाद्राष्टभयंरोगभयंदैवजनितञ्च ॥ अन्यर्त्तौसप्ताहंप्रवन्धवर्षेप्रधानन्नृपमरणम् । रक्तेशस्त्रोद्योगेमांसास्थिवसादिभिर्मरकः ॥ ॥ धान्यहिरण्यत्वक्फलकुसुमाद्यैर्वर्षितेभयंविद्यात् । अङ्गारपांसुवर्षेविनाशमायातितन्नगरम् ॥ उपलाविनाजलधरैर्विकृतावाप्राणिनोयदावृष्टाः । छिद्रंवाप्यतिदृष्टौसस्यानामीतिसञ्जननम् ॥ यद्यमलेर्कच्छाया, नदृश्यते दृश्यतेप्रतीपावा । देशस्यतदासुमहद्भयमायातंविनिर्दिश्यम् ॥ अभ्रेनभसीन्द्रधनुर्दिवायदादृश्यते यवाराचौ । प्राच्यामपरस्यांवातदाभवेत्क्षुद्भयंसुमहत् ॥ सूर्येन्दुपर्जन्यसमीरणानां यागः स्मृतोवृष्टिविकारकाले । धान्यान्नगोकाञ्चनदक्षिणाभ्दियास्ततः शान्तिमुपैतिपापम् ॥ अपसर्पणंनदीनां नगरादचिरेणशून्यतांकुरुते । शोषाश्चाशोषाणामन्येषांवाह्रदादीनाम् ॥ स्नेहासृङ्मांसवहाः सङ्कुलकलुषाः प्रतीपगाश्चापि । परचक्रस्यागमनंनद्यः कथन्तिषण्मासात् ॥ ज्वालाधूमक्वाथा* रुदितोत्कृष्टानिचैवकूपानाम् । गीतप्रजल्पितानिचजनमरकायोपदिष्टानि ॥ सलिलोत्पत्तिरखातेगन्धरसविपर्ययेचतोयानाम् । जलाशयानां विकृतौ महद्भयं तत्रशान्तिमिमाम् ॥ सलिलविकारेकुर्य्यात्पूजांवरुणस्य वारुणैर्मन्त्रैः । तैरेवचजप्तैहोमंशममेवं पापमुपयाति ॥ प्रसवविकारेस्त्रीणां द्वित्रिचतुष्प्रभृतिसम्प्रसूतौवा । हीनातिरिक्त नेचदेशकुलसङ्क्षयो भवति ॥ वडवोष्ट्रमहिषगोहस्तिनीषु यमलोद्भवमरणमेषाम् । षण्मासात् सूतिफलंशास्त्रोक्तैश्चगर्गोक्तौ ॥ नार्य्यः परस्वविषये त्यक्तव्यास्ताहिताथिना । तर्पयेच्चद्विजानकामैः शान्तिञ्चैवात्रकारयेत् ॥ १ ॥ [illegible] यूथेभ्यस्त्यक्तव्याः परभूमिं [illegible] स्वामिनंयूथमन्यथातुविन। [illegible]त् ॥ २ ॥ परयोनावभिगमनं भव। [illegible]ति रशोभसाधुधेनूनाम् । उक्षाणो। [illegible]न्योन्यं पिबतिश्वावासुरभिपुत्रम् ॥

मासत्रयेणविद्यात्तस्मिन्नि: संशयंप-
रागमनम्। तत प्रतिघातायैतौस्रो
कौगर्गेणनिर्द्दिष्टौ ॥ त्यागोविवास-
नंदानंतत्तस्याशु शुभं भवेत्। तर्पये
द्ब्राह्मणांश्चाचजपंहोमञ्चकारयेत् ॥
१ ॥ स्थाली पाकेन धातारं पशुना-
चपुरोहित:। प्राजापत्त्येनमन्त्रेणय
जेदन्नन्दक्षिणम् ॥ २ ॥ यानंवाह
।॰युक्तंयदिगच्छेन्नव्रजेच्चवाहयुतम्।
राष्टभयंभवतितदाचक्राणांसादभङ्गे
च ॥ अनभिहततूर्य्यनाद.शब्दोवाता
डितेषुयदिनस्यात्। व्युत्पत्तौवातेषां
परागमोन्नृपतिमरणंवा ॥ गीतरव
तूर्य्यशब्दानभसियदावाचरस्थिरान्य
न । मृत्युस्तदागदावाविस्वरतू-
र्य्येपराभिभव: ॥ गोलाङ्गलयो: सङ्गे
दर्वीशूर्पाद्युपस्करविकारे । क्रोष्टुक
नादेच तथा शस्त्रभयंमुनिवचश्चेद
म ॥ वायव्येष्वेवन्नृपतिर्बायुंसक्तुभि-
रर्चयेत् । आवायोइति पञ्चचौजस
व्या:प्रयतैर्द्विजै:॥ ब्राह्मणान्परमान्ने
र्च्चाणाभिश्चतर्पयेत् । वस्त्रन्नद-
क्षिणोहोम:कर्त्तव्यश्चप्रयत्नत: ॥ पुर
पक्षिणोवनचरा वन्यावानिर्भयाविश
न्तिपुरम्। नक्तंवादिवसचरा: क्षपा
चरावाचरन्त्यहनि ॥ सन्ध्याद्वयेपि
मण्डलमावशन्तो मृगाविहङ्गावा ।

दीप्तायांदिश्यथवाक्रोशन्त: संहता-
भयदा' ॥ श्येना.प्ररुदन्तइवद्वारेक्रो-
शन्तिजम्बुकादीप्ता:। प्रविशेन्नरेन्द्रभ
वनेकपोतक' कौशिकोयदिवा ॥ कु
क्कुटरुतंप्रदोषेहेमन्तादैाच कोकि
लालापा । प्रतिलोममण्डलचरा:
श्येनाद्याश्चाम्बरेभयदा: ॥ गृहचैत्त्य-
तोरणेषु द्वारेषुचपक्षिसङ्घसम्पात:।
मधुवल्मीकाम्भोरुहसमुद्भवश्चापिना
शाय ॥ श्वभिरस्थिशवावयवप्रवेशनं
मन्दिरेषुमरकाय । पशुशस्त्रव्याहा
रेन्नृपमृत्त्युमुंनिवचश्चेदम् ॥ मृग
पक्षिविकारेषु कुर्याद्धोमान्सदक्षि-
णान्। देवा'कपोतइतिचजप्तव्या:प
ञ्चभिर्द्विजै:॥ १॥ सुदेवाइतिचैकेन-
देयागावश्चदक्षिणा: । जपेच्छाकुन
सूक्तंवामनो वेदशिरांसिच ॥ २ ॥
शक्रध्वजेन्द्रकीलस्तम्भद्वारप्रपातभ-
ङ्गेषु। तद्वत्कवाटतोरणकेतूनांनरप
तेर्मरणम् ॥ सन्ध्याद्वयस्यदीप्तिर्धूमो
त्पत्तिश्चकाननेनग्नौ । छिद्राभावेभू
मेर्दरणंकम्पश्चभयकारी ॥ पाषण्डा
नांनास्तिकानाञ्चभक्त:साध्वाचारप्रो
ज्झित:क्रोधशील:।ईर्ष्य:क्रूरोविग्रहा
सक्तचेतायस्मिन्राज।तस्यदेशस्यना
श:॥प्रहरहरछिन्धिभिन्धीत्त्यायुधका
ष्ठाश्मपाणयोबाला: । निगदन्त:प्रहृ-

रन्तेतचापिभयं भवत्याशु ॥ अङ्गार
गैरिकाद्यैर्विकृतप्रेताभिलेखनं य-
स्मिन् । नायकचिह्नितमथवा तद्वंश्च
यंयातिनचिरेण ॥ लूतापटाङ्गमव-
लनसन्ध्ययोः पूजितं कलहयुक्तम् ।
नित्योच्छिष्टस्त्रीकञ्च यद्गृहं तत् क्षयं
याति ॥ दृष्टेषुयातुधानेषुनिर्द्दिशे
न्मरकमाशुसम्प्राप्तम् । प्रतिघाता
यैतेषांगर्गःशान्तिञ्चकारेमाम् ॥ म
हाशान्त्योऽथबलयो भोज्यानिसुमहा
न्तिच । कारयेत महेन्द्रञ्च माहेन्द्री
ञ्चसमर्च्चयेत् ॥*॥ अथयत्रकालेउत्पा
तादृष्टाविफलाभवन्तितत् प्रदर्शना-
यमाह ॥ नरपतिदेशविनाशेकेतो
रुदयेऽथवाग्रहेऽर्केन्द्वोः । उत्पातानां
प्रभवःस्वर्त्तुभवश्चाप्यदोषाय ॥ येच
नदोषानजनयन्त्युत्पातास्तान्ऋतुस्व
भावकृतान । ऋषिपुत्रकृतैःश्लोकैर्वि
द्यादेतैःसमासोक्तैः ॥*॥ तत्रवसन्ते ॥ व
ज्राशनिमहीकम्पसन्ध्यानिर्घातनि
स्वनाः । परिवेशरजोधूमरक्तार्कास्त
मयोदयाः ॥ द्रुमेभ्योऽन्नरसस्नेहबहु-
पुष्पफलोद्गमाः । गोपक्षिमदवृद्धिश्च-
शिवायमधुमाधवे ॥*॥ ग्रीष्मे ॥ तारो
ल्कापातकलुषंकपिलार्केन्दुमण्डल-
म । अनग्निज्वलनस्फोटधूमरेणुनि
लाहतम ॥ रक्तपद्मारुणासन्ध्यानभः

क्षुब्धार्णवोपमम् । सरितांचाम्बुसंशो
षंदृष्ट्वाग्रीष्मेशुभंवदेत ॥*॥ वर्षासु ॥
शक्रायुधपरिवेशौविद्युच्छुष्कविरोह
णम । कम्पोद्वर्त्तनवैकृत्यंरसनं दर
णंक्षितेः ॥ सरोनद्युदपानानांवृद्ध्यूर्द्ध
तरणप्लवाः । शरणंचाद्रिगेहानांवर्षा
सुनभयावहम् ॥*॥ शरदि ॥ दिव्यस्त्री
भूतगन्धर्वविमानाद्भुतदर्शनम् । ग्रह
नक्षत्रताराणांदर्शनञ्चदिवाम्बरे ॥
गीतवादित्रनिर्घोषा वनपर्वतसानुषु
। सस्यवृद्धिरपांहानिरपापाः शरदि
स्मृताः ॥*॥ हेमन्ते ॥ शीतानिलतुषा
रत्वंनर्द्दनंमृगपक्षिणाम । रक्षोयक्षा
दिसत्त्वानांदर्शनंवागमानुषी ॥ दि
शोधूमान्धकाराश्च सनभोवनपर्व-
ताः । उच्चैःसूर्योदयास्तौचहेमन्ते-
शोभनाःस्मृताः ॥*॥ शिशिरे ॥ हिम
पाताऽनिलोत्पाताविरूपाद्भुतदर्शन
म । कृष्णाञ्जनाभमाकाशतारोल्का
पातपिञ्जरम ॥ चित्रगर्भोद्भवाः स्त्री
षुगोऽजाश्वमृगपक्षिषु । पत्राङ्कुरल
तानाञ्चविकाराः शिशिरे शुभाः ॥*॥
अत्रविशेषमाह ॥ ऋतुस्वभावजाह्ये
तेदृष्टाःस्वर्त्तौशुभप्रदाः । ऋतोरन्यत्र
चोत्पातादृष्टास्तेचातिदारुणाः ॥ य
द्विशेषेणफलप्रदंभवतितदाह ॥
उन्मत्तानाञ्चया गाथाः शिशूनांयच्च

भाषितम् । स्त्रियोयच्चप्रभाषन्तेतस्य नास्तिव्यतिक्रमः ॥ येनकारणेनैतत् सत्यरूपंभवति तत्प्रदर्शनार्थमाह ॥ यथैवचरतिदेवेषुपश्चाच्चरतिमानुषान् । क्वाचोदितावागवदति सत्याह्येषासरस्वती ॥ उत्पातशास्त्रस्य प्रभावमाह ॥ उत्पातान् गणितविवर्जितोपिवुद्धाविख्यातो भवतिनरेन्द्रवल्लभश्च । एतत् तन्मुनिवचनंरहस्यमुत्तंयज्ज्ञात्वा भवतिनरस्त्रिकालदर्शी ॥ इतिवाराह्यांचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ अकस्मादायाति ॥

उत्पतनम् । पतॢगतौ । घञ् । उत्पतति वा । ज्वलतीतिवाः ॥

[illegible] ।भम् । न । यस्मिन्नचनेउत्पातः सम्भूतस्तस्मिन् ॥

उत्पादः । पुं । उत्पादने ॥

उत्पादकः । पुं । पशुविशेषे । कुञ्जरारातौ । शरभे ॥ त्रि । उत्पादयितरि । जनके ॥ उत्पादयति । पद० । ण्वुल् ॥

उत्पादनम् । न । उत्पन्नकरणे ॥

उत्पादना । स्त्री । क्रियायाम् । भावनायाम ॥

उत्पादशयनः । पुं । स्त्री । टिट्टिभपक्षिणि ॥

उत्पादिका । स्त्री । देहिकानामकीटे ॥ पूतिकायाम् ॥ हिलमोचिकायाम् ॥

उत्पाद्यः । पुं । पुरोडाशादिकर्मविशेषे ॥ त्रि । उत्पादितुंयोग्ये ॥

उत्पाली । स्त्री । आरोग्ये । सुस्थतायाम् ॥

उत्पिञ्जलः । त्रि । भृशमाकुले । समुत्पिञ्जे । अतिशयव्याकुले ॥

उत्पित्सुः । त्रि । उत्पतितुमिच्छौ । पततेः सन्नन्तादुप्रत्ययः । सनिमीमेतीसादेशः । अन्लोपोभ्यासस्य ॥

उत्प्रासः । पुं । उप॰ ॥ उत्प्रासनम् । असुक्षेपणे असगतिदीप्त्यादानेषुवा । घञ् ॥

उत्प्रेक्षा । स्त्री । अनवधाने ॥ काव्यालङ्कारविशेषे ॥ यथा । सम्भावनमथोत्प्रेक्षाप्रकृतस्यसमेनयत् । अस्यार्थः । प्रकृतस्य उपमेयस्यसमेन उपमानेन यत्सम्भावनम् मिथ्यात्वेनवर्णनमिति । उदाहरणम् उन्मेषंयोममनसक्ते जातिवैरी निशाया मिन्दो रिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः । नीतःशान्तिंप्रसभमनया वक्त्रकान्त्येतिहर्षोल्लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः ॥ लिम्पतीवतमोङ्गानिवर्षतीवाञ्जनंनभः । असत् पुरुषसेवेवदृष्टिर्निष्फलताङ्ग

ता॥ उत्प्रेक्षणम् । ईषदुर्ध्वमाकुन-योः। गुरोश्चहलः। टाप्॥

उत्प्रेक्षाव्यञ्जकम् । न । शब्दविशेषे ॥ यथा। मन्येशङ्के ध्रुवंनूनंकिवा मायो-नु वेद्मिच । ननुनानविजानामि उत्प्रेक्षाव्यञ्जकानिचेति॥

उत्प्लवनम् । न । उल्लङ्घने । फलाङ्ना इतिभाषा॥

उत्प्लवा । स्त्री । नैाकाप्रभेदे॥

उत्फालः । पुं । लम्फे॥

उत्फुल्लः । त्रि । प्रफुल्ले । विकसितेपुष्पे । दृष्टा॰ योन्यविशेषे॥ उत्ताने॥ न । स्त्रीणांकरणे ॥ उत्फलति । ञिफला॰ । क्तः । आदितश्चेतीड्भावः । उत्फुल्लसम्फुल्लयोरुपसंख्यानमितिनिष्ठातस्यलः ॥

उत्सः । पुं । प्रस्रवणे । पर्वतात्स्रवज्जलप्रपातस्थाने॥ स्रवज्जले॥ गिरेरुपरिनिर्झराद्युत्थाम्बुसङ्घे ॥ उनत्तिक्लेदे । उन्दी॰ । उन्दिगुधिकुषिभ्यश्चेतिसः । किदित्यनुवृत्तेर्नलोप ॥

उत्सङ्गः । पुं । अङ्के । क्रोडे ॥ त्रि । असङ्गे॥

उत्सङ्गवर्ती । त्रि । क्रोडस्थिते ॥

उत्सत्तिः । स्त्री । उच्छेदे॥

उत्सन्नः । त्रि । उन्नते ॥ नष्टे॥

उत्सर्गः । पुं । सामान्ये । सामान्यविधौ॥ न्याये॥ त्यागे॥ दाने॥ वर्जने॥ सात्त्विकर्त्तव्यक्रियाविशेषे ॥ नीलोद्वाहादौ॥ अपानवायोर्व्यापारे॥ बाहुल्यद्दष्टस्थवत्त्वे॥ उत्सर्जनम् उत्सृज्यतेवा। घञ्॥

उत्सर्जनम् । त्रि । शब्दंकुर्वति॥

उत्सर्जनम् । न । अपवर्जने । विश्राणिते । दाने । त्यागे ॥ उत्सृज॰ । ल्युट्॥

उत्सर्पणम् । न । उल्लङ्घने ॥ उत्क्रम्यपुरतोगमने॥

उत्सर्पिणी । स्त्री । जिनानांकालचक्रावयवे॥

उत्सर्पितः । त्रि । उपरिभावंप्रा।

उत्सर्पी । त्रि । ऊर्द्धप्रसारिणि॥

उत्सवः । पुं । नियताह्लादजनकव्यापारे उपनयनविवाहादौ । महे । उद्भवे । उत्सेके॥ इच्छाप्रसरे ॥ कोपे॥ उत्सुवति । षूप्रेरणे । पंचाच्च ॥ यद्वा । उत्सवनम् । षुप्रसवैश्वर्ययोः । ऋदोरप्॥

उत्सवसङ्केतः । पुं । पार्वतीयानांगणे ॥ यथा । गणानुत्सवसङ्केतानजयत सप्तपाण्डव इतिमहाभारतम्॥

उत्सादनम् । न । समुल्लेखे॥ उद्वाहने॥ उद्वर्त्तने॥ उत्साद्यतेऽनेन । ल्

हृ० । णयन्त. । ल्युट ॥

उत्सादित । चि । कृतोत्सादने । उद्वर्त्तिते । निर्मलीकृतशरीरे ॥

उत्सारकः । पुं । द्वारपाले ॥ त्रि । उत्सारणकर्त्तरि ॥

उत्सारणम् । न । दूरीकरणे ॥ चालने ॥ स्थानान्तरप्रापणे ॥

उत्सारित । त्रि । अपसारिते ॥

उत्साह. । पुं । उद्यमे । अध्यवसाये । इदमहङ्करिष्याम्येवेतिनिश्चयात्मिकबुद्ध्याधृतिहेतुभूते ॥ कर्त्तव्यार्थेषुस्थेयसिप्रयत्ने । उत्साहोमन्त्रमूलंस्यादितिनीतिविदांमतम् । प्रभुशक्तिर्मन्त्रमूलात्तस्मादुत्साहवान्भवेत् ॥ ।कोत्तरेषुकार्येषुस्थेयसिप्रयत्ने ॥ सूचे ॥ उत्सहनम् उत्सह्यते अनेन वा । षह० । हलश्चेति घञ् ॥ कर्मसुसुकरप्रत्यय इडयलकारको-भावोवाउत्साहः ॥ सङ्गीतोक्तध्रुवकविशेषे ॥

उत्साहवान् । त्रि । उत्साहविशिष्टे । उत्साहिनि ॥ उत्साहोऽस्यास्य । वत्सादिभ्योमतुवन्यतरस्याम ॥

उत्साहवर्द्धनः । पुं । उद्यमवृद्धौ । वीररसे ॥ उत्साहेन वर्द्धते । वृधु० । अनुदात्तेतश्चहलादेरितियुच् ॥ उत्साहंवर्द्धयतीति वा । ल्युः ॥

उत्साहशक्तिः । स्त्री । राज्ञांशक्तिविशेषे ॥ विक्रमबलमुत्साहशक्तिरित्युक्ते ॥

उत्साही । त्रि । उत्साहवति ॥ वत्सादिभ्योमतुवन्यतरस्यामिति पक्षे इनि ॥

उत्सिक्तः । त्रि । उद्धते ॥ गर्विते ॥ वर्द्धिते ॥ उद्रिक्ते ॥ उपप्लुते ॥ त्यक्तमर्यादे ॥ उत्पूर्वात् सिचेःक्तः ॥ सिक्ते ॥

उत्सिच्यमानः । चि । उद्रिच्यमाने । दृद्धिमति ॥

उत्सुकः । त्रि । ईप्सितकर्मोद्युक्ते । इष्टार्थोद्युक्ते ॥ अथममगुरुरागमिष्यतीत्युत्कण्ठाविशिष्टे । उत्कण्ठिते ॥ उत्उद्योगंसुवति सौति सुनोतिवा । षुप्रसवैश्वर्ययोः षुञ्‌अ० । विधिसंज्ञापूर्वकत्वात् गुणाभावः । क्विपिआगमशास्त्रस्यानित्यत्वात्तुग भावोवा । ततःसंज्ञायांकन् ॥ यद्वा । उत्सुवति । षूप्रेरणे । मितद्रादिभ्याडुः । सत्विति ज्ञिवा । कनि केयाइतिह्रस्वः ॥

उत्सूरः पुं । दिनावसाने ॥ इतिहेमचन्द्रः ॥

उत्सृष्ट । त्रि । कृतोत्सर्गे । त्यक्ते । विधृते ॥ यथा । आमंशूद्रस्यपक्वान्नं पक्वमुत्सृष्टमुच्यते इति ॥ उत्सृज्यतेस्म । सृजवि० । क्त. ॥

उत्सेकः। पुं। उत्सेचनेन शोषणे॥ उद्धृत्यवहिःसेचने॥ उद्रेके॥ उत्सेचनम्। षिचच०। घञ्॥

उत्सेचनम्। न। ऊर्द्ध्वसेके॥

उत्सेधः। पुं। गिरिद्रुमादीनामुन्नतौ। उच्छ्रये॥ न। शरीरे। संहनने॥ उत्सेधनम् अनेनवा। षिधुग०। घञ्॥

उत्स्वनः। पुं। उच्चशब्दे। त्रि। तद्वति॥

उद्। अ। प्रकाशे॥ विभागे॥ प्राबल्ये॥ अस्वास्थ्ये॥ शक्त्याम्। प्राधान्ये॥ बन्धने॥ भावे॥ मोक्षे॥ लाभे॥ ऊर्द्ध्वकर्मणि॥ ऊर्द्ध्वे॥ उत्कर्षे॥ प्राकट्ये॥ नैकट्ये॥

उदम्। न। जले। जगत्त्रयान्तोदधिसम्प्लवोदेनारायणस्योदरनाभिनालादितिभागवतोक्तेः॥

उदकम। न। जले। वारिणि॥ उनत्ति। उन्दीक्ले०। उदकमित्युणादिसूत्रेणसाधु॥

उदककुम्भः। पु। उदकुम्भे॥ उदकस्य कुम्भः॥

उदकपरीक्षा। स्त्री। दिव्यविशेषे॥

उदकलोलः। त्रि। जलप्रिये॥

उदकिलः। त्रि। उदकवति॥ उदकमस्यस्य अस्मिन्वा॥ पिच्छादित्वादिलच्॥

उदकीर्यः। पुं। महाकरञ्जे॥

उदकीर्य्यः। पु। डालकरम्चा डहरकरञ्ज इतिगौडभाषाप्रसिद्धे करञ्जविशेषे॥

उदकुम्भः। पुं। जलकलशे॥ उदकस्य कुम्भः। एकहलादाविन्युदादेशः॥

उदक्तम्। त्रि। कूपादिभ्यउत्थितेजलादौ॥ उतपूर्वादञ्चतेःक्तः॥

उदक्या। स्त्री। ऋतुमत्याम। रजस्वलायाम्॥ उदकमर्हति। संज्ञायामितियत्॥ त्रि। जलार्हे॥ दण्डादित्वाद्यत्॥

उदगद्रिः। पुं। हिमालयपर्वते॥

उदगयनम्। न। उत्तरायणे। देवानां दिवसे॥

उदगाहः। पुं। जलावगाहने। उदकस्यगाहः अवगाहनम्। मन्थौदनेत्यादिनोदादेशः॥

उदग्भूमः। पुं। उत्कृष्टस्थाने। सङ्कीर्णा॥ कृष्णोदक्पाण्डुसंख्यापूर्वायाभूमेरजिष्यते॥

उदग्रः। त्रि। उच्चे॥ उन्नतमग्रमस्य॥

उदग्रदन्। पुं। उच्चदन्तेहस्तिनि॥ त्रि। वृहद्दन्तयुक्ते॥ उदग्रौदन्तावस्य। अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्चेतिदन्तस्यदतृ॥

उदङ्कः। पुं। चर्ममयेघृतादिपात्रे॥ उ

द्यते उद्भ्रियतेऽस्मिन् । अच्चु॰ । उदङ्कोऽनुदकइतिघञ् । तैलोदङ्क घृतोदङ्कः ।

उदक् । अ । उदग्दिग्भवे ॥ उदग्देशो द्भवे ॥ उदक्कालोत्पन्ने ॥ उदीच्यां दिशि उदीच्याःदिशः उदीचीदिग्वा । दिक्शब्देभ्य.सप्तमीपञ्चमीप्रथमा भ्यो दिग्देशकालेष्वस्ताति: ॥ अञ्चेर्लु गित्यस्तातेर्लुक् । एवंदेशेकालेच ॥

उदङ् । पुं । दिशि ॥ देशे ॥ काले ॥ त्रि । तद्भवे ॥ उत्कृष्टमञ्चति । अच्चु॰ । ऋत्विगितिक्विन् । नलोप' । नुम् । संयोगान्तलोपः । कुत्वम् ॥

उदज' । पुं । पशुप्रेरणे ॥ उदजनम् । ब्दज॰ । समुदोरजःपशुष्विन्त्यप् । अ घञप्रोरितिपर्युदासाद्वीभावोन ॥

उदञ्चनः । पुं । भाण्डे ॥ न । पिधानार्थपात्रे । ढकना ढक्नी इतिभाषा ॥ उदञ्चतेऽस्मिन् । अच्चु॰ । ल्युट् । उद कोदञ्चनम् ॥ ऊर्द्ध्वक्षेपणे ॥

उदञ्चित: । त्रि । ऊर्द्ध्वक्षिप्ते ॥ पूजिते ॥ उत्ऊर्द्ध्वमञ्चितम् ॥

उदण्डपालः । पुं । मत्स्यविशेषे ॥ सर्पप्रभेदे ॥

उदन्या । स्त्री । तैलपिपीलिकायाम् ॥

उदधिः । पुं । समुद्रे ॥ उदकानिधीयन्तेऽत्र । कर्मण्यधिकरणेचेतिधाञःकिः ॥

घटे ॥

उदधिमलः । पु । समुद्रफेने ॥

उदधिमेखला । स्त्री । पृथिव्याम् ॥

उदन्त' । पुं । वार्त्तायाम् । वृत्तान्ते ॥ साधौ ॥ उन्नतोन्तोयस्य ॥

उदन्तकः । पुं । उदन्तार्थे ॥ स्वार्थेकन् ॥

उदन्तिका । स्त्री । तृप्तौ ॥

उदन्या । स्त्री । पिपासायाम् ॥ उदन्यति उदकस्येच्छावा । सुपआत्मनःक्यच् । अशनायोदन्येति ईच्छाभाव.क्यचि उदकस्यउदन्भावश्चनिपात्यते । अप्रत्ययादित्य. ॥

उदन्वान् । पु । उदधौ । पारावारे । समुद्रे ॥ उदकानिसन्त्यत्र । उदन्वानुदधौचेत्युदकस्योदन्भावो निपातितो मतुपि ॥ ऋषिविशेषे ॥

उदपान. । पुं । न । कूपे ॥ क्षुद्रजलाशये ॥ उदकंपिबन्त्यस्मिन् । अधिकरणेल्युट् । उदकस्योद' ॥

उदमान. । पुं । आढकस्यपञ्चाशत्तमेभागे ॥ कुल्यास्याद्दष्टभिर्द्रोणैर्द्रोणपादेनचाढकः । अतोद्वेशतिकोभागउदमानउदाहृतइत्युक्ते . ॥

उदमेयः । त्रि । उदकंमेयंयस्यतस्मिन् ॥ उदकस्योद' संज्ञायाम् ॥

उदयः । पुं । पूर्वपर्वते । उदयाचले ॥ उदयाऽचलसम्बन्धे । लग्ने ॥ दैवज्ञट

श्यते भास्वान् सतेषामुदयःस्मृतः । तिरोधानव्ययमेति सदेवास्तमनं रवेः ॥ नैवास्तमनमर्कस्य नोदयः सर्वदासतः । उदयास्तमनेनाम दर्शना दर्शने रवेः ॥ उदयन्ति ग्रहा अस्मात् । इण० । एरच् ॥ वृद्धौ । समुन्नतौ ॥ महिम्नि ॥ उत्पत्तौ ॥

उदयनः । पुं । वत्सराजे । वत्सेशे ॥ अगस्त्ये । घटोद्भवे ॥ कुसुमाञ्जलिग्रन्थकर्त्तरि । उदयनाचार्ये ॥ न । उदये ॥

उदयसन्ध्या । स्त्री । अर्काेदयात् प्राक् तद्घटिकाद्वये ॥

उदरम् । न । जठरे । तुन्दे । कुक्षौ । नाभिस्तनयोर्मध्यभागे ॥ अन्तःसुषिरे ॥ युधि । रणे ॥ पुं । उदररोगे । उत् ऋच्छति । ऋगतौ । अच ॥ यद्वा । उदृच्छति । उद्वियर्त्तिवा । ऋ गतौ । अच् ॥ यद्वा । दृणाति । दृविदारणे । उदिदृणातेरजलौपूर्वपदान्त्यलोपश्च ॥

उदरग्रन्थिः । पुं । गुल्मरुजि ॥

उदरत्राणम् । न । उदरवन्धवस्त्रादौ । नागोदे । पेटी कमरबन्ध इतिभाषा ॥ उदरस्यत्राणंयेन ॥

उदरथिः । पुं । समुद्रे ॥ वियन्मणौ । सूर्ये ॥ उतऋच्छति उदर्यते वा । ऋ० । उदसेरिदितिगथिन् ॥

उदरपिशाचः । त्रि । सर्वान्नभक्षके । सर्वान्नीने ॥ इतिहेमचन्द्रः ॥

उदरभेदी । त्रि । आत्महनि ॥

उदरम्भरिः । त्रि । स्वोदरमात्रपूरके । आत्मम्भरौ ॥ उदरम्बिभर्त्ति इति विग्रहे उदरस्यमुमागमोभृञ इन्प्रत्ययश्चनिपातसिद्धः ॥

उदररोगः । पुं । जठरव्याधिविशेषे । उदरी इतिभाषाप्रसिद्धे ॥

उदरव्याधिः । पुं । उदररोगविशेषे ॥ यथा । कदलीयवक्षारजलपानीयेन प्रसाधितम् । तदास्वादनान्नश्यन्ति उदरव्याधयोऽखिला इतिगारुडे- १९४ अध्यायः ॥

उदरशाण्डिल्यः । पुं । उपनिषत्प्रसिद्धे अतिधन्वनः शिष्ये ऋषिविशेषे ॥

उदरामयः । पुं । अन्नगन्धौ । अतिसाररोगे ॥

उदरावर्त्तः । पुं । नाभौ । तुन्दकूप्याम् ॥

उदरिकः । त्रि । उदरिले ॥ ठक् ॥

उदरिणी । स्त्री । गर्भवत्याम् ॥

उदरी । त्रि । तुन्दिले । पिचिण्डिले ॥ अतिशयितमुदरमस्य । तुन्दादिभ्य इलञ्चेतिचकारादिनिः ॥

उदरिलः । त्रि । वृहत्कुक्षौ । उदरिणि

॥ अतिश्वयितमुदरमस्य । तुन्दादि भ्य इलजितिइलच ॥

उदर्कः । पुं । एष्यत्कालीनफले । भाविनिकर्मफले ॥ मयनफल इतिप्रसिद्धे मदनवृक्षस्य कण्टके ॥ उदर्च्यते । अर्कस्तवने । घञ् ॥ उदर्च्यते वा । अर्चपूजायाम् । उदच्यते वा । अञ्चस्तुतौ । घञ् ॥ भविष्यत्काले ॥

उदर्चिः । पुं । अग्नौ ॥ शिवे । हरे ॥ कन्दर्पे । दर्पके ॥ त्रि । उज्ज्वले ॥ उत ऊर्ध्वमर्चीं रश्मियस्य सः ॥

उदर्दः । पुं । रोगविशेषे ॥ तल्लक्षणम् । वरटीदष्टसंस्थानः शोथःसंजायतेबहिः । सकण्डुस्तोदबहुलश्छर्दिज्वरविदाहवान् ॥ उदर्दमितितंविद्याच्छीतपित्तमथापरे । वाताधिकं शीतपित्तमुदर्दश्चकफाधिकमिति ॥

उदलावणिकम् । त्रि । लवणाम्भसासिद्धेव्यञ्जनादौ ॥

उदवसितम् । न । आलये । भवने । गृहे ॥ उत ऊर्ध्वमवसीयते स्म । षोऽन्तकर्मणि षिञ्बन्धने वा । क्तः । द्यतिस्यतीतीत्वम् ॥

उदश्वित् । न । अर्द्धजलयुक्ते घोले ॥ तक्रंह्युदश्विन्मथितं पादाम्ब्वर्द्धाम्बुनिर्जलमित्युक्तः ॥ छच्छिकायाम् ॥ उदकेनश्वयतिवर्द्धते । टुओश्विगतिवृद्धौः । क्विप् तुक् । उदकस्योदः संज्ञायाम् । उदश्वितइतिनिर्देशादस्यसारत्वम् ॥ उदश्वित्कफकृद्बल्यं श्रमघ्नंपरमंमतम् ॥

उदसनम् । न । अपनयने ॥ उतक्षेपणे ॥

उदस्तः । त्रि । उत्तोलिते ॥ उत्क्षिप्ते ॥

उदाजः । पुं । पशुभिग्रामान्तरप्रेरणे ॥ उदजनम् । अज० । घञ् । अघञपोरित्युक्ते र्वीभावोन ॥

उदात्तः । पुं । स्वरप्रभेदे ॥ उच्चैरुदात्त इतितत्स्वरूपम् । उत् उच्चैरादीयतेस्म । क्तः । अचउपसर्गात्त इतितादेशः ॥ काव्यालङ्कारविशेषे । उदात्तंवस्तुनः सम्पत् । समृद्धिमद्वस्तुवर्णनमुदात्तः । इत्यलङ्काररूपम् ॥ त्रि । दयात्यागादिसम्पन्ने ॥ महति ॥ श्रेष्ठे ॥ दातरि ॥

उदानः । पुं । कण्ठदेशस्थेवायौ । कण्ठस्थानीये ऊर्द्धगमनवत्युत्क्रमणवायौ ॥ स्पन्दयत्यधरंवक्त्रंनेत्रभागप्रकोपनम् । उद्वेजयति मर्माणिचोदानोनाम मारुतः ॥ उदानोऽक्षकण्ठतालुभ्रूमध्यमूर्द्धस्थितोवायुः ॥ ऊर्द्धं अनिति अनेन । अन० । हलश्चेति घञ् ॥ उदरावर्त्ते ॥ भुजङ्गमविशेषे ॥

उदायुधः । त्रि । गृहीतशस्त्रे ॥

उदारः । त्रि । दातरि ॥ महति ॥ दक्षिणे । सरले ॥ गम्भीरे ॥ असाधारणे । उत्कृष्टमासमन्तात् राति । रा । आतश्चेतिकः ॥ उद्र्यते । ऋगतिप्रापणयोः । कर्म्मणि घञ्वा ॥ उदुच्चैरासमन्तात् ऋच्छति । पचाद्यच् ॥

उदारधीः । त्रि । महाबुद्धौ ॥ उदारा धीर्यस्य ॥

उदावत्सरः । पुं । संवत्सरादिपञ्चान्तर्गतवत्सरविशेषे ॥

उदावर्त्तः । पुं । रोगविशेषे । गुदग्रहे ॥ मलमूत्रवायुरोधकरोग इतिस्पष्टार्थः ॥ यत्रोर्द्ध्वं जायतेवायोरावर्त्तःस चिकित्सकैः । उदावर्त्तइतिप्रोक्तो व्याधिस्तत्रानिलःप्रभुः । अपिच । वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः । [*] क्षुत्तृष्णोच्छ्वासनिद्राणांधृत्योदावर्त्तसम्भवः ॥ जलावर्त्ते ॥

उदावृत्तः । त्रि । ऊर्द्ध्वंनीते ।

उदासः । पुं । उत्क्षेपे ॥ उद्भावे ।

उदासीन. । त्रि । परतरे । शत्रुमित्रभिन्ने । शत्रुमित्राभ्यांपरस्मिन् राजनि ॥ विजिगीषोःशत्रुमित्रभूमितोव्यवहिते ॥ व्यवहितत्वादेव नोपकारी नाप्यपकारीकेवलमूर्द्ध्वमासीनइव । इतिभरतः ॥ अनुत्थशुभाशुभे । विवदमानयोरुभयोरप्युपेक्षके । येन कस्यचिन्मित्रादेःपक्षं भजते मध्यस्थे ॥ उदास्ते । आस० । लटःशानच । ईदासइतिईत्वम् ॥ विषयानन्तरो राजाशत्रुर्मित्रमतः परम् । उदासीनः परतरोज्ञेयः कार्यविशारदैः ॥

उदास्थितः । पुं । द्वारपाले । प्रतीहारे ॥ अध्यक्षे । पञ्चवर्गान्तर्गतचारविशेषे । प्रव्रज्यावसिते प्रव्रज्यारूढपतिते नष्टसन्न्यासे । प्रव्रज्यारूढपतितउदास्थितः । तंलोकेषुविदितदोषं प्रज्ञाशौचयुक्तं वृत्त्यर्थिनंज्ञात्वा रहसिराजा ब्रूयात् । यस्यदुर्वृत्तंपश्यसि तत् तदानीमेवमयि वक्तव्यमिति । तच्चवहूत्पत्तिकमस्थापयेत् । प्रचुरसस्योत्पत्तिकंभूम्यन्तरञ्च तद्वृत्त्यर्थमुपकल्पयेत् । सचान्येषामपिप्रव्रजितानां राजचारकर्म्मकारिणां ग्रासाच्छादनादिकंदद्यात् ॥ २ ॥ उदाङ्पूर्वात् ष्ठाधातोर्गत्यर्थाकर्म्मकेतिक्तः । द्यतिस्यतीतीत्वम् ॥

उदाहरणम् । न । उपोद्घाते । दृष्टान्ते । एकदेशप्रसिद्ध्याऽशेषप्रसिद्ध्यर्थं यदुदाह्रियतेतस्मिन ॥ उदाङ्पूर्वाद्धरतेर्ल्युट् ॥

उदाहारः । पुं । उपोद्घाते । उदाहृतौ ॥ उदाहरणम् । घञ् ॥

[* सहार्थे त्रितीया ।]

उदाहृतः । त्रि । उक्तरिते ॥

उदाहृतिः । स्त्री । उदाहरणे ॥ उदा पूर्वात् हृञः स्त्रियांक्तिन् ॥

उदितः । त्रि । उक्ते ॥ उचतेस्म । वद-व्य० । क्तः । वृट् । वचिस्वपीतिसम्प्रसारणम् ॥ उन्नते । उत्पन्ने ॥ यथा । उदिते जगतीनाथे य कुर्यादन्तधावनम् । सपापिष्ठ'कथंभूते पूजयामि जनार्दनमिति । वद्धे ॥ ऊर्ज्जिते ॥ उवतेस्म । दो अ०। क्तः । द्यतिस्यती तीत्वम्-॥

उदितोदित' । त्रि । शास्त्रज्ञे ।

उदीची । स्त्री । उत्तरदिशि । उत्उत्तर अञ्चन्त्यर्कम् । उत्क्रान्तंदृष्टिपथमञ्चतिसूर्यंवा । उदईदिग्यञ्चेरतई-कारः । ऋत्विगादिनाक्विन् । उगितश्चेतिङीप ।

उदीचीनः । त्रि । उदग्भवे । उदक् । विभाषाञ्चेरिति खः ।

उदीच्यः । पुं । शरावत्या पश्चिमोत्तरदेशे ॥ अथोदीच्यदेशाः । वाह्लीका वाटधानाश्चआभीराः कालतोयकाः । परन्ध्राश्चैवशूद्राश्च पल्लवाश्चात्तखण्डिकाः ॥ गान्धाराजवनाश्चैव सिन्धुसौवीरमद्रकाः । शकाद्रुह्या.पुलिन्दाश्चपारदाहारमूर्त्तिकाः ॥ रामठाः कण्टकाराश्च केकयादशमानिकाः । क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानिच ॥ आत्रेयोऽथभरद्वाज'प्रस्थलाः सदशेरकाः । लम्पकास्तलगानाश्चसैनिकाःसहसाकुनैः ॥ एतेदेशाउदीच्यास्तुपुराणमत्स्यसंज्ञके ॥ न । बालनामगन्धद्रव्ये । ह्रीबेरे ॥ त्रि । उदग्भवे ॥ उदीचिजाते ॥ उदीच्यांभव'जात आगतोवा । द्युप्रागपागुदक्प्रतीचोयत् ॥

उदीरणम् । न । कथने । उच्चारणे ॥

उदीरितः । त्रि । उक्ते ॥ उद्दीपिते ॥ उद्घोषिते ॥ उन्नते ॥ उदीर्यतेस्म । ईर् । क्तः ॥

उदीर्णः । त्रि । उदारे । महति ॥

उदुत्तमः । त्रि । अतिशयेनोत्तमे ॥ उत्तउत्तमः ॥

उदुम्बरः । पुं । जन्तुफलवृक्षे । यज्ञाङ्गे । हेमदुग्धे । डुमरइतिभाषा । उदुम्बरोहिमोरूक्षोगुरुः पित्तकफास्रनुत् । मधुरस्तुवरोवर्ण्योव्रणशोधनरोपणः ॥ देहल्याम् । गृहावग्रहण्याम् ॥ षण्डके । नपुंसके ॥ कुष्ठविशेषे ॥ न । ताम्रे ॥ यथा । यदुदुम्बरवर्णानां घटीनां मण्डलं महत् । पीतं नगमयेत्स्वर्गंकिन्तत् क्रतुगतंनयेदित्ययंश्लोकः सौत्रामणीयागे-सुरापानस्य दुष्टत्वमुद्भावयति । तत्र

महाभाष्यकारश्चाह । प्रमत्तगीतएषः तत्रभवतोयस्त्वप्रमत्तगीतस्तत्प्रमाणमिति । प्रमत्तगीतइति । प्रमादेनविप्रतिपन्नत्वेनगीत इत्यर्थइतिकैयटः । विप्रतिपन्नत्वेन वेदविषयविप्रतिपत्त्याश्रयत्वेन तत्त्वंस्वस्मिन्नारोप्यदैत्यनाशाय पूज्यस्यापिभगवतईश्वरस्यतथोक्तिरिति सन प्रमाणमितिभाव इतिविवरणकारः ॥ उं-प्रभुं वृणोति । वृञ्° । संज्ञायांभृतृवृजीतिखच् । अरुर्द्विषदितिमुम् । उत्कृष्टम् उम्बरम् । प्रादिसमासः । उत्क्रान्तमम्बरमनेन ॥ उदतिशयेनाम्बते वा । अविशब्दे । बाहुलकादरन् । पृषोदरादिः ॥ अभीतिरक्तिकापरिमिते । कर्षे ॥

उदुम्बरदला । स्त्री । दन्तीवृक्षे ॥ उदुम्बरस्येवदलान्यस्याः ॥

उदुम्बरपर्णी । स्त्री । दन्तिकौषधौ ॥ उदुम्बरस्येवपर्णान्यस्याः । पाककर्णेति ङीष् ॥

उदूखलम् । न । तण्डुलादिकण्डनार्थं काष्ठादिनिर्मिते कण्डनसाधने । उलूखले । ओखल इतिभाषा ॥ गुग्गुले । गुग्गुलौ ॥ ऊर्द्ध्वंखंतत्खम् । ऊर्द्ध्वंखंलाति । ला आ० । आतोनुपेति कः । पृषोदरादिः ॥

उदूढः । त्रि । ऊढे ॥ स्थूले ॥ उदुह्यते स्म । वह° क्तः ॥

उद्गतः । त्रि । उत्पन्ने । उदिते ॥ ऊर्द्ध्वंगते ॥ उद्वान्ते । छर्दितवस्तुनि ॥ निसृते ॥ यथा । वदनोद्गतावाणी । उद्गम्यते स्म । गम्लृ° । क्तः ॥

उद्गता । स्त्री । विषमवृत्तविशेषे ॥ सजसादिमेसलघुकौच नसजगुरुकेष्वथोद्गता । त्र्यङ्घ्रिगतभनजलागयुता' त्र जसाजगौचरणमेकतः पठेत् । इति तल्लक्षणम् ॥

उद्गमः । पुं । आविर्भावे । उद्भवे । ऊर्द्ध्वंगमने ॥ उद्गमनम् । गम्लृ° । ग्रहवृदृनिश्चिगमश्चेत्यप् ॥

उद्गमनम् । न । ऊर्द्ध्वंगमने ॥ ल्युट् ॥

उद्गमनीयम् । न । प्रक्षालितांशुक[illegible] ॥ उद्गम्यते अभिलष्यते । गम्लृ° । अनीयर् । इयद्रव्यविवक्षितम् । गृह्णीतवत्युद्गमनीयवस्त्रे । इतिदर्शनात् ॥ त्रि । ऊर्द्ध्वंगम्ये ॥

उद्गरणम् । न । उद्गारे ॥

उद्गाढम् । न । अतिशये । अत्यर्थे ॥ त्रि । अतिशययुक्ते ॥ उद्गाह्यतेस्म । गाहूवि° । क्तः ॥ क्रियाविशेषणत्वे क्लीवत्वम् । द्रव्यविशेषणत्वेतुवाच्यलिङ्गता ॥

उद्गाता । पुं । सामवेदज्ञर्त्विजि ॥ उद्गा

घतिसाम । गैशब्दे । हनहचोर्गसि चहादिभ्यः संज्ञायाम्बानिटौ ॥

उद्गारः । पुं । उद्वमने ॥ डकार इतिभाषाप्रसिद्धनागवायोः कर्मणि । कण्ठगर्जने ॥ उद्गरणम् । गृशब्दे । उन्न्योर्ग्रेइति घञ् ॥

उद्गारशुद्धिः । पुं । सधूमाम्लोद्गाराभावे ॥

उद्गारशोधनः । पुं । कृष्णजीरके ॥

उद्गिरणम् । न । अर्द्धमुखस्य वायोःक्रियायाम् । छर्दौ ॥ टवमउद्गिरणे इतिधातुपाठेन निपातनात् गिरतेः चरितत्वम् । अन्यथागुणेसति उद्गरणमिति स्यात् । यद्यप्ययंनिर्देश आधुनिकः तथासति पृषोदरादित्वंबोध्यम् ॥

उद्गीतम् । त्रि । उच्चैर्गीते ॥

उद्गीतिः । स्त्री । उच्चैर्गाने ॥ आर्याभेदे ॥ यथा । नारायणस्यसन्तत मुद्गीतिः संस्मृतिर्भक्त्या । अर्चायामासक्ति र्दुस्तरसंसारसागरे तरणिरिति ॥ उदुच्चैर्गीतिः गानम ॥

उद्गीथः । पुं । प्रणवे ॥ साम्नामुद्गाने ॥ सामविशेषे ॥ पाञ्चभक्तिकस्य साम्नो द्वितीयायां तृतीयायां वा भक्तौ ॥ उद्गीयतेऽसौ । गश्चोदीति थक् ॥

उद्गीर्णः । त्रि । उद्वमिते ॥ भक्षितस्या पकर्षणे ॥

उद्गूर्णः । त्रि । उद्यते । उत्तोलिते । उत्तोल्यधृतेवज्रादौ । उद्गूर्यतेस्म । गुरीउद्यमे । क्तः ॥

उद्ग्रन्थः । पि । उत्तुङ्गे ॥

उद्ग्रहणम् । न । उद्ग्राहे । ऊर्द्ध्वग्रहणे ॥ उपसंहरणे ॥ उत्ऊर्द्ध्वंग्रहणम् ।

उद्ग्राहः । पुं । वादप्रभेदे । विचारविचारे ॥ उद्ग्रहणे । ऊर्द्ध्वीकृत्यकस्यचिद्ग्रहणे ॥ उद्ग्रहणम् । ग्रहउपादाने । उदिग्रहइति घञ् ॥

उद्ग्राहमल्लः । त्रि । वादसमर्थे ॥ उद्ग्राहेमल्लइव ॥

उद्ग्राहिणी । स्त्री । पाशाख्यरज्जौ । फाँसा इतिभाषा ॥

उद्ग्राहितः । त्रि । उपन्यस्ते । बद्धे ॥ उदीर्णे ॥ ग्राहिते ॥ प्रत्यायिते ॥

उद्घः । पुं । हस्तपुटे ॥ वह्नौ ॥ श्लाघायाम ॥ उद्धन्यते उत्कृष्टोज्ञायते । हन्तेःकर्मण्यप् टिलोपाद्यत्वञ्चनिपातनात् ॥ देहजानिले ॥ पि । प्रकाण्डे । प्रशस्ते ॥ उद्घश्चिनीचताम् । उत्पूर्वाद्धन्तेः सङ्घोद्घौ गणप्रशंसयोरितिनिपातितः । मनुष्योद्घः । मनुष्यस्यरूढिशब्दत्वात् प्रशंसावचनैश्चेतिसमासः । प्रशस्तोमनुष्यइत्यर्थः ॥

उद्घनः । पुं । काष्ठतक्षणसाधने । अधः

काष्ठे ॥ निधायतक्ष्यते यत्रकाष्ठे का ष्ठंसउद्घनः । ऊर्द्धंहन्यते ऽस्मिन् । उद्घनोऽत्याधानमिति अधिकरणेऽप्॥
उद्घर्षः । पुं । घर्षणे । झामकेन गात्रादिघर्षणे ॥
उद्घर्षणम् । न । झामकेन पादादिगात्रघर्षणे ॥ इष्टकयोद्घर्षणे गुणाः । कण्डुकोठनाशित्वम् त्वग्गताग्नितेजनत्वम् । शिरामुखकारकत्वञ्च ॥
उद्घसम् । न । मांसे ॥ इतिहारावली॥
उद्घाटः । पुं । उद्घाटने ॥ गृहविशेषे । चौकीकाघर इतिभाषा ॥
उद्घाटकम् । न । पुं । कूपाज्जलोद्धृत्यर्थंयन्त्रविशेषे । घटीयन्त्रे । अरहट इतिभाषा । घिर्नी इतिच ॥
उद्घाटनम् । न । कूपाज्जलोत्तोलनार्थंयन्त्रे । घटीयन्त्रे । अरहटरहँटइतिचभाषा । कूपात्सलिलमुद्घाट्यतेऽनेनवा । घटसङ्घाते । करणे । ल्युट्॥
उद्घाटितः । त्रि । अपावृते । कृतोद्घाटने । उघाडा खुलाइतिभाषा ॥ गृहेऽनुद्घाटितद्वारिनाहूतः प्रविशन्नर । वारितार्थंप्रवक्तापिपञ्चाशन्मशनंत्यजेदितितन्त्रशास्त्रम् ॥ घटेः क्तः । इट् ॥
उद्घाटिताङ्गः । पुं । माघे ॥ त्रि । अनावृतगात्रे॥ उद्घाटितानिअङ्गान्यस्य॥
उद्घातः । पुं । पादस्खलने ॥ समुपक्रमे ॥ पवनाभ्यासयोगायकुम्भकादिनये । पवनाभ्यासयोगस्यकालभेदे ॥ नाभिमूलात् प्रेरितस्यवायोर्विविच्यमानस्यशिरस्यभिहननमुद्घात इत्युच्यतेसेयंकालपरीक्षा । प्राणेन प्रेर्य्यमाणेनअपानःपीड्यतेयदि । गत्वाचोर्द्ध्वंनिवर्त्तेत एतदुद्घातलक्षणम् । उत्तुङ्गे ॥ मुद्गरे ॥ आरम्भे ॥ शस्त्रे ॥ ग्रन्थपरिच्छेदे ॥ उत्हननम् । हन० । घञ् । हनस्तोचिण्णलोः ॥ पाषाणादिभिःप्रतिघाते । ठोकर आखलीत्यादिभाषाप्रसिद्धे ॥ यथा । ययावनुद्घातसुखेन मार्गमितिरघुः ॥
उद्घुष्टः । त्रि । उद्घोषिते । नादिते ॥
उद्घोषः । पुं । उद्घोषणे ॥ घुषघुष्टौ । घञ् ॥
उद्घोषितः । त्रि । उद्घुष्टे ।
उद्दंशः । पुं । उत्कुणे । मत्कुणे । कोत्कुणे । किटिभे ॥ उत्कृष्टोदंशः ।
उद्दण्डपालः । पुं । सर्प्पविशेषे ॥ मत्स्यप्रभेदे ॥
उद्दन्तुरः । त्रि । उत्तुङ्गे ॥ कराले ॥ उत्कटदन्ते ॥
उद्दानम् । न । बन्धने ॥ उतपूर्वात्द्यतेर्भावेल्युट् ॥

उद्दान्तः । त्रि । उत्कृष्टदमिते ॥

उद्दामः । पुं । प्रचेतसि । वरुणे ॥ पञ्चचत्वारिंशदक्षरायांवृत्तौ ॥ त्रि । अप्रतिबद्धे । बन्धरहिते ॥ स्वतन्त्रे ॥ महति ॥ यथा । उद्दामदन्तुरविधुन्तुददन्तघातैः । इतिप्रबज्या ॥ गम्भीरे ॥

उद्दामगीः । त्रि । प्रगल्भवाचि ॥

उद्दालः । पुं । बहुवारके । लसोडा इतिभाषा ॥ वनकोद्रवे ॥ उद्दालस्तु भवेदुष्णोग्राही वातकरोभृशम् ॥ उद्दालयति । दलविशरणे । णिजन्तादच् ॥

उद्दालकः । पुं । वेदादिषुप्रसिद्धे ऋषिविशेषे । श्वेतकेतोःपितरि ॥ बहुवारकवृक्षे ॥ स्वार्थेकः ॥

उद्दालकपुष्पभञ्जिका । स्त्री । क्रीडाविशेषे ॥ यथा । विधिविष्णुमुखामरोदयस्थितिनाशेषुशिवोप्यनीश्वरः । जगदम्बतवत्त्वयङ्क्रमः क्षणमुद्दालकपुष्पभञ्जिकेति ॥ उद्दालकस्यश्लेष्मातकस्यपुष्पाणिभज्यन्तेयस्यांक्रीडायां सा । संज्ञायामितिण्वुल् ॥ नित्यंक्रीडाजीविकयोरिति षष्ठीसमासः ॥

उद्दिष्टः । त्रि । उपदिष्टे ॥

उद्दीपकः । त्रि । उद्दीपनकर्त्तरि ॥

उद्दीपनम् । न । प्रकाशने ॥ विभावविशेषे ॥

उद्दीपितः । त्रि । प्ररोचिते ॥ व्यक्ते ॥

उद्दीप्तम् । त्रि । अतिप्रकाशिते ॥ उद्दीप्यतेस्म । दीपीदीप्तौ । क्तः ॥

उद्देशः । पुं । अनुसन्धाने । अन्वेषणे ॥ सोपपत्तिकस्वरूपसङ्क्षेपे ॥ कीर्त्तने ॥ यथा । नवने नन्दनोद्देशे नचैत्ररथसंश्रये । इतिरामायणप्रयोगः ॥ उद्दिश्यते । दिशअतिसर्जने । हलश्चेतिघञ् ॥

उद्देशकः । त्रि । उद्देशकर्त्तरि ॥ उदाहरणे ॥

उद्देशतः । अ । एकदेशेन ॥ सार्वविभक्तिकस्तसिल् ॥

उद्देश्यः । त्रि । उद्देष्टव्ये । उद्देशनीये । प्रयोजने ॥ यमुद्दिश्यविधेयस्यप्रवृत्तिर्भवति ॥

उद्देहिका । स्त्री । कीटविशेषे । उपजिह्विकायाम् ॥

उद्योतः । पुं । प्रकाशे ॥ उद्द्योतनम् । द्युत० । घञ् ॥

उद्द्रावः । पुं । पलायने । सन्द्रावे ॥ उद्द्रवणम् । द्रुगतौ । उदिश्रयतियौतिपूद्रुवइति घञ् ॥

उद्धतः । पुं । राजमल्ले ॥ त्रि । चञ्चले । वाक्पाणिपादचापलवति । अविनी

ते । अशान्ते ॥ प्रगल्भे ॥ आदृते ॥

उद्धतमनस्कत्वम । न । अभिमाने । गर्वे ॥

उद्धतिः । स्त्री । उन्नतौ ॥

उद्धरणम् । न । उद्धारे । मुक्तौ ॥ वान्तान्ने ॥ उन्मूलने ॥ ऋणशुद्धौ ॥ उन्नये ॥ उद्ध्रियते । उद्धरते ल्युः भावेवा ॥

उद्धर्षः । पुं । उत्सवे । उद्धर्षयति । हृषु अलीके णिजन्तः । उद्गतोहर्षोयेनेति वा । घञ ॥

उद्धर्षणम् । न । रोमाञ्चे ॥

उद्धवः । पुं । कृष्णमातुले । कृष्णशिष्ये । वृष्णीनांसम्मतो मन्त्री कृष्णस्यदयितः सखा । शिष्योबृहस्पतेः साक्षादुद्धवोबुद्धिसत्तमइतिश्रीविष्णुभागवतम ॥ उत्सवे । यज्ञे ॥ क्रतुपावके । यज्ञाग्नौ ॥ उद्धुनोति दुःखम् । धूञ कम्पने पचाद्यच् ॥

उद्धानम । न । चुल्ल्याम् ॥ उद्धीयतेऽत्र । डुधाञ० । ल्युट् ॥ त्रि । उन्नते । वमिते ॥

उद्धारः । पुं । उद्धृतौ । मुक्तौ ॥ यथा । पण्डितोपिहि मूर्खोसौ शक्तियुक्तोप्यशक्तिकः । यःसंसारार्णवात्मानं समुत्तारयितुंनक्षमइति वह्निपुराणम् ॥ ऋणे ॥ परहस्तगतद्रव्यस्य पुनरादाने ॥ उद्ध्रियते । हृञ० । धृञ० वा । कर्मणिघञ ॥

उद्धारणम् । न । उद्धारकरणे ॥

उद्धुरः । त्रि । निर्भरः । दृढे ॥ ऋक्पूरित्यादिनासमासान्तः ॥

उद्धूतः । त्रि । अतिशयिते ॥ उत्थापिते ॥

उद्धूननम् । न । ऊर्द्ध्वप्रक्षेपणे ॥

उद्धूलनम् । न । व्यञ्जनोपकरणभूतेषु चूर्णे ॥ यथा । एलालवङ्गकर्पूरकस्तूरीमरिचलक्षणम् । चूर्णस्योद्धूलनं देयंभोज्येष्वीरेषुसम्भवे ॥ व्यञ्जनेषु चसर्वेषुशाकजेष्वन्नजेषुच । मांसमत्स्यभवेष्वेवंप्रलेहतलनादिषु ॥ आदावेवपचेत्स्नेहे ततोहिङ्गूदकंक्षिपेत् । वेसवारं सलवणंचिह्नातत्पिशितंपचेत् ॥ अर्द्धस्विन्नेक्षिपेत्क्रमथवा दाडिमीरसम् । सिद्धेपाके प्रदातव्यंचूर्णमुद्धूलनस्यतदिति ॥

उद्धूषणम् । न । रोमाञ्चे ॥ इतिहलायुधः ॥

उद्धृतः । त्रि । उत्क्षिप्ते ॥ परिभुक्तोज्झिते ॥ कृतोद्धरणे । समुद्धृते । उठाया इतिभाषा । पृथक्कृते ॥ उच्छेदिते ॥ उद्ध्रियतेस्म । हृञ० धृञ् वा । क्तः ॥

उद्धृतपाणिः । त्रि । उत्तरीयाद्बहिष्कृतदक्षिणबाहौ ॥ उद्धृतः पाणिर्येन ॥

उद्धृतिः । स्त्री । उद्धारे ॥ धृञ् क्तिन् ॥

उद्ध्मानम् । न । चुल्लिकायाम् । चूल्हा भट्टी इतिभाषा ॥ उत् ध्मायतेऽग्निरत्र । ध्माशब्दाग्निसंयोगयोः । ल्युट् ॥

उद्धः । पुं । नदे ॥ उज्झत्युदकम् । उज्झ उत्सर्गे । भिद्योद्ध्यौनदे इति कर्त्तरिक्यप् उज्झेर्धत्वञ्चनिपात्यते ॥

उद्बन्धनम् । न । ऊर्द्ध्वबन्धने । गलेमेरस्सीदेकरलटकमनी फांसी इति-भाषा ॥

उद्बुद्धः । त्रि । विकसिते ॥ इतिशब्दायु-धः ॥

उद्बोधः । पुं । किञ्चिद्ज्ञाने ॥

उद्भटः । पुं । कच्छपे ॥ शूर्पे । प्रस्फोटने । छूप इतिभाषा ॥ ग्रन्थाद्बहि-र्भूतश्लोके ॥ त्रि । श्रेष्ठाशये । महा-शये । महात्मनि ॥ प्रवरे ॥

उद्भवः । पुं । जन्मनि । उत्पत्तौ ॥ उ-त्कर्षेभगवद्विभूतिशब्दिते ॥ उद्भवनम् । उद्भवत्यस्मादितिवा । भू० । ऋदोरप् ॥ हरौ ॥ मपर्वंप्रत्युपादानकारणत्वात् । उद्गतोभवात् संसाराद्वा । उत्कृष्टंजन्मस्वेच्छयाभजते इति वा ॥

उद्भावनम् । न । कल्पने ॥

उद्भावितः । त्रि । उत्थापिते ॥

उद्भासितः । त्रि । प्रकाशिते ॥

उद्भिज्जः । त्रि । उद्भिद्यजाते । बीजकाण्डप्ररोहिस्थावरमात्रे । भूमिमुद्भि-द्यजातेतृणवृक्षादौ ॥ यथा । उद्भि-ज्जाः स्थावराः सर्वे बीजकाण्डप्ररो-हिणः इतिमनुः ॥ उद्भेदनमुद्भित् । सम्पदादिक्विप् । उद्भिदोजातम् । पञ्चम्यामजाताविति डः ॥

उद्भिद् । पुं । यागविशेषस्यनाम्नि ॥ उद्भिद्यते पशुफलमनेन यागेनेति-निरुक्तेः ॥ त्रि । उद्भिज्जे ॥ तत्पञ्च-विधम् । तृणवृक्षगुल्मलतावल्लीभे-दात् ॥ भुवमुद्भिनत्ति । भिदिर् वि० । इगुपधेतिकः ॥

उद्भूतम् । त्रि । उत्पन्ने । जाते ॥ उद्भवतिस्म । भू० । क्तः ॥ प्रत्यक्षयोग्ये ॥

उद्भिदम् । त्रि । तरुगुल्मादौ । उद्भि-ज्जे ॥ न । पांशुलवणे ॥ उद्भिनत्ति । भिदिर्० । इगुपधेतिकः ॥

उद्भूतरूपम् । न । नयनगोचररूपे ॥ यथा । उद्भूतरूपंनयनस्यगोचरोद्र-व्याणितद्वन्तिपृथक्त्वसङ्ख्ये । विभाग संयोगपरापरत्वस्नेहद्रवत्वं परिमा-णयुक्तम् ॥ क्रियांजातिंयोग्यवृत्तिंसमवायञ्चतादृशम् । गृह्णातिचक्षुस्सम्बन्धादालोकोद्भूतरूपयोरितिका-रिकावली ॥

उद्भेदः । पुं । रोमाञ्चे ॥ उद्भिद्यतेऽ

छित्वा । अकर्त्तरि चेतिघञ् ॥ स्फुरणे ॥

उद्भ्रमः । पुं । उद्वेजने । उद्वेगे ॥ उद्भ्रमणम् । भ्रमुअनवस्थाने । घञ् । नोदात्तोपदेशेति न वृद्धिः ॥

उद्भ्रान्तः । त्रि । भ्रमान्विते । भ्रान्तिमापन्ने ॥ न । बाहुमुक्तमण्डलाकारेणखड्गभ्रामणे ॥

उद्यतः । त्रि । प्रवृत्ते ॥ उद्गूर्णे ॥ ऊर्द्ध्वीकृते ॥ पुं । ग्रन्थपरिच्छेदे ॥ उद्यम्यतेस्म । यमउप० । क्तः ॥

उद्यमः । पुं । उद्योगे । गुरणे ॥ उद्यमनम् । यमउपरमे । घञ् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । अतउद्यमइतिनिर्देशाद्वा ॥

उद्यमनम् । न । उत्क्षेपणे ॥

उद्यमितः । त्रि । प्रेरिते ॥

उद्यानम् । न । निःसरणे ॥ प्रयोजने ॥ आक्रीडे । फलप्रधानैराज्ञः सर्वोपभोगयोग्यवने ॥ उद्यमे ॥ उद्यान्त्यनेन नअस्मिन्वा । या प्रापणे । करणेल्युट् ॥

उद्यानपालः । पुं । माली इतिख्याते आक्रीडरक्षके ॥ उद्यानाध्यक्षे ॥

उद्युक्तः । त्रि । उद्यमयुक्ते । उद्योगविशिष्टे । उद्योगिनि ॥

उद्योगः । उद्यमे । यत्ने । चेष्टायाम् । यथा । उद्योगादनिवृत्तस्य सुसहायस्य धीमतः । छायेवानुगतातस्य नित्यंश्रीः सहचारिणीति ॥

उद्योगी । त्रि । उद्योगयुक्ते । उद्यमिनि ॥ यथा । उद्योगिनंपुरुषसिंहमुपैति लक्ष्मीर्दैवेनदेयमितिकापुरुषावदन्ति । दैवंनिहत्यकुरुपौरुषमात्मशक्त्यायत्नेकृतेयदिनसिद्ध्यतिकोऽत्रदोषइति ॥

उद्योजकः । त्रि । प्रवर्त्तके ॥

उद्रः । पुं । जलजन्तुविशेषे । अम्बुविडाल ओडविडाल इतिभाषा ॥ उनत्ति । उन्दी० । स्फायीतिरक् ॥

उद्रङ्कः । पुं ।
उद्रङ्गः । पुं । } प्रतिमार्गके । नङ्गे ॥

उद्रथः । पुं । रतकीले ॥ ताम्रचूडखगे ॥

उद्रिक्तः । त्रि । स्पष्टे । स्फुटे ॥ उद्रिच्यतेस्म । रिच० । क्तः ॥

उद्रेकः । पुं । अतिशये । वृद्धौ ॥ उपक्रमे ॥

उद्रेका । स्त्री । महानिम्बे । डेक वकायन इतिभाषा ॥

उद्वत्सरः । पुं । वत्सरे ॥

उद्वमनम् । न । उद्गिरणे ॥

उद्वर्त्तः । त्रि । अतिरिक्ते । उबरा इति भाषा ॥ यथा । उद्वर्त्तोक्षिप्यन्थः समधिकफलमाचष्टे ॥

उद्वर्त्तनम् । न । उत्पतने । ऊर्द्ध्वगतौ ॥ विलेपने ॥ घर्षणे ॥ उत्सादने । शरीरनिर्मलीकरणगन्धद्रव्यादौ । उबटना इतिभाषा ॥ उद्वर्त्यतेऽनेन । इतुव० णयन्तः । ल्युट् ॥

उद्वर्त्तित. । त्रि । उद्भ्रामिते ॥

उदर्द्धनम् । न । अन्तर्हासे ॥

उद्वर्हितः । त्रि । उद्धृते ।

उध्वसन. । त्रि । वासोरहिते ॥

उद्वहः । पुं । पुत्रे ॥ सप्तवाय्वन्तर्गतवायुविशेषे ॥ सतुप्रवहवायोरूर्द्ध्वस्थितः ॥ इतिशिरोमणिः ॥ उत्ऊर्द्ध्वं नवहति । वहप्रापणे । पचाद्यच् ॥ नायके ॥

उद्वहा । स्त्री । कन्यायाम् । पुत्र्याम् ॥

उद्वान्तः । पुं । निर्मदेगजे ॥ उद्गतंवान्तमन्तर्मदं वमनमस्मात् ॥ त्रि । उद्वमिते । उद्गते । वमिस्वाच्यक्तोऽमादौ ॥ उद्वम्यतेस्म । टुवम् उ० । क्त ॥

उद्वासनम् । न । वधे । मारणे । वास च्छेदने । चुरादिः । भावे ल्युट् ॥

उद्वाहः । पुं । विवाहे । दारपरिग्रहे । भार्यात्वसम्पादकग्रहणे । परिणये ॥ उत्कृष्टंवहनम् । वह० । घञ् ॥

उद्वाहनम् । न । विवाहे । रथारणे ॥ द्विगुणाकृते । द्विसीत्ये । द्विवारकृष्टक्षेत्रे ॥

उद्वाहनी । स्त्री । रज्जौ । वराटके । रस्सीइतिभाषा ॥

उद्वाहितः । पुं । परिणीते ॥

उद्वाहिता । स्त्री । परिणीतायाम् ॥ कस्मिंश्चित्काले आगमोक्तान्यमार्गेण विवाहितागर्हिता भवति । यथा ।उद्वाहितापियानारीजानीयात्सातुगर्हितेत्यागमसिद्धान्तः ॥

उद्वाहुः । त्रि । ऊर्द्ध्ववाहुपुरुषे । उद्यतहस्ते ॥ उद्वाहुरिववामनः ॥

उद्विग्नः । त्रि । क्षुभिते । उद्वेगयुक्ते । दु.खपरिहाराक्षमतया व्याकुलचित्ते ॥ भीते । ओविजीभयचलनयोः । क्तः । ओदितश्चेति तस्य न. । श्वीदितइतिनेट् ॥

उद्विग्नमनाः । त्रि । कम्पितहृदये ॥

उद्विवर्हणम् । न । उद्धरणे ॥

उद्वृत्तः । त्रि । उच्छ्रिते । उत्क्षिप्ते ॥ परिभुक्तोज्झिते ॥ दुर्वृत्ते ॥

उद्वेगः । पुं । उद्वेजने । उद्भ्रमे । एकाकीविजने कथंसर्वपरिग्रहशून्योऽहंविश्रामीत्यवंविधे व्याकुलतारूपेचित्तवृत्तिविशेषे ॥ विरहजन्येदु:खे । उद्गमने ॥ भये ॥ न । गुवाकफले । सुपारी इतिभाषा ॥ उद्गतोवेगोऽस्मात् ॥ त्रि । स्तिमिते ॥ शीघ्रगामिनि ॥ उद्वाहौ ॥ उद्वेजनम् ।

ओविजी० । इन् ॥

उद्वेजनम् । न । उद्वेगे ॥

उद्वेजनीय: । चि । उद्वेगकरे ॥

उद्वेल । त्रि । वेलामुल्लङ्घ्यवर्त्तमाने सिन्धौ ॥ उद्गतो वेलाम् । अत्यादय इतिसमास: ॥

उद्वेष्टनम् । न । हस्तपादयोर्ग्रन्थौ । वाँ जटा सरली इतिभाषा ॥ उन्मुक्तबन्धविश्लेषे ॥

उद्वोढा । पुं । परिणेतरि ॥ कलिकाले आगमोक्तान्यमार्गेण विवाहंकुर्वाणोगर्हितोभवति । यथा । उद्वोढापि भवेत् पापी संसर्गात् कुलनायिके । वेश्यागमनजं पापं तस्यपुंसोदिनेदिने । इतिमहानिर्वाणतन्त्रम् ॥

उन । चि । निकृष्टे ॥

उननुन्न: । त्रि । निकृष्टेन विद्धे ॥

उन्द: । पुं । क्लेदने । आर्द्रीभावे ॥

उन्दनम् । न । क्लेदने ॥

उन्दक' । पुं । मूषिके ॥ इतिद्विरूपकोष' ॥

उन्दुर: । पुं । मूषिके ॥

उन्दुरु: । पु । आखौ । मूषिके ॥ उनत्ति । उन्दी० । बाहुलकादुरु: ॥

उन्दुरुकर्णी । स्त्री । आखुकर्णीलतायाम् ॥

उन्दूरु: । पुं । मूषके ॥ इतिहेमचन्द्र ॥

उन्न: । त्रि । क्लिन्ने ॥ इत्यपरे ॥ उनत्ति स्म । उन्दीक्ले० । कर्त्तरिक्त: । नुदविदेतिनत्वं मत्वम् ॥

उन्नत: । चि । उच्चे । प्रांशौ ॥ उन्नमतिस्म । णमप्रह्वत्वे । गत्यर्थेतिक्त: ॥ महति ॥ उन्नतानामनुगमने खलु सम्पदोऽग्रत:स्था: ॥

उन्नतनाभि: । त्रि । वृद्धनाभौ ॥

उन्नतभूतलम् । न । माले ॥ उन्नतञ्च तत्भूतलञ्च ॥ चेन्नमाकह्यमाकम् ॥

उन्नतानतम् । त्रि । उच्चनीचस्थानादौ । वन्धुरे ॥ उन्नतञ्चतदानतञ्च ॥

उन्नति: । स्त्री । उदये ॥ समृद्धौ ॥ गरुडभार्यायाम् ॥

उन्नतीश' । पुं । गरुडे । वैनतेये ॥ समृद्धे ॥

उन्नद्ध: । त्रि । उत्कटे ॥ उद्धते ॥

उन्नमित: । चि । उत्तोलिते ॥ ऊर्द्धीकृते ॥

उन्नय. । पु । कूपादेर्जलादे रूर्द्धनयने ॥ उन्नयनम् । णीञ् ० । कचिदपवादविषयेप्युत्सर्गोभिनिविशत-इत्येरच् ॥

उन्नयनम् । न । वितर्के ॥ उन्नये ॥ त्रि । सोमकें ॥ णीञ्० । ल्युट् ॥

उन्नस: । त्रि । उन्नतनासिके ॥ उन्नतानासिकाऽस्य । उपसर्गाच्चेतिनसादेश: ॥

उन्माद: । पु । महच्छन्दे ॥

उन्नाय. । पुं । ऊर्द्धनयने । उन्नये । उ ठाने । इतिभाषा ॥ उन्नयनम । क्ली । ऊ प्रापणे । अयोदेर्निय इतिघञ् ॥

उन्नाहम । न । काञ्जिके ॥

उन्निद्र. । त्रि । उत्फुल्ले । विकसिते । प्रबुद्धे ॥ अप्रमादयुद्धे ॥

उन्मज्जक: । पुं । तपोविशेषासक्तसंज्ञे तापसविशेषे ॥ कण्ठदघ्नजलेस्थित्वा तपःकुर्वन्प्रवर्त्तते । उन्मज्जकः स-विज्ञेयस्तापसोलोकपूजितः ॥

उन्मत्त' । पुं । धत्तूरे । धूस्तूरे ॥ मुचुकुन्दवृक्षे ॥ त्रि । उन्माद्यति । अस्वातात्यावेशवति ॥ उन्मादयति । म द्दीक्षर्षे । । गन्ध्यर्थेति क्तः । नध्याख्येति न नत्वम ॥ उन्मत्तयतिवा । तत्करोतीतिणिच् । पचाद्यच् ॥

उन्मत्तक: । पुं । तापसान्तरे ॥ उन्नतो मत्तो मत्तत्वंयस्यसः । स्वार्थेकः ॥

उन्मथनम् । त्रि । व्यथके ॥ बाहुल कात्कर्त्तरि ल्युट ॥

उन्मथित । त्रि । उद्घर्षिते ॥

उन्मद. । त्रि । उन्मादविशिष्टे । उन्मदिष्णौ ॥ उन्नतोमदोहर्षोऽस्य ॥ मद करे । उन्मदयति । पचाद्यच् ॥

उन्मदिष्णु: । त्रि । उन्मादशीले । उन्मत्ते ॥ उन्मदनशीलः । मदीहर्षे । अलंकृञीतीष्णुच् ॥

उन्मना: । त्रि । उत्के । उत्कण्ठितमनसि ॥ उन्नतंमनोऽस्य ॥

उन्मनी । स्त्री । योगिनोवस्थाविशेषे ॥ यथाहुःपूज्यपादाः । उन्मन्यवस्थाधिगमायविद्वन्नुपायमेकंतवनिर्दिशाम: । पश्यन्नुदासीनतयाप्रपञ्चंसङ्कल्पमुन्मूलयसावधानइति ॥

उन्मन्थ: । पुं । वधे । मारणे ॥

उन्माथ: । पुं । कूटयन्त्रे । मृगादिवधोपयुक्ते यन्त्रे । आमिषंदत्त्वाख्यानपक्षिबन्धनार्थंयतस्न्धामयन्त्रंनिवेश्यते-तस्मिन् ॥ उन्मथ्यतेऽनेन । मथेवि-लोडने । हलश्चेति घञ् ॥ मारणे ॥ घातके ॥ उन्मथनम् । मथहिंसायाम् । घञ् ॥

उन्माद: । पुं । चित्तविभ्रमे ॥ भूताद्यावेशाच्चित्तानवस्थितौ ॥ निरुक्तिश्च: कश्चिच्चिदवस्थाविशेषे ॥ मानसरोगविशेषे । मतिभ्रंशे ॥ मदयन्त्युद्धतादोषायस्मादुन्मार्गमाश्रिता' मानसोयमतोव्याधिरुन्मादइतिकीर्त्तितः ॥ उन्मदनम । मदीहर्षे घञ ॥

उन्मादक । त्रि । उन्मत्तताजनकेधत्तूरादौ ॥

उन्मादन. । पुं । कामस्यपञ्चबाणान्तर्गतबाणविशेषे ॥

उन्मादवान् । वि । उन्मत्ते । वातकृत चित्तविभ्रमे ॥ उन्मादोस्यास्ति । मतुप् ॥

उन्मादी । त्रि । उन्मादिनि ॥ उत्पूर्वान्मदेः शमित्यष्टाभ्योघिनुण् ॥

उन्मानम् । न । ऊर्द्धमाने ॥ द्रव्यान्तरपरिच्छिन्नगुरुत्वेन पलादिशब्दवाच्येन पाषाणादिना तुलादावारोपितेन येनसुवर्णादेर्गुरुत्वमुन्मीयते तदूर्द्धारोपणादूर्द्धमानमितिशब्देन विवक्षितं तदुन्मानमिति ऊर्द्धमानं किलोन्मानमितिवार्तिकार्थदीक्षितोक्तेः ॥ वैद्यकपरिभाषयातु द्रोणपरिमाणे॥ सामान्यतो लोकव्यवहारेणतु परिमाणमात्रे ॥

उन्मिषित. । वि । प्रफुल्ले । विकसिते ।

उन्मीलनम् । न । उन्मेषे । विकासने ॥ उन्मीलनंचित्तकुतूहलानाम् । मीलनिमेषणे ल्युट् ॥

उन्मीलित. । त्रि । प्रस्फुटिते । विकसिते ।

उन्मुखः । वि । उत्पश्ये । ऊर्द्धास्ये ॥ उदूर्द्धमुखंयस्य ॥ उद्युक्ते ॥

उन्मुद्रः । त्रि । प्रफुल्ले । विकसिते ॥

उन्मूलनम् । न । उत्पाटने ॥ उन्मूलनं पापविनिन्दकानाम् ॥

उन्मूलित । वि । उत्पाटिते । कृतोत्पाटने ॥

उन्मेषः । पुं । चक्षुषोरुन्मीलने ॥ उन्मिषति । मिषस्पेषणे । इगुपधेतिकः ॥

उप । अ । अधिकार्थे ॥ हीनार्थे॥ आसन्ने । सामीप्ये ॥ सादृश्ये॥ प्रतियत्ने । गुणाधाने ॥ व्याप्तौ ॥ पूजायाम् ॥ शक्तौ ॥ आरम्भे ॥ दाने ॥ दोषाख्याने ॥ आश्चर्यकरणे ॥ अत्यये ॥ निदर्शने ॥ उद्योगे ॥

उपकण्ठम् । न । ग्रामान्ते । उपशल्ये ॥ अश्वस्यगमगतौ । आस्कन्दिते ॥ कण्ठासन्ने ॥ वि । निकटे । समीपे ॥ उपगतः कण्ठम् । अत्यादय इति समासः । उपगतः कण्ठःसामीप्यमस्येतिवा ॥

उपकरणम् । न । नृपादीनां छत्रचामरादौ । परिच्छदे ॥ साधनसामग्र्याम् ॥ यथा । भोजनादौ व्यञ्जनादि । पूजायां गन्धादि । रणे शस्त्रादि । मृगबन्धनादौ वागुरादि । एवमन्यदप्यूह्यम् ॥ उपक्रियते । कृ० । ल्युट् ॥

उपकर्त्ता । वि । प्रतिकर्त्तरि ॥ उपकारकारिणि ॥

उपकल्पितः । त्रि । समर्पिते ॥

उपकारः । पुं । उपकृतौ ॥ विकीर्णकुसुमादिषु ॥ उपकरणम् । कृञ् ।

घञ ॥

उपकारिका । स्त्री । उपकारकर्त्र्याम् ॥ पिष्टभेदे ॥ सामान्यनृपालये । पटमण्डपादिराजसदने । उपकरोति- । ण्वुल् । इत्त्वम् ॥

उपकारी । त्रि । उपकारकर्त्तरि । उपकारविशिष्टे । उपकारिणि मित्रे वा नोपकुर्यात्कथञ्चन । तं धिगस्तु नरं देही भवेन्नष्टगतस्तु वि ॥ दैवीनासत्या विति संबोध्य च्यवनोक्ति. ॥ म०इनिः॥

उपकारी । स्त्री । सामान्यसौधे । पटमण्डपादिराजसदने ॥ उपकारयति । पचाद्यजन्तात् गौरादित्वान्- ङीष् ॥

उ॰ ॰ र्य्यः । त्रि । उपकारयोग्ये ॥ कृ- ञोण्यत् ॥

उपकार्य्या । स्त्री । नृपालये । सामान्य राजगृहे ॥ पटमण्डपादिराजसदने । पटभवने ॥ उपक्रियते । कर्मणि ऋहलोर्ण्यत् । टाप् ॥

उपकुञ्चिः । स्त्री । कृष्णजीरके ॥ कलाजाज्याम् ॥

उपकुञ्चिका । स्त्री । कृष्णजीरके ॥ कलाजाज्याम् ॥ तुत्थायाम् । सूक्ष्मैलायाम् ॥ उपकुञ्चति । कुञ्चकौटिल्ये । ण्वुल् ॥

उपकुर्वाण, । पु । सावधिब्रह्मचर्यवति । स्वाध्यायग्रहणार्थिनि ॥

उपकुल्या । स्त्री । वैदेह्याम । पिप्पल्याम् ॥ उपकोलति । कुलसंस्त्यानेबन्धुषु च । अघ्न्यादिः ॥ त्रि । कुल्यासन्ने ॥ उपगता कुल्याम् ॥

उपकूजितम् । त्रि । नादिते । शब्दिते ॥

उपकूपः । पु । कूपसमीपस्थजलाशये । आहावे ॥ उपगतः कूपम् ॥ न । कूपसमीपे ॥

उपकृतिः । स्त्री । उपकारे ॥ उपकरणम् । स्त्रियांक्तिन ॥

उपकोसलः । पुं । वेदप्रसिद्धे कामलायनर्षौ ॥

उपक्रमः । पुं । उपधायाम् । राज्ञा धर्म्मार्थकामभयै रमात्यादेः परीक्षणे ॥ उपधाऽमात्यपरीक्षणमिति स्वामी- । उत्कोच इति नव्याः ॥ ज्ञात्वारम्भे । अयमस्योपायः अनेनैतत् सिध्यतीति ज्ञात्वा प्रथमारम्भे ॥ यथा मानेनन्दस्य प्रथमारम्भः उपक्रमः स्यु: । उपायपूर्व आरम्भे ॥ प्रथमारम्भे ॥ विक्रमे ॥ चिकित्सायाम् ॥ उपक्रमणम् अनेन वा । क्रमु० । भावे घञ् । उपक्रम्यते इति कर्मणि वा घञ् । नोदात्तोपदेशस्येति न वृद्धिः ॥

उपक्रमोपसंहारौ । पु । तात्पर्यनिर्णायक षड्विधलिङ्गेषु प्रथमलिङ्गयोः ॥ प्र

कारणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयो रुपपादनमुपक्रमोपसंहारौ । यथा छान्दोग्येषष्ठप्रपाठके प्रकरणप्रतिप्रा द्यस्याद्वितीयवस्तुन' एकमेवाद्वितीयमित्यादौ एतदात्म्यमिदंसर्वमित्यन्तेचप्रतिपादनम् ॥ उपक्रमश्च उपसंहारश्चतौ ॥

उपक्रान्तः । त्रि । तते । विस्तृते ॥

उपक्रोशः । पुं । निन्दायाम् । परीवादे ॥ उपक्रोशनम् । क्रुशआह्वाने । भावे घञ् ॥ न । क्रोशासन्ने ॥

उपक्रोष्टा । पु । स्त्री । गर्दभे ॥ त्रि । निन्दके ॥

उपक्लृप्तः । त्रि । विन्यस्ते ॥ उपभोगार्थंकृतसंस्कारे ॥ रचिते ॥

उपक्लेशः । पुं । मदादिषु ॥

उपक्वणः । पुं । वीणानिनदे ॥

उपक्वाणः । पुं । वीणायाः क्वणिते ॥ क्वणशब्दे । क्वणोवीणायाञ्चेतिमाचिके घञ् ।

उपचेपणधर्म्मः । पुं । शूद्रस्वामिकामान्नस्य पाकार्थं ब्राह्मणगृहेसमर्पणे ॥ इतिशुद्धितत्त्वेकल्पतरुः ।

उपगतः । त्रि । स्वीकृते ॥ आसन्ने ॥ ज्ञाते ॥ उपगम्यतेस्म । गम्लृ० । क्तः ॥ मासे ॥

उपगतिः । स्त्री । उपाये ॥ उपगम्यते । नया । गम्लृ० । क्तिन् ॥

उपगमः । पुं । अन्तिकगतौ । समीपगमने ॥ अङ्गीकारे । उपगमनम् । गम्लृ० । ग्रहवृद्दनिश्चिगमश्च० त्वप् ॥

उपगीतिः । स्त्री । आर्याप्रभेदे ॥ आर्यापरार्द्धसदृशं प्रथमार्द्धमपीरितयस्याम । उपगीतिर्यंभवन्त्वचितिनायकसोदिताकविभिः ॥ नवगोपसुन्दरीणां रासोल्लासेमुराराातिम् । अस्मारयदुपगीतिः स्वर्गकुरङ्गीदृशांगीतिम् ।

उपगूढः । त्रि । गृहीते ॥ उपगूहने ।

उपगूहनम् । न । आश्लेषे । परिरम्भे ॥ गुहू० । ल्युट् ॥

उपग्रहः । पुं । प्रग्रहे । वन्दिग्रह ... । वन्दीवान् वंदुवा इतिभाषा । व न्धाम् ॥ उपयोगे ॥ अनुकूलने ॥ अनुकूलवति ॥ सर्वतोभद्रचक्रोक्तोल्कादौ ॥ उपगृह्यते । ग्रहउपादाने । ग्रहवृद्रिश्चप् ॥

उपग्रहणम् । न । उपग्रहे ॥

उपग्रामम् । अ । ग्रामाधिकरणे । ग्रामेइत्यर्थे ॥ ग्रामे इति । विभक्त्यर्थेव्ययीभावः ॥

उपग्राह्यम् । न । उपायने । उपढौकने । भेट इतिभाषा ॥उपगृह्यते । ग्रह० । ण्यत् ॥

उपघातः । पुं । रोगे ॥ अपकारे ॥ उपहननम् । उपहन्यतेऽनेन वा भावे करणे वा हन्तेर्घञ् ॥

उपघ्नः । पुं । निकटाश्रये ॥ उपहन्यते उपहननं वा । उपघ्न आश्रय इति-साधुः ॥

उपचक्रः । पुं । चक्रवाक-पक्षिणि ॥

उपचङ्गः । पुं । उन्नतौ । वृद्धौ ॥ अरि-भद्र-सिद्ध-संवत्सर-ग्रहेषु । न-चङ्गवन्ति ते दृष्टाः पापस्वस्वामिशत्रुभिः ॥ उपचयनम् । चिञ् । अच् ॥

उपचरितः । त्रि । उपासिते । शुश्रूषिते । सेविते ॥ उपचर्यते स्म । चर० । क्तः ॥

उपचर्य्यः । त्रि । उपचरणीये ॥

उपचर्य्या । स्त्री । चिकित्सायाम् ॥ उपसमीपे चर्य्या ॥

उपचाय्यः । पुं । यज्ञाग्नौ ॥ अग्निधारणार्थस्थलविशेषे ॥ उपचीयते अग्निधारणार्थमिष्टकाचयनेन निर्मितं स्थलमग्निः तस्मिन्नभिधेये उपपूर्वाच्चिनोतेः अग्नौपरिचाय्योपचाय्यसमूह्या इति ण्यदायादेशौ निपात्येते ॥

उपचारः । पुं । रुक्प्रतिक्रियायाम् । निग्रहे । रोगप्रतीकारे । चिकित्सायाम् ॥ सेवायाम् ॥ व्यवहारे ॥ उत्कोचे ॥ पूजाद्रव्ये ॥ उपचर्यते उपचरणं वा । चर० । घञ् ॥

उपचारच्छलम् । न । धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेधे ॥ तथाहि । धर्मशब्दस्यार्थेन सम्बन्धः तस्य विकल्पो विविधः कल्पः शक्तिलक्षणान्यतररूपः । तथाच शक्तिलक्षणयोरेकतरवृत्त्या प्रयुक्ते शब्दे तदपरवृत्त्यायः प्रतिषेधः स उपचारच्छलम् । यथा । मञ्चाः क्रोशन्ति नीलो घट इत्यादौ मञ्चस्था एव क्रोशन्ति न तु मञ्चाः एवं घटस्य कथं नीलरूपाभेद इत्येवमहं नित्य इति शक्त्या प्रयुक्ते अमुकस्मादुत्पन्नस्त्वं कथं नित्य इति प्रतिषेधोऽप्युपचारच्छलम् । वाद्यभिप्रेतार्थस्यादूषणेन छलस्यासदुत्तरत्वम् । न च श्लिष्टलाक्षणिके प्रयोगाद्वादिन अपराधः स्यादिति वाच्यम । तत्तदर्थबोधकतया प्रसिद्धस्य शब्दस्य प्रयोगे वादिनोऽनपराधात् । अन्यथा पर्वतो वह्निमानित्युक्ते पर्वतोऽयं कथमवह्निमानित्यादिदूषणेनानुमानाद्युच्छेदः स्यात् ॥

उपचार्य्यः । पुं । चिकित्सायाम् । रोगप्रतीकारे ॥

उपचितः । त्रि । दग्धे ॥ समृद्धे ॥ समाहिते ॥ निदिग्धे । लेपादिनावर्द्धिते ॥ पुष्टे ॥ सञ्चिते ॥ उपचीयते स्म ।

चिन्न०। क्तः॥

उपचितिः। स्त्री। पूजायाम्॥

उपचित्रम्। न। एकादशाक्षरवृत्तविशेषे॥ यथा। मुरवैरिवपुस्तनुतांमुदं हेमनिभांशुकचन्दनलिप्तम्। गगनंचपलामिलितं यथा शारदनीरधरै रुपचित्रमिति॥

उपचित्रा। स्त्री। मूषिकपर्ण्याम्॥ दन्तीवृक्षे॥ स्वातीनक्षत्रे॥ उपगता चित्राम्॥

उपच्छन्नः। त्रि। गूढे॥

उपजनः। पुं। नानाविधदेहभेदसङ्ग्रहे॥ समीपजने॥ उपसमीपेजनः॥

उपजप्यः। पुं। उपजापार्हे॥ रिपुवंश्या राज्यार्थिनः क्रुद्धामात्याश्चोपजापार्हाभवन्ति॥

उपजातिः। स्त्री। वर्णवृत्तप्रभेदे॥ यथा उपेन्द्रवज्रापदसङ्गतानि यदीन्द्रवज्राचरणानिसन्ति। तदोपजातिःकथिताकवीन्द्रैर्भेदाभवन्तीह चतुर्दशास्याइति॥

उपजापः। पुं। खलादीनांमिथोभेदकभाषिते। भेदे। विच्छेदे॥ उपांशुजपनम्। जपव्यक्तायांवाचि। जपमानसेच। घञ्॥

उपजापसहः। त्रि। भेदयोग्ये॥ सहते। षहमर्षणे। पचाद्यच्। उपजापे सहः॥

उपजिह्वा। स्त्री। कीटविशेषे। वम्याम्॥ दीमक सीमक इतिचभाषा॥ इतिहेमचन्द्रः॥

उपजिह्विका। स्त्री। प्रतिजिह्वायाम्। घण्टिकायाम्॥ कीटविशेषे। उत्पादिकायाम्॥

उपजीविका। स्त्री। उपजीव्ये। जीवनोपाये॥ उपजीव्यतेऽनया। जीव प्रा०। गुरोश्चहलः। संज्ञायांकन्। कुन्वा॥

उपजीवी। त्रि। आश्रिते॥

उपजीव्यम्। न। उपजीविकायाम्॥

उपजोषम्। अ। आनन्दे। सु[illegible]॥ कल्याणार्थे॥ उपजोषणम्। जुषी प्रीतिसेवनयोः॥ अमप्रत्ययः॥ यथा कर्मभोगमित्यर्थे॥

उपजोषणम्। न। सेवने॥

उपज्ञा। स्त्री। आद्यज्ञाने॥ यथापाणिनेर्व्याकरणस्य वाल्मीकेःश्लोकनिर्माणस्य। उपज्ञायते। ज्ञाअवबोधने। आतश्चोपसर्ग इतिकर्मण्यङ्। उपज्ञानंवा॥ विनोपदेशेनाद्यज्ञाने॥

उपज्ञातः। त्रि। विनोपदेशेनज्ञाते॥

उपढौकनम्। न। पारितोषिकद्रव्ये। उपहारे। उपायने॥

उपतन्त्रम्। न। शास्त्रविशेषे॥ यथा।

वेदोक्तान्युपतन्त्राणि कापिलोक्तानि यानि च । अद्भुतानि च तन्त्राणि जैमिन्युक्तानि यानि च ॥ वशिष्ठः कपिलश्चैव नारदो गर्ग एव च । पुलस्त्यो भार्गवः सिद्धो याज्ञवल्क्यो भृगुस्तथा ॥ शुक्रो वृहस्पतिश्चैव अन्ये ये मुनिसत्तमाः । एभिः प्रणीतान्यन्यानि उपतन्त्राणि यानि च ॥ न सङ्ख्यातानि तान्यत्र धर्मविद्भिर्महात्मभिः । सारात्सारतराण्येव सङ्ख्यातानि निवोधतेति वाराहीतन्त्रम् ॥

उपतपनम् । न । सन्तापकरे ॥ तपसन्तापे । करणे ल्युट् ॥

उपतप्ता । पुं । उपतापकभावे । स्पृष्टरि उपतपति । तप० । तृच । उपतपनम् । कृत्यल्युटोबहुलमितिभावे तृच्चा ॥

उपतापः । पु । त्वरायाम् ॥ उत्तापे ॥ उपघाते । गदे ॥ इष्टवियोगादिना मानसपीडायाम् ॥ उपतापयति । तपदाहे । चुरादि । अच् ॥ उपतपनं वा । तपसन्तापे । घञ् । यथा । परोपतापनंकर्म नकर्त्तव्यंकदाचन । नसुखंविन्दतेप्राणी परपीडापरायणइति ॥

उपतापी । त्रि । ज्वराद्युपतापवति ॥ म० इनिः ॥

उपत्यका । स्त्री । अद्रेरासन्नायांभूमौ ॥ तराई इति तलहटी दूण इति च भाषा ॥ उपासन्ना । उपाधिभ्यांत्यकन्नासन्नारूढयोरिति त्यकन् । त्यकनश्चनिषेधइतीत्वाभावः ॥

उपदंशः । पुं । अवदंशे । मद्यपानरोचके भक्ष्यद्रव्ये ॥ मेढ्ररोगविशेषे ॥ तस्यनिदानम् । हस्ताभिघातान्नखदन्तघाता दधावनादत्युपसेवनाद्वा । योनिप्रदेषाच्चभवन्तिशिश्ने पञ्चोपदंशाविविधापचारैरिति ॥ समष्ठिलदृचे । शिग्रुवृक्षे ॥ दंशने ॥ उपदश्यते । दंशदशने । कर्मणिभावे वा घञ् ॥

उपदर्शकः । पुं । द्वारपाले ॥ दृशि यितरि ॥

उपदा । स्त्री । उत्कोचे ॥ उपायने ॥ उपदीयते । डुदाञ्० आतश्चोपसर्गइत्यङ् ॥

उपदानम् । न । उत्कोचे ॥ उपायने ॥ उपदीयते । डुदाञ्० । ल्युट् ॥

उपदानकम् । न । उपदाने ॥ स्वार्थे कः ॥

उपदिका । स्त्री । वम्याम् ॥ इति हेमचन्द्रः ॥

उपदिष्टः । त्रि । देशिते । प्राप्तोपदेशे ॥ उक्ते ॥ उपदिश्यते । दिशअतिसर्जने । क्तः ॥

उपदी । स्त्री । वन्दायाम् । वन्दाके ।

उपदेशः । पुं । अनुशासने ॥ चोदनायाम् । प्रवर्त्तकवाक्ये ॥ हितकथने ॥ मन्त्रकथने । दीक्षायाम् ॥ यथा । चन्द्रसूर्यग्रहेतीर्थे सिद्धक्षेत्रे शिवालये । मन्त्रमात्रप्रकथनमुपदेशः - सउच्यत इतिरामार्चनचन्द्रिका ॥ गुरुसम्प्रदाये ॥ यत्रापेक्षितस्यार्थजातस्य प्रतिपादकोग्रन्थसन्दर्भ. पठ्यते स उपदेशः ॥ उपदेशनम् । दिश॰ । घञ् ॥ साधनहीनायोपदेशोनिरर्थकः ॥

उपदेष्टा । पुं । उपदेशकर्त्तरि । आचार्ये ॥ उपदिशति । दिश॰ । तृच् ॥ आचार्यद्वारा आत्मसुखोपदेशके चिद्रूपे ॥

उपदेहः । पुं । वृद्धौ ॥

उपदेहिका । स्त्री । कीटविशेषे । उपजिह्वायाम् । दीमक इतिभाषा ॥

उपद्रव । पुं । उत्पाते ॥ रोगारम्भकदोषप्रकोपजन्येऽन्यस्मिन् विकारे ॥ यथा । योव्याधिस्तस्ययोहेतुर्दोषस्तस्यप्रकोपतः । योन्योविकारो भवति सउपद्रवउच्यते ॥ उपद्रवणम् । द्रुग । ऋदोरप् ॥

उपद्रष्टा । त्रि । उपदर्शके । उदासीनबोधरूपत्वेन गुणप्रचारदर्शिनि ॥ देहचक्षुर्मनोबुद्ध्यात्मसु द्रष्टृसुमध्ये- बाह्यान्देहादीनपेक्ष्याऽत्यन्तव्यवहिते द्रष्ट्रात्मनि पुरुषे । साक्षिपुरुषे ॥ यथा । ऋत्विग्यजमानेषु यजनकर्मव्यापृतेषु तत्समीपस्थोऽन्यः स्वयमव्यापृतो यज्ञविद्याकुशलत्वात् ऋत्विग्यजमानव्यापारगुणदोषाणामीक्षिता तद्वत् कार्यकरणव्यापारेषु स्वयमव्यापृतो विलक्षणस्तेषांकार्यकरणानां सव्यापाराणां समीपस्थो द्रष्टा उपद्रष्टा साक्षिपूरुषः ॥ उपपश्यति । दृशिर॰ । बाहुलकात तृन् ॥

उपद्रुतः । त्रि । व्याकुले ॥

उपधर्म्मः । पुं । पाषण्डे ॥ इतिश्रीभागवतम् ॥

उपधा । अ । भेदे ॥

उपधा । स्त्री । पदोपान्त्यवर्णे ॥ धर्म्माद्यैः परीक्षणे । राज्ञा धर्मार्थकामभयोपन्यासेन अमात्यादीनामाशयान्वेषणे ॥ यथोक्तं कालिकापुराणे । धर्म्मार्थकाममोक्षैश्चप्रत्येकं परिशोधनैः । उपेत्यधीयतेयस्मादुपधापरिकीर्त्तिता ॥ अर्थकामोपधाभ्यांतु भार्याः पुत्रांस्तुशोधयेत् । धर्म्मोपधाभिर्विप्रांस्तु सर्वाभिः सचिवान पुनरिति ॥ उपधीयते शुद्धित्वानमत्र । डुधाञ्॰ । आतश्चोपसर्गइत्यङ् । टाप् ॥ ॥

उपधातुः । पुं । अष्टप्रधानधातुसदृशेषु स्वर्णमाक्षिकादिसप्तसु ॥ यथा । सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम् । तुत्थं कांस्यञ्चरीतिश्च सिन्दूरञ्च शिलाजतु ॥ उपधातुषु सर्वेषु तत्तद्धातुगुणा अपि । सन्ति किन्त्वेषु ते गौणास्तत्तदंशभावत इति ॥ शरीरस्थधातुभवोपधातवश्च सप्त । यथा । रसात् स्तनदुग्धम् १ । रक्तात् स्त्रीरज २ । मांसात् वसा ३ । मेदसो घर्मः ४ । अस्थ्नोदन्त. ५ । मज्जनः केशः ६ । शुक्रात् ओज. ७ इति वैद्या. ॥

उपधानम् । न । विषे ॥ गण्डौ । उपर्हे । सिराहना इति भाषा ॥ प्रणये ॥ व्रते ॥ उपधीयते आरोप्यते शिरोऽत्र । उधाञ० । करणेतिल्युट् ॥ विशेषे ॥

उपधानीयम् । न । उपबर्हे । शिरोधाने ॥

उपधिः । पुं । कपटे । व्याजे ॥ रथचक्रे ॥ उपधीयते आरोप्यतेऽनेन । उधाञ० । उपसर्गेघोःकिः ॥

उपधूपितः । त्रि । आसन्नमरणे ॥ परिधूपिते ॥

उपधृति' । स्त्री । किरणे ॥

उपध्मानीय. । पुं । पफयोः पूर्वमर्द्धविसर्गसदृशे विसर्गविशेषे ॥

उपनत. । त्रि । उपस्थिते ॥ प्राप्ते ॥

उपनयः । पुं । उपनयने ॥ यथा । गृह्योक्तकर्मणा येन समीपंनीयते गुरोः । बालोवेदाय तद्योगाद्बालस्योपनयं विदुरितिस्मृतिः ॥ न्यायविशेषे ॥ यथा । उदाहरणापेक्षस्तथेत्युपसंहारो नतथेतिवा साध्यस्योपनयः ॥ न्या० सू० १ । ३७ साध्यस्यपक्षस्य उदाहरणापेक्षउदाहरणानुसारी यं उपसंहार. उपन्यास. प्रकृतोदाहरणोपदर्शितव्याप्तिविशिष्टहेतुविशिष्टपक्षविशिष्टबोधजनकोपायावयवइत्यर्थः । निगमनं हेतुविशिष्टत्वेन नपंक्षबोधकम् किन्तुपक्षवृत्तिहेतुबोधकमिति तद्व्युदासः । अत्रच अन्वयव्यतिरेकव्याप्त्योरन्यतरत्वादिनानुगमं कार्यं. उदाहरणोपदर्शितेतितुपरिचायकमात्रमितितु नवाच्यम् । उदाहरणविपरीतव्याप्त्युपदर्शकोपनयवारकत्वात् । वस्तुतोऽवयवपदेनैव तद्व्युदासः । सचोपनयोद्विविधोऽन्वयिव्यतिरेकिभेदात् । तथेतिसाध्यस्योपसंहारोऽन्वय्युपनयः । नतथेतिसाध्यस्योपसंहारोव्यतिरेक्युपनयः । अत्रच तथाशब्दप्रयोगावश्यकत्वे नतात्पर्यम् किन्तुव्याप्तिविशिष्टवत्त्वबोधे-

। तथाचवह्निर्व्याप्यधूमवाँश्चायमिति वा तथा चायमिति वोपन्यासः। एवं व्यतिरेकिण्यपि वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवांश्चायमिति वा न तथेति वोपन्यासः ॥

उपनयनम्। न। आम्नायैर्वटुकृत्याया म्। ब्राह्मणक्षत्रियविशां यज्ञसूत्रधारणादिरूपप्रधानसंस्कारे। व्रतबन्धे। अध्ययनार्थमाचार्यस्य उपसमीपं नीयते येन कर्मणा तस्मिन्॥ णी ञ्ोल्युट्॥ पादयोर्निपतने॥ प्रापणे॥

उपनागरिका। स्त्री। वृत्त्यनुप्रासघटकवृत्तिप्रभेदे॥ माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकेष्यते॥ उदाहरणम्। अपसारय घनसारं कुरुहारं दूर एव किं कमलैः। अलमलमालिमृणालैरिति वदति दिवानिशं बालेति॥ वैदर्भीरीतौ॥

उपनायः। पुं। उपनयने॥

उपनायनम्। न। उपनयने॥ उपनयनमेव। अन्येषामपि दृश्यत इति दीर्घः॥

उपनाहः। पुं। व्रणलेपनपिण्डे। प्रलेप इति भाषा॥ वीणायां यत्र तन्त्री निबध्यते तस्योर्द्ध्वभागे। निबन्धने॥ वीणादितन्त्रबन्धनस्थाने॥ उपनह्यतेस्मिन्। णह०। हलश्चेति-

घञ्॥

उपनिधिः। पुं। निक्षेपभेदे। [illegible]निवस्तुनि। उपन्यस्तवस्तुनि। न्यासे। वासनस्थमनाख्याय हस्ते न्यस्य यदर्पितम्। द्रव्यमुपनिधिः प्रोक्तः स्मृतिषु स्मृतिवेदिभिः॥ उपनिधीयते। डुधाञ्०। उपसर्गे घोः किः॥

उपनिषत्। स्त्री। वेदशिरोभागे॥ तत्राशीतिसहितशताधिकसहस्रसङ्ख्याका उपनिषदश्चतुर्णां वेदानाम्। तथाहि। ऋच एकविंशतिः। यजुषो नवाधिकशतम्। साम्नः सहस्रम्। पञ्चाशदुपनिषदोऽथर्वणस्य॥ ब्रह्मविद्यायाम्। ब्रह्मात्मैक्यसाक्षात्कारे॥ यथाहुः। अत्रचोपनिषच्छब्द[illegible]विद्यैकगोचरः। तच्छब्दावयवार्थस्य विद्यायामेव सम्भवात्॥ उपोपसर्गः सामीप्ये तत्प्रतीचि समाप्यते। सामीप्यतारतम्यस्य विश्रान्तेः स्वात्मनो यतः॥ त्रिविधस्य सदर्थस्य निशब्दोपि विशेषणम्। उपनीय तमात्मानं ब्रह्मापास्त द्वयं यतः॥ निहन्त्यविद्यां तज्जं च तस्मादुपनिषद्भवेत्। निहत्यानर्थमूलं स्वाविद्यां प्रत्यक्तया परम्॥ गमयत्यस्तसम्भेदमतो वोपनिषद्भवेत्॥ प्रवृत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः। यतोऽवसादयेद्वि-

स्यात्स्मात्पनिषद्भवेत् ॥ यथोक्तावि द्याहेतुत्वाङ्गन्योपितदभेदतः। भवेदु पनिषन्नामाख्याङ्गलं जीवनंयथेति ॥ उपनिषद्नम् उपनिषोदति श्रेयो- ऽस्यांवा । षद्लृविशरणगत्यवसादने षु । सं० क्विप् सत्सूद्विष इतिवा- । सद्रिप्रतेरितिषः ॥ धर्म्मे ॥ नि र्जनस्थाने । रहसि ॥ समीपसद ने ॥ व्रतविशेषे ॥ रहस्यग्रन्थे पुराणोप निषदादौ ॥

उपनिष्करम् । न । महति राजमार्गे । पु रस्यघण्टापथे ॥ उपनिष्किरन्तिसैन्या न्यच । कृविक्षेपे । घः ऋदोरपतुन । अपोवाधकस्ल्युटोपि षस्याऽपवाद- त् ॥ यद्वा । उपनिष्कीर्यते सैन्यै र्हन्यते । कृहिंसायाम् । कर्मण्यप् । इदुदुपधस्येति षः ॥

उपनिष्क्रमणम् । न । निष्क्रमणाख्यसं स्कारे ॥ प्रधानमार्गे । राजपथे ॥ उपनिष्पूर्वातक्रमे ल्युट् ॥

उपनिहित. । त्रि । निक्षिप्ते ॥

उपनीत' । पुं । कृतोपनयने ॥ त्रि । प्रापिते ॥ समर्पिते ॥ उपपूर्वान्नय तेः क्तः ॥

उपनेत्रम् । अ । स्फटिकादिनिर्मितेने त्रोपकारके ॥ नेत्रयोः समीपम् ॥

उपन्यस्तः । त्रि । समर्पिते ॥

उपन्यासः । पुं । वाङ्मुखे । वाक्योपक्रमे ॥ उपन्यसनम् । अमुक्षेपणे । घञ् ।

उपपति. । पुं । जारे ॥ उपमितःपत्या । अवादय' क्रुष्टाद्यर्थे तृतीययेतिस मास. । उपसृष्टः पतिरनेनवा । प्रा दिभ्योधातुजस्यवाच्योवाचोत्तरपद लोपश्चेतिसमासः ॥

उपपत्ति' । स्त्री । सङ्गतौ ॥ समाधाने । सिद्धान्ते ॥ अनुग्राहिकायांयुक्तौ । युक्तौ ॥ षड्विधलिङ्गेषुषष्ठलिङ्गे ॥ य था । प्रकरणप्रतिपाद्यार्थसाधने तत्र श्रूयमाणायुक्तिरुपपत्ति. । यथा । छान्दोग्येषष्ठप्रपाठके यथासोम्यैके न मृत्पिण्डेन सर्वंमृन्मयं विज्ञातंस्या त्वाचारम्भणं विकारो नामधेयं मृ त्तिकेत्येवसत्यमित्याद्यावद्वितीय- वस्तुसाधने विकारस्य वाचारम्भणमा त्रत्वयुक्तिःश्रूयते ॥ उपपदनम् । पद गतौ । स्त्रियांक्तिन् ॥

उपपत्तिमत् । त्रि । युक्तियुक्ते ॥

उपपदम् । न । पदस्यसमीपपदे । समी पोच्चारितेपदे । व्यावर्त्तके ॥ यथाना मोत्तरे शर्म्मवर्म्मादि ॥ लेशे ॥ समभि व्याहृतस्वार्थपोषकपदे ॥ यथा प्रद्वा रादौ प्रादि ॥ उपोच्चारितं पदम् ॥

उपपन्नः । त्रि । अर्हे ॥ युक्ते । सङ्गते ॥

उपपातकम् । न । पापविशेषे ॥ यथा॰

उपपा

मनु । गोवधोऽयाज्यसंयाज्यपार-
दार्य्यात्मविक्रया. । गुरुमातृपितृ
त्यागः स्वाध्यायाग्न्योःसुतस्यच ॥
परिवित्तितानुजेनोढे परिवेदनमे
वच-। तयोर्दानञ्चकन्यायास्तयोरेव
चयाजनम् । कन्यायादूषणञ्चैव वा
र्द्धुष्यं व्रतलोपनम् । तडागारामदा
राणामपत्यस्यचविक्रयः॥ व्रात्यता
बान्धवत्यागो भृत्याध्यापनमेवच।
भृताच्चाध्ययनादान मपण्यानाञ्च-
विक्रयः ॥ सर्वाकरेष्वधीकारोमहा
यन्त्रप्रवर्त्तनम् । हिंसौषधीनांस्त्या
जीवो ऽभिचारो मूलकर्मच ॥ इन्ध
नार्थमशुष्काणांद्रुमाणामवपातनम्
। आत्मार्थञ्चक्रियारम्भो निन्दिता
न्नादनंतथा॥ अनाहिताग्नितास्तेय
मृणानामनपक्रिया। असच्छास्त्राधि
गमनंकौशीलव्यस्यच क्रिया ॥ धा
न्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवण
म् । स्त्रीशूद्रविट्क्षत्रवधो नास्ति
क्यञ्चोपपातकमिति॥ अस्यार्थः। गो
हननम् १। जातिकर्मदुष्टानांयाजन
म् २। परपत्नीगमनम् ३। आत्म
विक्रयः ४। गुरुत्यागो मातृत्यागः
पितृत्यागः ७। गुर्वादीनांशुश्रूषाद्य
करण मित्यर्थः॥ सर्वदाब्रह्मयज्ञत्या
गः ८। अग्नेस्स्मार्त्तस्य त्यागः ९। सु
तस्यच संस्कारभरणाद्यकरणरूप -
स्त्यागः १० ॥ कनिष्ठेनादौविवाहे
कृते ज्येष्ठस्य परिवित्तिता भवति
११ । अकृतदारज्येष्ठस्त्वकृतदा-
रस्य कनिष्ठस्य परिवेदनम १२-
। तयोश्चकन्यादानम् १३। तयोरे
वविवाहहोमादियागेष्वार्त्विज्यम्-
१४ ॥ कन्याया मैथुनवर्जमङ्गुलीमक्षे
पादिना दूषणम् १५ । वृद्धिजीवन
म १६ । व्रतलोपनं ब्रह्मचारिणोमै
थुनम् १७ । तडागविक्रयः १८ । आ
रामविक्रयः १९ । भार्याविक्रयः २०
अपत्यविक्रयः २१ ॥ यथाकालमनु
पनयनं व्रात्यता २२ । बान्धवानां
पितृव्यादीनामननुवृत्तिः २३ ति
नियतवेतनग्रहणपूर्वकमध्यापनं भृ
त्याध्यापनम् २४। प्रतिनियतवेत
नप्रदानपूर्वक मध्ययनञ्च भृतादध्य
यनादानम् २५। अविक्रेयाणां तिल
लाक्षागोरसादीनां विक्रयः २६ ॥
सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाऽ
धिकारः २७। महतां जलप्रवाहप्रति
बन्धहेतूनांयन्त्राणां सेतुबन्धादीनां
प्रवर्त्तनम् २८। ओषधीनां जाति
माषादीनां हरितानां धान्यानां छिं
सनंनाशः २९। भार्यादिस्त्रीणां वेश्या
त्वं कृत्वातदुपजीवनं स्त्र्याजीवः ३०

श्येनादियज्ञेनानपराद्धस्य मारणम भिचार. ३१। मन्त्रौषधादिना वशीकरण मूलकर्म ३२॥ इन्धनार्थम शुष्काणां द्रुमाणां छेदनम् ३३। अनातुरस्य देवपित्राद्युद्देशमन्तरेण पाकाद्यनुष्ठान मात्मार्थं क्रियारम्भः ३४। निन्दितस्य लशुनादेर्भक्षणं ज्ञिन्दिताश्चादनम् ३५॥ सन्त्यधिका ऽग्न्यनाधानमनाहिताग्निता ३६ स्तेयं सुवर्णादन्यस्य सारद्रव्यस्या पहारः ३७। देवर्षिपितृणामृणस्य अनपक्रियाऽशोधनम् ३८। असच्छास्त्रस्य श्रुतिस्मृतिविरुद्धस्य शिक्षणं ३९। कौशीलव्यस्यतौर्यत्रिकस्य उप ॰॰नं सततानुष्ठानम् ४०॥ धान्य स्तेयम् ४१। कुप्यस्यताम्रलोहादे श्चौर्यम ४२। पशूनांचौर्यम ४३। द्विजातीनां पीतमद्यायाः स्त्रियाः ग मनम४४। स्त्रीवधः ४५। शूद्रवधः ४६ वैश्यवध ४७। क्षत्रियवध. ४८। अ दृष्टार्थकर्माभावबुद्धि र्नास्तिक्यम् ४९। एतत् प्रत्येक मुपपातकमि त्यर्थः॥

उपपादनम्। न। सम्यक्कथने॥

उपपादितः। त्रि। सम्यक्कथिते॥ सम र्पिते॥

उपपादी। त्रि। उपपादनशीले॥

उपपापम्। न। उपपातके॥

उपपुरम्। न। शाखानगरे॥ पुरसन्निधौ॥ उपसमीपे पुरम्॥

उपपुराणम्। न। व्यासोक्ताष्टादशपुराणसदृशनानामुनिप्रणीताष्टादशपुराणेषु॥ तानियथा। आद्यंसनत्कुमारोक्तं १ नारसिंहमतः परम् २। तृतीयं वायवीयञ्च ३ कुमारेणानुभाषितम्। चतुर्थं शिवधर्माख्यं ४ साक्षान्नन्दीशभाषितम्। दुर्वाससोक्तमाश्चर्यं ५ नारदीयमतः परम् ६॥ नन्दिकेश्वरयुग्मञ्च७ तथैवोशनसेरितम् ८। कापिलं ९ वारुणं १० शाम्बं ११ कालिकाह्वयमेवच १२॥ माहेश्वरं १३ तथापाद्मं १४ दैवं सर्वार्थसाधकम् १५। पराशरोक्तमपरं १६ मारीच १७ भास्कराह्वयम् १८॥ इतिकूर्मपुराणम्॥ दैवं देवीपुराणम्॥

उपपुष्पिका। स्त्री। जृम्भायाम्। हाफिकायाम्॥ इतिहारावली॥

उपप्रदानम्। न। उत्कोचे॥ उपसमीपेप्रदानम्॥ दानाख्यउपाये॥ भूमिधनादीनांप्रदानमुपप्रदानम्॥

उपप्लवः। पु। सैंहिकेये॥ विघ्ने॥ उत्पाते॥ ग्रहणे॥ यथा। उपप्लवञ्च सोरवेश्चेति स्मृतिः॥ उपप्लवनम्

। गुङ्गतौ । ऋदेरप् ॥

उपप्लवी । त्रि । सभये ।

उपप्लुत. । त्रि । ह्रदिते ॥ प्लवमाने ॥ पीडिते ॥

उपबृंहितः । त्रि । वर्द्धिते ॥

उपभुक्तिः । स्त्री । उपभोगे ॥ उपभोजनम् । भुज० । क्तिन् ॥

उपभूषणम् । न । घण्टाचामरादिषु ॥ यथा । घण्टाचामरकुम्भादि पात्रोपकरणादिकम् । तद्भूषणान्तरेद्यायस्मात् तदुपभूषणमिति ॥ मावरः पानपात्रम्बगेण्डुकोगृहमेव च । पर्यङ्कादियदन्यत्सर्वंतदुपभूषणमितिकालिकापुराणे ६८ अध्यायः ॥

उपभृत् । स्त्री । स्रुचोभेदे । चक्राकारेण्ड्पात्रे ॥ आश्वत्थ्युपभृदित्याप स्तम्बः॥ उपविभक्ति। डुभृञ्। क्विप ॥

उपभोगः । पुं । निर्वेशे । भोजनातिरिक्तभोगे ॥ उपभोजनम् । भुज० । घञ् ॥

उपमन्त्रणम् । न । रहस्युपच्छन्दने ॥

उपमन्युः । पुं । मुनिविशेषे ॥

उपमर्दः । पु । धर्मिनिवृत्तौधर्म्यन्तरप्रयोगे ॥ यथा अस्तेर्भूः ॥ अभावे ॥

उपमा । स्त्री । उपमाने । सादृश्ये ॥ अलङ्कारविशेषे । यथा । उपमायत्र

सादृश्यलक्ष्मीरुल्लसतिद्वयोः । हंसीवकृष्णतेकीर्त्तिः स्वर्गङ्गामवगाहते- ॥ यत्रोपमानोपमेययोःसहृदयहृदयाह्लादित्वेनचारुसादृश्यमुद्भूततयोल्लसति व्यङ्ग्यमर्यादाविनास्पष्टंप्रकाशते तत्रोपमालङ्कारः । हंसीवेत्युदाहरणम् । इयम्पूर्णोपमेत्युच्यते । हंसीकीर्त्तिः स्वर्गङ्गावगाहनमिवशब्दश्चेत्येतेषा मुपमानोपमेयसाधारणधर्मोपमावाचकानाञ्चतुर्णामप्युपादानात् ॥ यथावा । गुणदोषौ वुधोगृह्णन्निन्दुक्ष्वेडाविवेश्वरः ॥ शिरसाश्लाघतेपूर्वंपरकण्ठेनियच्छति॥अत्रयद्यप्युपमानोपमेययोर्नैकःसाधारणोधर्मः। उपमानेश्वरे चन्द्रगरलयोर्ग्रहणमुपादानंतयोर्मध्येपूर्वस्यचन्द्रस्य शिरसाश्लाघनंवहनम् । उत्तरस्य गरलस्यकण्ठे नियमनंस्थापनम् । उपमेयेवुधेगुणदोषयोर्ग्रहणं ज्ञानं तयोर्मध्ये पूर्वस्यगुणस्य शिरसाश्लाघनं शिरःकम्पनेनाभिनन्दनम्। उत्तरस्यदोषस्यकण्ठेनियमनंकण्ठादुपरि वाचा अनुद्घाटनमितिभेदात् । तथापिचन्द्रगरलयोर्गुणदोषयोश्च विम्बप्रतिविम्बभावेनाभेदात् उपादानज्ञानादीनांग्रह्णन्नित्याद्येकशब्दोपादानेनाभेदा

उपमा

ध्यवसायाञ्च साधारणधर्मतेति पूर्वं स्मादिशेषे. । वस्तुतोभिन्नयोरप्युपमानोपमेयधर्मयो. परस्परसादृश्यादभिन्नयोः पृथगुपादानं विम्बप्रतिविम्बभाव इत्यालङ्कारिक समय. ॥ * ॥ उपमाने ॥ उपपूर्वान्माङोभावे करणेवा अङ्॥ उपमानं येनोपमीयते याचोपमिति. सोपमेत्यर्थ ॥

उपमाता । स्त्री । मातृतुल्यायाम् ॥ सोषड्विधा । यथा । मातृस्वसामातुलानी पितृव्यस्त्री पितृष्वसा । श्वश्रूःपूर्वजपत्नीच मातृतुल्या.प्रकीर्त्तिताः इतिस्मृति. ॥ धायइतिभाषयाभाषितायां धात्र्याम्॥ त्रि। उपमानकर्त्तरि ॥

उपमानम् । न । उपमायाम् । सादृश्ये ॥ अधिकगुणेचन्द्रादौ ॥ सादृश्यज्ञाने । उपमितिकरणे । यथा गौ गवय स्तथेतिवाक्ये ॥ प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमिति न्यायसूत्रम् । १। ६ । प्रसिद्धस्यपूर्वप्रमितस्यगवादेः साधर्म्यात् सादृश्यात् तज्ज्ञानात् साध्यस्यगवयादिपदवाच्यत्वस्यसाधर्मसिद्धिरुपमान मुपमितिर्यतइत्यध्याहारेणच करणलक्षणम् । अथवा साध्यसाधनमिति करणल्युटा करणलक्षणमेवेदम्। अत्रचवैधर्म्यो

उपमि

पमितिमपिमन्यन्ते टीकाकृत.* । यथाच अतिदीर्घग्रीवत्वादिपशूक्ता, वैधर्म्यज्ञानादुष्ट्रेकरभपदवाच्यताग्रह. । एवमन्योप्युपमानस्य विषय इतिभाष्यम् । तथामुद्गपर्णी सदृसी ओषधी विषंहन्तीत्यतिदेशवाक्यार्थे ज्ञाते मुद्गपर्णीसादृश्यज्ञानेजाते इयमोषधी विषहरणीत्युपमित्या विषयी क्रियते इत्यादि ॥ उपमितौ । उपमित्यनुयोगिनि ॥ उपमीयतेयेन तदुपमानम । उपपूर्वान्माङः करणे ल्युट् । प्रादिसमास.। उपपूर्वकोमाङ् सादृश्यहेतुके परिच्छेदेरूढ. । येनवस्त्वन्तरं सादृश्येन परिच्छिद्यते तदुपमानमित्यर्थ.। यथागौरिव गवय । इहहिगौःकरणम् । सादृश्यंहेतु' । पुरुष परिच्छेत्ता । सहिगोसादृश्येन गवयंपच्छिरन्ति ॥

उपमितः । त्रि । सादृश्यङ्गते ॥ उपमेये ॥

उपमिति. । स्त्री । उपमायाम् ॥ मितिभेदे । संज्ञासंज्ञिसम्बन्धज्ञाने ॥ न्यायमतेन सादृश्यज्ञानजन्यज्ञाने । उपमाने ॥ यथा गोसदृशोगवयपदवाच्यइत्याकारशक्तिज्ञानम् । अस्यकरणंगवादिसादृश्यवत पिण्डप्रत्य

त्वम् । अस्यव्यापारः अतिदिष्टवाक्यार्थसंस्मरणम् । इत्युपमानखण्डम् ॥ अपिच । ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् । सादृश्यधीर्गवादीनां यास्यात्सोपमितिः स्मृता ॥ वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते । गवयादिपदानान्तु शक्तिधीरुपमाफलम् ॥ पदज्ञानन्तुकरणं शक्तिधीरुपमाफलमिति भाषापरिच्छेदः ॥ उपमानम् । डुमिञ्० । क्तिन् ॥

उपमेतः । पुं । शालवृक्षे ॥ इतिशब्दचन्द्रिका ॥

उपमेयम् । त्रि । उपमिते ॥ उपमीयते यत् तत् । माङ् । अचोयत् । ईद्यति ॥

उपमेयोपमा । स्त्री । अर्थालङ्कारविशेषे ॥ यथा । पर्यायेणद्वयोस्तच्चेदुपमेयोपमामता । धर्मोर्थइवपूर्णश्रीरर्थोधर्मइवत्त्वयि ॥ द्वयोः पर्यायेणोपमानोपमेयत्वकल्पनं तृतीयसादृश्यव्यवच्छेदार्थम् । धर्मोर्थम् । धर्मार्थयोर्यदिकस्यचित् केनचित्सादृश्ये वर्णिते तस्याप्यनेन सादृश्य मर्थसिद्धमपिमुखतोवर्ण्यमानं तृतीयसादृश्य व्यवच्छेदार्थंफलति । यथावा । खमिव जलं जलमिवखं हंसश्चन्द्रइव चन्द्रइवहंसः । कुमुदाकारास्तारास्ताराकाराणि कुमुदानि ॥ पूर्वेच पूर्णश्रीरितिधर्म उपात्तः इहामत्त्वादिधर्मानोपात्त इति भेदः । उदाहरणद्वयेऽपिप्रकृतयोरेवोपमानोपमेयत्वकल्पनम् । राज्ञि धर्मार्थसमृद्धे शरदि गगनसलिलादिनैर्मल्यस्यच वर्णनीयत्वात् । प्रकृताप्रकृतयोरप्येषा सम्भवति । यथा । गिरिरिवगजराजोयं गजराजइवोच्चैर्विभातिगिरिः । निर्झरइवमदधारा मदधारेवास्यनिर्झरःस्रवतीति ॥

उपयन्ता । पुं । दयिते । पत्यौ ॥ उपयच्छति । यमउपरमे । तृच् ॥

उपयमः । पुं । विवाहे ॥ उपयमनम् ॥ यम० । यमः समुपनिविषुचेत्यप् ॥

उपयमनम् । न । विवाहे ॥

उपयाचकः । त्रि । समीपे याञ्चाकर्त्तरि ॥

उपयाचितः । पि । दिव्यदोहदे । स्वेष्टार्थसिद्धये देवायदेये वस्तुनि ॥ प्रार्थिते ॥

उपयाचितकम् । त्रि । उपयाचिते । स्वेष्टलब्धये देवदेये ॥

उपयाजः । पु । यज्ञाङ्गे ॥ एकादशोपयाजाः । उपपूर्वाद्यजेर्घञि प्रयाजानुयाजयोः प्रदर्शनार्थत्वात्कुत्वाभावः ॥

उपयामः । पुं । विवाहे ॥ उपयमनम । यम॰ । यम.समुपनिविषुचेतिपक्षे घञ ॥

उपयुक्त । त्रि । उचिते । योग्ये ॥ उपयुज्यते । युजिर॰ । क्त ॥

उपयोग । पु । आचरणे ॥ इष्टसिद्ध्यर्थव्यापारे ॥ उपयुज्यते । युज॰ । घञ ॥

उपयोगिता । स्त्री । आनुकूल्ये । प्रयोजने । फलसाधनतायाम ॥ उपयोगिनो भाव । तल ॥

उपयोगी । त्रि । अनुकूले । उपयुक्तद्रव्यादौ । क्रियासाधने ॥ उपयोगोऽस्ति अस्याश्मिन् वा । अतइनिठनाविती नि. ॥

उपरक्त । पु । स्वर्भानौ । राहौ ॥ राहुग्रस्ते इन्दौ सूर्ये च । राहुकर्तृकग्रहणकर्मीभूते चन्द्रे अर्के च ॥ त्रि । व्यसनार्त्ते । दैवमानुषान्यतरपीडायुक्ते ॥ आसक्ते ॥ उपरज्यतेस्म । रञ्जरागे । कर्मणिक्त ॥

उपरक्षक. । त्रि । रक्षितरि ॥

उपरक्षणम । न । रक्षार्थैसैन्यविन्यासे । सज्जने । चौकी पहरा इति च भाषा ॥

उपरत. । त्रि । सर्वविषयविनिर्मुक्तेपरिव्राजि । संन्यासिनि ॥ मृते ॥ विरते । निवृत्ते ॥

उपरतस्पृह' । त्रि । इच्छारहिते ॥ सर्वथापिसत्त्वे स्वगतधनेच्छारहिते ॥

उपरति. । स्त्री । विषयेभ्यइन्द्रियाणां परावृत्तौ । निवर्त्तितानामेषांश्रोत्रादिपञ्चेन्द्रियाणां श्रवणादिव्यतिरिक्तविषयेभ्यउपरमणे ॥ विहितानांकर्मणा विधिनापरित्यागे॥ पुनर्थं कर्मणानेतिधीरेषोपरतिर्भवेदित्युक्ते. ॥ लाभप्राप्तावौदासीन्ये॥ विरतौ ॥ उपरमणम् । रमक्रीडायाम् । क्तिन् ॥

उपरत्नम् । न । गौणरत्ने ॥ तानियथा । उपरत्नानिकाचश्च कर्पूराश्मातथैवच । मुक्ताशुक्तिस्तथाशङ्खइत्यादीनिवहून्यपि ॥ गुणायथैवरत्नानामुपरत्नेषुतेतथा । किन्तुकिञ्चित्ततोहीनाविशेषोयमुदाहृत इति ॥

उपरथ्या । स्त्री । क्षुद्रवीथिकायाम् ॥

उपरन्ध्रम् । न । अश्वस्यरन्ध्रोपरिभागे ॥ यथोक्तम् । कुक्षिनाभ्यन्तरेरन्ध्रमुपरन्ध्रंतथोपरीति ॥

उपरम. । पुं । उपरतौ । वैराग्ये ॥ उपरमणम । रम॰ । घञ । यमउपरमेइति निपातनान्नवृद्धिः ॥ ना, शे ॥ उपरमतेऽश्मिनवा ॥

उपरमणम । न । परावृत्तौ ॥

उपरस । पुं । गन्धकादिषु ॥ यथा । गन्धोहिङ्गुलमभ्रतालकशिलास्रोतोञ्जनंटङ्कणंराजावर्त्तकचुम्बकौस्फटिकयाशङ्खःखटीगैरिकम् । कासीसंरसकंकपर्दसिकताबोलाश्चकङ्कुष्ठकं सौराष्ट्रीचमताअमीउपरसाःसूतस्यकिञ्चिद्गुणैः ॥ अथैषांशोधनविधिः । सूर्यावर्त्तोवज्रकन्दः कदलीदेवदालिका । शिग्रुकोषातकीवन्ध्याकाकमाचीचवालुकम् ॥ एषामेकरसेनैव त्रिधारैर्लवणैःसह । भावयेदम्लवर्गैश्चदिनमेकं प्रयत्नतः ॥ ततपचेत्तद्द्रावैर्दोलायन्त्रेदिनंसुधीः । एवंशुद्ध्यन्तितेसर्वे प्रोक्ताउपरसाह्वये ॥ विशेषश्च । कङ्कुष्ठंगैरिकंशङ्खकासीसंटङ्कणंतथा । नीलाञ्जनंशुक्तिभेदाः क्षुल्लकाः सवराटिकाः ॥ जम्बीरवारिणास्विन्नाःक्षालिताः कोष्णवारिणा । निश्चमायान्त्यमीयोज्याभिषग्भिर्योगसिद्धयेइति ॥

उपरागः । पुं । ग्रहणे । राहुग्रस्तार्कचन्द्रयोः । राहुकर्तृकचन्द्रादिकर्मकग्रहणरूपक्रियायाम् ॥ दुर्नये ॥ ग्रहकल्लोले ॥ व्यसने ॥ धिगाने । निन्दायाम् ॥ उपरज्यतेऽनेन सूर्यश्चन्द्रश्च । रञ्जरागे । हलश्चेति घञ् । घञिचभावकरणयोरितिनलोपः ॥ सम्बन्धे ॥ यथा । गुणोपरागःस्वेच्छात पुरुषस्यकल्पत इतिसहस्रनामभाष्यम् ॥

उपराम । पुं । निवृत्तौ । विरतौ ॥ उपरमणम् । रम० । घञ् । रमेरनुदात्तोपदेशत्वान्न वृद्धिनिषेधः ॥ निरहङ्कारत्वे ॥

उपरि । अ । ऊर्द्ध ॥ ऊर्द्ध ऊर्द्धायाम् ऊर्द्धात् ऊर्द्धाया ऊर्द्ध मूर्द्धं वा वसत्यागतोरमणीयंवा । उपर्युपरिष्टादिति ऊर्द्धस्योपादेशोरिल् प्रत्ययश्च ॥

उपरिचरः । पुं । वसुविशेषे ॥ विमानेनोर्द्धंनिरन्तरंगमनादुपरिचर इति नामास्य । स्वगतिरयचेदिदेशाधिपतिरासीत् ॥

उपरिवुद्धिः । त्रि । उत्तानवुद्धौ ॥ उपर्युपरिवुद्धीनां चरन्तीश्वरवुद्धयइत्यत्र उपरिवुद्धीना मुत्तानवुद्धीना मुपरिचरन्तीत्यर्थात् ॥

उपरिष्टात् । अ । ऊर्द्ध ॥ ऊर्द्ध ऊर्द्धायाम् ऊर्द्धात ऊर्ध्वायाः ऊर्ध्वम् ऊर्ध्वा वा वसति आगतो रमणीयंवा । उपरिउपरिष्टादित्यूर्द्धस्य उपादेशोरिष्टातिल्च प्रत्ययः॥

उपरीतक । पु । शृङ्गारवन्धविशेषे ॥ तल्लक्षणं यथा एकपादमुरौ कृत्वा

द्वितीयं स्कन्धसंस्थितम् । नारीका मथतेकामीवन्धःस्या दुपरीतकइति ॥ अत्रविपरीतको पिपाठ. ॥

उपरुद्ध: । त्रि । मूत्रादिवेगवति ॥

उपरूपकम् । न । नाटकप्रभेदे । स चाष्टादशविधो यथा । नाटिका त्रोटकं गोष्ठी सट्टकं नाव्यरासकम् स्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥ संलापक श्रीगदितं शिल्पकञ्चविलासिका । दुर्मल्लिकाप्रकरणी हल्लीशेभाणिकेतिच ॥ अष्टादशप्राहुरुपरूपकाणिमनीषिण'। विनाविशेषंसर्वेषांलक्ष्मनाटकवन्मतमिति- साहित्यदर्पणे ६ परिच्छेद ॥

उपरोध: । पुं । अनुरोधे ॥ उपरोधनम् । रुधिर्० । घञ् ॥

उपरोधकम् । पुं । न । गर्भागारे । वासगृहे ॥ त्रि । उपरोधकर्त्तरि ॥

उपल' । पुं । पाषाणे । प्रस्तरे ॥ मणौ । रत्ने ॥ उपलाति । लादाने । आतइतिकः ॥ उंशम्भु प्रति औशश्मौ वा पलति । पलगतौ । पचाद्यच् ॥ ओः शम्भोः पल. बोधको वा ॥

उपलक्षक: । त्रि । लक्षयितरि ॥

उपलक्षणम् । न । अजहत्स्वार्थलक्षणायाम् । एकपदेन तदर्थान्यपदार्थकथने ॥ यथा । देशान्तरे मृते पत्यौ साध्वी तत्पादुकाद्वयम् । निधायोरसिसंशुद्धा प्रविशेज्जातवेदसम् ॥ अत्रपादुकाद्वयमित्युपलक्षणम् द्रव्यान्तरस्यापि॥ उपसमीपस्थं लक्षणमालोचनंयत्र ॥ स्वसिद्धयेपराक्षेपःपरार्थेस्वसमर्पणम् । उपादानंलक्षणञ्चेत्युक्ताशुद्धैवसाद्विधा ॥ यथाकुन्ताःप्रविशन्तीत्युपादानम् । गङ्गायां घोषइत्युपलक्षणमितिकाव्यप्रकाशः ॥

उपलक्षणभाव: । पु । शक्यतावच्छेदकत्वे ॥

उपलक्षित' । त्रि । बोधिते ॥ ज्ञाते ॥

उपलधिप्रिय: । पुं । चमराख्यवनजन्तौ ॥ इतिराजनिर्घण्टः ॥

उपलब्ध. । त्रि । दृष्टे ॥

उपलब्धार्थ: । त्रि । अनुभूते ॥ उपलब्धःअर्थोऽस्य ॥

उपलब्धार्था । स्त्री । आख्यायिकायाम् ॥ उपलब्धःकेनापिप्रमाणेन अर्थोऽभिधेयं यस्या. सा । भूतार्थशब्दरचनेति यावत् ॥

उपलब्धि: । स्त्री । मत्याम् ॥ प्राप्तौ ॥ ज्ञाने ॥ उपलम्भे ॥ उपलभ्यते ऽनया । डुलभष्० । षित्वात् प्राप्तमङ्बाधित्वा बाहुलकात् क्तिन् ॥

उपलब्धा । पुं । आत्मनि ॥

उपलभेदी । पुं । पाषाणभेदिनि स्था-

वरे ॥

उपलम्भः । पु । उपलब्धौ । अनुभवे ॥ उपलम्भनम् । डुलभष् प्राप्तौ । घञ् । उपसर्गात् खल्घञोरितिनुम् ॥

उपलम्भनम । न । उपलम्भे ॥ उपलभ्यते । डुलभष्० । कर्मणिभावेवाल्युट् ॥

उपलम्भितः । त्रि । ज्ञापिते ॥

उपलम्भ्यः । त्रि । स्तवोपयुक्ते । स्तव्ये ॥ यथा । उपलम्भ्यः साधु । इति मुग्धबोधव्याकरणम ॥

उपला । स्त्री । अश्मरूपायांस्त्रि ॥ श र्करायाम् ॥ उपलाति । लाआदाने । आतश्चोपसर्गइतिकः । उंशम्भुंप्रति औा शम्भौवा । पलति । पलगतौ । पचाद्यच् । टाप् ॥

उपलिङ्गम । न । अरिष्टे । उपद्रवे ॥ इतिहेमचन्द्रः ॥

उपलेपः । पु । उपलेपने ॥

उपलेपनम् । न । गोमयादिना आलेपे । उपाञ्जने ॥ उपलिप्यते । लिपउपदेहे । कर्मणि ल्युट् ॥

उपवटः । पुं । प्रियालवृक्षे । पियाले ॥

उपवनम् । न । आरामे । कृत्रिमेवृक्षसमूहे ॥ पुष्पप्रधाने रोपितवृक्षसमूहे ॥ उपगत वनम् । प्रादयोगताद्यर्थे इतिसमासः ॥

उपवर्त्तनम् । न । देशे । विषये । स्थानमात्रे ॥ उपवर्त्तन्तेऽत्र । वृतु वर्त्तने । घञोल्युटोपवादत्वादन्यथापीतियुच् ॥

उपवर्षः । पुं । मुनिविशेषे । कृतकोटौ ॥

उपवर्हः । पुं । शिरोधाने । उपधाने ॥ उपवृह्यतेऽनेनवा । वृहवृद्धौ वृहू उद्यमनेवा । घञ् ॥

उपवर्हणम् । न । उपवर्हे । उच्छीर्षके ॥ उप वृह० । ल्युट् ॥

उपवल्लिका । स्त्री । अमृतस्रवालतायाम् ॥

उपवसथः । पुं । ग्रामे ॥ उपवसन्त्यत्र । वस० । उपसर्गेवसेरित्यथः ॥

उपवस्तम् । न । उपवासे । उप तनम् । वसुस्तम्भे । भावे क्तः । अनेकार्थत्वादभोजनेवृत्तिः ॥

उपवासः । पुं । उपवस्ते । अहोरात्रभोजनाभावे ॥ तपनोदयमारभ्य यामाष्टकमभोजनम् । उपवासः सविज्ञेय प्रायश्चित्तविधीयते । शास्त्रोदिते नित्ये काम्येवा अहोरात्राभोजने ॥ वैधोपवासे भोजनचतुष्टयनिवृत्तिरुक्तामहाभारते । सायमाद्यन्तयोरह्नोः सायम्प्रातश्च मध्यमे । उपवासफलं प्रेप्सोर्वर्ज्यं भक्तचतुष्टयमिति ॥ काम्योपवासाश्च महाभारते । त्रिरात्रं पञ्चरात्रंवा पक्षन्तमथापिवा । मासोपवासान् कुर्याद्वाचान्द्रायणमथा

ऽपिबेति ॥ उपावृत्तस्यपापेभ्योयस्तु वासोगुणै:सह । उपवासः सविज्ञेय: सर्वभोगविवर्जित: ॥ उपावृत्तस्य निवृत्तस्य। पापेभ्य: पापकर्मभ्य:। गुणा: स .ूतेषुदया क्षान्ति: अनसूया शौचम अनायास' मङ्गलम् अकार्पण्यम् अस्पृहाच। सर्वभोगविवर्जित. शास्त्राननुमतस्त्र्यगीतादिसुखर हित इत्यर्थः ॥ उपवासासामर्थ्ये- प्रतिनिधय' स्कन्दपुराणे। पुत्रं वा विनयोपेतं भगिनींभ्रातरंतथा। एषा मभावएवान्यं ब्राह्मणंविनियोजयेत् ॥ गरुडपुराणे । भार्याभर्त्तृव्रतंकुर्यात भार्यायाश्चपतिस्तथा। असा ऽ ध्येद्वयोस्ताभ्यांव्रतभङ्गोनजायते ॥ अनकल्पमाह वायुपुराणे। नक्तंहविष्यान्नमनोदनञ्च फलंतिला क्षीरमथाम्बवाज्यम् । यत् पञ्चगव्यदिवाथवायुः प्रशस्तमत्रोत्तरमुत्तरञ्चेति॥ उपवासासमर्थे विशेषमाहब्रह्मवैवर्त्त। उपवासासमर्थश्चेदेकविप्रन्तुभोजयेत्। तावद्धनानिवाद्द्याद्यद्भक्ताद्द्विगुणं भवेत् ॥ सहस्रसम्मितांदेवींजपेद्वा प्राणसंयमान । कुर्याद्द्वादशसंख्याकान्यथा शक्तिव्रतेनरः ॥ वैशम्पायनस्त्वाह। अष्टौतान्यव्रतघ्नानि आपोमूलंफलंपय: । हविर्ब्राह्मणकाम्याचगुरोर्वचनमौषधमिति ॥ अत्र श्रीसदाशिवः ॥ कलावन्नगताः प्राणानोपवासः प्रशस्यते। उपवासप्रतिनिधावेकंदानंविधीयतेइति ॥ उपवसनम् । वसनिवासे । घञ ॥ उपवासफलंनश्येद्दिवास्वप्नाच्च मैथुनात । स्त्रीणांसम्प्रेक्षणात्स्पर्शात् ताभिःसङ्कथनादपीक्ष्येकादशीतत्त्वम् । सङ्कथनम् सम्यग् भाषणम् ॥

उपवासी । त्रि । उपवासयुक्ते । व्रतोपवासनिष्ठे तपस्विनि ॥ उपवासोऽस्यास्ति । इनि ॥

उपवाह्यः । पुं । राजवाहकहस्तिनि । राजवाह्ये ॥

उपविषम् । न । कृत्रिमविषे। गरे। चारे ॥ पुं । गौणविषे ॥ अर्कक्षीरं स्नुहीक्षीरं तथैवकलिहारिका। करवीरोथधत्तूरः पञ्चचोपविषा: स्मृता: ॥ तत्रतत्रगुणाद्दोषाद्रष्टव्या: सुविचक्षणै ॥

उपविषा । स्त्री । महौषधे । शृङ्ग्याम। अतीस इतिभाषा ॥ विषमुपगता। शुक्लकन्दाचोपविषा भङ्गुराघुणवल्लभा ॥

उपविष्टः । त्रि । आसीने । आसनावस्थिते । समासीने । बैठा इतिभा

उपविशतेः क्तः ॥

उपविष्टहोमः । पुं । स्वाहाकारप्रयोगान्ते याज्यापुरोनुवाक्यारहिते होमे ॥

उपविष्टिः । स्त्री । आस्यायाम् । स्थितौ ॥

उपवीतम् । न । वामांसस्थापिते यज्ञसूत्रे । यज्ञोपवीते । त्रिगुणीकृत्य त्रिगुणितेकार्पासादिसूत्रविशेषे ॥ तदुक्तंछन्दोगपरिशिष्टे । ऊर्द्ध्वन्तुत्रिवृतं कार्यं तन्तुत्रय मधोवृतम् । त्रिवृतञ्चोपवीतं स्यात् तस्यैकोग्रन्थिरिष्यतइति ॥ उपवीयतेस्म । अजग० । अजेर्व्यघञपोः । वीगत्यादिषु वा । क्तः ॥ यद्वा । उपाजतिस्म उपवेतिस्मवा । गत्यर्थेतिक्तः ॥ उपवीतं यज्ञसूत्रं प्रोद्धृतेदक्षिणेकरे । प्रोद्धृतेवक्षिस्कृ तेसति वामस्कन्धार्पितइत्यर्थः ॥

उपवीती । पुं । उपवीतवतिद्विजे ॥ उद्धृतेदक्षिणेपाणावुपवीत्युच्यतेद्विजः । दक्षिणेपाणौ उद्धृते वामस्कन्धस्थिते दक्षिणकक्षावलम्बे यज्ञसूत्रेवस्त्रेवा उपवीती द्विजःकथ्यतइत्यर्थः । उपवीतमस्यास्ति । अतइनिठनाविती निः ॥

उपवृंहित । त्रि । वर्द्धिते ॥

उपवेदः । पु । प्रधानवेदातिरिक्तवेदे ॥ सचतुर्विधः । आयुर्वेदोधनुर्वेदोगान्धर्ववेदोऽर्थ शास्त्रमितिभेदात । तत्रऋग्वेदस्यायुर्वेदउपवेदः । यजुर्वेदस्य धनुर्वेदः । सामवेदस्य गान्धर्ववेदः । अथर्ववेदस्य शस्त्रशास्त्राणीति शौनकोक्तचरणव्यूहः ॥

उपवेशनम् । न । स्थितौ ॥

उपव्याघ्रः । पुं । मृगान्तके । चित्रके । चीताइति भाषा सिद्धे ॥

उपव्याख्यानम् । न । विस्पष्टप्रकथने ॥

उपशमः । पुं । शमे । इन्द्रियाणां संयमे । तृष्णाक्षये ॥ यतेरुपशमोधर्म इति स्मृतिः ॥ अभावे । प्रतीकारे ॥ सावशेषनाशे ॥ उपशमनम । शम । भावेघञ् ॥ उपशाम्यत्यनेनवा । हलश्चेति घञ् ॥

उपशयः । पुं । निदानपञ्चकान्तर्गतरोगज्ञानजनके ॥ तल्लक्षणम् । हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम् । औषधान्नविहाराणामुपयोगंसुखावहम् ॥ विद्यादुपशयंव्याधेःसहिसात्म्यमितिस्मृतः ॥ इतिनिदानम् ॥ व्याधिहेतुविपरीतौषधादितः सुखावहोपयोगे ॥ न । समीपशयने ॥ त्रि । शयमाने ॥ उपशयनम् । शीङ० । एरच् ॥

उपशल्यम् । न । ग्रामान्ते । ग्रामान्तभागे ॥ शल्यमुपगतम । प्रादिसमासः ॥

उपशान्तः। त्रि। बाधिते। सम्यग्बाधिते॥ यथा। उपशान्तजगज्जीवशिव्याघ्रव्यस्वरभ्रममिति॥

उपशान्ति.। स्त्री। शमे॥ उपशमनम्। शम॰। स्त्रियां क्तिन्॥

उपशायः। पुं। प्रहरिणांक्रमेणशयने। विशाये॥ उपशयनम्। शीङ्॰। व्युपयोः शेतेः पर्याये इति घञ्। तवा शराजोपशाय॥

उपश्रुतम्। त्रि। अङ्गीकृते। स्वीकृते॥ उपश्रूयतेस्म। श्रुश्रवणे। क्त॥

उपश्रुतिः। स्त्री। दैवप्रश्ने॥ यथा। नक्तंनिर्गत्ययत्किञ्चिच्छुभाशुभकरंवचः। श्रूयते तद्विदुर्धीरा दैवप्रश्न मुपश्रुतिमिति॥ उपश्रूयते। श्रु॰। कर्मणिस्त्रियां क्तिन्॥

उपश्लेषः। पुं। सम्बन्धविशेषे॥ यथा-आधाराधेययोरन्यत्रसिद्धयोः प्रादेशिक सम्बन्ध उपश्लेष.। कटेआस्ते स्थाल्यांपचतीत्यत्रौपश्लेषिकाधिकरणे सप्तमी॥

उपष्टम्भकुम्। न। स्थूणायाम्॥ पु। आधिक्ये॥

उपसंयमः। पुं। उपसंहारे॥

उपसंव्यानम्। न। परिधानांशुके। अन्तरीये॥ उपसंवीयते ऽनेन वा। व्येञ् संवरणे। कृत्यल्युटइतिल्युट्॥

उपसंहरणम्। न। उपसंहारे॥ ल्युट्॥

उपसंहार.। पुं। समासे॥ सङ्ग्रहे॥ उपसंहरणम्। हृञ्॰। घञ्॥

उपसङ्ग्रहः। पुं। अभिवादे। पादस्पर्शपूर्वकनमस्कारे। पादग्रहणे॥ *म्मलने॥ उपसङ्ग्रहणम्। ग्रहउपादाने। ग्रहवृद्दनिश्चिगमश्चेत्यप्॥

उपसङ्ग्राह्य.। त्रि। अभिवाद्ये। उपसङ्ग्रहणीये॥

उपसत्ति। स्त्री। सेवायाम्॥ सङ्गमाचे॥ प्रतिपादने॥ उपसदेर्भावेक्तिन्॥

उपसद्। पु। प्रवर्ग्याहः प्रसिद्धायामिष्टौ॥ गार्हपत्यादित्रयभिन्नेऽग्नौ॥ यथा। गार्हपत्योदक्षिणाग्निस्तथैवाहवनीयक.। एतेऽग्नयस्त्रयोमुख्या. शेषाश्चोपसदस्त्रयइतिवह्निपुराणे गणभेदनामाध्यायः॥

उपसद्व्रती। पु। उपसत्सु इष्टिषुव्रतंपयोमात्रभक्षणंतदुपेत॥

उपसन्नः। त्रि। उपनते। उपस्थिते॥ यथा। भगवन्नुदधौ मृतिजन्मजले, सुखदु.खझषे पतितंव्यथितम्। कृपयाशरणागत मुद्धरमा मनुशाध्युपसन्नमनन्यगतिमितितोटकाचार्या॥ शरणागते॥ उपासदत उपसीदतिस्मवा। षद्लृ॰। गत्यर्थेतिक्तः॥

उपसमाधानम्। न। राशीकरणे॥

उपसम्पन्नः । त्रि । प्रमीते । प्रोषिते । यज्ञार्थहतपशौ ॥ प्रणीते । सुसंस्कृते । पाकेनसंस्कृते मांसादौ ॥ पर्याप्ते ॥ प्राप्ते ॥ मृते ॥ उपसम्पद्यतेस्म । तौ पदग । कर्त्तरिकर्मणि वा गत्यर्थ तिक्तः ॥

उपसम्भाषा । स्त्री । उपसान्त्वने ॥ सम्भाषणे ॥

उपसरः । पुं । स्त्रीगव्यादिषु पुंङ्गवादीनां प्रथमगर्भाधानाय मैथुनाभियोगे । प्रजने ॥ उपसरणम् । सृगतौ । प्रजनेसर्त्तेरिच्यप् । यथा गवामुपसरः ॥

उपसरणम् । न । समीपगमने ॥ उपसर्त्तव्ये ॥ सृ० । ल्युट् । उपसमीपे सरणम् ॥

उपसर्गः । पुं । रोगप्रभेदे ॥ उपप्लवे । उत्पाते । उपद्रवे । शुभाशुभसूचकमहाभूतविकारे ॥ क्रियायोगे प्रपरादिषु ॥ यथा । निपाताश्चादयोज्ञेया उपसर्गास्तु प्रादयः । द्योतकत्वात् क्रियायोगे लोकादवगताइमे ॥ स त्रिधा । धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते । तमेवविशिनष्टत्र्यन्यउपसर्गगतिस्त्रिधा॥ क्रमेणोदाहरणानि यथा । आदत्ते प्रहृते प्रयमतीति॥ अपिच॥ उपसर्गेण धात्वर्थो बलादन्यत्रनीयते । प्रहाराहारसंहारविहारपरिहारवत् ॥ उपसर्जनम् उपसृज्यते वा । सृज० । घञ् ॥

उपसर्जनम् । न । प्रधानभिन्ने । गौणे । अप्रधाने । अमुख्ये । विशेषणे ॥ त्यागे ॥ उपसृज्यते । सृज० । कर्मणि ल्युट् ॥

उपसर्त्तव्यम् । त्रि । उपगन्तव्ये ॥

उपसर्पकः । त्रि । उपासके । उपसर्पणाकर्त्तरि ॥

उपसर्पणम् । न । अनुगमने । अनुवृत्तौ ॥ सृप्लृगतौ ल्युट् ॥

उपसर्या । स्त्री । ऋतुमत्यां गवि । काल्यायाम् । गर्भाधानार्थं वृषभेणोपगन्तुं योग्यायाम् ॥ उपस्रियते वृषेण । सृगतौ । उपसर्याकाल्याप्रजने इति साधुः । काल्यापसर्याप्रजने इत्यमरः ॥

उपसादितः । त्रि । प्रापिते ॥

उपसार्यः । त्रि । समीपगमनीये ॥ प्राप्तव्ये ॥ कर्मणि ण्यत् ॥

उपसुन्दः । पुं । रामायणप्रसिद्धे सुन्दभ्रातरि राक्षसे ॥

उपसूर्यकम् । न । चन्द्रार्कमण्डले । चन्द्रार्कसमीपवर्त्तिनिमण्डले ॥ उपगतंसूर्यम् उपसूर्यम् । प्रादिसमासः । ततःस्वार्थेकम् । चन्द्रपक्षे उप

सूर्यमिव । इवार्थेकन् ॥
उपसूर्यकमण्डलम् । न । परिवेषे ॥
उपसृष्यः । चि । गम्य ॥
उपसृष्टम् । न । मैथुने । सुरते ॥ त्रि । उपसर्गयुक्ते । विसृष्टे ॥
उपसेक' । पुं । सेचनेन मृदुकरणे ॥
उपसेचनम् । न । इते ॥ उपसिच्यते । षिचच्चरणे । ल्युट् ॥
उपस्कर: । पुं । कटककुण्डलहारादौ ॥ वेसवारे । व्यञ्जनादिसंस्कारार्थं धन्याकसर्षपादिपिष्टे ॥ दृषदुपलसूर्पादौ । गृहोपकरणकुण्डसम्मार्जन्यादौ ॥ उपकरोति व्यञ्जनेन समवैति । डुकृञ्० । समवायेचेतिसुट् ॥
उपस्करणम् । न । परिकरे ॥
उपस्कृतः । त्रि । मण्डिते ॥
उपस्तरणम् । न । आस्तरणे ॥ उपस्तीर्यते । स्तृञ्० । ल्युट ॥
उपस्थः । पुं । न । लिङ्गे । शेफसि ॥ भगे । मदनागारे ॥ क्रोडे ॥ चि । समीपस्थे ॥ उपतिष्ठते । ष्ठा० । सुपीतिकः । मूर्द्धचोदिः ॥
उपस्थपत्र' । पुं । भाण्डीरे । वटे ॥
उपस्थाता । त्रि । भृत्ये । सेवके ॥
उपस्थानम् । न । नमस्करणे ॥ उपेत्य स्थानम् ॥ उपस्थीयते । ष्ठा० । ल्युट् ॥ सङ्गतौ ॥

उपस्थितः । चि । आगते ॥ निकटस्थिते । उपसन्ने ॥ प्राप्ते ॥ उपपूर्वात्तिष्ठते र्गत्यर्थाकर्मकेति क्तः । द्यति स्यतीतीत्वम् ॥
उपस्पर्शः । पुं । स्पर्शमात्रे ॥ स्नाने ॥ आचमने ॥ उपस्पर्शनम् । स्पृशस्पर्शे । घञ् ॥ उपस्पृश्यन्ते खान्यत्र । हलश्चेत्यधिकरणे घञ्वा ॥
उपस्पर्शनम् । न । उपस्पर्शे ॥ स्पृशे ल्युट् ॥
उपस्पृष्टः । त्रि । आचान्ते ॥ सन्निधिमात्रेण सेविते ॥ उपस्पृशेः क्तः ॥
उपस्वत्वम् । न । उत्पन्ने । लभ्ये । तद्भिन्ने ततएवोपजाते स्वत्वास्पदीभूतभूम्यादिलब्धधनादौ ॥
उपहतः । चि । तिरस्कृते ॥ विघट्टिते ॥ अशुद्रव्ये ॥ उत्पातग्रस्ते ॥ नष्टे ॥ यथा । कृत्वाशस्त्रविभीषिकां कतिपयग्रामेषुदीनाः प्रजा मञ्नन्तोविटजल्पितैरुपहताः चोणीभुजस्तेकिल । विद्वांसोपिवयं किल त्रिजगतः-सर्गस्थितिव्यापदामीशस्तत्परिचर्यया नगणितोयैरेषनारायणः इति ॥
उपहसितम् । न । हास्यप्रभेदे ॥
उपहारः । पुं । उपायने । भेट इतिभाषा ॥ नैवेद्यादिपूजासामग्र्याम् ॥ उपह्रियते । हृञ्० । घञ् ॥

उपहारपाणिः । त्रि । उपायनहस्ते ॥ उपहारः पाणौ यस्य ॥

उपहालक. । पुं । कुन्तलाख्यदेशे ॥

उपहासः । पुं । परीहासे । निन्दार्थवाक्यादौ । हांसी ठट्ठा इति भाषा ॥ उपहासाय किं न स्यादसल्लङ्गो मनीषिणाम् ॥

उपाहत. । त्रि । आहिते ॥ उपधीयते स्म । उधाञ् ०क्तः । दधातेर्हिरिति-प्रकृतेर्हिरादेशः ॥

उपहृतः । त्रि । समर्पिते ॥

उपह्वरः । पुं । रथे ॥ न । एकान्ते । रहसि ॥ निकटे ॥ उपह्वरे गन्तव्ये समीपदेशे इति वेदभाष्यम् ॥ उपह्वरत्यत्र । ह्वृ कौटिल्ये । पुंसीतिघः ॥

उपांशु । अ । विजने । रहसि ॥ अप्रकाशोच्चारणे ॥

उपांशुः । पुं । जपविशेषे ॥ यत्समीपस्थोपिपरो नशृणोति तदुपांशुरित्युच्यते । यत्तदोष्ठोच्चारणमर्थः । जिह्वौष्ठौ चालयेत् किञ्चिद्देवतागतमानसः । निजश्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः ॥ विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशु. स्या-च्छतगुणः ॥ उपगताः अंशवोयत्र ॥

उपाकरणम् । न । श्रुते. संस्कारपूर्वग्रहणे ॥ संस्कार उपनयनं पूर्वंयत्र तत् तथ्रुतग्रहणञ्च । संस्कारपूर्वंग्रहणंयत्स्यादुपाकरणंश्रुतेरित्यमरः ॥ आवण्यादिविधातव्ये संस्कारविशेषे ॥ प्रारम्भे ॥ संस्कारपूर्वंपशूनां हनने ॥ उपाक्रियतेऽनेन तत् । कृञो ल्युट् ॥

उपाकर्म्म । न । उपाकरणे ॥

उपाकृतः । पुं । अध्वरे अभिमंत्र्यहते-पशौ ॥ उपद्रवे ॥ त्रि । उपद्रुते ॥ प्रारब्धे ॥ उपाक्रियते स्म । कृञ् हिंसायाम् । क्त ॥

उपाख्यः । त्रि । अप्रत्यक्षत उपलब्धे । प्रत्यक्षे ॥ उप आख्यायते । ख्या० । आतश्चोपसर्गइत्यङ् ॥

उपाख्यानम् । न । आख्याने । पुराणादिग्रथितवार्त्तायाम् । वर्णने ॥ उपाङ्पूर्वात्ख्यातेर्ल्युट् ॥ विशेषकथने ॥

उपागमः । पुं । समीपगमने ॥ स्वीकारे ॥ उपागमनम् । गम्लृ० । ग्रहवृद्विश्चादिना अप् ॥

उपाङ्गः । पु । तिलके । तमालपत्रके । पत्रलेखायाम् ॥

उपाजे । अ । दुर्बलस्यसामर्थ्याधाने ॥ सप्तमीप्रतिरूपकोयं निपातः ॥

उपाजेकृत्य । अ । दुर्बलस्यबलमाधायेत्यर्थे ॥ उपाजेऽन्वाजे इतिगतिसंज्ञा । कुगतीतिसमास. ॥

उपाजेकृत्वा । अ । उपाजेशब्दार्थे ॥

उपाञ्जनम् । न । उपलेपने ॥

उपात्त. । पुं । निर्मदहस्तिनि ॥ त्रि । गृहीते । स्वीकृते ॥ प्राप्ते ॥ त्वयंकेचिदुपात्तस्यदुरितस्यप्रचच्यते ॥

उपात्ययः । पु । शास्त्रतो लोकव्यवहाराच्च व्यतिक्रमे ॥ अतिक्रमे । क्रमोल्लङ्घने ॥ उपात्ययनम् । इण्° । एरच । उपगतस्या तिक्रम्यायनं वा ॥

उपादानम् । न । स्वस्वविषयेभ्य इन्द्रियाणां विकर्षणे । प्रत्याहारे ॥ हेतौ ॥ ग्रहणे ॥ अननुष्ठितस्यानुष्ठाने ॥ समवायिकारणे ॥ प्रवृत्तिजनकज्ञाने ॥ उत्पादके । उत्पत्तिस्थितिनाशाय-कारणे ॥ उपाद्दाञोल्युट् ॥ आरम्भे ॥

उपादानाख्या । स्त्री । तुष्टे. प्रभेदे ॥ यातुप्रकृत्यापि विवेकख्याति' नसा प्रकृतिमात्राद्भवति मास्मभूत् सर्वस्य सर्वदातन्मात्रस्यसर्वान् प्रत्यविशेषात् । प्रव्रज्यायास्तुसा भवति तस्मात् प्रव्रज्यामाददीथाः कृतं ते ध्यानाभ्यासेनेत्यायुष्मन्नित्युपदेशे या आध्यात्मिकातुष्टिः सा उपादानाख्या नामद्वितीया सलिलमुच्यते ॥ उपादानमित्याख्यायस्या. ॥

उपादिकः । पुं । कीटविशेषे । वल्मीकाम् । देहिकायाम् ॥

उपादेयः । त्रि । उत्कृष्टे । उत्तमे । ग्राह्ये ॥

उपाधिः । पुं । धर्मचिन्तायाम् ॥ कुटुम्बव्यापृते ॥ छले ॥ विशेषणे ॥ यथा । शर्मादेवश्च विप्रस्य वर्म्मात्राता च भूभुजः । भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेदिति ॥ यःस्वधर्ममन्यनिष्ठतया भासयतिस.। उपाधेः प्रतिबिम्बपक्षपातित्वं न बिम्बपक्षपातित्वम् । लक्षणन्तु । यावत्कार्यमवस्थायिभेदहेतौ रुपाधितेति ॥ अयथार्थव्यवहृतौ ॥ साध्यव्यापकत्वे सतिहेतोरव्यापके ॥ यथा । धूमवान् वह्निरित्यत्र आर्द्रकाष्ठमुपाधिः । यत्र धूमस्तत्रार्द्रेन्धनसंयोगइति साध्यव्यापकता । यत्रवह्निस्तत्रार्द्रेन्धन संयोगइतिनास्ति अयोगोलकेआर्द्रेन्धनाभावात । अस्यप्रयोजनम् । व्यभिचारस्यानुमानम् ॥ समीपआधे' । उपपन्नआधिर्वा । आधानमाधिः । उपसर्गघोः किः । उपगत आधिम् । अत्याद्य इति समासः। उपधीयतेऽनेनेतिवा ॥

उपाध्यायः । पुं । अध्यापके ॥ वेदैकदेशाध्यापके ॥ यथाह मनुः । एकदेशन्तु वेदस्य वेदाङ्गान्यपिवापुनः । योध्यापयतिवृत्त्यर्थमुपाध्यायःसउच्यते इति ॥ उपेत्यास्मादधीयतेइतिवि-

ग्रहः । इङश्चेति घञ् ॥

उपाध्याया । स्त्री । उपाध्यायाम् । स्वयंविद्योपदेशिन्याम् ॥ उपेत्याधीयतेऽस्याः । इङश्चेतिसूत्रे अपादाने स्त्रियामुपसङ्ख्यानं तदन्ताच्चवाङीषितिघञ् । टाप् ॥

उपाध्यायानी । स्त्री । उपाध्यायपत्न्याम् ॥ उपाध्यायस्य स्त्री । मातुलोपाध्याययोरानुग्वा

उपाध्यायी । स्त्री । उपाध्यायायाम् । स्वयंविद्योपदेशिन्याम् ॥ उपेत्य अस्या अधीयते इति विग्रहे यातु स्वयमेवाध्यापिका तत्रवा ङीष् वाच्य इति इङश्चेति सूत्रस्य वार्त्तिकात् घञ् पक्षे ङीष् ॥ उपाध्यायान्याम् ॥ उपाध्यायस्य स्त्री । मातुलोपाध्याययोरानुग् वेत्यानुगभावः ॥

उपानत् स्त्री । पनध्याम् । पादुकायाम । चर्मादिनिर्मितपादकोषे ॥ अस्या धारणविधिर्यथा । वर्षातपादिके छत्री दण्डी रात्र्यटवीषु च । शरीरत्राणकामो वै सोपानत्कः सदाव्रजेदिति ॥ गुणा यथा । पादूप्रधारणं वृष्यमोजस्यं चक्षुषोर्हितम् । सुखप्रचारमायुष्यं वल्ल्यं पादरुजापहमिति ॥ पादे उपनह्यते बध्यते । पादम् उपनह्यति वा । णहबन्धने । सम्पदादि

स्यात् क्विप्चेतिवाक्विप् । नहिवृतिरुषीतिपूर्वपदस्यदीर्घः ॥

उपान्तः । त्रि । निकटे ॥ प्रान्ते ॥

उपान्त्यम् । त्रि । अन्त्यसमीपे ॥ उत्तरभाद्रपदायाम् ॥

उपायः । पुं । राजादीनामरिवशीकरणहेतौ सामादिचतुष्टये । भेदादण्डःसामदानमित्युपायचतुष्टयमित्युक्तं ॥ क्वचित् सप्तोपाया अप्युक्ताः । यथा । सामदानञ्चभेदश्चदण्डश्चेतिचतुष्टयम् । मायोपेक्षेन्द्रजालञ्चसप्तोपायाः प्रकीर्त्तिताइति । शृङ्गारेतुपुराविङ्भिरुपायौद्वौ प्रकीर्त्तितौ ॥ यथा । उपायौद्वौ प्रयोक्तव्यौ कान्तासु सुविचक्षणैः । सामदानं'' चेतिप्राहुः शृङ्गाररसकोविदाः॥ भेदे प्रयुज्यमानेहि रसाभासस्तु जायते । निग्रहेरसभङ्गः स्यात्तस्मात्तौदूषितौबुधैः ॥ भेदेकपटस्यावश्यंजायमानत्वात् कपटंविनाभेदासम्भवात् सतितस्मिन्कपटे रसाभास एव ॥ उपगतौ ॥ स्वार्थसम्पादके । साधने । पुरुषकारे ॥ उपायतेऽनेन । अय० । हलश्चेति घञ ॥

उपायज्ञः । त्रि । कार्यसाधनकुशले ॥

उपायनम् । न । तोषकारिणि । उपहारे ॥ व्रतादिप्रतिष्ठायाम् ॥ उपगमने

॥ उपेयते उपाय्यतेवा । इणगतौ अयगतौवा । कर्मणि ल्युट् ॥

उपारत. । त्रि । सन्निवृत्ते ॥

उपार्ज्जनम् । न । उद्योगादिना ऽर्थसङ्ग्रहे । अर्ज्जने ॥ स्वत्वहेतुभूतव्यापारे इतिस्मृति' ॥

उपार्ज्जित । त्रि । कृतोपार्जने ॥

उपालब्धः । त्रि । अधिक्षिप्ते ॥

उपालम्भः । पुं । दुर्वचने । दुर्वाक्ये ॥ सचगुणाविष्करणेन स्तुतिपूर्वकः । यथा । महाकुलस्य भवत. किमिदमुचितमिति । निन्दापूर्वकश्च । यथा । बन्धकीसुतस्य भवत स्तदिदमुचितमिति ॥ परपक्षदूषणे ॥ उपालभ्यते । लभ॰ । घञ् । उपसर्गात् खल्घञोरितिनुम् ॥

उपावृत्त. । त्रि । श्रमशान्त्यर्थं मुहुर्भूमौ लुठिताश्वे । लुठिते ॥ पुनरागते ॥ निवृत्ते ॥ उपावृत्तस्य पापेभ्य' पापेभ्यो निवृत्तस्येत्यर्थात् ॥ उपावर्त्तते स्म । वृतु॰ । क्त ॥

उपाश्रयः । पुं । आश्रये ॥ उपाश्रयणम् । श्रिञ॰ । एरच् ॥

उपाश्रित' । त्रि । एकान्तप्रेमभक्त्या शरणागते ॥ उपाश्रयति उपाश्रीयते स्म वा । श्रिञ॰ । गत्यर्थेतिकर्मणिक्तः ॥

उपासकः । पु । स्त्री । शूद्रे । सेवके ॥ त्रि । उपासनाकर्त्तरि ॥ शाक्त. शैवा वैष्णवश्च सौरोगाणपतस्तथा । द्विव्योवीरःपशुश्चैव तेषु भावा स्त्रयो मता. ॥ सात्त्विकादिविभेदेनपुनश्चैते विभेदिताः ॥ उपासते । उप आस॰ । ण्वुल् ।

उपासङ्ग. । पु । तूणीरे ॥ उपासज्यन्ते शराः अत्र । षञ्जसङ्गे । हलश्चेति घञ ॥

उपासनम् । न । शराभ्यासे ॥ उप असुक्षेपणे । भावे ल्युट् ॥ उपास्तौ । आसने ॥ सगुणब्रह्मविषयकमानसव्यापाररूपे शाण्डिल्यविद्यादौ ॥ शुश्रूषानमस्कारादिप्रयोगेण सेवने ॥ भावनायाम् ॥ लौकिकात्माभिमानवत् यावतत्तद्देवतादिस्वरूपात्माभिमानाभिव्यक्ति स्तावल्लौकिकप्रत्ययाऽव्यवधानेन स्वेष्टदेवतादिरूपं मनसोपगम्य आसनंचिन्तनमित्यर्थ. ॥ नकैवल्यमुपासनात् ॥ आसउपवेशने । भावेल्युट् ॥

उपासना । स्त्री । वरिवस्यायाम । शुश्रूषायाम् । परिचर्य्यायाम् ॥ देवाराधने । देवताचिन्तने ॥ यथोक्तं श्रीदेवीभागवते । नु विष्णूपासना नित्या वेदेनोक्तातुकुत्रचित् । नविष्णुदीक्षानित्यास्ति शिवस्यापितथैव

च ॥ गायत्र्युपासनानित्यासर्ववेदैः समीरिता। ययाविना त्वधः पातो- ब्राह्मणस्यास्तिसर्वथा ॥ तावता कृत कृत्यत्वं नान्यापेक्षाद्विजस्यहि । गायत्रीमात्रनिष्णातो द्विजो मोक्षमवाप्नुयात् ॥ कुर्य्यादन्यन्नवा कुर्यादिति प्राहमनुःस्वयम्। विहायतान्तु गायत्रीं विष्णूपास्तिपरायणः ॥ शिवोपास्तिरतोविप्रोनरकंयातिसर्वथा । तस्मादाद्ययुगेराजन् गायत्रीजपतत्पराः ॥ देवीपादाम्बुजरता आसन् सर्वद्विजोत्तमाः ॥ इति ॥ उपासनाप्रयोजनं चित्तैकाग्र्यम् सूक्ष्मार्थावधारणसमर्थत्वम्। सत्यलोकप्राप्तिरुपासनाया अवान्तरफलम्॥ उपासनम्। आस॰। ण्यासेतियुच्। टाप्॥

उपासितः। त्रि। वरिवसिते। सेविते। कृतोपासने॥ उपास्यते स्म। आस॰। गत्यर्थेति क्तः ॥

उपासीनः। त्रि। समीपस्थे॥ उपसमीपे आसीनः॥ कृतोपासने॥

उपास्तिः। स्त्री। सेवायाम्। तात्पर्येणानुष्ठाने॥ उप आस॰। क्तिन्॥

उपास्यः। त्रि। आराध्ये॥ ध्येये॥ उपासितुं योग्यः। ण्यत्॥ उपास्यं यन्नत दुक्तत्त्वमित्येषडिण्डिमः॥

उपाहतम्। त्रि। ताडिते॥ उपाहन्यते स्म। हन। क्तः॥

उपाहितः। पुं। अनलोत्पाते। उल्कापातादौ। अग्न्युत्पाते॥ उपआसन्नमाहितंफलंयस्य॥ त्रि। आरोपिते॥ संयोजिते॥ उपाधीयतेस्म। दधातेर्हिः। क्तः॥

उपाह्वयः। पुं। उपनामनि॥

उपेक्षकः। त्रि। द्वयोर्विवदमानयोर्जयपराजयासंसर्गिणि। तत्कृतहर्षविषादाभ्यामसंस्पृष्टे। उदासीने॥ प्रतीकाररहिते॥

उपेक्षणम्। न। त्यजने। वर्जने॥

उपेक्षा। स्त्री। क्षुद्रोपायभेदे। त्यागे॥ अयन्तुयुद्धविषये॥ औदासीन्ये। अनपेक्षणे॥ यथा। अपुण्यवत्सुचौदासीन्यमेवभावये न्नानुमोदनं नवाद्वेषम्॥ उपेक्षणम्। ईक्ष॰। गुरोश्चेत्यः। टाप॥

उपेक्षिता। त्रि। उपेक्षायाः कर्त्तरि॥

उपेक्ष्य। त्रि। उपेक्षाबुद्धिविषये। यत्रेष्टद्वेषयोरभावस्तस्मिन्॥

उपेतः। त्रि। युक्ते॥ अनुगते।

उपेता। पुं। उपायेनोपेयस्य साधकेआत्मनि॥

उपेन्द्रः। पुं। केशवे। विष्णौ॥ इन्द्रमुपगतोऽनुजत्वात्। कुगतीतिसमासः॥ इन्द्रलोकादप्युपरिलोकेवर्त्ते

मानत्वाद्वा। ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वर.। उपेन्द्र इति कृष्ण त्वां गास्यन्ति दिवि देवताः। इति हरिवंश. ॥ न। इन्द्रसन्निधौ ॥ अव्ययम् ॥

उपेन्द्रवज्रा। स्त्री। त्रिष्टुभ्भेदे। एकादशाक्षराद्वृत्तिविशेषे ॥ यथा। यदीन्द्रवज्रा चरणाद्यवर्णा नरेन्द्रसर्वे लघवो भवन्ति। उपेन्द्रतुल्यामलशीलशालिन्नुपेन्द्रवज्राभिहितातदानीम् ॥ यथा। उपेन्द्रवज्रादिमणिच्छटाभिर्विभूषणानां छुरितं वपुस्ते। स्मरामि गोपीभिरुपास्यमानं सुरद्रुमूले मणिमण्डपस्थमिति ॥

उपेयः। त्रि। उपायसाध्ये। प्राप्तव्ये ॥

उपेयिवान्। त्रि। उपगते ॥ उपेयिवाननाश्वाननूचानश्चेति क्वसुप्रत्ययान्तोनिपात. ॥

उपेयुषी। स्त्री। सङ्गतायाम् ॥ क्वसुप्रत्ययान्ता दुगितश्चेति ङीप् ॥

उपोढ.। पुं। बलविन्यासे। व्यूहे ॥ त्रि। निकटे ॥ ऊढे। विवाहिते ॥ वहेः कर्त्तरि क्त. ॥

उपोती। स्त्री। पूतिकायाम्। पोईशाक ॥

उपोत्तमम्। न। अन्त्यस्य समीपे ॥

उपोदकी। स्त्री। पूतिकायाम् ॥

उपोदिका। स्त्री। पोतक्याम्। मोहन्याम्। पोई इति प्रसिद्धे पत्रशाके ॥ यथा। एकाहं षड्सोपेता कामन्यै व्यञ्जनान्तरैः। तण्डुलैरानतव्याजै र्हसत्येषा उपोदिका ॥ वटमव्वच्छुभपत्रिका परितप्ततैलसुघाचिता। नवहिङ्गुवाससुवासिता पार्श्वभोक्तृचित्तविकासिका ॥ सुतप्ततैलविपाचिता सुघनाम्लतक्रविपाचिता। सुपोलिकाद्यविभर्जिता भोक्तुराशुरसनाग्रनर्त्तकी ॥ पोदिकाशीतलावल्याश्लेष्मलावातपित्तहा। पथ्याचदोषशमनी निद्रापुष्टिकरीमतेति ॥ उपाधिकमुदकमस्याम्। उत्तरपदस्यचेत्युदकस्योदादेश.। कप्। टाप् ॥

उपोदीका। स्त्री। पोतक्याम् ॥

उपोद्घातः। पु। उदाहारे। प्रकृतोपपादके। प्रकृत्यर्थं वर्णयितुमर्थान्तरवर्णने। प्रस्तोष्यमाणोपपादके प्रतिपाद्यमर्थं बुद्धौ सङ्गृह्य तदर्थमर्थान्तरवर्णने। युक्त्या साध्यनिदर्शने॥ चिन्ताप्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः ॥ उपसमीपे उद्धननं ज्ञापनम्। घञ् ॥ निर्दिष्टोपपादकत्वमुपोद्घात इति जगदीशतर्कालङ्कार.॥

उपोषणम्। न। उपवासे। अभोजने

॥ उपदाहे । ल्युट् ॥

उपोषितम । न । उपवासे ॥ उपवसनम् । वसनिवासे । भावे गत्यर्थेति क्तः । वसतिक्षुधोरितीट । शासिवसीति षः ॥ त्रि । कृतोपवासे ॥

उप्तः । त्रि । कृतवपने । बोया । इति भाषा ॥ अवकीर्णे । बखेरा । इति भाषा ॥ उप्यते । टुवप० । क्त ॥ मुण्डिते ॥

उप्तकृष्टम । त्रि । सबीजकृष्टक्षेत्रे । बीजवपनानन्तरं कर्षितक्षेत्रे । बीजाकृते ॥ उप्तञ्च तत् कृष्टञ्च । पूर्वकालेति समासः ॥

उप्तिः । स्त्री । वपने ॥ टुवप् । क्तिन् ॥

उभो । त्रि । द्वयो ॥ द्वित्वविशिष्टस्य वाचको नित्यद्विवचनान्तोयंशब्दः ॥

उभय । त्रि । द्विवचनोज्झितद्वयोः । युगले । दो इतिभाषा ॥ उभो अवयवो अस्य । तयप् । उभादुदात्तोनित्यमितितयपोऽयजादेशः । कथमुभये देवमनुष्याइति यतोबहूनामुभावयवैा नघटतः । मैषदोष । अत्रहि द्वौ राशीसमुदायस्यावयवैा । एकोदेवानाम् अपरोमनुष्याणामिति ॥ उभादुदात्तोनित्यमितिनित्यग्रहणस्येदम्प्रयोजनम् वृत्तिविषये उभशब्दप्रयोगोमाभूत् उभयशब्दस्यैव यथा स्यादिति ॥

उभयतः । अ । पार्श्वद्वये ॥ सर्वतः ॥ उभयस्मात् । तसिल् ॥

उभयथा । अ । उभयप्रकारे ॥ उभयैः प्रकारैः । प्रकारवचनेथाल् ॥

उभयद्युः । अ । उभयदिने । उभयोरह्नोः ॥ द्युश्चोभयाद्वक्तव्यइतिसाधुः ॥

उभयेद्युः । अ । दिनद्वये । उभयोरह्नोः ॥ सद्यःपरुदिति उभया द्येद्युस् निपातितः ॥

उम् । अ । रोषे ॥ अङ्गीकृतो ॥ प्रश्ने ॥ अवनम् । उङ्शब्दे । डुमप्रत्ययः ॥

उमा । स्त्री । कात्यायन्याम् । दुर्गायाम् ॥ ओर्महेशस्य मा लक्ष्मीः ॥ उमेति मात्रा तपसेनिषिद्धत्वाद्वा । अ कारान्तादपिटाप् । टायामिति भाष्यप्रयोगात् । अजादित्वाद्वा ॥ उं शिवं माति । मामाने मिमीतेवा । मा ङ्मा नेशब्देच । कातोनुपसर्गेतिकः । अजादित्वाट्टाप् ॥ अवति जयते वा । उङ्शब्दे । विभाषातिलमाषोमेतिनिपातनान् मक् ॥ अतस्याम् ॥ हरिद्रायाम् ॥ कीर्त्तौ ॥ कान्त्याम् ॥ शान्तौ ॥

उमाकटम् । न । हरिद्रादिरजसि ॥ उमायारजः । अलाबूतिलेतिकटच् ॥

उमागुरुः । पुं । हिमालयाचले ॥

उमाचतुर्थी । स्त्री । ज्येष्ठशुक्लचतुर्थ्याम् ॥ यथोक्तं ब्रह्मपुराणे । ज्येष्ठशुक्लचतुर्थ्यान्तु जाता पूर्वमुमा सती । तस्मात् सात्र च सम्पूज्या स्त्रीभिः सौभाग्यवृद्धये इति ॥

उमाधवः । पुं । सदाशिवे ॥ उमायाः धवः ॥

उमापतिः । पुं । शिवे ॥ उमायाःपतिः

उमावनम् । न । वाणपुर्याम् । शोणितपुरे । देवी कोटे

उमासुतः । पुं । } कार्त्तिकेये ॥ षष्ठी
उमासूनुः । पुं । } समासः ॥

उमेशः । पुं । } महादेवे । ईश्वरे ॥
उमेश्वरः । पुं । } षष्ठीसमासः ॥

उम्बरः । पुं । द्वारोर्द्ध्वकाष्ठे ॥ देहल्याम् ॥

उम्बी । स्त्री । उम्बीतिलोकप्रसिद्धे च र्णे ॥ मञ्जरीत्त्वर्द्धपक्वा या यवगोधूमयोर्भवेत् । तृणानलेनसम्भृष्टा बुधैरुम्बीतिसा स्मृता ॥ उम्बीकफप्रदा बल्या लघ्वी पित्तानिलापहा ॥

उम्यम् । न । उमाक्षेत्रे । अतसीक्षेत्रे ॥ उमानां भवनं क्षेत्रम् । विभाषातिलमाषोमेतियत् ॥

उरःसूत्रिका । स्त्री । मुक्ताकृतहारविशेषे ॥ उरसः सूत्रमिव । इवेप्रतिकृताविति कन् ॥

उरगः । पुं । वासुकिप्रभृतौ पन्नगे ॥ उरसा गच्छति । उरसोलोपश्चेति डप्रत्ययः सकारलोपश्च ॥ सीसके ॥ खले ।

उरगस्थानम् । न । पाताले ॥

उरगाशनः । पुं । गरुडे ॥ उरगानश्नाति । अश० । ल्यु ॥ उरगा अशनम स्येतिवा ॥

उरणः । पुं । मेषे ॥ ऋच्छति अर्यते वा । ऋगतौ । अर्त्तेः क्युच्चेति क्युः उरादेशः ॥

उरणाक्षः । पुं । पद्माटौषधौ । दद्रुघ्ने ॥ उरणस्य मेषस्याक्षिणी इवाक्षि यस्य तत्तुल्यपुष्पत्वात् । अक्ष्णोदर्शनादिति षच् ॥

उरणाख्यः । पुं । पद्माटे । चक्रमर्दके । पवांड इतिभाषा ॥ उरणस्य मेषस्याख्या आख्याऽस्य ॥

उरभ्रः । पुं । स्त्री । मेषे ॥ उरुभ्रमति । भ्रमु चलने । अन्येभ्योऽपीतिडः । पृ० ॥ यद्वा । उनाशम्भुनारभ्यते । रभराभस्ये । वाहुलकाद्रक् ॥

उररी । अ । अङ्गीकृतौ ॥ विस्तारे ॥ वयतेर्वाहुलकात् ररीक् । सम्प्रसारणञ्च ॥

उररीकारः । पुं । अङ्गीकारे ॥

उररीकृतम् । त्रि । अङ्गीकृते । स्वीकृते ॥ विस्तृते ॥ उररीक्रियतेस्म । क्तः ॥

उरश्छदः । पुं । कवचे ॥ उरश्छाद्यते ऽनेन । छद् अपवारणे । पुंसीतिघ । छादेर्घेद्रति ह्रस्व ॥

उरः । न । वक्ष स्थले । वक्षसि ॥ श्रेष्ठे ॥ इयर्त्ति । ऋगतौ । अर्त्तेरुश्चेत्य-सुन् । उरादेशः किच्च ॥

उरसिजः । पुं । स्त्रीस्तने ॥ उरसिजायते । जनी० । सप्तम्यामितिडः । ह लदन्तादित्यलुक् ॥

उरसिलः । त्रि । प्रशस्तवक्षोयुक्ते । उरस्वति ॥ प्रशस्त मतिशयितंवा उरो बलंयस्य । पिच्छादित्वादिलच् । उरसावलं लक्ष्यते इतिस्वामी ॥

उरस्त्राट । पुं । वार्त्तानामुत्तरीयविशेषे । वालयज्ञोपवीतके । पञ्चवटे । बुकबाछाड इतिगौडभाषाप्रसिद्धे । गाती इतिभाषा ॥

उरस्त्रम् । न । उरश्छदे ॥

उरस्त्राणम् । न । नागोदरे । वक्षस्त्राणकवचे ॥

उरस्यः । त्रि । औरसेपुत्रे । स्वजाते ॥ उरसानिर्मित. पुत्रः । उरसोऽणूचेतियत् ॥ उरसा एकदिक्वा । उरसो यत्रेतियत् ॥ चात्तसिः । उरस्त. ॥ उरस्तवा । शाखादिभ्योयः ॥

उरस्वान् । त्रि । उरसिले ॥ प्रशस्तमतिशयितंवा उरोयस्य विशालत्वात् । मतुप् । मादुपधाया इतिवः ॥

उरी । अ । अङ्गीकारे ॥ विस्तारे ॥ वयतेरीक । सम्प्रसारणञ्च वाहुलकात् ॥

उरीकारः । पुं । स्वीकारे ॥ विस्तारे ॥

उरीकृत. । त्रि । स्वीकृते ॥ विस्तृते ॥ उरीक्रियतेस्म । क्तः ॥

उरु. । त्रि । विशाले । विपुले । महति । वडे ॥ ऊर्णोति । ऊर्णुञ्० । महतिह्रस्वश्चेतिकुप्रत्ययो नुलोपो ह्रस्वश्च ॥

उरुकाल' । पुं । } महाकाललतायाम् ।
उरुकालकः । पुं । }

उरुक्रमः । त्रि । भगवति ॥ उरुर्महान् क्रमः शक्तिर्यस्य ॥

उरुगायः । पुं । श्रीकृष्णे ॥ बहुकीर्त्तिमति ॥

उरुचक्षाः । त्रि । विस्तीर्णतेजसि ॥

उरुमान. । पुं । पूजायाम् ॥

उररी । अ । अङ्गीकारे ॥ विस्तारे ॥

उरुवुकः । पुं । रक्तैरण्डे ॥

उरुवूक' । पुं । एरण्डे ॥ रक्तैरण्डे ॥ उरु महान्तं वायति । ओवैशोषणे । उलूकादयश्चेत्यूकः ॥ क्वाथेऽस्यमूलं ग्राह्यम् ॥

उरुव्यचाः । पुं । राक्षसे ॥

उरोजः । पुं । स्तने ॥

उर्जितः । चि । वर्द्धिते ॥

उर्द्रः । पुं । उद्रे । अम्बुविडाले ॥

उर्बटः । पुं । वत्सरे ॥ इतित्रिकाण्डशेषः ॥

उर्वरा । स्त्री । सर्वशस्याढ्यभूमौ ॥ भूमिमात्रे ॥ ऋच्छति । ऋगतौ । पचाद्यच । यद्वा ईर्य्यते । ऋदोरप् । उरूणामरा ॥ यद्वा । उर्व्यते । उर्वीहिंसायाम् । खनोघचेति घः । उपधायाश्चेतिदीर्घं स्तुसंज्ञापूर्वकत्वान्न । उर्वरातिं । कः ॥ यद्वा । सम्पदादित्वात् क्विप् । राल्लोपः ॥ उर्चासौवराच । ऊर्ध्वरा वा ॥

उर्व्वरितः । त्रि । परिशिष्टे । अवशिष्टे । उवरा इतिभाषा ॥ शेषिते ॥

उर्व्वशी । स्त्री । स्वर्गवेश्यायाम् ॥ उरून् महतोऽश्नुते व्याप्नोति वशीकरोतीतियावत् । मू० कः । उरु अश्नातीतिवा ॥

उर्व्वशीरमणः । पुं । चन्द्रवंशीयनृपतिविशेषे । पुरूरवसि । ऐले ॥

उर्व्वशीवल्लभः । पुं । पुरूरवसि । बौधे ॥

उर्व्वारुः । पुं । कर्कट्याम् ॥ स्वादुकर्कट्याम् ॥

उर्व्वारुकः । पुं । कर्कटिकाख्येचिर्भिटिकाख्येषा फलविशेषे ॥

उर्व्वी । स्त्री । भूमौ ॥ ऊर्णोति । ऊर्णुञ्० । महतिह्रस्वश्चेतिकुर्न्नुलोपोह्रस्वश्च । वोतोगुणवचनादिति ङीष् ॥

उलपः । पुं । न । गुल्मिन्याम् । शाखापत्रप्रचयवत्यां लतायाम् । वीरुधि ॥ पुं । कोमले तृणविशेषे । वल्वजेषु । उलुखड इतिगौडभाषा ॥ वलति । वलसंवरणे । विटपविष्टपविशिपोलपा इतिवलेः सम्प्रसारणं कपश्च ॥ उल्यते । उल सौत्र: आवरणार्थो दाहार्थो वा । कपश्चाक्रवर्मणश्चेतिकपो वा ॥

उलिन्दः । पुं । देशविशेषे ॥ इत्युणादिकोषः ॥

उलूकः । पु । पेचके । घूके । दिवान्धे । कौशिके । उल्लू इति भाषा ॥ इन्द्रे ॥ शकुनिपुत्रे । भारतयोधिनि ॥ न । तृणविशेषे ॥ उचति । उचसमवाये । उलूकादय इतिसाधु. ॥ यद्वा । वलते । वल० । उलूकादित्वा इलेः सम्प्रसारणमूकश्च ॥

उलूकी । स्त्री । ताम्रायाः सुता शुकी-तस्याः कन्यायाम् ॥ शुकी शुकानजनयत् उलूकीप्रत्युलूककानितिविष्णुपुराणे १ अंशे २१ अध्याय. ॥

उलूखलम् । न । उदूखले ॥ गुग्गुलौ ॥ ऊर्द्ध्वंखमुलूखम् । पृषोदरादि । उलूखं लाति लाआदाने । आतो

नुपेति कः ॥

उलूखलकम । न । उलूखलार्थे ॥ स्वार्थे कः ॥

उलूतः । पुं । अजगरसर्पे ॥

उलूपी । पुं । शिशुके । शोंशु इतिप्रसिद्धे मत्स्यप्रभेदे ॥ चुलुम्पिनि । गौडभाषायाम् उपल इतिप्रसिद्धे अतिचञ्च लेमत्स्यविशेषे ॥ शिशुमाराकृतौमत्स्यविशेषे ॥ उ विस्मयजनकंरूपमस्यास्ति । अतइनि. । रलयोरैक्यम् । ओ'षमोः रूपमस्यास्तीतिवा ॥

उलूपी । स्त्री । अर्जुनभार्यायाम् । कौरव्यनाम्नो नागस्य कन्यायाम् ॥

उलूलुः । पुं । उत्सवकालिके गौडादिदेशप्रसिद्धे स्त्रीभि'क्रियमाणे शब्दविशेषे ॥

उल्का । स्त्री । अग्निनिर्गतज्वालायाम् ॥ अनले ॥ तेजःपुञ्जे । रेखाकारेऽन्तरीक्षात् पतज्ज्योतिषि ॥ अस्यारूपप्रदर्शनन्तु । दिविभुक्तशुभफलानां पततां रूपाणियानि तान्युल्काः । धिष्ण्योल्काशनिविद्युत्तारा इतिपञ्चधाभिन्ना० ॥ अस्यालक्षणम् । उल्काशिरसिविशाला निपतन्ती वर्द्धतेप्रतनुपुच्छा । दीर्घाचभवति पुरुषं न्द्रावहवोभवन्त्यस्याः ॥ काश्यपोपि । हस्वाच्छिखाचरूश्चाशा रक्तानीलशिखोज्वला । पैाश्चीयप्र...द्भेन उल्का नानाविधास्मृता । इति ॥ ओषति । उषदाहे । अर्यतेवा । ऋगतौ । शुकवत्कोल्का इति साधुः ॥

उल्कापातः । पुं । अग्निशिखावत्तेजःपाते ॥ उल्कायाः पातः ॥

उल्कामुखी । स्त्री । शिवो । लोमाशिकायाम् । दीप्तजिह्वायाम । लोमडीइतिभाषा ॥ उल्कामुखेऽस्याः ॥

उल्मुकम् । न । अङ्गारे । अलाते ॥ ओषति । उष० । उल्मुकदर्वीतिनिपातनाद्धातो' षस्यलः मुकप्रत्ययश्च ॥

उल्लङ्घनम् । न । अतिक्रमणे ॥ अन्यथाकरणे ॥ उत्लघेर्ल्युट् ॥

उल्ललः । त्रि । रोमशे । बहुरोमयुक्ते ॥

उल्ललन् । त्रि । उत्प्लवमाने ॥

उल्ललितः । त्रि । आन्दोलिते । नरलिते ॥ चलिते ॥

उल्लसन् । त्रि । शोभमाने ॥

उल्लसनकम् । न । रोमाञ्चे ॥

उल्लसितः । त्रि । उद्गते ॥ उद्भूते ॥ विचित्रिते ॥

उल्लाघः । त्रि । शुचौ ॥ कृष्णे । मरिचे ॥ दक्षे ॥ गदान्निर्गते । नीरोगे ॥ उल्लाघतेस्म । लाघृसामर्थ्ये । गत्यर्थेलित्त' । उल्लाघ्यतेस्म । अनुपसर्गा

त् फुल्लच्चीवेतिवा साधुः ॥

उल्लामः । पुं । काकुवाचि । शोकरोगादिनाध्वनेर्विकारे ॥

उल्लापनम । न । वर्त्तिकादिक्रुजुकरणे ॥

उल्लासः । पुं । ग्रन्थपरिच्छेदे ॥ प्रकाशे ॥ आह्लादे ॥ वृद्धौ ॥ उल्लसनम् । लसश्लेषणक्रीडनयोः । घञ् ॥ अलङ्कारविशेषे । एकस्यगुणदोषाभ्यामुल्लासोन्यस्यतौ यदि ॥

उल्लिखित. । त्रि । उत्कीर्णे ॥ तनूकृते ॥ उपरिलिखिते ॥ चित्रिते ॥

उल्लिङ्गितः । त्रि । भङ्गिभिरेवसम्यगवगते ॥

उल्लेख' । पुं । उच्चारणे । कथने ॥ अलङ्कारविशेषे । वहुभिर्बहुधोल्लेखादेकस्योल्लेखइष्यते । एकोनवहुधोल्लेखोप्यसौविषयभेदत. ॥ स्त्रीभिः कामोऽर्थिभिःस्वर्द्रुः कालः शत्रुभिरैच्चि स' । गुरुर्वचस्यर्जुनोऽयंकीर्त्तौभीष्मः शरासने ॥ उल्लेखनम् । उत् लिखेर्घञ् ॥

उल्लेखनम् । न । वमने ॥ खनने ॥ उच्चारणे ॥ यथा । मासपक्षतिथीनाञ्चनिमित्तानाञ्चसर्वशः । उल्लेखनमकुर्वाणोनतस्यफलभाग्भवेदिति ॥ लिख० । ल्युट् ॥

उल्लोचः । पुं । विताने । चन्द्रातपे । चंदोआ इतिभाषा ॥ उर्द्धं लोचति । लोचृभासने । अच् ॥ उद्धं लोच्यते वा । लोचृदर्शने । घञ् ॥कुत्त्वन्तु निष्ठायामनिट इतिवचनात् । अस्यतुतस्य सेट्त्वात् ॥

उल्लोलः । पु । कल्लोले । महोर्मौ । वडढेउ इतिगौडभाषा ॥ उत्लोडयति । लोडृउन्मादे । णिच् । पचाद्यच् । डलयोरेकत्वम् ॥

उल्बम् । न । जरायौ । गर्भवेष्टनचर्मणि ॥ कवले ॥ गर्त्ते ॥ उल्लीयते । लीङ्श्लेषणे । उलवादयश्चेतिसाधु । यद्वा । ओलति उल्यतेवा । उचू सौत्रोदाहे । वल्यते वा वलप्राणने । अथवा उच्यतिउच्यते समवैत्यनवा । उचसमवाये । माग्वत् ॥

उल्वणः । त्रि । व्यक्ते । स्पष्टे ॥ उद्वणति वणशब्दे । पचाद्यच् । पृषोदरादिः ॥

उशन् । त्रि । कामयमाने ॥

उशत्तमः । त्रि । कमनीये ॥

उशना । पुं । भार्गवे । शुक्रे ॥ वष्टि वशकान्तौ । वशेः कनसिः । ग्रह्यादित्वात सम्प्रसारणम् । ऋदुशन्-सित्यनङ् । उशना उशनसौ । अस्य सम्बुद्धौ वा अनङ् नलोपश्चवा । ते

न । हेउशनन् हेउशन हेउशनः॥

उशिक् । पुं । अग्नौ । वीतिहोत्रे ॥ घृते ॥ त्रि । कमनीये ॥ यथा । न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् । तद्वायसंतीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षया इति श्रीभागवतम् ॥ वष्टि उश्यते वा । वश० । वशःकिदिति इजिप्रत्ययः ॥

उशीः । स्त्री । वाञ्छाविशेषे ॥

उशीनरः । पुं । गान्धाराख्ये देशविशेषे । खन्धारइति प्रसिद्धे ॥ चन्द्रवंशोद्भवस्य शिविन्वपतेः पितरि ॥

उशीरः । पुं । न । वीरणाङ्घ्रौ । नलदे । खस् इतिप्रसिद्धे ॥ उश्यते । वश० । वशः किदितीरन् अस्य गुणा यथा । उशीरं पाचनं शीतं स्तम्भनं लघुतिक्तकम् । मधुरं ज्वरहृद्वान्तिमदनुत् कफपित्तहृत् ॥ तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहमिति ॥

उशीरिकः । त्रि । उशीरविक्रेतरि ॥ उशीरं पण्यमस्य । किसरादिभ्यः ष्ठन् ॥

उशीरी । स्त्री । लघुकाशे । नीरजे ॥ उशीरीमधुराशीतापित्तदाहक्षया नहरेत् ॥

उषः । पुं । कामिनि ॥ गुग्गुलौ ॥ राविशेषे ॥ न । पांशुलवणे ॥

उषणम् । न । मरिचे ॥ पिप्पलीमूले ॥ ओषति । उष० । बाहुलकात्क्युन् । ल्युट्वा । संज्ञापूर्वकत्वात् गुणाभावः ॥

उषणा । स्त्री । कणायाम् । पिप्पल्याम् ॥ शुण्ठ्याम् ॥ टाप् ॥ चविके ॥

उषती । स्त्री । अकल्याणवचसि । निन्द्यार्थायांवाचि ॥ उषेःशतरि आगमशासनस्यानित्यत्वात् नुमभावः ॥ त्रि । अशुभयुक्तेवचसि ॥ उषन् व्योहारः उषतवचः ॥

उषपः । पुं । सूर्ये ॥ अग्नौ ॥ ओषति । उष० । उषिकुटिदलिकच्चिखजिभ्यः कपन् ॥

उषर्बुधः । पुं । कृशानौ । पावके ॥ रक्तचित्रके ॥ उषसि सन्ध्यायां बुध्यते प्रकाशते । बुध० । इगुपधत्वात्कः । अहरादीनामित्यस्य व्यवस्थितविभाषात्वान्नित्यंरः ॥

उषठ । न । प्रत्यूषसि । अहर्मुखे ॥ एतस्यस्वरूपन्तु पञ्चपञ्चउषः कालइति । पञ्चपञ्चाशतघटिकोत्तरमुषः काल इत्यर्थः ॥ ओषत्यन्धकारम् । उषदाहे । उषःकिदित्यसिः ॥ दशपाद्यान्तुवसः किदितिपाठः । वसति सूर्योयत्रेति उषाः । अपोभीति

कञ्च स्ववस्स्वतवसोमासउषसस्त तदृश्यते इतिवार्त्तिकस्य समुषद्भिरित्युदाहरणं विनृभवद्भिर्हरदत्तादिभिरयं पाठ. पुरस्कृतः॥ स्त्री। दिवो दुहितरि देवतायाम्॥

उषसी। स्त्री। पित्तप्रसूवाम् । सायंसन्ध्यायाम्॥

उषस्ति:। पु। ऋषिविशेषे। चाक्रायणे॥

उषस्यम्। न। हविर्विशेषे॥ त्रि। तद्देवताकद्रव्ये॥ उषस् शब्दोदिवोदुहितरं देवता माचष्टे। सा देवता अस्य ।वाय्वृतुपित्रुषसो यत्।

उषा। अ। रात्रौ॥ रात्र्यन्ते॥ ओषति। उष०। का प्रत्ययः॥ सातु नचन्द्रतेजः परिहानिमारभ्य भानोरर्द्धोदयं यावद्भवति। यथाह वराह.। अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारकायावत्। तेज परिहानि रुषा भानोरर्द्धोदयं यावदिति॥

उषा। स्त्री। बाणासुरसुतायाम्। अनिरुद्धस्य भार्य्यायाम्॥ रात्रौ। धेनौ॥ सायंसन्ध्यायाम्॥ ओषति। उष०।इगुपधेति कः। टाप्॥ याचामुहूर्त्तान्तरे॥ यथा। प्रभ्रष्टद्युतितारकास्फुटतटी प्राचीभवे न्निर्मला त्वी षद्रक्तविलोहितान्तधवलादेवैःसदा

वाञ्छिता। नो वारं न तिथिं न योगकरणं लग्नं च नापेक्ष्यते हत्वा दैत्यसहस्र मव्ययमुषा नूनं करोत्युन्नति

उषाकल:। पु। कुक्कुटे। ताम्रचूडे॥ उषायां कलोऽस्य॥

उषापति:। पुं। अनिरुद्धे। कामात्मजे॥ उषाया पतिः॥

उषारमण:। पुं। अनिरुद्धे। कन्दर्पतनये॥ उषायाः रमणः॥

उषित:। त्रि। व्युषिते। पर्य्युषिते। वसाइतिभाषा॥ प्लुष्टे। दग्धे॥ स्थिते। कृतनिवासे॥ त्वरिते॥ उष्यतेस्म। उष०। क्तः॥ वसेर्गत्यर्थाकर्मकेतिक्तः। यजादि। अनुदात्तत्वादिट् प्रतिषेधे प्राप्ते वसतिक्षुधोरितीट॥

उषेश:। पुं। अनिरुद्धे॥

उष्ट्र:। पुं। कण्टकाशने। मरुद्विपे। क्रमेलके। लम्बोष्ठे॥ ओषति उष्यतेवा। उष०। उषिखनिभ्यां कित्। तिष्ठन्। वाहुरथे॥ इतिधरणी॥

उष्ट्रकाण्डी। स्त्री। रक्तपुष्प्याम्। कर्णपुष्प्याम्॥उंटाटीइतिगौडभाषा॥

उष्ट्रगोयुगम्। न। उष्ट्रयोः॥ द्वावुष्ट्रौ द्विस्त्वेगोयुगच्॥

उष्ट्रगोष्ठम्। न। उष्ट्रशालायाम्॥ उष्ट्रा

न । हेउशनन् हेउशन हेउशन:॥

उशिक् । पुं । अग्नौ । वीतिहोत्रे ॥ घृते ॥ चि । कमनीये ॥ यथा । न यद्वचश्चित्रपदं हरेर्यशोजगत्पवित्रं प्रगृणीत कर्हिचित् । तद्वायसंतीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षया इति श्रीभागवतम् ॥ वष्टि उश्यते वा । वश० । वशःकिदितीजिप्रत्ययः ॥

उशी । स्त्री । वाञ्छाविशेषे ॥

उशीनरः । पुं । गान्धाराख्ये देशविशेषे । खन्धार इति प्रसिद्धे ॥ चन्द्रवंशोद्भवस्य शिविनृपतेः पितरि ॥

उशीरः । पुं । न । वीरणाद्रौ । नलदे । खस इति प्रसिद्धे ॥ उश्यते । वश० । वशः किदितीरन् अस्य गुणा यथा । उशीरं पाचनं शीतंस्तम्भनं लघुतिक्तकम् । मधुरं ज्वरहृद्वान्तिमदनुत् कफपित्तहृत् ॥ तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहमिति ॥

उशीरिक । चि । उशीरविक्रेतरि ॥ उशीरंपण्यमस्य । किसरादिभ्यः ष्ठन् ॥

उशीरी । स्त्री । लघुकाशे । नीरजे ॥ उशीरीमधुराशीतापित्तदाहक्षयान् हरेत् ॥

उषः । पुं । कामिनि ॥ गुग्गुलौ ॥ रात्रिशेषे ॥ न । पांशुलवणे ॥

उषणम् । न । मरिचे ॥ पिप्पलीमूले ॥ ओषति । उष० । बाहुलकात्क्युन् । ल्युट्वा । संज्ञापूर्वकत्वात् गुणाभावः ॥

उषणा । स्त्री । कणायाम् । पिप्पल्याम् ॥ शुण्ठ्याम् ॥ टाप् ॥ चविके ॥

उषती । स्त्री । अकल्याणवचसि । निन्द्यार्थयांवाचि ॥ उषेःशतरि आगमशासनस्यानित्यत्वात्नुमभावः ॥ चि । अशुभयुक्तवचसि ॥ उषन् व्योहारः उषत्वचः ॥

उषपः । पुं । सूर्ये ॥ अग्नौ ॥ ओषति । उष० । उषिकुटिदलिकचिखजिभ्यः कपन् ॥

उषर्बुधः । पुं । कृशानौ । पावके ॥ रक्तचित्रके ॥ उषसि सन्ध्यायां बुध्यते प्रकाशते । बुध० । इगुपधत्वात्कः । अहरादीनामित्यस्य व्यवस्थितविभाषात्वान्नित्त्वंरः ॥

उषऽ । न । प्रत्यूषसि । अहर्मुखे ॥ एतस्य स्वरूपन्तु पञ्चपञ्चउषः कालइति । पञ्चपञ्चाशत्घटिकोत्तरमुषः कालइत्यर्थः ॥ ओषत्यन्धकारम् । उपदाहे । उषःकिदित्यसिः ॥ दशपाद्यान्तुवसः किदितिपाठः । वसति सूर्योयत्रेति उषाः । अपोभीति

ऋच स्ववस्स्वतवसोमासउषसश्च तद्दृश्यते इतिवार्त्तिकस्य समुषद्भिरित्युदाहरणं विवृण्वद्भिर्हरदत्तादिभिरयं पाठः पुरस्कृतः॥ स्त्री। दिवो दुहितरि देवतायाम्॥

उषसी। स्त्री। पितृप्रसाम्। सायंसन्ध्यायाम्॥

उषस्तिः। पुं। ऋषिविशेषे। चाक्रायणे॥

उषस्यम्। न। हविर्विशेषे॥ त्रि। तद्देवताकद्रव्ये॥ उषस् शब्दोदिवोदुहितरं देवता माचष्टे। सा देवता अस्य। वाय्वृतुपित्रुषसो यत्॥

उषा। अ। रात्रौ॥ रात्र्यन्ते॥ ओष ति। उष०। का प्रत्ययः॥ सातु नक्षत्रतेजः परिहानिमारभ्य भानोरर्द्धोदयं यावद्भवति। यथाह वराहः। अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारकायावत्। तेज परिहानि मु षा भानोरर्द्धोदयं यावदिति॥

उषा। स्त्री। वाणासुरसुतायाम्। अनिरुद्धस्य भार्य्यायाम्॥ रात्रौ। धेनौ॥ सायंसन्ध्यायाम्॥ ओषति। उष०। इगुपधेति कः। टाप्॥ यामामुहूर्त्तान्तरे॥ यथा। प्रभ्रष्टद्युतितारकास्फुटतटी प्राचीभवे निर्मला त्वी षद्रक्तविलोहितान्तधवलादेवैः सदा वाञ्छिता। नो वारं न तिथिं न योगकरणं लग्नञ्च नापेक्ष्यते हत्वा दोषसहस्रमच्यमुषा नूनं करोत्युन्नतिं॥

उषाकलः। पुं। कुक्कुटे। ताम्रचूडे॥ उषायां कलोऽस्य॥

उषापतिः। पुं। अनिरुद्धे। कामात्मजे॥ उषाया पतिः॥

उषारमणः। पुं। अनिरुद्धे। कन्दर्पतनये॥ उषायाः रमणः॥

उषित। त्रि। व्युषिते। पर्य्युषिते। वसाइतिभाषा॥ प्लुष्टे। दग्धे॥ स्थिते। कृतनिवासे॥ त्वरिते॥ उष्यते स्म। उष०। क्तः॥ वसेर्गत्यर्थाकर्मकेति क्त। यजादि। अनुदात्तत्वादिट् प्रतिषेधे प्राप्ते वसतिक्षुधोरितीट॥

उषेशः। पुं। अनिरुद्धे॥

उष्ट्रः। पुं। कण्टकाशने। मरुद्विपे। क्रमेलके। लम्बोष्ठे॥ ओषति उष्यते वा। उष०। उषिखनिभ्यां कित्तिष्ठन्। वाहुलकात्॥ इतिधरणी॥

उष्ट्रकाण्डी। स्त्री। रक्तपुष्प्याम्। कर्णपुष्प्याम्॥ उंटाटीइतिगौडभाषा॥

उष्ट्रगोयुगम्। न। उष्ट्रयोः॥ द्वावुष्ट्रौ। द्विक्वेगोयुगच्॥

उष्ट्रगोष्ठम्। न। उष्ट्रशालायाम्॥ उष्ट्रा

शांस्थानम् । गोष्ठञ्च ॥

उष्ट्रधूसरपुच्छिका । स्त्री । विछाती वि चिटीति गौडभाषाप्रसिद्धे वृक्षविशेषे ॥

उष्ट्रपादिका । स्त्री । मदनमालोतिगौडभाषाप्रसिद्धे वृक्षविशेषे । भूमिमल्लायाम् ॥

उष्ट्रशिरोधरम् । न । उष्ट्रग्रीवसंज्ञे भगन्दररोगविशेषे ॥ तस्यलक्षणम् । प्रकोपणै. पित्तमतिप्रकोपितं करोतिरक्तापिटकांगुदागताम् । तदाशुपाकाहिमपूतिवाहिनी भगन्दरन्तूष्ट्रशिरोधरं वदेतिनिदानम् ॥

उष्ट्रिका । स्त्री । मृद्भाण्डप्रभेदे । मृन्मयेमद्यभाण्डे ॥ करभयोषिति । ऊंटिनीइतिभाषा ॥ दण्डिकालीवृक्षे ॥

उष्ट्री । स्त्री । मृद्भाण्डविशेषे ॥ करभ्याम् । वाश्याम ॥ उषे.पृक्षत्वान्ङीष् ॥

उष्ण. । पुं । ग्रीष्मर्त्तौ । निदाघे ॥ आतपे ॥ पलाण्डौ ॥ नरकान्तरे ॥ त्रि । अशीते ॥ ओषति । उष० । इण्षिञ्जिदीङुष्यविभ्योनगितिनक् ॥ निरालस्ये । चतुरे । दक्षे ॥ उष्णत्वंशीघ्रकारित्वमस्यास्ति । अर्श-आद्यच् ॥

उष्णकः । पुं । निदाघे ॥ ज्वरे ॥ त्रि । क्षिप्रकारिणि ॥ आतुरे ॥ उष्णमिव उष्णम् । तंकारोति । शीतोष्णाभ्यांकारिणीतिकन् ॥ उष्णं कार्यमस्य । कालप्रयोजनाद्रोगे इतिकन् ॥ यावादिषु क्षता वुष्णशीतइतिस्वार्थेकन्वा ॥

उष्णगुः । पुं । सूर्ये ॥ उष्णागावोऽस्य ॥

उष्णनदी । स्त्री । वैतरिण्याम् ॥

उष्णरश्मि. । पुं । सूर्ये ॥ उष्णारश्मयोऽस्य ॥

उष्णवातः । पुं । मूत्राघातविशेषे ॥

उष्णवारणम् । न । आतपत्रे । छत्रे ॥

उष्णवीर्य्यं । पुं । शिशुमारे ॥ त्रि । वीर्य्योष्णवस्तुनि ॥ उष्णं वीर्यमस्य ॥

उष्णा । स्त्री । क्षयव्याधौ ॥ सन्तापे ॥ पित्ते ॥

उष्णांशु. । पु । सूर्ये ॥

उष्णागम. । पुं । निदाघकाले ॥ उष्णस्य आगमो यस्मिन् ॥

उष्णालुः । त्रि । उष्णपीडिते ॥ उष्णं नसहते । शीतोष्णेभ्यालुः ॥

उष्णासहः । पु । हेमन्तर्त्तौ ॥

उष्णिका । स्त्री । यवाग्वाम् । जाउ इ-तिगौडभाषा ॥ अल्पमन्नमस्याम् । प्राल्पशाकोष्णिकेसंज्ञायामितिकन् । निपातनादन्नशब्दस्योष्णादेशः ॥ दक्षायाम् ॥

उष्णिक् । स्त्री । सप्ताक्षरायांवृत्तौ ॥ यथा । रङ्गे वाहुविस्फुरणात् कुम्भीन्द्रा

न्मदलेखा । लग्नाभून्मुरशत्रो' क स्तूरीरसचर्चा इति ॥ उत् स्निह्यति । स्निह प्रीतौ । ऋत्विगित्यादिना उत्पू र्वात् स्निहेः किन् । निपातनादुपस र्गान्तलोपः षत्वञ्च । क्विन्नन्तत्वात् कुत्वेन हस्य घ ॥

उष्णीषः । पुं । न । शिरोवेष्टनवस्त्रे । पाघ पघडीइतिभाषा ॥ अस्य गुणा यथा । उष्णीषं कान्तिकृत् केश्यं रजो वातकफापहम् । लघु चेच्छस्यते यस्माद्गुरु पित्ताक्षिरोगकृदितिभा वप्रकाशः ॥ किरीटे ॥ लक्षणान्त रे ॥ उष्णमीषते हिनस्ति । ईष गति हिंसादर्शनेषु । इगुपधेतिकः । श कन्ध्वादिः ॥

उष्णोदकम् । न । तप्तजले ॥ क्वाथ्य मानं पादावशेषाद्वा विशेषपादहीन- जले । अस्य गुणाः । तत्पादहीनं वा तेऽर्धं मध्यहीनन्तु पित्तनुत् । कफघ्नं पादशेषस्थं पानीयं लघुदीपनमि- ति ॥ उष्णञ्चतत् उदकञ्च ॥

उष्णोपगमः । पुं । निदाघे ॥ उष्णःउप गमोऽत्र ॥

उष्मः । पुं । निदाघे ॥ आतपे ॥ वसन्त काले ॥

उष्मकः । पुं । ग्रीष्मर्तौ । ऊषति रुज ति । ऊषरुजायाम् । अन्येभ्योपीति

मनिन् । याषादित्वात् कन् ॥

उष्मपाः । पुं । पितृगणविशेषे ॥ उष्म पास्तु कवे. पुत्राः ॥ उष्माणं पिवन्ति । पापाने । क्विप् ॥ यावदुष्णं भवत्य न्नं यावदश्नन्ति वाग्यताः । पितरस्ता वदश्नन्ति यावन्नोक्ता हविर्गुणाः. इति स्मृतिः ॥

उष्मागमः । पुं । आतपे । निदाघे ॥ ओषतीत्युष्मा । अन्येभ्य इतिमनि न् । आगच्छतीत्यागमः । अच् । उष्मातापः आगमोऽत्र ॥

उस्रः । पुं । वृषे ॥ मयूखे । किरणे ॥ वसन्ति रसा अस्मिन् । वस० स्फायि तञ्चीतिरक् । यजादित्वात् सम्प्रसा रणम् । नरपरेति षत्वाभावः ॥

उस्रा । स्त्री । अर्जुन्याम् । गवि ॥ उप चित्रायाम् ॥ वसति क्षीरमस्याम । उस्राट्टाप् ॥

उह । अ । सम्बोधनार्थ ॥ एवार्थे ॥ उ च ह चेति विग्रहः ॥

उहह । अ । सम्बोधने ॥ उहच हच ॥

उहानः । पुं । देशविशेषे ॥

उह्यमानः । त्रि । आकृष्यमाणे ॥ वहने नप्राप्यमाणे ॥ वहेःकर्म णिशानच् ॥

उह्नः । पुं । अनडुहि ॥ वहति । वह० । दशपाद्यां स्फायितञ्चीतिसूत्रे दम्भि वञ्चिवसीतिपाठात् रक् ॥

ऊः

ऊ । अ । वाक्यारम्भे ॥ रक्षायाम् ॥ अनुकम्पायाम् ॥ सम्बोधने ॥

ऊः । पुं । महेश्वरे ॥ चन्द्रे ॥ प्रापिते ॥ अवति । अवरक्षणादौ । कर्त्तरि क्विप् । ज्वरत्वरेत्यूठ ॥ ऊकारे ॥

ऊढः । त्रि । विवाहिते ॥ वहनकर्मणि । कृतवहने ॥ धृते ॥ उह्यतेस्म । वह । क्तः ॥

ऊढकङ्कटः । त्रि । वर्म्मिते । सन्नद्धे । वद्धसन्नाहे ॥ ऊढो धृतःकङ्कटःकवचो येन ॥

ऊढा । स्त्री । भार्य्यायाम् ॥ टाप् ॥

ऊतः । त्रि । स्यूते ॥ ऊयतेस्म । ऊयी तन्तुसन्ताने । क्तः ॥

ऊतिः । स्त्री । रक्षणे ॥ स्यूतौ । सिमाइ इतिभाषा ॥ लीलायाम् ॥ अवनम् । अव० । ऊतियूतीत्यादिनाक्तिन् । ज्वरत्वरेत्यूठ् ॥

ऊधन्यम् । त्रि । ऊधसेहिते ॥ गवादिषु ऊधसोनङ्चेतियत् ॥

ऊधःठ । न । आपीने । क्षीराशये ॥ वहति उनसिवा । वहप्रापणे उन्दीक्लेदनेवा । असुन् । ऊधसोमङितिनिहंशात् ऊधादेशः ॥

ऊधस्यम् । न । दुग्धे । ऊधसि भवम् । यत् ॥

ऊनः । त्रि । न्यूने । हीने । असम्पूर्णे ॥ ऊनयति । ऊनपरिहाने ॥ पचाद्यच् ॥

ऊम् । अ । रोषोक्तौ ॥ पृच्छायाम् ॥ ऊयते । ऊयी० । मुक्प्रत्ययः ॥

ऊमम् । न । नगरे ॥ अवति । अव० । अविसिवीत्यादिनामन्कित् ॥

ऊररी । अ । अङ्गीकारे ॥ ततौ । विस्तारे ॥ ऊयते । ऊयी० । वाहुलकात् ररीक् ॥

ऊरव्यः । पुं । वैश्ये ॥ ब्रह्मण ऊरोर्जातः । शरीरावयवाद्यत् । गुणादेशौ ॥ त्रि । ऊरुसम्भवे ॥

ऊरी । अ । अङ्गीकृतौ ॥ विस्तारे ॥ ऊयते । ऊयी० । बाहुलकाद्रीक् ॥

ऊरीकृतः । त्रि । अङ्गीकृते ॥ तते । विस्तृते ॥ ऊरीक्रियतेस्म । क्तः ॥

ऊरुः । पुं । जानूपरिभागे । सक्थिनि ॥ ऊर्णूयते आच्छाद्यते । ऊर्णुञ्० । ऊर्णोतेर्नुलोपश्चेति कर्मणि कुः ॥

ऊरुजः । पुं । वैश्ये ॥ ऊरोर्जातः । जनी० । पञ्चम्या मजातावितिडः ॥

ऊरुपर्वा । पुं । न । जानुनि । अष्ठीवति । घोंटू घुटना इति भाषा ॥ ऊरोः पर्व ॥

ऊररी । अ । अङ्गीकारे ॥ विस्तारे ॥

ऊरुस्तम्भः । पुं । रोगविशेषे ॥ तस्य रूपम् । परकीया विषगुरुस्यातामति शयव्यथौ । ध्यानाङ्गमर्द्दस्तैमित्यत न्द्राछर्द्यरुचिज्वरैः ॥ संयुतौ पादस दनकृच्छ्रोद्धरणसुप्तिभिः । तमूरुस्त म्भमित्याहुराढ्यवातमथापरेइति ॥

ऊरुस्तम्भा । स्त्री । कदलीवृक्षे ॥

ऊर्क् । न । वले ॥ अन्ने ॥ ऊर्ज्जेर्लच्छी त्वादिषु भ्राजभासेति क्विप् ॥ अमृ तशब्दाभिधेयोऽन्यन्तसारभूतः स्त्र च्छोन्नरस ऊर्गुच्यते इतिमीमांस काः ॥

ऊर्ज्जः । पुं । कार्त्तिकमासे ॥ उत्साहे ॥ बले ॥ प्राणने ॥ कार्त्तिकनाम्निवर्ष विशेषे ॥ न । जले । पानीये ॥ ऊ र्जयति उत्साहयति जिगीषून् । ऊ र्ज्जवलप्राणनयोः । ण्यन्तात् पचा द्यच् ॥ अस्तुनि सान्तोप्ययम् ॥

ऊर्ज्जस्वलः । त्रि । वलाधिके । ऊर्ज्जस्वि नि ॥ अतिशयितः ऊर्ज्जेवलमस्या स्ति । ज्योत्स्नातमिस्रेति ऊर्ज्जसोव लच् । अदन्त ऊर्ज्जशब्दाद्वलचि सग पिनिपात्यः ॥ अलङ्कारविशेषे ॥ र सभेदतदाभासतत्प्रकाशमानानि- वन्धनेन रसवत् प्रापक ऊर्ज्जस्वला- लङ्कार इति रूपात् । तत्प्रकाशमा नवन्धने समाहितालङ्कारइत्यर्थः ॥

ऊर्ज्जस्वी । त्रि । वलाधिके । ऊर्ज्जस्वले ॥ अतिशयित ऊर्ज्जेवलमस्यास्ति । ज्योत्स्नातमिस्रेति विनिः । अदन्ता त् विनिकृते सगपिनिपात्यः ॥ न । अलङ्कारविशेषे ॥ ऊर्ज्जस्विरूढाह- ङ्कार मिति तस्यलक्षणम् । साहङ्का रवस्त्वभिधान मित्यर्थ ॥

ऊर्ज्जितः । त्रि । वलाद्यतिशययुक्ते । वलप्रकर्षशालिनि ॥ वलार्थादूर्ज्जश ब्दात्तारकादित्वादितच् ॥ वलार्था दूर्ज्जेर्गत्यर्थाकर्मकेत्यादिनाकर्त्तरि क्तो वा ॥

ऊर्ज्जितशासनः । पु । नारायणे ॥ श्रुति स्मृतिलक्षणमूर्जितंशासनमस्य । य था । श्रुतिस्मृती ममैवाज्ञे यस्तेउल्ल ङ्घ्यवर्त्तते । आज्ञाछेदी ममद्वेषी मद्भक्तोपि न वैष्णवः ॥ इति भगवद्ब चनम् ॥

ऊर्ज्जिति. । स्त्री । उत्कर्षे ॥

ऊर्णनाभः । पुं । मर्कटके । लूतायाम् । तन्तुसर्जने प्रसिद्धजीवे । मकडी इतिभाषा ॥ ऊर्णेव तन्तुर्नाभावस्य । अजितियोग विभागादच् । ऊयामो रितिह्रस्वः ॥

ऊर्णनाभिः । पुं । लूतायाम् ॥ ऊर्णा- नाभावस्य ॥

ऊर्णा । स्त्री । मेषादिलोम्नि । ऊनइति भाषा ॥ भ्रुवोरन्तरावर्त्ते ॥ सतुभ्रूद्वयमध्येमृणालतन्तुसूक्ष्मः शुभायत एक प्रशस्तावर्त्तो महापुरुषलक्षणम् । चक्रवर्त्यादीनां महायोगिनाञ्च भवति ॥ ऊर्णोति । ऊर्णुञ्० । अन्येभ्योपीतिडः । ऊर्णोतेर्डं इतिडो वा ॥

ऊर्णायु । पुं । ऊर्णनाभे ॥ मेषे ॥ मेषलोमकम्बले । पट्टूदोवडु लोई पुरुखी इतिभाषा ॥ ऊर्णा अस्यास्ति । ऊर्णायायुस् । सित्वात् पदत्वम् । तेनयस्येतिलोपेन ॥

ऊर्दरः । पुं । राक्षसे ॥ शूरे ॥ ऊर्ज्जमर्द्दयाति । दृ० । ऊर्जिद्दृणातेरलचौपूर्वपदान्त्यलोपश्च । अलचोःस्वरभेदः ॥

ऊर्द्ध । त्रि । उच्छ्रिते ॥ तुङ्गे ॥ उपरिष्टात् उपर्य्यर्थे ॥ दण्डवत् स्थिते ॥ ऊर्द्धशब्दो दीर्घादिर्निर्व्विकारः सवकारश्चदृश्यते ॥

ऊर्द्धक । पुं । मृदङ्गविशेषे ॥ यवमध्याकृतिरूर्द्धकः ॥ शब्दार्णवस्तु । ऊर्द्धकोगोपुच्छवत्सचितालोऽष्टाङ्गुलोमुखे । धृत्वोर्द्धंवाद्यते तेषांवादनंदुर्ज्जनंनना ॥ इति ॥ अपिच । हरीतक्याकृतिस्त्वङ्कस्तथालिङ्ग्योयवाकृति । ऊर्द्धकोदण्डतुल्यः स्यान्मुरजाभेदतोमताः ॥ ऊर्द्धःकायति । कै शब्दे । सुपीतिकः ॥

ऊर्द्धकण्ठी । स्त्री । महाशतावर्य्याम् ॥

ऊर्द्धगमः । पुं । ऊर्द्धस्थे ॥ इतित्रिकाण्डशेषः ॥

ऊर्द्धजानुः । त्रि । उपरिभागेस्थूलजानुके । ऊर्द्धज्ञौ ॥ उर्द्धजानुनीयस्य ॥

ऊर्द्धज्ञः । त्रि । ऊर्द्धजानुनि ॥

ऊर्द्धज्ञु । त्रि । ऊर्द्धजानुनि ॥ ऊर्द्धजानुनीयस्य । ऊर्द्धाद्विभाषेतिपक्षेज्ञुः ॥

ऊर्द्धदेवः । पुं । विष्णौ । हरौ ॥

ऊर्द्धपादः । पुं । शरभे ॥

ऊर्द्धपुण्ड्रः । पुं । तिलकविशेषे ॥ सब्राह्मणललाटे पुण्ड्रेक्षुवत् चन्दनादिनाकृतोर्द्धरेखाद्वयरूपः । यथा । ऊर्द्धपुण्ड्रेत्रिपुण्ड्रंस्यात् त्रिपुण्ड्रेनोर्द्धपुण्ड्रकमिति । ऊर्द्धपुण्ड्रंद्विजःकुर्य्याद्वारिमृद्भस्मचन्दनैरित्यादिष वह्व । ऊर्द्धपुण्ड्रंमृदाकुर्य्यात् त्रिपुण्ड्रंभस्मनासदा । तिलकंवैद्विजःकुर्य्याच्चन्दनेनयदृच्छया ॥ ऊर्द्धपुण्ड्रंद्विज कुर्य्यात् क्षत्रियस्तुत्रिपुण्ड्रकम् । अर्द्धचन्द्रन्तुवैश्यश्चवर्त्तुलंशूद्रयोनिजः ॥ इतिब्रह्माण्डपुराणम् । अशुचिर्व्वाप्यनाचारोमनसापापमाचरे-

त् । शुचिरेवभवेन्नित्यमूर्द्धपुण्ड्राङ्कितोनरः ॥ ऊर्द्धपुण्ड्रधरोमर्त्योम्रियतेयत्रकुत्रचित् । श्वपाकोपिविमानस्थो ममलोकेमहीयते । इति ॥ वैदिकातिरिक्तएवास्याधिकारी ॥ यथोक्तंदेवीभागवते श्रीनारायणेन । ऊर्द्धपुण्ड्रं त्रिशूलञ्चवर्त्तुलं चतुरस्रकम् । अर्द्धचन्द्रादिकंलिङ्गं वेदनिष्ठो नधारयेत् ॥ जन्मनालब्धजातिस्तु वेदपन्थानमाश्रितः । पुण्ड्रान्तरंभ्रमादापिललाटेनैवधारयेत् ॥ ख्यातिकान्त्यादिसिद्ध्यर्थं चापि विष्णवागमादिषु । स्थितंपुण्ड्रान्तरंनैवधारयेद्वैदिकोजनइत्यादि ॥ ऊर्द्धश्वासौ पुण्ड्रश्च ॥

ऊर्द्धम् । अ । ऊर्द्धशब्दार्थे ॥

ऊर्द्धमानम् । न । उन्माने ॥ पलादिशब्दवाच्येनपाषाणादिनातुलादावारोपितेन येन सुवर्णादेर्गुरुत्वमुन्मीयतेतदूर्द्धारोपणादूर्द्धमानमितिशब्देनविवक्षितम् । वट्ट बाट इतिचयस्यभाषा ॥ ऊर्वादौ ॥ ऊर्द्धविस्थितेन येनमीयतेतत् । प्रथमश्चद्वितीयश्चऊर्द्धमाने मतौ ममेतिमहाभाष्योक्तः । प्रथमद्वितीयौ द्वयसजद्घ्नचौ ॥

ऊर्द्धमुखम् । न । नक्षत्रविशेषेषु । यथा । आर्द्रापुष्या धनिष्ठा च शतताख्या श्रवणातथा । रोहिणीच्युत्तराचैव नवैतोर्द्धमुखाः स्मृता इति ॥

ऊर्द्धमूलः । पुं । संसारवृक्षे ॥ ऊर्द्धमुत्कृष्टंकारणं कार्यापेक्षया परमव्याकृतंमूलमस्येति । अस्तिहिसंसारस्यमूलम् । नेदममूलं भविष्यतीतिश्रुतेः ॥

ऊर्द्धरेताः । पुं । महादेवे । सदाशिवे ॥ मुनिविशेषे । सनकादिषु ॥ भीष्मे ॥ सन्न्यासिनि ॥ ऊर्द्धं रेतो यस्य सः । न पततिवीर्यंयस्येत्यर्थः ॥

ऊर्द्धलिङ्गः । पुं । महेशे । देवदेवे । शिवे ॥

ऊर्द्धलोकः । पुं । दिवि । स्वर्गे ॥

ऊर्द्धस्थ. । त्रि । उपरिस्थिते ॥ ऊर्द्धे तिष्ठति । ष्ठा० । सुपिस्थइतिकः ॥

ऊर्द्धस्थितिः । स्त्री । उपरिस्थितौ ॥ ऊर्द्धावर्त्तः ॥ सतु अश्वस्यपृष्ठस्थानम् ॥

ऊर्द्धासितः । पु । तरमुञ्जे ॥ कारवेल्ले ॥ त्रि । ऊर्द्धोपवेशिते ॥ ऊर्द्धमआसितः आसितो वा ॥

ऊर्म्मि. । पुं । स्त्री । वीच्याम् ॥ प्रकाशे ॥ वेगे ॥ भङ्गे । स्वल्पतरङ्गे ॥ वस्त्रसङ्कोचरेखायाम् ॥ वेदनायाम् ॥ पीडायाम् ॥ उत्कण्ठायाम् ॥ बुभुक्षादिषट्सु । बुभुक्षाच पिपासाच प्रा

स्य मनसः स्मृतौ । शोकमोहौश रीरस्य जरामृत्यू षडूर्मयइत्युक्तः ॥ ऋच्छति । ऋगतौ । अर्त्तेरूच्चेति मिः । अर्त्तेरूरादेशः ॥ अश्वगतिविशेषे ॥ यथा । पङ्क्तीकृतानामश्वानां नमनोन्नमनाकृतिः । अतिवेगसमायुक्तागतिरूर्मिरुदाहृतेतिवैजयन्ती ॥

ऊर्म्मिका । स्त्री । अङ्गुलीये ॥ वस्त्रभङ्गे ॥ तरङ्गे ॥ उत्कण्ठायाम् ॥ भृङ्गनादे ॥ ऊर्म्मिरिव । इवेप्रतिकृताविति कन् । ऊर्मिं प्रकाशं कायति वा । कै० । आतोनुपेतिकः ॥

ऊर्म्मिमान् । त्रि । वक्रे । कराले । वाँ कादतिभाषा ॥ तरङ्गिणि ॥ ऊर्मिरस्यास्ति । मतुप् । यवादिः ॥

ऊर्म्मिमाली । पुं । समुद्रे । अकूपारे ॥ ऊर्मीणांमालासाअस्तिअस्य । इनिः ॥

ऊर्म्मिला । स्त्री । सरिति ॥ लक्ष्मणभार्य्यायाम् ॥ काचमालायाम् ॥ ऊर्म्मिंलाति । आतोनुपेतिकः ॥

ऊर्व्वरा । स्त्री । उर्वरायाम्भूमौ ॥

ऊर्व्वसी । स्त्री । नारायणोरुनिर्भिन्नसम्भूता वरवर्णिनीतिहरिवंशप्रसिद्धायां स्वर्गवेश्यायाम् । उर्वश्याम् ॥ ऊरौउषितेति । वसनिः । ऊर्वसी दीर्घादिर्दन्त्यान्तापृषोदरादिषु व्युत्पादिता ॥

ऊर्व्वङ्गम् । न । गोमयच्छत्रिकायाम् । शिलीन्ध्रके ॥

ऊषः । पुं । क्षारमृदि ॥ प्रभाते ॥ प्रातःसन्ध्यायाम् ॥ रन्ध्रे ॥ चन्दनाद्रौ ॥ श्रवोविले ॥ ऊषति । ऊषरुजायाम् । इगुपधेतिकः ॥

ऊषकम् । न । ऊषे । स्वार्थेकन् ॥

ऊषणम् । न । मरिचे ॥ पिप्पलीमूले ॥ शुण्ठ्याम् ॥ पुं । चित्रके ॥ ऊषति । ऊष० । बाहुलकात्क्युन् ल्युड्वा ॥

ऊषणा । स्त्री । पिप्पल्याम् ॥ चव्ये ॥ टाप् ॥

ऊषरः । पुं । क्षारभूमौ । ऊषवति ॥ यत्रबीजमुप्तंन प्ररोहति तस्मिन्क्षित्यर्थे ॥ ऊषोस्यस्मिन् । ऊषसुषीतिरः ॥ रेणुकादिनवतीर्थेषु ॥ यथा । रेणुका शूकरः काशी काली कालो वटेश्वरौ । कालिञ्जरो महाकालऊषरानवमुक्तिदा इति वराहपुराणम् ॥

ऊषरजम् । न । पांशवलवणे ॥ रोमकनामायस्कान्तभेदे ॥ इतिराजनिर्घण्टः ॥

ऊषवान् । त्रि । ऊषरे ॥ मतुप् ॥

ऊषा । स्त्री । वाणसुतायाम् ॥

ऊष्मा । पुं । निदाघे ॥ ऊष्मायाः अमस

ष्मा: । ऊष्माषायुस्तत्प्रधाना इत्यर्थः। एतच्चसोष्माणइत्यस्य वायुनासहव र्त्तन्तइत्यर्थं इति प्रातिशाख्यभाष्ये- स्पष्टम् ॥

ऊष्मा । स्त्री । ऊष्मणि ॥ टाबन्त. । ऊ ष्मया सार्द्रमृक्का पीतिदिरूपः ॥

ऊहः । पु । अध्याहारे । तर्कें ॥ अपूर्वा त्मेन्नणे इतिजैमिनि. ॥ आगमाऽ विरोधिना न्यायेन आगमार्थपरी क्षणे ॥ परीक्षणञ्च संशय्य पूर्वपक्षनि राकरणेनोत्तरपक्षव्यवस्थापनम् । तदिदं मननमाचक्षते आगमिनः सा तृतीया सिद्धि' तारतारमुच्यते । अन्येतुव्याचक्षते । विनोपदेशादि ना प्राग्भवीयाभ्यासवशात् तत्त्वस्य स्वय मूहनंयत् सा सिद्धिरूहइति । विमर्शात्मकतर्कें ॥ समूहे ॥ असम

वेतार्थैकपदत्यागपूर्वकसमवेतार्थ- कपदसमभिव्याहारकरणे॥ साका ङ्क्षवाक्यस्य पदान्तरेणाकाङ्क्षापूर- णे ॥ आरोपे ॥ ऊहनम् । ऊहवि- तर्कें । भावे घञ् ॥

ऊहत्वम् । न । मानसत्वव्याप्ये जाति विशेषे । तर्कत्वासीत्यनुभवसिद्धे ॥ अन्यथाश्रुतस्यशब्दस्य अन्यथा लि ङ्गवचनादिभेदेन विपरिणमनमू- ह स्तस्यभावे ॥

ऊहनम् । न । ऊहे ॥

ऊहनी । स्त्री । शोधन्याम् । सम्मार्ज- न्याम् ॥

ऊहा । स्त्री । अध्याहृतौ ॥ उहनम् । ऊह० । गुरोश्चहलइत्यप्रत्ययः । टाप ॥

ऋः

ऋ । अ । गर्हणे ॥ वाक्ये ॥ मन्त्रस्तोभवचने ॥ ऋकारे ॥ स्त्री । देवमातायाम् ॥ पुं । स्वर्गे ॥

ऋक्थम् । न । धने ॥ स्वर्णे ॥ ऋच्यते-ऋच्शब्दे । बाहुलकात् थक् ॥

ऋक्षः । पुं । गिरिविशेषे ॥ तापीपयोष्णीनिर्विन्ध्याप्रमुखा ऋक्षसम्भवाः ॥ भल्लूके ॥ शोणके । श्योनाकप्रभेदे ॥ पुं । न । नक्षत्रे । भे ॥ मेषादिराशौ ॥ त्रि । कृतवेधने ॥ अच्छे ॥ ऋषति । ऋषीगतौ । स्नुव्रश्चिकृत्यृषिभ्यःकिदिति ऋषे र्जातौ सः । षढोःकःसि ॥ यद्वा । ऋक्षणोति । ऋक्षहिंसायाम् । अच् ॥

ऋक्षगन्धा । स्त्री । ऋषिजाङ्गलिकायाम् । ऋषिजाङ्गल इति गौडभाषाप्रसिद्धायाम् ॥ क्षीरविदार्याम् । महाश्वेतायाम् ॥ छछुन्दरके । छगलान्त्याम् । वीरताड इति गौडभाषा ॥ ऋक्षान् गन्धयति । गन्धअर्द्दने । मूलविभुजादित्वात्कः ॥ यद्वा । ऋक्षोगन्धोऽस्याः । ऋक्षशब्दस्तद्गन्धसदृशगौणः । ऋक्षस्येवगन्धोस्याः । समासान्तस्यानित्यत्वात् उपमानाच्चेतिनेकारः ॥

ऋक्षगन्धिका । स्त्री । क्षीरविदार्याम् ॥ श्वेतभूकूष्माण्डे ॥ ऋक्षगन्धार्थे ॥ ऋक्षगन्धैव स्वार्थेकन् ॥

ऋक्षगिरिः । पुं । ऋक्षाभिधे कुलाचले ॥

ऋक्षरः । पु । ऋत्विजि ॥ न । वारिधारायाम् ॥ ऋषति । ऋषीगतौ । लन्यृषिभ्यां क्सरन् ॥ ऋक्षरःकण्टक-इति वेदभाष्यम् ॥

ऋक्षराजः । पुं । जाम्बवति ॥ चन्द्रे ॥ ऋक्षाणां राजा । टच् ॥

ऋक्षवान् । पु । नर्म्मदातीरस्थे पर्वतविशेषे ॥ ऋक्षाःसन्त्यस्मिन् । मतुप् ॥

ऋक्षविडम्बी । पुं । नक्षत्रसूचके ॥

ऋक्षहरीश्वरः । पु । सुग्रीवे ॥

ऋक्षेशः । पुं । चन्द्रमसि । सोमे ॥

ऋक्षोदः । पु । पर्वतविशेषे ॥

ऋग्वेदः । पुं । देवदैवत्ये ऋग्भ्याम्नायसमुदाये । ऋचि ॥

ऋग्वेदाधिपतिः । पुं । गुरौ । वृहस्पतौ ॥ यथा । ऋग्वेदाधिपतिर्जीवः सामवेदाधिपःकुज. । यजुर्वेदाधिपःशुक्रः शशिजोऽथर्ववेदराट् । इति ॥

ऋक् । स्त्री । नियताक्षरपादयुते देवदैवत्ये एकविंतिशाखात्मके वेदभागे । समानाक्षरपादवन्धसमन्विते-मन्त्रविशेषे ॥ तस्यलक्षणम । यथा

र्थवशेन पादव्यवस्थितिः । अस्यार्थः । यत्रार्थवशेन एकान्वयित्वेनानुष्टुवा दिपादस्थितिः । इति जैमिनिः ॥- ऋच्यन्ते स्तूयन्ते देवा अनया । ऋचस्तुतौ । क्विप् ॥

ऋचीषम् । न । पिष्टपचनपात्रे ॥ ऋचति । ऋचशब्दे । बाहुलकात् कीषन् ॥

ऋच्छरा । स्त्री । वेश्यायाम ॥ ऋच्छति । ऋच्छगतीन्द्रियप्रलयमूर्त्तिभावेषु । ऋच्छेररः ॥

ऋजिमा । पुं । आर्जवे ॥ ऋजोर्भाव. । इमनिच् ॥

ऋजीकः । त्रि । दुष्टे ॥ तपोधने ॥ अर्जते । ऋजगतिस्थानार्जनोपार्जनेषु । ऋजेश्चेति ईकन् ॥ यद्वा । ऋजीकन् । ऋजीक इन्द्रो धूमश्चेति कौमुदी ॥

ऋजीषम् । न । कटाहिकातम्बिकादौ पिष्टभर्जनपात्रे । पिष्टपचने ॥ धने ॥ उद्धृतरसे सोमलतायाः शेषे । एतद्यमन्त्रभाष्येस्पष्टम् ॥ नरकविशेषे ॥ अचपिष्टपचन प्रक्षेपः ॥ अर्ज्यते । अर्जअर्जने । अर्जे ऋजचेतिईषन् ॥

ऋजुः । त्रि । अवक्रे । अजिह्मे । प्रगुणे । प्राञ्जले । सीधा इतिभाषा ॥ ऋजवे । जिह्मा गुणा नेतरे स्वभावतः ॥ अ

र्जति । अर्ज अर्जने । अजिमृशीति साधुः । अर्जयति गुणान्वा ॥

ऋजुकायः । पुं । कश्यपमुनौ ॥ त्रि । अवक्रशरीरे ॥ ऋजुः कायोऽस्य ॥

ऋज्वः । त्रि । गतिमति । ऋज्वास्वइति मन्त्रे ऋज्वा गतिमन्ताऽश्वायस्येति वेदभाष्यात् ॥ नायके ॥ अर्जयते अर्जयतिवा । ऋजगत्यादिषु । ऋज्रेन्द्रेतिरन् । निपातनाद्गुणाभावः ॥

ऋज्रसानः । पुं । मेघे ॥ ऋज्रते । ऋजिभर्जने । ऋज्रिवृधीति असानच् कित् । वेदभाष्येतु यौगिकार्थ एव पुरस्कृत. ॥

ऋणम् । न । अधमर्णेनोत्तमर्णात पुनर्देयतयास्वीकृत्यगृहीतेधने । पर्य्युदञ्चने । उद्धारे । उधार इतिभाषा ॥ जले ॥ दुर्गे ॥ दुर्गभूमौ ॥ अर्यतेऽस्मै । ऋगतौ । क्त । ऋणमाधमर्ण्ये इति णत्वम् ॥

ऋणत्रयम् । न । त्रिविधे ऋणविशेषे ॥ यथा । देवानाञ्च पितॄणाञ्च ऋषीणाञ्चतथानर । ऋणवान् जायते यस्मात् तन्मोचे प्रयतेत्सदा ॥ तत्परिशोधनन्तु । देवाना मनृणो जन्तुर्यज्ञैर्भवति मानवः । अल्पविक्तश्च पूजाभिरुपवासव्रतैस्तथा ॥ श्राद्धेनप्रजयाचैव पितॄणामनृणो भवेत् । ऋषीणां

ब्रह्मचर्य्येण श्रुतेन तपसा तथा ॥ इ
तिविष्णुधर्मोत्तरम् ॥

ऋणमत्कुणः । पुं । } प्रतिभुवि । लग्न
ऋणमार्गणः । पुं । } के । जामिन्
जमान इतिभाषा ॥

ऋणमुक्तिः । स्त्री । विगणने । ऋणप
रिशोधने । ऋणस्य ऋणाद्वामुक्तिः ॥

ऋणमोक्षः । पुं । ऋणमुक्तौ ॥

ऋणहर्त्ता । पुं । भौमे ॥ ऋणस्यहर्त्ता ॥

ऋणादानम् । न । उत्तमर्णेनाधमर्णा
त्स्वाभधनग्रहणे । व्यवहारविशेषे
॥ तत्सप्तविधम् । यथा । ईदृशम
र्णदेयम् १ । ईदृशमदेमम् २ । अ
नेनाधिकारिणादेयम् ३ । अस्मिन्
समये देयम् ४ । अनेनप्रकारेणदेय
म् ५ । इत्यधमर्णपञ्चविधम् । उत्त
मर्णेतु दानविधिः ६ । आदानविधि
श्च ७ । इतिद्विविधम् । तथाच नार
दः । ऋणंदेयमदेयञ्चयेन यत्र यथा
भवेत् । दानग्रहणधर्म्माश्च ऋणादा
नमितिस्मृतम् ॥ अदेयमितियदुक्तं
तदाहकात्यायनः । नस्त्रीभ्योदास
बालेभ्यः प्रदद्यात् किञ्चिदुद्धृतम् ।
दाता न लभते तत्तुतेभ्यो दत्तन्तु त
द्वसु ॥ तत्रविशेषमाह बृहस्पतिः । प
रिपूर्णंगृहीत्वा धिं बन्धंवा साधुलग्न
कम् । लेख्यारूढंसाक्षिमद्वा ऋणंद

द्या दुनीसदा ॥ इतिविवादार्णवसे
तुः ॥

ऋणान्तकः । पु । कुजे । मङ्गलग्रहे ॥

ऋणापनोदनम् । न । ऋणापनयने ॥

ऋणिकः । त्रि । अधमर्णे ॥

ऋणी । त्रि । ऋणवति । अधमर्णे । ऋ
णग्रस्ते ॥

ऋणोद्ग्राहणम् । न । अधमर्णगृहीतर्ण
ग्रहणे ॥

ऋतम् । न । ब्राह्मणस्योत्तमवृत्तौ । उ
ञ्छशिले ॥ ऋतमुञ्छशिलंज्ञेयमित्यु
क्तः ॥ जले ॥ सत्ये ॥ मोक्षे ॥ कर्म
फले ॥ सुन्दतायांवाचि ॥ यथाशास्त्रे
यथाकर्त्तव्ये बुद्धौ सुपरिनिश्चितेर्थे ॥
अवितथस्वभावे परमार्थभूतवस्तुनि
॥ मानससत्ये ॥ त्रि । दीप्ते ॥ पूजि
ते ॥ अर्यतेस्म ऋच्छतिवा । ऋगतौ
। निष्ठेति गत्यर्थेतिवाऽर्त्तः क्तः ॥

ऋतजित् । पुं । यज्ञविशेषे ॥

ऋतधामा । पुं । विष्णौ ॥ ऋतं सत्यं धा
म अस्य ॥

ऋतपः । पुं । संसारिणिजीवे ॥ ऋतंक
र्मफलंपिबति । पा० । कः ॥

ऋतपर्णः । पुं । राजर्षिविशेषे ॥ यथा ।
कर्कोटकस्यनागस्य दमयन्त्यानलस्य
च । ऋतपर्णस्यराजर्षेः कीर्त्तनं क
लिनाशन मितिमहाभारतम् ॥

ऋतम् । अ॑ । सत्यमित्यर्थे ॥
ऋतम्भरा । स्त्री । प्रज्ञाविशेषे ॥ ऋतं सत्यमेव बिभर्त्ति न तत्र विपर्यासगन्धोप्यस्तीति यौगिक्येवेयं समाख्या॥ ग्रन्थदीपस्य नदीविशेषे ॥
ऋतव्यम् । त्रि । ऋतुदेवताके हविरादौ ॥ ऋतुर्देवतास्य । वाय्वृतुपितुषसोयत् । गुणावादेशौ ॥
ऋतिः । स्त्री । कल्याणे ॥ वर्त्मनि ॥ जुगुप्सायाम् ॥ स्पर्द्धायाम् ॥ गतौ ॥ अशुभे ॥ ऋगतौ । क्तिन् ॥
ऋतीया । स्त्री । अर्त्तने । जुगुप्सायाम् ॥ ऋतिःसौत्रः । ईयङ्पत्ते । अप्रत्ययादित्यः । टाप् ॥
ऋतुः । पुं । कालविशेषे ॥ स तु शिशिरादिभेदात् षड्विधः । यथा । मासद्वयात्मकः कालऋतुःप्रोक्तोविचक्षणैरिति । मलमासेतु मासद्वयात्मक एकोमासः तेन मासद्वयात्मकत्वमविरुद्धम् । षष्टात्तुदिवसै र्मासः कथितो बादरायणैरित्युक्तः ॥ शिशिरः पुष्पसमयो ग्रीष्मो वर्षाशरद्धिमः । माघादिमासयुग्मैस्तु ऋतवः षट्क्रमादितः॥ उत्तरायणमाद्यैस्तैस्त्रिभिःस्याद्दक्षिणायनमिति॥ ऋतूनांव्यत्यये जाते यदुक्तंतल्लिख्यते । यथा । शीतेोष्णताविपर्यासे ऋतूनांस्पुजंभयम् । पुष्पेफलेचविकृते राज्ञोमृत्युंतथादिशेदिति ॥ स त्रिविधोपि । कार्त्तिकाग्रहायणपौषमाघाः शीतः १ । फाल्गुनचैत्रवैशाखज्येष्ठाः ग्रीष्मः २ । आषाढश्रावणभाद्राश्विनाःवर्षा. ३ ॥ द्विविधोपि । कार्त्तिकादिषण्मासा शीतः । १ । वैशाखादिषण्मासाः ग्रीष्मः । २ । इति स्मृतिः॥ स्त्रीपुष्पे। आर्त्तवे । रजसि । शोणितदर्शनोपलक्षिते गर्भधारणयोग्ये स्त्रीणामवस्थाविशेषे ॥ ऋतुःस्वाभाविकःस्त्रीणां रात्रयःषोडशस्मृताः चतुर्भिरितरैःसार्द्धं मह्नोभिः सद्विगर्हितैः ॥ दीप्तौ ॥ सुवीरे ॥ मासे ॥ इयर्त्ति गच्छति असाधारणंलिङ्गम् । ऋगतौ । अर्त्तेश्चतुरितितुः । चात्कित्त्वम् । ऋच्छति वा ॥
ऋतुमासः । त्रि । फलितरौ । फलेग्रहे । अवन्ध्यरक्षादौ ॥ ऋतुःप्रासोनेन ॥
ऋतुमती । स्त्री । रजस्वलायाम् । उदक्यायाम् ॥ ऋतुरस्त्यस्याः । मतुप् । ङीप् ॥
ऋतुराजः । पुं । वसन्ते ॥ ऋतूनांराजा । राजाहःसखिभ्यष्टच् ॥
ऋतुवृत्तिः । पु । वर्षे । संवत्सरे ॥ ऋतुवृत्तिरस्य ॥

ऋतुसन्धि । पु । ऋतुद्वयसन्धिकाले । ऋ त्वोरन्त्यादिसप्ताहयोः ॥ आहचा ग्वाग्भट. । ऋत्वोरन्त्यादिसप्ताहा वृतुसन्धिरितिस्मृतः । तत्रपूर्वो- विधिस्त्याज्य सेवनीय.परोविधिरि- ति ॥

ऋतुस्नानम् । न । रजस्वलायाश्चतुर्था हकर्त्तव्येस्नाने॥ ततस्नानामन्तरं भर्त्तु र्मुखंद्रष्टव्यम् । नान्यस्य । भ ्सन्नि धाने भर्त्तारं मनसि ध्यात्वा सूर्यंवि लोकयेदितिकाशीखण्डम् ॥

ऋते । अ वर्जने । विना ॥ ऋतीयते । ऋतिःसौत्रोधातुः । ततःक्तेप्रत्य यः ॥

ऋत्विक् । पुं । पुरोहिते । याजके ॥ ऋतैयजति ऋतुंयजति ऋतुप्रयुक्तो वायजति । रूढिरेषा यथाकथञ्चिद्व्यु त्पाद्या । यजदेवपूजादौ । ऋत्विगा दिनाक्विन्नन्तो निपातितः ॥ अग्न्या धेयंपाकयज्ञानग्निष्टोमादिकान्म- खान् । यःकरोतिवृतोयस्य सतस्य र्त्विगिहोच्यते इतिमनु ॥ तेचयज्ञे षोडश भवन्ति । तेषांनामानि य- था । अध्वर्युः १ । प्रस्थाता २ । नेष्टा ३ । उन्नेता ४ । ब्रह्मा ५ । ब्राह्मणा च्छंसी ६ । अग्नीध्रः ७ । पोता ८ । उद्गाता ९ । प्रस्तोता १० । प्रतिह र्त्ता ११ । अस्तुब्राह्मणः १२ । होता १३ । मैत्रावरुणः १४ । अच्छा वाकः १५ । ग्रावस्तुत् १६ । इति ॥

ऋद्धम् । न । आवसिते धान्ये । सम्पन्न धान्ये ॥ परिपक्कमर्द्दितधान्ये ॥ सिद्धा न्ते ॥ त्रि । सुसमृद्धे ॥ ऋध्यतिस्म । ऋधुवृद्धौ । क्तः ॥

ऋद्धिः । स्त्री । समृद्धौ ॥ देवताविशेषे । पार्वत्याम् ॥ अष्टवर्गान्तर्गतौषधिवि शेषे । लक्ष्म्याम् । सिद्धौ ॥ अस्याःस्व रूपम् । यथा । ऋद्धिर्वृद्धिश्चकन्दौद्वौ भवतः कोषयामले । श्वेतलोमा न्वितःकन्दोलताजाल सरन्ध्रक. ॥ सएवऋद्धिर्वृद्धिश्चभेदमप्येतयोर्ब्रुवे । तूलग्रन्थिसमा ऋद्धि र्वामावर्त्तफला चसा ॥ वृद्धिस्तुदक्षिणावर्त्तफलाप्रो क्तामहर्षिभि. ॥ ऋद्धिर्बल्यात्रिदोष घ्नीशुक्रलामधुरागुरुः । प्राणैश्वर्यक रीमूर्च्छारक्तपित्तविनाशिनी ॥ औ षधकरणे ऋद्धिरुद्धा स्थाने वारा- हीकन्दो वला वा देया ॥ ऋध्नोति । ऋधुवृद्धौ । क्तिच् । यद्वा करणे क्ति- न् ॥

ऋधक् । अ । सत्ये ॥ वियोगे ॥ शीघ्रे ॥ सामीप्ये ॥ लाघवे ॥

ऋनामा । स्त्री । अदितौ । देवमात- रि ॥ ऋनाम अस्याः । डाबुभाभ्याम

न्यतरस्यामितिडाप् ॥

ऋभु. । पु । देवे । सुरे ॥ ऋशब्दवाच्यः स्वर्ग. अदितिर्वा । स्वरादित्वादव्ययम्+भूञ् ततो वा भवति इति ऋपूर्वाद्भवतेर्मितद्रवादिभ्य उपसंख्यानमितिडु' । उपपदसमासः । क्विपि ऋभूरपि ॥ ब्रह्मणि पुंसे परमहंसपरिव्राजके ॥

ऋभुक्षः । पु । वज्रे ॥ स्वर्गे ॥ ऋभवो-देवाःक्षियन्त्यस्मिन । क्षिनिवासगत्योः । अन्येभ्योपीतिडः ॥ इन्द्रे ॥

ऋभुक्षाः । पु । इन्द्रे । पाकशासने ॥ ऋभवोदेवा क्षियन्तिनिवसन्त्यत्र । क्षोर्ड । ऋभुक्ष. स्वर्गः । सोऽस्यास्तीति इनि. । ऋभुक्षाः पथिवत् ॥ यद्वा । ऋच्छति इयर्त्तीति वा । अर्त्तेर्भुक्षिनक् प्रत्ययः ॥

ऋषः । पुं । मृगविशेषे ॥ ऋच्छति इयर्त्तिवा । ऋगतौ । बाहुलकात्षः ॥

ऋषभः । पुं । वृषे ॥ कर्णरन्ध्रे ॥ कुम्भीरपुच्छे ॥ उत्तरस्थ. श्रेष्ठे ॥ औषधिविशेषे ॥ भगवदवतारविशेषे । आदिजिने ॥ अयञ्चसत्ययुगे अग्नीध्रसुतस्यनाभेः पुत्र' । अस्य पुत्रोजडभरतः ॥ भागवतः । इदंशरीरं मम दुर्विभाव्यं सत्त्वंहिमे हृदयं यत्रधर्मः । पृष्ठे कृतो मे यदधर्म आराद्‌तोहि मामृषभं प्राहुरार्य्याइति ॥ तन्त्री समुत्थितेकण्ठोत्थितेच सप्तस्वरान्तर्गते द्वितीयस्वरे ॥ अस्योत्पत्तिः । नाभिमूलाद्यदावायु उत्थित. कुरुते ध्वनिम् । वृषभस्येव निर्यातिहेलया ऋषभः स्मृतइतिसङ्गीतदामोदरः ॥ ऋषति वलीवर्द्दकृतस्वरसादृश्यं गच्छति । ऋषी गतौ । ऋषिवृषिभ्यांकिदित्यभच् । गावोनर्दन्तिचर्षभम् ॥ अष्टवर्गान्तर्गतौषधिविशेषे । शृङ्ग्याम् । विषाण्याम् । ककुद्मत्याम् ॥ पथ्य गुणान् जीवकैं ॥ कोलपुच्छे ॥

ऋषभगजविलसितम् । न । अष्टिसंख्यकषोडशाक्षरवृत्तिप्रभेदे ॥ यथा । भ्रजिनगैः ऽ॥ऽ।ऽ॥॥॥॥ऽ स्वराङ्कमृषभगजविलसितम् । यथा । योहरिदृढनखान खरतरनखशिखरै दुर्जयदैत्यसिंहसुविकटहृदयतटम । किन्विहचित्रमेत दखिलमपहृतवतः कंसनिदेशदृप्य मृषभगजविलसितमिति ॥

ऋषभतर' । त्रि । मन्दशक्तौ भारस्यवोढरि ॥ तनुर्ऋषभः । वत्सोक्षाश्वर्षभेभ्यश्चतनुत्वइतिष्टरच् । ङीषि । ऋषभतरी ॥

ऋषभध्वजः। पुं। चन्द्रमौलौ। सदाशिवे॥ ऋषभोऽस्य ध्वजश्चिह्नं मत्स्यध्वजे अस्यवा॥ प्रथमजिनेन्द्रे॥

ऋषभी। स्त्री। नराकारयोषिति॥ शूकशिंब्याम्॥ शिरालायाम्॥ विधवायाम्॥

ऋषिः। पु। वेदे॥ दीधितौ। किरणे॥ मन्त्रद्रष्टरि। शास्त्रकृदाचार्ये। सत्यवाचि। भृगुवशिष्ठादिमुनौ। गोत्रप्रवर्तके काश्यपभरद्वाजशाण्डिल्यादौ। सप्त ब्रह्मर्षिदेवर्षिमहर्षिपरमर्षयः। काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः इति रत्नकोषः॥ तत्र ब्रह्मर्षयो वशिष्ठाद्याः१। देवर्षयः कणादयः२। व्यासाद्या महर्षयः३। भेलाद्याः परमर्षयः४। जैमिन्याद्याः काण्डर्षय ५। सुश्रुताद्याः श्रुतर्षयः ६। ऋतपर्णादयो राजर्षयः ७। एते पुराणप्रसिद्धाः। इति त्रिकाण्डशेषः॥ सूक्ष्मवस्तुविवेचनसमर्थे। सत्यासिनि॥ मन्त्रे॥ ज्ञानिनि। तत्त्वज्ञाननिष्ठे॥ ब्रह्मपुत्रे। अवगतपरमार्थे॥ ऋषति जानाति पश्यति सर्वान् मन्त्रान्। ऋषी गतौ। इगुपधात् कित् इति इन्॥

ऋषिकः। पुं। ऋषौके॥

ऋषिकुल्या। स्त्री। नदीमात्रे॥ शुक्तिमत्पादोद्भवायां नद्याम्॥ ऋषिकुलहितायाम्॥ ऋषीणां कुल्या॥

ऋषिजाङ्गलम्। न। ऋषिजाङ्गलिकायाम्॥

ऋषिजाङ्गलिकी। स्त्री। ऋचगन्धायाम्। ऋषिजाङ्गलवृक्षे॥

ऋषिपुत्रः। पु। आचार्यविशेषे॥

ऋषिप्रोक्ता। स्त्री। माषपर्ण्याम्॥

ऋषियज्ञः। पुं। ब्रह्मयज्ञे। स्वाध्याये॥

ऋषिसर्गः। पु। सर्गविशेषे॥

ऋषीकः। पुं। काव्याद्यृषिपुत्रे॥

ऋष्टिः। पुं। असौ। खड्गे॥ उभयतो धारे खड्गे॥ ऋषति। ऋषी गतौ। क्तिच्॥

ऋष्यः। पुं। मृगविशेषे॥ ऋष्यो नीलाण्डको लोके सरोझ इति कीर्त्तितः॥ ऋषति। ऋषी॰। अघन्यादित्वात् साधुः॥

ऋष्यकेतनः। पुं। अनिरुद्धे॥

ऋष्यकेतुः। पुं। अनिरुद्धे। कामदेवपुत्रे॥ कामदेवे॥ ऋष्योऽस्य केतुरस्य॥

ऋष्यगता। स्त्री। ऋष्यप्रोक्तायाम्। शतमूल्याम्॥

ऋष्यगन्धा। स्त्री। ऋषिजाङ्गलिकायाम्॥ वृद्धदारके॥

ऋ

ऋष्यप्रोक्ता । स्त्री । शतावर्य्याम् ॥ अति बलायाम् ॥ शूकशिंब्याम् ॥ ऋष्यै र्मुनैः प्रोक्ता । ऋषिभिरप्रोक्तावा ॥

ऋष्यमूकः । पुं । अद्रिविशेषे ॥ ऋष्यमूकस्तुपम्पायाः पुरस्तात पुष्पितद्रुमः । सुदुःखारोहणो नाम शिशुनागाभिरक्षित ॥ अथवालिभयात् सुग्रीवादय. पञ्च वानराः स्थिता आसन्निति रामायणम् ॥

ऋष्यशृङ्गः । पुं । विभाण्डकसुते मुनिविशेषे ॥ अस्य भार्या लोमपादराजकन्या शान्ता । इतिरामायणम् ॥

ॠ.

ॠ । अ । वाक्यारम्भे ॥ रक्षायाम् ॥

ॠ । न । वचसि ॥ पु । भैरवे ॥ दनुजे ॥ ॠकारे ॥ स्त्री । देवमातायाम् ॥ दन्तौ ॥ स्मृतौ ॥ गतौ ॥

लृः

लृ । अ । देवतात्मायाम् ॥ देवमातरि ॥ भुवि ॥ कुम्भे । पर्वते ॥ मन्त्रक्षोभ वचने ॥ लृकारे ॥

लॄः

लॄ । अ । देवनार्याम् ॥ नार्यात्मनि ॥ मातरि ॥ पुं । महादेवे ॥ लॄकारे ॥ स्त्री । दैत्यभार्य्यायाम् ॥ दनुजमातरि ॥ कामधेनुमातरि ॥ इत्येकाक्षरकोषः ॥

ए

ए । अ । स्मृतौ ॥ असूयायाम् ॥ अनुकम्पायाम् ॥ आमन्त्रणे ॥ हूतौ । आह्वाने ॥

एः । पुं । विष्णौ ॥ एकारे ॥

एकः । त्रि । प्रथमसङ्ख्यायाम् ॥ सङ्ख्येये । यथैकोविप्रः । नतुविप्रस्यैका ॥ एकाकिनि । केवले ॥ एकादाकिनिच् चासहाये । चात्पक्षेलुक् ॥ श्रेष्ठे ॥ इतरस्मिन् ॥ सत्ये । अद्वितीये । सजातीयविजातीयादिभेदशून्ये । गुणगुणिभावशून्ये । अनु

पमे ॥ एकोन्यार्थे प्रधानेच द्विती-
येकेवले तथा। साधारणे समानेऽ-
ल्पेसङ्ख्यायाञ्च प्रयुज्यते ॥ एति।
इणगतौ। इणभीकापाशल्यतिम-
र्चिभ्यःकन्निति कन्॥

एकक:। त्रि। असहाये। एकाकिनि।
एकला इतिभाषा॥ एकादाकिनि-
श्चासहाय इत्यच चकारात्पचेकन्॥

एककार्य्य:। पुं। परस्परस्मारके अन्ते
वासिप्रभृतिगणे॥ एकंकार्य्यमस्य॥

एककार्य्यत्वम्। न। सङ्गतिविशेषे। ए
ककार्यकारित्वे॥

एककाल:। त्रि। अभिन्नसमये॥ एकः
कालोयस्य॥

एककालिक:। त्रि। समानकालभवे॥
एककालेभवः। क ठाञ्॥

एककालीन:। त्रि। एककालिके॥

एककुण्डल:। पुं। बलरामे॥ कुबेरे॥
एकंकुण्डलमस्य॥

एकगम्य:। त्रि। निर्विकल्पकज्ञानप्राप्ये॥

एकगुरु:। पु। सतीर्थ्ये॥ सतीर्थ्यास्त्वेक
गुरवः॥ एकोगुरुर्येषांते परस्परमे
कगुरवोभवन्ति॥

एकचक्रम्। न। गुह्यपुर्य्याम्। हरिगृ
हे॥ पुं। असुरविशेषे॥

एकचक्रा। स्त्री। पुरीविशेषे॥

एकचर:। पुं। हिंस्रपशुविशेषे। गण्ड-
के॥ त्रि। एकाकिचारिणि। सर्पा-
दौ॥ व्याघ्रादौ॥ एकस्मासौ चर-
श्च। एक एवचरतिवा। चर०।पचा
द्यच्॥ एकचर्य्या। स्त्री। असहायग
मने॥

एकचारी। पुं। बहुसहचारिणि॥
एकके॥

एकचित्त:। त्रि। अनन्यमनसि॥ एक
म् अनन्यविषयं चित्तं यस्यसः॥

एकजटा। स्त्री। उग्रतारायाम्॥

एकजन्मा। पुं। भण्डलेशे। भयापन्ने॥
शूद्रे॥ एकं जन्मास्य॥

एकजाति.। पुं। शूद्रे॥ यथा। ब्राह्म
णः क्षत्रियो वैश्यस्त्रयोवर्णाद्विजात
य'। चतुर्थ एकजातिस्तु शूद्रो ना
स्तितुपञ्चमइतिस्मृतिः॥ एका जाति
र्जन्म अस्य॥

एकजातीय:। त्रि। तुल्यजातीये॥ ए
कः प्रकारः। प्रकारवचनेजातीयर्॥

एकजीववादी। त्रि। एकश्चैतन्यमेक
येवाविद्ययावद्धं संसरति तदेव कदा
चिन्मुच्यते नास्मदादीनां बन्धमो-
क्षौक्तः इत्येवंवदनशीले। अयञ्च
वादः श्रुतिवहिष्कृतत्वान्मुमुक्षुभिर
नुपादेयः॥

एकतम:। त्रि। बहूनांमध्ये एकस्मिन्
॥ एकाच्चप्राचामिति डतमच्। क

तमो भवतां साधुः ॥

एकतरः । त्रि । द्वयोर्मध्ये एकस्मिन् ॥ एकाच्च प्राचामिति डतरच् । कतरो भवतोर्देवदत्तः ॥

एकतः । अ । एकस्मात् ॥ तसिल् ॥

एकता । स्त्री । एकत्वे ॥ एकस्य भावः । तल् ।

एकतानः । त्रि । अनन्यवृत्तौ । एकविषयासक्तचित्ते । तद्गते ॥ एकं तानयति । तनु श्रद्धोपकरणयोः । कर्मण्यण् । एकस्तानो विस्तारो स्येति वा ॥

एकतानकः । पुं । एकाग्रे । अनन्यहृदये ॥ स्वार्थे कन् ॥

एकतालः । पुं । समन्वितलये । नृत्यगीतवाद्यानां यत्साम्यं तचेति यावत् । विच्छेदरहिते ॥ एकः समस्तालोमानमस्येति ॥

एकत्र । अ । एकस्मिन् ॥ त्रल् ॥

एकत्वम् । न । एकतायाम् । अभेदे । भेदव्यावर्त्तके ॥ सायुज्यमुक्तौ ॥ एकस्य भावः । तस्य भावस्त्वतलौ इति त्वः ॥ एकवचने ॥ यथा । एकत्वं न प्रयुञ्जीत गुरावात्मनि चेश्वरे इति ॥

एकदंष्ट्रः । पुं । गणेशे । विघ्नराजे ॥ एका दंष्ट्रा अस्य ॥

एकदण्डी । पुं । विदिततत्त्वे सन्न्यासिनि ॥ यथा । यदा तु विदितं तत्त्वं परम्ब्रह्म सनातनम् । तदैकदण्डं सङ्गृह्य सोपवीतां शिखां त्यजेत् ॥ मौनं योगासनं योगस्तितिक्षैकान्तशीलता । निस्पृहत्वं समत्वञ्च सप्तैतान्येकदण्डिन इति ॥ एकं दण्डमस्यास्ति । इनिः ॥

एकदन्तः । पु । विनायके । गणेशे ॥ एको दन्तोऽस्य स्कन्देनोत्पाटितदन्तत्वात् ॥

एकदा । अ । युगपत् ॥ एकस्मिन् काले । सर्वैकान्यकिंयत्तदः काले दा ॥

एकदृक् । पुं । काके ॥ शम्भौ । महादेवे ॥ त्रि । काणे ॥ एका दृक् यस्य ॥

एकदेशः । पुं । अवयवे । प्रतीके ॥ एकश्चासौ देशश्च ॥

एकदेशी । पुं । अवयविनि ॥ एकदेशशब्दोऽवयवे रूढः । सोऽस्यास्ति । अत इनिः । यद्यपीह एकगोपूर्वादिति ठञ् प्राप्तस्तथापि पूर्वापराधरोत्तरमेकदेशिनेति निर्देशादिनिः ॥

एकदेहः । पुं । चन्द्रजे । बुधग्रहे ॥

एकधा । अ । एकप्रकारे ॥ प्रकारे धा ॥

एकधुर. । त्रि । एकधुरीणे । एकभारवाहके गवादौ ॥ एका चासौ धूश्च । ऋक्पूरित्यः समासान्तः । परवल्लिङ्गात् स्त्रीत्वम् । टाप् । एकधुरां वह

ति। एकधुराल्लुक्चेतिखस्यलुक् ॥

एकधुरावहः। त्रि। एकधुरे। एकभारिके॥ वहति इतिवहः। अच्। एकधुरायावहः॥

एकधुरीणः। त्रि। एकधुरे॥ एकाधूः। पूर्वकालैकेतिसमासः। ऋक्पूरित्यः। एकधुरां वहति। एकधुराल्लुक्चेति चकारेण खस्यानुकर्षणसामर्थ्यात् पक्षे अखणम्॥

एकनटः। पु। कथके। मुख्यनटे। नाटकवर्णनकर्त्तरि॥

एकपक्षः। त्रि। अनन्यगे॥ सहाये॥ एकःपक्षोयस्य॥

एकपत्नी। स्त्री। सपत्न्याम्॥ साध्व्याम्॥ एकः पतिर्यस्या इतिविग्रहे नित्यंसपत्न्यादिष्विति एकपतिशब्दस्य नकारान्तादेशे ऋन्नेभ्य इतिङीप्॥

एकपत्रिका। स्त्री। गन्धपत्रायाम्॥

एकपदम्। न। तत्काले॥ पुं। शृङ्गारबन्धविशेषे। तल्लक्षणम्। पादमेकं हृदिन्यस्याप्यद्वितीयं स्कन्धसंस्थितम्। स्त्रैणोधृत्वारमेत् कामीबन्धस्त्वेकपदःस्मृतइति॥

एकपदी। स्त्री। पथि॥ एकःपादोऽस्याम्। कुम्भपदीषुचेतिनिपातः॥ यद्वा। सङ्ख्यासुपूर्वस्येति पादस्यान्तलोपः। पादोन्यतरस्यामितिङीप्। स्वाङ्गाच्चेतिङीष्वा। पाद.पत्॥

एकपदे। अ। अकस्मादित्यर्थे॥

एकपात्। पुं। शिवे॥ विष्णौ॥ एकः पादोऽस्य। सङ्ख्यासुपूर्वस्येति अन्तलोपः। पादोस्येतिश्रुतिः॥

एकपिङ्गः। पुं। कुवेरे। धनाधिपे॥ साक्ष्यं गौरीनिरीक्षणे तत्प्रभावात् वामेचक्षुषिनष्टे रुद्रानुनयात् तत् पिङ्गिमचिह्नं देव्या दत्तम्। अतएकं पिङ्गमस्य॥

एकपिङ्गलः। पुं। गुह्यकेश्वरे। कुवेरे॥ एकंपिङ्गंलाति। ला०। आतोनुपेतिकः॥

एकभक्तव्रतम्। न। रात्रिभोजनाभावविशिष्टे दिवाभोजने॥ तदुक्तंस्कन्दपुराणे॥ दिनार्द्धसमयेऽतीतेभुज्यते नियमेनयत्। एकभक्तमितिप्रोक्तं रात्रौतन्नकदाचनेति॥

एकमूला। स्त्री। शालपर्ण्याम्॥ अतस्याम्॥

एकयष्टिका। स्त्री। हारविशेषे। एकावल्याम्। एकलडीकाहारइतिभाषा॥

एकरजः। पुं। भृङ्गराजे। भंगरा। इतिभाषा॥

एकराड्। पुं। चक्रवर्त्तिनि॥

एकरूपः। त्रि। समानाकारे॥ एकंरूपं यस्य सः॥

एकर्षिः। पुं। सूर्ये ॥ एक एव ऋषति गच्छति। इन् ॥

एकलः। त्रि। एकाकिनि। अद्वितीये ॥ इतिपद्यावली ॥ अनवयवे ॥

एकलिङ्ग। पुं। कुवेरे। त्र्यम्बकसखे॥ न। साधनस्थलविशेषे ॥ तथाचागमः। पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते। तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमेति ॥

एकवचनम्। न। येन पदेनैकोऽर्थ उच्यते तस्मिन्। एकस्यार्थस्य वचनम्। वचेः करणेल्युट् ॥ कर्मेणिषष्ठीसमासः ॥

एकवर्णी। स्त्री। वाद्यप्रभेदे। करतालाम्। कङ्कमालायाम् ॥

एकवर्षिका। स्त्री। एकहायन्याङ्गवि ॥ एकं वर्षं यस्याः। एकवर्षैव। कः। ह्रस्वम् ॥

एकवाद्यः। पुं। डिण्डिमवाद्ये ॥

एकविंशतिः। स्त्री। एकाधिकविंशतौ ॥ यथा। नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः। सप्रेत्य पशुतां याति सम्भवानेकविंशतिमितिमनुः ॥ नैयायिकमते एकविंशतिदुःखानि यथा। षडिन्द्रियाणि षड्रूपादयोविषयाः षड्रूपादिज्ञानानि सुखम् दुःखम् शरीरञ्चेति। एकविंशतिदुःखनिवृत्तिर्मुक्तिरिति ॥

एकवीरः। पुं। वृक्षविशेषे। महावीरे। सद्वीरे ॥ हैहये। कृतवीर्यपितरि ॥

एकवृक्षः। पुं। स्थानविशेषे ॥ यथा। चतुष्क्रोशान्तरे यत्र न वृक्षान्तरमीक्ष्यते। एकवृक्षःसविज्ञेयः इत्यागमः॥

एकशफः। पुं। अश्वे ॥ एकखुरेजन्तुमात्रे ॥ यथा। खरोऽश्वोऽश्वतरोगौरः शरभश्चमरीतथा। एतेचैकशफाः क्षत्तः शृणु पञ्चनखान्पशूनि ति श्रीभागवतम् ॥

एकशृङ्गः। पुं। हरौ ॥ एकशृङ्गे पशौ ॥

एकशेष। पुं। समासप्रभेदे ॥

एकश्रुतिः। स्त्री। उदात्तानुदात्तस्वरितानामविभागेनोच्चारणे ॥ एका चासौश्रुतिश्च ॥

एकषष्टिः। स्त्री। सङ्ख्यासङ्ख्येयविशेषे ॥ एकाधिकाषष्टिः ॥

एकसर्गः। त्रि। अनन्यमनसि। एकताने। एकाग्रे ॥ एक एकस्मिन्वा सर्गो निश्चयोऽस्य ॥

एकहूनः। पुं। डमरुवाद्ये ॥

एकस्थः। त्रि। एकत्रस्थिते ॥ एकस्मिन् तिष्ठति। छा०। कः ॥

एकहायनी। स्त्री। एकाब्दायांगवि ॥ एकःहायनोयस्याः। दामहायनान्ता

ङ्गेति ङीप् ॥

एका । स्त्री । आर्यायाम । कोट्टव्याम् । पार्वत्याम ॥ इतित्रिकाण्डशेष. । यथा । एकैवाहंजगत्यत्रेति । एकैवशक्तिः परमेश्वरस्य भिन्ना चतुर्द्धा व्यवहारकाले । भोगे भवानी पुरुषेषु विष्णुःकोपेषु कालीसमरेषुदुर्गेतिच ॥

एकाकी । त्रि । एकके । एकले ॥ एकाद्दाकिनिश्चासहाये ॥

एकाक्षः । पु । काके ॥ त्रि । काणे ॥ एकमक्षि यस्य । षच् ॥

एकाक्षरम् । न । प्रणवे ॥ एकञ्चतदक्षरञ्च ॥

एकाग्रः । त्रि । अनाकुले ॥ विषयान्तरव्यावृत्तचित्ते । एकताने । विक्षेपरहिते ॥ एकम् एकस्मिन्वा अग्रम स्य । अग्रंपुरोगतंज्ञेयमितिस्वामी ॥ चित्तस्य चतुर्थ्यांभूमौ । एकाग्रचित्ते ॥ एकविषयकधारावाहिकवृत्ति समर्थातत्त्वोद्रेकेण तमोगुणकृतत न्द्रादिरूपलयाभावाद्दार्ढ्याकारावृत्ति साच रजोगुणकृतचाञ्चल्यरूप विक्षेपाभावादेकविषयैवेति शुद्धे सत्त्वे भवति चित्तमेकाग्रम् । अस्यां भूमौ संप्रज्ञात.समाधिः तत्रध्येयाकारावृत्तिरपि भासते ॥

एकाग्र्यम् । त्रि । एकाग्रे ॥ एकमग्र्यमस्य ॥

एकाङ्ग. । पुं । बुधग्रहे ॥ न । चन्दने ॥

एकाङ्गीसुगन्ध । पुं । कर्पूरादीनाङ्गणे । सुगन्धगणे ॥

एकात्मा । पुं । परमात्मनि विष्णौ ॥ एक. केवलोऽद्वितीयश्चासावात्माचेत्येकात्मा । जीवेश्वरभेदस्य जीवानांपरस्परभेदस्य जडतद्भेदस्यच मिथ्यात्वात् ॥ ज्ञानंज्ञेयं तथाज्ञाता त्रितयं भाति मायया । विचार्यमाणे त्रितये आत्मैवैकोऽवशिष्यत इतिश्रीमहानिर्वाणतन्त्रोक्तेश्च ॥ आत्मनोऽन्यद्विजानीहिसर्वं ध्येवचागमादित्युक्तेश्च ॥

एकादश । त्रि । एकादशानाम्पूरणे । तस्य पूरणेडट् ॥

एकादशक । पुं । इन्द्रियाख्ययेगणे ॥

एकादश । त्रि । एकाधिकदशसङ्ख्यायाम् । ११ ॥ सङ्ख्येये ॥ यथा । एकादशेन्द्रियाणीति । तत्र । बुद्धीन्द्रियाणि चक्षु.श्रोत्रघ्राणरसनत्वगाख्यानि । वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहु. ॥ उभयात्मकमत्र मनः ॥ मनोधिष्ठितानामेवहि चक्षुरादीनां वागादीनाञ्च स्वस्वविषये षुप्रवृत्तेः । एकादशस्विन्द्रियेषु मध्ये मन उभयात्मकम् ॥

एकादशद्वारम् । न । शरीराख्येपुरे ॥ एकादशद्वाराणि अस्य । सप्तशीर्षण्यानि नाभ्यासह्वावाच्चि चीणि शिरस्येकम् । तैरेकादशद्वारम्भवति शरीराख्यम्पुरम् ॥

एकादशी । स्त्री । हरिदिने । हरिवासरे ॥ सातु शुक्लपचे सूर्य्यमण्डलात् चन्द्रमण्डलस्य निर्गमरूपैकादश कलाक्रियारूपा । कृष्णपचे सूर्यमण्डले चन्द्रमण्डलस्यप्रवेशरूपैकादशकलाक्रियारूपा ॥ तचजातस्यफलम्॥ क्रोधोत्कटः क्लेशसहः सुभाषी यागादिकर्त्तास्वजनैकभर्त्ता । महामतिर्देवगुरुप्रियः स्यादेकादशी जो मनुजोतिहृष्टः ॥ एकादशानां पूरणी । डडन्तान्ङीप् ॥

एकान्नविंशति. । त्रि । एकोनविंशत्याम् ॥ एकेन न विंशतिः । एकादिश्चैकस्य चादुक् ॥

एकानंशा । स्त्री । पार्वत्याम् ॥

एकान्तम् । न । अत्यन्ते । अतिमाचे । निर्भरे ॥ नियते ॥ क्रियाविशेषणत्वेऽस्यक्लीवत्वम् । द्रव्यविशेषणेतुवाच्यलिङ्गत्वम् ॥ त्रि । निर्जने । अनैकान्तीर्णो ॥ एकःअन्तःनिश्चयोऽत्र । एकस्मिन्नेव अन्त.समाप्तिर्यस्यवा ॥

एकान्ततः । अ । अर्थात् । वारिणि ॥

एकान्तवादी । पुं । सप्तपदार्थवादिनि नास्तिकविशेषे ॥

एकान्ती । त्रि । विष्णुभक्तविशेषे ॥ यथा । एकान्तेनासमो विष्णुर्यस्मादेषां परायणः । तस्मादेकान्तिनः प्रोक्तास्तद्भागवत चेतसइत्यादिगारुडे १३१ अध्यायः ॥

एकान्नः । त्रि । एकभक्ते ॥

एकान्नविंशतिः । त्रि । एकोनविंशतौ ॥ एकेन नविंशतिः । नञोविंशत्या समासेकृते एकशब्देनसह तृतीयेति योगविभागात् समासः । अनुनासिकविकल्पः ॥

एकापारम् । न । तुष्टे प्रभेदे ॥ सेवादयोऽर्जनोपायाः तेचसेवकादीन् दु खाकुर्वन्ति । दृष्यदुरीश्वरद्वारस्थदण्डिदण्डार्द्धचन्द्रजाम् । वेदनांभावयन् प्राप्त क. सेवासु प्रसज्यते ॥ एवमन्ये प्यर्जनोपायाः दुःखा इति विषयोपरमे या बाह्यातुष्टि सा एकापारमुच्यते ॥

एकाब्दा । स्त्री । एकहायन्याङ्गवि ॥ एक. अब्दोयस्याःसा ॥

एकाम्बरम् । न । पुरुषोत्तमक्षेत्रसन्निधौ वर्त्तमाने भुवनेश्वरनाम्ना विश्रुते परमशत्याप्रतिष्ठिते पवित्रस्थाने ॥

एकायन. । त्रि । एकाश्रये ॥ एकताने

॥ एकमयनमस्य ॥ न । नीतिशास्त्रे ॥
एकायनगतः । त्रि । एकाग्रे । एकताने ॥
एकञ्च तदयनञ्च । एकायनंगत' ।
एकस्मिन्नयने गतं ज्ञानमस्येति वा ॥
एकावली । स्त्री । एकयष्टिकाख्ये हारे ॥
एकपङ्क्त्याम् ॥ अर्थालङ्कारप्रभेदे
॥ यथा । गृहीतमुक्तरीत्यार्थश्रेणिरे
कावली मता । नेत्रे कर्णान्तविश्रा
न्ते कर्णौ दोस्तम्भदोलिनौ ॥ दोस्त
म्भौ जानुपर्यन्तप्रलम्बनमनोहरौ ।
जानुनी रत्नमुकुराकारे तस्य हि भू
भुजः ॥ उत्तरोत्तरस्य पूर्वपूर्वविशे
षणभावः पूर्वपूर्वस्योत्तरोत्तरविशे
षणभावो वा गृहीतमुक्तरीतिः । तत्राद्यः प्रकार उदाहृत' । द्वितीयो
यथा । हिक्काबालसमैव यस्य विभु
ता यस्तन्नविद्योतते यस्मामुष्य सुधी
भवन्ति किरणा राशेः स यासामभूत्
। यस्तत पित्तमुष' सुधोस्य हविर्यं य
त्तस्य जीवातवे वोढा यद्गुणमेषम
न्मथरिपोस्ता' पान्तु वोमूर्त्तयः ॥ अ
पिच । स्थाप्यतेऽपोह्यतेवापि यथा
पूर्वंपरम्परम् । विशेषणतया यत्रवस्तु
सैकावली द्विधा ॥ पूर्वंपूर्वं प्रतियत्रो
त्तरोत्तरस्य वस्तुनोवीप्सयाविशेषण
भावेन यत् स्थापनं निषेधोवासम्भव
ति सा द्विधावत्रैकावली भण्यते ।

क्रमेणोदाहरणम् । पुराणियस्यां स
वराङ्गनानि वराङ्गनारूपपुरस्कृता
ङ्ग्यः । रूपं समुन्मीलितसद्विलास
मस्त्रं विलासाः कुसुमायुधस्य ॥ नत
ज्जलं यन्न सुचारुपङ्कजं न पङ्कजं त
द्यदलीनषट्पदम् । नषट्पदे सौ
कलगुञ्जितो न यो न गुञ्जितं तन्न ज
हारयन्मनः ॥ पूर्वत्र पुराणां वराङ्ग-
नास्तासामङ्गविशेषणमुखेन रूपं त
स्य विलासास्तेषामप्यस्त्रमित्यमुना
क्रमेण विशेषणं विधीयते । उत्तरत्र
प्रतिषेधेप्येवंयोज्यम् ॥ एकाचासौ
आवलीच ॥
एकाश्रय' । त्रि । अनन्यगतौ । अनन्य
गतिके ॥
एकाश्रितगुणः । पुं । एकद्रव्यधर्म्मे ॥
यथा । रूपम् १ रसः २ गन्धः ३ स्प
र्शः ४ एकत्वम् ५ एकपृथक्त्वम ६
परिमाणम् ७ परत्वम् ८ अपरत्व
म् ९ बुद्धिः १० सुखम् ११ दुःखम्
१२ इच्छा १३ द्वेषः १४ यत्नः १५
गुरुत्वम् १६ द्रवत्वम् १७ स्नेहः
१८ संस्कारः १९ अदृष्टम् २० शब्दः
२१ ॥ इतिसिद्धान्तमुक्तावली ॥
एकाष्ठीलः । पुं । वकपुष्पे । शिवमल्ल्या
म् ॥ एकमस्थि लाति । ला० । कः ।
सुषामादित्वात्षत्वम् । दीर्घत्वञ्च ॥

एकाष्ठीला । स्त्री । पाठायाम् । वनतिक्तिकौषधौ ॥ टाप् ॥

एकाहः । पुं । एकदिने ॥

एकाहगमः । त्रि । एकाहगम्यमार्गे ॥ एकाहेन गम्यते । कर्तृकरणे कृतेतिसमासः ॥

एकाहारः । पुं । एकदिनकृत्स्यैकवारभोजने ॥ यथा । एकाहारः सदा कार्यो न द्वितीयः कदाचन । पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिमितिस्मृतिः ॥ त्रि । तद्वति ॥

एकीभावः । त्रि । विवेकानर्हत्वेनाविशेषतां प्राप्ते ॥

एकीयः । त्रि । एकपक्षे । सहाये ॥

एकेन्द्रियसंज्ञा । स्त्री । वैराग्यविशेषे । इन्द्रियहन्त्यसमर्थतया पक्कानां कषायाणामौत्सुक्यमात्रेण मनसि व्यवस्थाने ॥ अथवा दृष्टानुश्रविकविषयप्रवृत्तेर्दुःखात्मकत्वबोधेन वहिरिन्द्रियप्रवृत्तिमजनयन्त्या अपि तृष्णाया औत्सुक्यमात्रेण मनस्यवस्थाने ॥

एकोद्दिष्टम् । न । प्रेतोद्देश्यकश्राद्धे ॥ एकोद्दिष्टविधिकसांवत्सरिके ॥ एक एव उद्दिश्यते यत्र तत् ॥ एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं तदुच्यते ॥

एकोशिका । स्त्री । पाठायामोषधौ ॥

एजनम् । न । कम्पने ॥ पुं । वह्निः स्वासे ॥ ? । कम्पदे ॥

एडः । पुं । मेषे ॥ त्रि । वधिरे ॥ ईडति । ईडस्वप्ने । घञ् । डलयोरैक्यम् ॥ यद्वा । आसवैः ईड्यते । ईड स्तुतौ । घञ् । अज्वा ॥

एडकः । पुं । वनच्छगले ॥ एडकस्य पलं स्नेहं मेषामिषसमं गुणैः ॥ पृथुशृङ्गमेषे । मेढ्रे । उरभ्रे ॥ इलति । एलयति वा । इल स्वप्नक्षेपणयोः । ण्वुल् । डलयोरैकता ॥

एडका । स्त्री । मेष्याम् ॥ अजादित्वात् टाप् । क्षिपकादित्वान्नेत्वम् ॥

एडगजः । पुं । दद्रुघ्ने । चक्रमर्द्दके ॥ एडो मेष एव गजो यस्य भक्षकत्वात् ॥ यद्वा । एलमम् । इल क्षेपे स्वप्ने च । घञ् । डलयोरैकता । एडे स्वप्ने गजति । गज मदे शब्दे च । अच् ॥

एडमूकः । त्रि । वाक्श्रुतिवर्जिते ॥ शठे ॥ एडो वधिरश्चासौ मूकश्च ॥

एडुकम् । न । एडूके ॥

एडूकम् । न । अन्तर्न्यस्तकीकसे कुड्ये ॥ ईड्यते । ईड स्तुतौ । उलूकादयश्चेतिसाधु ॥

एडोकम् । न । एडूके ॥ इतिद्विरूपकोषः ॥

एणः । पुं । कृष्णवर्णे मृगे । हरिणजातिविशेषे ॥ अस्यमांसगुणाः । ए

णः कषायो मधुरः पित्तास्रकफवातहृत् । सङ्ग्राही रोचनो बल्यो ज्वरप्रशमनः स्मृत इति ॥ अपिच । एणो निलकफध्वंसी किञ्चित् पित्तकरो लघुः । उष्णो ग्राही रसेस्वादु र्बल्यो ज्वरहरःस्मृतइति ॥ एति । वाहुलकात्णः ॥

एणकः । पुं । एणे ॥ स्वार्थेकः ॥

एणतिलकः । पु । चन्द्रमसि ॥ एणस्तिलकमिव यस्य ॥

एणभृत् । पुं । चन्द्रे ॥

एणी । स्त्री । मृग्याम् ॥ एणस्य स्त्री । पुंयोगादितिङीष् ॥

एणीनयना । स्त्री । मृगाक्ष्याम् ॥ एण्याः नयने इव नयने यस्याः । एणीनयने केलीकलहे प्रेयान् यदकिं किं नो कुरुते । धन्या रमणी सर्वं सहते दुःखं सुखवत् स्वान्ते मनुते ॥

एतः । पुं । कर्बुरवर्णे ॥ त्रि । आगते ॥ कर्बुरवर्णयुक्ते ॥ एति वर्णान् । इण्० । हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्निति एतेस्तन् ॥

एतद् । त्रि । आसन्नवुद्धिस्थे । पुरोवर्त्तिवाचके सर्वनामनि ॥ एति इण्० । एतेस्तुट्चेत्यदिः ॥ नित्यापरोक्षआत्मनि ॥

एतनः । पुं । निश्वासे ॥

एतर्हि । अ । सम्प्रति । इदानीम् ॥ अस्मिन्काले । इदमोर्हिल । एतेतौ रथोः ॥

एतशः । पु । द्विजोत्तमे । ब्राह्मणे ॥ एति । इण्० । इणस्तशनतशसुनाविति तशन् ॥

एतशाः । पुं । ब्राह्मणे ॥ एति । इण्० । इणस्तशन्तितशसुन् ॥ अत्वसन्तस्येतिदीर्घः । एतशसौ । एतशसः ॥

एता । स्त्री । आगतायाम् ॥ कर्बुरवर्णायाम् ॥ वर्णादनुदात्तात् तोपधात् तोनेति पाक्षिकोङीब् तत्सन्नियोगशिष्टस्तकारस्य नकारादेशश्च न ॥

एतावान् । त्रि । एततपरिमाणविशिष्टे ॥ एतत् परिमाणमस्य । यत्तदेतेभ्यः परिमाणेवतुप् । आसर्वनाम्नः ॥ एतावान् साङ्ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया । जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥

एधः । पुं । इन्धने । ईंधन इति भाषा ॥ इध्यतेऽनेनाग्निः । जिइन्धीदीप्तौ । हलश्चेति करणेघञ् । अवोदैधौद्मप्रश्रथहिमश्रथा इति घञिनलोपोगुणश्चनिपातितः ॥

एधतुः । पुं । पुरुषे ॥ अग्नौ ॥ एधते । एध० । एधिवह्योश्चतु ॥

एध8 । न । वह्निसन्दीपनार्थे काष्ठे ।

एरण्डः

समिधि । इन्धने ॥ एधतेऽनेन । एध० । असुन् ॥

एधा । स्त्री । समृद्धौ ॥ एधनम् । एध० । गुरोश्चेत्य. । टाप् ॥

एधितः । त्रि । प्रवृद्धे । वर्द्धिते ॥ एधते र्गत्यर्थेतिक्तः ॥

एनः । न । पापे ॥ अपराधे ॥ एतिग च्छति प्रायश्चित्तेन । इण आगसी त्यसुन नुडागमस्च ॥

एनी । स्त्री । एतायाम् ॥ अवपाच्चिको ङीप् तकारस्य नकारादेशश्च ॥

एरका । स्त्री । निर्ग्रन्थितृणविशेषे । एरकागुन्द्रमूलाच शिल्वी गुन्द्रा शरी तिचोतिनामान्तराणि । पटेला इति भाषा ॥ एरका शिशिरा वृष्या चक्षु ष्या वातकोपिनी । मूत्रकृच्छ्राश्मरी दाहपित्तशोणितनाशनी ॥

एरङ्ग । पुं । अरङ्गा रङ्गा इतिगौडेषु प्रसिद्धे मत्स्यविशेषे । एरङ्गो मधुरः स्निग्धोविष्टम्भी शीतलो गुरुरिति- चास्यगुणाः ।

एरण्डः । पुं । अरण्ड इतिभाषाप्रसिद्धे वृक्षविशेषे । उरुबूके ॥ अस्यगुणा यथा । एरण्डयुग्मं मधुरं मुष्णं गुरु विनाशयेत् । शूलशोथकटीवस्ति- शिरः पीडोदरज्वरान् ॥ ब्रध्नश्वास कफानाहकासकुष्ठाममारुतानिति ॥

एरण्ड

एरण्डयुग्मम् शुक्लरक्तैरण्डौ ॥ एर ण्डपत्रं वातघ्नं कफकृमिविनाशनम् । मूत्रकृच्छ्रहरञ्चापि पित्तरक्तप्रकोप णम् ॥ वाताग्रदलं गुल्मवस्तिशूल हरम्परम् । कफवातकृमीन् हन्ति वृद्धिंसप्तविधामपि ॥ एरण्डफलम- त्युष्णंगुल्मशूलानिलापहम् । यकृत् प्लीहोदरार्शोघ्नं कटुकं दीपनं परम् ॥ तद्वन्मज्जा च विड्भेदी वातश्लेष्मो दरापहः इति ॥ क्वाचेऽस्यमूलंसंग्रा ह्यमित्याहुरपरेजनाः ॥ आ ईरय ति वायुम् । ईरगतौ कम्पनेच । बा हुलकादण्डच् ॥

एरण्डकः । पुं । एरण्डे ॥ स्वार्थेकः ॥

एरण्डतैलम । न । एरण्डस्यस्नेहे ॥ स्नेहेतैलच् ॥ गुणा यथा । एरण्डतै लंतीक्ष्णोष्णं दीपनं पिच्छिलंगुरु । वृष्यं त्वच्यं वयःस्थापि मेधाकान्ति वलप्रदम् ॥ कषायानुरसं सूक्ष्मंयो निशुक्रविशोधनम् । विस्रंस्वादुरस पाके सतिक्तं कटुकं सरम् ॥ विषमज्व रहृद्रोगपृष्ठगुह्यादिशूलनुत् । हन्ति वातोदरानाहगुल्माष्ठीलाकटिग्रहा न् ॥ वातशोणितविड्वन्धब्रध्नशोथा मविद्रधीन् ॥ आमवातगजेन्द्रस्य श रीरवनचारिणः । एकएवनिहन्ताय मेरण्डस्नेहकेशरीति ॥

एरण्डपत्रिका । स्त्री । दन्तीवृक्षे ॥

एरण्डफलम् । न । रेडीइतिप्रसिद्धे ए रण्डस्य फले । ऐरण्डे ॥ ऐरण्डं कोमलं ग्राह्यं फलं तक्रेण स्वेदितम् । पाचितं कटुतैलेन हिङ्गुनाति सुवासितम् ॥ कफानिलहरं हृद्यं रुच्यमुष्णञ्च पित्तलम् । अग्निसञ्जननं रुच्यं गुरुपाकेति पिच्छिलम् ॥

एरण्डफला । स्त्री । लघुदन्त्याम् ॥

एरण्डा । स्त्री ।
एरण्डी । स्त्री । } पिप्पल्याम् ॥ इति शब्दचन्द्रिका ॥

एर्वारुः । पुं । कर्कटीप्रभेदे । लोमशायाम् । हस्तिदन्तफलायाम् ॥ आई-रम् । ईर० । सम्पदादित्वात् क्विप् । एरं इयोति वारयतिवा । दृञ्० । बाहुलकादुण् ॥

एलकः । पुं । मेषे ॥ इतिराजनिर्घण्टः ॥

एलगः । पुं । मत्स्यविशेषे । गौडभाषायां रायकडा रायखाँडा एलाङ्गा इति च ख्याते ॥ एलङ्गो मधुरो वृष्यः सङ्ग्राही कफवातहा । मेधाग्निपुष्टिकारी च शीतलो गुरुरेव च ॥ श्लेष्मप्रसादनःप्रोक्तो निर्घण्टे राजपूर्वके ॥

एलवालुकम् । न । सुगन्धिद्रव्यविशेषे । वालुके । ऐलेये । लालुका इति गौडभाषा ॥ एलति । इलप्रेरणे । पचाद्यच् । टाप् । एलाइव वलते । वलप्राणने । वाहुलकादुण् । स्वार्थे कन् । ङ्यापोरिति ह्रस्व. ॥

एला । स्त्री । इलायचीति भाषासिद्धायां बहुलगन्धायाम् । ऐन्द्रराम् ॥ सा द्विविधा । सूक्ष्मास्थूलेति भेदात् ॥ सूक्ष्मोपकुञ्चिका तुत्थाकोरङ्गी त्रिपुटा त्रुटि रित्यादिनामभिः प्रसिद्धा ॥ स्थूलातु । पृथ्वीका चन्द्रवालाच निष्कुटिर्बहुला तथेत्यादिभिःख्याता ॥ अस्यागुणास्तु सूक्ष्मैलायां स्थूलैलायाञ्चद्रष्टव्याः ॥ एलयति । इलप्रेरणे । पचाद्यच् । टाप् ॥

एलापत्रः । पु । नागविशेषे ॥

एलापर्णी । स्त्री । सुवहायाम् । रास्नायाम् । युक्तरसायाम् । काँटाभामकली एलानी इति गौडभाषा ॥ एलायाइव पर्णान्यस्याः । पाककर्णेति ङीष् ॥

एलावालुकम् । न । ऐलेये । एलवालुके ॥ ह्रस्वाभावः प्रक्रियापूर्ववत् ॥

एलीका । स्त्री । सूक्ष्मैलायाम् ॥

एल्वालु । न । एलवालुके ॥ एल्वालु कटुकं पाके कषायं शीतलं लघु । हन्ति कण्डूव्रणच्छर्दि तृट्कासारुचिहृद्रुजः ॥ वलासविषपित्तास्रकुष्ठमूत्र-

गद्कृमीन् ॥

एव । अ । औपम्ये ॥ अनवक्लृप्तौ । अनियोगे ॥ वाक्यपूरणे ॥ अवधारणे॥ चारनियोगे ॥ विनिग्रहे ॥ एवकारस्त्रिविधः । विशेष्यसङ्गत. विशेषणसङ्गतः क्रियासङ्गतश्चेति । तत्र विशेष्यसङ्गतस्यैवकारस्य अन्ययोगव्यवच्छेदोऽर्थः । पार्थ एव धनुर्द्धर इत्यादौ विशेषणे धनुर्द्धरे पार्थान्ययोगव्यवच्छेदबोधात् । धनुर्द्धरपदस्योत्कृष्टधनुर्द्धरत्वाचयिकत्वात् तथैवतात्पर्यात् । पार्थान्ययोगस्तादात्म्यम् ॥ विशेषणसङ्गतस्यैवकारस्या योगव्यवच्छेदोर्थः। शङ्खः पाण्डुर एवेत्यादौ विशेष्ये शङ्खे पाण्डुरत्वा योगव्यवच्छेदबोधात् ॥ क्रियासङ्गतस्यैवकारस्य चात्यन्तायोगव्यवच्छेदोर्थः । सम्भवाभिप्रायके नीलंसरोजं भवत्येवेत्यादावन्वयितावच्छेदकसरोजत्वसामानाधिकरण्येन सरोजनीलभवनकर्तृत्वात्यन्ताऽयोगव्यवच्छेदबोधादिति सम्प्रदाय. ॥ परिभवे ॥ ईषदर्थे ॥ अयनम् । इण् शीभ्यां वन॥

एव' । त्रि । गन्तरि । गमनकर्त्तरि॥ एति । इण्० । इण्शीभ्यां वन् ॥

एवम् । अ । उपमायाम् । सादृश्ये । वत् ।वा । यथा । तथा । इवेत्यस्य पर्यायाः ॥ यथा । अग्निरेव विप्र । अग्निरिवेत्यर्थः ॥ इदम्प्रकारे । इत्थम् ॥ यथा । एवं वादिनि विप्रर्षौ । अवधारणे । यथा । एवमेतत ॥ अङ्गीकारे ॥ अर्थप्रश्ने ॥ परकृतौ ॥ पृच्छायाम् ॥

एषण । पु । लौहमयेवाणे ॥

एषणा । स्त्री । इच्छायाम् । पुत्रलोकवित्तकामनासु ॥ न कश्चिदन्यः संसारउत्तादस्येषणात्रयात् ॥ इषेर्ल्युटिटाप् ॥

एषणिका । स्त्री । एषण्याम् । नाराच्याम् । स्वर्णकारादीनांतुलायाम् । निक्ति इतिगौडभाषा । काँटाइति देशभाषा॥ इष्यतेऽनया । इषगतौ । ल्युट् । स्वार्थे कः । टाविच्चे ॥

एषणी । स्त्री । एषणिकायाम् ॥ व्रणमार्गानुसारिण्याम् । व्रणवेधशलाकायाम् । वेलकार इतिगौडभाषाप्रसिद्धायाम् ॥ चेतनाभिदि । इष्यतेनया । इषग० । ल्युट् । गौरादिषु एषणः करणइति ङीष् ॥

एषितव्य. । त्रि । अन्वेष्टव्ये ॥ एषितुं योग्यः । तव्यः ॥

एष्टव्यः । त्रि । एषितव्य ॥ यथा । एष्टव्या बहवः पुत्रा यद्येकोपि गयांव्रजेत् । यजेत वाश्वमेधेन नीलंवाद्यष

मुक्तृ तेदिति ॥

ऐः

ऐ । अ । स्मृतौ । आह्वाने ॥ स्मृतौ ॥ आमन्त्रणे ॥ मोचने ॥ ऐकारे ॥

ऐ । पुं । महेश्वरे ॥

ऐकध्यम् । अ । एकधार्थे ॥ एकाद्धोध्यमुअन्यतरस्यामिति धा प्रत्ययस्य ध्यमुञ् ॥

ऐकभाव्यम् । न । एकभावत्वे ॥ ब्राह्मणादित्वात् ष्यञ् ॥

ऐकरस्यम् । न । सामरस्ये ॥ एकरसस्य भाव. । ष्यञ् ॥

ऐकागारिक. । त्रि । चौरे । तस्करे ॥ एक मसहाय मगारं प्रयोजनमस्य । ऐकागारिकट् चौर इतिइकट् वृद्धिश्च निपातनात् ॥ स्त्रियां टित्त्वान् ङीपि । ऐकागारिकी ॥

ऐकाग्र । त्रि । एकताने ॥ एकाग्रात् स्वार्थेऽण् ॥

ऐकात्म्यम् । न । ऐक्ये ॥ एकात्मनो भाव. । ष्यञ् ॥

ऐकान्तिक. । त्रि । अव्यभिचारिणि । साधनानन्तर मवश्यम्भाविनि ॥

ऐकान्यिक: । पु । एकायपाठेस्खाले ॥ अस्याध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणरूपं स्खलितमेकं जातं सोनेनोच्यते । एकमन्यदृत्तम स्ट । कर्म । ध्ययनेवृत्तमिति ठक् । एकमन्यदिति विग्रह्य तद्धितार्थ इति समास: । ततष्ठक् । एवं द्वैयन्यिक: त्रैयन्यिक ॥

ऐकाह्निक. । त्रि । एकाहनिष्पन्ने ॥ पुं । एकदिनानन्तरभवे ज्वरे ॥ दिनेदिने एककालेसमागतज्वरे ॥ समुद्रस्योत्तरे तीरे द्विविदो नामवानर: । ऐकाह्निकज्वरंहन्तितस्य नामानुकीर्त्तिनात ॥ एकाहेभव: । ठक् ॥

ऐक्यम् । न । अभेदे । एकात्मभावे । एकत्वे । व्यतिरेकाभावे ॥ भावेष्यञ् ।

ऐक्षवम् । न । मोरटे । इक्षोर्मूले ॥ इक्षोरिदम् । अण् ॥ त्रि । इक्षोर्विकारे । गुडादौ ॥ तदवयवे ॥ बिल्वादण् ॥

ऐक्ष्वाक. । पुं । सूर्यवंश्यन्नपे ॥ इक्ष्वाकोरपत्यम् । जनपदशब्दात्क्षत्रियादञ् । बहुत्वलुक् । इक्ष्वाकूणां दुरापेर्थेत्वदधीनाहिसिद्धय इतिप्रयोग: ॥ इक्ष्वाकुषु जनपदेषु भव: । कोपधादण् । अस्यबहुत्वेपिनलुक् । ऐक्ष्वाकेषु चमैथिलेषुच फलन्त्याकमवाणिषइतिमुरारि: ॥ दाण्डिनायनेत्युकारलोप: ॥

ऐङ्गुदम् । न । इङ्गुदीवृक्षस्यफले । हिंगोटा इतिभाषा ॥ इङ्गुद्याइदम् । प्लक्षादिभ्योऽणविधेर्नाणोलुक् ॥

ऐडविड । पुं । ऐलविले । कुवेरे ॥

ऐडूकम् । न । एडूके । सास्थिकुड्ये ॥ स्वार्थेऽण् ॥

ऐणम् । त्रि । एणस्य चर्मादौ ॥ एणस्य अवयवो विकारो वा । प्राणिरजतादिभ्योञ् ॥

ऐणिकः । त्रि । एणहन्तरि ॥

ऐणेयम् । त्रि । एण्यास्त्वगादौ ॥ एण्या मृग्याविकारोऽवयवो वा एण्याढञ् ॥ स्त्रीणांरतिवन्धविशेषे ॥

ऐतरेय । पुं । ऋग्वेदोपनिषदि । तच्छाखायाम् ॥ त्रि । इतराया अपत्ये ॥

ऐतरेयी । पुं । ऋग्वेदीयशाखाविशेषाध्यायिनि ॥

ऐतिह्यम् । न । इतिह । पारम्पर्योपदेशे ॥ तत्रानिर्दिष्टप्रवक्तृकं पारम्पर्यप्रवादमात्रम् इतिह ऊचुर्वृद्धा इति ऐतिह्यम् । यथेह वटे यक्ष: प्रतिवसतीति । इतिहेति निपातसमुदायः उपदेशपारम्पर्ये । तदेव । अनन्तावसथेतिहभेषजाञ्ञ्य ॥ यद्वा चतुर्वर्णादि...त्वात् । स्वार्थेष्यञ् ॥

ऐनसः । पुं । एनसि ॥ स्वार्थिकः प्रज्ञाद्यण् ॥

ऐन्दवम् । न । मृगशिरोनक्षत्रे ॥ त्रि । इन्दुसम्बन्धिनि ॥ इन्दोरिदम् । तस्येदमित्यण् ॥

ऐन्दवी । स्त्री । सोमराज्याम् ॥ ङीप् ॥

ऐन्द्र । पु । अर्जुने ॥ वालिवानरे ॥ दैवसर्गान्तरे ॥ त्रि । शक्रसम्बन्धिनि ॥ इन्द्रस्यायम् । तस्येदमित्यण् ॥ न । ज्येष्ठानक्षत्रे ॥ मूलविशेषे । वनार्द्रकायाम् ॥ इन्द्रदेवताकेहविरादौ ॥ इन्द्रोदेवतास्य । सास्यदेवतेत्यण् ॥

ऐन्द्रजालिकः । पु । मायाकारके । मायाविनि ॥ इन्द्रजालेन चरति । चरतीतिठञ् ॥

ऐन्द्रलुप्तिकः । त्रि । केशघ्नरोगविशिष्टे । खल्लीटे । गञ्जा इतिभाषा ॥

ऐन्द्रि । पुं । जयन्ते । इन्द्रपुत्रे ॥ काके ॥ अर्जुने ॥ वालिवानरे ॥ अपत्यार्थे इञ् ॥

ऐन्द्रियकम् । त्रि । प्रत्यक्षे । इन्द्रियग्राह्ये । इन्द्रियविषये ॥ इन्द्रियेणाऽनुभूयते । कुलालादित्वाद्वुञ् ॥

ऐन्द्री । स्त्री । शच्याम् ॥ दुर्गायाम् ॥ अलक्ष्म्याम् ॥ एलायाम् ॥ इन्द्रवारुण्याम् । राखालसशा इतिगौडभाषा । इन्द्रायण इतिभाषा ॥ प्राच्यान्दिशि ॥ इन्द्रस्येयम् । तस्येदमित्यण् ।

टिड्ढेतिङीप् ॥

ऐभी । स्त्री । हस्तिघोषायाम् ॥

ऐर. । पुं । मण्डे ॥ इराअन्नम् तन्मयः ॥ न । ऐरंमदीयंसर इतिश्रुतिप्रसिद्धे मण्डेन पूर्णे मदकरे ब्रह्मलोकस्थे सरसि ॥

ऐरण्डम् । न । एरण्डस्यफले ॥

ऐराकः । पुं । खुरासानमध्येम्लेच्छदेशविशेषे ॥ तन्मध्ये चोत्तरे देवि ऐराक' परिकीर्त्तितः । तन्मध्ये खुरासानमध्ये इति तन्त्रशास्त्रम् ॥

ऐरावणः । पुं । अभ्रमातङ्गे । ऐरावते । इन्द्रगजे ॥ इरया उदकेन वणति- । वणशब्दे । पचाद्यच् । इरावण एव । स्वार्थे प्रज्ञाद्यण् ॥ यद्वा इरा सुरा वन मुदकं यस्मिन् । पूर्वपदादितिणत्वम् । इरावणे भवः । तत्रभव इत्यण् ॥

ऐरावतः । पुं । नारङ्गे ॥ लकुचद्रुमे ॥ नागभेदे ॥ पञ्चमास्य प्रथमेऽऽप्रभेदे ॥ शक्रदिमे । अभ्रमुवल्लभे । चतुर्दन्तगजे ॥ इराउदकानि सन्त्यस्मिन् । मतुप् । इरावान् समुद्रः । इरावत्यब्धौ भवः तत्रभवइत्यण् ॥ इरावत्या विद्युत इवायंवा । तस्येदमित्यण् ॥ न । महेन्द्रस्य ऋजुदीर्घशरासने ॥

ऐरावती । स्त्री । वटपत्रीवृक्षे ॥ विद्युति ॥ विद्युद्भेदे ॥ इराआप. सन्त्यस्य इरावान् मेघ. । तस्येयम् । तस्येदमित्यण् । ङीप् । ऐरावतेनैकदिक् । तेनैकदिगित्यण्वा ॥ उत्तरमार्गेनक्षत्र विशेषाणां संज्ञाविशेषे ॥ यथा । पुष्याश्लेषा तथादित्यावीथी चैरावतीस्मृतेति ॥

ऐरिणम् । न । पांशवलवणे ॥

ऐरेयम् । न । मद्यविशेषे ॥ त्रि । कुले ॥ इराया अपत्यम् । स्त्रीभ्योढक् ॥

ऐलः । पुं । चन्द्रवंशीये पुरूरवसि नृपे ॥ इलाया अपत्यम् । अण् ॥

ऐलवालुकम् । न । एलेये । वालुके । हरिवालुके । गन्धद्रव्यमिदम् एलवालुकमेव । स्वार्थेऽण् ॥

ऐलविल. । पु । कुबेरे । पुण्यजनेश्वरे ॥ इलविलाया' अपत्यम् । इडविलायावा अपत्यमितिविग्रहे । ऐडविलोपि । ऋष्यण्धोनदीत्यण् ॥ डलयोरेकत्वस्मरणादैडविलोपि । इडविडा अस्तिमातृत्वेन अस्येतिविग्रहे ज्योत्स्नादित्वादण् ऐडविडोपि ॥

ऐलेयम् । न । १ एवालुकनामगन्धद्रव्ये ॥ इलायाअपत्यम् । स्त्रीभ्योढक ॥

ऐशानी । स्त्री । ईशदिशि । ईशानकोणे ॥ ईशानस्येयम् । अण ङीप ॥

ऐश्वरम् । न । अघटनघटनाचातुर्ये ॥ त्रि ॥ ईश्वरसम्बन्धिनि ॥ ईश्वरस्येदम् । अण् ॥

ऐश्वरी । स्त्री । ईश्वरसम्बन्धिन्यांशक्तौ ॥

ऐश्वर्यम् । न । विभूतौ । अणिमाद्यष्टसिद्धिषु ॥ सात्त्विकोबुद्धिधर्मऐश्वर्यम् । यतोऽणिमालघिमामहिमाप्राप्तिप्राकाम्यवशित्वेशित्वकामावसायित्वानां प्रादुर्भावः । ऐश्वर्या द्विघात इच्छाया भवति । ईश्वरोहि यदेवेच्छतितत्करोति ॥ सम्पत्तौ ॥ नियन्तृत्वे ॥ ईश्वरस्यभावः । गुणवचनेतिष्यञ् ॥

ऐषमः । अ । वर्त्तमानवत्सरे । ऐसौंइ ति भाषा ॥ अस्मिन् संवत्सरे । सद्यः परुत्परार्यैषम इति इदमइश् समसण्प्रत्ययश्च संवत्सरे निपात्यते ॥

ऐषमस्तनः । त्रि । ऐषमोभवे ॥ ऐषमोह्यः श्वसोन्यतरस्यामिति शैषिकेष्वर्थेषु पक्षेट्युट्युलौ ॥

ऐषमस्त्यः । त्रि । ऐषमस्तने । ऐषमोभवे जाते इत्याद्यर्थेषु ॥ ऐषमोह्यसिति पक्षे त्यप् ॥

ऐहलौकिकम् । न । धने ॥ त्रि । इहलोकोपयोगिनि ॥ यथा । ऐहलौकिकमीहन्ते मांसशोणितवर्द्धनम् । पारलौकिककार्येषु प्रसुप्ताभृशना-

स्तिका इतिमहाभारते पावकाध्ययनम् ॥ इहलोकेभवम् । अध्यात्मादेठञिष्यते ॥

ऐहिकः । त्रि । इहलोकभवे प्रतिपन्नशरीरसम्बन्धिनि स्रक्चन्दनवनिता-गृहक्षेत्रपशुभृत्यादिविषयजन्य-सुखदुःखादिस्वरूपेभोगे ॥ इहभवम् । कालाट्ठञ् ॥

ओः

ओ । अ । सम्बोधने ॥ आह्वाने ॥ स्मरणे ॥ अनुकम्पायाम् ॥ ओकारे ॥

ओः । पुं । ब्रह्मणि ॥ इत्येकाक्षरकोषः ॥

ओकः । पुं । शकुन्ते ॥ वृषले ॥ उचेरिगुपधलक्षणेके गुणः कुत्वञ्च ओकउचः के इतिनिपात्यते ॥

ओकणः । पुं । } केशकीटे । यूकायाम्
ओकणिः । पुं । } । जूं इतिभाषा ॥

ओकः । न । पुं । आश्रयमात्रे ॥ गृहे । मन्दिरे ॥ उच्यते समवैत्यत्र । उचसमवाये । असुन् । गुणः । न्यङ्क्वादित्वात् कुत्वम् ॥

ओघः । पुं । प्रवाहे । जलस्य वेगे ॥ वृन्दे । सङ्घाते ॥ परम्परायाम् ॥ द्रुतनृत्ये ॥ नृत्यद्रुत्युपलक्षणं गीतवाद्ययोः ॥ ओचनम् । उच० । घञ् । पृषोदरादित्वात्घः ॥ वहतिवा । वह० । पचाद्यच् । न्यङ्क्वादित्वात् साधुः ॥ यद्वा । आऊह्यतेऽनेन । ऊह० । हलश्चेतिघञ् ॥ उपदेशे ॥ काखाख्यायांतुष्टौ ॥ यथा । प्रव्रज्यापि न सद्यो निर्वाणदेति वै व कालपरिपाकमपेक्ष्य सिद्धिं ते विधास्यति अलमुत्तसतया तवेत्युपदेशेया आध्यात्मिकातुष्टि साकाख्या ओघ उच्यते ॥

ओङ्कारः । पुं । प्रणवे । वेदितव्ये ब्रह्मणि वेदनसाधने ॥ अवति । अवरक्षणादौ । अवतेष्टिलोपश्चेति मन् । मनप्रत्ययस्यैवायं टिलोपो न तु प्रकृतेः । अन्यथाऽडिदित्येव ब्रूयात् । ज्वरत्वरेत्यूट् । गुणः । वषट्कार इति लिङ्गात् समुदायादपि कारप्रत्ययः ॥ अत्राह्वापस्तम्बः ॥ ओङ्कारः स्वर्गद्वारं तद्ब्रह्माऽध्येष्यमाण एतदादि प्रतिपद्येत विकथां चान्यां कृत्वा एवं लौकिक्यावाचाव्यावर्तते इति ॥ लौकिक्यावा चाव्यावर्तते तयामिश्रितं न भवतीत्यर्थः ॥

ओङ्कारा । स्त्री । बुद्धशक्तिविशेषे । तारायाम् ॥

ओज. । पुं । विषमसङ्ख्यायाम् ॥ ओजेनौजसमःपादे ॥ इ्ंभरतादयः ॥

ओजतिथिः । पुं । विषमतिथौ ॥

ओजः । न । दीप्तौ ॥ अवष्टम्भे ॥ प्रकाशे ॥ प्राणबले । निजबले । सामर्थ्ये ॥ प्रथमतृतीयपञ्चमसप्तमनवमैकादशराशिषु ॥ धातुतेजसि ॥ शुक्लादिकौशले ॥ ज्ञानेन्द्रियाणां पाटवे ॥ काव्यगुणे गौडीरीत्याम् ॥ तल्लक्षणम् । बहुसमाससंयुक्तवर्णपदाडम्बरः । यथा ओजःप्रसादमाधुर्यगुणातितयभेदतः । गौन्वैदर्भपाञ्चालीरीतयः परिकीर्तिताः ॥ ओजस्समासभूयस्त्वं मांसलं पदडम्बरम् ॥ तस्योदाहरणं यथा । गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्फणिस्फूर्जतफूत्कृतिभीतिसम्भृतचमत्कारस्फुरत्सम्भ्रमा। आनन्दाम्बुवापिकां विदधती चित्तं गिरीशप्रेशो त्वां पायान्नवसङ्गमे भगवती ज्जावती मावृतीति ॥ रसादिस्तधातुसारभागजधातुविशेषे ॥ यथा । हृदि तिष्ठति यच्छुद्धं रक्तमीषत्सपीतकम् । ओजश्शरीरे सङ्ख्यातं त

नानानानाम गच्छति ॥ भ्रमरैःफल पुष्पेभ्यो यथासम्भ्रियतेमधु । तद्वदोजश्शरीरेभ्योधातुःसम्भ्रियतेनृणामितिवैद्यकशास्त्रम् ॥ उब्जत्यनेन । उब्जआर्जवे । उब्जेर्बलेवलोपश्चेत्यसुन् ॥

ओजिष्ठ. । त्रि । ओजस्विनि ॥ सारतमे ॥ उभयत्र विन्यन्ता दोजस्विशब्दादिष्ठन् । विन्मतोर्लुगिति लुक् टिलोपश्च ॥

ओडवः । पु । पञ्चस्वरयुक्तरागे ॥ सतु ऋ प वर्जितः । ष ग म ध नि युक्त. । यथा मल्लारादयः ॥ इतिसङ्गीतदामोदरः ॥

ओडिका । स्त्री । उडिधान् इतिगौडभाषामसिद्धे धान्यविशेषे । नीवारे ॥

ओडी । पुं । ओडिका धान्ये ॥

ओड्र' । पुं । जवापुष्पे ॥ जवापुष्प वृक्षे ॥ जने ॥ आङ्पूर्वदुनत्ति । उन्दी । स्फायितञ्चीतिरक् । बाहुलकाद्दस्यडत्वम् ॥

ओड्राः । पुं । भूम्नि । उडीसा इति प्रसिद्धे नीवृद्विशेषे ॥

ओड्रपुष्पम् । न । ओडर गुडहर इतिप्रसिद्धायांजवायाम् । जपावृक्षे ॥ ओड्रं पुष्प मस्य । ओड्रपुष्पकुसुमप्रियेम्बिके इतिकरानन्दः ॥

ओड्राख्या । स्त्री । जवावृक्षे ॥

ओतः । त्रि । पटेदीर्घतन्तौ ॥ अन्तर्व्याप्तौ ॥

ओतुः । पुं । स्त्री । विडाले ॥ अवतिविष्ठाम् आखुभ्योगृहंवा । अवरक्षणादौ । सितनीतितुन् । ज्वरत्वरेत्यूठ् । गुणः ॥

ओतुमदः । पुं । मार्जारधर्मे ॥

ओदनः । पु । न । अन्ने । भक्ते । भात इति भाषा ॥ उनत्ति । उन्दी० । उन्देर्नलोपश्चेति युच् ॥ यद्वा ऊर्द्दतेऽनेन । ऊर्द्दक्रीडायाम् । करणे ल्युट् । पृषोदरादिः ॥

ओदनपाकी । स्त्री । ओषधिविशेषे । नीलझिण्टयाम् ॥ पाककर्णेतिङीष् ॥

ओदनाह्वा । स्त्री । महासमङ्गायाम् ॥

ओदनिका । स्त्री । महासमङ्गायाम् ॥ बलायाम् ॥

ओदनी । स्त्री । बलायाम् ॥

ओद्म. । पुं । उन्दने ॥ उन्दी० । औणादिके मन् प्रत्यये । अवोदैधोद्म प्रश्रथहिमश्रथा इतिनलोपोगुणश्च निपातितः ॥

ओम् । अ । उपक्रमे ॥ प्रणवे ॥ अभ्युपगमे । अनुमतौ ॥ अपाकृतौ । अस्वीकारे ॥ मङ्गले । शुभे ॥ वेद्यब्र

शक्तिवेदनसाधने ॥ अवति । अव-रक्षणादौ । अवतेष्टिलो पश्चेतिस न् । मनएवट्टिलोपः । अ स्वरेभ्यू ढ् । गुणः ॥

ओलः । पुं । अर्शोघ्ने । शूरणे । कन्दे ॥ त्रि । आर्द्रे । गीला भीजा इतिच भाषा ॥

ओल्लः । पुं । ओले । शूरणे ॥ ग्राम्यकन्दस्तु दोषलः ॥ त्रि । आर्द्रे । आला गीला इतिचभाषा ॥

ओषः । पुं । दाहे प्लोषे । प्लोषे ॥ ओषणम् । उष० । घञ् ॥

ओषणः । पुं । कटुरसे । झाल इति-भाषा ॥

ओषणी । स्त्री । पुष्पा इतिगौडभाषा प्रसिद्धे शाकविशेषे ॥

ओषधिः । स्त्री । फलपाकान्ते कदल्यादौ । व्रीहियवादौ ॥ जातिमात्रविवक्षायां नो ष इत्यस्य प्रयोगो भवति ॥ ओषः पाकः आसु धीयतेऽत्र । डुधाञ्० । कर्मण्यधिकरणेच कि । किः ॥

ओषधिप्रस्थः । पुं । हिमालयस्य न-गरविशेषे ॥

ओषधी । स्त्री । फलपाकान्ते व्रीहियवादौ ॥ क्तिप्रत्ययान्तात् कृदिकारादितिङीष् ॥ जातिमात्रविवक्षाया अस्य प्रयोगो भवति । ओषध्यः पञ्चधाख्याता लतागुल्मास्तु शाखिनः । पादपाः प्रसराश्चेति तेषां वक्ष्यामि लक्षणम् ॥ गुडूच्याद्या लताः प्रोक्ताः गुल्माः पर्पटकादयः । आम्राद्याः शाखिनो ज्ञेया वटाश्वत्थादि पादपाः ॥ कण्टकार्य्यादिकाः सर्वाः प्रसरा इति कीर्त्तिताः

ओषधीपतिः । पुं । इन्दौ । चन्द्रमसि ॥ ओषधीनांपतिः ॥

ओषधीशः । पुं । ग्लावि । चन्द्रे ॥ ओषधीनामीशः ॥ कर्पूरे ॥

ओष्ठः । पुं । दशनवाससि । रदनच्छदे । ऊपरला होठ इतिभाषा ॥ अधरे । नीचला ओठ होठ इतिच भाषा ॥ उष्यते उष्णाहारेण । उष० । उषिकुषीतिथन् ॥

ओष्ठपुष्पः । पुं । बन्धूकपुष्पवृक्षे ॥

ओष्ठरोगः । पुं । आस्यरोगान्तर्गतौष्ठभवव्याधौ ॥ विशेषोस्यनिदाने ॥

ओष्ठी । स्त्री । बिम्बफले । कँदूरी इतिभाषा ॥

ओष्ठोपमफला । स्त्री । बिम्बिकायाम् । कँदूरी इतिभाषा ॥ ओष्ठोपमानि फलान्यस्याः ॥

ओष्ठ्रः । पुं । ओष्ठभवे वर्णे ॥ त्रि । ओष्ठहिते ॥ ओष्ठेभवः । शरीराव

यवाग्वेति यत् ॥ ओष्ठयोश्चितः । श
रीरावयवाद्यत् ॥

औष्णम् । त्रि । ईषदुष्णे ॥ आउष्णम् ॥

औ:

औ । अ । आह्वाने ॥ सम्बोधने ॥ वि
रोधे ॥ निर्णये ॥ शूद्राणां प्रणवे ॥
यथा । चतुर्दशस्वरो योसौ सेतुरौ
कारसंज्ञितः। सचानुस्वारनादाभ्यां
शूद्राणां सेतुरुच्यते इतिकालिका
पुराणम् ॥ औकारे ॥

औः । पुं । अनन्ते ॥ निस्वने ॥ स्त्री ।
विश्वम्भरायाम् ॥

औक्थिक: । पुं । उक्थाध्ययनकर्त्तरि ॥
उक्थमधीते वेदवा । क्रतूक्थादी
ति ठक् ॥

औक्थिक्यम् । न । औक्थिकानां धर्मे
॥ तेषामाम्नायेपि॥ छन्दोगौक्थिके
तिञ्यः ॥

औक्षम् । न । वृषसमूहे ॥ उक्ष्णां स
मूहः तस्यसमूहइत्यण् । औक्ष
मनपत्य इतिटिलोपः ॥ अपत्येतु ।
औक्ष्ण: । षपूर्वहन्नेत्यल्लोपः ॥

औक्षकम् । न । उक्ष्णां समूहे । वृ
षवल्वे ॥ गोत्रोक्षोष्ट्रेति-वुञ् ॥

औखम् । त्रि । स्थालीपक्वे ऽन्नादौ ।
पिठरपक्वे ॥ उखा मेव स्वार्थष्यञ् ॥

औचिती । स्त्री । औचित्ये ॥ सत्ये
॥ उचितस्य भावः । ब्राह्मणादित्वा-
त्ष्यञ् । ङीप् । हलस्तद्धितस्येति
यलोपः ॥

औचित्यम् । न । उचितत्वे । योग्य
त्वे ॥ सत्ये ॥ उचितस्य भावः ।
ब्राह्मणादेराकृतिगणत्वात् ष्यञ् ॥

औजसिक: । पुं । शूरे ॥ ओजसा वर्त्त
ते । ओजस्सहोम्भसावर्त्तत इति-
ठक् ॥

औड्र: । पुं । ओड्रदेशोद्भवे आदौ
क्षत्रिये पश्चाद्ब्राह्मणादर्शनेन क्रिया
लोपादिनाच शूद्रत्वमापन्ने दस्युप-
दवाच्ये ॥ त्रि । ओड्रदेशजे ॥

औत्कर्ष्यम् । न । उत्कर्षतायाम् ॥ भा
वे ब्राह्मणादित्वात् ष्यञ् ॥

औत्तरपथिक: । त्रि । उत्तरपथेनाहृ-
ते ॥ तेनगच्छति उत्तरपथेनाहृत
ञ्चेति ठञ् ॥

औत्तरपदिक: । त्रि । उत्तरपदग्राहि
णि ॥ उत्तरपदं गृह्णाति । ठक् ॥

औत्तराह: । त्रि । उत्तरस्मिन्काले भ
वः ततआगतोवा॥ उत्तरादाहञ् ॥

औत्तरेय: । पुं । परीक्षिन्नृपतौ ॥ उत्त

राया: अपत्यम्। स्त्रीभ्योढक्॥

औत्तानपादि:। पुं। ध्रुवे। स्वायम्भुव मनो:पौत्रे॥ उत्तानपादस्यापत्यम्। इञ्॥

औत्सर्गिक.। त्रि। उत्सर्गार्हे॥ सामान्यविधिरुत्सर्ग.। उत्सर्गमर्हति। ठञ्॥ सामान्यत्वे॥

औत्सुक्यम्। न। उत्कण्ठायाम्॥ उत्सुकस्य कर्मभावोवा। ष्यञ्॥

औदनिक:। त्रि। सूपकारे॥ ओदनं शिल्पमस्य। शिल्पमिति ठञ्॥

औदमेयि:। पुं। उदमेयस्यापत्ये॥ अतइञ्॥

औदमेयी। स्त्री। उदमेयजातौ॥ इञन्तात् इतोमनुष्यजातेरिति ङीष्॥

औदरिक:। त्रि। उदरमात्रपूरके। आद्यूने। पेटार्थी इतिभाषा॥ अत्यन्तबुभुक्षिते। बुभुक्षयात्यन्तपीडिते॥ उदरे प्रसित:। उदराट्ठगाद्यूनइतिठक्॥

औदश्वितम्। न। अर्द्धजलयुक्ते घोले॥ त्रि। उदश्विति संस्कृते॥ उदश्वितोन्यतरस्यामिति पक्षेऽण्॥

औदश्वित्क:। पुं। औदश्विते॥ उदश्विति संस्कृतम्। उदश्वितोन्यतरस्यामिति ठक्। इसुसुक्तान्तात् क:॥

औदार्यम्। न। उदारतायाम्॥ उदारस्यभाव.। गुणवचनेति ष्यञ्॥

औदासीन्यम्। न। शुभाशुभयोरुपेक्षायाम्॥ ताटस्थ्ये॥ उदासीनस्यभाव:। ष्यञ्॥

औदास्यम्। न। अकर्त्तृत्वे॥ वैराग्ये। अनुरागादिशून्यतायाम्॥ मनोयोगाभावे॥

औदुम्बर:। पुं। आद्यदेवे। यमे॥ न। कुष्ठरोगप्रभेदे॥ तस्यलक्षणम्। रुगदाहरागकण्डूभि: परीतं रोमपिञ्जरम्। उदुम्बरफलाभास कुष्ठमौदुम्बरं वदेदिति॥ ताम्रे॥ उदुम्बरमेव। प्रज्ञाद्यण्॥ यच्चाक्षशाखिन:फलादौ॥ फलमौदुम्बरं बाल मल्लतक्रेणसाधितम्। वेसवारभृते सा पे पाचितं सैन्धवान्वितम्॥ शीतं कषायं मधुरं रक्तपित्तप्रणाशनम्। मूत्रकृच्छ्रहरंसक्षयग् विवन्धाध्मानकारकम्॥ उदुम्बरस्या वयवोविकारो-वा। प्राणिरजतादिभ्योऽञ्॥ त्रि। ताम्रजे पात्रादौ॥

औद्गात्रम्। न। सामवेदविहिते उद्गातु: कर्मणि भावेच॥

औद्दालकम्। न। वल्मीककीटसम्भृते मधुनि॥ प्रायोवल्मीकमध्यस्था: कपिला: स्वल्पकीटका:। कुर्वन्तिकपिलं स्वल्पंतत् स्यादौद्दाल-

कंमधु ॥ औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम्। कषायमुष्णमम्लं-च्व कटुपाकञ्चपित्तकृत् ॥

औद्दालकि । पुं । गौतमे ॥ उद्दालकस्यापत्यम् । अतइञ् ॥ आरुणी ॥

औद्धत्यम् । न । अविनीतभावे ॥ उद्धतस्य भावः । ष्यञ् ॥

औद्भिज्जम् । न । पांशवलवणे ॥

औद्भिदम् । न । रेह इति प्रसिद्धे पांशुलवणे ॥ औद्भिदं पांशुलवणं यज्जातंभूमितः स्वयम् । चारं गुरुकटु स्निग्धं श्लेष्मलंवातनाशनम् ॥ औमस्य पानीयस्य प्रभेदे ॥ यथा । विदार्य्य भूमिं निम्ना यन्महत्याधारया स्रवेत । ततोऽस्मौद्भिदं नाम वदन्तीति महर्षयः ॥ औद्भिदंवारि पित्तघ्न मविदाह्यतिशीतलम्। प्रीणनं मधुरं वल्यमीषद्वातकरं लघु इति ॥

औद्वाहिकम् । न । उद्वाहसम्बन्धिधने ॥ भार्य्याप्राप्तिकाले लब्धेभार्याधने ॥ तद्भ्रातृभिरविभाज्यम्। यथाच्च याज्ञवल्क्यः। पितृद्रव्याविनाशेनयदन्यत् स्वयमर्जयेत्। मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेदिति॥

औपगवः । पुं । उपग्वपत्ये ॥ उपगोरपत्यम्। तस्यापत्यमित्यण् ॥ उपसमीपे गौ र्यस्य इति उपगुर्गोपः । लक्षणया ततपुरोहितोऽपि। यथाह हारीतः । यंवर्णं याजयेद्यस्तु सत दर्णंत्वमाप्नुयात् । सद्योवर्णेण वर्षैश्चेच्चेवमेवाब्रवीद्गुरुः ॥ तथाच लक्षणया ब्राह्मणोप्युपगुपदवाच्यः । तस्या पत्य मौपगवः ॥ इति श्रीधरस्वामिन ॥

औपगवकम् । न । औपगवानां समूहे ॥ गोत्रोचोष्ट्रेतिवुञ् ॥

औपचारिक । त्रि । उपचारार्थे ॥ विनयादित्वात् स्वार्थेठक् ॥

औपच्छन्दसिकम् । न । वैतालीयच्छन्दोविशेषे ॥ तत्रैवान्ते ऽधिकेगुरौ स्यादौपच्छन्दसिकं कवीन्द्रहृद्यमितिलक्षणम् ॥ यथा । आतन्वानंसुरारिकान्ता स्वौपच्छन्दसिकं हृदाविनोदम् । कंसं योनिर्जघानदेवो वन्देतं जगतां स्थितिं दधानमिति ॥ पुष्पिताग्राभिधंकेचिदौपच्छन्दसिकं विदुः ॥ अन्यच्च । विषमे ससजा गुरू समेचेत साययाच्छन्दसिकं तदौपपूर्वम् । यथा । आरागमयी वपुस्तमिस्रा परितस्तारत्वेरसत्यत वच्यम् । प्रियमापदिवापिकोकिलेखी परितस्तारत्वेरसत्यवच्यमिति ॥

औपधेयम् । न । उपधौ । रथाङ्गे ॥ छ्दिरुपधीतिस्वार्थेढञ् ॥

औपनिधिकम् । न । उपनिधौ । प्रीत्याभोगार्थमर्पिते द्रव्ये ॥

औपनिषद' । त्रि । श्रुतिवेद्ये परमात्मनि ॥ उपनिषदा दृश्यते गृह्यते वा । उपनिषदो व्याख्यान स्तत्रभवो वा । शेषइति अध्यात्मगयनादिभ्यइति वा । अण् ॥

औपनिषदम्मन्यः । पुं । भर्त्तृप्रपञ्चे ॥ अयंवेदान्तैकदेशी ॥ त्रि । अन्यत्र ॥

औपनीविकम् । त्रि । नीविसमीपे व्यापृते ॥ भवार्थे उपजानूपकर्णोपनीवेष्ठक ।

औपमन्यवः । पुं । प्राचीनशाखाख्यर्षौ ॥ उपमन्योर्गोत्रापत्यम् । विदाद्यञ् ॥

औपम्यम् । न । अनुहारे । उपमायाम् । साम्ये ॥ उपमैव । चतुर्वर्णादित्वात्ष्यञ् ॥

औपयिकः । त्रि । उपयुक्ते ॥ न्यायागतवस्तुनि । लभ्ये ॥ उपायन्त्यनेन । अयगतौ । हलश्चेति घञ् ॥ उपायएव । उपायो ह्रस्वत्वञ्चेतिठक्ह्रस्वश्च ॥

औपरोधिकः । पुं । पीलुदण्डे । मैलवे ॥ त्रि । उपरोधसम्बन्धिनि ॥

औपवस्तम् । न । उपवासे ॥ उपवस्तमेव । प्रज्ञाद्यण् ॥

औपवस्त्रम् । न । उपवासे । भोजनाऽभावे ॥ उपवसति । तृच् । उपवस्तुरिदंकर्म । तस्येदमित्यण् । माषान्मधुमसूराँश्चवर्जये दौपवस्त्रकमितिस्मृतिः ॥

औपसर्गिकः । पुं । सन्निपातरोगविशेषे ॥ तस्यलक्षणम् । कफोनुलोमवातेन यदिपित्तानुगो भवेत् । स्वेदश्वासादिभिर्जुष्ट स्तदाभवतिमानवः॥ प्रतिलोमः पुनस्तेनस्वास्थ्यमायातितत्क्षणात् । औपसर्गिकएवान्य सन्निपातउदाहृत इति ॥ त्रि । उपसर्गसम्बन्धिनि ॥

औपस्थ्यम् । न । उपस्थेन्द्रियसुखे ॥

औपानह्यः । पुं । मुञ्जे ॥ न । चर्मणि ॥ उपानहे अयम् । ऋषभोपानहो-र्ञ्यः ॥

औमीनम् । त्रि । उम्ये ॥ उमानाम्भवनं क्षेत्रम् । विभाषातिलमाषोमेति खञ् ॥

औरगम् । न । फणिभे ॥ त्रि । सर्पसम्बन्धिवस्तुनि ॥ उरगस्येदम् । अण् ॥

औरभ्रः । पुं । कम्बले । रल्लके ॥ उरभ्रस्य इदम् । अण् ॥

औरभ्रकम् । न । मेषवृन्दे ॥ उरभ्राणां समूहः । गोत्रोक्षोष्ट्रोरभ्रेतिवुञ् ॥

औरभ्रिकः । त्रि । मेषजीवने ॥

औरसः । पु । स्त्री । उरस्ये । स्वात्मजे । ऊढसवर्णायां जनितापत्ये ॥ यथा । सवर्णया संस्कृतायां स्वयमुत्पादयेत्तु यम् । औरसं तं विजानीयात् पुत्रप्रथमकल्पितमिति ॥ उरसानिर्मितः । उरसोऽण् चेत्यण् ॥

औरसिकः । त्रि । उर इवेत्यर्थे ॥ अङ्गुल्यादिभ्यष्ठक् ॥

और्द्धदेहिकम् । त्रि । और्द्ध्वदेहिके ॥ केचिदस्यानुशतिकादिषु पाठं नेच्छन्ति ॥

और्द्ध्वदेहिकम् । त्रि । प्रेतकर्मणि । प्रेतदाने । प्रेतमुद्दिश्य मरणदिनमारभ्य सपिण्डीकरणपर्यन्तं प्रत्यहं दीयमाने जलपिण्डादौ । मृतार्थं तदूर्ह्वदानं त्रिषु स्यादौर्द्ध्वदेहिकम् ॥ देहादूर्द्ध्वः ऊर्द्धदेहः । राजदन्तादिः । उर्द्ध्वदेहेभवम् । अध्यात्मादित्वाट्ठञ् । अनुशतिकादित्वादुभयपदवृद्धि. ॥

और्द्ध्वस्रोतसिक. । त्रि । शैवे ॥ इति त्रिकाण्डशेष. ॥

और्व्व. । पुं । वाडवानले ॥ सतुभूगोलस्य दक्षिणसीमा । तत्र सर्वे नरकाः दैत्याश्चवसन्ति ॥ पञ्चप्रवरान्तर्गत मुनिभेदे ॥ उर्वस्य मुनेरपत्यम् । ऋष्यण् । गोत्रापत्ये विदाद्यञ् ॥ न । पार्थिवलवणे ॥

और्व्वरः । त्रि । भौमे । रजसि ॥

और्व्वशेयः । पुं । अगस्त्यमुनौ ॥

औलूकम् । न । पेचकसमूहे ॥ उलूकानां समूहः । खण्डिकादित्वादञ् ॥

औलूक्यः । पुं । वैशेषिके । वैशेषिकदर्शनाभिज्ञे ॥

औशनसम् । न । शास्त्रविशेषे । विचित्रनिर्माणप्रतिपादके शिल्पशास्त्रे ॥ उशनसा प्रोक्तम् । तेनप्रोक्तमित्यण् ॥ उपपुराणविशेषे ॥

औशिज' । पुं । उशिजि ॥ स्वार्थिकः-प्रज्ञाद्यण् ॥

औशीरम् । न । शयनासने ॥ शयनं-खाट. शय्या वा । आसनम्पीठादि । खाटपीठयोः समुदितयोरियं संज्ञा ॥ चामरे ॥ दण्डे ॥ पुं । चामरदण्डे ॥ त्रि । उशीरजे ॥ उश्यते । वशकान्तौ । वशः किदिति ईरन् । प्रज्ञाद्यण् ॥ यद्वा । उशीरस्येदम् । तस्येदमित्यण् ॥

औषधम् । न । रोगनाशकद्रव्ये । भेषजे । जायौ । अगदे ॥ सर्वै. प्राणिभिर्भुज्यमाने ओषधिप्रभवेऽन्ने ॥ रोगहृत्त्वेन द्रव्यमात्रविवक्षाया मौषधशब्दप्रयोगः । तेन घृततैलादिकमप्यौषधशब्दवाच्यमिति ज्ञेयम् ॥

अम्

औषधेरिदम् । औषधिरेव वा । औषधे रजाता विध्यण् ॥ शुण्ठ्याम् ॥

औषरम् । न । पांशवलवणे ॥

औषरकम् । न । सार्वगुणे । मृत्तिका लवणे । खारीलोन खारीनून इति च भाष

औषसः । त्रि । प्राभातिके ॥ अनुदितौषसराग इति औषसातपभयादिति च भारवि र्लक्ष्यम् ॥ उषसिभवः । सन्धिवेलेत्यादिनायोगविभागादण् । अन्यथा कालाट्ठञ् स्यादितिव्याख्यातारः । अपभ्रंश एवायमिति प्रामाणिकाः ॥

औष्ट्रम् । त्रि । उष्ट्रसम्बन्धिनि ॥ औष्ट्रं दुग्धं लघु स्वादु लवणं दीपनं तथा । कृमिकुष्ठकफानाहशोफोदरहरं सरम् ॥ उष्ट्रस्येदम् । अण् ॥

औष्ट्रकम् । न । उष्ट्रसमूहे ॥ तस्यसमूह इत्यर्थे गोत्रोक्षोष्ट्रेतिवुञ् ॥ उष्ट्रस्य विकारोऽवयवोवा । उष्ट्राद्वुञ् ॥

औष्ठ्य. । त्रि । ओष्ठभवे ॥ शरीरावयवाच्चेति यत् ॥

अम् । न । परे ब्रह्मणि ॥ अनुस्वारे । पञ्चदशे स्वरे ॥ बिन्दुमात्रानुनासिकवर्णोयम् । अत्राकार उच्चारणार्थः । अयं नकारमकारस्थानेपि भवति ॥

कः

अः । पुं । महेश्वरे ॥ विसर्गे । षोडशे स्वरे ॥ द्विबिन्दुमात्रः कण्ठ्यवर्णोयम् । अत्राकार उच्चारणार्थ. । अयं रेफसकारस्थानेपि भवति ॥

इत्यादिगौडकुलोत्पन्नाडीचवालप्रधानोपनामतुलाराममिश्रात्मजश्रीधनपति मिश्रापरनाम्ना तथा श्रीसद्गुरुकुलावधूतश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्धरिहरानन्दनाथभारतिशिष्येण ब्राह्मावधूतश्रीसुखानन्दनाथपरनामधेयेन विरचितेशब्दार्थचिन्तामणौ वर्गः समाप्तिङ्गत. ॥ १ ॥

तत सत्

कः । पुं । ब्रह्मणि ॥ समीरे ॥ आत्मनि ॥ यमे ॥ दक्षप्रजापतौ ॥ भास्करे ॥ कामग्रन्थौ ॥ चक्रिणि । नारायणे ॥ पतत्रिणि । खगे ॥ पार्थिवे ।